CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

Poona Oriental Series No. 43

श्रीः

श्रीमदमरसिंहविरचितम्

नामलिङ्गानुशासनम्

भट्टक्षीरस्वामिप्रणीतेनामरकोशोद्घाटनेन सहितम् ।

AMARA'S

NĀMALIṄGĀNUŚĀSANAM

WITH

The commentary Amarakos'odghāṭana

OF

Bhaṭṭa Kṣīrasvāmin

Critically edited with Introduction, English equivalents, and various Indices.

BY

Vidyāsudhākara Dr HAR DUTT SHARMA, M.A., Ph.D.

Professor of Sanskrit,

HINDU COLLEGE, DELHI

AND

Dr N. G. SARDESAI, L.M. & S.

POONA

ORIENTAL BOOK AGENCY

1941

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

STATE MUSEUM, LUCKNOW

LIBRARY

Acc. No. _____

Book No. _____

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

Poona Oriental Series No. 43

श्रीः

श्रीमदमरसिंहविरचितम्

नामलिङ्गानुशासनम्

भट्टक्षीरस्वामिप्रणीतेनामरकोशोद्घाटनेन सहितम् ।

AMARA'S

NĀMALIṄGĀNUŚĀSANAM

WITH

The commentary Amarakos'odghāṭana

OF

Bhaṭṭa Kṣīrasvāmin

Critically edited with Introduction, English equivalents, and various Indices.

BY

Vidyāsudhākara Dr HAR DUTT SHARMA, M.A., Ph.D.

Professor of Sanskrit,

HINDU COLLEGE, DELHI

AND

Dr N. G. SARDESAI, L.M. & S.

POONA

ORIENTAL BOOK AGENCY

1941

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

All rights reserved by the Publisher

Printed by :—S. R. Sardesai, B.A., LL.B., Navin Samarth Vidyalaya's 'Samarth Bharat Press', 41 Budhwar Peth, Poona 2.

Published by :—Dr. N. G. Sardesai, L. M. & S.,
for the Oriental Book Agency, 15 Shukrawar Peth, Poona 2.

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

॥ श्रीशिवः शरणं मम ॥

INTRODUCTION

अष्टाध्यायी जगन्माता अमरकोशो जगत्पिता ॥

There is little or no doubt as to the correctness of the statement given above. The नामलिङ्गानुशासन of अमरसिंह stands at the top of all the Sanskrit lexicons. The popularity of the work can be judged from the fact that Aufrecht mentions about forty commentaries on the work, and कविकाव्यकालकल्पना records sixty-nine. In the old orthodox method of teaching Sanskrit this work forms the first and almost the most important one which a student is required to commit to memory. And the trouble taken in its memorisation is more than amply repaid by the grasp over Sanskrit literature which a student acquires in maturer years. अमरसिंह has verily immortalised himself by this work.

Our author was a Buddhist. Tradition places him among the nine jewels of the court of the legendary king विक्रमादित्य. Hence, no definite date can be assigned to our author on the basis of the verse—धन्वन्तरिक्षपणकामरसिंहशङ्कुवेतालभट्टघटखर्परकालिदासाः, etc. We touch the sure ground of history when we learn that अमरकोश was translated into Chinese by गुणरात in the sixth century A. C.[1] क्षीरस्वामिन् implies that अमरसिंह was prior to the celebrated Buddhist grammarian चन्द्र or चन्द्रगोमिन् of Bengal. Therefore, अमरसिंह must be taken to have flourished prior to *circa* A. D. 450, when चन्द्रगोमिन्, the teacher of वसुरात, is supposed to have flourished.[2]

अमरकोश is divided into three काण्डs or sections which are subdivided into वर्गs. The प्रथमकाण्ड has nine वर्गs, viz., स्वर्, व्योमन्) दिश्, काल, धी, शब्दादि, नाट्य, पातालभोगि, नरक and वारि. The द्वितीयकाण्ड has ten वर्गs, viz., भूमि, पुर, शैल, वनौषधि, सिंहादि,

1. Kalpadrukośa, Vol. I. (edited by the late MM. Pt. Rāmāvatāra Śarmā, in the Gaekwad's Oriental Series, Vol. XLII), p. XVII.

2. D. R. B. in the Indian Antiquary, October 1912, reproduced in the edition of Mr. Oka. On चन्द्रगोमिन् see Dr. S. K. De's article published in the Indian Historical Quarterly, June 1938, pp. 258 ff.

 CC-0. Agamnigam Digital Preservation Foundation, Chandigarh

नृ, ब्रह्मन्, क्षत्रिय, वैश्य and शूद्र. The तृतीयकाण्ड has five वर्गs, viz., विशेष्यनिघ्न, संकीर्ण, नानार्थ, अव्यय and लिङ्गादिसंग्रह. अमरसिंह has taken the help of various works (समाहृत्यान्यतन्त्राणि) on medicine and botany, and those dealing with synonyms only (नाममात्र) or genders only (लिङ्गमात्र) of words, and has combined both the synonyms and genders in his work (नामलिङ्गानुशासनम्) 'Genders are indicated here by inflectional differences, joint occurence with other words or by words such as *strī*, *pumis*, etc., expressive of genders. In order that there be no confusion a word preceded by the partical *atha* or followed by *tu* is not to be taken with the preceding group of synonyms. In the synonymous portion the method followed is to put down in succession the various names of all that relate to the particular object or animal or class of objects or animals that give its name to the section. The homonymous portion is, on the other hand, arranged after the final consonants. Indeclinables form a separate chapter, while the last chapter is devoted to the general rules for determining genders.'[1]

As in other important works, so in अमरकोश also we find interpolations. In all the three काण्डs the total number of original verses is 1497½, and fortunately the number of the interpolated ones is so small as 58 only. क्षीरस्वामिन् does not comment upon the latter and these are printed here within inverted commas and their numbering is on the right hand side instead of the left.

The oldest and the most important of the commentaries on अमरकोश is that by क्षीरस्वामिन्, which is published here. It was first brought to light by the late Mr. K. G. Oka, whose pioneer work deserves all praise. Scholars have not yet been able to add to or detract from the information about the author and the commentator as given by Mr. Oka in the introduction to his edition (Poona, 1913). Hence, we reproduce its relevant portions below :—

Its interest mainly lies in the fact that Kshīrasvāmin quotes numerous authorities, sometimes without naming them, in support of his statements. The date of this commentator is now known. *He quotes Bhoja and is quoted*

1. Kalpadrukośa, Vol. I, pp. XVI-XVII.

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

by Vardhamāna in the Gaṇaratnamahodadhi, and therefore belongs to the second half of the eleventh century. He was a man of profound learning, proofs of his erudition being found on every page. He appears to have been a native of Central India from his use of the words प्राच्य, प्रतीच्य, उदीच्य, etc. His attachment to Rājaśekhara and to Śrī Bhoja makes this view highly probable. His mention of many words as Deśī, which are really found in the Hindi and other Northern dialects, points to the same conclusion. Kshīrasvāmin was a devotee of Śiva, as is obvious from the introductory verse and other indications in the commentary, and his name seems to have been suggested by the god Kshīreśvara Mahadeva at Kākupada near Kanoj. In his commentary, on page (77) he enumerates all the well-known towns situated in Central India. This circumstance may also be taken as confirmatory of the view that he was not a native of Southern India, but belonged to Central India.

A list of authorities quoted by him is given below :—

Lexicographical Authorities

1 Kātya
2 Muni
3 Bhāguri
4 Mālā and the Mālākāra
5 Nighaṇtu (*Vedic*)
6 Śāśvata
7 Amaramālā
8 Nāmamālā
9 Abhidhānakāra
10 Abhidhānaṣesha
11 Anekārtha
12 Śriharsha
13 Durga
14 Bhoja
15 Rudra

Commentators

1 Upādhyāya
2 Gauḍa
3 Bhoja
4 Achāryāh
5 Nārāyaṇah
6 Ṭikā.

Medical Authorities

1 Suśruta and Sauśrutāh
2 Vaidyāh (chiefly Charaka)
3 Dhanvantari and his Nighaṇtu (medical)
4 Vāhaṭa or Vāgbhaṭā
5 Chandra
6 Indu
7 Chandranandana
8 Dhātuvidah
9 Nimih
10 Haramekhalam.

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

Keśava in his Kalpadruma enumerates the Koṣakāras thus :—

कात्यवाचस्पतिव्याडिभागुर्यसरमङ्ग(क)लाः ।
साहसाङ्कमहेशाद्या विजयन्ते जिनान्तिमाः ॥

If the order, in which Keśava enumerates the names, may be taken as chronological, Kātya necessarily stands as foremost in time. He is cited with great respect and so often by Kshīrasvāmin as to suggest his priority to Amarasimha. We are told that the year begins with Hemanta :—हेमन्ताद्धि वत्सरस्यारम्भः, and Kshirasvāmin cites Kātya as his authority thus :

आदाय मार्गशीर्षाच्च द्वौ द्वौ मासावृतुः स्मृतः । (p. 35)

From this it would appear that Kātya is older than Amarasimha. The same remark may be made as regards Muni who may probably be identified with Vyāḍi. The third in the list is Bhāguri, as to whose priority to Amarasimha, Kshīrasvāmin thus remarks on p. (104) :—

बृहती तु निदिग्धिकेति भागुरिवाक्याद् ग्रन्थकृद् भ्रान्तः ।

On page 211 we meet with the remark of Kshīrasvāmin that Mālākāra was led astray by mistaking सर for शर in Bhāguri's statement :—एतच्च द्रप्सं शरम् and that this author i.e. Amarasimha, was in his turn misled by the latter. It is thus clear that in the opinion of Kshīrasvāmin, Bhāguri and the Mālākāra preceded Amarasimha. It may be pointed out here that the author of the Mālā is not only frequently quoted as an authority, but is sometimes adversely criticized by Kshīrasvāmin.

Śāśvata, as it contains Anekārtha Samuchchaya only, is an incomplete work though frequently quoted by Kshīrasvāmin. It is nevertheless much fuller than Amarasimha's Nānārthavarga, though in some places both agree word for word *e.g.* अनु and अनुबन्ध. On these grounds the Śāśvata may be regarded as a later work than the Amarakośa. According to the last verse in Prof. Zachariae's edition :—

महाबलेन कविना वराहेण च धीमता । सह सम्यक् परामृश्य निर्मितोऽयं प्रयत्नतः ॥

it was composed in consultation with Varāha who may be

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

identified with Varāhamihira. On page 169 Amarasimha says that आतिथ्य means अतिथ्यर्थं, while Kātya and Mālā say that आतिथ्यः means अतिथिः. Kshīrasvāmin adds that :—शाश्वतोऽत एवोभयमाह 'for this very reason Śāśvata gives both the meanings.' This constitutes a further proof of Śāśvata's posteriority to Amarasimha.

The next authority quoted by Kshīrasvāmin is Durga who together with Bhoja are his latest authorities. The Vedic Nighaṇṭu is twice quoted. The Amaramālā is thrice quoted though we know nothing as to its age and authorship. The Nāmamālā is thrice or four times quoted. Some quotations appear on pp. 110 and 215 which are ascribed to Rudra by Bhānuji Dīkṣita.

Among the commentators on Amarakośa, who preceded Kshīrasvāmin, are Upādhyāya, Gauḍa and Bhoja. According to Rādhākānta, Upādhyāya is Achyutopādhyāya whose commentary on Amarakośa is called Vyākhyā-pradīpa. Gauḍa was another commentator on Amarakośa before Kshīrasvāmin. Both these commentators are quoted and criticized. The third is Bhoja about whose commentary we know nothing. Nor do we know anything about the commentators Achāryāh, Nārāyaṇah, etc.

Medical Authorities

Since Kshīrasvāmin refers by name to Suśruta thus :—सुश्रुतस्त्वाह (p. 118), पवनेष्टोऽपीति सौश्रुताः (p. 96), it may be inferred that the frequent reference to वैद्याः may be intended generally for Charaka. The next medical authority after Charaka and Suśruta is Dhanvantari who in the opinion of Kshīrasvāmin is older than Amarasimha:—बालपत्रो यवासः खदिरश्चेति द्व्यर्थेषु धन्वन्तरिपाठमदृष्ट्वा बालपुत्रभ्रान्त्या ग्रन्थकृद्बालतनयमाह (p. 93). द्व्यर्थे–उपचित्रा दन्ती पृश्निपर्णी चेति। अत्र दन्त्यां द्रवन्तीभ्रान्त्या ग्रन्थकृदुपचित्रामाह (p. 103). पुष्करमूले त्रीणि नामानि। पद्मपत्रमिति ग्रन्थकृद् भ्रान्तः। पद्मवर्णेति लिपिभ्रान्त्या पद्मपर्णमिति बुद्धवान्। यदाह–मूलं पुष्करमूलं च पौष्करं पुष्कराह्वयम्। काश्मीरं पुष्करजटा धीरं तत्पद्मवर्णकम् (धन्वन्तरिः p. 117). शीतलवातक इत्येका संज्ञा यद्धन्वन्तरिः शणपर्णी शीतलवातक इत्याह। Amarasimha considers शीतलवातक as a compound and treats वातक and शीतल as separate terms for शणपर्णी (p. 119).

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh

From these and other similar remarks it is obvious that Dhanvantari, whose work is known as Nighaṇtu, must have preceded Amarasimha by a long interval. Vāhaṭa, or Vāgbhata who was a Buddhist, is thrice or four times referred to in this commentary. His reference to the Śaka kings being very fond of onions enables us to assign him to the second or third century A. D.

लशुनानन्तरं वायोः पलाण्डुः परमौषधम् ।
साक्षादिव स्थितं यत्र शकाधिपतिजीवितम् ॥
यस्योपयोगेन शकाङ्गनानां लावण्यसारादिव निर्मितानाम् ।
कपोलकान्त्या विजितः शशाङ्को रसातलं गच्छति निर्विदेव ॥

(अष्टांगसंग्रह उत्तरस्थान Ch. 49).

Other medical writers Chandra, Indu and Chandrananda-na are very frequently quoted; especially in his comments on the वनौषधिवर्ग, by Kshīrasvāmin. But nothing is known about their works. A गणनिघण्टु by Chandranandana is mentioned in a list of writers of medical Nighaṇṭus. Two or three references to Nimi show him to have been a medical writer about whom nothing definite is known. Nor do we know anything about the हरमेखलतन्त्र, (but see Index V) an ancient medical treatise mentioned on page (106). धातुविदः mentioned on page (222) may, for aught we know, be medical authors.

Grammarians

प्राच्याः, प्रतीच्याः and उदीच्याः are referred to here and there in this commentary. Pāṇini, Kātyāyana and Patanjali are of course frequently referred to. The grammarian Chandragomin is cited nearly nine or ten times. Not only does Kshīrasvāmin quote Kāṣikā but reproduces even its mistakes (see Comment. on सहायता and भग pp.268; 275). Lastly, the grammarian Bhoja is also quoted with great respect as श्रीभोज.

Philosophical Authors

The Dharmasūtras of Gautama are quoted on pp. 43 and 164; Jaimini's Pūrva-Mimānsā-Sūtra is quoted on p. 42; 43 Sānkhyaśāstra is referred to on page 38 while Sānkhya-kārikā is quoted on page 38. We find mention of the Vaiśeshika

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh

doctrine on page 38. Yoga-śāstra and its Sūtras are cited on pp. 20; and 285. The great Mimānsā-writer Kumārila-bhaṭṭa is quoted on pp. 43, 236; and 301. The seven principles recognised by the Jainas are mentioned on page 266; while Buddhism and its principles are mentioned on pp. 38 and 294.

Other authors and works quoted by Kshīrasvāmin in his commentary are too numerous to mention here. For the convenience of Sanskrit scholars, they are given in a separate list (Vide Appendix V).

The age of Amarasimha

In the Kālavarga, page 34, Amarasimha says :—

द्वौ द्वौ माघादिमासौ स्याद्दतुस्तैरयनं त्रिभिः।

Upon this Kshīrasvāmin remarks thus:-माघाद्युपक्रमस्ततोऽयनारम्भात्। It is obvious from this statement that in the days when Amarasimha lived or shortly before his time, the Sun's course to the North must have commenced in the month of Māgha. Similarly the other remark of Kshīrasvāmin :— हेमन्ताद्धि वत्सरस्यारम्भः may be taken as confirmatory of the same view. From this it may be inferred that Amarasimha must have flourished 15 or 16 hundred years ago. Another clue to his age is found in the fact that he, though a Buddhist, follows the Pāṇinian system of grammar. The line :—

शालार्थापि परा राजामनुष्यार्थादराजकात्। (p.352)

is a rendering of Pāṇini's well-known Sūtra सभाराजामनुष्यपूर्वा and not of Chandra's simpler and more intelligible Sūtra ईश्वरार्थादराज्ञःसभा. A justifiable inference from this and many other Sūtras is that Chandra's grammar was not before Amarasimha when he wrote his work. In this connection it is interesting to note the well-known line current amongst the orthodox Pandits :—अमरसिंहो हि पार्पायान् सर्वं भाष्यमचूचुरत्।

Kshīrasvāmin commenting on the word आप्य says :—

आप्यं तु लक्ष्यात्। अत एव—आप्यं वेति चान्द्रं सूत्रम्। (p. 61).

On page 229, while explaining मन्द, Kshīrasvāmin says :—

मन्दते स्वपितीव मन्दः। अत एव मदि जाड्य इति चान्द्रो-धातुः।

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

On page 224 the commentary has:–शशस्योर्णा शशोर्णं, गृहस्थूणवत्क्लीबे But here Kshīrasvāmin does not cite Chandra's Lingānuṣāsana which says :—शशोर्णं कारणं करम्। From these it may be inferred that Amarasimha preceded Chandragomin. Since Chandragomin, from whom the grammarian Vasurāta (A. D. 480) is said to have learnt grammar directly, belongs to the fifth century A. D., Amarasimha may be assigned to the fourth century A. D.

A correct explanation of the word जत्रु is found in Suśruta, Charaka and even in Vāgbhaṭa. But Amarasimha attaches to the word a wrong meaning. (See Dr. Hoernle's Osteology p. 166.) This fact may indicate that Amarasimha was posterior to Vāgbhaṭa.

In passing it may be remarked that Amarasimha, though a Buddhist, had strong leanings towards Sānkhya philosophy as is evident from the use of the words :—

क्षेत्रज्ञ आत्मा पुरुषः प्रधानं प्रकृतिः स्त्रियाम्। (See p. 38 and Com. thereon). This philosophy of Kapila was revised by Īśvarakṛishṇa or Vindhyavāsin, the rival of Buddhamitra and his pupil Vasubandhu (A. D. 480). Amarasimha says :

अन्तराभवसत्त्वेश्वे गन्धर्वो दिव्यगायने। (p. 30).

'अन्तराभवसत्त्व (*i.e.* अन्तरा मरणजन्मनोर्मध्ये भवं सत्त्वं यातनाशरीरं) is one of the senses of the word गन्धर्व'. Kumārila-bhaṭṭa in his Ślokavārttika says :—

अन्तराभवदेहस्तु नेष्यते विन्ध्यवासिना।
तदस्तित्वे प्रमाणं हि न किंचिदवगम्यते॥

The theory of the existence of अन्तराभवदेह is rejected by Vindhyavāsin. This shows that Amarasimha was not acquainted with the revised notions of Sāṇkhya philosophy as propounded by Īśvarakṛshṇa. This circumstance again strengthens the probability that Amarasimha lived prior to Īśvarakṛishṇa, that is, in the 4th century A. D.

Amarakośa was translated into Chinese by Guṇarāta of Ujjayini in the sixth century (see Max Muller's India : What can it teach us ? (1st Ed. p. 328). In the Kāvyādarśa of Daṇdin who flourished in the latter half of the 7th century (See Indian Antiquary Oct. 1912, p. 232) we meet with words indicative of 'likeness' thus :—

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

इववद्वायथाशब्दाः समाननिभसंनिभाः। तुल्यसंकाशनीकाशप्रकाशप्रतिरूपकाः।
सदृक्सदृशसंवादिसंजातीयानुवादिनः। सलक्षणसदृक्षाभसपक्षोपमितोपमाः।

These words or many of them appear to have been suggested to Daṇḍin from the following lines in the Amarkośa—

वद्वा यथा तथेवैवं साम्ये— (p. 339).
वाच्यलिङ्गाः समस्तुल्यः सदृक्षः सदृशः सदृक्।
साधारणः समानश्च स्युरुत्तरपदे त्वमी। निभसंकाशनीकाशप्रतीकाशोपमादयः। (p. 233).

Dr. Bhandarkar has found the words तन्त्रं प्रधाने सिद्धान्ते (p. 315) of Amarasimha quoted in the Kāsikāvivaraṇapanjikā of Jinendrabuddhi who has been shown by Prof. Pathak to have flourished in the beginning of the 8th century. A reference to Amarakośa is also found in the Amoghavṛtti written in Śaka 789.

SOME ABBREVIATIONS &c.

सू०—Pāṇini's सूत्र or सूत्रांश
वा०—Kātyāyana's वार्त्तिक or वार्त्तिकांश
ग०—गणसूत्र or गणसूत्रांश
उ०—उणादिसूत्र or उणादिसूत्रांश
का०—कारिका or कारिकांश
भाष्य०—भाष्यवचन
इ०—भाष्यकारेष्टि
ज्ञा०—ज्ञापकवचन
धा० सू०—धातुपाठान्तर्गतसूत्र

[ ] Variants are generally shown in rectangular brackets.
( ) Additions and emendations proposed are included in ordinary brackets.

Aufrecht in his Catalogus Catalogorum I, 134a gives the parentage of क्षीरस्वामिन् as the son of भट्ट ईश्वरस्वामिन्, and ascribes to him four works, viz., अमरकोशोद्घाटन (published here), अव्ययवृत्ति, निपाताव्ययोपसर्ग and क्षीरतरङ्गिणी (edited by B. Liebich, Breslau, 1913). He was probably a Kashmiri although Mr. Oka suggests that he was from Central India. His family title of भट्ट and his Śaivite मङ्गलाचरण lend support to his being a Kashmiri. This is further supported by कविकाव्यकालकल्पना (p. 674) where we read that he was the son of ईश्वरस्वामिन्,

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

a Kashmiri, and was a contemporary of king जयापीड and lived between 1128 and 1138 A.D. Of course, क्षीरस्वामिन् quotes from राजशेखर (See Index V) who can be assigned to 880—920 A.D.[1] He also quotes from भोज[2] who can be placed in 1018—1060 A.D. That क्षीरस्वामिन् cannot be later than the 12th century is proved by his being quoted by वर्धमान in his गणरत्नमहोदधि (1140 A.D.). Liebich remarks that वर्धमान quotes from his own सिद्धराजवर्णन and appears on this basis to be a native of Gujrat and had better access to क्षीरस्वामिन् than the author of दुर्घटवृत्ति written in 1172 A.D.

The late Mr. Oka's edition was based on the following six Mss. :—

A—No. 88 of 1871-72. The age of the Ms. is Samvat 1678 *i.e.* 1622 A.D. It is very old and tolerably correct. It contains the text and the commentary on the 2nd and 3rd Kāṇdas and not on the 1st, as the first 52 leaves of the copy are wanting. It is reliable, though the copyist is somewhat careless.

B—No. 333 of 1875-76. The age of the Ms. is Samvat 1690 *i.e.* 1634 A.D. It is complete and comes from Jaipur. It is very reliable, as the copyist never interpolates extraneous information. It is, therefore, taken as basis in preparing the present Edition.

C—No. 332 of 1875-96. This Ms. is a new copy and contains the text and the commentary on the 1st Kāṇda and the first two *vargas* of the 2nd. It is said to be one of the Kāshmere collections. It is full of mistakes.

D—No. 273 of 1880-81. The age of the Ms. is Samvat 1812 *i.e.* 1756 A.D. It is complete and probably copied from the same original as A. It is, unreliable, as the copyist interpolates not only extraneous information, but his own information and that from later commentators as well. It is very incorrect and the copyist is very careless.

---

1. Kāvyamīmāṁsā, Gaekwad's O. S., Vol. I (1934), p. XII.

2. Kalpadrukośa, p. XVIII. The learned editor remarks, "But Śrī Bhoja of Kṣīrasvāmin may probably be different from and earlier than King Bhoja of Dhārā."

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

E—No. 505 of 1884–87. This Ms. is correct and reliable, but it contains the text and the commentary only on the 1st Kāṇda.

F—No. 506 of 1884–87. This Ms. does not contain the text and the commentary on the 1st Kāṇda and the first four *Vargas* of the 2nd. It is otherwise reliable and tolerably correct. It is very old and the copyist is somewhat careful.

But none of these Mss. is older than 1622 A.D. For the present edition we have been fortunate enough to secure a very old Ms.—or the oldest Ms. of क्षीरस्वामिन्'s commentary. A detailed account of this Ms. was published by Dr. N. G. Sardesai in the Poona Orientalist, I, No. 1, pp. 24–26. The Ms. is dated 1561 A.D. and, besides being complete, contains many important readings which have helped in revising and at places correcting the edition of Mr. Oka. A short account of the Ms. is given here—

The Ms. belongs to भडकमकर हस्तलिखित संग्राहक मण्डल of Wilson College, Bombay, No. $\frac{7}{6}$. It contains 72 folios and is written in जैन-देवनागरी script on paper with 23 lines per page on an average. The name of the scribe is रावतगोरा, a जैन, who copied this work at the behest of his patron साह रतनपाल (genealogy given) for ब्रह्मज्ञानचन्द्र at तेज:पुर, which has been identified by Sir Jadu Nath Sarkar with the Modern Tejpurā, a small State in Katosan Subdivision of Mahikantha District, 23°. 28 N. 72°. 16E (Poona Orientalist, I, No. 2, p. 1).

In the present edition we have been able to verify some of the unverified quotations given by Mr. Oka in his edition. We have thus reduced the list, but uufortunately it is still very long. Some of the sūtras have been traced to भोज's सरस्वतीकण्ठाभरण—recently published in the Trivandrum Sanskrit Series. The अष्टाध्यायी references together with the serial numbers of the sūtras have been noted down. An attempt has been made to trace the quotations and definite reference to chapter and verse is given where Mr. Oka had merely mentioned the name of a work. That printing and get up-are an improvement on the previous edition needs no proof or

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh

comment. A few other special features of this edition are that in the text the words and their synonyms are printed in black, and meanings with grammatical explanations in smaller type. On the margin is given the English equivalent together with the number of synonyms of each word—a device adopted after Colebrooke. Indexes of Sanskrit and English words, a list of authors and works quoted by क्षीरस्वामिन्' and a list of unverified quotations are also appended.

In spite of all this, none is so much aware of the shortcomings of this edition as we are. But we hope that the scholars will overlook them and appreciate our feeble effort.

In the end we thank all those gentlemen who have helped us. Mr. D. G. Padhye, Senior Sanskrit Teacher of Modern High School, Poona, deserves our special thanks for the trouble he took in reading the proofs, tracing several quotations, etc.

September 1, 1941
Poona.

HAR DUTT SHARMA
N. G. SARDESAI

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

नामलिङ्गानुशासनस्थ-विषयाणामनुक्रमणिका

Introduction iii–xiv

Contents

१. प्रथमं स्वरादिकाण्डम् १–६९

१ स्वर्गवर्गः १–२२
२ व्योमदिग्वर्गः २२–३१
३ कालवर्गः ३१–३८
४ धीवर्गः ३८–४२
५ शब्दादिवर्गः ४२–४७
६ नाट्यवर्गः ४८–५६
७ पातालभोगिवर्गः ५७–५९
८ नरकवर्गः ६०
९ वारिवर्गः ६१–६९

२. द्वितीयं भूम्यादिकाण्डम् ७०–२३५

१ भूमिवर्गः ७०–७३
२ पुरवर्गः ७४–७८
३ शैलवर्गः ७८–७९
४ वनौषधिवर्गः ८०–१२४
५ सिंहादिवर्गः १२४–१३३
६ नृवर्गः १३३–१६२
७ ब्रह्मवर्गः १६२–१७५
८ क्षत्रियवर्गः १७५–१९९
९ वैश्यवर्गः २००–२२५
१० शूद्रवर्गः २२५–२३५

३. तृतीयं सामान्यकाण्डम् २३६–२५८

१ विशेषनिघ्नवर्गः २३६–२५९
२ संकीर्णवर्गः २६०–२६९
३ नानार्थवर्गः २६९–३३६
४ अव्ययवर्गः ३३७–३४२
५ लिङ्गादिसंग्रहवर्गः ३४२–३५८

४. Indices ३६१–५३६

I English Word Index ३६१–३९५
II Sanskrit Word Index ३९६–४८९
III Index of Extra Words by Kṣīrasvāmin ४९०–५१८
IV A List of unverified quotations ५१९–५२६
V A List of Authors and Works quoted by क्षीरस्वामिन् ५२७–५३०
VI Notes ५३१–५३६

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

अथ

श्रीमदमरसिंहविरचितं

नामलिङ्गानुशासनम्

भट्टक्षीरस्वाम्युत्प्रेक्षितेनामरकोशोद्घाटनेन सहितम् ।

प्रथमं-स्वरादि-काण्डम् ।

ॐ नमो जिनाय शारदायै नमो नित्यं नमः सहजयोगिने ॥
देवाय गुरवे तस्मै सर्वदैव नमो नमः

श्रीगणेशाय नमः । दिश्याच्छिवानि शिवयोस्तिलकायमानं
गोरोचनारुचिललाटविलोचनं नः ।
अन्योन्यगाढपरिरम्भनिपीडनेन
पिण्डीभवन् बहिरिव स्फुटितोऽनुरागः ॥ १ ॥
अद्याप्यभिन्नमुद्रो योऽर्थार्थिभिरमरकोश एष बुधाः ।
उद्घाट्यते यथेच्छं गृह्णीध्वं नामरत्नानि ॥ २ ॥
प्रकृतिप्रत्ययवाक्यैर्व्यस्तसमस्तैर्निरुक्तनिगदाभ्याम् ।
इति सप्ताष्टैः पथिभिर्नाम्नां पारायणं कुर्मः ॥ ३ ॥
भग्ना अभिधानकृतो विवरीतारश्च यत्र विभ्रान्ताः ।
नामानि तानि भङ्क्तुं गहनमहो अध्यवसिताः स्मः ॥ ४ ॥
सहजो यः समुल्लासः क्षीराब्धेः सोऽपि मंस्यते ।
चान्द्र इत्यत्र किं कुर्मो गतानुगतिकं जगत् ॥ ५ ॥
वस्त्वेव तन्न हि भवेत् क्रियतेऽन्यथा यत्
कश्छादयेद्दिनमणिं करसंपुटेन ।
सारेतरान्तरविचारचणान् प्रतीर्ष्य-
स्तेनाहमेव बत दुर्जनचक्रवर्ती ॥ ६ ॥
(किंतु) यदतिकृपणवृत्त्या बिभ्यतो वा परस्मा-
दरचनममहार्थं नीरसं दूरसं वा ।
वरिवसितुमुदारान्–ढौकयामोऽतिभक्त्या
तदपि भपकवृत्त्या दूष्यते किं विदध्मः ॥ ७ ॥

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

मङ्गलाचरणम् ।

१ यस्य ज्ञान-दया-सिन्धोर-गाधस्याऽनघा गुणाः, ।
सेव्यताम-क्षयो धीराः ! स श्रिये चाऽमृताय च ॥

चिकीर्षित-प्रतिज्ञा

२ समाहृत्याऽन्य-तन्त्राणि संक्षिप्तैः प्रतिसंस्कृतैः ।
संपूर्णमुच्यते वर्गैः 'नाम-लिङ्गाऽनुशासनम्'. ॥

ग्रन्थ-परिभाषा

३ प्रायशो रूप-भेदेन, साहचर्याच्च कुत्रचित् ।
स्त्री-पुन्नपुंसकं ज्ञेयं, तद्विशेष-विधेः क्वचित्. ॥

जाता विश्वसृजः क्रमेण मुनिभिः संस्कारमापादिताः
शब्दाः संवसनादसाधुभिरपभ्रष्टाः स्थ भो भ्रातरः ।
वाग्देव्याद्य कृता मदेकशरणा मात्रा यतोऽस्मान्मया
न्याय्ये वर्त्मनि वर्तनाय भवतां षड् वृत्तयः कल्पिताः ॥ ८ ॥

यस्य भगवतो ज्ञानदययोर्बोधकरुणयोः सिन्धोः समुद्रस्येव गम्भीरस्यापारस्य अगाधस्यान्यैरप्राप्तज्ञानदयावधेः । अनघा निष्पापा गुणाः क्षान्त्यादयो बोधिपक्षाः [क्ष्याः] सप्तत्रिंशत् । सः – अक्षयः – अक्षोभ्यो जातो मारजित्त्वादनन्तज्ञानसन्तानो वा । भो धीरा योगिनः–ध्येयं प्रति धियमीरयती[न्ती]ति कृत्वा श्रिये भोगार्थं [सौख्यार्थं] अविद्यमानं मृतं मरणं यत्रेत्यमृताय मोक्षार्थं च सेव्यतामाराध्यताम् । लेशस्पृष्टोपि समुद्रः–अस्य विष्णोः क्षयो निवासः । अगाधोऽतलस्पर्शः । रत्नादिमत्त्वान्निर्मलगुणः । लक्ष्म्यर्थं पीयूषार्थं च सुरैः सेवितः ॥ १ ॥ इत्थं ग्रन्थारम्भेऽभीप्सितसिद्धिहेतुं जिनमनुस्मृत्य श्रोतृप्रोत्साहनार्थं स्वप्रवृत्तिप्रयोजनं ताभिधेयमादिवाक्येनाह ॥ (समुह्य) समाहृत्य संघात्य-अन्यतन्त्राण्यभिधानशास्त्राणि लिङ्गानुशासनानि वा [च] संक्षिप्तैर्लघूकृतैः प्रतिसंस्कृतैः प्रत्येकं परिपाटीस्थापनादिना कृतोत्कर्षैः संपूर्णं लक्ष्यलक्षणाभ्यां संगृह्य पूरितं, वा दान्तशान्तपूर्णेति (७।२।२७ / ३०६८) ण्यन्तस्य निपातनात् । वर्गैः सजाति[तीय]समूहैः, सुखग्रहणार्थं वर्ग्यन्ते विजातीया अस्मिन्नित्यसारवर्जनाद्वा । नाम्नामभिधानानां च । लिङ्गानां च स्त्रीपुंनपुंसकानामनुशासनं व्युत्पादकं शास्त्रमुच्यते ॥ २ ॥ अथ श्लोकत्रयेण परिभाषां (भाषाः) शास्त्रव्यवस्थापनार्थमाह ॥ प्रायशो बाहुल्येन क्वापि चेत्यर्थः । रूपस्या[स्ये]बन्तादेर्विभक्त्यलुगादेः–अम्–भावादेश्चाकारस्य भेदेन विशेषेण स्त्रीपुंनपुंसक-

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh

४ भेदाऽऽख्यानाय न द्वन्द्वो, नैक-शेषो, न संकरः ।
कृतोऽत्र भिन्न-लिङ्गानामनुक्तानां क्रमादृते. ॥
५ त्रि-लिङ्ग्यां त्रिष्विति पदं, मिथुने तु द्वयोरिति, ।
निषिद्ध-लिङ्गं शेषाऽर्थं, त्वन्ताऽथाऽऽदि न पूर्व-भाक्. ॥

(लिङ्गानि)नीह ज्ञेयानि, यथा–लक्ष्मीः पद्मालया पद्मा, पिनाकोऽजगवं धनुः । तथा कुत्रचित्साहचर्यात्, यथा–अश्वयुगश्विनी, ब्रह्मात्मभूः सुरज्येष्ठः, वियद्विष्णुपदम् । अत्राश्वयुग्ब्रह्मवियन्ति साहचर्यात्स्त्रीपुंनपुंसक(लिङ्गानि) । क्वचिल्लिङ्गविशेषविधानात्, यथा–द्योदिवौ द्वे स्त्रियाम्, दुन्दुभिः पुमान्, क्लीबे त्रिविष्टपम् ॥ ३ ॥ अत्रामरकोशे भिन्नलिङ्गानां प्रातिपद्येनानुक्तानां भेदमाख्यातुं द्वन्द्वो न कृतः, परवल्लिङ्गं हि स्यान्नावयवलिङ्गम्, यथा–कुलिशं भिदुरं पविः, न तु कुलिशभिदुरपवय इति । तथैकशेषो न कृतः, शिष्यमाणलिङ्गस्यैव हि प्रतीतिः स्यात्, यथा–नभः खं श्रावणो नभाः, न तु खश्रावणौ नभसी इति । तथा संकरो न कृतः–संकरो व्यापिश्रता–साहचर्यात्तल्लिङ्गत्वं हि स्यात्, यथा–स्तवः स्तोत्रं स्तुतिर्नुतिः, न तु स्तुतिः स्तोत्रं स्तवो नुतिरिति । एतच्च क्रमादृते यत्र संग्रहश्लोकादौ क्रममात्रं विवक्षितं तत्रानुक्तानां भिन्नलिङ्गानां द्वन्द्वादयः कृता एव, यथा-वर्गाः पृथ्वीपुरक्ष्माभृद्वनौषधिमृगादिभिः । नृब्रह्मक्षत्रविट्शूद्रैः साङ्गोपाङ्गैरिहोदिता इत्यत्र श्लोके द्वन्द्वसंकरौ, त्रात्रादावेकशेषश्च कृतः । उपाध्यायश्च क्रमादृत इत्यन्तर्गडु मन्वानः क्रमेणादृते परिपाट्योपादेयेऽत्र ग्रन्थ इति व्यददरत् । गौडोऽपीत्थमबुद्ध्वा यथात्रायं संकरः क्रमादृतेऽनुक्रमं विना भिन्नलिङ्गानां न कृतः अभिधानानुक्रमेणैवाभिधातुं तु कृत एव, यथा–कपर्दोस्य जटाजूटः पिनाकोऽजगवं धनुः, प्रमथाः स्युः पारिषदा इति । मालाकारो हि स्त्रीलिङ्गादीन् प्रकरणैर्निरदिक्षत् । श्रीभोजस्त्वन्यथा व्याख्यात्–यथैते द्वन्द्वैकशेषसंकराः क्रमादृते पर्यायनिर्देशं विना भिन्नलिङ्गा यद्युक्ता न स्युस्तदा न कृतः, पर्यायनिर्देशं विना तूक्तानां कृता एव, यथा–विद्याधराप्सरोयक्षरक्षोगन्धर्वकिन्नराः, तथा, पुत्रौ पुत्रश्च दुहिता च, तथा नानार्थे–संज्ञा स्याच्चेतना नाम हस्ताद्यैश्चार्थसूचनेति ॥ ४ ॥ यत्र लिङ्गत्रयसमाहारस्तत्र त्रिष्विति पदं प्रयोज्यमिति परिभाष्यते, यथा– त्रिषु स्फुलिङ्गोऽग्निकणः । तथा मिथुने स्त्रीपुंसलिङ्गे द्वयोरिति पदं ज्ञेयम्, यथा–वह्नेर्द्वयोर्ज्वालकीलौ । तथा निषिद्धं लिङ्गं यत्र तच्छेषार्थं निषिद्धाल्लिङ्गादवशिष्टं लिङ्गं ज्ञेयं, विशेषनिषेधे शेषाभ्यनुज्ञानात्, यथा–व्योमयानं विमानोऽस्त्रीति, स्त्रीलिङ्गे निषिद्धे विमानस्य पुंनपुंसकविधिः । तथा तुशब्दोऽन्ते यस्य तत्त्वन्तमथशब्द आदिर्यस्य तदथादि च पूर्वं न भजते–अग्रिमेण संबध्यत इत्यर्थः । न्यायसिद्धं चैतत्-तुना पूर्वस्माद्विशेषद्योतनात्–अथशब्देन चार्था

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh

अथ स्वर्गवर्गः ।

9 Heaven

६ स्वरव्ययं स्वर्ग-नाक-त्रिदिव-त्रिदशालयाः ।
सुरलोको द्यो-दिवौ द्वे स्त्रियां क्लीबे त्रिविष्टपम् ॥

26 Gods or deities.

७ अमरा निर्जरा देवास्त्रिदशा विबुधाः सुराः ।
सुपर्वाणः सुमनसस्त्रिदिवेशा दिवौकसः ॥

८ आदितेया दिविषदो लेखा अदितिनन्दनाः ।
आदित्या ऋभवोऽस्वप्ना अमर्त्या अमृतान्धसः ॥

न्तरारम्भात्, यथा पुलोमजा शचीन्द्राणी नगरी त्वमरावती, तथा नित्यानवरताजस्रमप्यथातिशयो भर इति । भ्रान्तिस्थानविषयं चैतत् ॥ ५ ॥ स्वर्गे परे च लोके स्वरिति वक्ष्यमाणत्वेऽपीह प्रचुरप्रयोगार्थं स्वःशब्दोपादानं, वक्ष्यति च भूरिप्रयोगा ये येषु पर्यायेष्वपि तेषु ते । अव्ययमित्यलिङ्गत्वार्थम् । सुष्ठु–अर्ज्यते स्वर्गः, घञ् । नास्त्यकं दुःखमत्र नाकः, नाविद्यमानविरिञ्चो वा, नञ्नाण्नपादिति (६।३।७५/७५६) नञ् प्रत्ययः । तृतीया द्यौर्लोकस्त्रिदिवः–वृत्तिविषये दिवौकसवद्दिवशब्दोऽप्यस्ति, दीव्यन्त्यत्रेति, घञर्थे कविधानात्(२२०४/३२३४वा०), पूरणार्थाधिक्यं च वृत्तौ त्रिभागवत् । त्रयाणां ब्रह्मादीनां द्यौरित्येके । त्रिदशालयादयः सुरसदनाद्युपलक्षणम्, एवं यौगिकेषु सर्वत्रोन्नेयम् । द्योशब्दोप्योकारान्तोऽस्ति, भाष्ये गोतोणित् (७।१।९०/२८४) इत्यत्र–ओतो णिदिति (५०३५/२८५ वा०) न्यासान्तराम्नानात् । द्योतते इति द्यौः । द्युत दीप्तौ बाहुलकात् 'डौः' प्रत्ययः दीव्यन्त्यस्यां द्यौः, दिवेः क्विप् । तृतीयं विष्टपं त्रिविष्टपं भूर्भुवःस्वरिति श्रुतेः । त्रिपिष्टपमिति प्राच्याः, प्रायेण ह्येते पवौ शसौ च व्यत्यस्य पठन्ति । गौर्नानार्थे । ऊर्ध्वलोकाद्या अप्यूह्याः ॥ ६ ॥ न म्रियन्त इत्यमराः । निष्क्रान्ता जराया निर्जराः । दीव्यन्तीति देवाः, देवसेवमेषादयः पचादिषु द्रष्टव्या इति–इगुपधेति (३।१।१३५/२८९७) को नास्ति । त्रिर्दश परिमाणमेषां त्रिदशाः, संख्ययाव्ययेति (२।२।२५/८४३) बहुव्रीहिः, बहुव्रीहौ संख्येये डजबहुगणात् (५।४।७३/८५६) इति डच् समासान्तः, त्रयस्त्रिंशद्वै देवाः सोमपा इति श्रुतेः । तिस्रो दशा वयोऽवस्था येषामिति गौडः । विबुध्यन्ते विबुधाः । सुरन्ति सुराः, सुर–ऐश्वर्ये–कः, सुरा–एषामस्तीति वा, अर्शआदिभ्योऽच् (५।२।२७/१९३३) यतोऽब्धिजाता सुरा तैः पीता, सुष्ठु राजन्ते वा । शोभनं पर्व चरितमेषां सुपर्वाणः । सुष्ठु मन्यन्ते सुमनसः, असुन् । दिवि–ओको निवास एषां दिवौकसः, द्युसमानार्थो दिवशब्दोऽस्ति, पृषोदरादित्वात् (६।३।१०९/१०३४) वा सिद्धिः ॥ ७ ॥ अदित्या अपत्यान्यादितेयाः, कृदिकारादक्तिनः (ग० ५०) इति ङ्यन्तात्–स्त्रीभ्यो ढक् (४।१।१२०/११२३) । इदन्तात्तु दित्यदित्यादित्येति (४।१।१८५/१७७८) ण्ये–आदित्याः । एवं दैत्यदैतेयाः । दिवि सीदन्तीति दिविषदः,

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

९ बर्हिर्मुखाः क्रतुभुजो गीर्वाणा दानवारयः ।
वृन्दारका दैवतानि पुंसि वा देवताः स्त्रियाम् ॥

1 Sets of divinities.

१० आदित्य-विश्व-वसवस्तुषिताऽऽभास्वराऽनिलाः ।
महाराजिक-साध्याश्च रुद्राश्च गणदेवताः ॥

1 Demi-gods, and Nymphs.

११ विद्याधराऽप्सरो-यक्ष-रक्षो-गन्धर्व-किन्नराः ।
पिशाचो गुह्यकः सिद्धो भूतोऽमी देवयोनयः ॥

सत्सूद्विषेति (३।२।६१) क्विप्, हलदन्तात्सप्तम्याः (६।३।९), हृद्द्युभ्यां च (९६७ वा०) इत्यलुक्, सुपामादित्वात् (८।३।९८) षत्वम् । पक्षे द्युसदः । लिख्यन्ते चित्रादौ ध्यानार्थं लेखाः । इर्यति ऋभवः । ऋशब्दोऽदितिवाची ततो भवन्तीति गौडः, डुप्रकरणे मितद्र्वादिभ्य उपसंख्यानात् (२१५२ वा०) । नास्ति स्वप्न एषामस्वप्नाः । न म्रियन्ते—अमर्त्याः, हसिमृग्रिणेति (३६६ उ०) तन्, स्वार्थे यत् । अमृतमन्धोन्नमेषाममृतान्धसः ॥ ८ ॥ बर्हिरग्निर्मुखमेषां बर्हिर्मुखाः । क्रतुं भुंजत इति क्रतुभुजः । गीरेव निग्रहानुग्रहसमर्थो वाणोऽस्त्रमेषां गीर्वाणाः । प्रशस्तं वृन्दमस्त्येषां वृन्दारकाः, शृङ्गवृन्दाभ्यामारकन्वक्तव्यः (३२१४ वा०) । देव एव देवता देवात्तल् (५।४।२७) । स्वार्थिकाः प्रत्ययाः प्रकृतितो लिङ्गवचनान्यतिवर्तन्तेऽपि । देवतैव दैवतं, प्रज्ञादित्वात् (५।४।३८) स्वार्थे-अण्, विशेषविधेः पुंस्त्वं रूपभेदात् क्लीबत्वं तच्च प्रचुरप्रयोगम् ॥ ९ ॥ एते द्वादशत्वादिना संघेन युक्ता गणदेवताः, संघचारिणो बहुवचनान्ता वा । एकत्वं तु समुदायेष्वपि वृत्ताः शब्दा अवयवेष्वपि वर्तन्त इति । द्वादशादित्याः । त्रयोदश विश्वेदेवाः, श्राद्धाग्रे विशन्तीति । अष्टौ वसवः, वसन्तीति । षट्त्रिंशत्तुषिताः, तुष्यन्तीति । चतुःषष्टिराभास्वराः, आभासन्त इति, स्थेशभासेति (३।२।१७५) वरच् । एकोनपञ्चाशदनिलाः । षट्त्रिंशद् द्वे शते महाराजिकाः, महाराजशब्दोऽस्त्येषामिति । सास्य देवता (४।३।२४) इति माहाराजिका इत्येके, महाराजप्रोष्ठपदाट्ठञ् (४।२।३५) । द्वादश साध्याः, साध्यन्त आराध्यन्त इति । एकादश रुद्राः । तुषिताद्या बौद्धपातञ्जलपुराणादौ दृष्टाः ॥ १० ॥ देवा योनिरुत्पत्तिस्थानमेषां देवांशा इत्यर्थः । देववदृष्टसंहतेभ्यः परमाणुभ्यः सद्यो जायन्ते वा । नागा अप्येवम् । तथा च द्वितीयमर्धं—सिद्धगुह्यकभूता हि पिशाचा देवयोनय इति भागुरिः पपाठ । विद्याधरा जीमूतवाहनादयः, खड्गगुटिकाञ्जनादिविद्याधारिणश्च । अप्सु सरन्त्यप्सरसो देवयोषितः रम्भादयः । यक्षाः कुबेरादय ऋद्धीश्वराः । रक्षांसि मायाविनो लङ्काधिवासिनः । गन्धर्वास्तुम्बुरुप्रभृतयो देवगायनाः । किंनरा अश्वादिमुखाः शृङ्गारिणः । पिशाचाः पिशिताशास्तामसाः स्वयं निर्मांसाः । गुह्यका निधिपाला मणिभद्रादयः, गृह्णन्तीति ।

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

10 Giants or Titans. १२ असुरा दैत्य-दैतेय-दनुजेन्द्रारि-दानवाः ।
शुक्रशिष्या दितिसुताः पूर्वदेवाः सुरद्विषः ॥

18 A *Jina* or *Buddha*. १३ सर्वज्ञः सुगतो बुद्धो धर्मराजस्तथागतः ।
समन्तभद्रो भगवान् माराजिल्लोकजिज्जिनः ॥

१४ षडभिज्ञो दशबलोऽद्वयवादी विनायकः ।
मुनीन्द्रः श्रीघनः शास्ता मुनिः, शाक्यमुनिस्तु यः ।

7 Buddha. १५ स शाक्यसिंहः सर्वार्थसिद्धः शौद्धोदनिश्च सः ।
गौतमश्चाऽर्कबन्धुश्च मायादेवीसुतश्च सः ॥

सिद्धाः, सिध्यन्तीति, प्राप्ताष्टगुणैश्वर्या विश्वावसुप्रभृतयः । भवन्तीति भूता बालग्रहादयो हिंस्रा रुद्रानुचरा वा, यतोऽसौ भूतपतिः ॥ ११ ॥ असुराः सुरायाः अपानात्, सुरविरुद्धा वानर्थवत्, अस्यन्ति देवानिति वा । दानवानां अरयः दानवारयः । दितिर्दनुश्चासुरमातरौ, अनया जातत्वाद्दैतेया इति, अदित्या आदितेयवत्सिद्धम् । अनयाद्देवत्वाद् भ्रष्टा इति पूर्वदेवाः । सुरान्द्विषन्तीति सुरद्विषः सत्सद्विषेति (३।२।६१ / २०७५) क्विप् ॥ १२ ॥ सर्वे गत्यर्था ज्ञानार्था इति सुगतः शोभनज्ञानः । तथागतः सत्यज्ञानः, तथेति सत्यार्थे वितथवत् । बुध्यते बुद्धः । धर्मः सत्त्वोद्धरणादिस्तेन राजते धर्मराजः, धर्मस्य राजा वा । सत्यार्थं संमतं संपूर्णं । संपूर्णान्तं निष्पन्नं भद्रमस्य समन्तभद्रः । " ऐश्वर्यस्य समग्रस्य धर्मस्य यशसः श्रियः । वैराग्यस्याथ मोक्षस्य षण्णां भग इति स्मृतिः ॥ विष्णुपु० ॥ तद्वान् । मारान् कामक्रोधादीञ्जयति मारजित् । बौद्धास्तु स्कन्धमारः क्लेशमारो मृत्युमारो देवपुत्रमारश्चेति चतुरो मारानाहुः । लोकञ्जयति तपसा लोकजित् । जयति भवं जिनाति वा जिनः ॥ ११ ॥ दिव्यं चक्षुर्दिव्यं श्रोत्रं पूर्वनिवासानुस्मृतिः परचित्तज्ञानमास्रवक्षय ऋद्धिश्चेति षडभिज्ञा अस्य सन्तीति । दानक्षान्तिशीलवीर्यध्यानशान्तिबलोपायप्रणिधानज्ञानानि दश बलान्यस्येति । अद्वयं विज्ञानाद्वैतं वदत्यवश्यमद्वयावादी । विनयति शास्तीति विनायकः । मन्यते मुनिः, मनेरुच्च (उ० ५६२), तेषामिन्द्रः । मुनिस्तु भीमवत्, सन्ति पदेषु पदैकदेशा इति । श्रिया योगविभूत्या घनो निविडः, श्रिया घन इव वर्षिता वा । शास्ति विनयति विनेयाञ्शास्ता, तृन्तृचौ शंसिक्षदादिभ्यःसंज्ञायां चानिटौ (२५० उ०) । तायी च ॥ यस्तु शकेषु जातः शाक्यमुनिर्बुद्धावतारः - शकोऽभिजनोऽस्येति, शण्डिकादिभ्यो ञ्यः (४।३।९२ / १४७२) ॥ १४ ॥ स शाक्यः सिंह इव शाक्यसिंहः, उपमितं व्याघ्रादिभिः (२।१।५६ / ७३७) इति समासः । शाक्योऽपि भीमवत् । सर्वार्थेषु सिद्धो निष्पन्नः । अत एव सिद्धार्थः, यच्छाश्वतः - सिद्धार्थौ बुद्धसर्षपौ ५९८ । शुद्धोदनस्य राज्ञोऽपत्यं शौद्धोदनिः, शकन्ध्वादित्वात् (३६३२ / ७९ वा०) पररूपम् । गौतमो गोतमगोत्राव-

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

29 Brahmā. १६ ब्रह्माऽऽत्मभूः सुरज्येष्ठः परमेष्ठी पितामहः ।
हिरण्यगर्भो लोकेशः स्वयम्भूश्चतुराननः ॥
१७ धाताऽब्जयोनिर्द्रुहिणो विरिञ्चिः कमलासनः ।
स्रष्टा प्रजापतिर्वेधा विधाता विश्वसृड् विधिः ॥
'नाभिजन्मा ऽण्डजः पूर्वो निधनः कमलोद्भवः ।
सदानन्दो रजोमूर्तिः सत्यको हंसवाहनः' ॥

46 Viṣṇu. १८ विष्णुर्नारायणः कृष्णो वैकुण्ठो विष्टरश्रवाः ।
दामोदरो हृषीकेशः केशवो माधवः स्वभूः ॥

तारात् । अर्कबन्धुः सूर्यवंश्यत्वात् । मायादेवी शुद्धोदनस्य राज्ञो भार्या तस्याः सुतः स इति । इत्यागमोक्तावतारभेदात्पृथङ् नामानि । [सर्वज्ञो वीतरागोर्हन् केवली तीर्थकृज्जिनस्त्रिकालविदाद्या ऊह्याः] ॥ १५ ॥ बृंहति ब्रह्मा । आत्मन भवत्यात्मभूः । अत एव स्वयंभूशब्दे लब्धे स्वभूनिवृत्त्यर्थं वचः । एवं सर्वत्रोन्नेयम् परमे पदे तिष्ठतीति परमेष्ठी, परमेस्थः किदिति (४५० उ०) इनिः, तत्पुरुषे कृतीति ($\frac{६।३।१४}{९७२}$) सप्तम्या अलुक्, स्थस्थास्थिन्स्थॄणां वक्तव्यात् (वा० $\frac{४९६१}{२९१८}$) षत्वम् । पितॄणामपि पिता पितामहः, पितृव्यमातुलमातामहपितामहाः ($\frac{४।२।३६}{१२४२}$) इति साधुः । हिरण्यं गर्भेऽस्य हिरण्यगर्भः, हिरण्यस्य गर्भो वा ब्रह्माण्डप्रभवत्वात् । भूरादीन् सप्त लोकानीष्ट इति लोकेशः ॥ १६ ॥ धाता विधाता कर्ता, वेरर्थो धातुनैवोक्तः–उपसर्गाणां द्योतकत्वात् । द्रुह्यत्यसुरेभ्यो द्रुहिणः । विरिङ्क्ते सूते विरिञ्चः, विभिर्हंसै रिच्यते-उह्यते वा, विरिञ्चिरिति प्राच्याः । विदधाति सृजति विश्वमिति वेधाः, विधति सृजति वेधाः, विध विधानेऽसुन्, विधाञो वेध चेति वा (६६४ उ०) । विश्वं सृजति विश्वसृट्, व्रश्चभ्रस्जसृजेति ($\frac{८।२।३६}{२९४}$) षः, झलांज शोऽन्ते ($\frac{८।२।३९}{८४}$) । विधत्ते विधिः, उपसर्गेऽघोः किः ($\frac{३।३।९२}{३२७०}$) । शतधृतिशतानन्दौ च । स्थविरो देश्याम् ॥ १७ ॥ वेवेष्टि व्याप्नोति विश्वं विष्णुः, विषेः-किच्चेति (३१९ उ०) नुः । नरस्यापत्यं नारायणः, नडादिभ्यः फक् ($\frac{४।१।९९}{१२०१}$) नाराः सलिलं नारमम्मयं नरसमूहो वायनमस्य, आपो नारा इति प्रोक्ता इति स्मृतेः । तथा नराज्जातानि भूतानि नाराणीति तेषामयनं मार्गः । कृष्णो वर्णेन कर्षति वारीन् । विकुण्ठस्यापत्यं वैकुण्ठः, वैकुण्ठितसैंहादिवक्त्रो वा संहितादिषु तथा दर्शनात् । विष्टर इव श्रवसी कर्णावस्य विष्टरश्रवाः, विष्टराकृतिर्जटा श्रवोभ्यां निर्गतास्येति वा, अथवा विष्टरेऽश्वत्थतरौ श्रूयते वा । दाम–उदरे यस्य स दामोदरः, बाल्ये हि चापलाद्दाम्ना बद्धोऽभूत् । हृषीकाणामिन्द्रियाणामीशो वशित्वाद् हृषीकेषः । प्रशस्ताः केशाः विद्यन्तेस्य–यदि वा केशिनमसुरं हतवान्–केशवः, केशाद्वोन्यतरस्याम्

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

१९ दैत्यारिः पुण्डरीकाक्षो गोविन्दो गरुडध्वजः ।
पीताम्बरोऽच्युतः शार्ङ्गी विष्वक्सेनो जनार्दनः ॥

२० उपेन्द्र इन्द्रावरजश्चक्रपाणिश्चतुर्भुजः ।
पद्मनाभो मधुरिपुर्वासुदेवस्त्रिविक्रमः ॥

२१ देवकीनन्दनः शौरिः श्रीपतिः पुरुषोत्तमः ।
वनमाली बलिध्वंसी कंसारातिरधोक्षजः ॥

२२ विश्वम्भरः कैटभजिद् विधुः श्रीवत्सलाञ्छनः ।
'पुराणपुरुषो यज्ञपुरुषो नरकान्तकः ।
जलशायी विश्वरूपो मुकुन्दो मुरमर्दनः' ॥
2Vasudeva. वसुदेवोऽस्य जनकः स एवाऽऽनकदुन्दुभिः ॥

(५।२।१०९/२०१६)। माया लक्ष्म्या धवो भर्ता माधवः, मधोरपत्यं वा । स्वभूः स्वतो भवतीति ॥ १८ ॥ पुण्डरीके इवाक्षिणी अस्य पुण्डरीकाक्षः. बहुव्रीहौ सक्थ्यक्ष्णोः स्वाङ्गादिति (५।४।१५५/३०३७) षच्, प्रसन्नलोचन इत्यर्थः । गां भुवं विन्दतीति गोविन्दः, वराहरूपेण गोः पृथिव्या उद्धर्ता, तद्वत् गोवर्धनाचलोद्धाराद् गवां त्राता, अनुपसर्गाल्लिम्पविन्देति (६।४।५५/३०३७) शः । गरुडो ध्वजश्चिह्नं वाहनत्वेऽस्य । पीते अम्बरे वाससी अस्य । न च्यवतेऽच्युतः । शृङ्गस्य विकारो धनुरस्यस्य शार्ङ्गी । विष्वक्सर्वव्यापिनी सेनास्येति विष्वक्सेनः । जनानर्दयति जनार्दनः, नन्द्यादित्वाल्ल्युः (३।१।१३४/२८९६) ॥ १९ ॥ इन्द्रमुपगतोनुजत्वादुपेन्द्रः । इन्द्रस्यावरं जातोऽनुज इन्द्रावरजः । पद्मं नाभावस्य पद्मनाभः, अच्प्रत्यन्ववेति (५।४।७५/०४३) प्राङ्निर्देशादच् । मधुनाम्नोसुरस्य रिपुर्मधुरिपुः । वसुदेवस्यापत्यं वासुदेवः, जगत्यां सर्वहृदये वसतीति वासुः—कल्पान्ते दीव्यतीति देवः, वासुश्चासौ देवश्च वासुदेवः । त्रयो विक्रमा अस्य त्रिविक्रमः, त्रिषु लोकेषु वा विक्रमः पादन्यासोऽस्य ॥ २० ॥ शूरस्यापत्यं शौरिः । पुरुषेषूत्तमः पुरुषोत्तम इति सप्तमीतत्पुरुषः, न निर्धारणे (२।२।१०/७०४) इति षष्ठीसमासनिषेधात्, कर्मधारये च सन्महत्परमोत्तमेति (२।१।६१/७४०) उत्तमपुरुष इति स्यात् । पुष्पफलपल्लवान्विता वनमालास्यास्तीति वनमाली, व्रीह्यादित्वादिनिः (५।२।११६/२०२३)। बलिं ध्वंसते बलिध्वंसी, सुप्यजातौ णिनिस्ताच्छील्ये (३।२।७८/२०८८)। अधः कृत्वाक्षाणीन्द्रियाणि जातोऽधोक्षजः, अधोक्षाणां जितेन्द्रियाणां वा जायते प्रत्यक्षीभवति, अक्षजं ज्ञानमधोऽस्य वा ॥ २१ ॥ विश्वं बिभर्तीति विश्वंभरः, संज्ञायांभृतृवृजीति (३।२।४३/२०६३) खच् । मधुकैटभावसुरौ जितवान् । विधत्ते विधुः । श्रीवत्साख्यो रोमावर्तो वक्षसि लाञ्छनमस्य श्रीवत्स-

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh

17 Bala-rāma.

२३ बलभद्रः प्रलम्बघ्नो बलदेवोऽच्युताग्रजः ।
रेवतीरमणो रामः कामपालो हलायुधः ॥

२४ नीलाम्बरो रौहिणेयस्तालाङ्को मुसली हली ।
संकर्षणः सीरपाणिः कालिन्दीभेदनो बलः ॥

19 Kāma-deva.

२५ मदनो मन्मथो मारः प्रद्युम्नो मीनकेतनः ।
कन्दर्पो दर्पकोऽनङ्गः कामः पञ्चशरः स्मरः ॥

२६ शम्बरारिर्मनसिजः कुसुमेषुरनन्यजः ।
पुष्पधन्वा रतिपतिर्मकरध्वज आत्मभूः ॥

लाञ्छनः । गदाग्रजो दाशार्हो मुञ्जकेशोऽब्धिशायी पुराणपुरुषो बभ्रुरित्याद्यूह्यम् । हरौ जाते ह्यानका दुन्दुभयश्चास्य नेदुः, अनकदुन्दुभो वसुदेवस्य पितेत्येके ॥ २२ ॥ बलेन भद्रो बलभद्रः, बलस्त्वनुनिष्पादिन्यायेन भीमवत् । प्रलम्बं नाम्नासुरं हतवान् प्रलम्बघ्नः, अमनुष्यकर्तृके च ($\frac{३।२।५३}{२९७८}$) इति टक् । [रेवतीं रमयतीति, नन्द्यादित्वात् ($\frac{३।१।३४}{२८९६}$) ल्युः] । रामः सिताङ्गत्वात् । कामान् पालयति, कामं स्मरं वाग्रजत्वात्कामपालः ॥ २३ ॥ रोहिण्या अपत्यं रौहिणेयः, शुभ्रादित्वात् ($\frac{४।१।१२३}{२१२६}$) ढक् । तालवृक्षोङ्को ध्वजोस्य तालाङ्कः । संकर्षति संहार-मूर्तित्वात्संकर्षणः, नन्द्यादित्वाल्ल्युः ($\frac{३।१।३४}{२८९६}$) कालिन्द्या यमुनाया भेदनो हलेनाकर्षणात् । सात्वतोपि । [एकंकुण्डलोऽनन्त इत्याद्यूह्यम्] ॥ २४ ॥ मदयति मदनः, ल्युः । मननं मत् – चेतना, अनुदात्तोपदेशवनतीति ($\frac{६।४।३७}{२४२८}$) अनुनासिकलोपे तुक्, मतो मनसो मथः [मथ्नातीति] मन्मथः । म्रियन्तेनेन मारः । प्रकृष्टं द्युम्नं बलमस्य प्रद्युम्नः । मीनः केतनं ध्वजोस्य मीनकेतनः, मीनो जलचरोपलक्षणम् । कमव्ययं कुत्सायाम्, कं कुत्सितो दर्पोस्य कंदर्पः कं दर्पयति वा । दर्पयतीति दर्पकः । न विद्यतेङ्गमस्येत्यनङ्गः, ईश्वर-दग्धदेहत्वात् । कामयतेनेन कामः, कामोस्त्यस्य वा, अर्शआदित्वात् ($\frac{५।२।१२७}{१९३३}$) [पञ्च शरा अस्येति पञ्चशरः; उन्मादनं शोचनं च तथा संमोहनं विदुः । शोषणं मारणं चैव पञ्च बाणा मनोभुवः ॥१॥ मदनोन्मादनश्चैव मोहनः शोषणस्तथा । संदीपनः समाख्याताः पञ्च बाणा इमे स्मृताः ॥२॥] स्मरन्त्यनेनेति स्मरः, पुंसि-संज्ञायां घः प्रायेण ($\frac{३।३।११८}{३२९६}$) ॥ २५ ॥ शम्बरोसुरभेदस्तस्यारिः शम्बरारिः । मनसि जायते मनसिजः, डः, हलदन्तात्सप्तम्याः ($\frac{६।३।९}{९६६}$) अलुक् । न मनसोन्यस्माज्जायतेनन्यजः । पुष्पाणि धनुरस्य पुष्पधन्वा, वा संज्ञायां ($\frac{५।४।१३३}{८७२}$) इत्यनङ् । आत्मना भवत्यात्मभूः, यद्भागुरिः – शम्बरारिः स्मरः स्वजः ।

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh

4 Aniruddha.
14 Lakṣmī.
1 *Kṛṣṇa's* conch.
1 Discus
1 mace.
1 sword.
1 jewel.
1 Bow.
1 Symbol.
4 Horses.
1 Charioteer.
1 Minister.
1 Younger brother.
9 Vehicle-Garuḍa.

२७ ब्रह्मसूर्ऋष्यकेतुः स्यादनिरुद्ध उषापतिः ।
लक्ष्मीः पद्मालया पद्मा कमला श्रीर्हरिप्रिया ॥
'इन्दिरा लोकमाता मा क्षीरोदतनया रमा ।
भार्गवी लोकजननी क्षीरसागरकन्यका' ॥
२८ शङ्खो लक्ष्मी-पतेः पाञ्चजन्यश्चक्रं सुदर्शनम् ।
कौमोदकी गदा, खड्गो नन्दकः, कौस्तुभो मणिः ॥
'चापः शार्ङ्गं, मुरारेस्तु श्रीवत्सो लाञ्छनं स्मृतम् ।
अश्वाश्च शैब्य-सुग्रीव-मेघपुष्प-बलाहकाः, ॥
सारथिर्दारुको, मन्त्री तूद्धवश्चाऽनुजो गदः' ॥
२९ गरुत्मान् गरुडस्तार्क्ष्यो वैनतेयः खगेश्वरः ।
नागान्तको विष्णुरथः सुपर्णः पन्नगाशनः ॥

हृच्छयश्चैत्रसखः शृङ्गारयोनिः पुष्पकेतुश्च ॥ २६ ॥ ब्रह्म ज्ञानं सूयते ब्रह्मसूः । ऋष्यनामा मृगः केतुरस्य (ऋष्यकेतुः) । उषा बाणदुहिता (तस्याः पतिः) । बलादयो हरेर्भ्रातृपुत्रपौत्राः, यद्भागुरिः—ब्रह्मसूर्ऋष्यकेतुश्च विष्वक्सेनात्मजात्मजः । संहितासु त्वेकं ब्रह्म वासुदेवसंकर्षणप्रद्युम्नानिरुद्धाख्यया चतुर्व्यूहात्मकमाहुः । विश्वकेतुरित्यपपाठः । लक्ष्यते लक्ष्मीः, लक्षेर्मुट्च (४४० उ०) इतीप्रत्ययान्तः, अत एव ङ्यन्तत्वाभावाद्, हलङ्याभ्योर्दीर्घात्सुतीति ($\frac{६।१।६८}{२५२}$) सुलोपाभावः । पद्मं विद्यतेस्याः पद्मा, अर्शआदित्वादच् ($\frac{५।२।१२७}{२९३३}$) । एवं कमला । श्रयतीति श्रीः, क्विब्वचिप्रच्छिश्रि (२१५ उ०) इत्यादिना क्विब्दीर्घौ । मा रमा अब्धिजाइन्दिरेत्याद्यूह्यम् ॥ २७ ॥ पञ्चजने पाताले भवः पाञ्चजन्यः, बहिर्देवपञ्चजनेभ्यश्चेति वक्तव्यात् पञ्चजनादुपसंख्यानम् (वा० $\frac{२८६८}{१४३५}$) ञ्यः । लक्ष्मीपतेरिति शेषः । सुखेन दृश्यते (सुदर्शनः), भाषायां शासियुधीति ($\frac{३।२।४३}{३३०९}$ वा०) युच् । सुदर्शनः पुंसि लोकाश्रयत्वाल्लिङ्गस्य, यथा—बन्धुरेष जगतां सुदर्शनः (शिशु० १४,१६) । विष्णुः कुमोदकः शौरिरिति दुर्गपाठात्, कुमोदकस्येयं कौमोदकी लक्ष्मीपतेर्गदा । संहितासु मेण्ठादौ कौपोदकीति पाठः, कूपोदकाज्जातेत्याम्नायात् । नन्दयतीति नन्दकः । कुं भुवं स्तुभ्नाति व्याप्नोति कुस्तुभोब्धिस्तस्यायं कौस्तुभः ॥ २८ ॥ गरुतः पक्षाः सन्त्यस्य गरुत्मान्, झयः ($\frac{५।४।१११}{६८२}$) इति वत्वं यवादिपाठान्नास्ति । गरुद्भिर्डयते गरुडः, पृषोदरादित्वाल्लुक् ($\frac{६।३।१०९}{१०३४}$) । गिरति नागान्वा । तृक्षस्यापत्यं तार्क्ष्यः, गर्गादित्वाद्यञ् ($\frac{४।१।१०५}{११०७}$)

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh

52 Śiva.

३० शम्भुरीशः पशुपतिः शिवः शूली महेश्वरः ।
ईश्वरः शर्व ईशानः शङ्करश्चन्द्रशेखरः ॥
३१ भूतेशः खण्डपरशुर्गिरीशो गिरिशो मृडः ।
मृत्युञ्जयः कृत्तिवासाः पिनाकी प्रमथाधिपः ॥
३२ उग्रः कपर्दी श्रीकण्ठः शितिकण्ठः कपालभृत् ।
वामदेवो महादेवो विरूपाक्षस्त्रिलोचनः ॥
३३ कृशानुरेताः सर्वज्ञो धूर्जटिर्नीललोहितः ।
हरः स्मरहरो भर्गस्त्र्यम्बकस्त्रिपुरान्तकः ॥
३४ गङ्गाधरोऽन्धकरिपुः क्रतुध्वंसी वृषध्वजः ।
व्योमकेशो भवो भीमः स्थाणू रुद्र उमापतिः ॥
'अहिर्बुध्न्योऽष्टमूर्तिश्च गजारिश्च महानटः' ॥

विनताया अपत्यं वैनतेयः, स्त्रीभ्यो ढक् (४।१।१२० / ६१२३) । सुपर्णो हेमपक्षत्वात् ॥२९॥ शं भवत्यस्माच्छम्भुः, मितद्वादित्वात् (२१५२ / ३१६७ वा०) डुः । ईष्टे–ईशः । पशूनां सुरनरतिरश्चां पतिः शिवः श्रेयस्करत्वात् ईष्टे–ईश्वरः, ताच्छील्ये स्थेशभासेति (३।२।१२९ / ३१७९) वरच् । महेश्वरो महोदधिवद्गूढः । शृणाति हिनस्ति पापानि शर्वः । ईशानः, ताच्छील्ये चानश् (३।२।१२९ / ३१७९) शंकरः, कृञोहेत्विति (३।२।२० / २९३४) टः ॥३०॥ गिरिं श्यति–उपभोगेन तनूकरोति गिरिशः, गिरिर्वास्यास्तीति, लोमादित्वाच्छः (५।२।१०० / ६९७७), गिरौ शेते वा गिरिशः, गिरौडश्छन्दसि (१९९९ / २९२९ वा०) लोके त्वाशुशुक्षणिवत् । मृडति सुखयति मृडः । मृत्युं जयति मृत्युंजयः, संज्ञायांभृतृवृजीति (३।२।४६ / २९६३) खच् । कृत्तिश्चर्म वासोस्य कृत्तिवासाः ॥ ३१ ॥ उच्यति क्रुधा समवैति-उग्रो रौद्रत्वात् । श्रीः शोभा कण्ठेऽस्य श्रीकण्ठः । नीलगलत्वाच्छितिर्नीलः कण्ठोऽस्य शितिकण्ठः । वामः श्रेष्ठो देवः, संसारे वामत्वाद्वा । विरूपाणि त्रित्वादक्षीण्यस्य विरूपाक्षः, बहुव्रीहौ सक्थ्यक्ष्णोःस्वाङ्गात् (५।४।११३ / ८७२) षच् ॥ ३२ ॥ कृशानौ रेतोस्य कृशानुरेताः, देव्या सोढुमशक्यत्वादग्नौ हि क्षिप्तं रेतः, अत एव पावकिः कुमारः । धूर्गङ्गा जटास्वस्य धूर्जटिरिति निरुक्तम् । नीलः कण्ठे लोहितश्च केशेऽतो नीललोहित इति पुराणम् । हरत्यघं हरतेः, हरः–अच् । स्मरं हरति स्मरहरः, हरतेरनुद्यमने (३।२।९ / २९२३) अच् । बिभर्ति भर्गः, भृज्ज्यन्तेनेन कामकालादयो वा । त्रीण्यम्बकाक्षीणिन्यस्य त्र्यम्बकः, त्रयाणां लोकानामम्बकः पितेत्यागमः, द्यौर्भूमिरापस्तिस्रोम्बा अस्येति वा । (त्रिपुरान्तकः) त्रिपुरीति भाष्यदर्शनेऽपि लोकाश्रयत्वात्त्रिपुरं पात्रादौ (पात्राद्यन्तस्य न) ॥ ३३ ॥ गङ्गाया धरश्चक्रधरादिवत्, अन्यथा कर्मण्यण् (३।४।२७ / ३३४८), संज्ञायांभृतृवृजीति (३।२।४६ / २९६३) खच्–वा

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh

1 braided hair.
2 bow.
attendants
1 divine mothers.
3 Superhuman powers.
21 Bhavānī.

३५ कपर्दोऽस्य जटाजूटः, पिनाकोऽजगवं धनुः ।
प्रमथाः स्युः पारिषदा, ब्राह्मीत्याद्यास्तु मातरः ॥

३६ विभूतिर्भूतिरैश्वर्यमणिमादिकमष्टधा ।
उमा कात्यायनी गौरी काली हैमवतीऽऽश्वरी ॥

स्यात् । अन्धको नामासुरस्तस्य रिपुः । क्रतुं दक्षयज्ञं ध्वंसतेऽवश्यं क्रतुध्वंसी । व्योम द्यौः के मूर्ध्नि शेतेस्य व्योमकेशः, शीर्ष्णो द्यौः समवर्ततेति श्रुतेः, (ऋ. १०) गङ्गां धारयितुं व्योमव्यापिनोस्य केशा वा व्योमकेशः । भवत्यस्माद्विश्वं भवः । बिभेत्यस्माद् भीमः, भीमादयोपादाने (३।४।७४ / ३१७३) । तिष्ठतीति स्थाणुः । रोदनाद्रुद्रः, सोरोदीद्यदरोदीत्तद्रुद्रस्य रुद्रत्वमिति श्रुतेः, रोदयत्यरिस्त्रीर्वा, रेदेर्णिलुक्च (१७९ उ०) अहिर्बुध्नोष्टमूर्तिश्च [महानादौ] गजासुरारिश्च । महानटो देश्याम् । शिपिविष्टो वृषाकपिभैरवो नानार्थे ॥ ३४ ॥ ईश्वरस्य जटाजूटः कपर्दनामा, कं शिरः पिपर्ति कपर्दः, औणादिको दः ॥ अस्य धनुः, पिनह्यते पिनाकः, शूलार्थोप्यनेकार्थेषु वक्ष्यते । अजगवे विप्रतिपत्तिर्गम्यते, गाण्ड्यजकात्संज्ञायां (५।२।११० / १०२७) इति मत्वर्थे वे–अजकवमिति साध्यम् । अथाजगवोस्थिविकारस्तदाणि वृद्धिः स्यात्, यत्कात्यः—धनुर्वदन्त्याजगवं पिनाकिकरगोचरम् । प्राच्यास्तु, गाण्ड्यजगादिति पेठुः । अजगवं धनुः प्रोक्तमिति तु पाश्चात्या अपि । प्रमथ्नन्ति प्रमथाः, अच् । परिषदि साधवः पारिषदाः, भक्ताण्णः (४।४।१०० / १६७२) इति प्रकृते परिषदो ण्यति (५।४।१०१ / १६७३) योगविभागाद् णः । संघाते प्रमथे गण इति गणा अपि । अस्याष्टौ परिवारत्वेन मान्ति वर्तन्ते मातृनाम्न्यः । ब्राह्मी माहेश्वरी चैन्द्री वाराही वैष्णवी तथा । कौमारी चर्ममुण्डा च कालसंकर्षणीति च । ब्रह्माणीत्यानुगागमाभावाच्चैव प्रसिद्धं नाम । कथंचिज्जातित्वात्, ब्राह्मयोऽजातावितिं (६।४।१७१ / १२५८) ब्राह्मीत्याद्या इत्येके पेठुः, यद्भागुरिः–ब्राह्मयाद्या मातरः स्मृताः । रेवत्यो देश्याम् ॥ ३५ ॥ भवनं भूतिः । अणिमा महिमा लघिमा प्राप्तिः प्राकाम्यमीशिता वशिता–ईशस्य यत्रकामावसायितेत्यष्टधैश्वर्यम् । भूतिविभूती समानार्थे लोचनविलोचनवत् । उ मेति मात्रा तपसो निषिद्धा (कुमा० १-२६) इत्युमा । कात्यशब्दाद् गर्गादिभ्यो यञ् (४।१।१०५ / १२७७) इति यञन्ताद् (सर्वत्र) लोहितादिकतन्तेभ्य इति ष्फः । (३।१।१३ / १६६८), पित्वाद् ङीप् कात्यायनी । हिमवतोपत्यं हैमवती । ईष्टे तच्छीलाऽऽश्वरा, स्थेशभासेति (३।२।१७५ / १५७५) वरच् । अश्नोतेराशुकर्मणि वरट्च (७३५ उ०)

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh

३७ शिवा भवानी रुद्राणी शर्वाणी सर्वमङ्गला ।
अपर्णा पार्वती दुर्गा मृडानी चण्डिकाऽम्बिका ॥
आर्या दाक्षायणी चैव गिरिजा मेनकात्मजा ॥

8 Gaṇeśa. ३८ विनायको विघ्नराज-द्वैमातुर-गणाधिपाः ।
अप्येकदन्त-हेरम्ब-लम्बोदर-गजाननाः ॥

17 Kārtikeya. ३९ कार्तिकेयो महासेनः शरजन्मा षडाननः ।
पार्वतीनन्दनः स्कन्दः सेनानीरग्निभूर्गुहः ॥

४० बाहुलेयस्तारकजिद्विशाखः शिखिवाहनः ।
षाण्मातुरः शक्तिधरः कुमारः क्रौञ्चदारणः ॥

6 Nandī 'शृङ्गी भृङ्गी रिटिस्तुण्डी नन्दिको नन्दिकेश्वरः ।
2 Divine mothers. कर्ममोटी तु चामुण्डा, चर्ममुण्डा तु चर्चिका' ॥

उपधाया ईत्वमितीश्वरी ॥ ३६ ॥ शिवा स्वतः श्रेयस्करीत्वाच्छिववत्, यच्छाश्वतः— शिवं भद्रं शिवः शंभुः शिवा गौरी शिवाभया १ ॥ पुंयोगे च शिवस्य स्त्री शिवी । भवस्य स्त्री भवानी, इन्द्रवरुणभवेति (४।१।४९) ङीषानुकौ । एवं शर्वाण्यादि । अपर्णा तपसि पर्णानामप्यनशनात् । पर्वतस्यापत्यं पार्वती । दुःखेन गन्तुं शक्यतेस्यां दुर्गा, सुदुरोरधिकरणे (३।१।९६ वा०) इति ढः । चण्डी कोपना, ब्रह्मादित्वाद् (४।१।४५) ङीप्, इकःकेऽणः इति ह्रस्वः । अम्बैवाम्बिका । जगन्माता-आर्या भैरवी सती दाक्षायणी च । गणनायिका देश्याम् ॥ ३७ ॥ विगतो नायको नियन्तास्य विनायकः, अन्येषां विनेता वा । अत एव विघ्नानां राजा विनियन्ता । द्वयोर्मात्रोरपत्यं द्वैमातुरः [गाङ्गेयोपि यतः], मातुरुत्संख्यासंभद्रपूर्वायाः (८।३।८५) इत्यण्, अन्त्यस्योत्वं च । गुहोत्पाटितदन्तत्वादेकदन्तः । प्रत्यूषे हेरम्बते शब्दायते हेरम्ब इति नैरुक्ताः, देशीपदप्रायं तु मन्महे । आखुरथोपि ॥ ३८ ॥ कृत्तिकानां बहुलाख्यानामपत्यम् । महती सेनास्य महासेनः । शरवणे जन्मास्य शरजन्मा । षडाननः कृत्तिकानामग्निपत्नीनां षण्णां स्तनपानात् । स्कन्नं शुष्कं रेतोस्य स्कन्दत्यरीन्वा स्कन्दः । गूहते सेनां गुहः, कः ॥ ३९ ॥ विशाखासु जातो विशाखः, नक्षत्राल्लुग्बहुलम् । शिखी मयूरो वाहनमस्य शिखिवाहनः । षण्णां मातृणामपत्यं षाण्मातुरः । शक्तेर्धरः शक्तिधरः, अन्यथा शक्तिंधरः शक्तिधारो वा स्यात् । कुमारो ब्रह्मचारित्वात्, कुत्सितो मारोस्येति वा । क्रौञ्चो गिरिस्तेन ह्यस्य कैलासमस्त्रशिक्षार्थं गच्छतो मार्गो रुद्धोभूत्, अतस्तं दारयति क्रौञ्चदारणः, ल्युः । स्वामी च । गाङ्गे-

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh

·26 Indra. ४१ इन्द्रो मरुत्वान् मघवा बिडौजाः पाकशासनः ।
वृद्धश्रवाः सुनासीरः पुरुहूतः पुरन्दरः ॥
४२ जिष्णुर्लेखर्षभः शक्रः शतमन्युर्दिवस्पतिः ।
सुत्रामा गोत्रभिद्वज्री वासवो वृत्रहा वृषा ॥
४३ वास्तोष्पतिः सुरपतिर्बलारातिः शचीपतिः ।
जम्भभेदी हरिहयः स्वाराण् नमुचिसूदनः ॥
४४ संक्रन्दनो दुश्च्यवनस्तुराषाण् मेघवाहनः ।
आखण्डलः सहस्राक्षः, ऋभुक्षास्तस्य तु प्रिया ॥

योपि ॥ ४० ॥ (भृङ्गी भृङ्गरिटिस्तुण्डिनन्दिनौ नन्दिकेश्वरे । कर्णमोटी तु चामुण्डा चर्ममुण्डातिचण्डि [च चार्चि-]केति वक्तव्यम् ॥) इन्द्रः परमैश्वर्ययोगात् । मरुतो देवाः सन्त्यस्य मरुत्वान्, तसौमत्त्वर्थे ($\frac{४।१।१९}{१८९६}$) इति भसंज्ञायां पदकार्यं जश्त्वं नास्ति । मघः सौख्यमस्यास्तीति मघवा, श्वन्नुक्षन् (१५७ उ०) इत्यत्र तु निपातितस्य मघवन्नित्यस्य । पक्षे सौत्रादेशाद्दीर्घाभावान्मघवन्, मघवाबहुलम् ($\frac{६।४।१२८}{३६७}$) । वेवेष्टि विड् व्यापकमोजोऽस्य विडौजाः, विट्सु वा–ओजोस्य, पृषोदरादित्वात् ($\frac{६।३।१०९}{१०३४}$) वृद्धिः । बिड् भेदने वा, विडं भेदकमोजोऽस्य । पाकानां दितिगर्भाणां शासनः । वृद्धे श्रवसि अस्येति वृद्धश्रवाः, वृद्धेभ्यः श्रणोति वा । शोभना नासीरा अग्रेसरा अस्य सुनासीरः, शुः पूजायां श्वशुरवत्, शुनासीरयोरपत्यमित्येके । पुरु प्रभूतं हूतं यज्ञेष्वाह्वानमस्येति पुरुहूतः । पुराण्यरीणां दारयति त्रिपुरं वा पुरंदरः, वाचंयमपुरंदरौ च ($\frac{६।३।६९}{२९५,७}$) इति साधुः ॥ ४१ ॥ जयनशीलो जिष्णुः, ग्लाजिस्थश्च ग्स्नुः ($\frac{३।२।१३९}{३११९}$) । लेखर्षभो देवश्रेष्ठः । शक्नोति शक्रः । शतं मन्यवः क्रतवोस्य शतक्रतुः ।। दिवः स्वर्गस्य पतिः, षष्ठ्याः पतिपुत्रेति ($\frac{८।३।५३}{३६३८}$) अलुकि, कस्कादित्वात् ($\frac{८।३।४८}{१४४}$) सत्वे च दिवस्पतिः । सुष्ठु त्रायते सुत्रामा, मनिन्, शोभनं त्राम बलं वास्य । गोत्रान् गिरीन्पक्षच्छेदाद् भिन्नवान् गोत्रभित् । वस्वपत्यं वासवः । वृत्रबलजम्भनमुचयोऽसुराः । वर्षतीति वृषा, कनिन् ॥ ४२ ॥ वास्तोर्गृहक्षेत्रस्याधिष्ठाता वास्तोष्पतिः, षष्ठ्या अलुकि षत्वं, वास्तोष्पतिगृहमेधाच्छ च इति लिङ्गात् । हरयः पिङ्गा हया अस्य हरिहयः । स्वः स्वर्गे राजते स्वाराट्, ढ्रलोपे पूर्वस्य दीर्घोऽणः ($\frac{६।३।१११}{१७४}$), व्रश्चभ्रस्जेति ($\frac{८।२।३६}{२९४}$) षः ॥ ४३ ॥ संक्रन्दयति रिपुस्त्रीः संक्रन्दनः, ल्युः । दुष्टं च्यवते परदारेषु रेतस्स्रुतेर्दुश्च्यवनः, चलनशब्दार्थादिति ($\frac{६।२।१४८}{३१२८}$) युच्, दुःखेन च्यवते रणाद्वा । तुरं त्वरितं साहयत्यभिभवत्यरींस्तुराषाट्, तुरं वेगं सहते वा, छन्दसि सहः ($\frac{३।२।६३}{३४००}$) इति ण्विः,

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh

3 Śacī.
1 *Indra's City.*
1 horse.
charioteer.
1 garden.
1 palace.
2 Jayanta.
4 *Indra's* elephant.
10thunder-bolt.

४५ पुलोमजा शचीऽन्द्राणी, नगरी त्वमरावती ।
हय उच्चैःश्रवाः, सूतो मातलिर्नन्दनं वनम् ॥
४६ स्यात् प्रासादो वैजयन्तो, जयन्तः पाकशासनिः ।
ऐरावतोऽभ्रमातङ्गैरावणाऽभ्रमुवल्लभाः ॥
४७ ह्रादिनी वज्रम-स्त्री स्यात् कुलिशं भिदुरं पविः ।
शतकोटिः स्वरुः शम्बो दम्भोलिरशनिर्द्वयोः ॥

नहिवृतिवृषीति (६।३।११६ / १०३७) पूर्वपदस्य दीर्घः, सहेः साडः सः (८।३।५६ / ३३७) इति षत्वम् । मेघा वाहनमस्य, इन्द्रो हि मेघानाविश्य वर्षति, मेघ ऐरावतो वाभ्राधिष्ठातृत्वात् । आखण्डयति भिनत्त्यरीनाखण्डलः । ऋभून्देवान् क्षियत्यधिवसति ऋभुक्षः, यद्वा–अर्तेर्भुक्षिनक् (उ० ?), पथिमथ्यृभुक्षामात् (७।१।८५ / ३६७) । प्राचीनबर्हिरहिहा पृतनाषाट् पुलोमजित् । उग्रधन्वा च पुराणे ॥ ४४ ॥ पुलोम्नो मुनेर्जाता, अत एव पौलोमी । शचते शची, शच श्वच गतौ । इन्द्रस्य स्त्रीन्द्राणी, इन्द्रवरुणेति (४।१।४९ / ५०७५) ङीषानुकौ । तस्येति प्रत्येकं संबध्यते । अमरा विद्यन्तेस्याममरावती, मतौ बह्वचोनजिरादीनां (६।३।११९ / १०४१) इति दीर्घः । उच्चैः श्रवसी अस्योच्चैःश्रवाः । तस्य सूतः सारथिर्मतलस्यापत्यं मातलिः । तस्योपवनं, नन्दयति नन्दनं, ल्युः ॥ ४५ ॥ विजयते विजयन्तो जिष्णुः, झच्, तस्येदम् (४।३।१२० / १५०००) इत्यण्, वैजयन्ती अस्यास्तीत्येके । तस्य पुत्रो जयन्तः, पाकशासनस्यापत्यं (पाकशासनिः) । इरावत्यब्धौ जात ऐरावतः । अभ्रस्थत्वादभ्रमातङ्गः, अभ्ररूप इत्येके, यत्कात्यः–ऐरावतं विजानीयान्नागमम्बुदगोचरम् । इरावणोद्भव ऐरावणः, विभाषौषधीति (८।४।६ / १०५१) वा णत्वम् । अभ्रे खे माति न भ्राम्यति वा मन्थरगामिनीत्वादभ्रमुस्तद्भार्या, यल्लक्ष्यम्–अभ्रं वा जघनान्तदोलितकरः (बा० रा०) । सुरगजो गजमल्लश्च ॥ ४६ ॥ ह्रादः स्फूर्जथुरस्यास्तीति ह्रादिनी । वजति यात्येव न प्रतिहन्यते वज्रम् । कुलिनः पर्वतान्श्यति पक्षच्छेदेन तनूकरोति कुलिशं,कुत्सितं लिक्षति तक्ष्णोत्यरीन्वा । भिनत्ति तच्छीलं भिदुरम्, विदिभिदिच्छिदेः कुरच् (३।२।१६२ / १४३२) । पुनाति पविः, हीरकस्य पविसंज्ञया प्रसिद्धत्वात् । शतं बह्व्यः कोटयोस्य शतकोटिः । स्वरति स्वरुः, शृस्विति (उ० १०) उः, शोभनान्यरूंषि धारा अस्येति सान्तो वा । शं विद्यतेस्य शंवः, कशंभ्यांवभेति (५।२।१३८ / १९४४) वः । दम्नोति खेदयति दम्भोलिः । अश्नाति शैलानशनिः, न शनैर्याति वा । व्याधामोपि ॥ ४७ ॥

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh

2 The car of *Indra*.
1 A divine sage.
2 The council of gods.
3 The food of the gods.
4 The river of heaven.
5 The mountain *Sumeru*.
1 Five celestial trees.
2 Sanat-kumāra.
6 The *Aśvins*.

४८ व्योमयानं विमानोऽस्त्री नारदाद्याः सुरर्षयः ॥

स्यात् सुधर्मा देवसभा, पीयूषममृतं सुधा ।

४९ मन्दाकिनी वियद्गङ्गा स्वर्णदी सुरदीर्घिका ॥

मेरुः सुमेरुर्हेमाद्री रत्नसानुः सुरालयः ।

५० पञ्चैते देवतरवो मन्दारः पारिजातकः ॥

संतानः कल्पवृक्षश्च पुंसि वा हरिचन्दनम् ।

५१ सनत्कुमारो वैधात्रः, स्वर्वैद्यावश्विनीसुतौ ॥

नासत्यावश्विनौ दस्रावाश्विनेयौ च तावुभौ ।

व्योम्नि यान्त्यनेन व्योमयानम् । विमान्ति वर्तन्तेऽस्मिन्देवा विमानम् । नारं नरसमूहं द्यति भिनत्ति कलहैर्नारदः । आद्यशब्दाद्देवलादयः । सुराश्च ते ब्रह्मादिपुत्रत्वादृषयश्च, षष्ठीसमासो वा । सुष्ठु धर्मोऽस्यां सुधर्मा, यल्लक्ष्यं-सुधर्मानवमां पुरीं (सभां) (१७.२७ रघु०), धर्मादनिच् केवलात् (५।४।१२४ / ८६३) । सह भान्त्यस्यां सभा स्थानगृहम् । पीयते पीयूषं, पीयेरूषन् (उ० ५१६) । नास्ति मृतमत्रामृतम् । सुष्ठु धीयते सुधा, धेट् पाने । समुद्रनवनीतं देश्याम् ॥ ४८ ॥ मन्दमकत्यवश्यं मन्दाकिनी, अक अग कुटिलायां गतौ । सिद्धसिन्धुश्च । गङ्गामात्रस्य नामानि च वक्ष्यामः । मिनोति क्षिपत्युच्चत्वाज्ज्योतींषि मेरुः । सुमेरुरभिन्नार्थः, इन्द्रमहेन्द्रवत् । हेम्नोद्रिर्हेमाद्रिः । रत्नानि सानावस्य रत्नसानुः ॥ ४९ ॥ मन्दा आरा धारा अस्य सरलत्वान्मन्दारः । पारिणः पारवतोऽब्धेर्जातः पारिजातकः । संतन्यन्तेऽस्मिन्पुष्पाणि संतानः । कल्पवृक्षः संकल्पपूरणात् । हरेरिन्द्रस्य चन्दनं, कपे पीतं वा ॥५०॥ सनन्नित्यं कुमारः । सनात्कुमारोऽपि । विधातुरपत्यं वैधात्रः । वैद्यसंहिताप्रणेतृत्वादत्रोक्तः । न-असत्यावसाधू नासत्यौ, नभ्राण्नपादिति (६।३।७५ / ७७९) नञ् प्रकृत्या । अश्विनौ सदश्वाधिरूढौ । दस्यतो हरतो रोगान्दस्रौ । अश्विन्या अपत्यं-ढकि-आश्विनेयौ । उभाविति द्वित्वादेकवचनाभावः । भागुरिस्त्वाह-नासत्यदस्रौ यमजावर्कजावश्विनौ यमौ,

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh

2 Nymphs 2 Celestial musicians.

५२ स्त्रियां बहुष्वप्सरसः स्वर्वेश्या उर्वशी-मुखाः ॥
हाहा हूहूश्चैवमाद्या गन्धर्वास्त्रिदिवौकसाम् ।

34 Fire.

५३ अग्निर्वैश्वानरो वह्निर्वीतिहोत्रो धनञ्जयः ॥
कृपीटयोनिर्ज्वलनो जातवेदास्तनूनपात् ।

५४ बर्हिः शुष्मा कृष्णवर्त्मा शोचिष्केश उषर्बुधः ॥
आश्रयाशो बृहद्भानुः कृशानुः पावकोऽनलः ।

नासत्यसहितौ दस्राविति व्याख्येयं, न त्वेको नासत्योन्यो दस्रः ॥ ५१ ॥ घृताची मेनका रम्भा–उर्वशी च तिलोत्तमा। सुकेशी मञ्जुघोषाद्याः कथ्यन्तेप्सरसो बुधैः। अद्भ्यः सृता अप्सरस इत्येकापि शब्दशक्तिस्वाभाव्यात्, अप्सरा इत्यपि दर्शनात् प्रायिकं बहुत्वम्। ऊरू अश्नुते नारायणस्योरूद्भवत्वादुर्वशी, पृषोदरादित्वात् ($\frac{६।३।१०९}{१०३४}$) ह्रस्वः, यल्लक्ष्यं–ऊरूद्भवा नरसखस्य मुनेः सुरस्त्रीति (विक्र० १-४) मुखशब्दाद्रम्भादयः। हाहा एको हूहूरन्यः, एकं नामेत्येके, गन्धर्वौ च हाहा हूहूरिति तु लक्ष्यम्। आलापनिकानुकारात्पुंस्येतौ, अव्ययाविति **श्रीभोजः**। आद्यशब्दात्तुम्बुरुमुखा गन्धर्वा देवगायनाः ॥ ५२ ॥ अङ्गत्यूर्ध्वं यात्यग्निः। विश्वानरस्यापत्यं वैश्वानरः, विदादित्वादञ् ($\frac{४।१।१०४}{१२०६}$)। वहति हव्यं वह्निः। वीतयोश्वा होत्रं हव्यमस्येत्यागमः, वीतिरशनमिति **प्राच्याः**। धनं जयति धनंजयः, संज्ञायां-भृतृवृजीति ($\frac{३।२।४६}{२९६३}$) खच्। उदकनामान्युत्तराण्येकशतमिति (निरुक्तं २-७-२४), कृपीटस्याम्भसो योनिर्धूमजत्वान्मेघानां, अग्नौ प्रास्ताहुतिः सम्यगिति च (मनु० ३-७६), कृपीटं योनिरस्येत्येके, यदाहुः—अद्भ्योग्निर्ब्रह्मतः क्षत्रमश्मनो लोहमुत्थितम् (मनु० ९-३२१)। ज्वलति ज्वलनः, जुचम्ङ्क्येति ($\frac{३।२।१५०}{३१३०}$) युच्। जाता वेदा अस्माज्जातवेदाः, जाते जाते विद्यते वा। तनूं न पातयतीति तनूनपात्, देहधर्तृत्वात्, नञ्राण्नपादिति ($\frac{६।३।७५}{७५९}$) नञ् प्रकृत्या ॥ ५३ ॥ बर्हिः शुष्मेति व्यस्तं समस्तं वा नाम, बर्हिर्दर्भः शुष्म बलमस्येति, बर्हति वर्धते बर्हिः, यथा बर्हिर्मुखा देवाः। शुष्यन्त्यनेन शुष्मा, शल्लक्ष्यम्—शुष्मणि प्रणयनाभिसंस्थि (स्कृ)ते (शिशु० ?)। बर्हिरुत्थ इत्यमरमाला, यथा–दृशां बर्हणो बर्हिरुत्थः (बा० रा०)। कृष्णो धूमो वर्त्मास्य (कृष्णवर्त्मा)। शोचींषि ज्वालाः केशा अस्य शोचिष्केशः। उषसि रात्रौ बुध्यते प्रकाशते—उषर्बुधः, अहरादीनांपत्यादिषु (वा० $\frac{८।२।६९}{१७२}$) इति रेफः। आशेतेत्रेत्याशयमाधारमश्नातीत्याशयाशः, आश्रयाश इत्येके। बृहतो भानवो रश्मयोस्य बृहद्भानुः। कृश्यति कृशानुः, कृशोप्यनिति वर्ध[वर्त]-

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh

५५ रोहिताश्वो वायुसखः शिखावानाशुशुक्षणिः ॥
हिरण्यरेता हुतभुग् दहनो हव्यवाहनः ।

५६ सप्तार्चिर्दमुनाः शुक्रश्चित्रभानुर्विभावसुः ॥
3 Submarine fire. शुचिरप्पित्त, मौर्वस्तु वाडवो वडवानलः ।

5 Flame. ५७ वह्नेर्द्वयोरज्वाल-कीलावर्चिर्हेतिः शिखा स्त्रियाम् ॥
2 A spark. त्रिषु स्फुलिङ्गोऽग्निकणः, संतापः संज्वरः समौ ।
2 A burn. 1 Meteor. 'उल्का स्यान् निर्गतज्वाला, भूतिर्भसित-भस्मनी ॥
5 Ash. 3 Forest fire. क्षारो रक्षा च, दावस्तु दवो वनहुताशनः' ।

14 Yama. ५८ धर्मराजः पितृपतिः समवर्ती परेतराट् ॥
कृतान्तो यमुनाभ्राता शमनो यमराड् यमः ।

ते वा । पुनाति पावकः । अनित्यनेन लोक इत्यनलः ॥ ५४ ॥ रोहिताख्यो मृगोऽश्वो वाहनमनस्येति रोहिताश्वः, यदि वा रोहिता लोहिता अश्वा अस्येति । वायुः सखानुचरो[वा]स्य वायुसखः। आशोष्टुमिच्छत्याशुशुक्षणिः, आङिशुषेःसनश्छन्दसि (उ० १६८) इत्यनिः । हिरण्यं रेतोस्य हिरण्यरेताः, यत्स्मृ[च्छु]तिः—अग्नेरपत्यं प्रथमं सुवर्णमिति । हव्यं वाहयति देवान्नयति हव्यवाहनः, हव्य (कव्य) पुरीषपुरीष्येषु ल्युट्, हव्येऽवन्तः पादम् । ($\frac{३।२।६५}{३४११}$, $\frac{३।२।६६}{३४१२}$) ॥ ५५ ॥ दाम्यति शाम्यति विनयत्यन्नं दमुनाः, औणादिक उनस्, दमूना इत्येके, दमेरूनसिः (उ० ६८४) । शुक्रं तेजोस्त्यस्य शुक्रः, अर्शआदित्वादच् ($\frac{५।२।१२७}{१९३३}$)। विभैव वसु धनमस्य विभावसुः । शुचिः शोधकत्वात् । अपां पित्तं सारं धूमयोनित्वादप्पित्तम् । उदर्चिश्च । क्षारस्तु भसितं भस्मेति वाच्यम् । उर्वस्यापत्यमौर्वः, वरुणभयान्मात्रा—ऊर्वोर्गोपितत्वादित्येके । वडवामुखेऽनलः वडवानलः । शाकपार्थिवादिसमासः । वाडवोश्वमुखत्वात् ॥ ५६ ॥ ज्वलति ज्वालः (ज्वाला वा), ज्वलितिकसन्तेभ्योणः ($\frac{३।१।१४०}{२९०२}$)। (कीलः) कील बन्धे । प्रायेणार्चिः स्त्री, ज्वाला भासो न पुंस्यर्चिरिति हि वक्ष्यते, अर्च्यतेर्चिः । हिनोति हेतिः । शिनोति शेते वा शिखा । स्फुलति चलति स्फुलिङ्गः, जातावपि न ङीप् कन्दरावत् । संतापयति संतापः । संज्वरयति संज्वरः ॥ ५७ ॥ धर्मस्य राजा धर्मराजः । समवर्ती रिपौ मित्रे च समवर्तनात् । परेतराट् प्रेताधिपः । कृतोन्तो विनाशोनेन कृतान्तः । शमयतीति शमनः । यमेन राजते यमराट् । यमयतीति यमः, यमलजातत्वाद्वा ॥ ५८ ॥

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh

५९ कालो दण्डधरः श्राद्धदेवो वैवस्वतोऽन्तकः ॥

15 A giant or ghost.

राक्षसः कोणपः क्रव्यात् क्रव्यादोऽस्रप आशरः ।

६० रात्रिञ्चरो रात्रिचरः कर्बुरो निकषात्मजः ॥

यातुधानः पुण्यजनो नैर्ऋतो यातु-रक्षसी ।

5 Varuna.

६१ प्रचेता वरुणः पाशी यादसांपतिरप्पतिः ॥

20 Air or wind.

श्वसनः स्पर्शनो वायुर्मातरिश्वा सदागतिः ।

६२ पृषदश्वो गन्धवहो गन्धवाहाऽनिलाऽऽशुगाः ॥

समीर-मारुत-मरुज-जगत्प्राण-समीरणाः ।

कलयत्यायुः कालः । श्राद्धदेवः पितृपतित्वात्, श्राद्धे देवत्वाद्वा । यद्वा विवस्वदपत्यसामान्यान्मनुवत् यद्दुर्गः – श्राद्धे देवोर्कजो मनुः । अन्तं करोतीति, अन्तयत्यन्तकः, ण्वुल् । रक्ष एव राक्षसः, स्वार्थिकाः प्रकृतितो लिङ्गवचनान्यतिवर्तन्तेपीति पुंस्त्वम् । कुणपमत्ति कौणपः, शेषे (४।२।१९२ / १३१२) इत्यण् । क्रव्यमाममांसमत्ति (क्रव्याद्), क्रव्येचेति (३।२।६९ / २९७८) क्विप् (विट्) अण् च । अस्रं रक्तं पिबत्यस्रपः, आतोनुपसर्गेकः (३।२।३ / २९१५), न श्रपयति क्रव्यात्वादश्रप इत्येके । आशृणाति हिनस्त्याशरः ॥ ५९ ॥ रात्रौ चरतीति रात्रिंचरः, चरेष्टः (३।२।१६ / २९३७), रात्रेःकृतिविभाषा (६।३।७२ / १७७८) इति पक्षे नुम् । कर्बुरो वर्णेन, कर्ब हिंसायां वा । निकषा रक्षसां मातेति [नाम] माला, अतो नैकषेयभ्रान्त्याकैकसेयमाहुः । यातूनि यातना धीयन्तेस्मिन् यातुधानः । पुण्यजनो विपरीतलक्षणया । निर्ऋतेर्दिक्पालस्यापत्यं नैर्ऋतः । यातयति व्यथयतीति यातुशब्दो भीमवत् । रक्षन्त्यस्माद्रक्षः । विथुरोपि । कीनाशो नानार्थे ॥ ६० ॥ प्रचेतयते प्रचेताः, असुन् । वृणोति वरुणः । यादसां जलचराणां पतिः, यादःपतिरिति वाच्ये पक्षे वाक्याभ्यनुज्ञानम् । अपां पतिरप्पतिः । श्वसन्त्यनेन श्वसनः । स्पृशति स्पर्शनः । वाति वायुः, कृवापाजीत्युण् (उ० १) । मातरि खे श्वसति मातरिश्वा ॥ ६१ ॥ पृषन्मृगविशेषोश्वोस्य पृषदश्वः, पृषन्त्यम्बुकणाः सन्त्यश्वा अस्येत्येके । गन्धस्य वहः । अकारादनुपपदात्कर्मोपपदो (भवति) विप्रतिषेधेन इत्यस्य प्रायिकत्वात्पक्षे कर्मण्यणि (३।२।१ / २९१३) गन्धवाहः । अनन्यनेनानिलः, न निलति वा, णिल् गहने । समीरयतीत्यचि चलनशब्दार्थेति (३।२।१४८ / ३१२८) युचि च समीरसमीरणौ, समेति समि(मी)र इत्यप्येकदेशविकृतस्यानन्यत्वात् । म्रियन्तेनेन मरुत् । मरुदेव मारुतः, स्वार्थे–अण् ॥ ६२ ॥

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh

६३ नभस्वद्-वात-पवन-पवमान-प्रभञ्जनाः ॥

2 Whirlwind. 'प्रकम्पनो महावातो, झञ्झावातः सवृष्टिकः ।' 1 Storm.

5 Air inhaled: &c. प्राणोऽपानः समानश्चोदान-व्यानौ च वायवः ॥

5 Speed or velocity. ६४ शरीरस्था इमे, रंहस्तरसी तु रयः स्यदः ।

11 Quick, or swiftly. जवो, ऽथ शीघ्रं त्वरितं लघु क्षिप्रमरं द्रुतम् ॥

६५ सत्वरं चपलं तूर्णमविलम्बितमाशु च ।

9 Eternal or continually. सततेऽनारताऽश्रान्त-संतताऽविरताऽनिशम् ॥

14 Much or excessive. i ६६ नित्याऽनवरताऽजस्रमप्यथाऽतिशयो भरः ।

अतिवेल-भृशाऽत्यर्थाऽतिमात्रोद्गाढ-निर्भरम् ॥

नभोस्यास्तीति नभस्वान्, तसौमत्वर्थे ($\frac{१।४।१९}{२८९६}$) इति भसंज्ञा। अतः पदकार्यं भत्वं न भवति! पवते पवनः, युच्। तथा पवमानः, पूङ्यजोःशानन् ($\frac{३।२।१२८}{३१७८}$) । प्रभनक्ति प्रभञ्जनः । प्रकम्पनो महाबलश्च । वृष्ट्याकुलश्चण्डस्तु झञ्झामरुत् । प्रसरणेन-अपसरणेन-आसमन्तात्-ऊर्ध्वं-व्याप्त्या च-अनित्यनेनेति, घञ् । आनयतेर्डान्तस्यैतानि रूपाणीति **योगशास्त्रम्**। एते शरीरे व्यापका अपि नियतस्थानस्थाः, यदाहुः-"हृदि प्राणो गुदेऽपानः समानो नाभिसंस्थितः । उदानः कण्ठदेशस्थो व्यानः सर्वशरीरगः" ॥६३॥ वायोर्धर्मानाह । रहत्यनेन रंहः । तरन्त्यनेन तरः, असुन् । रिणाति रयते वाऽनेन रयः, अच् । स्यन्दतेऽनेन स्यदः, स्यदो जव इति ($\frac{६।४।२८}{३१८६}$) साधुः । जवनं जवः. जुङ् गतौ, ऋदोरप् ($\frac{३।३।५७}{३३३२}$) । वाजोऽपि । वेगो नानार्थे । शिङ्घति व्याप्नोति शीघ्रम् । त्वरते स्म त्वरितं तूर्णं च, विभाषाभावादिकर्मणोः ($\frac{७।२।१७}{३०५४}$) इतीट्, ज्वरत्वरेति ($\frac{६।४।२०}{३६५४}$) उपधाया ऊठ् । लङ्घ्यते लघु । क्षिपति क्षिप्रम् । अरमव्ययं, अर्तेरचि वा नामेत्यन्ये, यच्छाश्वतः-अरमङ्गेरथाङ्गस्य शीघ्रशीघ्रगयोरपि (५८५) । द्रवति स्म द्रुतम् ॥ ६४ ॥ सह त्वरया वर्तते सत्वरम् । न विलम्बते स्माविलम्बितम् । अश्नुत आशु, कृवापाजीत्युण् (उ० १) । सवेगगतिवचनो जवः धर्मवचनास्तु शीघ्रादय इति-अर्थभेदः । सदागतिप्रस्तावादाह । संतन्यते स्म सततं, समोवाहिततयोरिति (का०) पक्षे मलुक् । आरतविरतावरतशब्दा विरामार्थास्ततो नञ्समासः । न श्राम्यति स्माश्रान्तम् । अविद्यमाना निशात्रानिशम्, सा हि विरतिस्थानम् ॥ ६५ ॥ नियतं भवं नित्यम् । न जस्यति तच्छीलमजस्रं, नमिकम्पीति ($\frac{३।२।१६७}{३१४७}$) रः । [संसक्तमासक्तं च ।] अतिशेते जयत्यनेना-

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

६७ तीव्रैकान्त-नितान्तानि गाढ-बाढ-दृढानि च ।
क्लीबे शीघ्राऽऽद्य-सत्त्वे स्यात्, त्रिष्वेषां सत्त्व-गामि यत् ॥

17 Kubéra. ६८ कुबेरस्त्र्यम्बकसखो यक्षराड् गुह्यकेश्वरः ।
मनुष्यधर्मा धनदो राजराजो धनाधिपः ॥

६९ किन्नरेशो वैश्रवणः पौलस्त्यो नरवाहनः ।
यक्षैकपिङ्गैलविल-श्रीद-पुण्यजनेश्वराः ॥

1 The garden of *Kube'ra.* (his son) ७० अस्योद्यानं चैत्ररथं, पुत्रस्तु नलकूबरः । 1 *Nalakūvara*
कैलासः स्थानमलका पूर्विमानं तु पुष्पकम् ॥ 1 *Kailasa.* 1 *Kube'ra's* city. 1 Vehicle.

तिशयः । भरः पूर्णता, भृ भरणे, ऋदोरप् (३।३।५७) । अतिक्रान्तं वेलामर्थं मात्रां च । बिभर्ति भृशम् । उद्गाहते स्मोद्गाढम् । निःशेषेण भरोऽत्र निर्भरम् ॥ ६६ ॥ तीव्रति तीव्रं, ताव स्थौल्ये, रक् । एको निश्चितोन्तोत्रैकान्तम् नितान्यति स्म नितान्तम् । बाहते बाढम्, क्षुब्धस्वान्तध्वान्तेति (७।२।१८) बाढं भृशे साधु । दृढःस्थूलबलयोरिती (७।२।२०) दृढं बलवति साधु । अतिमर्यादं दरं च । सततमविच्छेदः प्रकर्षस्त्वतिशय इत्यर्थभेदः । असत्त्वे गुणक्रियाविशेषणत्वाद्-द्रव्यवृत्तित्वे सति शीघ्राद्या नपुंसके, यथा-भृशं मूर्खः, भृशं याति । एतन्मध्याद्यत्स-त्त्वगामि द्रव्यवृत्ति तत्त्रिलिङ्गं, यथा-शीघ्रा स्त्री, शीघ्रोश्वः, शीघ्रं कुलम् । सत्त्वगा-मीति किं-भरोयं, गुणातिशयोयम् ॥ ६७ ॥ कुत्सितं वे-बेरं देहोस्येति कुवे-बे-रः, कुष्ठित्वात् । त्र्यम्बकस्य सखा त्र्यंबकसखः, राजाहःसखिभ्यष्टच् (५।४।९१) । मनुष्यस्येव धर्मः श्मश्रुलत्वादिरस्य मनुष्यधर्मा, धर्मादनिच्केवलात् (५।४।१२४) । धनं दयते रक्षति धनदः, एवं श्रीदः । राज्ञां यक्षाणां राजा राजराजः ॥ ६८ ॥ विश्रवसोपत्यं वैश्रवणः, विश्रवसा विग्रहो विश्रवणेन वृत्तिरविरविकन्यायेन, शिवा-दिभ्योऽण् (४।१।११२) पुलस्तेरपत्यं गोत्रं पौलस्त्यः । नरो वाहनमस्य नर-वाहनः, वाहनमाहितात् (८।४।८) इत्यनेन नरस्यानाहितवाचित्वाद्-णत्वं नास्ति, पूर्वपदात्संज्ञायां (८।४।३) इत्यपि नास्ति, क्षुभ्नादित्वात् (८।४।३९) । किंनरादिस्वाम्येपि जात्या यक्षः, यजेर्यक्षेर्वा रूपम् । एकपिङ्गः पिङ्गलैक-नेत्रत्वात्, अतो भागुरिणा हर्यक्ष उक्तः । इडविडा मातास्येति, ऐलविलोपि डलयोरेकत्वस्मरणात् ॥ ६९ ॥ अस्येति प्रत्येकं संबध्यते । उद्यान्त्यस्मिन्नुद्यानम् । चित्ररथेन गन्धर्वराजेन निर्वृत्तं चैत्ररथम् । नडः कूवरं रथावयवोऽस्य नडकूवरः । केलयोर्जलभूम्योरास्ते, के (जले) लसनमस्य वा कैलासः स्फटिकस्तस्यायं स्फटि-कोऽद्रिः (कैलासः) । अलत्यलका, अल भूषणे, क्षिपकादित्वात् (वा० ४५३० ४६४)

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

७१ स्यात् किन्नरः किंपुरुषस्तुरङ्गवदनो मयुः । 4 His attendants.

2 His treasure. Auriferous gems. निधिर्नाशेवधिर्भेदाः पद्म-शङ्खाऽऽदयो निधेः ॥

इति स्वर्ग-वर्गः १, अत्र मूलश्लोकाः ६८ ॥, "क्षेपकश्लोकाः ५" ॥

अथ व्योमदिग्वर्गः २.

22 The sky or atmosphere.

१ द्यो दिवौ द्वे स्त्रियामभ्रं व्योम पुष्करमम्बरम् ।
नभो ऽन्तरिक्षं गगनमनन्तं सुरवर्त्म खम् ॥
२ वियद् विष्णुपदं वा तु पुंस्याकाश-विहायसी ।
विहायसो ऽपि नाको ऽपि द्युरपि स्यात् तदव्ययम् ॥

5 Space, region or quarters. 'तारापथो ऽन्तरिक्षं च मेघाध्वा च महाबिलम्' ।

इति व्योम-वर्गः २½, अत्र मूलश्लोकौ १½, "क्षेपकश्लो० १"

इत्वाभावः । पुष्पमिव पुष्पकम्, इवेप्रतिकृतौ (५।३।९६) कन् ॥ ७० ॥ किंचिन्नरो-श्वमुखत्वात्किंनरः, कुत्सितो नरो वा, किंक्षेपे (२।१।६४) इति समासः । मयते मयुः । नियतं धीयते निधिः, किः । शेव्यते शेवं स्थाप्यधनं धीयतेस्मिञ्शेवधिः । ना पुंलिङ्ग इति काकाक्षिवत् । उक्तं च-महापद्मश्च पद्मश्च शंखो मकरकच्छपौ । मुकुन्दकुन्दनीलाश्च खर्वश्च निधयो नव ॥ ७१ ॥ इति स्वर्वर्गः । १ ।

न भ्राजतेऽभ्रम्, डः । व्यवति व्योम, ज्वरत्वरस्त्रिव्यवीति (६।४।२०) ऊत्वम् । पुष्कं वारि राति (च्यवति) पुष्करम् । अम्बते शब्दायतेऽम्बरम् । न बभस्ति भाति नभः । अन्तर्ऋक्षाण्यत्रान्तरिक्षम्, पृषोदरादित्वात् (६।३।१०९) इत्वम्, द्यावापृथिव्योरन्तरीक्ष्यते वा, छान्दसमित्वम् । गच्छन्त्यनेन गगनं [वर्त्मविकारो गमेर्गश्चेति (उ० २३५) गः] । नास्त्यन्तोस्यानन्तम् । खन्यते खम् ॥ १ ॥ वियच्छति विरमति वियत् । विष्णोः पदं क्रमोऽत्र विष्णुपदम् । आकाशन्ते सूर्यादयो-त्राकाशम्, न काशते वा, छान्दसो दीर्घः । विजहाति सर्वं विहायः । तारापथो मेघाध्वा च । महाबिलं देश्याम् । दिशत्यवकाशं दिक्, ऋत्विग्दधृक्स्रग्दिगुष्णिगिति (३।२।५९) साधुः । कं स्कुभ्नाति विस्तारयति ककुप् । काशते काष्ठा ।

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

अथ दिग्-वर्गः

1 Several quarters.

दिशस्तु ककुभःकाष्ठा आशाश्च हरितश्च ताः ॥

३ प्राच्यवाची-प्रतीच्यस्ताः पूर्व-दक्षिण-पश्चिमाः ।

1 Relating to quarters Relating to each quarter.

उत्तरा दिगुदीची स्याद्, दिश्यं तु त्रिषु दिग्भवे ॥

'अवाग्भवमवाचीनमुदीचीनमुदग्भवम् ।

प्रत्यग्भवं प्रतीचीनं प्राचीनं प्राग्भवं त्रिषु' ॥

1 The lords of quarters and points.

४ इन्द्रो वह्निः पितृपतिर्नैर्ऋतो वरुणो मरुत् ।

कुबेर ईशः पतयः पूर्वाऽऽदीनां दिशां क्रमात् ॥

'रविः शुक्रो महीसूनुः स्वर्भानुर्भानुजो विधुः ।

बुधो बृहस्पतिश्चेति दिशां चैव तथा ग्रहाः' ॥

1 Elephants, at the points.

५ ऐरावतः पुण्डरीको वामनः कुमुदो ऽञ्जनः ।

पुष्पदन्तः सार्वभौमः सुप्रतीकश्च दिग्-गजाः ॥

1 Their females.

'करिण्यो ऽभ्रमु-कपिला-पिङ्गलाऽनुपमाः क्रमात् ।

ताम्रकर्णी शुभ्रदन्ती चाऽञ्जना चाऽञ्जनावती ॥'

2 Intermediate point.

६ क्लीबाऽव्ययं त्वपदिशं दिशोर्मध्ये विदिक् स्त्रियाम् ।

2 Included space.

अभ्यन्तरं त्वन्तरालं, चक्रवालं तु मण्डलम् ॥

2 The sensible horizon.

अश्नुते आशा । हरन्त्यनया हरित् ॥ २ ॥ यथासंख्येन प्राची पूर्वा, अवाची दक्षिणा, प्रतीची पश्चिमा, सर्वनाम्नोवृत्तिमात्रे पूर्वपदस्य पुंवद्भावः (१३७६/७२८.२१४७ वा०) प्राग्मध्ये पश्चाच्चाकौञ्चत्यस्याम्, अवो मध्यार्थे । अपाचीति कात्यः, जपादिश्वात्पक्षे वत्वं च । भवार्थे प्राचीनाद्याः । उत्तरत्यतिशयेनोच्चैर्वा– उत्तरा । उत्तरमञ्चत्यर्कोस्या-मुदीची । (दिश्यं) दिगादिभ्योयत् (४।३।५४/१४२९) ॥ ३ ॥ विदिगपि प्रसिद्ध्या दिक् । [एते क्रमात्पूर्वादीनां दिशां विदिशां च पतयः] । रविः शुक्रो महीसूनुः स्वर्भानुर्भानुजो विधुः । बुधो बृहस्पतिश्चैव दिशामीशास्तथा ग्रहाः ॥ ४ ॥ दिशां धारका गजा दिग्गजाः क्रमात्, ऐरावतः पुण्डरीकः कुमुदोऽञ्जनवामना इति भागुरिः क्रमं व्यत्यस्तवान् । मालापि –ऐरावतः सुप्रतीक इति । पुण्डरीकादिवर्णा-कृतिभ्यां संज्ञा एताः । शोभनानि प्रतीकान्यङ्गान्यस्य सुप्रतीकः । करिण्योऽभ्रमुकपिला-पिङ्गलानुपमाः क्रमात् । ताम्रकर्णी शुभ्रदन्ती चाञ्जना [वामना] चाञ्जनावती ॥ ५ ॥ दिशोरिदमपदिशम्, विभक्त्यर्थेऽव्ययीभावः, अव्ययीभावेशरत्प्रभृतिभ्यः

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh

15 A cloud. ७ अभ्रं मेघो वारिवाहः स्तनयित्नुर्बलाहकः ।
धाराधरो जलधरस्तडित्वान् वारिदोऽम्बुभृत् ॥

८ घन-जीमूत-मुदिर-जलमुग्-धूमयोनयः ।
2 A sucession of clouds. कादम्बिनी मेघमाला, त्रिषु मेघ-भवे ऽभ्रियम् ॥ 1 Belonging to clouds.

4 The rattling of thunder. ९ स्तनितं गर्जितं मेघनिर्घोषे रसिताऽऽदि च ।
10 Lightning. शम्पा शतह्रदा-ह्रादिन्यैरावत्यः क्षणप्रभा ॥

2 A clap of thunder. १० तडित् सौदामिनी विद्युच्चञ्चला-चपला अपि । 2 A flash of lightning.
स्फूर्जथुर्वज्रनिर्घोषो, मेघज्योतिरिरम्मदः ॥

($\frac{५।४।१०७}{६७७}$) समासान्तः, अव्ययीभावश्च ($\frac{२।४।१८}{६५९}$) इति नपुंसकाव्ययत्वे । विशिष्टा दिग्विदिक्, उभयव्यपदेशात्, यदाहुःयान्यासामन्तरालानि विदिशः प्रदिशश्चा ताः (अमरमाला) । अन्तरमवकाशमालात्यन्तरालम् । चक्राकारेण वलते चक्रवालं, वाडते वा, वाडृ अप्राप्ये । मण्ड[ण्ड्य]ते मण्डलम् । सूत्रद्वये दिशामित्यनुवर्तयन्ति प्रसङ्गात्सामान्येनेति सभ्यः ॥ ६ ॥ अभ्रत्यपो राति वाभ्रम्, अभ्र गत्यर्थः, न भ्रश्यन्त्यापोस्मादित्येके, यदुक्तं—न भ्रश्यन्ति यतस्तेभ्यो जलान्यभ्राणि तान्यतः (पुराणं) । मेहति सिञ्चति मेघः, न्यङ्क्वादित्वाद् ($\frac{७।३।५३}{२८६४}$) घः । (स्तनयित्नुः) स्तनेश्चौरादिकात् स्तनिहृषिपुषिगदिमदिभ्योणेरित्नुच् (उ० ३०९) । बलाकाभिर्हीयते बलाहकः, वारिवाहको वा ॥ ७ ॥ हन्यते वायुना घनः, मूर्तौघनः ($\frac{३।३।७७}{३२५४}$) इति साधुः । जीवनस्य जलस्य मूतः पुटबन्धो जीमूतः । मोदन्तेऽनेन मुदिरः । धूमो योनिरस्य धूमयोनिः । कमाददते कादम्बा मेघास्ते सन्त्यस्यां कादम्बिनी, कदम्बे विकाशो वास्त्यस्याम् । मेघिका देश्याम् । (अभ्रियं) समुद्राभ्राद्घः ($\frac{४।४।११८}{३४६४}$) छान्दसत्वमतन्त्रम् ॥ ८ ॥ आदिशब्दाद् ध्वनितगर्जादि । शं पिबति शम्पा, शम्बेति प्राच्याः—शम्ब(य)ति नायनं तेज इति व्याख्यन् । शतह्रदोर्चिर्विद्यतेस्याः शतह्रदा, वाडवज्योतिष्ट्वात् । ऐरावतोभ्रगो नागस्तस्य स्त्री—ऐरावती । क्षणप्रभा—अचिरद्युतिः ॥ ९ ॥ ताडयति तडित्, ताडेर्णिलुक्च (उ० ९८)। सुदाम्नाद्रिणैकदिक्सौदामनी, तेनैकदिक् ($\frac{४।३।११२}{२४९२}$) इत्यण् । विद्योतते विद्युत् । चटुला [वज्रज्वाला च] देश्याम् । स्फूर्जनं स्फूर्जथुः, ट्वितोथुच् ($\frac{३।३।८९}{३२६७}$) । निष्पेषः संघट्टोत्थ शब्दः, अशन्याघात इत्येके । एतेन वज्राशन्योस्तडिद्भेद[भ्रव]त्वं मन्यते । इरयाम्भसा माद्यति—इरंमदः, उग्रपश्येरंमदेति ($\frac{३।२।३७}{२९५२}$) साधुः । [धूमज्योतिः सलिलमरुतां संघ एव मेघस्तत्रत्यं ज्योतिराविर्भवन्मेघज्योतिरित्युच्यते ।

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh

2 A rainbow. ११ इन्द्रायुधं शक्रधनुस्तदेव ऋजु रोहितम् । 1 Indra's bow unbent.
2 Rain.
2 Drought. वृष्टिर्वर्षं, तद्-विघाते ऽवग्राहाऽवग्रहौ समौ ॥

2 A hard shower. १२ धारासंपात आसारः, शीकरो ऽम्बु-कणाः स्मृताः ।
2 Thin rain.
2 Hail. वर्षोपलस्तु करका, मेघच्छन्ने ऽह्नि दुर्दिनम् ॥ 1 A cloudy day

8 Covering or disappearance. १३ अन्तर्धा व्यवधा पुंसि त्वन्तर्द्धिरपवारणम् ।
अपिधान-तिरोधान-पिधानाऽऽच्छादनानि च ॥

20 The moon. १४ हिमांशुश्चन्द्रमाश्चन्द्र इन्दुः कुमुदबान्धवः ।
विधुः सुधांशुः शुभ्रांशुरोषधीशो निशापतिः ॥

1 A digit. १५ अब्जो जैवातृकः सोमो ग्लौर्मृगाङ्कः कलानिधिः ।
द्विजराजः शशधरो नक्षत्रेशः क्षपाकरः ॥

विद्युदाख्यं वडवानलज्योतिरेव न मेघज्योतिस्तेन शम्पा शतह्रदेत्यादिशब्दा अभिलषिता इति] ॥ १० ॥ मेघप्रतिफलिता हि सूर्यरश्मयो धनुराकारेण दृश्यन्ते तदेवेन्द्रधनुरुत्पाते, ऋज्ववक्रं रोहितम्, रोहः संजातोऽस्येति, लोहितत्वाद्वा, ऋत्यकः (६।१।१२८/९२) इति प्रकृतिभावः । वर्षम्, अज्विधौ भयादीनामुपसंख्यानं-नपुंसकेक्तादिनिवृत्यर्थम् (वा० २।१९७।१९८/३२३१) । तद्विघाते तस्य वर्षस्य विघाते निरोधे (अवग्राहः अवग्रहः), अवेग्रहोवर्षप्रतिबन्धइति (३।३।५१/३२२६) घञ् (विभाषा) ॥ ११ ॥ बद्धधाराणां संततं पतनं धारासंपातः । आसरणमासारः, सृस्थिरे (३।३।१७/३१८३) इति घञ् भावे । शीकते सिञ्चति शीकरः । सृता वातेरिताः, यत्कात्यः—आसारोवेगवद्वर्षं वातास्तं वारि शीकरः । कृणोति हिनस्ति कीर्यते वा करका, क्षिपकादिः (वा०७।३।४५/४६४), कमण्डलौ च करक इति पुंस्यपि वक्ष्यति । अहरत्राहर्निशोपलक्षणम् । अह्नि मेघेन च्छन्नमाच्छादनमिति व्यधिकरणे सप्तम्यौ वा, यद्भागुरिः—दुर्दिनं ह्यन्धकारेब्दैः । वार्दलं देश्याम् ॥ १२ ॥ अन्तर्धानमन्तर्धा, अन्तशब्दस्याङ्किविधिणत्वेषूपसर्गत्वात् (११४१/२२३१ वा०) आतश्चोपसर्गे (३।१।१३६/२८९८) इत्यङ् । (अन्तर्धिः) उपसर्गेधोःकिः (३।३।९२/३२७०) । वष्टिभागुरिरल्लोपमिति (का०) पक्षे पिधानम् । तिरोन्तर्धाविति (१।४।७१/७७२) गतित्वात्समासः ॥ १३ ॥ आह्लादनाच्चन्द्रश्चासौ मिमीते कालं मस्यति परिणमते वा माश्च चन्द्रमाः । मा अप्युच्यते सत्यभामाभामेतिवत् । उनत्तीन्दुः, उन्देरिच्चादेः (उ० १२) । विधयन्त्येनं सुरा विधुः, धेट् पाने । शुभ्रांशुः सितकरः । ओषधीरीष्टआप्यायकत्वा-दोषधीशः ॥ १४ ॥ अद्भ्यो जातोब्जः । जीवयति जैवातृकः, जीवेरातृकन्वृद्धिश्च(उ० ७९) ।

CC-0. Agamnigam Foundation, Chandigarh

2 The disk of the sun or moon.
4 A part.
1 Half.

१६ कला तु षोडशो भागो, बिम्बो ऽस्त्री मण्डलं त्रिषु ।
भित्तं शकल-खण्डे वा पुंस्यर्द्धो, ऽर्द्धं समेंऽशके ॥

3 Moon-light.
2 Purity or brightness.
6 A spot or mark.

१७ चन्द्रिका कौमुदी ज्योत्स्ना, प्रसादस्तु प्रसन्नता ।
कलङ्काऽङ्कौ लाञ्छनं च चिह्नं लक्ष्म च लक्षणम् ॥

1 Exquisite beauty.
4 Beauty or splendour.

१८ सुषमा परमा शोभा, शोभा कान्तिर्द्युतिश्छविः ।

7 Frost.
2 Ice and snow.

१९ अवश्यायस्तु नीहारस्तुषारस्तुहिनं हिमम् ॥
प्रालेयं मिहिका चा, ऽथ हिमानी हिमसंहतिः ।

सूतेमृतं सोमः सूयते वा, नवो नवो भवति जायमान इति श्रुतेः । ग्लायति क्षीयते ग्लौः, ग्लानुदिभ्यांडौः (उ० २२२) । (द्विजराजः) यतः सोमो राजा द्विजातीनाम् । क्षपां करोत्युद्द्योतयति क्षपाकरः । सुधामूर्तिः [सुधाभृतिः] आत्रेयो रोहिणीश [सख] श्च । अमृतनिर्गमः, समुद्रनवनीतं देश्याम् ॥ १५ ॥ चन्द्रस्येति शेषः । षड्भिरधिका दश षोडश, षपउत्वंदतृदशधासूत्तरपदादेःष्टुत्वंच० ($\frac{४००१।२}{८११}$ वा०), षोडशानां पूरणः, तस्यपूरणेडट् ($\frac{५।२।४८}{१८४१}$) । कलयति संख्याति कला बिम्बति भाति बिम्बमाभोगः, सौत्रोयम् । भिद्यते स्म भीत्तं शकले साधुः (भित्तं-शकलं) । शक्यते भेत्तुं शकलं शकलो वा । खण्ड्यते खण्डे खण्डो वा । खण्डलं भागच्छेदौ च । ऋध्नोति-अर्धोभागो निर्देशात्पुंसि, वाच्यलिङ्ग इत्येके, यष्टीका-खण्डमात्रवृत्तितायामभिधेयलिङ्ग इति । समप्रविभागे त्वर्धं नपुंसकम् । [सामि] दलं नेमोपि ॥ १६ ॥ चन्द्रोस्त्यस्यां चन्द्रिका । कुमुदानामियं विकाशहेतुत्वात्कौमुदी । ज्योतिरस्त्यस्यां ज्योत्स्ना, ज्योत्स्नातमिस्रेति ($\frac{५।२।११४}{१९२१}$) साधुः । प्रसादो नैर्मल्यम् । कल्यते लक्ष्यतेऽनेन कलङ्कः । अकि लक्षणे (अङ्क्यतेनेनाङ्कः) । (लाञ्छनं) लाछि लक्षणे । चहयति चिह्नं, चह परिकल्कने । लाञ्छनसाहचर्याच्चिह्नादि क्लीबे । अभिज्ञानं च ॥ १७ ॥ प्रकृष्टा कान्तिः सुषमा, सुष्ठु समेति, सुषामादित्वात् ($\frac{८।३।९८}{१०१२}$) षत्वम् । शोभामात्रे परमा उत्कृष्टा शोभा शोभते काम्यते कान्तिः । छ्यति छिनत्त्यसारं छविः ॥ १८ ॥ अवश्यायतेवश्यायः, श्याद्व्यधेति णः ($\frac{३।१।१४१}{१००३}$) । निह्रियते नीहारः । तुष्यन्त्यनेन तुषारः । तोहत्यर्दयति तुहिनं, तुहिरर्दने । हिनोति वर्धते जलमनेनेति हिमम् । प्रलयादागतं प्रालेयं, केकयमित्रयु-

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh

1 Cold or chilness. २० शीतं गुणे, तद्वदर्थाः सुषीमः शिशिरो जडः ॥
7 Cold or frigid. तुषारः शीतलः शीतो हिमः सताऽन्य-लिङ्गकाः ।
2 The polar star. २१ ध्रुव औत्तानपादिः स्यात्, अगस्त्यः कुम्भसंभवः ।
3 Agastya
1 His consort. मैत्रावरुणि, रस्यैव लोपामुद्रा सधर्मिणी ।
6 A star. Asterisms. २२ नक्षत्रमृक्षं भं तारा तारकाऽप्युडु वा स्त्रियाम् ॥ 2 The head of Aries.
2 Stars in the South ern scale. दाक्षायिण्यो ऽश्विनीत्यादि-तारा, अश्वयुगश्विनी ।

प्रलयानांयादेरियः (७।३।२/१९४४)। मेहति मिहिका नीहारः, [महिकापि]। नीहाराख्या त्वन्या धूममहिषी। धूमिका च देश्याम्। (हिमानी) हिमारण्ययोर्महत्वे (वा० २४७२/५०५) ङीषानुक् च ॥१९॥ गुणे जाड्ये शीतं क्लीबे, श्यैङो भावे क्तः (सू०), द्रवमूर्तिस्पर्शयोःश्यइति (६।१।२४/३०२०) संप्रसारणं, संप्रसारणस्येति (६।३।१३९/१००४) दीर्घः। तद्वदर्थाः शीतवत्पर्यायाः अभिधेयलिङ्गाः। सुष्ठु श्यायते सुशीमः। शिनोत्यर्थं श्यायते सुशीमः। शिनोत्यर्थं श्यायते वा शिशिरः। जलति जडः, जल जाड्ये। शीतं लाति शीतलः। (हिमः) हिमादेः–अर्शआदित्वादच् (५।२।१२७/१९३३) ॥ २० ॥ चन्द्रप्रसङ्गादागतमुक्त्वा प्रस्तुतमाह। ध्रुवति ध्रुवः, कः। उत्तानपादस्यापत्यं, ऋषित्वाद् ऋष्यन्धकेति (४।१।११४/११७) आणि प्राप्ते, बाह्वादित्वादिञ् (सू० ४।१।९६/१०९६)। अगं विंध्याचलं स्त्यायति स्तम्भितवानगस्त्यः। मित्रावरुणयोरपत्यं मैत्रावरुणिः, ऋषिसमुदायस्यानृषित्वादिञ्, देवताद्वन्द्वेचानङ् (७।३।२१/१२३९)। पतिशुश्रूषालोपेष्वमुद्रा, न मुदं राति, लोपामुद्रा लोपयति योषितां रूपाभिमानं। समानो धर्मोस्त्यस्याः सधर्मिणी पत्नी ॥ २१ ॥ न क्षरति नक्षत्रं, क्षर गतिहिंसनयोः, भ्राण्नपादिति (६।३।७५/७५९) नञ् प्रकृत्या। ऋषति गच्छति, ऋक्षणोति तमो वा–ऋक्षम्। भा विद्यतेस्य भम्। तरन्त्यनया तारा। (तारका) स्वार्थे कन्, तारकाज्योतिषीति (४५३१/४६४ वा०) इत्वाभावः, क्लीबेपि यच्छाश्वतः—नक्षत्रे चाक्षिमध्ये च तारकं तारकापि च, लक्ष्यं च–द्वित्रैर्व्योम्नि पुराणमौक्तिकघन (मणि)–च्छायैः स्थितं तारकैः (विद्धशाल० ४-२०)। अवतेरुडुः, उड गतौ वा। दाक्षायण्योश्विनीत्यादितारा: सप्तविंशतिर्भानि। दक्षस्यापत्यं दाक्षायणी, अत इञ् (४।१।९५/१०९५) अनन्तरापत्येपि द्वैपायनवत्, यञिञोश्चेति (४।१।१०१/११०३) फक्, यद्वा–इतोमनुष्यजातेः (४।१।६५/५२०) इत्यत्र–इञ उपसंख्यानाद् ङीप्, कौरव्यमाण्डूकाभ्यांच (४।१।१९/४७७) इति चकारादासुरायणवत् फः–तद्धितः। अश्वाम् युङ्क्तेश्वयुक्, अश्वकर्मण्याम्नात् ॥ २२ ॥

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh

3 Stars in Cancer. २३ राधा विशाखा, पुष्ये तु सिध्य-तिष्यौ, श्रविष्ठया ॥
2 The Dolphin. समा धनिष्ठाः स्युः, प्रोष्ठपदा भाद्रपदाः स्त्रियः ।
2 The wing of Pegasus. २४ मृगशीर्षं मृगशिरस्तस्मिन्नेवाऽऽग्रहायणी ॥ 3 Orion.
1 Stars in his head. इल्वलास्तच्छिरो-देशे तारका निवसन्ति याः ।
9 The planet Jupiter. २५ बृहस्पतिः सुराचार्यो गीष्पतिर्धिषणो गुरुः ॥
जीव आङ्गिरसो वाचस्पतिश्चित्रशिखण्डिजः ।
6 Venus. २६ शुक्रो दैत्यगुरुः काव्य उशना भार्गवः कविः ॥
5 Mars. अङ्गारकः कुजो भौमो लोहिताङ्गो महीसुतः ।

राध्नोति कार्यं राधा । विशाखति व्याप्नोति विशाखा, शाखृ व्याप्तौ । पुष्यसिध्यौ-नक्षत्रे (३।१।११६ / २८६७) साधू, पुष्णात्यर्थान्पुष्यः, सिध्यन्त्यनेनार्थाः सिध्यः । त्वेषति तिष्यः, त्विष दीप्तौ, अघ्न्यादिः (५५१ उ०) श्रूयते शुभकर्मणि श्रविष्ठा । दधन्ति धनं करोति धनिष्ठा, श्रविध्वनिभ्यामिष्ठन् । प्रोष्ठौ सारौ पदावस्याः प्रोष्ठपदा, अर्थग्रहणाद् भद्रपदा, सुप्रातःसुश्वेति (५।४।१२० / ८६०) साधुः, फल्गुनीप्रोष्ठपदानां-चनक्षत्रे (२।१।६० / ८१९) इति वा बहुत्वम् ॥ २३ ॥ मृगस्येव शीर्षं शिरोस्य, खे ताराणां तथावस्थानात्, शीर्षं प्रकृत्यन्तरम् । अग्रे हायनोस्या आग्रहायणी, मार्ग-शीर्षादारभ्य संवत्सरप्रवृत्तेः, आग्रहायण्यश्वत्थाट्ठक् (४।२।२२ / १२२४) इति निर्देशा-द्ण् । इन्वका इति पञ्च ताराः, इन्वन्ति प्रीणन्तीन्वकाः, मरुतो देवता इन्वका नक्षत्रमिति श्रुतेः । इल्वलास्तारका इल्वलोसुर इति-उणादौ श्रीभोजदेवो व्याक-रोत् ॥ २४ ॥ [बृहतां पतिर्बृहस्पतिः] तद्बृहतोःकरपत्योश्चोरदेवतयोरिति (३७१३ / १०७१ वा०) सुट्तलोपौ । गीर्पतिः-गीष्पतिः, अहरादीनांपत्यादिषु (४८५१ / १७२ वा०) इति वा रेफः, पक्षे कस्कादिदर्शनात् (८।३।४८ / १४४) षत्वम् । धिषणास्यास्तीति धिषणः । गृणात्युपदिशति गुरुः, कृग्रोरुच्च (उ० २४) । जीव्यतेनेन मृतसंजीवनीज्ञत्वाज्जीवः । अङ्गिरसोपत्यत्वादाङ्गिरसः । चित्रशिखण्डिजः सप्तर्षिजः, समुदायेषु हि वृत्ताः शब्दा (अवयवेषु वर्तन्ते) इति । वाचस्पतिः, अलुकि षष्ठ्याःपतिपुत्रेति (८।३।५३ / ३६३८) सत्वम् ॥ २५ ॥ शुक्रो रुद्रस्य शुक्रद्वारेण निर्गतत्वात् । कवेरपत्यं काव्यः, कुर्वादि-भ्योण्यः (४।१।१५१ / १२७७), कविस्त्वभेदाद्यथा-जमदग्निर्वै पञ्चममवदानमवाद्यत्, चातुर्वर्ण्यात्ष्यञ् (चतुर्वर्णादीनांस्वार्थउपसंख्यानम् ३०९१ / १७८९) इत्येके । वष्टीत्युशना, ऋदुशनइति (७।१।९४ / २७६) सावनङ् । भृगोरपत्यं भार्गवः । अङ्गानियर्ति पीनत्वादङ्गा-रकः, आरस्तु भीमवत् । कौ जायते कुजः । भूमेरपत्यं भौमः, शिवादित्वादण्

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh

3 Mercury.

२७ रौहिणेयो बुधः सौम्यः, समौ सौरि-शनैश्चरौ ॥ 2 Saturn.
तमस्तु राहुः स्वर्भानुः सैंहिकेयो विधुन्तुदः ।

5 The ascending node.

२८ सप्तर्षयो मरीच्यत्रि-मुखाश्चित्राशिखण्डिनः ॥ 1 Ursa major.
राशीनामुदयो लग्नं, ते तु मेष-वृषा ऽऽदयः । Ascension.

1 Signs of the Zodiac.

२९ सूर-सूर्याऽर्यमाऽऽदित्य-द्वादशात्म-दिवाकराः ॥ 54 The Sun.
भास्करा ऽहस्कर-ब्रध्न-प्रभाकर-विभाकराः ।

३० भास्वद्-विवस्वत्-सप्ताश्व-हरिदश्वोष्णरश्मयः ॥
विकर्तना ऽर्क-मार्तण्ड-मिहिरा ऽरुण-पूषणः ।

(४।१।१२३ / १।१।५) वक्रोपि ॥ २६ ॥ रोहिण्या अपत्यम् । सोमः पितापि देवतास्येति, सोमाट्ट्यण् (४।२।३० / १।२।३२) । ज्ञश्चान्द्रमसायनिश्च । सूरस्यार्कस्यापत्यं सौरिः, सौरस्तु तस्येदम् (६।४।१३ / ३।५।७) इत्यणि । शनिमन्दौपङ्गुकालौ छायापुत्रोसितश्च सः तमस्करित्वात्तमः, सान्तत्वात्क्लीबे । रहयति भुक्त्वा चन्द्रार्कौ राहुः । स्वर्भाति स्वर्भानुः, पूर्वपदात्संज्ञायां (८।४।३ / ८।५।७) न णत्वम् । सिंहिकाया अपत्यं सैंहिकेयः । विधुं तुदति विधुंतुदः, विध्वरुपोस्तुदः (३।२।३५ / ३।१।५०) इति खश् । अभ्रपिशाचो ग्रहकल्लोलश्च देश्याम् । केतुः शिखीति वाच्यम् ॥ २७ ॥ सप्त च ते ऋषयश्च, दिक्संख्येसंज्ञायामिति (२।१।५० / ७।२।७) द्विगुः । मुखशब्दात्क्रत्वङ्गिरोवसिष्ठपुलस्त्यपुलहाः । चित्रः शिखण्डश्चूडास्येषाम् सप्तर्षिरित्येकत्वं रूढेः । (ते राशयः) मेषो वृषोथ मिथुनं कर्कटः सिंहकन्यके । तुलाथ वृश्चिको धन्वी मकरः कुम्भमीनकौ ॥ २८ ॥ सुवति सूरः । सूयते सूर्यः, राजसूयसूर्येति (३।१।११४ / ३।८।६५) साधुः । इयर्ति अर्यमा । अदितेरपत्यमादित्यः । द्वादशात्मानो रूपाण्यस्य (द्वादशात्मा) । दिवा दिनं करोति दिवाकरः, दिवाविभाप्रभेति (३।२।२१ / ३।१।३५) टः । भास्कराहस्करौ कस्कादित्वात् (८।३।४८ / १।४४) ब्रधते ब्रध्नः । भासः सन्त्यस्य भास्वान् ॥२९॥ विवस्तेजोस्यास्तीति विवस्वान्, तसौमत्वर्थइति (९।४।१९ / १।८।९६) भसंज्ञायां पदकार्यं रुत्वं नास्ति । हरितो नीला अश्वा अस्य (हरिदश्वः) । विकृन्तत्यात्मानं विकर्तनः, भ्रमेण तेजःशातनात् । अर्कयति तपत्यर्कः, अर्च्यते वा । मृतण्डस्यापत्यं मार्तण्डः, मृताण्डमजायतेति मार्ताण्डो वा । मेहति मिहिरः, आदित्याज्जायते वृष्टिरिति स्मृतिः (मनु० ३.७६) । अरुणोस्त्यस्यारुणः, वर्णेन वा । पूषति पर्व (वर्धं)ते पूषा, इन्हन्पूषार्यम्णांशौ (६।४।१२ / ३।५।६), सौच (६।४।१३ / ३।५।७) इति नियमा-

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh

३१ द्युमणिस्तरणिर्मित्रश्चित्रभानुर्विरोचनः ॥
विभावसुर्ग्रहपतिस्त्विषाम्पतिरहर्पतिः ।

३२ भानुर्हंसः सहस्रांशुस्तपनः सविता रविः ॥
'पद्माक्षस्तेजसांराशिश्छायानाथस्तमिस्रहा ।
कर्मसाक्षी जगच्चक्षुर्लोकबन्धुस्त्रयीतनुः ॥
प्रद्योतनो दिवमणिः खद्योतो लोकबान्धवः ।
इनो भगो धामनिधिश्चांऽशुमाल्यब्जिनीपतिः' ॥
माठरः पिङ्गलो दण्डश्चण्डांशो पारिपार्श्वकाः ।

1 Three of the sun's attendants

5 The dawn. ३३ सूरसूतो ऽरुणो ऽनूरुः काश्यपिर्गरुडाग्रजः ॥

4 Halo. परिवेषस्तु परिधिरुपसूर्यक-मण्डले ।

11 A ray. ३४ किरणोस्र-मयूखांऽशु-गभस्ति-घृणि-रश्मयः ॥
भानुः करो मरीचिः स्त्री-पुंसयोर्दीधितिः स्त्रियाम् ।

दीर्घाभावः ॥ ३० ॥ दिवि मणिरिव द्युमणिः, अत एवाम्बरमणिर्गगनमाणिक्यादयोपि । तरन्त्यनेन तमस्तरणिः । मेद्यति मित्रः । विरोचते विरोचनः, अनुदात्तेतश्च (३।२।१४९/३१२९) इति युच् । विभा दीप्तिर्वसु धनमस्य विभावसुः । अह्नः पतिरहर्पतिः, अहरादीनां पत्यादिषु (सू० ४८५१/१७२ वा०) इति वा रेफः ॥ ३१ ॥ भाति भानुः । हन्ति तमो हंसः । सूयते सविता । रूयते स्तूयते रविः । कर्मसाक्षी जगच्चक्षुरंशुमाली [लोकबन्धुः] त्रयीतनुः । [इनो भगो] धामनिधिः [अब्जिनीपतिरिति ज्ञेयम्] । प्रद्योतनो दिनमणिः खद्योतो लोकबान्धवः । शूरोंशुसत्तमः प्रोक्तः पद्मिनीकान्त इष्यते । मठरस्यापत्यं माठरः । दण्डोस्यास्तीति दण्डः । इन्द्रादयो ह्यष्टादश नामान्तरेणार्कपरिचारकाः, यत्सौर(तन्त्र)म्—तत्र शक्रो वामपार्श्वे दण्डाख्यो दण्डनायकः । वह्निस्तु दक्षिणे पार्श्वे पिङ्गलो वामन[नामत]श्च सः । यमोपि दक्षिणे पार्श्वे भवेन्माठरसंज्ञया । एवमन्येयावाद्याः (पाताद्याः) [गुहहरराहुखरादयः । तेषु प्राधान्यात्त्रय एवोक्ताः] । परितः पार्श्वे वर्तन्ते पारिपार्श्विकाः, परिमुखं च (४।४।२९/५७९) इति ञ्कारादठक् ॥ ३२ ॥ सूतः सारथिः । (कश्यपस्यापत्यं काश्यपिः) ऋष्यन्धकेभ्यण् (४।१।११४/१११७), काश्यप इति सभ्यः पाठः, बह्वादित्वाद्वा (४।१।४५/५७३) परितो (विष्यते) व्याप्यतेनेन परिवेषः । परितो धीयते परिधिः । समीपे सूर्यस्य प्रतिकृतिरुपसूर्यकम् , सूर्यमण्डलं च ॥ ३३ ॥ कीर्यते किरणः। वसन्त्यस्मिन् रसा उस्रः । मिनोति क्षिपति तमो मयूखः । अश्नुते—अंशुः। गां बभस्ति दीपयति गभस्तिः, पृषोदरादिः (६।३।१०९/१०३४) जिघर्ति घृणिः ।

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh

11 Light. ३५ स्युःप्रभा-रुग्-रुचिस्त्विड्-भा-भाश्छवि-द्युति-दीप्तयः ॥
3 Sun-shine. रोचिः शोचिरुभे क्लीबे, प्रकाशो द्योत आतपः ।
4 Warmth. ३६ कोष्णं कवोष्णं मन्दोष्णं कदुष्णं त्रिषु तद्वति ॥
3 Heat. तिग्मं तीक्ष्णं खरं तद्वत्, मृगतृष्णा मरीचिका ।
2 Sultry vapour. इति दिग-वर्गः ३. अत्र मूलश्लोकाः ३५, क्षे० ४.

अथ काल-वर्गः ३

4 Time. १ कालो दिष्टो ऽप्यनेहा ऽपि समयो ऽप्यथ पक्षतिः ॥
2 First lunar day. प्रतिपद् द्वे इमे स्त्रीत्वे, तदाऽऽद्यास्तिथयो द्वयोः ।
1 A lunar day.
5 A day. २ घस्रो दिना ऽहनी वा तु क्लीबे दिवस-वासरौ ॥
9 Morning. प्रत्यूषो ऽहर्मुखं कल्यमुषः-प्रत्युषसी अपि ।
'व्युष्टं विभातं द्वे क्लीबे पुंसि गोसर्ग इष्यते' ॥

पिपर्ति स्पृशति वा क्ष्मां पृश्निः, भुवं वृष्टयै प[व]र्षति सिञ्चति पृ[वृ]ष्णिरित्येके । कीर्यते करः । म्रियतेऽस्मिंस्तमो मरीचिः । दीधीते दीप्यते दीधितिः ॥ ३४ ॥ प्रभादीनामादित्यरश्मित्वाभावात्पृथक्पाठः, द्युतिच्छव्योरिन्दुप्रस्तावोक्तेः पुनरिहोपादानं सामान्यार्थम् । दीप्यातपादयो ह्यसाधारणा अपि कविभिः साधारणीकृताः, यथा मुखदीप्तिः, चन्द्रातपः । रोचनं रुक् । भाभासौ धातुभेदात् । शोचिर्नैर्मल्यार्थोऽत्र ॥ ३५ ॥ कवंचोष्णे ($\frac{६।३।१०७}{१०३३}$) इति का–कव–कत्समुदायात् त्रैरूप्यम् । एषां धर्ममात्रे क्लीबत्वं, धर्मिवृत्तित्वेऽभिधेयलिङ्गत्वम् । तेजनात्तिग्मतीक्ष्णौ । खं राति खरति वा खरम् । तद्वदिति घ क्लीबत्वं धर्मिणि त्रिष्विति दिश्यते । अत्युष्णार्थं चैतत्, यदाहुः – तिग्मं तीक्ष्णं कदुष्णं स्यात् । अन्यत्र तूपचारात्– तीक्ष्णोऽसिः । मृगाणां तृष्णास्याम् (मृगतृष्णा) । मरीचिप्रतिकृतिर्मरीचिका । ग्रीष्मे सिकतास्वर्ककराः प्रतिफलिता जलत्वेनाभान्ति, अत एव मरुमरीचिकोच्यते ॥ ३६ ॥ इति व्योमदिग्वर्गः । २ ।

कलयति कालयति वा सर्वं कालः । दिश्यते स्म दिष्टः । न–ईहतेऽत्रानेहा, असुन्, ऋदुशनस्पुरुदंशोनेहसांच ($\frac{७।१।९४}{२७६}$) इति सावनङ् । समेति समयः । पक्षस्य मूलं प्रारम्भदिनं पक्षतिः । प्रतिपद्यते उपक्रम्यतेनया प्रतिपत् । सा प्रतिपदाद्या यासां ताः, तन्यते तिथिः स्त्रीपुंलिङ्गः ॥ १ ॥ घसति तमो घस्यते–(अद्यते)ऽस्मिन् वा घस्रः । द्यति तमो दिनम् । न जहाति कालमहः, नजिजहातेः (उ० १५६)

CC-0. Agamnigam Foundation. Digitized by eGangotri. Sarkaryatan, Chandigarh

4 Eve. ३ प्रभातं च, दिनान्ते तु सायं संध्या पितृप्रसूः ।
1 Periods of the day. प्राह्णाऽपराह्ण-मध्याह्नस्त्रिसंध्य, मथ शर्वरी ॥ 1 Twilight.

12 Night. ४ निशा निशीथिनी रात्रिस्त्रियामा क्षणदा क्षपा ।
विभावरी-तमस्विन्यौ रजनी यामिनी तमी ॥

1 A dark night. ५ तमिस्रा तामसी रात्रिर्ज्यौत्स्नी चन्द्रिकयाऽन्विता । 1 A moonlight night.
1 A night and two days. आगामि-वर्तमानाहर्युक्तायां निशि पक्षिणी ॥

इति कनिन् । दीव्यति दिवसम् । वसन्त्यस्मिन् वासरम् । प्रत्यूषति निशां प्रतिरुजति, प्रतिगता–उषा वा तदा प्रत्यूषः । काले साधु काल्यं, शाश्वतः कल्यमप्याह–कल्यं प्रभातं सज्जं च कल्यो नीरोगदक्षयोः २४ । उष (ओष) त्यर्ककैरुषः, कसुन् । एवं प्रत्युषः ॥ २ ॥ भातुं प्रवृत्तं प्रभातं, आदिकर्मणिक्तः ($\frac{४।३।७१}{३०५३}$) । विभातं व्युष्टं च । गोसर्गो देश्याम् । प्रातः प्रगेव्ययम् । सायमव्ययम् । सायाह्नादिदर्शनात् श्याद्वयधेति ($\frac{३।१।१४१}{२९०३}$) णान्तोपि; स्याति दिनं सायः, सायमोह्ने मलोपश्चेति भाष्यं त्वनिष्टनिवृत्त्यर्थम् । संध्यायन्त्यस्यां संधीयेते अहोरात्रौ वास्यां संध्या । पितॄन् प्रसूते पितृप्रसूः, ब्रह्मणो ह्येषा पितृप्रसवित्री तनुः । प्रारम्भाऽपरं मध्यं वाह्नः, राजाहःसखिभ्यष्टच् ($\frac{५।४।९१}{७८८}$) अह्नोह्न एतेभ्यः ($\frac{५।४।८८}{७९०}$) । तिस्रः संध्याः समाहृतास्त्रिसंध्यम् । आबन्तोवा (वा० $\frac{१५५७}{८२१}$) इति पक्षे स्त्रीत्वं नेष्टं, यन्माला–त्रिसंध्यं तु नपुंसकम् । श्रणाति चेष्टाः शर्वरी ॥ ३ ॥ निश्यति तनूकरोति चेष्टा निशा, आतश्चोपसर्गे । ($\frac{३।१।१३६}{२८९८}$) इति कः । निशीथोस्त्यस्यां निशीथिनी, महानिशाख्या । राति सुखं रात्रिः । आद्यन्तयोरर्धयामयोर्दिनव्यवहारात्त्रियामा । क्षणमवसरं ददाति क्षणदा विश्रान्तिप्रदेत्यर्थः । क्षप्यते क्षपा, भिदाद्यङ् ($\frac{३।३।१०४}{३२८१}$) । विभाति विभावरी, क्वनिप्, वनोरच ($\frac{४।१।७}{४५६}$) इति ङीप्–रश्च । रञ्जयति तमसा रजनी । यामाः सन्त्यस्यां यामिनी । ताम्यन्त्यस्यां तमी । (के भूषयन्ति स्तनमण्डलानि कीदृश्युमा चन्द्रमसः कुतः श्रीः । किमाह सीता दशवक्त्रनीता) हारा महादेवरता तमातः (विदग्ध०) इति तमापि । वासतेयी मालायाम् ॥ ४ ॥ रात्रिः काकाक्षिवत् । तमोस्त्यस्यां तमिस्रा, ज्योत्स्नातमिस्रेति ($\frac{५।२।११४}{१९२१}$) साधुः । ज्यौत्स्नी तामसीत्यण्प्रकरणे ज्योत्स्नादिभ्यउपसंख्यानं वा० $\frac{१९१०}{३१९७}$), शाश्वतस्तु–ज्योत्स्ना ज्योतिष्मती रात्रिर्ज्योत्स्ना चन्द्रमसः प्रभेति १९२ । पूर्वापराह्णयोः पक्षयोरिव मध्ये वर्तमानत्वात्, वर्तमानाहो यदीया

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh

1 A multitude of nights
2 Mid-night.

६ गणरात्रं निशा बह्व्यः, प्रदोषो रजनीमुखम्। 2 Evening.
अर्धरात्र-निशीथौ द्वौ, द्वौ याम-प्रहरौ समौ ॥ 2 A watch.

1 The full and change of the moon.
2 Last day of the half month.

७ स पर्वसंधिः प्रतिपत्-पञ्चदश्योर्यदन्तरम्।
पक्षान्तौ पञ्चदश्यौ द्वे, पौर्णमासी तु पूर्णिमा ॥ 2 Day of full moon.

1 Moon a little gibbous.
4 Day of new moon.

८ कला-हीने सा ऽनुमतिः, पूर्णे राका निशाकरे। 1 Moon quite full.
अमावास्या त्वमावस्या दर्शः सूर्येन्दुसंगमः ॥

1 no-Moon.
2 An eclipse.

९ सा दृष्टेन्दुः सिनीवाली, सा नष्टेन्दु-कला कुहूः। 1 Moon light-horned.
उपरागो ग्रहो, राहु-ग्रस्ते त्विन्दौ च पूष्णि च ॥

Eclipsed sun and moon.
1 Sun & moon.

१० सोपप्लवोपरक्तौ द्वा, वग्न्युत्पात उपाहितः। 2 meteor.
एकयोक्त्या पुष्पवन्तौ दिवाकर-निशाकरौ ॥

निशा–निशामध्येपि दिवसः–पक्षिणीत्याहुः ॥ ५ ॥ गणानां रात्रीणां समाहारः, अहः सर्वैकदेशेति (५।४।८७) संख्यात्वादच् समासान्तः, रात्राह्नाहाःपुंसीति (२।४।२९) असमाहारे हि पुंस्त्वम्। यन्माला–गणरात्रं नपुंसकम्। प्रारब्धा दोषा यस्मिन् (प्रदोषः)। समावित्येव। अर्धं रात्रेरर्धरात्रः, अर्धनपुंसकमिति (२।२।२) तत्पुरुषः। नियतं शेरतेऽस्मिन् भूतानि निशीथः, अत एव कात्यो निशीथं सुप्तजनमाह। याति यामः। प्रह्रियतेऽस्मिन् प्रहरः, पुंसिसंज्ञायां घः (३।३।११८) ॥ ६ ॥ स सन्धिः पर्वेति संबन्धः, दुर्गोपि–प्रतिपत्पञ्चदश्योस्तु संधिः पर्व (नि.१-६-२०,)। प्रदिक् ककुप्। प्राच्यास्तु पर्वसन्ध्याख्यमाख्यन्, रूपभेदात्क्लीबे। पक्षान्त इति योगकालसंज्ञा। पूर्णो माश्चन्द्रः पूर्णमास्तत्र भवा। पौर्णमासी पूर्णो मासो वर्तते वास्यां, पूर्णमासादण्। पूरणं पूर्णिः, ऋल्वादिभ्यःक्तिन्निष्ठावत् (वा० ४८२६ ३२७२) इति नत्वं, पूर्णिं मिमीते पूर्णिमा, कः ॥७॥ सा पूर्णिमा कलाहीने निशाकरे, अनुमन्यतेऽनुमतिः। पूर्णे, राति सुखं राका। (अमावास्या) अमा सह वसतोऽस्यां चन्द्रार्कौ। (अमावस्या) अमावस्यदन्यतरस्यां (३।१।१२२) इति ण्यति पक्षे वृध्द्यभावो निपात्यते। दृश्यते याज्ञिकैर्दर्शः, न दृश्यते चन्द्रोस्मिन् विपरीतलक्षणया ॥ ८ ॥ सिनी सिता बाला कलास्याम्। कुहूर्विस्मापिकेत्यर्थः, कुं हन्ति तमसा वा। उपरज्यते छाद्यतेनेनोपरागः। ग्रहणं ग्रहः, ग्रहवृद (३।६।५८) इत्यप् ॥ ९ ॥ इन्दू राहुग्रस्तः सोपप्लव उपरक्तश्च। एवं पूषापि। अग्निकृत उपसर्गः, उप–आसन्नमहितमस्योपाहितः, धूमकेत्वाख्य उत्पात इत्येके। एकयोक्त्या – अपृथग्वचनेन रोदसीवत्, न तु पुष्पवानिन्दुः सूर्यो वोच्यते, पुष्पं विकाशः प्रकाश इत्यर्थः ॥१०॥

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh

1 Sixteen thirds. ११ अष्टादश निमेषास्तु **काष्ठा**, त्रिंशत् तु ताः **कला**, । 1 Eight seconds.
Four minutes. तास्तु त्रिंशत् **क्षणस्ते**, तु **मुहूर्तो** द्वादशाऽस्त्रियाम्,॥ 48 minutes.
1 A day. १२ ते तु त्रिंशदहो-रात्रः, **पक्षस्** ते दश पञ्च च, । 1 A fort-night.
1 Night & dark fort-nights. पक्षौ पूर्वाऽपरौ **शुक्ल-कृष्णौ**, **मासस्तु** तावुभौ, ॥ 1 A month.
A season. १३ द्वौ द्वौ मार्गादि- मासौ स्यादृतुस्तैरयनं त्रिभिः, । A half year.
1 A year. अयने द्वे गतिरुदग् दक्षिणा ऽर्कस्य **वत्सरः**, ॥
2 Equinox. १४ सम-रात्रिं-दिवे काले **विषुवद् विषुवं** च तत् ।
Pouṣee. 'पुष्य-युक्ता पौर्णमासी **पौषी**, मासे तु यत्र सा ॥
Pouṣā. नाम्ना स **पौषो**, माघाऽऽद्याश् चैवमेकादशाऽपरे,' ।
4 *A'gra-ha'yana.* **मार्गशीर्षे सहा मार्ग आग्रहायणिकश्च सः** ॥
3 *Pausha.* १५ **पौषे तैष-सहस्यौ** द्वौ, **तपा माघे**,ऽथ **फाल्गुने** । 2 *Māgha.*
3 *Pha'lguna.* स्यात् **तपस्यः फाल्गुनिकः**, स्याच्चैत्रे **चैत्रिको मधुः** ॥
3 *Chaitra.*

निमेषोक्षिस्पन्दकालः । काशते काष्ठा ताः काष्ठास्त्रिंशत्कलयति कालं कला । ताः कलास्त्रिंशक्षणनात्क्षणः, क्षणु हिंसायाम् । ते क्षणा द्वादश, मुहुरियर्ति मुहूर्तो द्विघटिकम् ॥११॥ ते मुहूर्तास्त्रिंशदहा सहिता रात्रिरहोरात्रः, अहः सर्वैकदेशेत्यच् ($\frac{५।४।८७}{७८७}$), द्वन्द्वे त्वहोरात्राविमौ पुण्यौ । तेहोरात्राः पञ्चदश, पचति भूतानीति पक्षः, पक्ष परिग्रहे वा । शुक्लो मासस्य पूर्वपक्षः कृष्णस्त्वपरः, यतश्चैत्रसिताद्या मासाः । तौ पक्षौ माश्चन्द्रस्तस्यायं मास इति निर्वचनेन चान्द्रेण मानेनायम् । सौरसावननाक्षत्रमानैस्त्वन्यथा, मस्यति मिमीते वा (मासः) ॥ १२ ॥ इयर्ति ऋतुः। माघाद्युपक्रमस्ततोयनारम्भात् । यदाह तैर्ऋतुभिस्त्रिभिः, अयतेर्कोनेनायनम् । उत्तरा दक्षिणा च यार्कस्य गतिः, ते द्वे अयने मिलिते वत्सरो वर्षम् ॥ १३ ॥ समौ रात्रिंदिवौ यत्र, अचतुर—($\frac{५।४।७७}{६४५}$) इत्यादिना साधुः । विषु साम्येव्ययम्, तद्विद्यतेस्य विषुवत्, विषुवं च, वो मत्वर्थे लिङ्गात् (अन्येभ्योपि दृश्यते) । विष्वगित्युत्तरपदलोपश्चाकृतसन्धेः (वा० $\frac{३।१।९४}{६।१।७७}$) इति हि विषुव(ण)शब्दो युक्तः । मृगशीर्षेण युक्ता मार्गशीर्षी पौर्णमास्यस्मिन्, सास्मिन्पौर्णमासी ($\frac{४।२।२१}{६।२।३}$) इत्यण् । सहोस्यास्मिन् सहाः, मत्वर्थे मासतन्वोरिति ($\frac{४।४।१२८}{३४७४}$) यत्, तस्य लुगकारेकाररेफाश्चेति (वा० ?) । पक्षे लुक्, पुंस्त्वं लोकात्, सहश्च सहस्यश्च हैमन्तिकावृतू इति छान्दसम् । एवं तपाः—नभाः । भीमवन्मृगशीर्षस्य मृगत्वान्मार्गः । आग्रहायणी पौर्णमास्यस्मिन्नाग्रहायणिकः, आग्रहाण्यश्वत्थाट्ठक् ($\frac{४।२।२२}{६।२।२४}$) ॥ १४ ॥ (पौषः—तैषः प्राग्वदण्-द्वयम् । सहोस्यास्तीति सहस्यः, मत्वर्थेमासतन्वोरिति ($\frac{४।४।१२८}{३४७४}$) यत् । एवं तपस्यनभस्यौ ।

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

3 *Vais'ak'ha.*
2 *Jyaisht'ha.*
2 *Āshād'ha.*
3 *Śrāvaña.*

१६ वैशाखे माधवो राधो, ज्येष्ठे शुक्रः, शुचिस्त्वयम् ।
आषाढे, श्रावणे तु स्यान् नभाः श्रावणिकश्च सः ॥

4 *Bhad'ra.*
3 *Āswina.*
4 *Kārtika.*

१७ स्युर्नभस्य-प्रौष्ठपद-भाद्र-भाद्रपदाः समाः ।
स्यादाश्विन इषोऽप्याश्वयुजोऽपि, स्यात् तु कार्तिके ॥

1 Cold season.
1 Winter.
4 Spring.

१८ बाहुलोर्जौ कार्तिकिको, हेमन्तः, शिशिरोऽस्त्रियाम् ।
वसन्ते पुष्पसमयः सुरभिर्, ग्रीष्म ऊष्मकः ॥

7 Hot season.
2 Rains.
1 Sultry season.

१९ निदाघ उष्णोपगम उष्ण ऊष्मागमस्तपः ।
स्त्रियां प्रावृट् स्त्रियां भूम्नि वर्षा, अथ शरत् स्त्रियाम् ॥

1 Season.
6 A year.

२० षडमी ऋतवः पुंसि मार्गाऽदीनां युगैः क्रमात् ।
संवत्सरो वत्सरोऽब्दो हायनोऽस्त्री शरत् समाः ॥

तपोस्यास्तीति तपाः । (फाल्गुनिकः) विभाषाफाल्गुनीश्रवणाकार्त्तिकीचैत्रीभ्यष्ठक् ($\frac{४।२।२३}{१२२५}$) मधुर्वसन्तोस्यास्तीति मधुः, मधोर्ञच ($\frac{४।४।१२९}{३४७५}$) इति ञस्य वा लुक् ॥ १५ ॥ राधया युक्ता पौर्णमासि अस्मिन् राधः। शुग्विद्यतेस्य शुक्रः, लुगकारेकाररेफाश्च (वा० ?) इति रेफः । शुग्विद्यतेस्य शुचिः, इकारः । न भासनं मेघच्छन्नत्वादस्त्यस्य नभाः ॥ १६ ॥ भीमवद्भद्र(या)युक्ता भाद्री पौर्णमास्यस्मिन् भाद्रः । इष्यते–इडन्नं विद्यतेस्य–इषः, अकारः ॥ १७ ॥ बहुलाभिर्युक्ता बाहुली पौर्णमास्यस्मिन् बाहुलः । ऊर्क्—अन्नं बलं वास्यास्तीति—ऊर्जः हिमान्तोस्य हेमन्तः, पृषोदरादिः ($\frac{६।३।१०९}{१०३४}$) । (शिशिरः) शिनोत्यर्थं शीतेन, शिञ् निशाने । वसन्त्यस्मिन् सुखं, वस्ते भुवं वा वसन्तः, झच् । सुष्ठु रभते सुरभति वा सुरभिः । फल्गुर्देश्याम् । गिरन्त्यम्बु ग्रीष्मः । ऊष्मप्रतिकृतिरूष्मकः ॥ १८ ॥ निदह्यतेस्मिन् निदाघः, घञ्, न्यङ्क्वादित्वात्कुत्वम् ($\frac{७।३।५३}{२८६४}$) । उष(ओष)ति–उष्णः । तपति तपः, अच्, यल्लक्ष्यम्–तपेन वर्षाः शरदा हिमागमः (शिशु० १-६६) । प्रवर्षति प्रावृट्, नहिवृत्तिवृषीति ($\frac{६।३।११६}{१०३७}$) दीर्घः । भूम्नि बहुत्वे, वर्षमस्त्यासां वर्षन्ति वा वर्षाः । शीर्यन्तेस्यां पाकेनौषधयः शरत् ॥ १९ ॥ यत्कात्यः—आदाय मार्गशीर्षाच्च द्वौ द्वौ मासावृतुः स्मृतः । हेमन्ताद्धि वत्सरस्यारम्भः । ऋतुः पुंलिङ्गः । संवसन्ति ऋतवोस्मिन् संवत्सरः, ऋतुपरिवर्तात्मा ह्यसौ, यद्भागुरिः—सर्वर्तुपरिवर्तस्तु स्मृतः संवत्सरो बुधैः । परिवत्सरोपि । इदावत्सर इद्वत्सरोनुवत्सरश्च ज्योतिषे । आप्यतेब्दिः । जहाति–ऋतून् हायनः, हश्चव्रीहिकालयोः ($\frac{३।१।१४८}{२९१०}$) इति ण्युट् । समन्ति समाः, सह मान्ति वर्तन्ते ऋतवो यासां वा, स्त्रीबहुत्वेयं यथा–जीव्या-

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

1 A patriarchal day. २१ मासेन स्यादहो-रात्रः पैत्रो, वर्षेण दैवतः, । 1 Day of the gods.
1 Day of *Brahmā*. दैवे युग-सहस्रे द्वे ब्राह्मः, कल्पौ तु तौ नृणाम्, ॥ 2 *kalpa*.

1 *Manvantara*. २२ मन्वन्तरं तु दिव्यानां युगानामेक-सततिः, ।
5 destruction of the warld. संवर्तः प्रलयः कल्पः क्षयः कल्पान्त इत्यपि ॥
12 Sin. २३ अ-स्त्री पङ्कं पुमान् पाप्मा पापं किल्बिष-कल्मषम् ।
कलुषं वृजिनैनोऽघमंहो दुरित-दुष्कृतम् ॥
5 Virtue or moral merit. २४ स्याद् धर्ममस्त्रियां पुण्य-श्रेयसी सुकृतं वृषः ।
12 Joy, or pleasure. मुत् प्रीतिः प्रमदो हर्षः प्रमोदाऽऽमोद-संमदाः ॥

त्सहस्रं समाः । समांसमांविजायते ($\frac{५।२।१२}{१८।१३}$) इत्येकत्वेपि दृश्यते ॥ २० ॥ मासेन पौरुषेणेति शेषः । पितॄणामयं पैत्रः, देवतार्थे पित्र्यः स्यात् । तत्र कृष्णः पक्षोऽहः शुक्लो रात्रिः । वर्षेण पौरुषेणेति शेषः । [देवतानामयं दैवतोऽहोरात्रः] तत्रोत्तरायणमहः-दक्षिणायनं रात्रिः । [ब्रह्मणोयं ब्राह्मः] अहोरात्र इत्येव । दैवैर्हि सषष्टैः (षष्ट्यधिकैः) त्रिभिरहोरात्रशतैर्दिव्यं वर्षं, तैर्द्वादशभिः सहस्रैर्लौकिकं चतुर्युगं, तच्च देवानामेकं युगं, तत्सहस्रं ब्रह्मणो दिनं भूतानां स्थितिकालः, तावत्येव रात्रिर्भूतानां प्रलयकालः । यन्मनुः-" चत्वार्याहुः सहस्राणि वर्षाणां तु कृतं युगम् । तस्य तावच्छती संध्या संध्यांशश्च तथाविधः ॥ इतरेषु ससंध्येषु ससंध्याशेषु च त्रिषु । एकापायेन वर्तन्ते सहस्राणि शतानि च ॥ यदेतत्परिसंख्यातमादावेव चतुर्युगम् । एतद् द्वादशसाहस्रं देवानां युगमुच्यते ॥ दैविकानां युगानां तु सहस्रं परिसंख्यया । ब्राह्ममेकमहर्ज्ञेयं तावती रात्रिरुच्यते ॥ (१-१६९-७२) । ये द्वे दैवे युगसहस्रे तौ नृणां कल्पौ, सर्वनाम्नां विधीयमानानूद्यमानलिङ्गग्रहणे कामचारः । एकः स्थितिं कल्पयति, द्वितीयः क्षयं कल्पयति (अतः कल्प इत्युच्यते) ॥ २१ ॥ मनूनां स्वायंभुव [स्वारोचिषौत्तमितामसिरैवत] चाक्षुषवैवस्वतादीनां प्रजापतीनामन्तरमवकाशोवधिर्वा । तैर्हि चतुर्दशभिर्मन्वन्तरैर्ब्रह्मणो दिनम् । संवर्तते प्रलीयते कल्पते क्षीयतेऽस्मिन् वा जगत् । कल्पस्यान्तोवधिः कल्पान्तः । एकः कल्पोत्र क्षयार्थोऽन्यो ब्रह्मदिनार्थः, यच्छाश्वतः-कल्पः शास्त्रे विधौ न्याये संवर्ते ब्रह्मणो दिने (२०१) । संहारो युगात्ययः परिवतश्च ॥२२॥ क्षयहेतुं पापमाह । पञ्चयते पङ्कः । पात्यस्मात्पाप्मा पापं च । केलयति किल्बिषम् कलयति कल्मषं कलुषं च । वर्ज्यते वृजिनम् । एत्येनः । न जहात्यघम् । अंहत्यंहः । दुरेति दुरितम् । दुष्क्रियते स्म दुष्कृतम् । एनोंहश्च सान्तौ । मालायां किण्वम् । मलोनेकार्थेषु ॥२३॥ "धारणाद्धर्मः (म. भा. कर्ण ६९-५९) ", यागाङ्गे नपुंसकं-तानि धर्माणि प्रथमान्यासन् (ऋ. वे० १०-९०-१६), फले तु पुमान्-एष धर्मः सनातनः (मनु०)

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh

२५ स्यादानन्दथुरानन्दः शर्म-शात-सुखानि च ।
श्वःश्रेयसं शिवं भद्रं कल्याणं मङ्गलं शुभम् ॥

12 Happy, well, or right.

२६ भावुकं भविकं भव्यं कुशलं क्षेममस्त्रियाम् ।
शस्तं चा ऽथ त्रिषु द्रव्ये पापं पुण्यं सुखाऽऽदि च ॥

२७ मतल्लिका मचर्चिका प्रकाण्डमुद्ध-तल्लजौ ।
प्रशस्त-वाचकान्यमून्ययः शुभाऽऽवहो विधिः ॥

5 Excellence, or happiness.

२८ दैवं दिष्टं भागधेयं भाग्यं स्त्री नियतिर् विधिः ।
हेतुर् ना कारणं बीजं निदानं त्वाऽऽदिकारणम् ॥

6 Destiny, or luck.
3 A cause.

इति विशेषोस्य नेष्टः । लोकधर्मा नाट्यधर्मेति पारिभाषिको धर्मः शब्दोप्यस्ति । पुनाति पुण्यं पुण्यकर्मणि शुभे च । अतिशयेन प्रशस्यं श्रेयः । ईयसुनि प्रशस्यस्यश्रः ($\frac{५।३।६०}{२००९}$)। सुक्रियते स्म सुकृतम् । वर्षति वृषः, कः । प्रमदसंमदौ हर्षे ($\frac{३।३।६८}{३२४५}$) साधुः ॥ २४ ॥ आनन्दनमानन्दथुः, ट्टितोथुच् ($\frac{३।३।८९}{३२६७}$) । शृणाति क्लेशं शर्म । श्यति दुःखं शातं, शो तनूकरणे, तन् । शोभनानि खानीन्द्रियाण्यस्मिन् सुखयति वा सुखम् । श्व आगामि श्रेयोत्र श्वःश्रेयसं, श्वोवसीयं च, श्वसोवसीयःश्रेयसः ($\frac{५।४।८०}{३२३४}$) इत्यच् । भन्दते भद्रं, भदि कल्याणे । कल्यं नीरुजत्वमणति कल्याणम् । मङ्ग्यते मङ्गलम् । शोभते शुभम् ॥ २५ ॥ भवनशीलं भावुकं, (लपपतपद) स्थाभूवृषेति ($\frac{३।२।१०४}{३२३४}$) उकञ् । प्रशस्तो भवोस्यास्ति भविकम् । भवनार्हं भव्यं, भव्यगेयेति ($\frac{३।४।६८}{२८९४}$) साधुः । कुशान्–लाति कुत्सितं श्यति वा कुशलम् । क्षिणोति क्लेशान् क्षेमः । शस्यते स्म शस्तम् । प्रशस्तं च । निःश्रेयसं **मालायाम्** । सूनृतं कात्यः । द्रव्य इति विशेष्यलिङ्गतायामभिधेयलिङ्गम् । आदिशब्दात्कलुषश्चेयः-शिवभद्रादयः ॥ २६ ॥ निरस्तावयवा एवैते प्रशंसार्थाः, अत एव प्रशंसावचनैश्च ($\frac{२।१।६६}{७४७}$) इति नित्यसमासः । प्रशस्तो गौर्गोमतल्लिका, ब्राह्मणमचर्चिका, गोप्रकाण्डम्, कठोद्घः, कुमारतिल्लजः, तल्लजकइति तु लक्ष्यम् । संघोद्घौगण-प्रशंसयोरिति ($\frac{३।३।८६}{३२६४}$) उद्घोऽसमासेपि । एत्ययः ॥ २७ ॥ देवस्यात्मन इदं दैवं पूर्वकर्म । दिश्यते स्म दिष्टम् । भगस्यैश्वर्यादेरिदं भागं, भागमेव भागधेयम्, भागरूपनामभ्योधेयः ($\frac{३।३।३०}{२०९३}$) । भागाद्यच्च ($\frac{५।१।४९}{१७१५}$) भाग्यम् । नियम्यतेऽनया नियतिः । विधीयतेऽनेन विधिः । भविष्यद् भवितव्यता च । हिनोति हेतुः । कार्यतेऽनेन कारणम् । वीज्यतेनेन वेति वा वीजम् । निदीयते जन्यतेनेन निदानम् । आदावारम्भे कारणमुपादानकारणम्, सहकारिकारणमन्यत् ॥ २८ ॥ (क्षेत्रं) देहमात्रं चेतयते

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

3 The soul. २९ क्षेत्रज्ञ आत्मा पुरुषः, प्रधानं प्रकृतिः स्त्रियाम्। 2 Nature.
1 State. 3 Qualities of nature. विशेषः कालिको ऽवस्था, गुणाः सत्वं रजस् तमः ॥
6 Birth. ३० जनुर-जनन-जन्मानि जनिरुत्पत्तिरुद्भवः ।
6 An animal. प्राणी तु चेतनो जन्मी जन्तु-जन्यु-शरीरिणः ॥
3 Individuality. ३१ जातिर् जातं च सामान्यं, व्यक्तिस् तु पृथगात्मता ।
7 The mind or faculty of reason. चित्तं तु चेतो हृदयं स्वान्तं हृन् मानसं मनः ॥
इति कालवर्गः ३, अत्र मूलश्लोकाः ३१, क्षे० १ ½.

अथ धी-वर्गः ४

14 Understanding or intellect. १ बुद्धिर् मनीषा धिषणा धीः प्रज्ञा शेमुषी मतिः ।
प्रेक्षोपलब्धिश् चित् संवित् प्रतिपज्-ज्ञप्ति-चेतनाः ॥
1 Retentive intellect. २ धीर् धारणावती मेधा, संकल्पः कर्म मानसम्। 1 Determination.
3 Satisfaction. 'अवधानं समाधानं प्रणिधानं तथैव च' ॥

क्षेत्रज्ञः । अतति संचरत्यात्मा । पुरि शयनात्पुरणाद्वा पुरुषः । प्रधत्तेऽन्तः सर्वं प्रधानम् । प्रारम्भात्क्रियतेनया प्रकृतिः, सत्त्वरजस्तमसां साम्यावस्था–अव्यक्ताख्या । कालकृतो देहादेर्भेदोवस्था–अन्यथास्थितियौवनादिः । गुणाः प्रकृतेर्धर्माः । सत्त्वं साधुत्वप्रकाशकं ज्ञानसुखहेतुः । रजो रागात्मकं दुःखहेतुः । ताम्यत्यनेन तम आवरकं मोहहेतुः ॥ २९ ॥ जननं जनुः, जनेरुसिः (उ० २७२) । उत्पत्तिसाहचर्याज्जनिः स्त्री, इक् (ण्)। जन्मी, व्रीह्यादित्वात् (५।२।११६ / ९९२३) । जायते जन्युः ॥ ३० ॥ (व्यक्तिः) विशेषाख्या । चेतति चित्तं, क्तः, असुनि चेतः । ह्रियते विषयैर्हृदयम्। स्वनति स्वान्तं, क्षुब्धस्वान्तेति (७।२।१८ / ३०५८) साधुः । ह्रियते हृद् दान्तं प्रकृत्यन्तरमस्ति, तदाधारोपि हृत्पुण्डरीकम् । मन्यते मनः । मन एव मानसम्, स्वार्थेऽण् ॥ ३१ ॥ इति कालवर्गः ॥ ३ ॥

मनुते मनीषा, मनस एव–ईषा वा । दे(दि)धेष्टि धिषणा, धिष शब्दे । ध्यायति धीयते वास्यां धीः । शेते शेः–मोहस्तं मुष्णाति शेमुषी, शमेः क्वसावेत्वाभ्यासलोपे डीब्वा । उपलब्धिर्बाहुलकात्क्तिन्, षित्वादङि तूपलम्भा स्यात् । प्रतिपत्तिः प्रतिपत्, सर्वे गत्यर्थाः ज्ञानार्थाः । ज्ञप्तिः, कथंचित्तोपणार्थे, मितांह्रस्वः (६।४।९२ / ३५६८) । सांख्ये बुद्धिधर्मस्यैते पर्यायाः, वैशेषिकादौ चतुर्दशापि बुध्यर्थाः ॥१॥ मेधते संगच्छतेस्यां मेधा । मनसो व्यापारः संकल्पः । विकल्पोपि । पूर्वोक्तस्य चित्तस्य संतानद्वारेण स्थै[धै]र्यमाभोग इति बौद्धाः । पुनःपुनर्मनसि करणं

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

2 Consciousness of pleasure or pain. चित्ताभोगो मनस्कारश्, चर्चा संख्या विचारणा । 3 Reflection.
'विमर्शो भावना चैव वासना च निगद्यते' ॥

3 Reasoning. ३ अध्याहारस् तर्क ऊहो, विचिकित्सा तु संशयः । 4 Doubt.
2 Decision. संदेह-द्वापरौ चाऽथ समौ निर्णय-निश्चयौ ॥

2 Heterodox or kerssry. ४ मिथ्यादृष्टिरनास्तिकता, व्यापादो द्रोहचिन्तनम् । 2 Malice.
2 Conclusion. समौ सिद्धान्त-राद्धान्तौ, भ्रान्तिर् मिथ्यामतिर् भ्रमः ॥
3 Mistake.

10 Agreement. ५ संविदाऽऽगूः प्रतिज्ञानं नियमाऽऽश्रव-संश्रवाः ।
अङ्गीकाराऽभ्युपगम-प्रतिश्रव-समाधयः ॥

1 True knowledge. 1 Knowledge of arts. ६ मोक्षे धीर् ज्ञानमन्यत्र विज्ञानं शिल्प-शास्त्रयोः ।
8 Beatitude. मुक्तिः कैवल्य-निर्वाण-श्रेयो-निःश्रेयसाऽमृतम् ॥

3 Spiritual ingorance. ७ मोक्षोऽपवर्गो, ऽथाऽज्ञानमविद्याऽहम्मतिः स्त्रियाम् ।
3 Five objects of sense. रूपं शब्दो गन्ध-रस-स्पर्शाश् च विषया अमी ॥
1 An object of sense.

मनस्कारः, अतः–कृकमाति (४।२।१४५ / १३६९) सत्वम् । समाधानमवधानं प्रणिधानं च । चर्चनं संख्यानं विचारश्च । विमर्शो वासना भावना, संस्कारोनुभूताद्यविस्मृतिरिति वक्तव्यम् ॥ २ ॥ अध्याहरणमपूर्वोत्प्रेक्षणम् । तरत्यनेन संशयविपर्ययौ तर्कः, तर्कणं वा, तर्क भापार्थः । उभयकोटिस्पृग्ज्ञानं विचिकित्सा–एकत्रानारूढेः, कितः संशये सन् । शीङ्दिहोर्नानार्थयोः संशब्देनैपोर्थो द्योत्यते, उपसर्गस्य वा सोर्थो धातूपाधिवशात्प्रकाशते । एवं सर्वत्र । द्वौ पक्षौ परौ यत्र द्वापरः, पृषोदरादित्वात् (६।३।१०९ / २०३४) आत्वम् ॥ ३ ॥ मिथ्यादृष्टिः परलोकाभावबुद्धिः । नास्ति परलोक इति मतिर्यस्य, अस्तिनास्तिदिष्टंमतिः (४।४।६० / १६१०) इति ठक् । व्यापादनं व्यापादः, ण्यन्तादच् । राद्धः सिद्धोन्तो निश्चयोस्य राद्धान्तः । मिथ्यामतिरतस्मिंस्तदिति ज्ञानम् ॥ ४ ॥ पक्षोक्तिः प्रथिताङ्गीकारश्चेत्युभयीह प्रतिज्ञा । संविज्ज्ञानं, यथा–सत्संवित्करणातीता, नियमोपि, यथा–सविदं लङ्घयेच्च यः (याज्ञ० २-१८७) धातूनामनेकार्थत्वादुपसर्गवशाद्वा तत्तदर्थत्वम् । आगमनमागूः, भ्रमेश्च डूः (उ० २२६) इति चकाराड् डूः ॥५॥ मोक्षविषया मोक्षफला वा धीः (ज्ञानम्)। मोक्ष[प्रतिपादक]शास्त्रादन्यत्र शिल्पे चित्रादौ शास्त्रे च धीर्विज्ञानम् । मोचनं मुक्तिर्मोक्षः पाशेभ्यः आत्मनः पृथग्भावः । अत एव कैवल्याख्या । निर्वात्यस्मिन्निति निर्वाणं, निर्वाणोऽवात इति (८।२।५० / ३०२९) साधुः, पैओवै शोषणे । अतिशयेन प्रशस्यं श्रेयः । निश्चितं श्रेयो निःश्रेयसम्, अचतुरेति (५।४।७७ / १४५) साधुः । अविद्यमानं मृतमत्रामृतम् ॥ ६ ॥ भावेभ्योपवर्जनमपवर्गः । महानन्दोपुनर्भवश्च । विरुद्धं वेदनमविद्या, अधर्मानर्थवद् विपर्यये नञ्, यदाह–

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh

3 An organ of sense. ८ गोचरा इन्द्रियार्थाश् च, हृषीकं विषयीऽन्द्रियम् ।

1 organ of action.
1 An intellectual organ. कर्मेन्द्रियं तु पाय्वाऽऽदि, मनो-नेत्राऽऽदि धीन्द्रियम् ।

2 An astringent taste. ९ तुवरस् तु कषायो ऽस्त्री, मधुरो, लवणः, कटुः, ।
1 Sweet. 1 Salt.
1 Bitter. 1 Pungent.
1 Sour. तिक्तो, ऽम्लश् च, रसाः पुंसि, तद्वत्सु षडमी त्रिषु ॥

1 A pleasing scent. १० विमर्दोत्थे परिमलो गन्धे जन-मनो-हरे ।
1 perfume. आमोदः सोऽति-निर्हारी, वाच्य-लिङ्गत्वमा-गुणात् ॥

2 A scent spreading far. ११ समाकर्षी तु निर्हारी, सुरभिर् घ्राणतर्पणः ।
4 fragrant substance.
2 A perfume for the mouth. इष्टगन्धः सुगन्धिः स्यादामोदी मुखवासनः ॥

अनित्याशुचिदुःखानात्मसु नित्यशुचिसुखात्मख्यातिरविद्या (पा० सू० २-५) अहमित्यस्य मननमहंमतिः, अनात्मन्यात्माभिमानात्, अहमिति विभक्तिप्रतिरूपको निपातः । रूपाद्याः पञ्च, विसिन्वन्ति बध्नन्ति विषयाः, पचाद्यच् (८।३।७२) परिनिविभ्यः सेवसितसयेति (८।३।७२) षत्वम् ॥ ७ ॥ गाव इन्द्रियाणि चरन्त्येषु गोचराः, गोचरसंचरेति (३।३।११९) साधुः । इन्द्रियैरर्थ्यन्त इन्द्रियार्थाः । अर्धाश्च । हृष्यत्यनेन हृषीकम् । विषयोस्यास्तीति विषयि । इन्द्रस्यात्मनो लिङ्गमिन्द्रियं, इन्द्रियमिन्द्रलिङ्गं (५।२।९३) इति साधु । वाक्पाणिपादपायूपस्थाख्यं वचनादानगत्युत्सर्गानन्दरूपकर्मसाधनमिन्द्रियम् । मनःषष्ठानि नेत्रजिह्वाघ्राणत्वक्श्रोत्राणि धीहेतवो बुद्धीन्द्रियाणीत्यर्थः (पंचदशी २-११) ॥ ८ ॥ तु इति सौत्रादावरणार्थादौणादिको वरच् । कषति कण्ठं कषायः । मधु माधुर्यमस्यास्तीति मधुरः, ऊपसुपीति (५।२।११७) रः । लुनाति जाड्यं लवणः, नन्द्यादित्वात् (६।१।१३४) ल्युः, णत्वं च । कटत्यावृणोति कटुः । तेजति स्म तिक्तः । अम्बत्यम्लः, अमेर्ले इत्येके—अम्लमाहुः । तुवराद्याः षट्, रस्यन्त इति रसाः । गुणमात्रे रसः पुंसि, गुणवद्वृत्तित्वे तेभिधेयलिङ्गाः ॥ ९ ॥ सुरभिमाल्यगन्धादिपरिमर्दनोत्पन्नो हृद्यो गन्धः परिमलः । स गन्धोतिदूरव्यापि मनोहारी वा, समन्तान्मोदन्तेनेनामोदः । वाच्यलिङ्गत्वमागुणात्—अधिकारोयम्, (अधिकारार्थः) गुणाः शुक्लादय इत्येतस्मात्प्राग्भिधेयलिङ्गाः ॥ १० ॥ अत्र यो यं प्रति प्रसिद्धस्तदनुवादे नान्यविधिः । निर्हरत्यवश्यं निर्हारी । सुष्ठु रमते सुरभिः । शोभनो गन्धोस्य सुगन्धिः, गन्धस्येदुत्पूतीति (५।४।१३५) इत् । मुखं वासयत्यनुलिम्पति मुखवासनः, मुखवासयोग्य इत्येके, मुखवासस्यागुरुवासन इति भागुरिः, यतः—आमोदो नित्योस्यास्ति अन्ये

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

2 An ill smelling substance.
1 A smell like that of raw meat

१२ पूतिगन्धिस् तु दुर्गन्धो, विस्रं स्यादाम-गन्धि यत् ।
शुक्ल-शुभ्र-शुचि-श्वेत-विशद-श्येत-पाण्डराः ॥ 13 White.

१३ अवदातः सितो गौरो ऽवलक्षो धवलो ऽर्जुनः ।
हरिणः पाण्डुरः पाण्डुरीषत्पाण्डुस् तु धूसरः ॥

3 Yellowish white.
1 Grey.
7 Black or dark blue.

१४ कृष्णे नीलाऽसित-श्याम-काल-श्यामल-मेचकाः ।
पीतो गौरो हरिद्राभः, पलाशो हरितो हरित् ॥

3 Yellow.
3 Green.
2 Red.
3 Crimson.
2 Dark-red.
2 Pale red or pink.

१५ लोहितो रोहितो रक्तः, शोणः कोकनदच्छविः ।
अव्यक्तरागस् त्वरुणः, श्वेतरक्तस् तु पाटलः ॥

2 Brown.
3 Purple.
6 Tawny.

१६ श्यावः स्यात् कपिशो, धूम्र-धूमलौ कृष्णलोहिते ।
कडारः कपिलः पिङ्ग-पिशङ्गौ कद्रु-पिङ्गलौ ॥

द्वौ द्वौ भिन्नावाहुः ॥ ११ ॥ पूयी विस(श)रणे दुर्गन्धे च, पूतिर्विस्रः पूतेरिव वा गन्धोस्य । विस्यति विस्रं, विस उत्सर्गे । आमोपक्वो मलस्तस्येव गन्धोस्यामगन्धि, उपमानाच्च ($\frac{५।४।१३७}{८७६}$) इतीत् । शोकति मनोस्मिञ्शुक्लः, शुक गतौ । शोभते शुभ्रः । शुध्यति शुचिः । जिश्विता वर्णे, श्वेतते श्वेतः । विशीयते विशदः, विशति चित्तं वा । श्यायते श्येतः । पण्डते याति मनोस्मिन्पाण्डरः – उणादौ (अरः) ॥ १२ ॥ अवदायते शोध्यतेवदातः । सिनोति मनः सितः, षिञ् बन्धने । गो(गु)रते मनोस्मिन्गोरः, गुरी उद्यमे, गोर एव गौरः । अवलक्ष्यतेवलक्षः । धूयते मलोस्य धवलः, धावेर्ह्रस्वश्चेति श्रीभोजः॥ अर्ज्यतेर्जुनः ॥ हरति हरिणः । पाण्डुः पाण्डुत्वमस्यास्तीति पाण्डुरः, नगपांसुपाण्डुभ्योरः ($\frac{३।१।९९}{२९२४}$) ईषदव्यक्तः पाण्डुः, धूनोति चेतो धूसरः ॥ १३ ॥ वर्णान् कर्षति कृष्णः । नील वर्णे, कः । सितविरुद्धोसितः । श्यायते श्यामः । श्यामं श्यामत्वं लाति श्यामलः । कालयति मनः कालः । मेचयति (मचति) मिश्रीभवति मेचकः, मेचकः शिखिकण्ठाभ इति दुर्गः ॥ पीयते वर्णात् पीतः ॥ पलाशस्य वर्णस्यायं पालाशः पीतरक्तकृष्ण, शाश्वतः पलाश इत्याह–राक्षसे किंशुके पर्णे पलाशाख्यं हरित्यपि (५२९)। हरति हरितः ॥१४॥ रोहति रोहितः, रलयोरेकत्वम् ॥ शोणति शोणः, शोणृ वर्णे । कोकनदच्छविः पद्माभः । पीतरक्तस्तु पिञ्जरः । रागोत्र लौहित्यम् । इत्यर्त्यरुणः ॥ पाटलवर्णः (पाटलः), पाटेरलज्वा ॥ १५ ॥ श्यायते श्यावो धूसरारुणः । कपेर्मर्कटस्येव वर्णोस्त्यस्य कपिशः, लोमादित्वात् ($\frac{५।२।१००}{२०७७}$) शः ॥ धूनोति धूमं राति वा धूम्रः । धूमवर्णं लाति धूमलः ॥ कडति कडारः । कपिवर्णं लाति कपिलः । पिञ्जति पिङ्गलः । पिशति पिशङ्गः । कन्दते कद्रुः । पिङ्गं लाति पिङ्गलः ।

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh

6 Variegated.

१७ चित्रं किर्मीर-कल्माष-शबलैताश् च कर्बुरे ।
गुणे शुक्लाऽदयः पुंसि, गुणि-लिङ्गास् तु तद्वति ॥

इति धी-वर्गः ४, अत्र मूलश्लोकाः १७, क्षेपकश्लोकः १.

अथ शब्दादि-वर्गः ५

7 The goddess of speech.

१ ब्राह्मी तु भारती भाषा गीर् वाग् वाणी सरस्वती ।
व्याहार उक्तिर् लपितं भाषितं वचनं वचः ॥

2 Ungrammatical language.
1 A word.
1 A sentence.

२ अपभ्रंशो ऽपशब्दः स्याच्छास्त्रे शब्दस् तु वाचकः ।
तिङ्-सुबन्त-चयो वाक्यं, क्रिया वा कारकाऽन्विता ॥

बभ्रुरनेकार्थे । पिशङ्गो रोचनापाण्डुरिति कात्यः ॥ १६ ॥ चीयते चित्रम् । कीर्यते किर्मीरः । कलयति वर्णान् कल्माषः । शवति याति वर्णाञ्शवलः । एति वर्णानेतः । क्रियते वर्णैः कर्बुरः, कर्बति वा ॥ गुणमात्रे वर्तमाना गुणाः पुंसि । पटस्य शुक्लः । गुणवद्वृत्तितायां त्वभिधेयलिङ्गाः, शुक्लः पटः, शुक्ला शाटी, शुक्लं वस्त्रम् । वर्णादनुदात्तात्तोपधात्तोनः (४।१।३९) इति श्येनी श्येता, लोहिनी लोहिता ॥ १७ ॥ इति धीवर्गः ॥ ४ ॥

रूपभेदानुक्त्वा शब्दभेदानाह ब्राह्मीत्विति । ब्रह्मण इयं ब्राह्मी, ब्राह्मोऽजाताविति (६।४।७१) साधुः । अत एव शब्दब्रह्मणोधिष्ठात्र्याः पर्याया एते । व्याहारादयस्त्वधिष्ठेयाः । बिभर्ति भारती । भाष्यते भाषा । गृणाति गीः । उच्यते वाक्, क्विब्वचिप्रच्छीति (३।२।४७) क्विप्, दीर्घोसंप्रसारणं च । वाण्यते शब्द्यते वाणी । सरः प्रसरणमस्त्यस्याः सरस्वती । उच्यते वचः, असुन् ॥ १ ॥ संस्कृतादपभ्रश्यत इत्यपभ्रंशः । अपभ्रष्टः शब्दोपशब्दः, गावी गोणी गोपोतलिकादिः (महाभाष्ये) । शास्त्रे व्याकरणतर्कशास्त्रादौ यो वाचकः स शब्दः, लोके समुद्रघोषादिरपि । वक्तव्यं वाक्यं, चजोःकुधिण्यतोः (७।३।५२) वचोऽशब्दसंज्ञायां (७।३।६७) इत्यन्यत्र वाचम् । तिङन्तसमूहो यथा–पचति भवति–पाको भवतीत्यर्थः । सुबन्तचयो यथा–प्रकृतिसिद्धमिदं हि महात्मनाम् (भर्तृ० २-५२), भवत्यध्याहारस्त्वत्र हि वाचकमात्रम् । कारकैरन्विता संबद्धार्था वा क्रिया वाक्यम्–देवदत्त गामभ्याज शुक्लां दण्डेन । सर्वत्राकाङ्क्षायोग्यतावशादन्वितत्वं लक्षणं, यज्जैमिनिः—अर्थैकत्वादेकं वाक्यं साकाङ्क्षं चेद्विभागे स्यात् (श्लो.वा.२-१-४६) । भट्टोपि–साकाङ्क्षावयवं भेदे परानाकाङ्क्षशब्दकम् । कर्मप्रधानं गुणवदेकार्थं वाक्यमुच्यते ॥ एकं शब्दात्मनोन्यदर्थात्मकस्य वाक्यस्य

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

4 The *Védas*, or any one of them.
1 The duty enjoined by them.
i1 Three *Védas*.

३ श्रुतिः स्त्री वेद आम्नायस् त्रयी, धर्मस् तु तद्-विधिः ।
स्त्रियामृक् साम-यजुषी, इति वेदास् त्रयस् त्रयी ॥

1 A *Védánga*.
2 The sacred name of God.

४ शिक्षेत्यादि श्रुतेरङ्गमोङ्कार-प्रणवौ समौ ।

2 History.
1 An accent.

इतिहासः पुरावृत्तमुदात्ताद्यास् त्रयः स्वराः ॥

1 Logic
1 ethics.
2 A tale.
1 A *Pura'n'a*.

५ आन्वीक्षिकी, दण्डनीतिस्, तर्कविद्याऽर्थशास्त्रयोः ।
आख्यायिकोपलब्धार्था, पुराणं पञ्च-लक्षणम् ॥

1 A feigned story.
2 A riddle.
2 A code of laws.
2 A compilation and abridgment.

६ प्रबन्धकल्पना कथा, प्रवह्लिका प्रहेलिका ।
स्मृतिस् तु धर्मसंहिता, समाहृतिस् तु संग्रहः ॥

लक्ष्मेत्येके ॥ २ ॥ श्रूयते श्रुतिः । विदन्त्यनेन धर्मं वेदः । आम्नायते पारंपर्येणाम्नायः । त्रयोवयवास्त्रयी, अथर्वणस्त्रय्युद्धारः । त्रय्यनुवादाच्छ्रुत्यादिविधिरिति लिङ्गसंकरदोषो नोद्भावनीयः। निगमोनेकार्थे । वैदिको विधिः–चोदनालक्षणोर्थो धर्मः,(जै.१-२)। यद् गौतमः—श्रुतिस्मृतिविहितो धर्मः । स्मृत्युक्तोपि वैदिक एव, वेदमूलत्वात्स्मृतेः । तद्विधिरिष्टाख्यस्त्रयीधर्मोन्यः पूर्ताख्य इत्येके । ऋच्यते स्तूयतेनया ऋक् । स्यति पापं साम । इज्यतेनेन यजुः ॥ ३ ॥ अङ्ग्यते ज्ञानतेनेनाङ्गमुपकारम्, शिक्षा कल्पो व्याकरणं निरुक्तं ज्योतिषां गतिः । छन्दोविचितिरित्येतैः षडङ्गो वेद उच्यते । (ओङ्कारः) स्वार्थे कारः, वर्णात्कारः (वा० $\frac{२२२७}{३२८५}$) इत्यत्र निर्णीतत्वात् । प्रणूयते प्रणवः । इति ह आसीद्यत्रेतीतिहासः, इतिरेवमर्थे, हः किलार्थे । पुरावृत्तं पूर्वचरितम् । उदात्तानुदात्तस्वरिताः, ऊर्ध्वमादीयत इत्युदात्तः । एकश्रुतिस्तु स्वराविभागः ॥ ४ ॥ प्रत्यक्षागमाभ्यामीक्षितस्य पश्चादीक्षणमन्वीक्षा, सा प्रयोजनं यस्याः सान्वीक्षिकी तर्कविद्या । दम्यतेनेन दमनं वा दण्डः, स नीयते दस्यं प्रति प्राप्यते यया सा दण्डनीतिरर्थशास्त्रम् । वार्त्ता वैश्यवर्गे वक्ष्यते । आचष्टे–आख्यायिका वृत्तार्थकथनाद्धर्षचरितादिः । पुरापि नवं (भवं) पुराणं (नि०३-४-१९) यतः–सर्गश्च प्रतिसर्गश्च वंशो मन्वन्तराणि च । वंशानुचरितं चैव पुराणं पञ्चलक्षणम् (विष्णुपु०) ॥५॥ प्रबन्धस्य कल्पना यथा कादम्बर्यादिरुत्पाद्यत्वात् । प्रवह्लते प्राधान्यं भजते प्रवह्लिका । प्रहेलयत्यभिप्रायं सूचयति प्रहेलिका, हिल हावकरणे । शाब्दी प्रहेलिका यथा पानीयं पातुमिच्छामि त्वत्तः कमललोचने । यदि दास्यसि नेच्छामि नो चेद् दास्यसि देहि मे (सु. र.३०७-२)॥ आर्थी यथा–जइ सासुआइ भणिआ पइवासहरम्मि दीवअं देसु। ता की समुद्धऊ[अ]मुही हिअअम्मि णिवेसए[अ]दि (दि)ट्ठिम् ॥ (यदि श्वश्रूर्भणिता पतिवासगृहे दीपकं देहि । तत् किं समुद्धृ[द्ध]तमुखो हृदये निवेशयति

CC-0. Agamnigam Foundation. Digitized by eGangotri Siddhanta Chandigarh

2 A part of a stanza. 2 A rumour. 4 Tidings or intelligence.

७ समस्या तु समासार्था, किंवदन्ती जनश्रुतिः ।
वार्ता प्रवृत्तिर् वृत्तान्त उदन्तः स्यादथाऽह्वयः ॥

3 A call or summons.

८ आख्याऽह्वे अभिधानं च नामधेयं च नाम च ।
हूतिराकारणा ऽऽह्वानं, संहूतिर् बहुभिः कृता ॥

1 Clamour. 2 A contest or law suit. 2 The exordium. 2 An example or opposite argument.

९ विवादो व्यवहारः स्यादुपन्यासस् तु वाङ्मुखम् ।
उपोद्घात उदाहारः, शपनं शपथः पुमान् ॥ 2 An oath.

3 A question. 2 An answer. 2 A groundless demand.

१० प्रश्नो ऽनुयोगः पृच्छा च, प्रतिवाक्योत्तरे समे ।
मिथ्याभियोगोऽभ्याख्यानमथ मिथ्याभिशंसनम् ॥

2 A false accusation. 1 A affectionte speech. 3 Fame. 4 Praise.

११ अभिशापः, प्रणादस् तु शब्दः स्यादनुराग-जः ।
यशः कीर्तिः समज्ञा च, स्तवः स्तोत्रं स्तुतिर् नुतिः ॥

दृष्टिम् ॥) उत्सन्नविप्रकीर्णशाखानां मन्वादिभिः स्मरणं स्मृतिः । धर्मः संधीयतेस्यां धर्मसंहिता । समाहरणं संक्षेपः ॥६॥ अपूर्णत्वाद्विक्षिप्तं [द्विवक्षितं] समस्यते संक्षिप्यतेनया समस्या, संज्ञायांसमजेति (३।३।९९/३२७६) बाहुलकात्क्यप्, ऋहलोर्ण्यति (३।१।१२४/२८७२) वा, संज्ञापूर्वकत्वाद् वृध्यभावः, समात्क्यचि सर्वप्रातिपदिकेभ्यः (वा० ४३१६।१७/२६६२) सुच् इत्येके, ततः, अ प्रत्ययात् (३।३।१०२/३२७९), यथा—दामोदरकराघात विह्वलीकृतचेतसा । दृष्टं चाणूरमल्लेन शतचन्द्रं नभस्तलम् । (बाण-सुभाषितसंग्रहः)। किं वदन्तीति किंवदन्ती लोकप्रवादः । वृत्तिर्लोकवृत्तं विद्यतेस्यां वार्त्ता, प्रज्ञाश्रद्धार्चावृत्तिभ्योणः (५।२।१०१/२९०८) । वृत्तस्य चरितस्यान्तो वृत्तान्तः । उद्यते—उदन्तः, वदेर्झच् (?) । आह्वयतेनेनाह्वयः, बाहुलकाद् घः ॥७॥ नमत्यनेन नाम । (नामधेयं) भागरूपनामभ्योधेयः (वा० ३३३०/२७९३) स्वार्थे । आकारणमाकारणा, युच्, ल्युडन्तेन समाहारो वा । बहुभिः कृता या हूतिः सा संहूतिः, सदृशाह्वय इति भागुरिः ॥८॥ विविधो वादः (विवादः) । ऋणादानादिर्व्यवहारः, यत्स्मृतिः (याज्ञव०)—वि नानार्थेव संदेहे हरणं हार उच्यते । नानासंदेहहरणाद् व्यवहारः प्रकीर्तितः ॥ वाचो मुखमारम्भः । उप समीप उद्धृत्य हन्यत उपोद्घातः, यदाहुः—चिन्तां प्रकृतसिद्ध्यर्थामुपोद्घातं प्रचक्षते । उद्धृत्याह्वियत उदाहारः । वाचा शरीरस्पर्शनं (शपनं)। शापोपीत्यमरमाला ॥ ९ ॥ प्रच्छनं प्रश्नः, यजयाचेति (३।३।९९/३२६८) नङ्, च्छ्वोः-शूडिति (सू० ६।४।१९/३५६६) शः । अनुयोगः पर्यनुयोगः । पृच्छा भिदादौ षिद्भिदादीति (३।३।१०४/३२८१) । उत्तरन्त्यनेनोत्तरं, उदो वा तरप् । मिथ्याभियोगोसत्याक्षेपः । मिथ्यादूषणमभिशाप इत्येके ॥ १० ॥ शब्दनं शब्दः प्रसिद्धः (प्रणादः), यत्कात्यः—

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh

1 Repetition.
2 Making a loud noise.
1 Voice in grief.

१२ आम्रेडितं द्विस् त्रिरुक्तमुच्चैर्घुष्टं तु घोषणा ।
काकुः स्त्रियां विकारो यः शोक-भीत्यादिभिर् ध्वनेः ॥

10 Censure, blame, or contempt.

१३ अवर्णाऽक्षेप-निर्वाद-परीवादाऽपवाद-वत् ।
उपक्रोशो जुगुप्सा च कुत्सा निन्दा च गर्हणे ॥

2 unfriendly speech.
2 Reproach
1 disparagement.

१४ पारुष्यमतिवादः स्याद्, भर्त्सनं त्वपकारगीः ।
यः स-निन्द उपालम्भस् तत्र स्यात् परिभाषणम् ॥

1 An imputation of adultery.
2 Address,
1 Incoherent peech.

१५ तत्र त्वाक्षारणा यः स्यादाक्रोशो मैथुनं प्रति ।
स्यादाभाषणमालापः, प्रलापो ऽनर्थकं वचः ॥

2 Tautology
2 Lamentation.
2 Quarrel.
1 Conversation.

१६ अनुलापो मुहुर्भाषा, विलापः परिदेवनम् ।
विप्रलापो विरोधोक्तिः, संलापो भाषणं मिथः ॥

2 Denial
2 Speaking well.
3 Strange querry.
3 Cursing.

१७ सुप्रलापः सुवचनमपलापस् तु निह्नवः । 2 Denial.
चोद्यमाक्षेपाऽभियोगौ, शापाऽक्रोशौ दुरेषणा ॥

शब्दो गुणानुरागोत्थः प्रणादः । यात्यश्नुते वा दिशो यशः । ऊतियूतीति (सू० $\frac{३।३।९७}{३२७४}$) कीर्तिः साधुः । समाज्ञायतेनया समाज्ञा । श्लोकाभिख्ये अनेकार्थे ॥ ११ ॥ (आम्रेडितं) द्विर्भूते पूर्वाचार्यसंज्ञैषा, अतश्च म्रेडृ उन्माद इति पेठुः । द्वौ वारौ त्रीन् वारान्वेति, द्वित्रिचतुर्भ्यःसुच् (सू० $\frac{५।४।१८}{२०८६}$) । विशब्दनाविवक्षातो घुषिरविशब्दने (सू० $\frac{७।२।२३}{३०६३}$) इति नेट् । (घोषणा) ण्यासश्रन्थोयुच् ($\frac{३।३।१०७}{३२८४}$) । कायति काकुः । आदिशब्दात्कामादिः ॥ १२ ॥ अवर्णो विपरीतवर्णनम् । निष्क्रान्तो वादान्निर्वादः । उपक्रोशवदवर्णादयः पुंसीति वाच्ये प्रौढिम्नान्यथोक्तिः ॥ १३ ॥ (पारुष्यं) मैवं कृथाः (इति) वाच्यतेत्यर्थः ॥ १४ ॥ मैथुनमुद्दिश्य गाली इत्यर्थः, दूषणमित्येके । क्षारणापि, क्षारणाक्षारणाक्रोशाः साभिशापाभिमैथुना इति दुर्गः ॥ १५ ॥ (अनुलापः) पौनःपुन्येनोक्तिः । (विलापः) अनुशोचनमित्यर्थः । (विप्रलापः) विरुद्धं प्रलपनम् । मिथोन्योन्यमुक्तिप्रत्युक्ती संलापः । संकथापि ॥ १६ ॥ दुरेषणा दुरभिध्यानम् । (चाटु, चटु) प्रेम्णा श्लाघनं, चटतीति चटेः ञुण्, उन् च । के, चाटुकम् । असत्या तु श्लाघा विरुद्धं कत्थनं (विकत्थनं) लेखादिनाधिगतेर्थे मुखस्वरूपं वाचिकं, वाचोव्याहृतार्थायां ($\frac{५।४।३६}{२१०३}$) इति ठक् । उत्तरे वक्ष्यमाणा, यथा–रुपती वाक्, रुपब्शब्दः,

CC-0. Agamnigam Foundation Chandigarh. Digitized by eGangotri Siddhanta Foundation, Chandigarh

3 False love talk.
2 Message.

१८ अ-स्त्री चाटु चटु श्लाघा प्रेम्णा मिथ्या-विकत्थनम्' ।
संदेशवाग् वाचिकं स्याद्, वाग्-भेदास् तु त्रिषूत्तरे ॥

1 Inauspicious speech.
1 Good.
1 Very sweet.

१९ रुशती वाग-कल्याणी स्यात्, कल्या तु शुभाऽऽत्मिका ।
अत्यर्थ-मधुरं सान्त्वं, संगतं हृदयङ्गमम् ॥ 2 Proper.

2 Harsh.
2 Rustic.

२० निष्ठुरं परुषं, ग्राम्यमश्लीलं, सूनृतं प्रिये ।
सत्ये, ऽथ संकुल-क्लिष्टे परस्पर-पराहते ॥

1 Pleasing but true.
2 Inconsistent.

1 slurred.
2 Spoken fast.

२१ लुप्त-वर्ण-पदं ग्रस्तं, निरस्तं त्वरितोदितम् ।
अम्बूकृतं स-निष्ठीवमबद्धं स्यादनर्थकम् ।

1 Sputtered.
1 Unmeaning.

2 Unfit to be uttered.

२२ अनक्षरमवाच्यं स्यादाहतं तु मृषाऽर्थकम् । 1 An impossibility.
'सोल्लुठनं तु सोत्प्रासं, मणितं रतिकूजितम् ॥

2 Talkin jest.
2 Murmering at cohabitation.

रुपद्वचः ॥ १७ ॥ (रुपति) हिंस्रेत्यर्थः, न तां वदेद्रुषतीं (गां) पापलोक्याम् । अत उपतीत्यसभ्यः पाठः । कलासु साधुः कल्या, काल्येति कात्याद्याः । सान्त्यतेनेनेति सान्त्वं, सामयतेर्वा—औणादिकस्त्वत् । (हृदयंगमं) गमेः सुपिवक्तव्यात् (वा० $\frac{२००९}{३०५३}$) खच् ॥ १८ ॥ निशितं तिष्ठति निष्ठुरम् । विकुष्टं च । ग्रामे भवं ग्राम्यं, ग्रामाद्यखञौ ($\frac{४।२।९४}{१३१४}$) । असभ्यस्मृतिहेतुश्चाश्लीलं—अश्रीप्रदं भाण्डादि । प्रियं सत्यं वचनं सूनृतं, सुष्ठून्यते सून् सूंश्च तद्वतं च सूनृतम् । अन्योन्यविरुद्धं संकुलं क्लिष्टं च, यथा—अन्धो मणिमुपाविध्यत्तमनङ्गुलिरावयत् । तमग्रीवः प्रत्यमुचत्तमजिह्वोभ्यपूजयत् ॥१९॥ (ग्रस्तं) असंपूर्णोच्चारितम् । अनम्बुनोम्बुनः करणमम्बूकृतं, च्वौच ($\frac{७।४।२६}{२१२०}$) इति दीर्घः । निष्ठेवस्थूत्कारः, ष्ठिवुसिवोदीर्घः (चान्द्रसू०), पक्षे सनिष्ठीवम् । असंबद्धं दशदाडिमादि वाक्यं समुदायार्थशून्यम् (म. भाष्य १-२-४५) ॥२०॥ (अनक्षरं) विरोधे नञ् । (आहतं) यथा—एष वन्ध्यासुतो याति खपुष्पकृतशेखरः । मृगतृष्णाम्भसि स्नातः शशशृङ्गधनुर्धरः ॥ (सु. ६२०-५) म्लेच्छैर्म्लिष्टं, क्षुब्धस्वान्तध्वान्तेति ($\frac{७।२।१८}{३०५८}$) साधुः । विगतं तथा सत्यं यत्र वितथम् ॥ २१ ॥ सति साधु सत्यम् । तथा साधु तथ्यम् । समञ्चति सम्यक्, तदेव समीचीनं, समिची समीचीना वाक्, समःसमी ($\frac{३।३।९३}{४३१}$) इत्यञ्चतावप्रत्यये समिः, नामैतत्, सम्यक्त्वव्ययम् । वाग्भेदास्त्रिषूक्ताः, (यथा) सत्याशीः, सत्यः शब्दः, सत्यं वचः । यदा तु सत्यवाक्त्वादिना तद्वति वर्तन्ते तदापि त्रिषु, यथा सत्यं कुलं, सत्या स्त्री, सत्यः पुमान् । एवं ग्राम्यनिष्ठुरादयः ॥ २२ ॥

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh

5 Plain speech. 1 An indistinct speech. 1 False.

२३ श्राव्यं हृद्यं मनोहारि विस्पष्टं प्रकटोदितम् । '
अथ म्लिष्टमविस्पष्टं, वितथं त्वनृतं वचः ॥

4 Truth.

२४ सत्यं तथ्यमृतं सम्यगमूनि त्रिषु तद्वति ।

17 Sound.

शब्दे निनाद-निनद-ध्वनि-ध्वान-रव-स्वनाः ।

२५ स्वान-निर्घोष-निर्ह्राद-नाद-निस्वान-निस्वनाः ।

1 Rustling.

आरवाऽऽराव-संराव-विरावा, अथ मर्मरः ॥

6 The tinkling of ornaments.

२६ स्वनिते वस्त्र-पर्णानां, भूषणानां तु शिञ्जितम् ।
निक्वाणो निक्वणः क्वाणः क्वणः क्वणनमित्यपि ॥

2 the sound of a lute.

२७ वीणाया क्वणिते प्रादेः प्रक्वाण-प्रक्वणाऽऽदयः ।

2 A confused sound. 1 The cry of birds, & c.

कोलाहलः कलकलस्, तिरश्चां वाशितं रुतम् ॥

2 An echo. 2 A song or singing.

२८ स्त्री प्रतिश्रुत् प्रतिध्वाने, गीतं गानमिमे समे ।

इति शब्दादि-वर्गः ५, अत्र मूलश्लोकाः २५॥, क्षे० २॥.

(निनाद इ०) नौगदनदति (३।३।६४ / ३२४१) वा, स्वनहसोर्वा (३।३।६२ / ३२३५), विभाषाङिरुप्लुवोः (३।३।५० / ३२३५,) उपसर्गेरुवः (३।३।२२ / ३१९२,) इति च यथास्वं घञपौ ॥ २३ ॥ मर्मरेति शब्दानुकरणम् । स्वनित इत्येव (भूषणानाम्), शिञ्जापि ॥ २४ ॥ एते क्वणितमात्रे वीणायामवीणायां च, क्वणोवीणायांच (३।३।६५ / ३२४२) इति चकारेण नावित्यनुपसर्ग इति (च) सामान्येनानुकर्षणात् । उपसर्गात्क्वणो वीणायामेव घञो विकल्पात्सोपसर्गार्थं हि तत्र वीणाग्रहणम् । एवं सुक्वाणसुक्वणादिः ॥ २५ ॥ कोलान् सूकरानाहलते त्रासयति कोलाहलः । कलोव्राव्यक्तः, आभीक्ष्ण्येद्विर्भावः । रुबमनूद्य वासि-शि-तविधिः, तिर्यञ्चो मृगपक्ष्यादयः, तिर्यग्योनिश्च पञ्चधा भवतीति । प्रतीपं श्रूयते प्रतिश्रुत् । पदस्वरतालावधानात्मकं गान्धर्वरागगीत्यादिकं गीतं, प्रावेशिक्यादि ध्रुवारूपं गानमिति भरताद्युक्तो विशेषो नाश्रितः ॥ २६ ॥ इति शब्दादिवर्गः । ५ ।

CC-0. Agamnigam Foundation. Digitized by S3 Foundation, Chandigarh

अथ नाट्य-वर्गः ६

1 The seven musical notes.

निषाद-र्षभ-गान्धार-षडज-मध्यम-धैवताः ॥

1 Minute tone.

१ पञ्चमश् चेत्यमी सप्त तन्त्री-कण्ठोत्थिताः स्वराः ।
काकली तु कले सूक्ष्मे, ध्वनौ तु मधुराऽस्फुटे ॥

1 An inarticulate, but pleasing tone.
2 low tone.

२ कलो, मन्द्रम् तु गम्भीरे, तारोऽत्युच्चैस्, त्रयस् त्रिषु ।
'नृणामुरसि मध्यस्थो द्वाविंशति-विधो ध्वनिः, ॥

1 A high tone.
1 Harmony.
3 A lute.

३ स मन्द्रः कण्ठ-मध्य-स्थस्, तारः शिरसि गीयते' ।
समन्वित-लयस् त्वेकतालो, वीणा तु वल्लकी ॥

1 A lute with seven strings.
1 Any stringed instrument.

४ विपञ्ची, सा तु तन्त्रीभिः सप्तभिः परिवादिनी ।
ततं वीणाऽऽदिकं वाद्यमानद्धं मुरजाऽऽदिकम् ॥

1 A Drum or tympan.

निषीदत्यस्मिन् रागो निषादः, निषदोपि । ऋषभो गोरुतसंवादित्वात्, यदाहुः—षड्जं मयूरा ब्रुवते गावस्त्वृषभभाषिणः । अजाविकं तु गान्धारं क्रौञ्चः क्वणति मध्यमम् ॥ पुष्पसाधारणे काले पिकः कूजति पञ्चमम् । धैवतं हेषते वाजी निषादं बृंहते गजः ॥ गां धयति [गां वाचं धारयति] इति गान्धारः । षड्भ्यो जातः षड्जः, यदाहुः—नासां कण्ठमुरस्तालु जिह्वां दन्तांश्च संस्पृशन् । षड्भ्यः संजायते यस्मात्तस्मात्षड्ज इति स्मृतः । धीवतामयं धैवतः । दारवी गात्रवीणा च द्वे वीणे स्वराधारौ, वंशमुरजादयोनुकरणमात्रेणेति नोक्ताः ॥ १ ॥ ध्वनावित्येव, मधुरेल्पे शब्दे काकली, ईषत्कलोस्याम् । कलति कलयतीति वा कलः । मन्दते मन्द्रः, मद्रोपि । ध्वनावित्येव, तारयति स्वनं स्थानेभ्यस्तारः, कलमन्द्र-तारा गुणिलिङ्गाः ॥ २ ॥ समन्वितोनुगतो लयो द्रुतादिर्यत्र, एकः समस्तालो मानमस्यैकतालः, अभिन्नकालमान इत्यर्थः । एकं तननमस्यैकतानो वा, एकतान-मनाकुलमिति दुर्गः । वेति जायते स्वरोस्यां वीणा । वलते (वल्लते) स्वरोस्यां वल्लकी, वलतिः (वल्लिः) सौत्रो वा हृद्यार्थः । विपञ्च्यते स्वरोस्यां विपञ्ची । घोषवती च । (परिवादिनी) परिवदत्यवश्यं सप्तस्वरत्वात् ॥ ३ ॥ तन्त्रीतननात्ततम् । आदि-शब्दात्सैरन्ध्रीरावणहस्तकिन्नर्यादि । आनह्यते स्म चर्मणानद्धम् । अवनद्धं च । आदिशब्दाद् दर्दुरकरटादि । सुषिच्छिद्रं विद्यतेस्य सुषिरम्, शुषिरमिति प्राच्याः । ऊषसुषीति ($\frac{६।३।३९}{९२८}$) रः । कांस्यमयस्तालो वादित्रम् । आदिशब्दाच्छम्यादि ।

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh

1 A wind instrument.
1 A cymbal bell.
2 A musical instrument.

५ वंशाऽऽदिकं तु सुषिरं, कांस्य-तालाऽऽदिकं घनम् ।
चतुर्विधमिदं वाद्यं वादित्राऽऽतोद्य-नामकम् ॥

2 Drums and tabours.
1 Three sorts of drums.
2 A double drum.
2 A kettle drum.

६ मृदङ्गा मुरजा, भेदास् त्वङ्क्याऽऽलिङ्ग्योर्ध्वकास् त्रयः ।
स्याद् यशःपटहो ढक्का, भेरी स्त्री दुन्दुभिः पुमान् ॥

2 A large kettle drum.
1 The quill, or bow.
2 The neck of a lute.
2 The belly below the neck.

७ आनकः पटहो ऽस्त्री स्यात्, कोणो वीणाऽऽदि-वादनम् ।
वीणादण्डः प्रवालः स्यात् ककुभस् तु प्रसेवकः ॥

1 The body of the lute. 1 the tie.
1 Other instrument.

८ कोलम्बकस् तु कायो ऽस्या, उपनाहो निबन्धनम् ।
वाद्य-प्रभेदा––डमरु-मड्डु-डिण्डिम-झर्झराः ॥

हन्यते घनं, मूर्तौघनः ($\frac{३।३।७७}{३२०-४}$) ॥ ४ ॥ वाद्यते (वाद्यं, वादित्रं), आतुद्यते च, यद्भरतः–ततश्चैवावनद्धं च घनं सुषिरमेव च । चतुर्विधं तु विज्ञेयमातोद्यं लक्षणान्वितम् (ना. शा. २८-१) ॥ मृद्यन्ते मृदङ्गाः, मृद्–अङ्गं वैषाम् । मुरात्संवेष्टनाज्जाता मुरजाः । भेदा एषां विशेषाः । अङ्कोस्यास्त्यङ्की [क्यः] उत्सङ्गस्थत्वात् । आलिङ्गोस्यास्त्यालिङ्गी [ग्यः] आलिङ्ग्य वादनात् । उर्ध्वी-कृत्यैकेन मुखेन वादनादूर्ध्वं कायति–ऊर्ध्वक आभोगिकाख्यः, आहुश्च–हरीतक्याकृतिस्त्वङ्क्यो यवमध्यस्तथोर्ध्वकः । आलिङ्ग्यश्चैव गोपुच्छो मध्यदक्षिणवामगाः ॥ नाट्ये चैतत् ॥ ५ ॥ यात्रादौ यशोर्थं पटहो हन्यते स यशःपटहः । ढगित्यव्यक्तं कायति ढक्का । बिभ्यत्यस्या रणे भेरी । भम्भापि । दुन्दुशब्देन भाति भाययति वा दुन्दुभिः । आ–अनित्यानकः । द्वौ द्वौ भिन्नार्थावाहुः । कुणत्यनेन कोणो वादनकाष्ठं ढक्काद्युपयोगी, कुण शब्दे । शततन्त्रीरप्यनेन वाद्यते, अत एव कोणो वादित्रवादनमित्याहुः ॥ ६ ॥ कुब्जवीणादण्डः प्रवालः, ज्वलादित्वाण्णः (ज्वलितिकसन्तेभ्योणः $\frac{३।१।१४०}{२९०२}$), यच्छाश्वतः–प्रवालो वल्लकीदण्डे विद्रुमे नवपल्लवे (१७७) । कङ्कते ककुभः, दण्डाधः शब्दगाम्भीर्यार्थं दारुमयं भाण्डं यद् भस्त्रयाच्छाद्यते । केवलम्बन्ते तन्त्र्योत्रेत्यपभ्रंशे कोलम्बकः कुलसंस्त्यान इत्यस्माद्वा–अम्बच् । येन चर्मणा उपनह्यते (उपनाहः), यत्र तन्त्र्यो निबध्यन्ते च (निबन्धनम्) ॥ ७ ॥ डमित्यव्यक्तं शब्दमियर्ति डमरुः । मड्डु कायति मड्डूच्चारणात्, मड्डूकं जलवाद्यमाहुः । डिण्डिमझर्झरौ शब्दानुकारात् । झर्झरः करटेत्येके । मर्द्यते मर्दलः, मर्दं लाति मर्दल इति तु कवयः । पणायत्यन्तस्तन्त्रीकः पणवः । अन्ये हुडुकागोमुखादयः । नृत्यति नर्तकी, शिल्पिनिष्वुन् ($\frac{३।१।१४५}{२९०७}$), नृतिखनिरजिभ्यः परिगणनं ($\frac{३।१।१४५}{२९०७}$) लसति संनमति

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh

2 A female dancer.
1 Slow, quick, and mean time.

९ मर्दलः पणवो ऽन्ये च, नर्तकी-लासिके समे ।
विलम्बितं द्रुतं मध्यं तत्वमोघो घनं क्रमात् ॥

1 Beating time.
1 Equal time in music and dance.
6 Dancing.

१० तालः काल-क्रिया-मानं, लयः साम्यमथाऽस्त्रियाम् ।
ताण्डवं नटनं नाट्यं लास्यं नृत्यं च नर्तने ॥

2 Symphony.
3 A male dancer in woman's apparel.

११ तौर्यत्रिकं नृत्य-गीत-वाद्यं नाट्यमिदं त्रयम् ।
भ्रकुंसश् च भ्रुकुंसश् च भ्रूकुंसश् चेति नर्तकः ॥

1 A courtesan.
1 A sister's husband.
1 A learned man.

१२ स्त्री-वेष-धारी पुरुषो, नाट्योक्तौ——गणिका ऽज्जुका ।
भगिनी-पतिरावुत्तो, भावो विद्वानथाऽऽवुकः ॥

1 A father.
2 A prince.
2 A king,
1 A princess.

१३ जनको, युव-राजस् तु कुमारो भर्तृदारकः ।
राजा भट्टारको देवस्, तत्-सुता भर्तृदारिका ॥

लासिका ॥ ८ ॥ विलम्बितादीनां लयानां तत्त्वाद्याः पर्याया इत्यभिधानकारः, नाट्ये तु विलम्बितानुसारेण क्रमात्तत्त्वाद्या वाद्यप्रकाराः । कालस्य क्रियया—आवापनिष्क्रमादिकया मानं परिच्छेदकं प्रतिष्ठाहेतुस्तालः—बद्धपुटादि (?), मे [गे] याया मा [गा] नक्रियायाः कालनियमहेतुरित्येके, यद् दन्तिलः—तत्र ज्ञेयाः कलापाताः पादभागा [पादमान] स्तथैव च । मात्रा च परिवर्तश्च वस्तु चैव विशेषतः (११०-११३) ॥. मा [गा] नमे [गे] ययोरन्यूनाधिक्ये श्लिष्टता लयो द्रुतादिः, वाद्यादीनामन्योन्यं समत्वमिति यावत् । तालविशेषस्तु लयोन्यः ॥ ९ ॥ [नाट्यशास्त्रे प्रत्येकं भेदोस्ति । तत्रोद्धतकरणाङ्गहारनिर्वर्त्यमारभटीवृत्तिप्रधानं गीतकानुसारित्वादादौ तण्डु (मुनि) ना प्रणीतं ताण्डवम् । ललिताङ्गहाराभिनयं कैशिकीवृत्तिप्रधानं वासकसज्जादिनायिकाचरितं डोचिलि [ल्लि] कादिनिबद्धं श्लिष्टत्वाल्लास्यम् । नृत्यं [त्तं] त्वङ्गविक्षेपमात्रं विवाहाभ्युदयादौ ।] नाट्यं तु सर्वरसं पञ्चसंधि चतुर्वृत्ति दशरूपकाश्रयं नटकर्म, तदाह—नृत्या [त्ता] दि त्रयं समुदितं—तूर्यस्येदं त्रिप्रमाणं तौर्यत्रिकं नाट्यं च । आभ्यामन्यल्लुठनमात्रम् ॥ १० ॥ भ्रुवःकुंसनं भासनमस्य, इकोह्रस्वोङ्ग्योगालवस्य ($\frac{६।३।६१}{९९९}$) इति ह्रस्वः, अभ्रुकुंसादीनां (वा० $\frac{३९६४}{९९९}$) इति च पक्षे—अत्वम् । एवं भ्रुकुट्यादि । गणयतीश्वरान्—ईश्वरो गणः पेटकोस्त्यस्या वा गणिका वारमुख्या । अज्जुका—असत्प्रकृतिप्रत्ययविभागा देशीयपदप्राया । नाट्योक्तौ नाट्यविद्यायां नान्यत्रेत्यधिकारः ॥ ११ ॥ भावयति भाव इत्यवगमान्नाट्यादन्यत्राप्येषां प्रयोगे न दोषः, यद्भरतः—मान्ये भावोपि वक्तव्यः किञ्चिदूनेषु मारिषः ॥ १२ ॥ (देवी) श्रीमहादेव्यां वासवदत्तादौ । अकृताभिषेकराज्ञीमध्यादेकैका भट्टिनी पद्मावत्यादिः ॥ १३ ॥

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

1 A queen.
1 Any wife of a king.
1 Sacred.
1 king's brother in-law.

१४ देवी कृताऽभिषेकायामितरासु तु भट्टिनी ।
अ-ब्रह्मण्यम-वध्योक्तौ, राजश्यालस् तु राष्ट्रियः ॥

1 A mother.
2 A young girl.
1 venerable person.
1 An eldest sister.

१५ अम्बा माता, ऽथ बाला स्याद् वासूरार्यस् तु मारिषः ।
आत्तिका भगिनी ज्येष्ठा, निष्ठा-निर्वहणे समे ॥

2 The catastrophe.

1 Appropriate vocatives, for female servants.
2 Gesture.
2 Indication of passion.

१६ हण्डे हञ्जे हलाऽऽह्वाने नीचां चेटीं सखीं प्रति ।
अङ्गहारो ऽङ्गविक्षेपो, व्यञ्जकाऽभिनयौ समौ ॥

2 two sorts of tokens.

१७ निर्वृत्ते त्वङ्ग-सत्त्वाभ्यां द्वे त्रिष्वाङ्गिक-सात्त्विके ।
शृङ्गार-वीर-करुणाऽद्भुत-हास्य-भयानकाः ॥

1 Taste, or sentiment.
3 Love.
2 Heroism.

१८ बीभत्स-रौद्रौ च रसाः, शृङ्गारः शुचिरुज्ज्वलः ।
उत्साहवर्धनो वीरः, कारुण्यं करुणा घृणा ॥

3 Pity.

वधानर्हस्य ब्राह्मणस्य पूत्करणे, न ब्रह्मणि साधु (अब्रह्मण्यं), साध्वर्थेयत् (तत्रसाधुः)। नाट्यादन्यत्र राष्ट्राधिकृतो राष्ट्रियः, राष्ट्रावारपारेतिघः (४।२।९३ / १३१३) । अम्ब्यते शब्द्यते बालैः, लोकेप्यम्बा ह्रस्वविधेः (अम्बार्थनद्योर्ह्रस्वः ७।३।१०७ / २६७)। वास्यते प्रीत्या वासूः । आरात्पापकेभ्यः कर्मभ्यो जात आर्योरणीयोभिगम्यो वा । मर्षणात्सहनान्मारिषः । मार्षोपि यथा परिपत्पर्षत् ॥ १४ ॥ अत्ता मातेवात्तिका । नियतं स्थानं निष्ठा । निःशेषेण वहनं समाप्तिर्निर्वहणम् । मुखप्रतिमुखगर्भावमर्षनिर्वहणाख्या हि पञ्च संधयः । नाट्योक्तौ नीचां प्रति हण्डे आह्वानं, चेटीं प्रति हञ्जे, सखीं प्रति हला ॥ १५ ॥ अङ्गस्य स्थानात्स्थानान्तरानयनमङ्गहारः स्थिरहस्तादिर्द्वात्रिंशद्वा । व्यनक्ति व्यञ्जकः । आभिमुख्यं नीयतेर्थोनेनाभिनयः, वाचिकाङ्गिकाहार्यसात्त्विकाख्यो भावसूचकः । अङ्गेन यन्निर्वृत्तं तत् (आङ्गिकं), तत्र भवत्येवेति–अध्यात्मादित्वात् (वा० २८६९ / १४३७) ठञ्, निर्वृत्तेक्षद्यूतादिभ्यः (४।४।१९ / १५६९) इति योगविभागाट्ठग्वा । सत्त्वं मनो गुणो वा तेन निर्वृत्तः सात्त्विकः, यदाह–सत्त्वोत्कटे मनसि ये प्रभवन्ति भावास्ते सात्त्विका इति, समाहितमनस्कवाद्वानुकर्तुर्जायन्ते ॥ १६ ॥ रत्यादयो भावा अनुक्रियमाणाः सामाजिकैः–रस्यन्त इति रसाः, यदाहुः—विभावैरनुभावैश्च युक्तोथ व्यभिचारिभिः । आस्वाद्यत्वात्प्रधानत्वास्थाय्येव तु रसीभवेत् ॥ वत्सलः पुत्रादिस्नेहात्मा रतिभेद एव । शान्तस्त्वलौकिकत्वान्नोक्तः, चशब्दात्संगृहीतो वा । शृङ्गमुत्तमत्वमियर्ति शृङ्गारः । उत्तमयुवप्रकृतित्वेन जुगुप्सादिरहितत्वाच्छुचिः (शुद्धः)। उज्ज्वलो वेषेणौचित्येन च । लक्षणमेतन्न त्वेतौ शृङ्गारपर्यायौ ॥ १७ ॥ उत्साहो हि वीररसस्य स्थायी भावः, एवं स्थायी भावः स्फीततयैवास्वाद्यत इति सर्वरसलक्षणं कटाक्षितम् । शोकस्थायिप्रभवः करुणो रसो धर्मद्वारेणोक्तः । [घृण्यतेनया] घृणा ।

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

7 Tender-ness. १९ कृपा दया ऽनुकम्पा स्यादनुक्रोशोऽप्यथो हसः ।
3 Laughter. 2 Disgust. हासो हास्यं च, बीभत्सं विकृतं त्रिष्विदं द्वयम् ॥
4 Surprise or wonderful. २० विस्मयो ऽद्भुतमाश्चर्यं चित्रमप्यथ भैरवम् ।
9 Horror or terrific. दारुणं भीषणं भीष्मं घोरं भीमं भयानकम् ॥
2 Wrath, or angry. २१ भयङ्करं प्रतिभयं, रौद्रं तूग्रममी त्रिषु ।
6 Fear, or terror. चतुर्दश, दरस् त्रासो भीतिर् भीः साध्वसं भयम् ॥

दयन्तेनया दया, दय रक्षणे, भिदाद्यङ (षिद्भिदादिभ्योङ् $\frac{३।३।१०४}{३२८१}$) । कृपेः कृपा, भिदादित्वादङ् (सू० $\frac{३।३।१०४}{३२८१}$) । अनुक्रोशन्ति समदुःखा भवन्त्यनेनानुक्रोशः ॥ १८ ॥ स्थाय्येव तु रसीभवेदिति भावरसयोः पर्यायत्वेन ध्वनति । (हसः, हासः) स्वनहसोर्वेत्यप् ($\frac{३।३।६२}{३२३९}$) । हसनीयं हासे साधु वा हास्यम् । बधेर्निन्दायां सन्, बीभत्सास्य बीभत्सः, अ प्रत्ययात् (सू० $\frac{३।३।१०२}{३२७९}$), अर्श आदिभ्योच् ($\frac{५।२।१२७}{१९३३}$) । जुगुप्साप्रभवत्वाद्विकृतः, यदाह-विष्ठाकृमिज उद्वेगी क्षोभणो रुधिरादिभिः । बीभत्सो द्विविध इति, रसे तु पुमान्-तद्वति त्रिलिङ्गः । (बीभत्सं, विकृतं) द्वयमित्यनयोः पर्यायतामाह । प्राग्वद्भावसयोः पर्यायत्वम्, अद्भुतस्य विस्मयस्थायिभावात्मकत्वात्, विपूर्वः स्मिङ् अद्भुतार्थः । अत्-आश्चर्यार्थेव्ययम्, तस्य भवनमद्भुतम्, अदिभवोडुतच् (उ० ६७९) । आचरणीयं, आश्चर्यमनित्ये ($\frac{६।१।१४७}{१०६१}$) । इति साधुः । चित्र कदाचिद्दर्शने, अच् ॥ १९ ॥ भीरोरयं त्रासनकृद् भैरवः ॥ दारयति चित्तं दारुणः । भीषयते भीषणः । बिभ्यत्यस्माद् भीष्मः । (भीमः) भीमादयोपादाने ($\frac{३।४।७४}{३१७३}$) । (घोरः) घुर भीमार्थे । बिभ्यत्यस्माद्भयानकः, आनकः शीङ्भियः (उ० ६६९) । भयं करोति भयंकरः मेघर्तिभयेषुकृजः ($\frac{३।२।४३}{२०६०}$) खच् । प्रतिगतं भयेन प्रतिभयम्, कुगतिप्रादयः ($\frac{२।२।१८}{७६१}$) इति समासः । रुद्रस्यायं रौद्रः क्रोधात्मा । अमी अद्भुताद्या उग्रान्ता रसेषु पुंलिङ्गास्तद्वति त्रिलिङ्गाः । रौद्रादिकं तु रसे नपुंसकमिति नारायणः । ॥ २० ॥ रत्नानुक्त्वोच्चावचभावानाह दरेति । दीर्यन्तेस्माद्दरः, लिङ्गभेदेर्थभेदाद् द्विलिङ्गः, दरी गुहा । साधूनस्यति साध्वसम् । भयं भीः, संपदादिभ्यःक्विप् ($\frac{२२३३}{३२७२}$) । भीतिर्भयं, अज्विधौ-भयादीनामुपसंख्यानं नपुंसकेक्तादिनिवृत्त्यर्थम् ($\frac{२१९७।८}{३२५१}$) । चेतसा भाव्यते सुखादिः स्वकारणाद्भवति वा चित्तवृत्तिविशेषो भावः, भावयति करोति रसान्वा, यद्भरतः-नानाभिनयसंबद्धान्भावयन्ति रसानिमान् । यस्मात्तस्मादमी भावा विज्ञेया नाट्ययोक्तृभिः (ना. शा. ७-३) ॥ ते च-रतिर्हासश्च शोकश्च क्रोधोत्साहौ भयं तथा । जुगुप्सापिस्मयशमाः स्थायिभावा रसोद्भवाः ॥ भावं योनुभावयति मुखरागादिः, यदुक्तं-अनुभावस्त्वभिनयः पश्चादर्थप्रकाशनम् ॥ २१ ॥

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

1 Sentiment or passion.
1 Indication of it.
5 Pride.

२२ विकारो मानसो भावो, ऽनुभावो भाव-बोधकः ।
गर्वो ऽभिमानो ऽहङ्कारो मानश् चित्तसमुन्नतिः ॥

6 Arrogance.
9 Disrespect.

२३ 'दर्पो ऽवलोको ऽवष्टम्भश् चित्तोद्रेकः स्मयो मदः' ।
अनादरः परिभवः परीभावस् तिरस्क्रिया ॥

२४ रीढा ऽवमानना ऽवज्ञा ऽवहेलनमसूक्षणम् ।
5 Modesty or shame.
1 Bashfulness.
मन्दाक्षं ह्रीस् त्रपा व्रीडा लज्जा, सा ऽपत्रपा ऽन्यतः ॥

2 Patience, forbearance.
1 Coveting another' property.

२५ क्षान्तिस् तितिक्षा, ऽभिध्या तु परस्य विषये स्पृहा ।
अक्षान्तिरीर्ष्या, ऽसूया तु दोषाऽऽरोपो गुणेष्वपि ॥
1 Detraction. 2 Envy.

व्यभिचार्यादीनाह । मत्समो नास्तीति मननं मानः । ममताहंता दर्पोवलेपोपि । (परिभव इत्यादि) परौभुवोवज्ञाने (३।३।५५ / २२३०) इति वा घञ् । (तिरस्क्रिया) तिरोन्तर्धौ (१।४।७१ / ७७२) गतिः, परिभवेन्तर्ध्युपचारात्, अतः–तिरसःगताविति (चान्द्रसू०) सत्वम् ॥ २२ ॥ रिह कत्थनादौ, रेहणं रीढा, क्तः, होढः (८।२।३१ / २२४) ढ्लोपेपूर्वस्यदीर्घोणः (६।३।१११ / १७४) । अवहेलनमवहेलं, हेडृ अनादरे, डलयोरैक्यम् । अवहेलापि । न सुष्ठु–उक्षणमसूक्षणमिति लक्षणयावज्ञा गम्यते, यत्कौटिल्यः– (५–६–९३) अयमुच्चैः सिञ्चतीति दीर्घश्चारायणः प्राव्राजीत् । असूर्क्षणमित्येके, सूर्क्ष्यतेः–यस्यहलः (६।४।४९ / २६३१) इति यलोपात् । निकारोभिभवः परभवो न्यक्कारश्च । मन्दमक्षि यत्र तन्मन्दाक्षम् । व्रीडावनम्रवक्त्रेन्दुरिति स्वोत्थलज्जावशाद्विव क्षुरवनमति मुखमिति मन्दास्यमित्येके । (व्रीडा) व्रीडादमुं देवमुदीक्ष्येति पुंस्यपि । सा लज्जा परस्माल्लज्जावहे जा(य)तेपत्रपा ॥ २३ ॥ (क्षान्तिः) बाहुलकात्क्तिन् । (तितिक्षा) गुप्तिज्किद्भ्यः–(३।१।०५ / २३९३), निन्दाक्षमाव्याधिप्रतीकारेष्विति (वा० १) सन् । क्षमा मर्षः सहनं च । अभिचारेण ध्यानमभिध्या, परस्वविषय-स्पृहेत्येके, दोषचिन्तापूर्वं परस्वे लिप्सेत्यर्थः, यत्कात्यः–विषयप्रार्थनाभिध्या । भार्यादेः परदर्शनासहने रूढाऽक्षान्तिरीर्ष्या, अयं तु परोत्कर्षासहनं मात्सर्यमीर्ष्या मन्यते य ईर्ष्युः परवित्तेष्विवतिवत् । (असूया) असूञ् कण्ड्वादिः ॥ २४ ॥ वीरस्य कर्म वैरं, द्वन्द्वाद्वुन्वैरमैथुनिकयोः (४।३।१२५ / १५०७५) इति लिङ्गादण् । इत्थमीर्ष्या-सूयाद्वेषाणां भेदाद्–द्वेषो ना स्यादसूयेर्ष्येति मालाकारो भ्रान्तः । मन्यते मन्युर्दैन्यमिह, यच्छाश्वतः–निगदन्ति क्रुधं मन्युं मन्युरध्वरदैन्ययोः (३७६) शोचनं शुक् (विप्रतीसारः) उपसर्गस्यघञ्यमनुष्येबहुलं (६।३।१२२ / १०४४) इति दीर्घः, पक्षे

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

3 Enmity
3 Grief or sorrow.
3 Repentance.

२६ वैरं विरोधो विद्वेषो, मन्यु-शोकौ तु शुक् स्त्रियाम् ।
पश्चात्तापो ऽनुतापश् च विप्रतीसार इत्यपि ॥

7 Wrath, or rage.
1 Good conduct.
2 Madness.

२७ कोप-क्रोधाऽमर्ष-रोष-प्रतिघा रुट्-क्रुधौ स्त्रियौ ।
शुचौ तु चरिते शीलमुन्मादश् चित्तविभ्रमः ।

5 Affection or kindness.
1 Desire or longing.
11 Wish or desire.

२८ प्रेमा ना प्रियता हार्दं प्रेम स्नेहो, ऽथ दोहदम् ।
इच्छा काङ्क्षा स्पृहेहा तृड् वाञ्छा लिप्सा मनोरथः ॥

1 Virtuous reflexion.
1 Ardent desire.
1 Anxiety.

२९ कामोऽभिलाषस् तर्षश् च, सोऽत्यर्थं लालसा द्वयोः ।
उपाधिर् ना धर्मचिन्ता, पुंस्याधिर् मानसी व्यथा ॥

3 Recollection.
2 Missing.
2 Perseverance.
1 Fortitude.

३० स्याच् चिंता स्मृतिराध्यानमुत्कण्ठोत्कलिके समे ।
उत्साहोऽध्यवसायःस्यात्, स वीर्यमति-शक्ति-भाक् ॥

9 Deceit, or fraud.
2 Inadvertency or mistake.

३१ कपटो ऽस्त्री व्याज-दम्भोपधयश् छद्म-कैतवे ।
कुसृतिर् निकृतिः शाठ्यं, प्रमादो ऽनवधानता ॥

विप्रतिसारः । अनुशयो वक्ष्यते ॥ २५ ॥ प्रतिहन्यतेनेन प्रतिघः, करणेहनः ($\frac{३।४।३७}{३३५.८}$) परीघः ($\frac{३।३।८४}{३२६१}$) इति बाहुलकाद् घत्वं च । शुचौ शुद्धे, तृतीयादिषुभाषितपुंस्कात् ($\frac{७।१।७४}{३२१}$) वात्र पुम् । (शीलं) शील समाधाने । चर्यतेनेन चरितम् । चरित्रं च । (उन्मादः) चित्तानवस्थितिर्भूताद्यावेशात् ॥ २६ ॥ प्रियस्य भावः प्रेमा, प्रियस्थिरेति ($\frac{६।४।१५७}{२०१६}$) प्रादेशः । हृदयस्य कर्म हार्दम्, युवादित्वादण् (हायनान्तयुवादिभ्योण् $\frac{५।१।१३०}{१७१.५}$), हृदयस्यहृल्लेखयदण्लासेषु ($\frac{६।३।५०}{१८८८}$) । प्रीतिः प्रेम, प्रीञो मनिन् (अन्येभ्योपि दृश्यन्ते) । दोहमाकर्षणं ददाति दोहदम् । मन एव रथो दूरगामि यत्र मनोरथः । मनोगत्वी च ॥ २७ ॥ सातिशयेनेच्छा भृशं लसनं लालसा, लल इप्सायां वा । उप समीपे–आधिरस्य, उपपन्न आधिर्वा–उपाधिः । आधीयते चिन्तानेनेत्याधिः ॥ २८ ॥ (आध्यानं) ध्यै चिन्तायाम् । चिन्ति(त्ति)श्च । स्त्रीत्वेनापि साम्यं (उत्कण्ठोत्कलिकयोः), आध्यानमिह संबध्नन्ति, यत्काशिका–आध्यानमुत्कण्ठापूर्वकस्मरणम् । उद्यमोद्योगौ च (अध्यवसायार्थौ) । उत्साहः सातिशयो वीर्यं, वीरस्य कर्म, वीरवीर्यौच ($\frac{६।२।१२०}{३८५.४}$) इति गण–(सूत्र–) पाठात्साधुः ॥ २९ ॥ के मूर्ध्नि एट इवाच्छादकः कपटः । उपधीयते स्फटिकस्येव सिन्दूरमुपधिः । छाद्यतेनेन रूपं छद्म, इस्मन्त्रन्क्विपुचेति ($\frac{४।१।९७}{३०८५.}$) ह्रस्वः । कितवस्य कर्म कैतवम् । कुत्सिता सृतिर्हिंसार्थं कुसृतिः, पूर्वत्र तु वञ्चना फलम् । निकृष्टा कृतिर्निकृतिः । शठस्य कर्म शाठ्यम् । अनवहितत्वं लार्येवलेपः ॥ ३० ॥ कुर्भूमिस्तुद्यतेनेन कुत्सितं तन्यते वा (कुतुकं),

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

4 Eagerness.
1 Dalliance or blandishment.
6 Sport or amusement.

३२ कौतूहलं कौतुकं च कुतुकं च कुतूहलम् ।
स्त्रीणां विलास-विव्वोक-विभ्रमा ललितं तथा ॥

३३ हेला लीलेत्यमी हावाः क्रियाः शृङ्गार-भाव-जाः ।
द्रव-केलि-परीहासाः क्रीडा लीला च नर्म च ॥

3 Disguise.
3 A play or game.
3 Sweat.
2 Fainting.

३४ व्याजोऽपदेशो लक्ष्यं च, क्रीडा खेला च कूर्दनम् ।
घर्मो निदाघः स्वेदः स्यात्, प्रलयो नष्टचेष्टता ॥

प्रज्ञादित्वात् (५।४।३८ / २१०६) स्वार्थे वाण्, तुलोकिको वा ॥ ३१ ॥ शृङ्गारभावेभ्यो रत्यादिभ्यो मनोविकारेभ्यो जाताः क्रियाश्चेष्टा अलंकाराख्या लीलादयः (हावाः), ह्वयन्त्यनेनेति हावः, यदाह—स्याद् भावसूचको हावो हेलास्यैवानुभावनम् । हिल हावकरणे, हेल अनादरे वा । इतिशब्दात्प्रकारार्थात्किल किञ्चितादयोपि । अत्र भरतः—अलंकाराश्च नाट्यज्ञैर्ज्ञेया भावा रसाश्रयाः । यौवनेभ्यधिकाः स्त्रीणां विकारा वक्त्रगात्रजाः (ना. शा. २४-४) । देहात्मकं भवेत्सत्त्वं सत्त्वाद्भाव समुत्थितः । भावात्समुत्थितो हावो हावाद्धेला समुत्थिता (ना. शा. २४-७) ॥ तथा—हावः शृङ्गारभावाद्यो रम्योक्तिस्मितवीक्षितम् । शृङ्गारप्रौढिमा हेला हेवाको यौवने हि यः ॥ किं च—लीला विलासो विच्छित्तिर्विभ्रमः किलकिञ्चितम् । मोट्टायितं कुट्टमितं विव्वोको ललितं तथा । विहृतं चेति मन्तव्या दश स्त्रीणां स्वभावजाः (ना. शा. २४-११-१३) ॥ प्रियस्यानुकृतिर्लीला श्लिष्टा वाग्वेष-चेष्टितैः, लीङ् श्लेषणे । विलासोऽङ्गे विशेषो यः प्रियाप्तावासनादिषु, लस श्लेषणे । मण्डनानादरन्यासो विच्छित्ती रूपदर्पतः, विश्लिष्टा छित्तिर्भङ्गिरित्यर्थः । चित्तवृत्त्य-नवस्थानं शृङ्गाराद्विभ्रमो मतः । हर्षाद्रुदितगीतादिव्यामिश्रं किल[लि]किञ्चितं, अलीकं किञ्चितमित्यर्थः, किलीति कण्ठकूजितं वा, यथा किलिकिलारावः । मोट्टायितं प्रियं स्मृत्वा साङ्गभङ्गविजृम्भणम्, मुट्ट प्रमर्दने । दुःखोपचारः सौख्येपि हर्षात्कुट्टि-मितं मतम्, कुट्ट च्छेदनादौ, तेन मितं, इत्वं लक्ष्यात् । विव्वोकोभिमतप्राप्तावपि गर्वादनादरः, विवु क्षेपे, विपूर्वस्य वुक्कतेर्वापभ्रंशो विव्वोकः । अनाचार्योपदिष्टं स्याल्ललितं रतिचेष्टितम् । वक्तव्याभाषणं व्याजाद्विहृतं दर्शितेङ्गितम्, अवसरागतं वचनं व्याजादिना हृतं विहृतम् ॥ ३२ ॥ द्रवति हृदयमनेन द्रवः । किलन्त्यनेन केलिः, किल क्रीडायां, केल चलने वा । नृणाति नर्म ! वर्करोपि । व्यज्यत इति व्याजोत्र स्वरूपाच्छादनं, यथा—ध्यानव्याजमुपेत्य चिन्तयसि काम् (नागा० १—१) । अपदिश्यतेपदेशः, अतद्रूपस्य तद्रूप्यं क्रीडार्थं वञ्चनेयम् । स इव लक्ष्यते लक्ष्यम् । निभच्छलच्छद्मादयोप्युपचारात् । एते केलिपरिष्वक्किते रूढाः, क्रीडया खेलनं, लुक्का (वालुका ?)मणिकादीत्येके । (कूर्दनं) कुर्दनमित्येके, कुर्द क्रीडायां, उपधायांच (८।२।७८ / २२६५) इति दीर्घाभावश्चिन्त्यः ॥ ३३ ॥ जिघर्त्यनेनाङ्गं घर्मः । निदह्यतेनेन

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

2 Dissimulation. ३५ अवहित्थाऽऽकारगुप्तिः, समौ संवेगसंभ्रमौ ।
2 Hurry.
I A horse-laugh. स्यादाच्छुरितकं हासः सोत्प्रासः, स मनाक् स्मितम् ॥
1 A smile.

1 A laugh. ३६ मध्यमः स्याद् विहसितं, रोमाञ्चो रोमहर्षणम् ।
1 Horripilation.
3 Weeping. क्रन्दितं रुदितं क्रुष्टं, जृम्भस् तु त्रिषु जृम्भणम् ॥
1 Gaping.

2 Disappointing. ३७ विप्रलम्भो विसंवादो, रिङ्गणं स्खलनं समे ।
2 Creeding or tumbling.
5 Sleep. स्यान् निद्रा शयनं स्वापः स्वप्नः संवेश इत्यपि ॥

2 Lassitude. ३८ तन्द्री प्रमीला, भ्रकुटिर् भ्रुकुटिर् भ्रूकुटिः स्त्रियाम् ।
3 A frown.
1 A look of displeasure. अदृष्टिः स्याद-सौम्ये ऽक्षिण, संसिद्धि-प्रकृती त्विमे ॥

5 The naturai state. ३९ स्वरूपं च स्वभावश् च निसर्गश् चाऽथ वेपथुः ।
2 A tremour.
5 A festival. कम्पो, ऽथ क्षण उद्धर्षो मह उद्धव उत्सवः ॥

इति नाट्य-वर्गः ६, अत्र मूलश्लोकाः ३९, क्षे० १$\frac{1}{2}$

निदाघः, न्यङ्क्वादिः ($\frac{७।२।५३}{२८६४}$)। प्रलीयते क्रियात्र प्रलयः सात्त्विको भावः, मूर्च्छेत्यर्थः, यदाहुः-स्तम्भे विचेतनत्वं प्रलये गतचेतनत्वमत एव । सहसैव निपतनं भुवि भवति महाभूतशैथिल्यात् ॥ (अवहित्था) अङ्गवैकृतस्य रोमाञ्चादेश्छादनाद्-बहिःस्थितत्वम्, अवहित्थमित्येके । (संवेगः) भयादिना कर्मस्वावेगः ॥ ३४ ॥ उत्प्रास्यते सामर्षोन्यः क्रियतेनेन, सोपहास इत्यर्थः । आच्छुरणं परच्छेदनम्, अवच्छुरितमिति कात्यः । स हास ईषत्स्मिताख्यः । रोम्णामञ्चनं रोमाञ्चः । रोमाणि हृष्यन्त्यनेन रोमहर्षणम् । पुलको रोमविक्रियापि ॥ ३५ ॥ (क्रन्दितं) भावे क्तः (नपुंसके भावे क्तः $\frac{३।३।११४}{३७९०}$)। (जृम्भः) मुखादिविकासः, घञि पुमान्, अप्रत्यये ($\frac{३।३।१०२}{२२७९}$) स्त्री, क्लीबत्वं त्वज्विधौ भयादिष्वदर्शनान्नेष्टम् । अङ्गीकृतासंपादनं (विसंवादः)। स्वधर्मादेः स्खलनं (रिङ्गणं), रिखिलौ-किकः, रिङ्गणमित्येके ॥ ३६ ॥ नियतं द्रात्येतस्यां निद्रा । संविशन्ती-न्द्रियाण्यत्र संवेशः । स्वपनं स्वप्नः, स्वपोनन् ($\frac{३।३।९१}{३६९}$)। इन्द्रियाणां तनन द्रात्यस्यां तन्द्री, निद्रा तन्द्रेत्याबन्तोपि । प्रमीलन्तीन्द्रियाण्यस्यां प्रमीला । भ्रकौटिल्ये भ्रकुंसवत्त्रैरूप्यम् । अन्ये त्वदृष्टिरित्येतेन संबध्नन्ति, यदाहुः-भ्रकुटिर्दंगसौम्या स्यात् ॥ ३७ ॥ सोमदेवताकत्वेन लक्षणयाधिकृतं सौम्यं, सोमाट्यण् ($\frac{४।२।३०}{१२३२}$) शाखादित्वात् ($\frac{५।३।१०३}{२७५८}$) सोम्य इत्याहुः । असौम्ये विरुद्धे दर्शन इत्यर्थः । इमे द्वे स्त्रियौ स्वरूपादेः पर्यायौ ॥ ३८ ॥ (वेपथुः) ट्वितोथुच् ($\frac{३।३।८९}{३२६७}$) क्षणुते दुःखं क्षणः । महः-अकारान्तः, सान्तस्तु तेजोर्थः क्लीबे । उध्दुनाति दुःख-

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

अथ पातालभोगि-वर्गः ७

5 the infernal region.
11 A hole or vacuity.
2 A hole in the ground.
1 Perforated, or full of holes.

१ अधोभुवन-पातालं बलिसद्म रसातलम् ।
नागलोको, ऽथ कुहरं सुषिरं विवरं बिलम् ॥

5 Darkness.
1 Universal darkness. 1 Imperfect darkness.

२ छिद्रं निर्व्यथनं रोकं रन्ध्रं श्वभ्रं वपा सुषिः ।
गर्ताऽवटौ भुवि श्वभ्रे, स-रन्ध्रे सुषिरं त्रिषु ॥

2 The Na'gas.
2 Their chief.
2 Vasuki.
2 Sort of snake.

३ अन्धकारो ऽस्त्रियां ध्वान्तं तमिस्रं तिमिरं तमः ।
ध्वान्ते गाढे ऽन्धतमसं, क्षीणे ऽवतमसं, तमः ॥

४ विष्वक् संतमसं, नागाः काद्रवेयास्, तदीश्वरे ।
शेषो ऽनन्तो, वासुकिस् तु सर्पराजो, ऽथ गोनसे ॥

मुद्भवः । उत्सूते सुखमुत्सवः । उद्धर्षणमुल्लसनं नैश्चित्यं निर्वृत्तिः । प्रयोगार्थं संगीतकं गुणनिका । प्राङ् नाट्यात्पूर्वरङ्गः स्यात् । नाट्यार्थोपक्षेपः पूर्वं प्रस्तावना मुखं च स्यात् ॥ ३९ ॥ इति नाट्यवर्गः । ६ ।

पतन्त्यस्मिन् पातालम् । रसायास्तलमधः, रसा भूस्तलं पृष्ठं वास्य । कुत्सितं कृत्वा हरति विस्मापकं वा कुहरम् । सुषिर्धर्ममात्रेपि मधुवत्, ऊपसुपीतिरः ($\frac{५।२।१०७}{१९१४}$) शाश्वतस्तु (१८५) निरस्तावयवौ सुषिरसुषी मन्यते, गर्ते गर्तान्विते वाद्यविशेषे सुषिरं त्रिषु । विव्रियते विवरम् । बिलति बिलं, बिल भेदने ॥ १ ॥ छिद्यते छिद्रम् । निर्व्यथतेनेन निर्व्यथनम् । रोचते प्रकाशतेनेन रौति वा रोकम् । रणति रन्ध्रम् । श्वभिर्भाति [भ्रान्तं] श्वभ्रम् । उप्यतेस्यां वपा, पिद्भिदादित्वादङ् ($\frac{३।३।१०४}{३२८१}$) । सुष्ठु स्यति सुषिः । गिरति गर्तः, गर्तापि । अवन्त्यस्मादवटः । सिद्ध-स्यानुवादाच्छ्वभ्रं भूरन्ध्रमेव, यत्कात्यः–श्वभ्रगर्तावटागाधाः भुवो विवरवाचकाः ॥ ॥२॥ अन्धं करोत्यन्धकारः । क्षुब्धस्वान्वेति ($\frac{७।२।१८}{३०५८}$) ध्वान्तं साधुः । तमोस्या स्तीति तमिस्रं, ज्योत्स्नातमिस्रेति ($\frac{५।२।११४}{१९२१}$) साधुः, स्त्रीत्वमतन्त्रम् । तिम्यतीव तिमिरम् । ताम्यन्त्यनेन तमः अन्धकारम् असुन् । (स. कं. २।१।३२०) भूमिच्छायं च । अन्धयत्यन्धं च तत्तमश्चान्धतमसम्, अवसमन्धेभ्यस्तमसः ($\frac{५।४।७९}{९४७}$) इत्यच् । क्षीणे ध्वान्तेवहीनं च तत्तमश्चावतमसम् ॥३॥ (संतमसम्) समन्तात्तमः । न–अगा नागाः, नभ्राडिति ($\frac{६।३।७५}{७७९}$) नञ् प्रकृत्या । कद्रा अपत्यानि काद्रवेयाः, शुभ्रादित्वात् ($\frac{४।१।१२३}{११२६}$) ढक्, न तु–स्त्रीभ्यो ढक् ($\frac{४।१।१२०}{११२३}$) कद्रुकमण्डल्वोश्छन्दसि यूङ्विधेः ($\frac{४।१।७१}{३४४९}$), सर्पेभ्योन्ये देवयोनयोमी। (शेषः) शेते हरिरस्मिन् शिष्यते वा । वसुकस्यापत्यं वासुकिः । गोरिव नासिकास्य, अज्नासिकायाः

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

3 A Boa, or large serpent.
2 A water snake.
2 Amphisbæna.
2 A variegated. serpent.
2 A snake, that has cast his slough.
33 A snake or serpent.

५ तिलित्सः स्यादजगरे शयुर् वाहस इत्युभौ ।
अलगर्दो जलव्यालः समौ राजिल-डुण्डुभौ ॥

६ मालुधानो मातुलाहिर्, निर्मुक्तो मुक्तकञ्चुकः ।
सर्पः पृदाकुर् भुजगो भुजङ्गो ऽहिर् भुजङ्गमः ॥

७ आशीविषो विषधरश् चक्री व्यालः सरीसृपः ।
कुण्डली गूढपाच् चक्षुःश्रवाः काकोदरः फणी ॥

८ दर्वीकरो दीर्घपृष्ठो दन्दशूको बिलेशयः ।
उरगः पन्नगो भोगी जिह्मगः पवनाशनः ॥

संज्ञायांनसंचास्थूलात्, (५।४।११८) गोनासाय नियोजितागदरजाः (विद्धशाल० १-३) इति गोनासोपि ॥ ४ ॥ (तिलित्सः) तिल गतौ। चरीन्द्रोपि। अजां गिरत्यजगरः, अजो नित्यो गरोस्य वा। शेतेत्यर्थं शयुः। वाहं गतिं स्यति वाहसः—अचलः। चक्रमण्डली च। न लगन्नर्दयति निर्विषत्वात्, अलीव गर्दत्यलिगर्द इत्येके। राजिं देहे लाति राजिलः। डुण्डति डुण्डुभः, डुडि हुडि निमज्जने, डुण्डु [डु] भाषते डुण्डुभ इत्येके, निर्विषो द्विमुखोहिः, लक्ष्यं च—किं महोरगविसर्पिविक्रमो राजिलेषु गरुडः प्रवर्तते (रघु० ११, २७) ॥ ५ ॥ मालुर्मातुलाख्यौषधिस्तत्र धानमस्य मालुधानः। सर्पभेदा एते। (मुक्तकञ्चुकः) सर्प इति शेषः। सर्पति सर्पः। प्रियते ह्यायच्छति पृदाकुः। भुजेन कौटिल्येन गच्छति, गमेः सुपि (२००९) खच्चडिद्वा (वा० २०११) गमश्च (३।२।४७) इति डः खच्च, एवं त्रैरूप्यम्। अंहत्यहिः ॥ ६ ॥ आश्यां विषमस्य, आशीस्तालुगता दंष्ट्रा तया विद्धो न जीवति, पृषोदरादित्वात् (६।३।१०९) रेफलोपे आशीशब्दोयमिति सभ्याः। चक्रे मण्डलाकारतास्यास्ति चक्री। व्याडनं हन्तुमुद्यमोस्यास्ति व्यालः, अड उद्यमे। कुटिलं सर्पति सरीसृपः, नित्यंकौटिल्ये गतौ (३।१।२३) इति यङ्, यङोचिचेति लुक्, (२।४।७४) पचाद्यच्, नन्दिग्रहिपचादीति, रीङ्ऋतः (७।४।२७), गूढाःपादा अस्य गूढपात्। (३।१।१३४) चक्षुषी श्रवसी अस्य चक्षुःश्रवाः, अत एव गोकर्णः। काकस्येवोदरमस्य काकोदरः, काकोलं विषमुदरेस्य वा ॥७॥ दर्वीरूपः फण एव करोस्य प्रहारादौ दर्वीकरः। गर्हितं दशति दन्दशूकः, लुपसदचरति (३।१।२४) यङ्, यजजपदशांयङः (३।२।१६६) इत्यूकः, जपजभदहेति (७।४।८६) अनुस्वारः। बिले शेते बिलेशयः, शयवासवासिष्वकालात् (६।३।१८) इति सप्तम्या अलुक्। उरसा गच्छत्युरगः, उरसोलोपश्च (वा० २०१५) इति डः। पद्भ्यां न गच्छति (पन्नगः), नभ्राण्नपाद्- (६।३।७५) इत्यस्योपलक्षणत्वान्नञ् प्रकृत्या। भोगः सर्पदेहः कुटिला गतिर्वास्यास्ति भोगी। जिह्मं वक्रं गच्छति

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

९ ' लेलिहानो द्विरसनो गोकर्णः कञ्चुकी तथा ।
कुम्भीनसः फणधरो हरिर् भोगधरस् तथा ॥

१० अहेः शरीरं भोगः स्यादाशीरप्यहिदंष्ट्रिका । '

1 Belonging to a snake.
2 His expanded head.
त्रिष्वाहेयं विषाऽस्थ्यादि, स्फटायां तु फणा द्वयोः ॥

2 His skin.
3 His venom.
११ समौ कञ्चुक-निर्मोकौ, क्ष्वेडस् तु गरलं विषम् ।
पुंसि क्लीबे च काकोल-कालकूट-हलाहलाः ॥

1 Nine sorts of fixed poison.
१२ सौराष्ट्रिकः शौक्तिकेयो ब्रह्मपुत्रः प्रदीपनः ।
दारदो वत्सनाभश् च विष-भेदा अमी नव ॥

1 A dealer in antidotes.
2 A snake-catcher.
१३ विषवैद्यो जाङ्गुलिको, व्यालग्राह्यहितुण्डिकः ।

इति पातालभोगि-वर्गः ७, अत्र मूलश्लोकाः ११, क्षे० १॥.

जिह्मगः । कुम्भीनसः कञ्चुकी लेलिहानश्च । राजसर्पो भुजंगभुक् ॥ ८ ॥ आहौ भवमाहेयं, दृतिकुक्षीति ($\frac{४।३।५६}{१४३३}$) ढञ् । स्फटन्ति विशीर्यन्तेनया स्फटा, द्वयोर्वर्तमानायां स्फटायां फणापि द्वयोः, फटेत्येके । फण गतौ (फणा) । दार्वीः कफेलुश्च । कञ्चुकमिव कञ्च्यते बध्यतेनेन (कञ्चुकः) । निर्मुच्यते निर्मोकोहित्वक् । निर्व्लयनी च । क्ष्वेडते मोहयति क्ष्वेडः । गिरति जीवं गरः, गरं लाति गरल श्यामश्यामलवत् ॥ ९ ॥ नवामी विषप्रकाराः । काकमेचकः काकोलः, ईषत्कोलति संस्त्यायति . वा । कालस्य वर्णस्य कूटोत्र कालकूटः, मृत्युसंबन्धी व्याजो वा । हलति विलिखति जठरं न विलिखति च हलाहलः, हालेव हलतीति लक्ष्ये हालाहलो हालहलश्च, यथा–स्निग्धं भवत्यमृततुल्यमहो कलत्रं हालाहलं विषमिवाप्रगुण तदेव (काव्यालं० सू० वृ० IV. 2. 7.) यथा–काममपायि मयेन्द्रियकुण्डैर्यद्यपि दुष्कृतहालहलौघः, यथा वा–मधु तिष्ठति वाचि योषितां हृदये हालहलं महाविषम् (भर्तृ० शृङ्गा०) । सुराष्ट्रशुक्तिकदरत्सु देशेषु भवाः सौराष्ट्रिकादयः । ब्रह्मणः पुत्रः [यद् याज्ञवल्क्यः–त्वं विष ब्रह्मणः पुत्रः सत्ये धर्मे व्यवस्थितः (या०२-११०)] ॥१० ॥ वत्सस्येव नाभिरस्य वत्सनाभः । (जाङ्गुलिकः) वसन्तादित्वात् ($\frac{४।२।६३}{१२७३}$) ठक्, जाङ्गुलिको विषभिषगिति भागुरिः । अहितुण्डेन दीव्यति (आहितुण्डिकः) ॥ ११ ॥ इति पातालभोगिवर्गः । ७ ।

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh

अथ नरक-वर्गः ८

4 Hell.
Various hells.

स्यान् नारकस् तु नरको निरयो दुर्गतिः स्त्रियाम् ॥

१ तद्-भेदास्– तपनाऽवीचि-महारौरव-रौरवाः ।
संघातः कालसूत्रं चेत्याऽऽद्याः, सत्वास् तु नारकाः ॥

2 Departed souls.
1 The river of hell.
1 Misfortune or misery.
1 Throwing in hell.

२ प्रेता, वैतरणी सिन्धुः स्याद्, लक्ष्मीस् तु निर्ऋतिः ।
विष्टिराजूः, कारणा तु यातना तीव्रवेदना ॥ 3 Agony.

4 Mental halu.
2 Pain of labor.
3 Corporeal pain.

३ पीडा बाधा व्यथा दुःखमामनस्यं प्रसूतिजम् ।
स्यात् कष्टं कृच्छ्रमाभीलं, त्रिष्वेषां भेद्य-गामि यत् ॥

इति नरकवर्गः ८, अत्र मूलश्लोकाः ३॥, क्षे०.

नराः कायन्त्यस्मिन् नरकः । (नारकः) अन्येषामपि (अन्येभ्योपिदृश्यते) इति बाहुलकाद्वा दीर्घः । निष्क्रान्तः–अयान्निरयः, अयोनुकूलं दैवम् । तपति संतापयति तपनः, तपन्त्यनेन वा । अवन्त्यस्मादवीचिः, विरुद्धा वीचयोत्र वा, स्त्रियामपि । रुरुर्हिंस्रः क्रन्दश्च तत्र भवो रौरवः ॥ १ ॥ संह्रियन्तेत्र संहारः, संघात इत्येके । कालान्ययोमयानि सूत्राण्यत्र कालसूत्रम् ॥ आद्यशब्दात्तामिस्रान्धतामिस्रादयः । सत्त्वाः प्राणिनः, सीदन्तीति । प्रकर्षेणेताः प्रेताः । परेता अतिवाहिका(ता)श्च । नारकी नदी, विगततरणी व्यर्के पाताले भवा वैतरणी, विगततरणिर्विनौका वा । निष्क्रान्ता ऋतेः सन्मार्गान्निर्ऋति ॥ २ ॥ विशति क्लेशं विष्टिर्नरके हठात्क्षेपः । आजवते–आजूः, क्विब्वचिप्रच्छीति (वा० $\frac{२१४७-४८}{३१५८}$) क्विब्दीर्घौ, आ–अज्यते वा, आजूर्वेतनयोर्विष्टिः कर्मकृत्कर्मणोरपीति शाश्वतः (५०७) । (कारणा) कृञ् हिंसायां, णिच् । यत निकारादौ, णिच्, यातयति यातना नारकरुक् । दुष्टानि खान्यस्मिन् दुःखम् । प्रसूतेर्जातं दुःखं, (आमनस्यं) अमनसो भावः, वैमनस्यमित्यर्थः । षडपि मनःपीडार्था इति सभ्याः, यन्माला–दुःखं प्रसूतिजे क्लीबे पीडा बाधा च वेदना, दुःखमाधिः प्रसूतिजमिति कात्यः ॥ ३ ॥ कषिष्यति कष्टं । कष्टंभविष्यतीत्याहुः (का०), कृच्छ्रगहनयोःकषः ($\frac{७।२।२२}{३०६२}$) इति नेट् । कर्षति कृन्तति वा कृच्छ्रम्, आसमन्ताद्भियं लातीति–आभीलम् । एतानि शरीरपीडार्थानि, लक्ष्ये तु नवाप्येकर्थाः । एषां दुःखादीनां मध्याद्विशेष्यनिष्ठा दुःखकष्टकृच्छ्रास्त्रिलिङ्गाः, यथा–सेयं दुःखा च दुरुपपादा च, दुःखः सुतो निर्गुणः, सर्वं दुःखं विवेकिनः (यो. सू. २–१५) ॥ ४ ॥ इति नरकवर्गः ॥ ८ ॥

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

अथ वारि-वर्गः ९

15 The sea or ocean.
१ समुद्रो ऽब्धिरकूपारः पारावारः सरित्पतिः ।
उदन्वानुदधिः सिन्धुः सरस्वान् सागरो ऽर्णवः ॥

2 Particular seas.
२ रत्नाकरो जलनिधिर् यादःपतिरपाम्पतिः ।
तस्य प्रभेदाः—क्षीरोदो लवणोदस् तथा ऽपरे ॥

27 Water.
३ आपः स्त्री भूम्नि वार् वारि सलिलं कमलं-जलम् ।
पयः कीलालममृतं जीवनं भुवनं वनम् ।
४ कबन्धमुदकं पाथः पुष्करं सर्वतोमुखम् ।
अम्भोर्णस् तोय-पानीय-नीर-क्षीराऽम्बु-शम्बरम् ॥

2 Watery.
५ मेघपुष्पं घनरसस्, त्रिषु द्वे आप्यमम्मयम् ।

4 A wave.
भङ्गस् तरङ्ग ऊर्मिर् वा स्त्रियां वीचिरथोर्मिषु ॥

समुनत्ति समुद्रः । अप्-उदकं धीयतेस्मिन्नब्धिरुदधिश्च, कर्मण्यधिकरणेच (३।३।९३) इति किः, पेषवासवाहनधिषु च (६।३।५८)इत्युदकस्योदः । न कुं पृणाति मर्यादापालनादकूपारः । पारमावृणोति पारावारः, पारमिवावारमस्य वा दुस्तरत्वात् । उदकमस्त्यस्योदन्वान्, उदन्वानुदधौच (८।२।१३) इति साधुः । स्यदन्ते सिन्धुः । सरांसि सन्त्यस्य सरस्वान् । सगरैः खातः सागरः । अर्णोस्यास्त्यर्णवः, अणसोलोपश्च (५०५३) इति वः सलोपश्च ॥ १ ॥ यादांसि पाति यादःपतिः, पाथःपतिरित्येके । सुगममेव हि मध्यमपांपतेः—इति दर्शनात्समासे षष्ठ्या अलुक् । वीचिमाली सर [शर] ध्वजोऽवारपारश्च । (क्षीरोदः) उदकस्योदःसंज्ञायाम् (६।३।५७) । अपरे दध्युदघृतोदसुरोदेक्षूदस्वादूदाः ॥ २ ॥ आप्नुवन्त्यापः स्त्रियां बहुत्वे । वृणोति वार्वारि च । सरति सलिलं, रलयोरैक्यम् । काम्यते कमलम् । जडति जलम् । पयते पीयते वा पयः, पय गतौ, पीङ् पाने । कीला ज्वाला अलति वारयति कीलालम् । भवत्यस्मात्सर्वं भुवनम् ॥ ३ ॥ कं बध्नाति कबन्धं, यच्छाश्वतः—७२० कबन्धं सलिले रुण्डे । कमन्धमिति द्वे नाम्नी इत्येके । उनत्त्युदकम् । पीयते पाति वा पाथः । पुष्णाति पुष्करम् । सर्वतोमुखं सर्वदिग्गतेः । अमत्यम्भः । ऋणोत्यर्णः । तुदति तौति वा तोयं, तुः सौत्र आवरणार्थो वा । नयति नीरम् । [घस्यते क्षियति वा क्षीरम्] । अम्बति (ते) अम्बु । शं वृणोति शंवरम् ॥ ४ ॥ मेघानां पुष्पं प्रसवः । दकं जीवनीयं च, यथा दकलावणिकाः । (अपां विकारोम्मयम्) एकाचोनित्यं (५०५२) इति मयट् । आप्यं तु लक्ष्यात्, अत एव आप्यंवेति चान्द्रं सूत्रम् । (भङ्ग इ०) भज्यते तरत्यूर्वति चेति वाक्यानि, ऊर्मिर्वा स्त्रियामिति काकाक्षिवत् । वीची तु नित्यं स्त्री ॥

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh

2 A surge or billow.
1 A whirlpool.
4 A drop of water.

६ महत्सूल्लोल-कल्लोलौ, स्यादावर्तो ऽम्भसां भ्रमः ।
पृषन्ति बिन्दु-पृषताः पुमांसो विप्रुषः स्त्रियाम् ॥

2 A winding descent of water.
2 A drain.
5 A shore or bank.

७ चक्राणि पुटभेदाः स्युर्, भ्रमाश् च जलनिर्गमाः ।
कूलं रोधश् च तीरं च प्रतीरं च तटं त्रिषु ॥

1 The bed.
2 An island.

८ पाराऽऽवारे पराऽर्वाची तीरे, पात्रं तदन्तरम् ।
द्वीपो ऽस्त्रियामन्तरीपं यदन्तर् वारिणस् तटम् ॥

1 One formed by alluvion.
2 A sand bank.
5 Mud or clay.

९ तोयोत्थितं तत् पुलिनं, सैकतं सिकतामयम् ।
निषद्वरस् तु जम्बालः पङ्को ऽस्त्री शाद-कर्दमौ ॥

2 Inundation.
2 A temporary well, fountain.
1 Navigable. 3 A boat.

१० जलोच्छ्वासाः परीवाहाः, कूपकास् तु विदारकाः ।
नाव्यं त्रि-लिङ्गं नौ-तार्ये, स्त्रियां नौस् तरणिस् तरिः ॥

॥ ५ ॥ ऊर्ध्वं लोलः [लोलयति] उल्लोलः । कल्लन्तेनेन नद्य इति कल्लोलः, कुत्सितो लोल इत्येके । लहरी-ओघश्च । आवर्तते मण्डलेन भ्रमत्यावर्तः । पर्षति सिञ्चति पृषत्, रूपभेदात्क्लीबे । बिन्दति बिन्दुः, बिदि अवयवे । विगतः प्रोषो दाहोस्या विप्रुट् ॥६॥ चक्राकारेण यान्त्यधः (चक्राणि) । पुटं भित्त्वा निर्यान्तीत्युपध्यायोत्प्रेक्षा । वक्राणीति **माला** । नदीवङ्काख्या इति च **गौडो** भ्रान्तः । तेनातोन्ये भ्रमाः प्रणाल्याद्या जलपथाः । कूलति कूलं, कूल आवरणे । रुणध्यम्भो रोधः । तरन्त्यस्मात्तीरम् । तीरप्रतीरे दीपप्रदीपवत् । तट्यत आहन्यतेम्भसा तटम् ॥ ७ ॥ (नद्याः) परे पार्श्वे कूलं पारं, पार्यते समाप्यतेस्मिन्निति वा । अर्वाक् पार्श्वे कूलमवारम्, यदाह—अर्वाक् कूलमवारं स्यात् । परावाची इत्येके, अर्वाक्शब्दस्याव्यथत्वात् । न वार्विद्यतेस्यावारं न व्रियते वा । तयोः कूलयोर्मध्यं, पीयते पात्रं प्रवाहः । द्विधा गता आपोत्र द्वीपम् । अन्तरपामन्तरीपं, द्व्यन्तरुपसर्गेभ्योप ईत् ($\frac{६।३।९७}{९४१}$) ऋक्पूरब्धूरिति ($\frac{५।४।७४}{९४०}$) अः समासान्तः ॥ ८ ॥ तत्तटं तोयात्क्रमेणोत्थितं पुलिनं, पुलो महत्त्वमस्यास्तीति, तद् द्वीपमिति **माला**—वा ना द्वीपं च पुलिनम् । तदेव प्रकृतं पुलिनं, सिकतास्यास्ति सैकतं, देशेलुबिलचौच ($\frac{५।२।१०५}{१९१२}$) इत्यण् । [निषीदन्त्यस्मिन् निषीदन्तं वृणोति वा निषद्वरः । जमति ग्रसते जम्बालः । पञ्च्यते पङ्कः । शीयन्तेस्मिञ्शादः । कृणोति कर्दमः] । चिखल्लश्च ॥ ९ ॥ जलं प्रवृद्धमुच्छ्वसिति परिवहति यैर्निर्गममार्गैस्ते परीवाहाः, यल्लक्ष्यं-उपार्जितानामर्थानां त्याग एव हि रक्षणम् । तटाको (तडागो) दरसंस्थानां परीवाह इवाम्भसाम् (पंचतन्त्र I-3) (चाणक्यश०) ॥ परिवाहोपि । कूपप्रतिकृतिः कूपकः, शुष्कनद्यादौ जलार्थं गर्ताः क्रियन्ते, यत्कात्यः-विवरान् कूपकानाहुः । विदारयति क्ष्मां विदारकः, **मालाच**—चुण्डी (ण्डा) विवरोत्साश्च

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh

3 A raft or float.
1 A natural stream.
2 Fare or freight.
2 An oval basin.

११ उडुपं तु प्लवः कोलः, स्रोतो ऽम्बु-सरणं स्वतः ।
आतरम् तरपण्यं स्याद्, द्रोणी काष्ठाम्बुवाहिनी ॥

2 A voyaging merchant.
2 The pilot or helmsman.

१२ सांयात्रिकः पोतवणिक्, कर्णधारम् तु नाविकः ।
नियामकाः पोतवाहाः, कूपको गुणवृक्षकः ॥ 2 The crew. 2 The mast.

2 The oar.
2 The rudder.
2 A scraper or shovel.
2 A bucket.

१३ नौकादण्डः क्षेपणी स्यादरित्रं केनिपातकः ।
अभ्रिः स्त्री काष्ठकुद्दालः, सेकपात्रं तु सेचनम् ॥

1 The boat's half.
1 Landed from a boat.
2 Clear, transparent.
3 Deep.
1 shallow.
3 A fisherman.

१४ क्लीबे ऽर्धनावं नावो ऽर्धे, ऽतीतनौके ऽतिनु त्रिषु ।
त्रिष्वागाधात्, प्रसन्नोऽच्छः, कलुषोऽनच्छ आविलः ॥
3 Turbid water.

१५ निम्नं गभीरं गम्भीरमुत्तानं तद्-विपर्यये ।
अगाधमतलस्पर्शे, कैवर्ते दाश-धीवरौ ॥

कूपकाः । नावातार्यं, नाव्यं नौवयोधर्मेति (४।४।९१/१६४३) यत् । नुद्यते नौः, ग्लानुदिभ्यांडौः (उ० २२२) । तरन्त्यनया तरणिस्तरीश्च ॥१०॥ उडुप्यते–उडुपस्तृणप्लवः । कवन्तेनेन कोलः, कोलति संस्त्यायति वा कोलः, यच्छाश्वतः–पोतृप्लवकयोः कोलः कोलं तु बदरीफलम्(३६५) । स्वतोकृत्रिमम् । आतरन्त्यनेनातरः,आवाप इत्येके । पणन्तेनेन पणः, पणे साधु पण्यं मूल्यं, साधौ (तत्रसाधुः ४।४।९८/१६७०) इति यत् । काष्ठमुपलक्षणं, काष्ठाश्मादिमयी जलधारिणी द्रोणी, द्रवत्यम्भोस्याम्, द्रोणिका त्वम्युवाहिनीत्येके पेठुः ॥ ॥ ११ ॥ समुदितानां यानं संयात्रा, सा प्रयोजनमस्य (प्रयोजनम्) सांयात्रिकः । पवते वातेन पोतो वाहनम् । कर्णोरित्रं, कर्णः श्रोत्रमरित्रं चेति दुर्गः । नावा तरति नाविकः, नौद्व्यचष्ठन् (४।४।७/१७७६) नियन्तुं शक्ता नियामकाः । निया(र्या)माश्च । गुणवृक्षो यत्र नौरज्ज्वा बध्यते, पोते ध्वजपटाद्याधार इत्येके । कूपे–आधारगर्ते कायति कूपकः, गौडस्तु जलान्तस्तरून्कूपकानाह ॥१२॥ येन नौर्वाह्यतेसौ नौकादण्डः । क्षिप्यतेनया क्षेपणी, क्षोपण्यपभ्रंशः, क्षिपेत्युपाध्यायः। के जले नावो निपातयन्ति स केनिपातः, हलदन्तादिति (३।३।१०/१६६) अलुक् । इयर्त्यनेनारित्रम्, स्फ्यादि कोटिपात्रं वा । न बिभर्त्यभ्रिः । काष्ठे कुद्दालः काष्ठमयो वा, येन निखन्यते भग्नं पोतादिकं कुथेन पूर्यते । (सेचनं) येन नावो जलमुद्धियते ॥१३॥ क्वचित्-यानपात्रं तु पोतोऽधिभवे त्रिषु समुद्रियम् । सामुद्रिको मनुष्योऽधिजातादौ नौः समुद्रिका [जाता सामुद्रिका च नौः] ॥ अर्धं नावोर्धनावं, नावोद्विगोः (५।४।९९/८०२) अर्धाच्च (५।४।१००/८०३) इति टच् । नावमतिक्रान्तमतिनु जलम्, अतिनौः पुमान् स्त्री वा । त्रिष्वागाधात्–अधिकारोयम्, अभिविधावाङ् । अच्छयते न च्छाद्यते वाच्छः । कं लुषति हिनस्ति कलुषः । आ–अव–एलयत्याविलः, आविल्यते–आभिद्यते वा, विल भेदने ॥ १४ ॥ नमति निमनति वा निम्नं, म्ना

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh

2 A net.
2 Packthread.
2 A fish basket.
2 Goad.

१६ आनायः पुंसि, जालं स्याच्छणसूत्रं पवित्रकम् ।
मत्स्याधानी कुवेणी स्याद्, बडिशं मत्स्यवेधनम् ॥

8 A fish.

१७ पृथुरोमा झषो मत्स्यो मीनो वैसारिणोऽण्डजः ।
विसारः शकुली चाथ गडकः शकुलार्भकः ॥

2 Sheat fish.
2 A porpoise.
2 Sort of sprat.
2 A sort of carp.

१८ सहस्रदंष्ट्रः पाठीन, उलूपी शिशुकः समौ ।
नलमीनश् चिलिचिमः, प्रोष्ठी तु शफरी द्वयोः ॥

1 Small fry.
1 Various sorts of fish.

१९ क्षुद्राऽण्ड-मत्स्य-संघातः पोताधान, मथो झषाः– ।
रोहितो मद्गुरः शालो राजीवः शकुलस् तिमिः ॥

2 Aquatic animals.
Various sorts.

२० तिमिङ्गिलाऽऽदयश् चाथ यादांसि जलजन्तवः ।
तद्-भेदाः–शिशुमारोद्र-शङ्कवो मकराऽऽदयः ॥

अभ्यासे । गमे भियं राति गभीरं गंभीरं वा । ऊर्ध्वं तन्यते–उत्तानं गभीरादन्यत् । नास्ति गाधः प्रतिष्ठास्यागाधम् । नास्ति तलेधःस्पर्शोस्यातलस्पर्शम् । के (जले) वर्तते केवर्तो मत्स्यादिस्तस्यायं (घातकः) । द्यति दशति दाश्नोति वा मत्स्यान्दाशः । धीयते–आव्रियते धीवरः ॥ १५ ॥ कुत्सितं वेणन्तेस्यां मत्स्याः कुवेणी, वेण् गतौ, मत्स्यबन्धनीत्यर्थः । मत्स्यकरण्डिका च । बलिनः (मत्स्यान्) श्यति बलिशम् । विध्यतेनेन वेधनं, विध विधान इत्यस्मात्, व्यधेर्व्यधनमिति स्यात् ॥ ॥ १६ ॥ रोम पक्षोत्र । झषति झषः । माद्यति मत्स्यः, मच्छोपि । मांनाति मीनः । ग्रह्यादौ (नन्दिग्रहीति) विसारी, ततो वैसारिणः, विसारिणोमत्स्ये ($\frac{५।४।१६}{२०८४}$) इति स्वार्थेऽण् । स्थिरे ($\frac{३।३।१७}{३२८३}$), व्याधिमत्स्यबलेषु ($\frac{२।१७४}{३२८३}$) इति कर्तरि विसारः । शकलानि पृष्ठे सन्त्यस्य शकली, सशल्क इत्यर्थः । शल्की च । गडति पुच्छाच्छोटनात्सिञ्चति गडकः । शकुलोत्र मत्स्यमात्रे ॥ १७ ॥ विशेषानाह । सहस्रदंष्ट्रो यादालो नाम मत्स्यः । पाठीनश्चित्रवल्लिः, बहुदंष्ट्रत्वात्पाटयतीति, भक्ष्यत्वेन पठ्यते वा । एतौ सादृश्यात्पर्यायौ । शिशुमारप्रतिकृतिः (शिशुकः) । उलुपीन्नन्तः, उल्लुम्पतीति । सुषिर–तृणान्तश्चारी नलमीनःनडाभो वा । चीयते मीयते च चिलिचिमः, चिलिचिमस्त्रिदोषकृदिति वैद्याः । प्रोषति पित्तकारित्वात्प्रोष्ठी । शफान् राति शीघ्रगत्वाच्छफरी ॥ १८ ॥ सूक्ष्माश्चाण्डान्निःसृताश्च मत्स्याः क्षुद्राण्डमत्स्याः । पोता आधीयन्तेत्र पोताधानम् । झषा मत्स्यविशेषा अमी । रोहितो रक्तत्वात् । मज्जति मद्गुरः । शलति शालते वा शालः । राज्यः सन्त्यस्य राजीवो वज्राभः । शक्नोति गन्तुं शकुलः । तिम्यति तिमिः ॥ १९ ॥ तिमिं गिलति तिमिंगिलः, गिलेऽगिलस्य ($\frac{३।१।७१}{२००७}$) इति मुम् । आदिशब्दात्तिमिंगिलगिलनन्द्या[न्दी]वर्तादयः । याति यादः । जलजन्तुर्जलचरः । उनत्त्युद्रः । शङ्कतेस्माच्छङ्कुः । मा कुर्यात्किंचिदिति त्रस्यन्त्य-

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh

2 A crab.
2 A shark.
2 A crocodile.
3 A worm.
2 A gangetic alligator.
3 A leech.
2 A pearl oyster.
2 A conch.
2 small shell.
2 A bivalve shell.
6 A frog.
2 A small worm.
2 A female frog.
2 A female turtle.
1 Sort of sheat-fish.
2 A cockle.
2 A lake or pond.
1 A deep lake.

२१ स्यात् कुलीरः कर्कटकः, कूर्मे कमठ-कच्छपौ। 3 A turtle or tortoise.
ग्राहोऽवहारो. नक्रम् तु कुम्भीरो, ऽथ महीलता ॥

२२ गण्डूपदः किञ्चुलको, निहाका गोधिका समे ।
रक्तपा तु जलौकायां स्त्रियां भूम्नि जलौकसः ॥

२३ मुक्तास्फोटः स्त्रियां शुक्तिः, शङ्खः स्यात् कम्बुर-स्त्रियौ ।
क्षुद्रशङ्खाः शङ्खनखाः, शम्बूका जलशुक्तयः ॥

२४ भेके मण्डूक-वर्षाभू-शालूर-प्लव-दर्दुराः ।
शिली गण्डूपदी, भेकी वर्षाभ्वी, कमठी डुलिः ॥

२५ मद्गुरस्य प्रिया शृङ्गी, दुर्नामा दीर्घकोशिका ।
जलाशया जलाधारास्, तत्राऽगाध-जलो ह्रदः ॥

स्मान्मकरः । आदिशब्दाज्जलहस्तिग्राहाद्याः ॥ २० ॥ कौ लीयते कुलीरः, कुलिन–मीरयति वा, जनकभक्षकत्वात्, यत्कौटिल्यः–(१।१६।१३) कर्कटसधर्माणो हि राजपुत्रा जनकभक्षाः । कृणोति कर्कटकः । कुरति कुमूर्वति वा कूर्मः । काम्यते यज्ञार्थं के मठति वा कमठः । कच्छेन पिबति कच्छपः । गृह्णाति ग्राहस्तन्तुनागाख्यः, विभाषा ग्रहः ($\frac{३।१।१४३}{२९०५}$) इति णः। अवह्रियतेऽनेनेति, गोचरादिसूत्रेऽवहारोपीत्युपसंख्यानात् ($\frac{५।७।१७}{३३०१}$) घञ्, पुंसिसंज्ञायांघःप्रायेण ($\frac{३।३।११८}{३२९६}$) अवहरति वा, श्याद्व्यधेति ($\frac{३।१।१४१}{२९०३}$) णः । न क्रामति नक्रः । कुम्भिनमीरयति कुम्भीरः । (महीलता) भूमिसूर्नाम कृमिः ॥२१॥ गण्ड्वो ग्रन्थयः पदान्यस्य गण्डूपदः । किंचिच्चुलुम्पति किंचुलुकः,लकान्तो वा । निजहाति गुध्यति च (निहाका,इ०), बिलेशयादन्योयं जलचरः प्राणी । टकः गापोष्टक् । पिबतेःसुराशीध्वोरिति ($\frac{३।२।८}{२९३३}$) नियमाद्रक्तपा, टक्, क इत्येके। आ–उच्यते, ओकउचःके ($\frac{७।३।६४}{२८८०}$) उणादौ सान्लोन्यः। शालूकादि–वज्जलूकेति श्रीभोजः ॥२२॥ मुक्ताः स्फुटन्त्यस्मान्मुक्तास्फोटः । शोकति शुक्तिः, शुक गतौ, क्तिच्। शं खनति शाम्यति वा शङ्खः। काम्यते कम्बुः। सूक्ष्मनद्यादिजाः कृमयः, शंकनका इत्यसत्। क्षुल्लकाश्च। शं वान्ति शंबूका जलमात्रजाः ॥ २३ ॥ बिभेति भेकः । मण्डति मण्डते वा सरो मण्डूकः । वर्षासु भवति वर्षाभूः । शलति शालते वा शालूरः, सालूर इत्येके। प्लवते प्लवः। दृणाति शब्दैः कर्णौ दर्दुरः । शिनोति शिलति वा शिली। गण्डूपदाज्जातौ पुंयोगे वा ङीप्। (वर्षाभ्वी) भुवश्चेति (उ० ४४८) छान्दसो ङीप्। दोलयति दुलिः । कूर्मी च ॥ २४ ॥ मद्गुराख्यो मत्स्यः । शृणाति शृङ्गी. सादृश्याद्योग्यतया प्रिया । जलूकाकारेयं दीर्घकोशत्वात्, दुष्टो नामो नमनमस्या दुर्नामा, दुःसंज्ञेत्येके। जलमाशयो ह्रदयमस्य

CC-0. Agamnigam Foundation. Digitized by eGangotri Siddhanta Gyaan Kosha Foundation, Chandigarh

4 A well.
1 The wooden frame for the rope.
1 The cover or facing of a well.
2 A square or a large pond.
5 One deep enough for the lotus.
2 A basin.
2 Well.
2 A moat or ditch.
1 A dike.
3 A basin round the foot of a tree.
16 A river.
8 The *Ganges*.

२६ आहावस् तु निपानं स्यादुपकूप-जलाशये। 2 A trough near a well.
पुंस्येवाऽन्धुः प्रहिः कूप उदपानं तु पुंसि वा ॥

२७ नेमिस् त्रिकाऽस्य, वीनाहो मुख-बन्धनमस्य यत्।
पुष्करिण्यां तु खातं स्यादखातं देवखातकम् ॥ 2 A natural pond.

२८ पद्माकरम् तडागो ऽस्त्री कासारः सरसी सरः।
वेशन्तः पल्वलं चाऽल्पसरो, वापी तु दीर्घिका ॥

२९ खेयं तु परिखा, ऽऽधारस् त्वम्भसां यत्र धारणम्।
स्यादालवालमावालमावापो, ऽथ नदी सरित् ॥

३० तरङ्गिणी शैवलिनी तटिनी ह्रादिनी धुनी।
स्रोतस्विनी द्वीपवती स्रवन्ती निम्नगाऽऽपगा ॥

३१ 'कूलङ्कषा निर्झरिणी रोधोवक्रा सरस्वती'
गङ्गा विष्णुपदी जन्हुतनया सुरनिम्नगा ॥

जलाशयः, जलमाशेतेत्र वा। सामान्येनोपक्रमोयम् तत्र जलाशयेष्वमी विशेषाः संगमान्ताः। (ह्रदः) ह्रादो ह्रस्वः ॥ २५ ॥ नियतं पिबन्त्यत्र निपानम्। आहूयन्तेस्मिन्गाव आहावः, निपानमाहावः ($\frac{३।३।७४}{३२५,१}$) इति साधुः, कूपसमीपे शिलादिनिबद्धं पशुपानार्थं कूपोद्धृताम्बुस्थानम्। अनन्त्यनेनान्धयति वान्धुः। प्रजहात्यम्बु प्रहिः। कुत्सिताः कोर्वा—आपोत्र कूपः। उदकं पीयतेस्मिन्नुदपानम् ॥ २६ ॥ अस्य कूपस्यान्ते रज्ज्वादिधारणार्थं दारुयन्त्रं त्र्यंशं त्रिका। कूपस्योर्ध्वे—इष्टिकाभिर्विनह्यते वीनाहो नान्दीपट्टाख्यः। पुष्करादिभ्यो देशे ($\frac{५।२।१३५}{१९४१}$) इतीनिः। नागादिकुण्डमकृत्रिममाखातमित्येके ॥ २७ ॥ (तडागः) तड आघाते, तडाक इत्येके, तटान्यकति तटाकमित्यन्ये। पद्माकरो योग्यत्वात्। कमासरत्यत्र कासारः, कासमृच्छति वा नड्वलाम्बुत्वात्। महत्सरः सरसी, षिद्गौरादिभ्यश्च ($\frac{४।१।४१}{४९८}$) इति ङीष्। विशन्ति मज्जन्त्यस्मिन्वेशन्तः, झच्। पल्यते पल्वलः, पल गतौ। उप्यतेस्यां वापी। दीर्घैव दीर्घिका, संज्ञायां कन् ($\frac{४।३।८७}{२०४२}$) ॥ २८ ॥ (खेयं) ईंचखनः ($\frac{३।३।१११}{२८६०}$) इति यत्, दुर्गवेष्टनखातिका। परिखन्यते परिखा, डः। (आधारः) क्षेत्रादिसेकार्थं यत्र संचीयतेऽम्भः। वृक्षसेकार्थं तले द्रवतोम्भसः स्थानं, यदाहुः—आलवालं विदुर्धीरा धारणं द्रवतोऽम्भसः, मुनिश्च—अपां धारणमाधारस्तदल्पं चालवालकम्, आलूयते खन्यते—आलवालम्। आवलते बहिर्निर्गमादम्भोत्रावालम्। आ—उप्यतेम्भोत्रावापः ॥ २९ ॥ नदट् पचादिः, ङीष्। सरति सरित्। ह्रादोस्त्यस्याः, ह्रदिनीत्येके। धुनोति धुनी। आ—अपगच्छति, अप्संबन्धिना वेगेनापेन च गच्छति वापगा। ॥ ३० ॥ गां गाते गच्छति गङ्गा, अगं गच्छति वा। विष्णुपदार्घोत्था विष्णुपदी,

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

३२ भागीरथी त्रिपथगा त्रिस्रोता भीष्मसूरपि ।
4 The *Yamunā*. कालिन्दी सूर्यतनया यमुना शमनस्वसा ॥

4 The *Narmadā*. ३३ रेवा तु नर्मदा सोमोद्भवा मेकलकन्यका ।
2 The *Karatôyā*. 2 The *Bāhudā*. करतोया सदानीरा, बाहुदा सैतवाहिनी ॥

2 The *Satadru* 2 The *Vipāsā*. 2 The *Sôna*. 1 A canal. ३४ शतद्रुस् तु शुतुद्रिः स्याद्, विपाशा तु विपाट् स्त्रियाम् ।
शोणो हिरण्यवाहः स्यात् कुल्याऽल्पा कृत्रिमा सरित् ॥

Various rivers. ३५ शरावती वेत्रवती चन्द्रभागा सरस्वती ।
1 The mouth of a river. कावेरी सरितो ऽन्याश् च, संभेदः सिन्धुसंगमः ॥

1 An issue from a pond. belonging to certain Rivers. ३६ द्वयोः प्रणाली पयसः पदव्यां, त्रिषु तूत्तरौ ।
देविकायां सरय्वां च भवे दाविक-सारवौ ॥

कुम्भपदीषु च (५।४।१३९ / ८७८) इति साधुः । जह्नुना पीता श्रोत्रेण त्यक्तेति जाह्नवी । भगीरथावतारिता भागीरथी ॥ ३१ ॥ (कालिन्दी) कलिन्ददेशजा । यमेन यमजा यमुना, यमी च । (रेवा) रेवृ प्लवगतौ । नर्मार्थं सोमवंश्येन पुरूरवसावतारिता (नर्मदा) । मेकलोऽद्रिः प्रभवोस्याः ॥ ३२ ॥ गौरीविवाहे हस्तात्प्रदानतोयाज्जाता (करतोया) । सितैव सैती (वाहिनी), यन्माला–मन्तव्या बाहुदार्जुनी । बाहुभिर्दीयते तीर्यते बाहुदा, बहुदेन कार्तवीर्यार्जुनेनावतारितेत्यागमः । शु पूजितमाशु वा तुदति शुतुद्रिः, एतदयुध्यमानाः शितद्रुः सितद्रुर्वेत्याहुः, इमं मे गङ्गे यमुने सरस्वति शुतुद्रीति हि श्रुतिः (ऋ. वे. १०-७५-५) । वसिष्ठशापभयाच्छतधा द्रुता शतद्रुः । वसिष्ठं विपाशितवती विपाट् ॥ ३३ ॥ (शोणः) नदोयम्, शोणृ वर्णगत्योः । हिरण्यं वहति (हिरण्यवाहः) । कृत्रिमाल्पा च क्षेत्रसेकार्था कुल्या, कुले कुटुम्बे साध्वी, यदाहुः–कुल्याधीनं कुलं विद्यादित्या–(?) व्यवस्थिताः । दांपत्यं कुलमित्यन्ये कुलं वा हलमुच्यते ॥ सारणी च । शरादीनां च (६।३।१२० / १०४२) इति दीर्घे शरावती । (चान्द्रभागा) चन्द्रभागाभ्यां गिरिभ्यां प्रवहति, चन्द्रभागान्नद्यामिति (ग० ५२) साधुः, चन्द्रेण भागतोन्यस्ता चन्द्रभागेत्येके । सरांसि सन्त्यस्यां सरस्वती ॥ ३४ ॥ कवेरस्य जलदेहस्येयं कावेरी । सरिद्विशेषा एते, अन्याः सरयूदेविकागोदावरीवेण्याद्याः । संगमो भिन्नयोः संभेदो नदीमेलः । प्रणडत्यम्भोनया प्रणाली जलनिर्गमनमार्गो मकरमुखादिः, (अन्ये) स्त्रीनपुंसकयोराहुः ॥ ३५ ॥ तत्रभवः (४।३।५३ / १४२८) इत्यण् देविकाशिंशपेति (७।३।१ / १४३९) आत्वम्, दाण्डिनायनेति (६।४।१७४ / १११४८) सारवःसाधुः । सुगन्धि(न्ध)प्रयोजनं सौगन्धिकाख्यम् । के ह्लादते कह्लारं, शारदं शुक्लं चैतत् । हल्लति घूर्णते. हल्लकम् ।

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh

2 White water lily. ३७ सौगन्धिकं तु कह्लारं, हल्लकं रक्तसंध्यकम् ।
1 A red one.
2 A water lily. स्यादुत्पलं कुवलयमथ नीलाम्बुजन्म च ॥

2 A blue one. ३८ इन्दीवरं च नीलेऽस्मिन्, सिते कुमुद-कैरवे । 2 The esculent white sort.
1 The root of a water lily.
2 Pistia stratiotes. शालूकमेषां कन्दः स्याद्, वारिपर्णी तु कुम्भिका ॥

3 Vallisneria.
2 A place abounding in water-lilies.
3 An assemblage of lotus flowers. ३९ जलनीली तु शैवालं शैवलो, ऽथ कुमुद्वती ।
कुमुदिन्यां, नलिन्यां तु बिसिनी-पद्मिनी-मुखाः ॥

16 A lotus. ४० वा पुंसि पद्मं नलिनमरविन्दं महोत्पलम् ।
सहस्रपत्रं कमलं शतपत्रं कुशेशयम् ॥

४१ पङ्केरुहं तामरसं सारसं सरसीरुहम् ।
बिसप्रसून-राजीव-पुष्कराऽम्भोरुहाणि च ॥

2 A white lotus.
3 A red lotus.
2 The stalk of a water-lily. ४२ पुण्डरीकं सिताम्भोजमथ रक्तसरोरुहे ।
रक्तोत्पलं कोकनदं, नालो नालमथाऽस्त्रियाम् ॥

रक्तान् संधीनकति रक्तसंध्यकं, रक्तं संध्येव वा, रक्तोत्पलं चैतत् ॥ ३६॥ उत्पाल्यते उत्पलति वा उत्पलम्। कौ वलते प्राणिति कुवलयम्, कुत्सितो बहिर्वलयः पत्रवेष्टनमस्येति श्रीभोजः। विशेषानस्याह। इन्दतीन्दीवरं कुवलयदलनीलेति(का.सू.४।१।१०) सामान्यस्य विशेषवृत्तेः। अस्मिन् सिते, कौ मोदते कुमुदं, कः। के रौति केरवो हंसस्तस्येदं प्रियं कैरवम् ॥३७॥ शालते शालूकं, कन्दो मूलमेषामुत्पलादीनाम्। (वारिपर्णी) वारि पिपर्ति, फङ्गा नाम शाकं, शूषेत्येके। कुम्भोस्त्यस्याः कुम्भिका, कुम्भीको वारिपर्णः स्यादित्येके। नीलिकाख्या जलशूकोपि, शेते जले शेवलं शेवालं च, शीङो–वलञ्बलन्वालनः (स. कं. २-३-१२१), शैवलं शैवालमिति तु द्रविडाः। कुमुदिन्यां (लतायां) कुमुद्वती, कुमुदनडवेतसेभ्योऽमतुप् ($\frac{४।२।७७}{१३०६}$) ॥ ३८ ॥ नडाः सन्त्यस्यां नलिनी पुष्करादिभ्योदेशे ($\frac{५।१।१३५}{२९४१}$) इतीनिः। मुखशब्दात्पुटकिन्यब्जिन्यम्भोजिन्याद्याः। पद्यते लक्ष्मीरत्र पद्मम्। नलाः सन्त्यस्य नलिनम्। अरान् राजीर्विन्दत्यरविन्दम्, अनुपसर्गाल्लुम्पविन्देति ($\frac{३।१।१३८}{२९००}$) शः ॥३९॥ शतसहस्रे बहूपलक्षणम्। कमम्भोलति भूषयति कमलम्। केन मल्यते वा कमलम्। कुशे जले शेते कुशेशयम्। तामः प्रकर्षो रसोस्य तामरसम्, तामः प्रकर्षार्थस्तारतम्यवत्, ताम्यद्भी रस्यते वा ॥ ४० ॥ राज्यः सन्त्यस्य राजीवम्। पुष्णाति पुष्करम्। नालीकं च। पुणति मङ्गल्यत्वात्पुण्डरीकम् ॥ ४१ ॥ कोकाश्चक्राह्वा नदन्त्यस्मिन्, आहुश्च–रक्ताब्जे रक्तकुमुदे बुधैः कोकनदं स्मृतम्। पद्मादिवृन्तस्य द्विलिङ्गार्थपाठः, (नाला)णल बन्धे।

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

2 The film or fibres attendent on it.
2 The root of a water-lily.
2 A filament.
2 A new leaf of a water-lily.

४३ मृणालं विसमब्जादि-कदम्बे खण्डमास्त्रियाम् । 1 Assemblage of water lilies
करहाटः शिफाकन्दः, किञ्जल्कः केसरोऽस्त्रियाम् ॥

४४ संवर्तिका नवदलं, बीजकोशो वराटकः ॥ 2 The seed of the lotus

इति वारि-वर्गः ९, अत्र मूलश्लोकाः ४३, क्षे० ॥.

४५ उक्तं स्वर-व्योम-दिक्-काल-धी-शब्दादि स-नाट्यकम्
पातालभोगि-नरकं वारि चैषां च संगतम् ॥

४६ इत्यमरसिंह-कृतौ नाम-लिङ्गाऽनुशासने ।
स्वरादि-काण्डः प्रथमः साऽङ्ग एव समर्थितः ॥

इति प्रथमः स्वरादि-काण्डः समाप्तः ।

अत्र मूलश्लोकाः २८१ ॥, क्षे० श्लो० १८, सर्वे च मिलित्वा ॥ २९९ ॥

मृद्यतेऽद्यते मृणालम् । विस्यते-उत्कृष्यते विसम् । सनोतेर्डे षण्डः, सत्वाभावोबाहुलकात् ॥ ४२ ॥ कं रहयतीति, करहान् कूलोत्थान् पद्मादीनटति करहाटः । शिनोति दारयति क्ष्मां शिफा । कन्द्यति कन्दं पद्मादिमूलं, कन्द्यतेन्विष्यते वा, कन्दोस्त्री । किंचिज्जलति जडीभवति किञ्जल्कः । के सरति केसरम् । संवर्तयति वेष्टयति संवर्तिका, पद्मादीनां नवोद्भिन्नं दलं शरच्चन्द्रिकाख्यम् । बीजानां पद्माक्षाणां कोशो बीजकोशः । वरमटति वराटकः, कर्णिकेत्यर्थः, यच्छाश्वतः—बीजकोशे सरोजस्य कपर्दे च वराटकः (१८०) ॥ ४३ ॥ इति वारिवर्गः ॥ ९ ॥ अथोक्तान्वर्गान् संग्रहेणोपसंहरति । एषां स्वर्गादीनां संगतं प्रसक्तानुप्रसक्तिकयानुगतं देवासुरमेघादिकं चोक्तम् । शब्दादीति रसबन्धादिग्रहणम् ॥ १ ॥ इति श्रीभट्टक्षीरस्वामिकृतटीकासहितेऽमरकोशोद्घाटने स्वर्गादि काण्डं प्रथमं संपूर्णम् ।

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

द्वितीयं भूम्यादि काण्डम् ।

१ वर्गाः–पृथ्वी-पुर-क्ष्माभृद्-वनौषधि-मृगादि-भिः ।
नृ-ब्रह्म-क्षत्र-विट-शूद्रैः साङ्गोपाङ्गैरिहोदिताः ॥

38 Earth.

२ भूर् भूमिरचला ऽनन्ता रसा विश्वम्भरा स्थिता ।
धरा धरित्री धरणिः क्षोणिर् ज्या काश्यपी क्षितिः ॥

३ सर्वंसहा वसुमती वसुधोर्वी वसुन्धरा ।
गोत्रा कुः पृथिवी पृथ्वी क्ष्मा ऽवनिर् मेदिनी मही ॥

४ 'विपुला गह्वरी धात्री गौरिला कुम्भिनी क्षमा ।
भूतधात्री रत्नगर्भा जगती सागराम्बरा' ॥

2 Soil.
2 An excellent soil.
1 Fertile with every crop.

५ मृन् मृत्तिका, प्रशस्ता तु मृत्सा मृत्स्ना च मृत्तिका ।
उर्वरा सर्व-सस्याऽऽढ्या, स्यादूषः क्षारमृत्तिका ॥

2 Salt ground.

श्रीगणेशाय नमः । अथ द्वितीयकाण्डे वर्गान् संगृह्णाति । अङ्गैर्मृदादिभिरुपाङ्गैश्च खिलादिभिः सह वर्तमानैः पृथ्व्यादिभिः संपादिता वर्गा इह वक्ष्यमाणे काण्डे वदितुमारब्धा उदिताः, आदिकर्मणि क्तः (३।४।७१/३०२३) आशंसायांभूतवच्च (३।३।१३२/२७९०) इति क्तः ॥ १ ॥ भवत्यस्मात्सर्वं भूः, रेफान्तं त्वव्ययं, यथा भूर्भुवः स्वः । रसाः सन्त्यस्यां रस्यते वा रसा । विश्वं बिभर्ति विश्वंभरा, संज्ञायांभृतृवृजीति (३।२।४६/२९६३) खच् । क्षौति भूपं क्षोणी । जिनाति जायते वा ज्या, इज्येति मूर्खव्याख्या, यच्छाश्वतः–ज्यां मौर्वीं ज्या वसुन्धरा (६२९), ज्यापि गौरुच्यते इति निघण्टुः (२।२।५) । कश्यपस्येयं काश्यपी, भार्गवेण जित्वा ह्यस्मै दत्ता । क्षियन्त्येतां क्षितिः, क्षि निवासे ॥ २ ॥ वसु धनं धत्ते वसुधा । उर्वी विस्तीर्णत्वात् । वसु धारयति वसुंधरा । गोत्राः शैलाः सन्त्यस्यां गोत्रा, गास्त्रायते वा । कायति कूयते वा कुः । प्रथते पृथुनावतारिता वा पृथिवी, प्रथेःपिवन्संप्रसारणं च (उ० १५६) । पृथ्वीति, वोतोगुणवचनाद् (४।१।४४/५०२) ङीप् । क्षमते भारं क्ष्मा । अवति प्रजा अव्यते वा नृपैरवनिः । दैत्यमेदोयोगान्मेदिनी । महति मही । रत्नवतीति भागुरिः । क्षमा, इला च नानार्थे ॥ ३ ॥ मृद्यते मृत् । (मृत्तिका) मृदस्तिकन् (५।४।३९/२१०७) स्वार्थे । (मृत्सा, इ०) स्वार्थे सस्नौप्रशंसायाम् (५।४।४०/२१०८) कृष्णभूमः कृष्णमृत्तिकोदग्भूम उदङ्मृदि । पाण्डुभूमः पाण्डुमृच्च, कृष्णोदक्पाण्डुसंख्यापूर्वाया भूमेरच् (५०४६/९४३) । उर्वति क्षुधमुर्वमियर्ति वा (उर्वरा) । (ऊषः) ऊष रुजायाम् ॥ ४ ॥ (ऊषरः) ऊषसुषीतिरः (५।२।१०७/२९१४) । स्थलति (स्थलम्) ।

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh

1 A spot with salt soil.
2 A region devoid of water.
2 Untilled or waste.

६ ऊषवानूषरो द्वावप्यन्य-लिङ्गौ, स्थलं स्थली। 1 A place, or firm spot.
समानौ मरु-धन्वानौ, द्वे खिलाऽप्रहते समे ॥

5 A world.

७ त्रिष्वथो जगती लोको विष्टपं भुवनं जगत्।

1 INDIA.

लोको ऽयं भारतं वर्षं, शरावत्यास् तु यो ऽवधेः ॥

1 The eastern region.
1 The northern region.
2 A country of barbarians.

८ देशः प्राग्-दक्षिणः प्राच्य, उदीच्यः पश्चिमोत्तरः।
प्रत्यन्तो म्लेच्छदेशः स्यान्, मध्यदेशस् तु मध्यमः ॥
2 The middle region.

2 The region of sanctity.
2 An inhabited country.

९ आर्यावर्तः पुण्यभूमिर् मध्यं विन्ध्य-हिमालयोः।
नीवृज् जनपदो, देश-विषयौ तूऽपवर्तनम् ॥ 3 Any country.

स्थल्यकृत्रिमा चेत्, जानपदकुण्डगोणस्थलेति (४।१।४२ / ५००) ङीप्, कृत्रिमा तु स्थला। म्रियन्ते तृषार्ता अस्मिन्मरुः। दधन्ति धन्वति वा धन्वा। खिलं शून्यं लाति खिलम्। न प्रहन्यते हलादिभिरप्रहतमकृष्टं क्षेत्रादि ॥ ५ ॥ जङ्गम्यते जगत्, वर्तमानेपृषद्बृहदिति (उ० २४१) साधुः, शत्रन्तत्वाद् ङीप्। विशन्त्यस्मिन् विष्टपति वा विष्टपम्, ष्टपस्तप प्रतिघाते। अयं जम्बुद्वीपनवमांशो भरतस्य क्षत्रियस्येदं भारतं नाम (वर्षं) भूम्येकदेशः, वृष्यते सिच्यते वर्षम्, तथा च– हिमवान्हेमकूटश्च निषधो मेरुरन्तरे। नीलः श्वेतश्च शृङ्गीवान् गन्धमादनमष्टमम्मिति सीमाविच्छिन्नान्य-न्यानीलावृत्तादीन्यष्टौ वर्षाणि। शरावत्या नद्या मर्यादायाः प्राक्सहचरितो दक्षिणो देशः प्राच्यः ॥ ६ ॥ शरावत्या अवधेः पश्चिमेन सहचरित उत्तरो देशः (उदीच्यः), यदाह-प्रागुदञ्चौ विभजते हंसः क्षीरोदके यथा। विदुषां शब्दसिध्यर्थं सा नः पातु शरावती (काशिका) ॥ प्रतिगतोन्तमुक्तावधेः सुटादिदेशः (?) प्रत्यन्तः। (मध्यमः) यन्मनुः – हिमवद्विन्ध्ययोरन्तर्यत्प्राग्विनशनादपि। प्रत्यगेव प्रयागाच्च मध्यदेशः प्रकीर्तितः (म० २।२१) ॥७॥ आर्या आवर्तन्तेस्मिन्नार्यावर्तः, आसमुद्रात्तु वै पूर्वादासमुद्रात्तु पश्चिमात्। तयोरेवान्तरं गिर्योरार्यावर्तं विदुर्बुधाः ॥ (मनु० २-२२) नियतं वर्ततेस्मिन् नीवृत्, नहिवृत्तिवृषीति (६।३।११६ / १०३७) दीर्घः। जनानां पदं जन-पदः, पुंस्त्वं लोकात्, जनैर्वास्यमानो राष्ट्राख्योयम्। दिश्यते देशः स्थानमात्रम्। विसिनोति विषयः। उपवर्ततेस्मिन्नुपवर्तनं, उपावर्तनमिति कात्यः। पञ्चैकार्था-नाहुः ॥८॥ गोष्ठसंशब्दनात्प्राग्वाच्यलिङ्गाः। तदस्मिन्नस्तीतिदेशेतन्नाम्नि (४।२।६७ / १३७९), कुमुदनडवेतसेभ्योड्मतुप् (४।२।८७ / १३०६), नडशादाड्ड्वलच् (४।२।८८ / १३०७) ॥ ९ ॥

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

3 One abounding in reeds; १० त्रिष्वागोष्ठान्, नडप्राये नड्वान् नड्वल इत्यपि ।
2 -in water lilies. कुमुद्वान् कुमुदप्राये, वेतस्वान् बहुवेतसे ॥
2 -in ratans;

2 -in green grass. ११ शाद्वलः शादहरिते, सजम्बाले तु पङ्किलः । 2 Clayey and muddy.

3 Watery, or wet. जलप्रायमनूपं स्यात् पुंसि कच्छस् तथाविधः ॥
1 Contiguous to water.

2 Full of stony or similar nodules. १२ स्त्री शर्करा शर्करिलः, शार्करः शर्करावति । 2 Sandy.
देश एवाऽऽदिमावेवमुन्नेयाः सिकतावति ॥

1 Watered (viz. its rice) from a river. १३ देशो नद्यम्बु-वृष्ट्यम्बु-संपन्न-व्रीहि-पालितः ।
1 Or by rain. स्यान् नदीमातृको देवमातृकश् च यथा-क्रमम् ॥

1 Ruled by a just king. १४ सु-राज्ञि देशे राजन्वान्, स्यात् ततो ऽन्यत्र राजवान् ।
1 Governed by a monarch. गोष्ठं गोस्थानकं, तत् तु गौष्ठीनं भूत-पूर्वकम् ॥
2 A fold for kine. 1 The site of a former one

शादेन शष्पेण नीलः, यच्छाश्वतः-शष्पकर्दमयोः शादः (६६१) । शीयतेऽस्मिञ् शादः, शादोऽस्यस्मिञ्शाद्वलो देशः, ड्वलच्, यथा-न हि कोटरसंस्थेऽग्नौ तरुर्भवति शाद्वलः, शाद्वला दूर्वेति च नीलत्वोपचारात् । पङ्कोऽस्यास्ति पङ्किलः, पिच्छादित्वादिलच् (लोमादियामादीति) । अनुगता आपोऽत्रानूपम्, ऊदनोर्देशे (६।३।९८) आकारस्य-ऊकारः, ततो दीर्घः, अप्रत्ययश्च । कपन्त्यापो यं स कच्छः, तथाविधोनूपप्रायः, कच्छमिति माला ॥ १० ॥ देशेलुबिलचौच (५।२।१०५) सिकताशर्कराभ्यांच (५।२।१०४) इत्यणमतुपौ तु सार्वत्रिकौ । तदाह-मध्यान्मः (४।३।८) इत्यत्रादेरित्युपसंख्यानात् (आदेश्चेतिवक्तव्यम्) आदिमौ शर्कराशर्करिलौ देशे नियमात् । शर्कराश्मप्राया मृत् । सिकतासिकतिलौ देशे, सर्वत्र तु सिकतः सिकतावांश्च ॥ ११ ॥ नद्यम्बुजातसस्यसंवर्धितो नदीमातृकः । वर्षजव्रीहिवर्धितश्च देशो देवमातृकः, देवोऽत्र मातास्येति ॥ १२ ॥ न पूजनात् (५।४।५९) इति सुराज्ञीति समासान्ताभावः, राजन्वान्सौराज्ये (८।२।१४) इति साधुः । देशो विषयोपलक्षणम्, यथा- राजन्वाँल्लोक उच्यते । राजमात्रयुक्ते देशे (राजवान्) । गावस्तिष्ठन्त्यत्र गोष्ठं, घञर्थेकविधानम् (२२०४), अम्बाम्बगोभूमीत्यादिना (८।३।९७) षत्वम् । यत्र गावः प्रागासन् (गौष्ठीनं), गोष्ठात्खञ्भूतपूर्वे (५।२।१८) इति खञ् ॥ १३ ॥ परितः सरन्त्यस्मिन्परिसरो ग्रामादेः परिच्छेदभूः । सिन्वन्ति बध्नन्ति तं सेतुः पुलिङ्गः । आलय (ल्य) तेभ्योत्रालिः स्त्रीलिङ्गः, सस्यार्थं जलाधारणोयम् । संक्रमस्तु तरणार्थो यन्माला-संक्रमो दुर्गसंचरः । वामं लूयते वामैर्वा वामलूरः । न-अकति नाकुः । वलन्ते प्राणिनोत्र

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh

2 Contiguous ground. १५ पर्यन्तभूः परिसरः, सेतुरालौ स्त्रियां पुमान् । 2 Bridge.
3 An anthill. वामलूरश् च नाकुश् च वल्मीकं पुन्-नपुंसकम् ॥
12 A road, path or way. १६ अयनं वर्त्म मार्गाऽध्व-पन्थानः पदवी सृतिः ।
सरणिः पद्धतिः पद्या वर्तन्येकपदीऽति च ॥
3 A good road. १७ अतिपन्थाः सुपन्थाश् च सत्पथश् चाऽर्चिते ऽध्वनि ।
5 A bad road. व्यध्वो दुरध्वो विपथः कदध्वा कापथः समाः ॥
2 The want of a road. १८ अपन्थास् त्वपथं तुल्ये, शृङ्गाटक-चतुष्पथे । 2 Meeting of four roads.
1 A long and lonesome way. प्रान्तरं दूर-शून्यो ऽध्वा, कान्तारं वर्त्म दुर्गमम् ॥ 1 A difficult road.
2 A league. १९ गव्यूतिः स्त्री क्रोशयुगं, नल्वः किष्कुचतुःशतम् ।
2 A furlong. 2 A highway. घण्टापथः संसरणं, तत् पुरस्योपनिष्करम् ॥
1 A street.
5 Heaven and earth २० 'द्यावापृथिव्यौ रोदस्यौ द्यावाभूमी च रोदसी ॥
3 Salt-sea. दिवस्पृथिव्यौ, गङ्गा तु रुमा स्याल् लवणाकरः ॥
इति भूमि-वर्गः १, अत्र मूलश्लोकाः १८, क्षे० २.

वल्मीकम् ॥ १४ ॥ [अयन्ते] वर्तन्ते मार्गन्ति–अतन्ति पद्यन्ते सरन्ति वानेनेति वाक्यानि । पद्भ्यां हन्यते पद्धतिः, हिमकापिहतिषुच ($\frac{६।३।५४}{९९२}$) इति पत् । पदमस्मिन्दृश्यं ($\frac{४।४।८७}{९६३९}$) इति यति पद्या, पद्यत्यतदर्थे ($\frac{६।३।५३}{९९१}$)। एके पादा अस्यामेकपदी कुम्भपद्यादौ कुम्भपदीषुच ($\frac{५।४।१३९}{८७८}$) साधुः॥१५॥ (अतिपन्था इ.) न पूजनात् ($\frac{५।४।५९}{९६४}$) इत्यत्र स्वतिग्रहणाद्, ऋक्पूरब्धूरिति ($\frac{५।४।७४}{९४७}$) समासान्तो न भवति । संश्वासौ पन्थाश्च सत्पथः, समासान्तोऽच् । विरुद्धोध्वा व्यध्वः, उपसर्गादध्वनः ($\frac{६।३।१०१}{९७२७}$) इत्यच् । विरुद्धः पन्था विपथः । कत्सितोध्वा पन्थाश्च (कदध्वा, इ०), कोःकत्तत्पुरुषेचि ($\frac{५।४।८५}{९५३}$) कापथ्यक्षयोः ($\frac{६।३।१०४}{९०३०}$)। विपथं कापथं च क्लीबमाहुः, यद्वामनः–पथः संख्याव्ययादे संख्याव्ययपूर्वकस्य पथः क्लीबता इति ॥ १६ ॥ (अपन्थाः) पथोविभाषा ($\frac{५।४।७२}{९५७}$) इत्यच्, अपथं नपुंसकम् ($\frac{२।४।३०}{८९५}$)। शृङ्गैरटन्ति–अस्मिञ्शृङ्गाटकम् । संस्थानकं (संस्थानं) चत्वरं च । प्रगता अन्तरेस्मात्प्रान्तरं दूरशून्यो मार्गः । कस्याम्भसोन्तमृच्छति कान्तारम् । कान्तारप्रान्तरे एकार्थे आहुः ॥ १७ ॥ (गव्यूतिः) गोर्यूतौ-छन्दस्युपसंख्यानं ($\frac{६।१।७९}{६३}$) अध्वपरिमाणेच ($\frac{६।१।७९}{६३}$) इत्यवादेशः । (नल्वः) णल गन्धे (बन्धे), किष्कुर्हस्तस्तेषां चतुःशती नल्वमिति माला, कात्यस्तु नल्वं [विंश] हस्तशतमाह । घण्टोपलक्षितानां हस्तिनां पन्था घण्टापथः, चाणक्योक्तोऽष्टदण्डः । सम्यक्सरन्त्यनेन संसरणं, यद्दुर्गः–बुधैः संसरणं वर्त्म गजादीनामसंकुलम् । पुरोपनिष्करं चोक्तम्–। तत्संसरणं पुरं राजधानी तस्या उपनिष्कराख्यमुपनिष्कीर्यतेत्र सैन्यमिति ॥ १८ ॥ दिवः पृथिव्याः संज्ञेयं ॥२०॥ इति भूमिवर्गः । १ ।

CC-0. Agamnigam Foundation. Digitized by eGangotri, Chandigarh

अथ पुर-वर्गः २

7 A town or city.
1 A suburb.

१ पूः स्त्री पुरी-नगर्यौ वा पत्तनं पुटभेदनम् ।
स्थानीयं निगमो, ऽन्यत् तु यन् मूल-नगरात् पुरम् ॥

2 The abode of harlots.
2 A market.
2 A shop.

२ तच्छाखानगरं, वेशो वेश्याजनसमाश्रयः ।
आपणस् तु निषद्यायां, विपणिः पण्यवीथिका ॥

3 A high street.
2 Heap of earth.
3 A rampart.
1 A bound hedge.

३ रथ्या प्रतोली विशिखा, स्याच् चयो वप्रमस्त्रियाम् ।
प्राकारो वरणः सालः, प्राचीनं प्रातन्तो वृतिः ॥

2 A wall.
1 One built with rubbish.
16 A house.

४ भित्तिः स्त्री कुड्यमेडूकं यदन्तर-न्यस्त-कीकसम् ।
गृहं गेहोदवसितं वेश्म सद्म निकेतनम् ॥

पक्षे तु पुरं नगरं च वाशब्दात्पत्तनसाहचर्यात्क्लीबे । पूर्यते पूः । नगाः सन्त्यस्य नगरं, नगपांसुपाण्डुभ्यो रः ($\frac{३।१।९९}{१९१४}$) । पतन्त्यस्मिन्पत्तनम् । पुटा भाण्डवासनानि भिद्यन्तेस्मिन् पुटभेदनम् । तिष्ठन्त्यस्मिन्नित्यष्टशतग्रामीमध्ये स्थानीयम् । नियतं गच्छत्यस्मिन्निगमः, गोचरसंचरेति ($\frac{३।३।११९}{३२९८}$) साधुः । नानार्थेधिष्ठानं, दुर्गकोट्टौ राजधानी च । मूलनगरं राजधानी ततोन्यत्समुदायस्थानं (शाखानगरं), शाखेत्युपाङ्गोपलक्षणम् ॥ १ ॥ [स्यात्साकेतमयोध्यायां विदेहा मिथिला पुरी । महोदया कन्यकुब्जा कान्यकुब्जं महोदयम् ॥ काशी वाराणस्यवन्ती विदिशा चोज्जयिन्यपि । प्राग्ज्योतिषं कामरूपं द्वारकाः द्वारवत्यपि ॥] विशन्त्यस्मिन्कामुका वेशः । आपणन्तेस्मिन्नापणः, गोचरसंचरेति ($\frac{३।३।११९}{३२९८}$) साधुः । निषीदन्त्यस्यां निषद्या, संज्ञायां-समजनिषदेति ($\frac{३।३।९९}{३२७६}$) क्यप् । विपण्यन्तेस्यां विपणिर्वणिग्वीथी । आद्यौ वणिक्स्थानेन्यौ हट्टवर्तन्यामाहुः, यच्छाश्वतः—आपणः पण्यवीथी च द्वयं विपणिसंज्ञकम् (३२५) ॥ २ ॥ रथं वहति रथ्या, तद्वहतिरथयुगेति ($\frac{४।४।७६}{१६२७}$) यत् । प्रतोल्यते प्रतोली । विगतशिखा मुण्डितेव सन्मताद्विशीर्यते जनसंमर्देन वा विशिखा । विपण्यादीन्पञ्चैकार्थानाहुः, यत्कौटिल्यः—विशिखायां सौवर्णिकप्रचारः (२-१४) । चीयते चयः प्राकाराधारः । उप्यतेस्मिन्वप्रः। प्रक्रियते प्राकारः, सादकारयोः कृत्रिम-इति (वा० ?) दीर्घः । वृणोति वरणः । स्यति पर्यन्तं करोति सालः । प्रागेव प्राचीनं विभाषाञ्चेरदिक्स्त्रियाम् ($\frac{५।४।८}{३०८०}$) इति खः, प्राचीरमित्येके । व्रियतेनया वृत्तिः। वाटो वाटी—आवेष्टकोपि ॥ ३ ॥ भिद्यते भित्तिः । कुड्यां साधु कुड्यं, पृषोदरादित्वात् ($\frac{६।३।१०९}{१०३४}$) डत्वम् । तत्कुड्यमन्तर्न्यस्तास्थि, एड्यत एडूकम् । गृह्णाति गृहं, गेहे कः ($\frac{३।१।१४५}{२९०६}$) उदवसिनोति स्मोर्ध्वमवसीयते वोदवसितम् । विशन्त्यस्मिन् वेश्म । सीदन्त्यस्मिन्सद्म सदनम् । निकेत्यतेस्मिन्निकेतनम् ॥ ४ ॥

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh

५ निशान्तं-पस्त्य-सदनं भवनाऽगार-मन्दिरम् ।
गृहाः पुंसि च भूम्न्येव निकाय्य-निलयाऽऽलयाः ॥

4 Audiance hall.
2 A cluster of four houses.
2 A hut made of leaves.

६ वासः कुटी द्वयोः शाला सभा, संजवनं त्विदम् ।
चतुःशालं, मुनीनां तु पर्णशालोटजो ऽस्त्रियाम् ॥

2 Buddhisti.
2 A working house.
2 A place of refreshment.

७ चैत्यमायतनं तुल्ये, वाजिशाला तु मन्दुरा । 2 A stable.
आवेशनं शिल्पिशाला, प्रपा पानीयशालिका ॥

1 A college.
2 A tavern.
2 Middle of a house.

८ मठश् छात्राऽऽदि-निलयो, गञ्जा तु मदिरागृहम् ।
गर्भागारं वासगृहमरिष्टं सूतिकागृहम् ॥ 2 Labor room.

1 Pavement.
2 Terrace.
2 A window or airhole.
2 A temporay hall.

९ 'कुट्टिमो ऽस्त्री निबद्धा भूश्, चन्द्रशाला शिरोगृहम्' ।
वातायनं गवाक्षो, ऽथ मण्डपो ऽस्त्री जनाश्रयः ॥

निशाम्यन्त्यस्मिन् निशान्तं, निशाया अन्तोऽत्रेत्येके । अपस्त्यायति संघातीभवति पस्त्यम् । भवन्त्यस्मिन् भवनम् । अग्यतेस्मिन्नगारं, अगान्वृक्षानियर्ति वा । मन्यते सुप्यतेत्र मन्दिरम् । (गृहाः) भूम्नि बहुत्वे, गृहाणीत्यप्याहुः । निचीयते निकाय्यः, पाय्यसान्नाय्यनिकाय्येति ($\frac{३।१।१२९}{२८९७}$) साधुः । निलीयन्तेस्मिन्निलयः । आलीयन्तेस्मिन्नालयः, पुंसिसंज्ञायांघः ($\frac{३।३।११८}{३२९६}$) ॥ ५ ॥ उष्यतेस्मिन्वासः । कुट्यतेस्यां कुटी । शा(श)लन्त्यस्यां शाला, शालते वा । सह भान्त्यस्यां सभा । वसतिर्वाम्रतेयी निवेशनमावसथः संस्त्यायोपि । सजन्ति संजवन्ते वास्मिन्सजवनम् । चतस्रः शालाः समाहृताश्चतुःशालम् । इदं गृहं मुनिसंबन्धि पर्णशालाख्यम् । उटैर्देश्यां तृणपर्णैर्जायत उटजम् ॥ ६ ॥ चित्याया इदं चैत्यं देवकुले[ल]महावृक्षोध्वगा[वृक्षाद्युपा]श्रयः । आयतन्तेस्मिन्नायतनम् । मन्दन्तेत्र मन्दुरा । आविशत्यावेशनं गृहादन्यत्कारूणां कर्मस्थानं, तेन शिल्पशालेति सभ्यः पाठः । प्रपिबन्त्यस्यां प्रपा, घञर्थे कविधानम् (वा० $\frac{२२२४}{३२३४}$) ॥ ७ ॥ मठ्यतेस्मिन्मठः, मठ निवासे । छत्रशीलाः विद्यार्थिनश्छात्राः, छत्रेण गुरुसेवा लक्ष्यते, छत्रादिभ्योणः ($\frac{४।४।६२}{१६१२}$) । सत्रशाला प्रतिश्रयश्च । बौद्धानां तु विहारोस्त्री । गञ्जन्ति रटन्त्यस्यां क्षीबा गञ्जा । वासाय वासमध्ये वा गृहम्, अपवरकं कोष्ठम् । न रिष्यते हिंस्रैः कृतरक्षत्वादरिष्टम् ॥ ८ ॥ गवामिवाक्षीणि यत्रेति गवाक्षः, इन्द्राक्षयोः समासेचेत्यवङ् ($\frac{६।१।१२३।१२४}{८८ \quad ८९}$) । इन्द्रकोशो मतङ्गकः, [मत्तालम्बोपाश्रयः स्यात्प्रग्रीवो मत्तवारणः] । मण्ड्यते नानालोकैर्मण्डपः । हरति मनो हर्म्यम् । आदिशब्दाद्वासगृहादि । वास इत्येव, प्रसीदन्त्यस्मिन्प्रासादः, सादकारयोःकृत्रिमइति (वा० ?)

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

1 The abode of the wealthy. १० हर्म्याऽऽदि धनिनां वासः, प्रासादो देव-भूभुजाम् ।
1 A royal residence. सौधो ऽस्त्री राजसदनमुपकार्योपकारिका ॥ 4 A king's house.

4 Its varities. ११ स्वस्तिकः सर्वतोभद्रो नन्द्यावर्ताऽऽदयो ऽपि च ।
विच्छन्दकः प्रभेदा हि भवन्तीऽऽश्वर-सद्मनाम् ॥

4 The queen's apartment. १२ स्त्र्यऽगारं भूभुजामन्तःपुरं स्यादवरोधनम् ।
2 An airy room, a top of the house. शुद्धान्तश् चाऽवरोधश् च, स्यादट्टः क्षौमम-स्त्रियाम् ॥

3 A terrace before the house-door. १३ प्रघाण-प्रघणाऽलिन्दा बहिर्-द्वार-प्रकोष्ठके ।
2 The threshold. गृहावग्रहणी देहल्यङ्गणं चत्वराऽजिरे ॥
3 A court or yard.

1 The lower threshold of door. १४ अधस्ताद् दारुणि शिला, नासा दारुऽपरि स्थितम् । 1 Upper threshold.
2 A private door. प्रच्छन्नमन्तर्द्वारं स्यात्, पक्षद्वारं तु पक्षकम् ॥
2 A back door.

2 The edge of the thatch. १५ वलीक-नीध्रे पटल-प्रान्ते, ऽथ पटलं छदिः । 2 Roof.
2 The wood of a thatch. गोपानसी तु वलभी छादने वक्र-दारुणि ॥

दीर्घः ॥ ९ ॥ सुधाशुभ्रं सौधम् । उपक्रियत उपकरोति वा पटमण्डपादि राजसदनम् । स्वस्ति कायति स्वस्तिकः । नन्दी–आवर्तोऽत्र नन्द्यावर्तः । आदिशब्दादुच्चकवर्धमानाद्याः ॥ १० ॥ विच्छर्दकप्रभेदा रचनाविशेषाः, उच्छृदिर्दीप्तौ, विशिष्टेच्छानिर्मितो विच्छन्दक इत्येके । स्त्रीणामगारं, अवरुध्यन्तेऽस्मिन्नवरोधनम् ॥ ११ ॥ शुद्धाः सुरक्षा अन्ता अत्र शुद्धान्तः । एते महिष्यामपि तात्स्थ्याद्वर्तन्ते । अट्टन्त्यट्टय [ट्टयते] त्र वाट्टोट्टालकः, अट्ट अतिक्रमहिंसयोः, प्राकाराग्रे रणगृहमिति कौटिल्यः । (क्षोमः) क्षुवन्ति शब्दायन्ते योधाः (अत्र), अतः क्षौमः प्राकारधारणार्थोऽभ्यन्तरः क्षोमाख्य इत्येके । प्रहण्यते प्रघणः प्रघाणः, अगारैकदेशेप्रघणःप्रघाणश्च (३।३।७९ ३।२।६६) । अल्यते भूष्यतेलिन्दः। द्वारप्रकोष्ठाद्बहिर्द्वाराग्रवर्तिचतुष्किकान्ते–उपालिन्दकाख्या ॥१२॥ द्वाराग्रं गृह्यते यथा, वीथ्याख्येत्येके, बुध्नोदुम्बरमिति सभ्योर्थः । अवगृह्यते द्वारशाखानयावग्रहणी । दिह्यते देहली । अङ्गत्यत्राङ्गनम् । चत्यते चत्वरम् । अजन्त्यत्राजिरम् । स्तम्भादीनामाधारदारु शिलाख्यं, स्तम्भोर्ध्वं दार्वन्तरस्थापनार्थं यदासज्यते सा शिलेति गोडः । स्तम्भादेरित्यर्थः, द्वारशाखाधऊर्ध्वदारुणी शिलानासे इति माला, यदाह–नासा दारूपरि द्वारस्याधो दारु शिला स्त्रियाम् । ऊर्ध्वोदुम्बरमुत्तरासङ्गोधउदुम्बरं देहलीत्याचार्याः ॥ १३ ॥ (प्रच्छन्नं) खढक्किकाख्यम् । पार्श्वद्वारमेकमतदिति कात्यः, यदाह–प्रच्छन्नमन्तर्द्वारं यत्पक्षद्वारं तदुच्यते । छादनान्तो वलीकाख्यः, वलति संवृणोतीति, कुड्याद्बहिर्वीथी येन च्छाद्यते । नियतमिन्द्ध नीयते वाम्भोनेन नीध्रम् । पटं लाति पटलम् । छाद्यतेनेनेति छदिः, इसन्तः क्लीबे, इस्मन्त्रन्क्विपुच (६।४।३५ २।९।५) इति ह्रस्वः ॥१४॥ गोपायति गोपानसी । पटलाधारो वंशपञ्जरो वलभी

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh

2 A dovecot.
3 A door, or gate.
2 A covered terrace in the yard.

१६ कपोतपालिकायां तु विटङ्कं पुन्-नपुंसकम् ।
स्त्री द्वार् द्वारं प्रतीहारः, स्याद् वितर्दिम् तु वेदिकः ॥

2 Decoration of the gatepost.
1 A raised place over the gate.

१७ तोरणो ऽस्त्री बहिर्द्वारं, पुरद्वारं तु गोपुरम् । 1 A city gate.
कूटं पूर्-द्वारि यद्धस्तिनखम् तस्मिन्नथ त्रिषु ॥

2 A door.
1 Its bolt or bar.
2 Stairs.
2 A ladder.

१८ कपाटमररं तुल्ये, तद्-विष्कम्भो ऽर्गलं न ना ।
आरोहणं स्यात् सोपानं, निश्रेणिम् त्वधिरोहिणी ॥

2 A broom.
2 Dust, or sweepings.
2 The entrance of a house.

१९ संमार्जनी शोधनी स्यात्, संकरो ऽवकरम् तथा ।
क्षिप्ते, मुखं निःसरणं, संनिवेशो निकर्षणम् ॥

2 An open space in a town.

वलभ्याश्चूडा वा, वल संवरणे । विशिष्टं टङ्क्यते विटङ्कः, पक्षिविश्रामार्थं बहिर्निर्गमितं दारु, वक्रदार्वाधारः, पक्षिपङ्क्तिर्हि तत्रोत्कीर्यते ॥ १५ ॥ प्रतिहियन्ते प्रतिरुध्यन्तेनेन प्रतीहारः । नानार्थे वलजम् । दारुपरिष्कृता चतुरस्रा विश्रान्तिभूः, विगतं तर्दनं यत्रेति वितर्दिः । विदन्त्यस्यां वेदी । मङ्गलार्थं तुरन्यत्र तोरणं द्वाराग्रे स्तम्भोपरि रचितं सिंहद्वाराख्यम् मङ्गलसक्तोरणोर्ध्वे भवेद्वन्दनमालिका । गोप्यते गोपुरं प्रतोली ॥ १६ ॥ दुर्गद्वारावतरणार्थः क्रमनिम्नो हस्तिनखाभो मृत्कूटः–अपसोपानाख्यः (कूटम्), बहिरतटमन्तःसोपानयुक्तं युद्धार्थमित्येके । कं शिरः पाटयति प्रविशतां कवाटो द्वारपट्टः, जपादित्वाद्वत्वम् (ग०?) । इयर्त्यररं, अररि च । विष्कम्भो बन्धनिमित्तं, विष्कम्भनात्यवष्टम्भनात्यावश्यम् । विष्कम्भीत्येके पेठुः । अरेणाकर्षणेन गलत्यर्गलं दारुमयो लोहो वा दण्डः । न ना पुमान्न भवति । परिघश्च ॥ १७ ॥ आरुह्यतेवरुह्यते वानेनारोहणम् । सहोपानमस्त्यस्मिन् सोपानम् । निश्रयति भित्तिं नियता श्रेणिः सोपानपङ्क्तिर्वात्र निश्रेणिः । अधिरोहन्त्यवरोहन्ति च यया दारुमय्या साधिरोहणी । बहुलाख्या रजोवारणी, मार्जन्या पूतं हि बहुलीकृतं धान्याद्याहुः । समूहनी पवनीति स्मार्ताः । बहुकरी वर्धनी च । (क्षिप्ते) धूल्यादाविति शेषः । अवकीर्यतेवकरः ॥ १८ ॥ गृहादेर्निःस्रियते प्रविश्यते च येन तन्मुखं, यत्कौटिल्यः–(२।३।२१) मुखसमः संक्रमो मुखानुवादेन निःसरणविधिर्वा । समन्तान्निविशन्तेत्र संनिवेशः पुरादेर्बहिर्विहरणभूः । निवृत्तं कर्तणमत्र निकर्षणः । संवसन्त्यत्र संवसथः । ग्रस्यते भोगिभिर्ग्रामः । द्रगं ग्रामधानं खेटकं च । वसन्त्यस्मिन्वास्तुः, वसेस्तुन् (उ. ७८) अगारेणिञ्च (उ. ७९) ॥१९॥ अन्ते चिह्नार्थं शल्यप्रक्षेपादुपशल्यं, उपशलने समीपभ्रपणे साधु वा । सीयते बध्यते सीमा, [मनः] ($\frac{३।२।८२}{२९९२}$) डाबुभाभ्यामन्यतरस्याम् ($\frac{४।१।१३}{४६१}$) सीम्न्याघाटकटौ (?) मालकोस्त्री ग्रामान्तराटवी । घोषन्ति

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh

2 A village.
2 The site of a abitation.
2 Space near a village, &c.

२० समौ संवसथ-ग्रामौ, वेश्मभूर् वास्तुर-स्त्रियाम् ।
ग्रामान्त उपशल्यं स्यात्, सीम-सीमे स्त्रियामुभे ॥

2 A boundary or limit.

2 A station of erdsmen.
2 An abode of the owest men.

२१ घोष आभीरपल्ली स्यात्, पक्कणः शबरालयः ।
इति पुर-वर्गः २, अत्र मूलश्लोकाः २०, क्षेपकश्लो० ॥

अथ शैल-वर्गः ३

13 A mountain.

महीध्रे शिखरि-क्ष्माभृदहार्य-धर-पर्वताः ॥
१ अद्रि-गोत्र-गिरि-ग्रावाऽचल-शैल-शिलोच्चयाः ।

2 A range, surrounding the earth.

लोकालोकश् चक्रवालस्, त्रिकूटस् त्रिककुत् समौ ॥

2 A hill with three peaks.

2 The western mountain.
1 Divers mountains.

२ अस्तस् तु चरमक्ष्माभृदुदयः पूर्वपर्वतः । 2 The eastern mountain.
हिमवान् निषधो विन्ध्यो माल्यवान् पारियात्रकः ॥
३ गन्धमादनमन्ये च हेमकूटाऽऽदयो नगाः ।

7 A stone or rock.

पाषाण-प्रस्तर-ग्रावोपलाऽश्मानः शिला दृषत् ॥

गावोत्र घोषः । आबिभ्यत्यभित ईरयन्ति वा गा आभीरा गोपाः । पल्लयते पल्लिः—गृहालिः, कुटिग्रामकयोः पल्लिरिति तु शाश्वतः (६७८) । पच्यतेऽस्मिन् पक्कणः । शवन्ति भ्रमन्ति शवरा आरण्यचाण्डालाः ॥ २० ॥ इति पुरवर्गः । २ ।

महीं धारयति महीध्रः, मूलविभुजादित्वात्कः (कप्रकरणेमूलविभुजादिभ्य-उपसंख्यानम्) । हर्तुमशक्योहार्यः । ध्रियते धरः । पर्वाणि सन्त्यस्य पर्वतः, तत्पर्वमरुद्भ्याम् (वा० ३।२।३१ / १०।२।८) अद्यतेद्रिः । गां त्रायते गोत्रः । गीर्यते गिरिः । शिलानामयं शैलः, मत्वर्थेवाण् (अणच) ॥ १ ॥ अन्तर्लोक्यते बहिश्च न लोक्यतेनर्कत्वाल्लोकालोकः । चक्राकारेण वलते वा चक्रवाडः, वाडृ आप्लाव्ये, आवेष्टय द्वीपान् स्थितो ह्यसौ । त्रिककुत्पर्वते (५।४।१।४७ / ८८५) इति साधुः । अस्यत्यर्कादीनस्यते वास्तः। चरन्त्यत्र चरमः पश्चिमो मन्दराख्यः। उदयन्तेस्माद् ग्रहा उदयः ॥२॥ नियतं सीदन्त्यस्मिन् निषधः । वि-इध्यते विन्ध्यः,अध्न्यादिः (उ० ५५१) माल्याकारतास्यास्ति माल्यवान् । परियात्रायां भवः पारियात्रिकः स्वारोहत्वात् । गन्धेन मादयति गन्धमादनम्, [प्रयोगे च पुंलिङ्गता दृश्यते, सुगन्धिर्गन्धमादनः । (कु. ६—४६) इति कालिदासः] । आदिशब्दान्मलयमन्दराद्याः । हिमाचलोऽद्रिराजः स्यान्मलय-

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

3 A peak or summit. 3 A precipice. 1 The side of a mountain. 3 Table land.
४ कूटो ऽस्त्री शिखरं शृङ्गं, प्रपातस् त्वतटो भृगुः ।
कटको ऽस्त्री नितम्बो ऽद्रेः, स्नुः प्रस्थः सानुर-स्त्रियाम् ॥

2 A fountain. 3 A cascade. 2 An artificial cave. 2 A natural cave.
५ उत्सः प्रस्रवणं, वारिप्रवाहो निर्झरो झरः ।
दरी तु कन्दरो वा स्त्री, देव-खात-बिले गुहा ॥

2 Rocks fallen from a mountain. 1 Rocks fallen slanting.
६ गह्वरं, गण्डशैलास् तु च्युताः स्थूलोपला गिरेः ।
दन्तकास् तु बहिस् तिर्यक्-प्रदेशान् निर्गता गिरेः ॥

2 A mine. 2 Hills near a mountain. 1 Land near a mountain.
७ खनिः स्त्रियामाकरः स्यात्, पादाः प्रत्यन्तपर्वताः ।
उपत्यका ऽद्रेरासन्ना भूमिरूर्ध्वमाधित्यका ॥ 1 Land on it.

1 A fossil, or mineral. 2 A place overgrown with creepers, &c.
८ धातुर् मनःशिलाद्यद्रेर् गैरिकं तु विशेषतः । 1 Red chalk.
निकुञ्ज-कुञ्जौ वा क्लीबे लताऽऽदि पिहितोदरे ॥
इति शैल-वर्गः ३, अत्र मूलश्लोकाः ८, क्षे० ॥

श्चन्दनाचलः ॥३॥ पिनष्टि, प्रस्तृणाति, गिरति, उपलाति, अश्नाति, शिनोति, दृणातीति वाक्यानि । कूट(य)ति कूटं, कूट्यते वार्कदावाभ्याम्, कूट दाहे । शिखास्यास्ति शिखरं, शिखायाह्रस्वश्चेतिरः (वा० ?) । शृणाति शृङ्गम् । प्रपतत्यस्मात्प्रपातः । तटशून्योऽतटः । प्रपातस्तु तटो भृगुरिति पाठे प्रपत्यते यतस्तटात्स भृगुः । बिभर्ति भृज्ज्यते वा भृगुः ॥ ४ ॥ कटत्यावृणोति कटको मध्यभागो मेखलाख्यः । स्नौत्यम्भः स्नुः । प्रतिष्ठतेस्मिन्समभूभागत्वात्प्रस्थः, घञर्थे कविधानम् (वा० $\frac{३२०४}{३२३४}$) । सनोति ददाति सुखं सानुः । द्वित्वात्प्रस्थोप्यस्त्री । उनत्यम्भसा उत्सः । प्रस्रवत्यस्मात् प्रस्रवणम् । निर्झीर्यते निर्झरः । प्रतातम्बु[नि]झीर्यते निर्झरझरावित्येके ॥ ५ ॥ दीर्यते दरी, पचादित्वादच् (नन्दिग्रहोति) । कुत्सितं दीर्यते कं दृणाति वा कन्दरा, पक्षे रूपात्पुमान् कन्दरोपि । समे इत्यर्थः, देवखातमकृतकं, (बिलं) बिल भेदने । गूहति गुहा । अगे ह्वरति गाह्यते वा गह्वरम् । अकृतकबिलविषये गुहा गह्वरं चेत्येके पूर्वेण सह संबध्नन्ति, यत्कात्याः–देवखाते बिले गुहा, शाश्वतोऽप्याहगह्वरं बिसदम्भयोः (६५६) । गण्डाः शैला इव स्थूलत्वाद् गण्डशैलाः, (च्युताः) भूकम्पादिना गलिताः ॥६॥ खन्यन्ते लोहादयोस्याः खनिः खानिश्च । आकीर्यन्ते धातवोस्मिन्नाकरः । गञ्जापि, यच्छाश्वतः–भाण्डागारं विदुर्गञ्ज खनौ गञ्जा सुरागृहे (४०४) । मुख्यपर्वतान्ते क्षुद्रपर्वताः पादा इवाधःस्थत्वाच्चरणाच्च । अद्रेर्भूमिरित्येव, उपाधिभ्यांत्यकन्नासन्नारूढयोः ($\frac{५।२।३४}{१८३५}$), नयासयोः ($\frac{७।४।४५}{४६४}$) इत्यत्र त्यकनः–(त्यकनश्चनिषेधः) उपसंख्यानादित्वाभावः ॥ ७ ॥ धत्ते धातुः । आदिशब्दाद्धिङ्गुलादि, यदाहुः–सुवर्णरूप्य-

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

अथ वनौषधि-वर्गः ४

6 A forest or grove.
2 A large forest.

१ अटव्यरण्यं विपिनं गहनं काननं वनम् ।
महारण्यमरण्यानी, गृहारामास् तु निष्कुटाः ॥

2 Garden.
1 One planted by a state minister, &c.

२ आरामः स्यादुपवनं कृत्रिमं वनमेव यत् ।
अमात्य-गणिका-गेहोपवने वृक्षवाटिका ॥

2 A royal public one.
1 Queen's pleasure ground.

३ पुमानाक्रीड उद्यानं राज्ञः साधारणं वनम् ।
स्यादेतदेव प्रमदवनमन्तःपुरोचितम् ॥

5 A row or range.
2 A continuous line.

४ वीथ्यालिरावलिः पङ्क्तिः श्रेणी, लेखास् तु राजयः ।

2 A multitude of groves.
2 A germin.

वन्या वनसमूहे स्यादङ्कुरो ऽभिनवोद्भिदि ॥

13 A tree.

५ वृक्षो महीरुहः शाखी विटपी पादपस् तरुः ।
अनोकहः कुटः शालः पलाशी द्रुर्द्रुमाऽऽगमाः ।

ताम्राणि हरितालं मनःशिला ॥ गैरिकाञ्जनकासीसलोहसीसाः सहिङ्गुलाः ॥ गन्धकोभ्रकमित्याद्या धातवो गिरिसंभवाः ॥ विशेषेण धातुर्धातुशब्देनैव प्रसिद्धेः, गैरिकं हेमेत्येके, गिरौ भवमिति गिरिणाविग्रहोगिरिकादण् । स्थान इति शेषः । कुञ्जिरावरणार्थो लोकात् । व्याधिकरणे सप्तम्यौ ॥ ८ ॥ इति शैलवर्गः । ३ ।

अटन्त्यस्यामटवी । इग्रति भ्राम्यन्त्यत्रारण्यम् । वेपन्ते भयेनात्र विपिनं, वेपितुह्योर्ह्रस्वश्च (उ० २१०) इतीनन् । गाह्यते गहनम् । कन्यते गम्यतेऽस्मिन्काननम् । कन्यते सेव्यते वनं वृक्षबहुलं स्थानम् । पूर्वैः सहानयोरैक्यमाहुः । सत्त्रं नानार्थे । हिमारण्ययोर्महत्त्वेऽडीषानुकौ (वा० २४७२/७०५) । कुटाद् गहान्निष्क्रान्ता निष्कुटाः ॥ १ ॥ आरमन्त्यस्मिन्नारामः । करणेन निर्वृत्तः कृत्रिमो वृक्षसमूहः । समीपं वनस्योपवनम्, तुल्यत्वेन नैकट्यात् । अमात्यगणिकयोरुपलक्षणार्थत्वात्सार्थावाहादीनामपि ॥ २ ॥ आक्रीडन्त्यस्मिन्नाक्रीडः । उद्यान्त्यस्मिन्नुद्यानम् । साधारणं राज्ञीभिः सह । प्रमदार्थं वनं प्रमदानां वा प्रमदवनम्, ड्यापोः संज्ञाछन्दसोर्बहुलं (६।३।६३/१०७१) इति ह्रस्वः । अन्तःपुरं तत्स्था देव्यः ॥३॥ वियन्त्यनया वीथिः । आलाप्यालिः । आवलत्यावलिः । पञ्च्यते पङ्क्तिः । श्रीयते श्रेणिः । सान्तरा पङ्क्तिर्निरन्तरा लेखा, यदाह मूले—लेखास्तु राजय इति । लिख्यन्ते लेखाः । राजन्ते राजयः, पङ्क्त्यपङ्क्तिसाधारणाः । (वन्या) पाशादिभ्यो यः (४।२।४९/१२५८) । अङ्क्यतेऽङ्कुरः, अकि लक्षणे । उद्भिद्यत उद्भित् । प्ररोहोपि ॥ ४ ॥ वृश्च्यते छिद्यते वृक्षः, वृक्षति वृणोति वा । शाखी, व्रीह्यादौ (व्रीह्यादिभ्यश्च) । पादैर्मूलैः पिबति पादपः, एवमङ्घ्रिपः [चरणपश्च प्रसिद्धः] । [तर-

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh

1 One fructifying from blossoms.
1 One without apparent blossoms
1 An annual plant.

६ वानस्पत्यः फलैः पुष्पात्, तैर-पुष्पाद् वनस्पतिः ।
ओषध्यः फल-पाकाऽन्ताः स्युर्,वन्ध्यः फलेग्रहिः ॥
2 Fruitful.

3 Barren.
3 Bearing fruit.
8 Blown, as a flower.

७ वन्ध्योऽफलोऽवकेशी च, फलवान् फलिनः फली ।
प्रफुल्लोत्फुल्ल-संफुल्ल-व्याकोश-विकच-स्फुटाः ॥

८ फुल्लश् चैते विकसिते, स्युरवन्ध्याऽऽदयस् त्रिषु ।
स्थाणुर् वा ना ध्रुवः शङ्कुर्, ह्रस्व-शाखा-शिफः क्षुपः ॥

3 The trunk of a lopped tree.
1 A small tree.
3 A shrub.
3 Creeper.
3 A spreading one.

९ अप्रकाण्डे स्तम्ब-गुल्मौ, वल्ली तु व्रततिर् लता ।
लता प्रतानिनी वीरुद् गुल्मिन्युलप इत्यपि ॥

न्त्यनेनातपं तरुः । अनसः शकटस्याकं गतिं हन्ति–अनोकहो निर्वचनात्] । द्रुर्वृक्षैक-देशोऽस्यास्ति द्रुमः, द्युद्रुभ्यां मः (५।२।१०८) । द्रुशब्दोऽपि, अवयवेषु हि वृत्ताः शब्दाः समुदायेष्वपि वर्तन्त इति । न गच्छत्यगमः । अगनगौ नानार्थे । कुजोऽग-च्छोऽपि ॥ ५ ॥ वनस्यपतिर्वनस्पतिः, पारस्करादित्वात् (३।१।१५७) सुट्, भवेर्थे दित्यदित्येति (४।१।८५) ण्यः । पुष्पेभ्यो जातैः फलैर्हेतुभिः (वानस्पत्यः) । पुष्पं विना तैः फलैः (वनस्पतिः) । ओषं रुजं धयत्योषधिः, फलपाक एवान्तो यस्याः । फलानि गृह्णातीति, फलेग्रहिरात्मंभरिश्च (३।२।२६) इति साधुः ॥ ६ ॥ बध्नाति फलं बन्ध्यः । अवके शून्ये–ईष्टेऽवकेशी । फलं बह्वस्यास्तीति, फलबर्हाभ्या-मिनच् (वा० ३।२।१५) । प्रफलति स्म प्रफुल्लः, त्रिफला विशरणे, क्ते–उत्परस्यातः (७।४।८८) इत्युत्वम् (तिचेत्युत्वम्) । अनुपसर्गात्फुल्लक्षीबेति (८।२।५५) फुल्लः साधुः । उत्फुल्लसंफुल्लयोरुपसंख्यानम् (वा० ४८४३), प्रफुल्लेति पाठे फुल्ल विकसने, अच् । विगत आकोशः संकोचोऽस्य व्याकोशः । विशेषेण कचति विकचः । स्फुटति स्फुटः ॥ ७ ॥ (त्रिषु) वाच्यलिङ्गत्वात् । (स्थाणुः, इ०) तिष्ठति ध्रुवति शङ्कतेऽस्मात् । ह्रस्वाः शाखाः शिफामूलानि चास्य, क्षुप्यते क्षुपः सूक्ष्मलतादिप्रतानः ॥ ८ ॥ प्रकाण्डो गण्डस्तद्रहिते, उद्भिद्विशेषः स्तम्बस्तृणसंघातो वा, तिष्ठतीति स्थः, स्थःस्तोम्बजबकौ (उ० ५४५) गुडति गुल्मः । नानार्थे विटपः । वलते वेष्टते वल्ली गुडूच्यादिर्माधव्यादिश्च । वृक्षशाखापि (लता), यच्छाश्वतः– लता व्रततिराख्याता लता शाखा च शाखिनाम् (४७५) प्रकृष्टा ततिरस्याः प्रततिव्रततौ च, जपादिष्वाद्वत्वं (ग० ?) । लाति (लतति) लता । लतानां प्रतानोऽस्त्यस्याः प्रतानिनी वा लता विरुत्, यत्कात्यः–वीरुत्स्वपर्ण-जटिला प्रतानशतगामिनी । विरोहति वीरुत्, वीरुदिति निपातनादुपसर्गस्य दीर्घः, नहिवृतीति (६।३।११६) दीर्घः, न्यङ्क्वादित्वाद्वत्वम् (७।३।५३ ।)

CC-0. Agamnigam Foundation. Digitized by eGangotri. Supported by Chandigarh

3 Height of a tree, hill, &c.
2 The trunk.

१० नगाऽऽद्याऽऽरोह उच्छ्राय उत्सेधश् चोच्छ्रयश् च सः ।
अ-स्त्री प्रकाण्डः स्कन्धः स्यान् मूलाच्छाखाऽवधिस् तरोः ॥

2 A branch.
2 A large branch.
2 A fibrous root.
1 From a radicant branch.

११ समे शाखा-लते, स्कन्धशाखा–शाले, शिफा–जटे ।
शाखा-शिफा ऽवरोहः स्यान्, मूलाच् चाऽग्रं गता लता ॥
1 Scandent fibres.

2 The top of a tree
3 Its root.

१२ शिरोग्रं शिखरं वा ना, मूलं बुध्नो ऽङ्घ्रि–नामकः ।

2 The pith.
3 The bark.

सारो मज्जा नरि, त्वक् स्त्री वल्कं वल्कलम–स्त्रियाम् ॥

2 Wood.
3 Fuel.

१३ काष्ठं दार्विन्धनं त्वेध इध्ममेधः समित् स्त्रियाम् । 2 Samidhs.

2 The hollow of a tree.
2 A compound pedicel.

निष्कुहः कोटरं वा ना, वल्लरिर् मञ्जरिः स्त्रियौ ॥

विरुणद्धि वा, (वीरुत्), अन्येषामपि दृश्यते (३।२।१०१ / ३०११) इति दीर्घः । उल्यते उलपः, उलः सौत्रो दीप्त्यर्थः आवरणार्थो वा, उलप्यते वा (उलपः) ॥९॥ आरुह्यते आरोह औन्नत्यम् । उच्छ्रयणमुच्छ्रायः, उदिश्रयतियौतीति (३।३।४९ / ३२२४) अनित्यो घञ् , यल्लक्ष्यं–पतनान्ताः समुच्छ्रयाः (म. शांतिपर्व)। उत्सेध उन्नतिः, यच्छाश्वतः–उत्सेधो वपुरुन्नतिः (६२५) । प्रकाम्यते प्रकाण्डो वृक्षजङ्घा । स्कन्द्यत आरुह्यते स्कन्धः ॥ १० ॥ (शाखा) शाख व्याप्तौ, इत्यत्येनां वा । शिखापि । समे इत्येव । शालति शाला शायते वा, यच्छाश्वतः–शाला तरुस्कन्धशाखा शालां भवनमिष्यते (४९४) । शिनोति शेते वा शिफा । जटति जटनं वा जटा वृक्षादिमूलं, जट संघाते, भिदाद्यङ्, षिद्भिदादिभ्योङ् (३।३।१०४ / ३२८१) । एवं शिफालतयोः पर्यायानुक्त्वा स्वरूपमाह । अधो रोहन्ति शाखाः शिफाः, शिफारूपा शाखावरोहोऽश्वत्थादेरित्युपाध्यायः । बुध्नादूर्ध्वं गता लता । यदाह मूले–मूलाच्चाग्रं गता लतेति ॥ ११ ॥ वृक्षादेर्मूर्धाग्राख्यः । शिखरं तु वा ना पक्षे पुमान् , रूपात्पक्षे क्लीबे । (मूलं) मूल रोहणे । बुध्यतेऽनेन बुध्नो वृक्षादेः पादपर्यायः । सरति सारः, सृस्थिरे (३।३।१७ / ३१८३) इति घञ् । मज्जति मज्जा, [मज्जन् पुंसि] । त्वच संवरणे । वल्यते छाद्यतेऽनेन वल्कं, वल संवरणे । वल्लं लाति वल्कलं, श्यामलवत् ॥ १२ ॥ काश्यते काष्ठम् । दीर्यते दारु । विशेषमाह–इन्धनं त्विति । इन्द्धेऽनेनाग्निरिन्धनमिध्मं च, इषियुधीन्धीति (उ० १५०) मक् । आद्यमेध एधेरसुनि दाह्यदार्वर्थे, अपर एधः–अवोदैधौद्म्रेति (६।४।२९ / ३१८७) इन्धेर्वञि साधुः । होमार्थे समिध्यतेऽनया समित् । निष्कुष्यते निष्कुहयते वा निष्कुहः, निष्कुट इत्येके । कुटति कोटरो वृक्षगर्तः, ना पुमान्, रूपात्पक्षे क्लीबे । वल्लते वल्लरिः । मन्यते मञ्जरी चूतादेर्न-

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh

6 A leaf.
2 A sprout or shoot.
1 The branch and its shoot.

१४ पत्रं पलाशं छदनं दलं पर्णं छदः पुमान् ।
पल्लवो ऽस्त्री किसलयं, विस्तारो विटपो ऽस्त्रियाम् ॥

1 Fruit.
2 The foot stalk.
1 Raw fruit.
1 Dry.

१५ वृक्षाऽऽदीनां फलं सस्यं, वृन्तं प्रसवबन्धनम् ।
आमे फले शलाटुः स्या,च्छुष्के वानमुभे त्रिषु ॥

2 A bud or a germ.
2 An unblown flower.
2 A cluster of blossoms.
2 An opening bud.

१६ क्षारको जालकं क्लीबे, कलिकः कोरकः पुमान् ।
स्याद् गुच्छकस् तु स्तबकः, कुड्मलो मुकुलोऽस्त्रियाम् ॥

5 A flower.
2 Its nectar or honey.
2 Its dust or farina.

१७ स्त्रियः सुमनसः पुष्पं प्रसूनं कुसुमं सुमम् ।
मकरन्दः पुष्परसः, परागः सुमनोरजः ॥

१८ द्वि-हीनं प्रसवे सर्वं, हरीतक्याऽऽदयः स्त्रियाम्, ।
आश्वत्थ-वैणव-प्लाक्ष-नैयग्रोधैङ्गुदं फले ॥

1 Fruits of certain plants.

बोद्धित् ॥ १३ ॥ पतति पत्त्रम् । अपलश्यते शात्यते पलाशम् । छाद्यतेऽनेन छदनं छदश्च छादेर्धेद्व्युपसर्गस्य (६।४।९६ / ३२७) इति ह्रस्वः । दलति दलम् । पिपर्ति पर्णम् । माढिः पत्त्रशिरा । पलति पल्लवः । किंचित्सरति किसलयम्, विकसति लीयमानं वा । नवपत्त्रं प्रवालाख्यम् । शाखादेर्विस्तृतिर्विस्तारः, प्रथनेवावशब्दे (३।३।३३ / ३०४) इति घञ् । विटान्पाति विटपः, यत्कात्यः–स्कन्धादूर्ध्वं तरोः शाखा कटप्रो विटपो मतः, विटन्त्याक्रोशन्त्यस्माद्वा ॥ १४ ॥ वृक्षादीनामिति पूर्वेणापि संबध्नन्ति । वृणोति वृन्तम् । प्रसवः पुष्पादिः, यत्कात्यः–बन्धनं पुष्पफलयोर्वृन्तमाहुः । शलति शलाटुः । फल इत्येव, (वानं) पैओवै शोषणे, ओदितश्च (८।२।४५ / ३०१९) इति निष्ठा नत्वम् । शलाटुवाने अभिधेयलिङ्गे ॥ १५ ॥ क्षरति प्रसूयते क्षारकः । जालमिव जालकं नवकलिकावृन्दम् । सूक्ष्मा कलिः कलिका, कल्यते शब्द्यते कलिका । कुर्यते (शब्द्यते) कोरकः । पुष्पसंघातो रम्यत्वाद् गूयते गुच्छः, गुङ् शब्दे । स्तूयते स्तवकः । गुलुञ्छोपि । ईषद्विकसिता कलिका, कुटति कुड्मलं । [मुञ्चति कलिकात्वं मुकुलः] । दुर्गाद्यास्त्ववान्तरभेदं न मन्यन्ते–मुकुलाख्या तु कलिका कुड्मलं जालकं तथा ॥ १६ ॥ सुष्ठु मन्यते सुमनसः, रूपाद्बहुत्वम् । पुष्प्यति पुष्पम् । प्रसूयते प्रसूनम् । कुस्यति कुसुमम् । मध्वाख्यः, मङ्क्यते मण्ड्यतेऽनेन पुष्पं मकरन्दः । परागच्छति परागः पुष्पधूलिः ॥ १७ ॥ वक्ष्यमाणं बदर्यश्वत्थादि वृक्षलतौषधिजातीयं स्त्रीपुंसादिलिङ्गमपि प्रसूयमाने पुष्पे फले मूले च वर्तमानं द्वाभ्यां हीनं नपुंसकलिङ्गं ज्ञेयमित्यर्थः । अवयवे च प्राण्योषधिवृक्षेभ्यः (४।३।१३५ / ९७९) इति विकारावयवोरुत्पन्नस्य लुप्प्रकरणे पुष्पमूलेषु बहुलं (१५४५ / ९९०) इति लुप् । क्वचिद् अनुदात्तादेश्च (१२९४ / ९७४) इत्यञो लुप् । कदम्बस्य विकारः कदम्बं पुष्पमशोकं करवीरं, बदर्याः

CC-0. Agamnigam Digital Foundation, Chandigarh

3 Fruit of the Eugenia.

१९ बार्हतं च, फले जम्ब्वा जम्बूः स्त्री जम्बु जाम्बवम्, ।
पुष्पे जाती-प्रभृतयः स्व लिङ्गा, व्रीहयः फले, ॥

1 Hedysarum Gangeticum.
1 Blossom of the Bignonia.
5 Holy figtree.

२० विदार्याऽऽद्यास् तु मूले ऽपि, पुष्पे क्लीबे ऽपि पाटला, ।
बोधिद्रुमश् चलदलः पिप्पलः कुञ्जराशनः ॥

फलं बदरं कोलं नालिकेरमाम्रं फलमामलकमिति वृक्षलक्षणस्य मयटः फलेलुक् ($\frac{४।३।१६३}{२५४१}$)। सूरणस्यावयवः सूरणः कन्दः लुपियुक्तिवद्व्यक्तिवचने ($\frac{१।२।५१}{२२९४}$) इति स्त्रीपुंसौ प्राप्तौ। हरीतक्याः फलं हरीतकी, अवयवे च प्राण्योषधीति ($\frac{४।३।१३५}{२५२५}$) अणः-अनुदात्तादेश्च ($\frac{४।३।१४०}{२५२०}$) इत्यञश्च हरीतक्यादिभ्यश्च ($\frac{४।३।१६०}{२५४६}$) इति लुप्, लुपि युक्तिवद्व्यक्तिवचने ($\frac{१।२।५१}{२२९४}$) इत्यत्र च हरीतक्यादिषु व्यक्तिरिति युक्तिवद्भावात्स्त्रीत्वम्। आदिशब्दात्कोशातकीद्राक्षावदर्यादिः। अश्वत्थादेः प्लक्षादिभ्योऽण्($\frac{४।३।१६४}{२५४३}$) इति पुनर्विधेः फले लुप्नास्ति। वेणोः बिल्वादिभ्योऽण्($\frac{४।३।१३६}{२५२६}$) नैयग्रोधमिति, न्यग्रोधस्य च केवलस्य ($\frac{७।३।५}{२५४३}$) इत्यैजागमः ॥ १८ ॥ बृहत्याः फलं बार्हतम्। फलति फलं, फल निष्पत्तौ। जम्ब्वा वा ($\frac{४।३।१६५}{२५४४}$) इत्यणि जाम्बवम्, पक्षे ओरञ् ($\frac{४।२।७१}{२२८३}$) तस्य लुकि फलं जम्बु, फलेलुक् लुप् च ($\frac{४।३।१६६}{२५४५}$) इति जम्बूः-लुपि युक्तिवद्व्यक्तिवचनत्वात् ($\frac{१।२।५१}{२२९४}$) स्त्रीत्वम्। पुष्पविकाशे जातेर्लतायाः पुष्पं जातिर्मालती शेफालिका यूथिका, चम्पकं बकुलं शिरीषं, अनुदात्तादेश्च ($\frac{४।३।१४०}{२५२०}$) इत्यञोणश्च पुष्पमूलेषु बहुलं (वा० $\frac{१५४५}{२९५०}$) इत्येभ्यः पुष्प एव लुप्। व्रीहीणां फल एव, तदाह—व्रीहयः फले स्वलिङ्गा इत्येव, व्रीणाति व्रीहिः, व्री भ्री भरणे। यवानां फलं यवाः, माषा मुद्गास्तिलाः, व्रीहिमुद्गाभ्यां बिल्वादिभ्योऽण् ($\frac{४।३।१३६}{२५२६}$), अन्यत्र अवयवे च प्राण्योषधीत्यण् ($\frac{४।३।१३५}{२५२५}$), तस्य फलपाकशुषां (वा० $\frac{२९४९}{२५४५}$) इति लुप्, युक्तिवद्भावः, स्वलिङ्गा इत्येव ॥ १९ ॥ (विदार्याद्यास्तु मूले) स्वलिङ्गा इत्येव। विदार्य भुज्यते (विदारी), विदार्या मूलं विदारी, मूल प्रतिष्ठायाम्। (पाटला) अनुदात्तादेश्च ($\frac{४।३।१४०}{२५२०}$) इत्यञ्, पुष्पमूलेषु बहुलं (वा० $\frac{१५४५}{२९५०}$) इति लुप्, लुपि युक्तिवत्त्वम्। आद्यशब्दाद्गम्भारीबृहत्यंशुमत्याद्याः। पाटलायाः पुष्पं पाटलं, अञो बाहुलकत्वाल्लुगभावः, यच्छाश्वतः-पाटलं कुसुमे वर्णेप्याशुव्रीहिश्च पाटलः (४५५)। अपिशब्दात्पाटला, बिल्वाद्यणा पाटलीत्यपि। पुष्प इति किं पाटलो नाम व्रीहिः। बोधिद्रुमो बोधिसत्त्वाख्यः सर्वोपकारित्वात्। तनुवृन्तत्वाद् गुरुपर्णत्वात्स्वल्पेपि वाते चलदलः। पिप्पलानि देश्यां पत्त्राणि, तानि सन्त्यस्य, अर्शआदित्वादच् ($\frac{५।२।१२७}{२९३३}$), अपप्लव इति नैरुक्ताः। एवमाद्याः प्राकृता अपीति धन्वन्तरिः, यदाह-प्रायो जनाःसन्ति वनेचराद्या गोपादयः प्राकृतनामतज्ज्ञाः। प्रयोजनार्था वचनप्रवृत्तिर्यतस्ततः प्राकृत इत्यदोषः (ध. नि. १-८) ॥ किं च-

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

7 Elephant, or wood apple.
२१ अश्वत्थे, ऽथ कपित्थे स्युर् दधित्थ-ग्राहि-मन्मथाः ।
तस्मिन् दधिफलः पुष्पफल-दन्तशठावपि ॥

4 Glomerous fig-tree.
२२ उदुम्बरो जन्तुफलो यज्ञाङ्गो हेमदुग्धकः ।
4 Mountain ebony.
कोविदारे चमरिकः कुद्दालो युगपत्रकः ॥

4 Echites.
२३ सप्तपर्णो विशालत्वक् शारदो विषमच्छदः ।
8 Cassia fistula.
आरग्वधे राजवृक्ष-शम्याक-चतुरङ्गुलाः ॥

२४ आरेवत-व्याधिघात-कृतमाल-सुवर्णकाः ।
5 A lemon or citron.
स्युर् जम्बीरे दन्तशठ-जम्भ-जम्भीर-जम्भलाः ॥

रसवीर्यविपाकेभ्यो मूलात्पुष्पात्फलाद्दलात् । आकाराद्देशकालादेर्वनौषध्यर्थमुन्नयेत् ? ॥ २० ॥ अश्वेषु तिष्ठत्यश्वत्थोऽश्वाश्रयः, पृषोदरादित्वात् (६।३।१०९/२०३४) सस्य तत्वम् । आह धन्वन्तरिः–पिप्पली केशवावासश्चलपत्रः पवित्रकः । मङ्गल्यः श्यामलोऽश्वत्थो बोधिसत्त्वो गजाशनः (ध. नि. ५-२३) ॥ केशवावासमङ्गल्यादयोऽत्राल्पप्रयोगत्वान्नोक्ताः । एवमुत्तरत्र । कपिषु तिष्ठति कपित्थः कपिप्रियत्वात् । दध्नि तिष्ठति दधित्थो दधिफलत्वात् । ग्राही विष्टम्भकारित्वात् । मन्मथो मदनाख्यः पर्यायेणोक्तः । दन्तेषु शठोम्बलत्वात् । आह च–कपित्थोथ दधित्थस्तु ग्राही फलसुगन्धकः । अक्षस्यदो दधिफलश्चिरपाकी कपिप्रियः (ध. नि. २–१०२) ॥ द्व्यर्थे पुष्पफलः कूष्माण्डः कपित्थश्च (ध. अ. द्र. २–९२), तथा दन्तशठो जम्भीरः कपित्थश्च (ध.अ.द्र.२–८७) । त्र्यर्थे मदनः पिण्डीतकः कपित्थो धत्तूरकश्च (रा. परि. ३–४१) ॥२१॥ उल्लङ्घिताम्बरं उदुम्बरः, उत्वं लक्ष्यात् । मशकगर्भाणि फलान्यस्य जन्तुफलः, कृमिफलः पर्यायेणोक्तः । आह च–क्षीरवृक्षे हेमदुग्ध उदुम्बरसदाफलौ । अपुष्पफलसम्बद्धो यज्ञाङ्गी श्वेतवल्कलः (ध. नि. ५-८६) ॥ आहेन्दुः–उदुम्बरस्तु यज्ञाङ्गः सुचक्षुः श्वेतवल्कलः । हेमदुग्धः कृमिफलः क्षीरवृक्षः स काञ्चनः ॥ कोर्भूमेर्विदारणात्कोविदारः, अत एव कुद्दालः । चमरोऽस्यास्ति चमरिकः । आह च–कोविदारेऽथ कुद्दालः कुदारः कुण्डली कुली । ताम्रपुष्पश्चामरिको महायमलपत्त्रकः (ध. नि. १।१९६) ॥ युगपत्त्रक इति यमलपत्त्रपर्यायेणोक्तः ॥२२॥ शरदि पुष्यति शारदः, शारदीत्येके । आह च–सप्तपर्णः शक्तिपर्णस्त्रिपर्णस्तु सुपर्णकः । सप्तच्छदो गुल्फपुष्पस्तथा शाल्मलिपर्णकः (ध. नि. ३–८०) । आहुश्च–सप्तपर्णो बृहत्त्वक्कः ॥ सप्ताह्वो गुच्छपुष्पकः । सप्तच्छदः सप्तपत्त्रो युग्मपत्त्रो बहुच्छदः ॥ आसमन्ताद्रुजां वधोऽत्रारग्वधः, आरमन्न जयन्त्यारजो मलास्तेषां वधोऽत्रेति वा । राजा चासौ वृक्षश्च, रोगराजं वृश्चति वा राजवृक्षः । शमीं शिम्बिमकति शम्याकः । चतुरङ्गुलपर्वा ॥२३॥ रेवती रोगदेवता, अरेवत्यां भव आरेवतः, आरेवते ज्वरोऽनेन वा रेवृ प्लवगतौ । कृता मालास्य कृतमालः, उत्तम्भित इव सकर्णिकत्वात् ।

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

5 Tapia. २५ वरुणो वरणः सेतुस् तिक्तशाकः कुमारकः ।
5 *Punnag.* पुन्नागे पुरुषस् तुङ्गः केसरो देववल्लभः ॥
4 Coral tree. २६ पारिभद्रे निम्बतरुर् मन्दारः पारिजातकः ।
7 *Tinis.* तिनिशे स्यन्दनो नेमी रथद्रुरतिमुक्तकः ॥
3 Spondias. २७ वञ्जुलश् चित्रकृच् चाऽथ द्वौ पीतनक-पीतनौ ।
5 Bassia. आम्रातके, मधूके तु गुडपुष्प-मधुद्रमौ ॥
1 Water Bassia. २८ वानप्रस्थ मधुष्ठीलौ, जलजेऽत्र मधूलकः ।
3 *Pilu.* पीलौ गुडफलः स्रंसी, तस्मिंस्तु गिरि-संभवे ॥

आह च– कर्णिकारो राजवृक्षः प्रमहः कृतमालकः । आरोग्यशिग्रु शम्बाको व्याधिघातोपघातकः (ध. नि. १–२२१) ॥ आरग्वधो दीर्घफलो व्याघातश्चतुरङ्गुलः । आरेवतस्तथा कर्णी कर्णीवान् स च रेवतः (ध. नि. १–२१९) ॥ जम्भसोहनार्थस्यैतानि रूपाणि दन्तशठोऽम्लत्वात् । आह च–जम्भीरो जम्भलो जम्भः प्रोक्तो दन्तशठस्तथा । गम्भीरो वक्त्रशोधी च रोचनो दन्तहर्षणः (ध. नि. ५–१४) ॥ २४ ॥ वृणोति वरुणो वरणश्च पर्णिकवृक्षत्वात् । अत एव पर्यन्ते रक्षाहेतुत्वात्सेतुः । तिक्तरसः शाकश्च, शाकमध्ये पाठात् । कुमारको नित्यतरुणः । आह च– वरुणः श्वेतपुष्पश्च तिक्तशाकः कुमारकः । सेतुद्रुमः साधुवृक्षस्तमालो मारुतापहः (ध. नि. ५–११९) ॥ पूजितः पुमान् पुन्नागः स इव प्राधान्यात् । प्रशस्ताः केसरा अस्य केसरः । आहेन्दुः–तुङ्गः पुष्पकसंज्ञः स्यात्पुंनामा रक्तकेसरः । पुंनागः पुरुषाह्वश्च केषांचित्पद्मकेसरः ॥ २५ ॥ पारि पारं प्राप्तं भद्रमस्य पारिभद्रः । नियमनान्निम्बः । आह च–निम्बो नियमनो नेता पिचुमन्दः सुतिक्तकः । लिम्बोऽथ सर्वतोभद्रः प्रभद्रः पारिभद्रकः (ध. नि. १–२९) ॥ व्यर्थे पारिभद्रः कोलिः पारिजातो देवदारुश्च (ध. अ. द्र. ३–३६) । अतिक्रान्तो निशास्तिनिशः, चिरकालित्वात् । स्यन्दनः स्यन्दने पटुः, रथोपयोगित्वात् । रथचक्रान्ते नयति नेमिः । अतिमुक्तो विस्तीर्णत्वात् ॥२६॥ वन्यते प्रथते वञ्जुलः । चित्रकृल्लघुत्वेपि दार्ढ्यदैर्घ्याभ्यामाश्चर्यकारी । आहुश्च– तिनिशश्चित्रकृन्नेमिः स्यन्दनो रथसाधकः । तथारण्यो रथद्रुश्चाप्यतिमुक्तक इत्यपि ॥ व्यर्थे वञ्जुलो वेतसः स्यन्दनोऽशोकश्च । पीतीक्रियतेऽनेन पीतनः । कपींस्तनोति कपीतनः कपिप्रियत्वात् । आम्रमतत्याम्रातकः कपिचूतत्वात् । आह च–आम्रातकः पीतनकः कपिचूतोऽम्लवातकः शृङ्गी कपिरदाव्यश्च नडःकीरः कपिप्रियः (ध.नि.५–१२) ॥ व्यर्थे कपीतन आम्रातकः प्लक्षः शिरीषश्च (ध. अ. द्र. ३–३१) । कपीतनशब्दस्य पीतनोऽपभ्रंश इत्येके । गुडवन्मधुराणि पुष्पाण्यस्य गुडपुष्पः । मधुप्रधानो द्रुमो मधुद्रुमः ॥२७॥ वनप्रस्थे भवो वानप्रस्थः स्थलजत्वात् । मधु ष्ठीवति मधुष्ठीलः, मधु माधुर्यमष्ठीले

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh

2 Walnut.
2 Alangium.
4 Butea frondosa.
7 *Bayas*, or *Bènt*.

२९ अक्षोट-कन्दरालौ द्वा,वङ्कोटे तु निकोचकः ।
पलाशे किंशुकः पर्णो वातपोथो, ऽथ वेतसे ॥

४ The same growing in water.

३० रथाऽभ्रपुष्प-विदुर-शीत-वानीर-वञ्जुलाः ।
द्वौ परिव्याध-विदुलौ नादेयी चाऽम्बुवेतसे ॥

5 Morunga.
1 A red variety of the same.

३१ सोभाञ्जने शिग्रु तीक्ष्णगन्ध-काक्षीव-मोचकाः ।
रक्तोऽसौ मधुशिग्रुः स्या,दरिष्टः फेनिलः समौ ॥

2 Soap berry.

गर्भेऽस्य मध्वष्ठीलो वा । यदाहः–मधूको मधुवृक्षश्च मध्वष्ठीलो मधुस्रवः । गुडपुष्पा रोध्रपुष्पो वानप्रस्थोऽथ माधवः (ध.नि.५।४५)॥ अत्र मधूके, यदाह–मधूकोऽन्यो मधूलस्तु जलजो दीर्घपत्त्रकः । ह्रस्वपुष्पः फलस्वादुर्गैरिकाख्यो मधूलकः (ध. नि. ५-४८) ॥ पीयते माधुर्यात्पीलुः पीड्यते वा । स्रंसते स्रंसयति वा स्रंसा । आह च–पीलुः शीतफलः स्रंसी धारी गुडफलोऽपि च (ध. नि. ५-२१)॥२८॥ अक्ष्णोत्यक्षोटः । कन्दरास्यास्तीति कन्दरावेष्टनात्कन्दरालः, कर्पराल इत्येके । आह च–अक्षोटः पर्वतीयश्च फलस्नेहो गुहाशयः । कीरेष्टः कन्दरालश्च स्वादुमज्जो मृदुच्छदः (ध. नि. ५-६०) ॥ अङ्कयते कीलकैर्लक्ष्यतेऽङ्कोटः, अङ्कोलोपि, प्राकृतेऽकोलः । निकुच्यतेऽस्मात्कण्टकित्वान्निकोचकः । आह च–अङ्कोटाङ्कोलकौ रेची निर्दिष्टो दीर्घकीलकः । पीतसारस्ताम्रफलो गन्धपुष्पो निकोचकः (ध. नि. १-२५८) ॥ प्रशस्तानि पलाशानि सन्त्यस्य पलाशः, पलमश्नुते रक्तपुष्पत्वाद्वा । किंचिच्छुको नीलः किंशुकः । वातं पोथयति वातपोथः । चन्द्रोत्र–पलाशः किंशुकः पर्णो यज्ञियो रक्तपुष्पकः । क्षारश्रेष्ठो वातपोथो ब्रह्मवृक्षः समिद्वरः ॥२९॥ वेत्यम्योनुवर्तते वितस्यते वा वेतसः । रमन्तेऽस्मिन्रथः । अभ्राणीव पुष्पाण्यस्याभ्रपुष्पः । विदोल्यते वेगेन विदुलः । शीतो वीर्येण लेपाद्दाहशमनात् । वनति भजत्यम्बु वानीरो वञ्जुलश्च । परिविध्यतेऽम्भसा परिव्याधः । नद्यां भवा नादेयी, नित्यं स्त्री, वेतसी तु द्वयोः । त्रिष्वर्थेष्विन्दुर्नादेयी तर्कारी जलवेतसी भूमिजम्बूश्च (ध.अ.द्र. ३।४७)॥ चन्द्राद्या विभागेनाहुः–वेतसो विदुलो नम्रो वञ्जुलो दीर्घपत्त्रकः नादेयी गन्धपत्त्रश्च जलौकाः सभृतस्तथा ॥ नदीकूलप्रियस्त्वन्यः सुशीतो घनपुष्पकः । जलजातस्तोयकामो विदुलो जलवेतसः । निचुलो वेतसादन्यो वक्ष्यते स्थलवेतसः (ध.५।११६) ॥३०॥ सुष्ठु भनक्ति मुखं सौभाञ्जनः । शिनोति तैक्ष्ण्याच्छिग्रुः । तक्षीवन्त्यनेन वृष्य[क्ष]त्वादक्षीवः । मुञ्चति गन्धं मोचकः । आहुश्च–शिग्रुः स्याच्छ्वेतमरिचं मुखभञ्जोतितीक्ष्णकः । सौभाञ्जनस्तीक्ष्णगन्धः सुतीक्ष्णो घनपल्लवः ॥ शिग्रुर्हरितशाकोन्यो मतो मूलकपल्लवः । घनच्छदस्तीक्ष्णगन्धो मुरङ्गी दंशनक्षमः॥ तृतीयो मधुशिग्रुः स्यात्– । त्र्यर्थे मोचकः कदली शाल्मलिः सौभाञ्जनश्च (ध. अ. द्र. ३-१५) । चतुर्ष्वर्थेष्विन्दुरक्षीवः समुद्रलवणं नीली महानिम्बः सौभाञ्जनश्च । मधुप्रधानः शिग्रुः

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

5 Marmelos. ३२ बिल्वे शाण्डिल्यशैलूषौ मालूर-श्रीफलावपि ।
3 Waved leaved figtree. 3 Indian figtree. प्लक्षो जटी पर्कटी स्यान्, न्यग्रोधो बहुपाद् वटः ॥
6 *Lodhra*. The pale sort. ३३ गालवः शाबरो लोध्रस् तिरीटस् तिल्व मार्जनौ ।
3 Mango. 5 A very fragrant mango. आम्रश् चूतो रसालो, ऽसौ सहकारो ऽति-सौरभः ॥
३४ कामाङ्गो मधुदूतश्च मार्कंदः पिकवल्लभः ।
5 Bdellium. कुम्भोलूखलकं क्लीबे कौशिको गुग्गुलुः पुरः ॥

(मधुशिग्रुः)। न रिष्यन्त्यनेनारिष्टो रक्षाहेतुः। फेनाः सन्त्यस्य फेनिलः। चन्द्रोऽत्र-अरिष्टस्तु सुमङ्गल्यः कृष्णबीजोर्थसाधनः। रक्षाबीजः शीतफेनः फेनिलो गर्भपातनः ॥ ३१ ॥ बिलति मीनत्ति बिल्वः । शण्डिलपौत्रः शिलूषज इत्यागमाद्यञणौ, शाण्डिल्य इव ब्राह्मणमन्यत्वात्, शैलूष इव नानारूपपरिवर्तनाद्वा । मलते मला-न्मालूरः, मां लक्ष्मीं लाति वा। श्रीप्रदानि फलान्यस्य श्रीफलः। आह च-बिल्वः शलाटुः शाण्डिल्यो हृद्यगन्धः सदाफलः। शैलूषः श्रीफलस्त्याह्वः कङ्कटः पूतिमारुतः (ध. नि. १-१०६) ॥ प्लक्षत्यधो गच्छति मूलैः प्लक्षः, प्लुष्यते (प्लक्ष्यते) वा। जटाः सन्त्यस्य जटी। अत एव पृच्यते पर्कटी, इन्नन्तोयं, ईदन्तोप्यस्ति, यच्छा-श्वतः-विज्ञेया पर्कटी प्लक्षः प्लक्षः पिप्पलपादपः (५२६)। न्यक् तिर्यग्रुणद्धि मार्गं मूलैर्न्यग्रोहति वा न्यग्रोधः, न्यङ्क्वादित्वात् (७।३।५३ / २८२६) धत्वम्। बहवः पादा मूलान्यस्य बहुपात्, संख्यासुपूर्वस्येति (२।१।५२ / ७३०) अन्तलोपः। वटति वेष्टयति मूलैर्वटः। आह च-वटो रक्तफलः शृङ्गी न्यग्रोधः कुन्दजो ध्रुवः। क्षीरी वैश्रवणावासो बहुपादो वनस्पतिः (ध. नि. ५-७६) ॥३२॥ आद्यौ श्वेतलोध्रे तिरीटाद्या रक्तलोध्रे। गालयति स्रावयत्यक्षि गालवः। शाबरः शबरवृक्षः। रुणद्धि व्रणं रोध्रः, रलयोरैक्या-ल्लोध्रोपि। तिरयति रोगांस्तिरीटः। तिलति स्निह्यत्यङ्गमनेन तिल्वः मार्ष्टयुद्वर्तयत्यङ्गं मार्जनः, अत एवो न्मा(त्सा)दनः। आह च-लोध्रो रोध्रः शाबरकश्चिल्लक-स्तिल्वकस्तरः। तिरीटः कालहीनश्च चिल्ली शबरपादपः (ध. नि. २-१७५)। द्वितीयः पट्टिकारोध्रो गालवः स्थूलवल्कलः। जीर्णबुध्नो बृहत्त्वक्कः पटी लाक्षा-प्रसादनः (ध. नि. ५-१७७) ॥ इन्दुश्च-रोध्रकषायकृद्वज्रश्चिल्लको मधुपुष्पकः। व्रणोपधं कालहीनो हिमपुष्पोऽक्षिभेषजम् ॥ उत्सादनो घनत्वक्कस्तरः शबरपादपः। रोध्रः शाबरकः श्वेतत्वगतीसारभेषजम् ॥ द्वितीयः पट्टिकारोध्रो बृहत्पत्त्रस्तिरीटकः। उत्तालकस्तिल्वकश्च पटी लाक्षाप्रसादनः ॥ अम्यतेऽभिलष्यत आम्रः, अमितम्यो-दीर्घश्च (उ० १८३) इति रक्। च्योतति रसं चूतः, चूष्यत इति श्रीभोजो निरवोचत्। रसमलति रसालः। सहकरयति मेलयति स्त्रीपुंसौ सहकारः, सुरा-सखत्वाद्वा। यदाह-आम्रश्चूतो रसालश्च सचेष्टो मदिरासखः। कामाङ्गः सहकारश्च परपुष्टमहोत्सवः (ध. नि. ५-१) ॥ ३३ ॥ कुम्भोलूखलाकाराद् वृक्षकोशान्निर्याति

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

5 Sebesten. ३५ शेलुः श्लेष्मातकः शीत उद्दालो बहुवारकः ।
4 *Piya.* राजादनं प्रियालः स्यात् सन्नकद्रुर् धनुःपटः ॥
7 *Gambhārī.* ३६ गम्भारी सर्वतोभद्रा काश्मरी मधुपर्णिका ।
3 Jujube. श्रीपर्णी भद्रपर्णी च काश्मर्यश् चा,प्यथ द्वयोः ॥
6 The fruit. 3 Plumb tree. ३७ कर्कन्धूर् बदरी कोलिः, कोलं कुवल फेनिले ।
5 *Buñchi.* सौवीरं बदरं घोण्टाऽ,प्यथ स्यात् स्वादुकण्टकः ॥

कुम्भोलूखलखम् कोशे भवः कौशिकः, उलूकाख्यैव नक्तंचरत्वात् । गुडति रक्षति वातारोगाद् गुगुलुः । पिपर्ति पुरः, इगुपधेति (३।१।१३५ / २८९७) कः, उदोष्ठ्यस्यपूर्व (७।१।१०२ / २४९४) इत्युत् । आह च–गुग्गुलुः कालनिर्यासो जटायुः कोशिकः पुरः । नक्तंचरः शिवो दुर्गो महिषाक्षः फ(प)लंकषः (ध. ३।१२७) ॥ ३४ ॥ शिलति शिनोति रोगान्वा शेलुः शेलुकश्च । श्लेष्माणमतति शीतवीर्यत्वाच्छ्लेष्मातकः, अत एव शीतः । उद्दालयत्यङ्गमुद्दालकः स्पर्शेन स्फोटकारित्वात् । बहु वृणोति स्रोतांसि बहुवारः । आह्वेन्दुः–शेलुः श्लेष्मातकः शीतो वसन्तकुसुमस्तथा । उद्दालकः कुर्बुरटः शेलुको भूतवृक्षकः ॥ पिच्छिलः शापितः शेलुस्तथासद्बीजकुत्सितः ॥ लेखवाटो बहुवार इति । राज्ञामदनं मिष्टत्वात् । पियति सरलत्वात्पियालः, रिपि गतौ, अपियात्येके । सन्नकः खरोद्रुः स्कन्धोऽस्य सन्नकद्रुः । धनुष इव पटो विस्तारोऽस्य धनुःपटः, धनुरुकारान्तो व्यस्त इति गौडो भ्रान्तः, यदाहुः–पियालोऽथ खरस्कन्धश्चारो बहुलवल्कलः । सन्नकद्रुश्चापपटो लस्त[ल]नस्तापसप्रियः ॥ द्व्यर्थे राजादनः पियालः क्षीरिका च (ध.अ.द्र.३।१२) ॥ ३५ ॥ गमे सरसत्वाद् भारोऽस्या गम्भारी । कृश्यति तनूकरोति काश्मरी काश्मर्यश्च । मधूनि मिष्टानि पर्णान्यस्या मधुपर्णी, पाककर्णपर्णेति (४।१।६४ / ५९९) ङीप् । आह च– काश्मर्यः काश्मरी हीरा कश्मरी मधुपर्ण्यपि । श्रीपर्णी सर्वतोभद्रा गम्भारी कृष्णवृन्तिका (ध. १।११७) ॥ ३६ ॥ कर्को लोहितोऽन्धुः कर्कन्धुः, शकन्ध्वादित्वात्पररूपम् (वा० ३६३२ / ७९) । बदति बदरी, बद स्थैर्ये । कोलिः, कुल संस्त्याने, कुल(ड) बाल्येऽस्माद्वा । घुणति वृक्ष[त्त]त्वाद् भ्रमति घोण्टा । कौभूमौ वलति कुवलम् । फेनिलं कफवर्धनात् । सुवीरदेशे भवं सौवीरम् । अत्राद्यास्त्रयो वृक्षार्थाः, अन्ये फलार्थाः, घोण्टा तूभयस्पृक्, यथेन्दुः–बदरी स्निग्धपत्त्रा च राष्ट्रवृद्धिकरी तथा । फलं तस्याः स्मृतं कोलं कोकिलं फेनिलं कुहम् ॥ लोलं सूक्ष्मफलं तत्तु ज्ञेयं कर्कन्धु कन्दुकम् । स्वादुः कटुः सिञ्चतिका तच्च कोलं फलं मतम् ॥ धन्वन्तरिः सामान्येनाह–बदरं कोकिलं कोलं सौवीरं फेनिलं कुलम् । कर्कन्धुः कन्दुकं स्वादुः कटुः सिञ्चतिका गुडा (ध.५।९६) ॥ द्व्यर्थे कुवलं नीलाब्जं बदरं च (ध.अ.द्र.२।९१) । कोलिफलत्वात्कोलिकमिति च सभ्यः पाठः, कोकिलमिति तु वैद्याः । चन्द्रोपि–बदरी

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

३८ विकङ्कतः स्रुवावृक्षो ग्रन्थिलो व्याघ्रपादपि ।
4 Orange. ऐरावतो नागरङ्गो नादेयी भूमिजम्बुका ॥

4 Sort of ebony. ३९ तिन्दुकः स्फूर्जकः कालस्कन्धश् च शितिसारके ।
4 Another sort. काकेन्दुः कुलकः काकतिन्दुकः काकपीलुके ॥

5 *Ghantāpātali*. ४० गोलीढो झाटलो घण्टापाटलिर मोक्ष-मुष्ककौ ।
3 *Tilā*. 2 Tamarix. तिलकः क्षुरकः श्रीमान्, समौ पिचुल-झावुकौ ॥

5 *Kayap'hal*. ४१ श्रीपर्णिका कुमुदिका कुम्भी कैटर्य कटफलौ ।
4 Red *Lōḍhra*. क्रमुकः पट्टिकाख्यः स्यात् पट्टी लाक्षाप्रसादनः ॥

गोपघण्टा च घोण्टा घुण्टाथ कोकिला । स्निग्धच्छदा कोलफला राष्ट्रवृद्धिकरी तथा ॥ ३७ ॥ विकङ्कते प्रसरति विकङ्कतः, ककिर्गत्यर्थः । स्रुवा स्रुक्, सा हि वेकङ्कती आम्नाता । आह च–विकङ्कतः पृथुफलो ग्रन्थिलः स्वादुकण्टकः । गोपकण्ठः काकपादो व्याघ्रपादोथ किङ्करी (ध. नि. ५।४३) ॥ इरावत्या विद्युत इवायं रक्तत्वादैरावतः । नागस्य सिन्दूरस्येव रङ्गोऽस्य नागरङ्गः, नागच्छति सहसा रङ्गोस्य वा । आह च–नागरङ्गस्त्वक्सुगन्धो नागरङ्गो मुखप्रियः । स चैरावतकः प्रोक्तः सुधातक्राधिवासनः (ध. नि. ५।२०) ॥ नादेयी नदीजाता । भूमौ जम्यतेऽद्यते भूमिजम्बूः । चत्वारो नागरङ्गार्था इति गौडः । आह च–जम्बूः सुरभिपत्त्रा च राजजम्बूर्महाफला । काकजम्बूर्मेघवर्णा नादेयी चेदिशोल्यकः (ध. ५।८३) ॥ ३८ ॥ तिम्यति तिन्दुकः । शितिः कालः सारो मज्जास्य शितिसारः । आह च–तिन्दुको नीलसारश्च कालस्कन्धोसिमत्सरु । स्फूर्जकः स्फूर्जशब्दोपीति । काकवर्णस्तिन्दुः काकेन्दुः (ध. ५।४०) । कुत्सितैर्लक्यते कुलकः, लक आस्वादने । द्व्यर्थे कुलकः काकतिन्दुकः पटोलोऽपि (अ. द्र. २।८२) । आह च–तिन्दुकोऽन्यो द्वितीयस्तु स्फूर्जकः काकतिन्दुकः । काकेन्दुकश्च विख्यातः कुपीलुः काकपीलुकः (रा. वि. ५।५२) ॥ मर्कटतिन्द्वाख्यः ॥ ३९ ॥ गोभिर्लिह्यते गोलिहः, गोलीढोपि । झाटं संघातं लाति झाटलः । हन्यते घण्टा । पाटं विस्तारं लाति पाटलिः । मोक्षंति सहते मोक्षः । मुष्णाति रोगान् क्षारकत्वान्मुष्ककः । आह च–मुष्ककको मोक्षको घण्टा मूषको रञ्जकस्तथा । क्षारश्रेष्ठो गोलिहश्च द्विविधः श्वेतकृष्णकः (ध. ५।१३२) ॥ तिलाभपुष्पस्तिलकः । क्षुरति परुषत्वात्क्षुरकः । आह च–तिलकः पुरुषः श्रीमान् क्षुरकश्छन्नपुष्पकः । पिचुं तूलं लाति पिचुलः (ध. ५।१५८) । ध्यायतेर्झावुकोऽपभ्रष्टः ॥ ४० ॥ श्रीपर्णी सुपर्णत्वात्, पाककर्णपर्णेति ($\frac{४।१।६४}{५।१९}$) ङीप् । [कुमुदप्रतिकृतिः कुमुदिका, कौ मोदते वा ।] कुम्भी रसाधारत्वात् । कं रसभीष्टे कैटर्यः, अविभावितप्रकृतिप्रत्ययार्थोऽयं वा । कट-

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

6 Mulberry. ४२ तूदस् तु यूपः क्रमुको ब्रह्मण्यो ब्रह्मदारु च ।
4 Nauclea orientalis. तूलं च, नीप प्रियक कदम्बास् तु हरिप्रियः ॥

4 Marking nut. ४३ वीरवृक्षोऽरुष्करोऽग्निमुखी भल्लातकी त्रिषु ।
5 *Pārṣpīpal.* गर्दभाण्डे कन्दराल कपीतन सुपार्श्वकाः ॥

3 Tamarind. ४४ प्लक्षश् च, तिन्तिडी चिञ्चाऽम्लिका, ऽथो पीतसारके ।
6 *A san.* सर्जकाऽसन बन्धूकपुष्प प्रियक जीवकाः ॥

त्यावृणोति कषायत्वात्फलमस्य कट्फलः। आह च–कट्फलः सोमवल्कश्च श्रीपर्णी कुमुदा तथा। महाकुम्भी च कुम्भी च भद्रा भद्रवतीति च (ध. १।७३)॥ द्वयर्थे कैडर्यं कट्फलो मदनफलं च (अ. द्र. २।९२)। क्रामति क्रमुकः। पट्टोऽस्यास्ति पट्टी पट्टिका, रोध्रोऽयम्। लाक्षां प्रसादयति, रोध्रप्रस्तावे व्याख्यातमेतत् ॥ ४१ ॥ तुद्यते तूदः। यूपप्रतिकृतित्वाद्यूपः। ब्रह्मणि वैदिके साधुर्ब्रह्मण्यः, अत एव ब्रह्मदारु। तूल्यते तूलं, तूलीति गौडः, तूल निष्कर्षे। आह च–तूलं तूदं च यूपं च क्रमुकं ब्रह्मकाष्ठकम्। ब्रह्मदारु ब्रह्मनिष्ठं ब्राह्मण्यं ब्रह्मचारि च (ध. ५।६४)॥ नयति सुखं नीपः। प्रीणाति प्रियकः। के दाम्यति कदम्बः। हलिनः प्रियः सुराधिवासनात्। धाराकदम्बो राजकदम्बश्चासौ, धूलीककदम्बोन्यः। आह च–परः कदम्बः प्रावृषेण्यः कादम्बर्यो हलिप्रियः। नीपो धूलिकदम्बोन्यः सुवासो वृत्त पुष्पकः (ध. ५।१०५)॥ ४२ ॥ विशेषेणेरयति वीराणां वावृक्षो दुःस्पर्शत्वात्। अरूंषि स्फोटैर्व्रणान् करोति–अरुष्करः, दिवाविभेति ($\frac{३।२।२१}{२९३५}$) टः। अग्निवन्मुखमस्या दाहकत्वादग्निमुखी। भल्ल इवाततिं दृणाति (भल्लातकः)। आह च–भल्लातकः स्मृतो दुःखो दहनस्तपनोऽग्निकः। अरुष्करो वीरतरुर्भल्ली चाग्निमुखी धनुः (ध. ३।१४३)॥ गर्दभ इवाण्डमस्य गर्दभाण्डः, गर्दं सशब्दं भाण्डमस्येति युक्तं कन्दरालत्वात्। कं पीतयति कपीतनः, कपीते[ने]ति वा। आह च–प्लक्षः कपीतनः शु(शृ)ङ्गी सुपार्श्वश्चारुदर्शनः। प्लवको गर्दभाण्डश्च कमण्डलु पटः प्लवः (ध.५।८१)॥ ४३ ॥ तिम्यति तिन्तिडी। चिञ्चिमायतेऽम्लत्वान्मुखं ययासौ चिञ्चा, फलतश्चक्रिका। आह च(चन्द्रः)–अम्लिका चुकिका चुक्रा साम्ला शुक्ताथ शुक्तिका। अम्लिका चाश्वि[म्बि]का चिञ्चा तिन्तिडीकं च तिन्तिडी॥ पीतवर्णः सालः (पीतसालः)। सृजति निर्यासं सर्जः। अस्यत्यसनः। बन्धूकस्येव रक्तानि पुष्पाण्यस्य बन्धूकपुष्पः। काम्यत्वात्प्रियत्वात्प्रियकः। जीवयति जीवकः। बीजक इति तु निघण्टुः, संज्ञया बीजको ज्ञेयो बीजपूरस्तथासनः। आहुश्च–बीजकस्त्वसनः काम्यः सौरिः कृष्णोलव[क]प्रियः। तिष्यपुष्पः पीतसालः प्रियकः प्रियसालकः॥ सुगन्धिनीलनिर्यासस्तथा बन्धूकपुष्पकः। स स्यात्प्रियकसालश्च महासर्जश्च नामतः

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

5 *Sak'hwa* or *Sal.* ४५ साले तु सर्ज काश्र्याऽश्वकर्णकाः सत्यसम्वरः ।
5 *Kahuā.* नदीसर्जो वीरतरुरिन्द्रदुः ककुभोऽर्जुनः ॥

3 *Khiranī.* ४६ राजादनः फलाध्यक्षः क्षीरिकायामथ द्वयोः ।
1 *Ingud.* 3 *Bhōjpatr.* इङ्गुदी तापसतरुर्, भूर्जे चर्मि-मृदुत्वचौ ॥

5 Silk-cotton. ४७ पिच्छिला पूरणी मोचा स्थिरायुः शाल्मलिर् द्वयोः ।
2 Its gum. पिच्छा तु शाल्मलीवेष्टे, रोचनः कूटशाल्मलिः ॥

2 Another black silk-cotton. ४८ चिरबिल्वो नक्तमालः करजश् च करञ्जके । 4 *Caranj.*
4 Gray bonduc. प्रकीर्यः पूतिकरजः पूतिकः कलिमारकः ॥

॥ ४४ ॥ स्यति सालः । कृश्यति काश्र्यः । अश्वकर्णाभपत्त्रः (अश्वकर्णकः) । सस्यं फलं संवृणोति सस्यसंवरः । आह च–सर्जकश्चाश्वकर्णश्च कषायी दीर्घपत्त्रकः । सस्यसंवरणः शूरः सर्जकः साल उच्यते (ध. ५।१२३) ॥ वीरतरुरर्जुननामसाम्यात् । ककुभः सन्त्यस्य दिग्व्यापकत्वात्ककुभः, कंस्कुभ्नातीत्यहृद्या व्याख्या । अर्जुनः शौक्ल्यात्, इन्द्रप्रियत्वादित्येके । आहेन्दुः–ककुभस्त्वर्जुनः पार्थो नदीसर्जो धनंजयः । अश्रीफलश्चित्रयोगी वीरो वीरान्तकस्तथा ॥ व्यर्थे–इन्द्रदुः कुटजोऽर्जुनो देवदारुश्च ॥ ४५ ॥ क्षीरिका क्षीरस्वादुत्वात्, आद्ये तु मिष्टान्नत्वान्नामनी । आह च–क्षीरिकोक्ता च राजन्यः क्षीरी मृत्सूय[प]को नृपः । राजादनो दृढस्कन्धः कपीष्टः प्रियदर्शनः (ध. ५।९१) ॥ इङ्गतीङ्गुदः । तापसा ह्यरण्येस्याः स्नेहमुपभु(यु)ञ्जत । भृणाति भूर्जः, भूर्जातो वा । आहुश्च–भूर्जो भृजो बहुपटो बहुत्वक्को मृदुच्छदः ॥ ४६ ॥ पिच्छास्त्यस्याः पिच्छिला । पूरयति पूरणी । मुञ्चति रसं मोचा । स्थिरायुः कालसहत्वात् । शालते दैर्घ्याच्छलति वा शाल्मली शाल्मलिश्च । आह च–शाल्मली रक्तपुष्पा च कुक्कुटी स्थिरजीविता । पिच्छिला तूलिनी मोचा कण्टकारी च पूरणी (ध. ५।१२७) ॥ मोचनीति च । पिच्छेव पिच्छा, आचामवदङ्गुलिसंगित्वात् । शाल्मल्या वेष्टो निर्यासः । आह च–शाल्मलीवेष्टकः पिच्छा निर्यासः स च शाल्मलः । मोचसारो मोचरसो मोचनिर्यासकस्तथा (ध. ५।१२६) ॥ रोचते रोचनः शाल्मलिविशेषः । कूटेन कुत्सितत्वं द्योत्यते, दुर्गादेर्हि परसैन्यदलनार्थं सा क्षिप्यते । आह च–कुशाल्मलिः शाल्मलिको रोचनः कूटशाल्मलिः (ध. ५।१३०) ॥४७॥ चिरिणं बिलति भिनत्ति चिरिबिल्वः । नक्तं रात्रावालमस्मान्नक्तमालो भूताश्रयत्वात्, रक्तमाल इत्येके । कं रञ्जयति करञ्जः (करजश्च) । प्रकीर्यते प्रकीर्यः । पतिको दुर्गन्धः । कलेर्मारकः कलहहृत्, यदाहुः–करञ्जो रक्तमालश्च पूतिकश्चिरिबिल्वकः । घृतपूर्णकरञ्जोन्यः प्रकीर्यो गौर एव च (ध. ५।१०७) ॥ पूतीकरञ्जः सुमनास्तथा कलहनाशनः ॥

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

2 Other sorts. ४९ करञ्ज भेदाः–षड्ग्रन्थो मर्कट्यङ्गारवल्लरी ।
4 *Rōhin.* रोही रोहितकः प्लीहशत्रुर् दाडिमपुष्पकः ॥
4 *Khayar.* ५० गायत्री बालतनयः खदिरो दन्तधावनः ।
2 A fetid Mimosa. 2 A white sort. अरिमेदो विट्खदिरे, कदरः खदिरे सिते ॥
५१ सोमवल्कोऽप्य,थ व्याघ्रपुच्छ गन्धर्वहस्तकौ ।
11 Palma christi. एरण्ड उरुवूकश् च रुचकश् चित्रकश् च सः ॥
५२ चञ्चुः पञ्चाङ्गुलो मण्ड वर्धमान व्यडम्बकाः ।
1 A variety of the *Śamī*. अल्पा शमी शमीरः स्याच्छमी सक्तुफला शिवा ॥ 3 *Śamī* or *saen*.

द्वयर्थे करजः करञ्जो नखश्च (अ. द्र. २।५३) ॥४८॥ षड् ग्रन्थयोऽस्य हस्तिवारणाख्यः। मर्चत्यङ्गपाटनान्मर्कटी वल्लीकरञ्जः । अङ्गारा इव वल्लर्योऽस्या अङ्गारवल्लरी । आह च–उदकीर्यस्तृतीयोऽन्यः षड्ग्रन्थो हस्तिवारणी । अङ्गारवल्ली शादस्था काकघ्नी करभालिका (ध. ५।१०९) ॥ त्यर्थे मर्कटी–आत्मगुप्तापामार्गो वल्लीकरञ्जश्च (अ. द्र. ३।२९) । रोहयति रोहितः, रोहतीत्येके छिन्नरूढत्वात् । चन्द्रश्च–रोहितको रोचनकः प्लीहघ्नो रक्तपुष्पकः । रक्तघ्नो रोहितो रक्तो रोही दाडिमपुष्पकः ॥ ४९ ॥ गायतो विप्रांस्त्रायतेऽवश्यं गायत्री । बालपत्त्रो यवासः खदिरश्चेति (अ. द्र. २।६४) द्वयर्थेषु धन्वन्तरिपाठमदृष्ट्वा बालपुत्रभ्रान्त्या ग्रन्थकृद्बालतनयमाह । सूक्ष्मपर्णोप्यसौ । खदति खदिरः, खद स्थैर्ये । आह च–खदिरो रक्तसारश्च गायत्री दन्तधावनः । कण्टकी बालपत्त्रश्च जिह्मशल्यः क्षितिक्षमः (ध. १।१२५) ॥ अरिर्दुःसहो मेदः सारो[स्त्रावो]स्यारिमेदः । विङ्गन्धिः खदिरः पूतिखदिराख्यः । आह च–परिमेदोऽरिमेदश्च गोधास्कन्धोरिमेदकः । अहिमेदोऽहिमारश्च रिभः पूत्यरिमेदकः (ध. ५।१३३) ॥ कं दृणाति कफघ्नत्वात्कदरः ॥ ५० ॥ सोमवल्कोऽकण्टकित्वात्–शुक्लत्वाद्वा । आह च–कदरः श्वेतसारोऽन्यः सोमवल्कः पथिद्रुमः । व्यर्थे सोमवल्कः खदिरः कट्फला करञ्जश्च (अ. द्र. २।३२) । व्याघ्रस्येव पुच्छमस्य व्याघ्रपुच्छः । गन्धर्वस्य भूतविशेषस्येव मृगविशेषस्येव वा हस्तोऽस्य गन्धर्वहस्तः पञ्चाङ्गुलिपर्णत्वात् । एरयति वायुमेरण्डः । उरु वात्युरुवूकः । रोचते रुचकः ॥ ५१ ॥ चञ्चति चञ्चः, चञ्चुरित्येके । पञ्चाङ्गुलयोस्य पञ्चाङ्गुलः । आमण्डयतीत्यामण्डः, आदण्ड इत्येके दीर्घदण्डत्वात् । व्यडति व्यडम्बरः, अड उद्यमे, व्यडम्बक [न] इत्येके । आह च–एरण्डस्तरुणः शुक्लश्चित्रो गन्धर्वहस्तकः । पञ्चाङ्गुलो वर्धमान आमण्डो दीर्घदण्डकः । रक्तोपरो हस्तिकर्णो व्याघ्रो व्याघ्रतलो रुबुः[वुः] उरुवूको हस्तिपर्णश्चञ्चुरुत्तानपत्त्रकः (ध. १।२९५, २९६) ॥ अल्पेर्थे, कुटीशमीशुण्डाभ्योरः ($\frac{५।३।८८}{२०४३}$) । शमयति दोषाञ्शमी शिवात्वात् । सक्तव इव फलान्यस्याः । आह च–शमी सक्तुफला तुङ्गा क्लेश-

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh

6 *Mayan.* ५३ पिण्डीतको मरुवकः श्वसनः करहाटकः ।
शल्यश् च मदने, शक्रपादपः पारिभद्रकः ॥ 7 *Déodār.*

५४ भद्रदारु द्रुकिलिमं पीतदारु च दारु च ।
पूतिकाष्ठं च सप्त स्युर् देवदारुण्यथ द्वयोः ॥

7 Trumpet flower. ५५ पाटलिः पाटलाऽमोघा काचस्थाली फलेरुहा ।
12 *Priyangu.* कृष्णवृन्ता कुबेराक्षी, श्यामा तु महिलाऽऽह्वया ॥

५६ लता गोवन्दिनी गुन्द्रा प्रियङ्गुः फलिनी फली ।
विष्वक्सेना गन्धफली कारम्भा प्रियकश् च सा ॥

हन्त्रिफला शिवा (ध. ५।९५) ॥ ५२ ॥ पिण्डीमितः पिण्डीतकः । म्रियन्तेऽनेन विषपुष्पत्वान्मरुवकः, मरौ वाति वा । श्वसन्त्यनेन श्वसनः । करं हन्ति दुःस्पर्शत्वात्कं रहयति वा करहाटकः । शल्यमस्यास्ति शल्यः । मदयति मदनः । आह च—मदनः शल्यको राकः [वाथ] पिण्डी पिण्डीतकस्तथा । तस्करः करहाटश्च श्वसनो विषपुष्पकः (ध. १।१६८) ॥ द्व्यर्थे मरुवको जम्भीरो मदनश्च (अ. द्र. ५।५६), यच्छाश्वतः—पिण्डीतके पद्मकन्दे करहाटपदं विदुः (४१३) । पारि निष्ठाप्राप्तं भद्रमस्य पारिभद्रकः ।। ५३ ॥ द्वौ स्कन्धे किलिमं निर्यासोऽस्य द्रुकिलिमम् । पूतिरुग्रगन्धं काष्ठमस्य पूतिकाष्ठम् । सप्तग्रहणं द्रुकिलिमस्यैकार्थं, यदाह— देवदारु स्मृतं दारु सुराह्वं किलिमं च तत् । स्नेहविद्धं महादारु भद्रदार्विन्द्रदारु च ॥ देवकाष्ठं भद्रकाष्ठं पूतिकाष्ठं च दारु च । सुरदार्विन्द्रवृक्षश्च तथैवामरदारु च (ध. १।७६–७७) ।। द्व्यर्थे पारिभद्रः कोलिः पारिजातो देवदारु च (अ. द्र. ३।३६), तथा पीतदारुर्दारुहरिद्रा देवदारु पूतिकाष्ठं च (अ. द्र. ३।७५) । किलिमं च तदिति पदैकदेशत्वाद्भीमवत् ॥ ५४ ॥ पाटला ताम्रपुष्पत्वात् । अमोघा बहुफलत्वात् । काला कालवृन्तत्वात् । स्थाली रसाधारः कुम्भीत्वात् । काचस्थालीत्येके । फले रोहति (फलेरुहा) साङ्कुरफलत्वात् । कुबेराक्षी यक्षाक्षितुल्यपुष्पत्वात् । आह च—पाटलोक्ता तु कुम्भीका ताम्रपुष्पाम्बुवासिनी । स्थाली वसन्तदूती स्यादमोघा कालवृन्तिका (ध. १।१२०) ॥ द्वितीया पाटला श्वेता निर्दिष्टा काष्ठपाटला । सा चैव श्वेतकुम्भी स्यात्कुबेराक्षी फलेरुहा (ध. १।१२२) ॥ पाटली कृष्णवृन्तेति ने[नि]म्रिः । पाटला पाटलिर्वा नेति माला । श्यामा श्यामगौरवर्णात् । महिलाह्वया वनितापर्याया श्याम (मा) त्वात् ॥ ५५ ॥ गवि भूमौ वन्द्यते गोवन्दनी । गुद्यते क्रीड्यते गुन्द्रा । प्रीणाति प्रियङ्गुः । फलति विशीर्यते फली । विष्वक् सिनोति सर्वतो बध्नाति विष्वक्सेना । ईषद्गम्भाकारा कारम्भा । आह च—प्रियङ्गुः प्रियवल्ली च फलिनी कुञ्जिनी प्रिया ।

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh

12 *Sōñapat.*

५७ मण्डूकपर्ण-पत्रोर्ण-नट-कट्वङ्ग-टुण्टुकाः ।
स्योनाक-शुकनास-र्क्ष-दीर्घवृन्त-कुटन्नटाः ॥

4 Emblic myrobalan.
6 Beleric myrobalan.
11 Yellow myrobalan.

५८ शोणकश्चा ऽरलौ, तिष्यफला त्वा ऽऽमलकी त्रिषु ।
अमृता च वयःस्था च, त्रि-लिङ्गस् तु त्रिभीतकः ॥

५९ नाक्षस् तुषः कर्षफलो भूतावासः कलिद्रुमः ।
अभया त्वव्यथा पथ्या कायस्था पूतनाऽमृता ॥

३ *Sural.*
३ *Caniyār.*

६० हरीतकी हैमवती चेतकी श्रेयसी शिवा ।
पीतद्रुः सरलः पूतिकाष्ठं चाथ द्रुमोत्पलः ॥

वृक्षा गोवन्दनी श्यामा कारम्भा वर्णभेदिनी (ध. ३।१६)॥ इन्दुर्गौर्वन्दनीति भिनत्ति, यदाह– वन्दनी पुष्पशोभना। गन्धप्रियङ्गुः कारम्भा लता गौर्वर्णभेदिनीति (रा. नि. ३।२८)॥ व्यर्थे गुन्द्रा– एरका प्रियङ्गुः श[स]रा च, तथा प्रियकोसनः प्रियङ्गुः कदम्बश्चेति (अ. द्र. ३।३५)। द्वयर्थे गन्धफलिनी प्रियङ्गुश्चम्पककलिका च (अ. द्र. २।७१) ॥ ५६ ॥ मण्डूक इव पर्णान्यस्य (मण्डूकपर्णः)। पत्त्रेवूर्णास्य पत्त्रोर्णः। नटति वातेन नटः। कटून्यङ्गान्यस्य रौक्ष्यात्कट्वङ्गः। दुन्द्विति शिम्बिभिः कायति दुन्दुकः। स्योनमुखसकति स्योनाकः। शुकनासेव पुष्पाण्यस्य (शुकनासः)। ऋक्ष्णोति हिनस्ति ऋक्षः, अत एव भालूकः। कुटन्वक्रीभवन् नटति स्पन्दते कुटन्नटः ॥ ५७ ॥ शवति शोनकः, गौडाः शोणकमाहुः, शोणृ वर्णे। इत्यर्थरलुः। आह च–स्योनाकः शुकनासश्च कट्वङ्गोथ कटम्भरः। मयूरजङ्घोरलुकः प्रियजीवः कुटन्नटः ॥ स प्रोक्तः पृथुशिम्बिश्च दुन्दुको दीर्घवृन्तकः। भालूकः शल्लकोऽफलगुवृन्तको जम्बुको नटः (ध. १।११४-१५)॥ तिष्यं मङ्गल्यं फलमस्यास्तिष्यफला, नित्यमामलके लक्ष्मीरिति। आमलते गुणानामलकी, अमला च। अमृता वयस्था च रसायनत्वात्। धात्री नानार्थे। आह च–वयस्थामलकं तिष्यं जातीफलरसं शिवम्। धात्रीफलं श्रीफलं च तच्चामृतफलं स्मृतम् (ध. १।२१५)॥ बिभेत्यस्माद् बिभीतकः ॥ ५८ ॥ अक्ष्णोति व्याप्नोत्यक्षः, ना पुमान्–फले पुंलिङ्गः। पु(तु)ष्यति तुषः, इति निघण्टुषु न संवादस्तेषु तु मूलवर्गपाठात्। कर्षफलोक्षसामान्यात्, कर्षो बिभीतके पलचतुर्भागे च वर्तते। भूतानामावासः। कलेराश्रयो द्रुमः। आह च–बिभीतक कर्षफलो वसन्तोक्षः कलिद्रुमः। संत्वर्तको भूतवासः कर्षोऽहार्यो बिभीतकः (ध. १।३२२)॥ इन्दुश्च–आ(अ)हार्यं बहुवीर्यं च तुमुलं च विभेदकम्। नास्ति भयमस्या अभया। न व्यथयत्यव्यथा। पथि साधुः पथ्या, हितेत्यर्थः। काये तिष्ठति निष्फला न भवति कायस्था, वयस्थेत्येके। पूतं करोति पूतना विरेचनीत्वात्, पृतनेत्येके ॥५९॥ हरति रोगान् हरीतकी। चेत्यतेऽनया स्रोतः-

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh

3 *Barahal.* ६१ कर्णिकारः परिव्याधो, लकुचो लिकुचो डहुः ।
2 Bread fruit or Jack tree. 3 *Hijjal.* पनसः कण्टकिफलो, निचुलो हिज्जलो ऽम्बुजः ॥

3 Opposite leaved figtree. ६२ काकोदुम्बरिका फल्गुर् मलयूर् जघनेफला ।
6 *Nimb.* अरिष्टः सर्वतोभद्र-हिङ्गुनिर्यास-मालकाः ॥

3 *Sisō.* ६३ पिचुमन्दश् च निम्बे, ऽथ पिच्छिला ऽगुरु-शिंशपा ।
1 Another sort. 3 *Siris.* कपिला भस्मगर्भा सा, शिरीषस् तु कपीतनः ॥

3 *Champā.* ६४ भण्डिलो ऽप्यथ चाम्पेयश् चम्पको हेमपुष्पकः ।
1 Its flower. 2 *Mul-sari.* एतस्य कलिका गन्धफली स्यादथ केसरे ॥

शुद्धेश्वेतकी । आह च–हरीतक्यभया पथ्या प्रपथ्या पूतनामृता । जयाव्यथा हैमवती कायस्था चेतकीति च (ध. १।२०५) ॥ त्र्यर्थे श्रेयसी रास्ना हरीतकी हस्तिपिप्पली च (अ. द्र. ३।५९)। शिवाव्यथा पूतनेति चन्द्रः । सरलः, ऋजुत्वात्, आह च–सरलः पूतिकाष्ठं च चित्रा पीतद्रुरुच्छ्रितः (ध. ३।७८)। द्रुमोत्पलानीव पुष्पाण्यस्य द्रुमोत्पलः, सुरभिश्च यम्, अन्यो निर्गन्धः ॥ ६० ॥ कर्णिकामियर्ति कर्णिकारः । द्व्यर्थे परिव्याधो जलवेतसः कर्णिकारश्च (अ. द्र. २।५७)। लक्यत आस्वाद्यते लकुचः । दह्यते डहुः । पन्यते स्तूयते पनसः, पणस इति दुर्गः । लोकोक्त्या कण्टकयुक्तफलः । महासर्गेपि । निचोल्यतेऽम्बुना निचोलः (निचुलः) । हितजलस्यापभ्रंशो हिज्जलोऽम्बुवेतसविशेषत्वात् ॥ ६१ ॥ काकप्रियोदुम्बरी। फलति फल्गुः । मलं श्वित्रं पावयति मलपूः श्वित्रभेषजम्, (मलयूः) यु जुगुप्सायाम् । जघने बुध्ने फलान्यस्या जघनेफला, आह च–काकोदुम्बरिका फल्गुरराजी फल्गुवाटिका । फल्गुनः फलभारी च मलयूः श्वित्रभेषजम् (ध. ५।८८) ।। हिङ्गुगन्धिनिर्यासोऽस्य । माल्यते वेष्टयते काकैर्मालकः, शुकमालकैकदेशश्चायम् ॥ ६२ ॥ पिचुं मर्दयति पिचुमर्दः, अरोगत्वात्, पिचुमन्द इत्येके । पवनेष्टोपीति सौश्रुताः । शाश्वतस्तु–हिङ्गुनिर्यासशब्दोऽयं निम्बे हिङ्गुरसेऽपि च (३७३) । चन्द्रनन्दनस्तु शुकमालकमाह । अगुरुतुल्यसारा शिंशपा अगुरुशिंशपा, यदाह – शिंशपा तु महाश्यामा कृष्णसारः स्मृतोऽगुरुः (ध. ५।१२१)। अगुरुर्धूपद्रव्यं शिंशपासारं चाहुः । द्व्यर्थे पिच्छिला शाल्मलिः शिंशपा च (अ. द्र. २।१९) यदाह–कुशिंशपान्या कपिला भस्मगर्भा च सादिनी (रा. नि. ५।२०१)। शिरसीष्यते शिरीषः, शीर्यते वा सौकुमार्यात् ॥ ६३ ॥ भण्ड्यते भण्डिलः, भण्डिरोपि आह च–शिरीषो मृदुपुष्पश्च भण्डिरः शंखिनीफलः । कपीतनः शुकतरुः श्यामवल्कः शुकप्रियः (ध. ५।११२) ॥ भण्डीत्येके। चम्पादेशे भवश्चाम्पेयः । चम्पुतद्यतेऽलिभि-

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

2 *Asōc.*
2 Pomegranate.
4 *Nāgkesar.*
5 *Jainti.*
5 *Ganiykārī.*
4 *Coratya.*
3 Its seed.
4 *Carōnda.*
3 *Tamāl.*

६५ बकुलो, वञ्जुलो ऽशोके, समौ करक-दाडिमौ ।
चाम्पेयः केसरो नागकेसरः काञ्चना ऽऽह्वयः ॥
६६ जया जयन्ती तर्कारी नादेयी वैजयन्तिका ।
श्रीपर्णमग्निमन्थः स्यात् कणिका गणिकारिका ॥
६७ जयो,ऽथ कुटजः शक्रो वत्सको गिरिमल्लिका ।
एतस्यैव कलिङ्गेन्द्रयवभद्रयवं फले ॥
६८ कृष्णपाकफलाऽऽविघ्न-सुषेणाः करमर्दके ।
कालस्कन्धस् तमालःस्यात् तापिन्छोऽप्यथ सिन्दुके ॥

श्चम्पकः, चम्पकोऽपि । आह च– चम्पकः सकुमारश्च सुरभिः शीतलश्च सः । चाम्पेयो हेमपुष्पश्च काञ्चनः षट्पदातिथिः (ध. ५।१४२) ॥ गन्धः फलमस्या गन्धफली । प्रियङ्गुश्चम्पककलिकाचेति द्व्यर्थे गन्धफली (अ. द्र. २।७१) । के सरति केसराः सन्त्यस्य वा केसरः ।। ६४ ॥ उच्यते बकुलः । आह च–बकुलः सीधुगन्धश्च नद्यगन्धोऽशारदः । मधुगन्धो गूढपुष्पः शिम्बी केसरकस्तथा (ध. ५।१५४) ॥ अश्नुतेऽशोकः, शोकनाशकत्वाद्वा । यदाह–अशोकः शोकनाशश्च विचित्रः कर्णपूरकः (ध. ५।१५९) । व्यर्थे वञ्जुलो वेतसः स्यन्दनोऽशोकश्च । करति कणान्करकः । दाल्यते दाडिमः । आह च– दाडिमो दालिमः सारः कुट्टिमः फलपा (शा)डवः । स्वाद्वम्लौ रक्तबीजस्तु करकः शुकवल्लभः (ध. २।५१) ॥ नागप्रियाणि केसरवन्ति पुष्पाण्यस्य नागकेसरः । आह च– नागपुष्पो मतो नागः केसरो नागकेसरः । चाम्पेयो नागकिञ्जल्कः कनकं हेम काञ्चनम् (ध. नि. ५। ४८) ॥६५॥ जयतीति जया । तर्कमियर्ति तर्कारी केतुत्वात् । अग्निं मन्थाति दीपनत्वादग्निमन्थः, अत एवारणिः । कणाः सन्त्यस्याः कणिका । गणिकासमूहमियर्ति गणिकारी, स्वार्थे कन्, गणिं तर्कं करोति वा । व्यर्थे नादेयी जलजम्बूर्जलवेतसस्तर्कारी (अ. द्र. ३।४७) च । लिङ्गसांकर्याज्जयेत्यर्धेन जयन्तं- (न्तीं) श्रीपर्णमिति चार्धेन जयपर्यायमाहुः, तन्न, वनौषधिवर्गे तस्यानादृतत्वात्, यदिन्दुः–अग्निमन्थोऽग्निमथनस्तर्कार्यरणिको जयः । अरणिः कणिका सैव तपनो वैजयन्तिकः॥ चन्द्रनन्दनश्चाह–अग्निमन्थोग्निमथनस्तर्कारी वैजयन्तिका । वह्निमन्थोऽरणिः केतुर्जयः पावकमन्थनः ॥ तर्कार्यां वैजयन्ती च वह्निनिर्मथनी जया । अरणिका जयन्ती च विजया च जयावहा ॥ ६६ ॥ कुटिस्तो (कुटे) जायते कुटजः । शक्र इन्द्रवृक्षः । वस्ते त्वचं वत्सकः । आह च–कुटजः कौटजः कोटी वत्सको गिरिमल्लिका । कलिङ्गो मल्लिकापुष्प इन्द्रवृक्षोऽथ वृक्षकः (ध. नि. २।११) ॥ कलिं गायति कलिंगं, कलिङ्गदेशजं वा, अत एव कालिङ्गं कालिङ्गी च । इन्द्रयवं कुटजफलं, भद्रयवं तु कुटजबीजं, यदाह–फलानि तस्येन्द्रयवा बीजं भद्रयवास्तस्या (ध. नि. ५।१५) ॥६७॥ कृष्णं पाके फलमस्य । आविजते स्माविघ्नः । सुषेणकपिमुखाभः । करेण मृद्यते करमर्दः,

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh

5 *Séduārī.* ६९ सिन्दुवारेन्द्रसुरसौ निर्गुण्डीन्द्राणिकेत्यपि ।
5 *Déōtār.* वेणी गरा गरी देवताडो जीमूत इत्यपि ॥
2 *Sirīārī.* ७० श्रीहस्तिनी तु भूरुण्डी, तृणशून्यं तु मल्लिका ।
4 Arabian Jasmin. भूपदी शीतभीरुश्च, सैवाऽऽस्फोटा वनोद्भवा ॥
1 A wild variety.
4 *Nébārī.* ७१ शेफालिका तु सुवहा निर्गुण्डी नीलिका च सा ।
2 The white Sort. सिताऽसौ श्वेतसुरसा भूतवेश्यथ मागधी ॥
4 Jasmin.
1 Yellow Jasmin. ७२ गणिका यूथिकाऽम्बष्ठा, सा पीता हेमपुष्पिका ।
5 *Mālati latā.* अतिमुक्तः पुण्ड्रकः स्याद् वासन्ती माधवी लता ॥

कराम्ब्लोपि । आह च—करमर्दकमाविद्धं सुषेणं पाणिमर्दकम् । कराम्ब्लं करमर्दं च—(ध.नि.५।१०२) ॥ [कालः स्कन्धः प्रकाण्डोऽस्य] । व्यर्थे कालस्कन्धस्तिन्दुकः श्यामखदिरस्तमालश्च (ध. अ. द्र. ३।६३) । ताम्यति तमालः । तापिनश्छादयति तापिच्छः ॥६८॥ स्यन्दते सिन्दुकः । स्यन्दं वृणोति सिन्दुवारः । इन्द्रस्य सुरसो यस्मिन्, दिव्य इत्यर्थः । अत एवेन्द्राणी । निष्क्रान्ता गुडाद्वेष्टनान्निर्गुडी निर्गुण्डी च । आह च—सिन्दुवारः श्वेतपुष्पः सिन्दुकः सिन्दुवारकः । तिलपुष्पः शीतसहो निर्गुण्डी नीलसिन्दुकः (ध.नि ४।८१) । वेणीव वेणी । गरमागिरति गरागरी मूषिकाविषघ्नत्वात् । कर्णं ताडयति ताडः, मुख्यत्वाद्देवताडो राजताडवत् । जीमूतो ह्लादकत्वात् । आह च—जीमूतको देवताडो वृत्तकोशो गरागरी । प्रोक्ताखुविषहा वेणी देवताली च ताडकः (ध.नि १।१७३) ॥६९॥ भुवि रोहति भूरुण्डी । हस्तिकर्णपत्त्रा शाकविशेषः । इतो धत्तुरान्तानि पुष्पाणि । तृणशूले गुल्मे साधु तृणशूल्यम् । मल्लयते मूर्ध्नि मल्लिका । भुवि पदमस्या भूपदी । शीतभीरुर्ग्रैष्मकत्वात् । आह ज—मल्लिका शीतभीरुश्च मदयन्ती प्रमोदनी । मदनीया गवाक्षी च भूपद्यष्टपदी तथा (ध.नि.५।१३४)॥ द्विपुटासौ विचकिलम्—। आस्फुटत्यास्फोता गिरिमल्लिका ॥७०॥ शेरते शेफा अलयोऽस्यां शेफालिका । सुष्ठु वहत्यामोदं सुवहा । नीलवर्णा (नीलिका) । आह च—शेफालिका तु निर्गुण्डी यमको नीलमञ्जरी (ध. नि. ४।८१) । व्यर्थे सुवहा रास्ना शेफालिका गन्धनाकुली च (ध. अ. द्र. ३।५०) । भूतानि विशत्याह्लादयति भूतवेशी । मगधदेशे भवा मागधी ॥ ७१ ॥ गणिका चित्ताकर्षणात् । यूथो जालकमस्या यूथिका । अम्बे शब्दे तिष्ठत्यम्बष्ठा । आह च—यूथिका बालपुष्पा च पुण्यगन्धा गुणोज्ज्वला । गणिकाचारमोटा च शिखण्डी श्वेतयूथिका (ध. नि. ५।१४८) ॥ आह च—सुवर्णपुष्पा हरिणी पीतका पीतयूथिका । व्यर्थे हेमपुष्पा बिम्बी दुःस्पर्शा पीतयूथिका च (ध. अ. द्र. ३।३८) । अतिक्रान्तो मुक्तान्विरक्तानतिमुक्तः । पुण्ड्रदेशे भवः पुण्ड्रकः, मण्डकोऽयमिति निघण्टुश्च । मधौ वसन्ते भवा माधवी । आह च—

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

3 Great flowered Jasmin. ७३ सुमना मालती जातिः, सप्तला नवमालिका । 2 Double Jasmin.
2 Many flowered Jasmin. माध्यं कुन्दं, रक्तकस् तु बन्धूको बन्धुजीवकः ॥ 3 *Dophariya.*
3 Aloe. 2 Globe amaranth. ७४ सहा कुमारी तरणिर,म्लानस्तु महासहा ।
1 The crimson sort. तत्र शोणे कुरबकस्, तत्र पीते कुरण्टकः ॥ 1 The yellow variety.
3 Blue barleria. ७५ नीली झिण्टी द्वयोर् बाणा दासी चाऽर्तगलश् च सा ।
2 *J'hinti.* 2 A purple sort. सैरेयकस् तु झिण्टी स्यात् , तस्मिन् कुरबकोऽरुणे ॥ 1A Red sort.
1 A yellow sort. ७६ पीता कुरण्टको झिण्टी तस्मिन् सहचरी द्वयोः ।
2 China rose. ओण्ड्रपुष्पं जपा, पुष्पं वज्रपुष्पं तिलस्य यत् ॥ 1 The blossom of sesamum.
5 Oleander. ७७ प्रतिहास-शतप्रास-चण्डात-हयमारकाः ।
3 *Carīl.* करवीरे, करीरे तु क्रकर-ग्रन्थिलाबुभौ ॥

अतिमुक्ता माधवी च सुवसन्तो वनाश्रयः । अतिमुक्तः कामुकश्च मण्डको भ्रमरोत्सवः (ध. नि. ५।१५३) ॥ ७२ ॥ सुष्ठु मन्यते सुमना मनोज्ञात्वात् । मालयत्यामोदैर्मालती। जायतेऽनयाप्रीतिर्जातिः। आह च–जातिर्मनोज्ञा सुमना राजपुत्री प्रियंवदा। मालती हृद्यगन्धा च चेतिका तैलभागि(वि)नी (ध. नि. ५।१३७) । सप्त मनोबुध्यन्तानीन्द्रियाणि लाति सप्तला, सपति समवैति वा । नवा स्तुत्या मालास्या नवमालिका । माघे मासि भवं माध्यम् । कुन्द्यति कुन्दं, कुन्द इति माला । बध्नाति चित्तं बन्धूकः । बन्धुर्जीवानां बन्धुजीवकः ॥ ७३ ॥ सहते परिमलं सहा । कुं भूमिष्ठान्मारयति कुमारी, कुत्सितो मारोऽस्या इति वा, जरां न यातीत्येके । तरत्यनयादुःखं तरणिः, यच्चन्द्रनन्दनः – कुर्यकस्तरणिर्वल्ली कुमार्यलिकुलप्रिया । व्यर्थे सहा मुद्गपर्णी बला तरणी च (ध. अ. द्र. ३।७२) । कुरण्टको हि म्लानिं न गच्छति तेनाम्लानः, वात्स्यायनोऽत एव कूर्चकस्थाने कुरण्टकमालाश्चेत्याह । वर्णपुष्पोऽपि । महतो विमर्दस्य सहा महासहा, आबन्तः, यन्माला—अम्लानस्तु कुरण्टकः । तत्राम्लाने, कौ रूयतेऽर्च्यते कुरवकः । कौ रस्यते कुरण्टकः, कुरण्डकोऽपि । आह च–अविम्लानोऽपरिम्लानस्तथैवाम्लानकः स्मृतः । रक्तपुष्पः कुरवकः पीतपुष्पः कुरण्टकः (ध. नि. १।२७८) ॥ किंकिरातोऽसौ ॥ ७४ ॥ या नीलपुष्पा झिण्टी, शुष्का झिं रटतीति । वाणो हि द्विलिङ्गः, वण शब्दे । दस्यति क्षीयते दासी । आर्तः क्षीणो गलत्यार्तगलः । सीरे भवा सैरेयाख्या झिण्टी–अरुणपुष्पा चेत्कुरवकोऽसौ ॥ ७५ ॥ सहचाराख्या झिण्टी पीतपुष्पा चेत्कुरण्टकोऽसौ । आह च–सैरेयकः सहचरः सैरेयश्च सहाचरः । पीतो रक्तोऽथ नीलश्च कुसुमैस्तं विभावयेत् । पीतः कुरण्टको ज्ञेयो रक्तः कुरवकः स्मृतः । नील आर्तगलो दासी वाण ओदनपाक्यपि (ध. नि. १।२७८) ॥ ओड्रदेशोद्भवं पुष्पं जपतीति जपा । वज्रमिव दारकं वज्रपुष्पम् ॥ ७६ ॥ प्रतीपोऽश्वघ्नत्वाद्धासो

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh

7 Thorn apple. ७८ उन्मत्तः कितवो धूर्तो धत्तूरः कनकाऽऽह्वयः ॥
मातुलो मदनश्च चा,ऽस्य फले मातुलपुत्रकः ॥ 1 Kuit .

4 Citron. ७९ फलपूरो बीजपूरो रुचको मातुलुङ्गके ।
5 *Maruā.* समीरणो मरुवकः प्रस्थपुष्पः फणिज्जकः ॥

3 *Parnās.* 1 The white sort. ८० जम्बीरो, ऽप्यथ पर्णासे कठिञ्जर-कुठेरकौ ।
3 Lead wort. सिते ऽर्जको ऽत्र, पाठी तु चित्रको वह्नि-संज्ञकः ॥

विकासोऽस्य प्रतिहासः । शतं बहूनि प्रासाः कुन्ता इव पुष्पाण्यस्य शतप्रासः, श्वेतश्चासौ । चण्डय(मत)ति तीक्ष्णत्वाच्चण्डातः, रक्तोऽसौ । करवीर इव मारकत्वात्करा: कर्तारो वीरा अत्रेति । आह च–शतकुन्तः श्वेतपुष्पः प्रतिहासोऽश्वरोहकः । द्वितीयो रक्तपुष्पस्तु चण्डातो लगुडस्तथा ॥ चण्डातको गुल्मकश्च प्रचण्डः करवीरकः (ध. नि. ४।१-२) । करिण ईरयति कण्टकैः करीरो मरुवृक्षः । क्रेति करोति क्रकरः, तीक्ष्णत्वात् । आह च–करीरं गूढपत्त्रं च शाकपत्त्रं मृदूफलम् । ग्रन्थिलं तीक्ष्णसारं च क्रकरं तीक्ष्णकण्टकम् (ध. ५।९९) ॥ ७७ ॥ उन्मत्त उन्मादकत्वात् । धूर्वति हिनस्ति धूर्तः, अत एव कितवः । धरति धातून् धर्तूरः (धस्तूरः), धत्तूरमिति प्राच्याः । काञ्चनाह्वो भुक्तेऽस्मिन् हेमवर्णपृथ्वीदर्शनात्, यदिन्दुः–संज्ञेया हेमनामभिः । नास्ति तुलास्य मातुलः, अमानोनाः प्रतिषेधे । मदयति मदनः । आह च–धर्तूरकः स्मृतो धूर्तो देविता कितवः शठः । उन्मत्तको मदनकस्तूरी चलतलस्तथा (ध. ४।७) ॥ यतो धन्वन्तरिः–मातुलं धत्तूरं मातुलपुत्रकं तत्फलमाह (ध. अ. द्र. १।७६,९१) ॥ ७८ ॥ रोचयति रुचकः । आह च–फलपूरो बीजपूरः केसरी बीजपूरकः । बीजकः केसराम्ब्लश्च मातुलुङ्गस्तु पूरकः (ध. ५।२२) ॥ अनेकार्थे–सौवर्चलं मातुलुङ्गं शिला चन्दनपेषणी । ग्रीवाभरणकं चैषु चतुर्षु रुचकं स्मृतम् (अ. द्र.४।२)॥ समीरयत्यामोदं समीरणः । मरौ वाति मरुवकः । प्रस्थे सानौ पुष्पयति जाङ्गलत्वात्प्रस्थपुष्पः । खरत्वेन फणाभपत्त्रत्वाद्देश्यः फणिज्जकः ॥ ७९ ॥ जम्यते जम्बीरः, जम्भीरोऽपि । आह च–जम्बीरः खरपत्त्रश्च फणी चोक्तः फणिज्जकः । मरुतको मरुवको मरुन्मरिचकस्तथा (ध. ४।५२) ॥ पर्णान्यस्यति पर्णासः । कठिनं जरयति कठिञ्जरः । कुण्ठति कुठेरकः कृष्णार्जकाख्यः । (शुक्लः कुठेरोर्जकः), अर्जयतीति । आह च–कुठेरकस्तु वैकुण्ठः क्षुद्रपत्त्रोऽर्जकः सितः । प(व)टपत्त्रः कुठेरोऽन्यः पर्णासो बिल्वगन्धकः (ध. नि. ४।५४) । पाठोऽस्यास्तीति पाठी । चेतति चित् चितो जन्तूंस्त्रायते चित्त्रकः, नानारूपो वा । वह्निपर्यायो दीपनत्वात् । आह च–चित्त्रको दहनो व्यालः पाठीनो दारुणोऽग्निकः । ज्योतिष्को वल्लरी वह्निः पाठी पाली कुटः शिखी

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

7 Swallow wort. ८१ अर्काऽऽह्व-वसुकाऽऽस्फोट-गणरूप-विकीरणाः ।
1 The white sort. मन्दारश्च चाऽर्णपर्णो, ऽत्र शुक्ल ऽलर्क-प्रतापसौ ॥
5 *Bakapushpa*. ८२ शिवमल्ली पाशुपत एकाष्ठीलो बुको वसुः ।
4 A parasite plant. वन्दा वृक्षादनी वृक्षारुहा जीवन्तिकेत्यपि ॥
9 *Guricha*. ८३ वत्सादनी छिन्नरुहा गुडूची तन्त्रिका ऽमृता ।
जीवन्तिका सोमवल्ली विशल्या मधुपर्ण्यपि ॥
10 Aletris. ८४ मूर्वा देवी मधुरसा मोरटा तेजनी स्रवा ।
मधूलिका मधुश्रेणी गोकर्णी पीलुपर्ण्यपि ॥

(ध. २।८०) ॥ ८० ॥ अर्काह्वोऽर्कपर्यायी । वसत्यस्मिंस्तेजो वसुकः । आस्फुटत्यास्फोटः । गणा बहवः (बहूनि) रूपाण्यस्य गणरूपः । विकिरति पुष्पा पुष्पाणि विकीरणः । मन्दानियर्ति मन्दारकः, मन्दा आरा अस्य वा । अर्काभानि पर्णान्यस्यार्कपर्णः । शुक्लार्कोऽलर्कः, अलति भूषयतीति । प्रतापं स्यति प्रतापसः, प्रकृष्टास्तापसा येन वा । आह च–अर्कः सूर्याह्वयः पुष्पी विट्छूरश्च विकीरणः । जम्भलः क्षीरपर्णः स्यादास्फोतो भास्करो रविः ॥ राजार्को वसुको व्यर्को मन्दारो गणरूपकः । एकाष्ठीलः सदापुष्पी स चालर्कः प्रतापनः (ध. ४।१३।१६) ॥ ८१ ॥ शिवप्रिया मल्लिका शिवमल्ली, उक्तं च–बुकं बिल्वं सधत्तूरं सुमना पाटला तथा । पद्ममुत्पलगोसूर्यमष्टौ पुष्पाणि शंकरे ॥ पशुपतेरयं प्रियो वा पाशुपतः । एकोष्ठीलो मज्जास्त्यस्य । वाति बुकः, बक इति प्राच्याः । वस्ते छादयति वसुः । आह च–वसुर्वसुक इत्युक्तः शिवार्कः [ङ्कः] शिवशेखरः । महापाशुपतश्चैव सुव्रतः शिवमल्लिका (ध. ४।१९) ॥ जन्मवृक्षमत्ति नाशयति वृक्षादनी । वृक्षे रोहति वृक्षरुहा, वृक्षरोहेति वनेचराः । आह च–वृन्दाकः स्याद्वृक्षरुहा शेखरी कामवृक्षकः । वृक्षादनी नटरुहा कामिन्यङ्घ्रिपरोहणी (ध.४।९७)॥ व्यर्थे जीवन्ती गुडूची वृक्षरुहा शाकविशेषश्च (अ.द्र. ३।३७)॥८२॥ वत्सानामदनं वत्सादनी छिन्ना रोहति छिन्नरुहा । गुडति रक्षति गुडूची । तन्त्रयते धारयत्यायुस्तन्त्रिका । जीवयति जीवन्तिका । सोमवल्ल्यमृतत्वात् । मधूनि पर्णान्यस्या मधुपर्णी । आह च–गुडूच्यमृतवल्ली च छिन्ना छिन्नरुहामृता । छिन्नोद्भवामृतलता वरा वत्सादनी स्मृता ॥ सेवोक्ता सोमवल्ली च कुण्डली चक्रलक्षणा । जीवन्ती मधुपर्णी च तन्त्रिका देवनिर्मिता (ध. नि. १।१।३) ॥ व्यर्थे विशल्या लाङ्गली दन्ती गुडूची च (अ. द्र. ३।५७) ॥ ८३ ॥ मूर्वति बध्नाति मूर्वा, अत एवास्या विकारो मौर्वी । मधुरो रसोऽस्या मधुरसा । मुरति संवेष्टयति मोरटा । तेजयत्यग्निं तेजनी । स्रवति रसं स्रवा, स्रुवेत्येके । मधूलिका माधुर्यात् । मधुनः श्रेणी पङ्क्तिर्मधुश्रेणी । गोकर्णी गोकर्णाभपत्त्रा, पाककर्णपर्णेति (४।१।६४) ङीष् । पीलोरिव

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

10 *Ākanādi.* ८५ पाठा ऽम्बष्ठा विद्धकर्णी स्थापनी श्रेयसी रसा ।
एकाष्ठीला पापचेली प्राचीना वनतिक्तिका ॥

8 *Katuki.* ८६ कटुः कटम्भरा ऽशोकरोहिणी कटुरोहिणी ।
मत्स्यपित्ता कृष्णभेदी चक्राङ्गी शकुलादनी ॥

9 *Kawach* or Cowitch. ८७ आत्मगुप्ता ऽजहा ऽव्यण्डा कण्डूरा प्रावृषायणी ।
ऋष्यप्रोक्ता शूकशिम्बिः कपिकच्छुश् च मर्कटी ॥

10 *Musalt.* ८८ चित्रोपचित्रा न्यग्रोधी द्रवन्ती शम्बरी वृषा ।
प्रत्यक्श्रेणी सुतश्रेणी रण्डा मूषिकपर्ण्यपि ॥

पर्णान्यस्याः पीलुपर्णी । आह च-मूर्वा मधुरसा देवी पृथुत्वक् पीलुपर्ण्यपि । रव (मधु)श्रेणी स्वादुरसा स्निग्धपर्णी च मोरटा (ध. १।१३) ॥ द्व्यर्थे तेजनी तेजोवती मूर्वा च (अ. द्र. २।७९)। आहेन्दुः-स्निग्धच्छदा मधुश्रेणी पृथुत्वग्रसवाहिनी रवश्रेणी मधुमती मुरङ्गी द्विजमेखला ॥ आलोलनी योगवहा मोरटा च मधुस्रवा । सुयो[खो]पिता स्निग्धपर्णी गोकर्णी सा मधूलिका ॥ पीलुपर्णी कर्मकरी प्रमथा मधुमतीति च ॥ ८४ ॥ [पठ्यते पाठा]। विद्धौ कर्णौ यया विद्धकर्णी, शास्त्रे श्रूयमाणत्वात् । स्थापनी वस्तिकर्मोपयोग्या । रस्यते रसा । पापचेली वृकीत्वात् । प्राचीभवा प्राचीना । वने तिक्तरसा वनतिक्ता । आह च-पाठाम्बष्ठाम्बष्ठकी च प्राचीना पापचेलिका । वृकतिका वनेतिक्ता पापिका स्थापकी वृकी (ध. १।७०) ॥ त्र्यर्थे रसा रास्ना सल्लकी पाठा च (अ. द्र. ३।४४) ॥ ८५ ॥ कटत्यावृणोति गलं कटंभरा । शोकहन्त्री रोहत्यगं वाशोकरोहिणी । मत्स्यपित्तास्वादा, मत्स्यानां पित्तं जीवितं वा । कृष्णो भेदच्छेदोऽस्याः कृष्णभेदा । शकुलानामदनं शकुलादनं शकुलादनी वा (ध. नि. १।३७३८ । आह च(निघण्टुः)-कटुका मत्स्यशकुला मत्स्यपित्ता च रोहिणी । कृष्णभेदा चण्डरुहा रास्ना कटुकरोहिणी । अशोकरोहिणी तिक्ता चक्राङ्गी शकुलादनी । कटुरोहिण्यरिष्टा च प्रोक्ता तिक्तकरोहिणी (ध. नि. ३७, ३८) ॥ द्व्यर्थे कटंभरा कट्वङ्गः कटुकी च (अ. द्र. २।८०) ॥ ८६ ॥ आत्मना गुप्ता स्पर्शाविषयत्वात् । न जहाति शूकानजहा । न विगताङ्गाव्यङ्गा । कण्डूं राति कण्डूरा । प्रावृषि भवा प्रावृषायणी । ऋष्यैर्मृगैः प्रोक्ता दर्शिता ऋष्यप्रोक्ता, ऋषिभिरप्रोक्ता हेयत्वादित्येके । शूकप्रधाना सकण्टका शिम्बिरस्याः शूकशिम्बिः । कपीन् कपति कपिकच्छूः । मर्कटी कपिरोमफलत्वात् । आहेन्दुः-ऋष्यप्रोक्ता स्वयंगुप्ता कपिकच्छूश्च कण्डुरा । आत्मगुप्ता दुरालम्भा जङ्गलिर्दुरभिग्रहा ॥ अव्यङ्गा वृषभी गुप्ता कण्डूरा शूकशिम्बिका । कपिरोमफला चैव समाना प्रावृषायणी ॥ ज्ञेया जाङ्गलिका सैव साजहा प्रावृषायणी ॥ ८७ ॥ चित्रानेकवर्णपत्त्रा । न्यग्रोहति रुणद्धि वा बहुमूलत्वान्न्यग्रोधी । द्रवति द्रवन्ती । शं वृणोति शंवरी । वर्षति वृणोति वा

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

8 *Apāmarga.* ८९ अपामार्गः शैखरिको धामार्गव-मयूरकौ ।
प्रत्यक्पर्णी केशपर्णी किणिही खरमञ्जरी ॥

9 *Bamanaiṭhī.* ९० हञ्जिका ब्राह्मणी पद्मा भार्गी ब्राह्मणयष्टिका ।
अङ्गारवल्ली बालेयशाक-वर्बर-वर्धकाः ॥

9 Madder. ९१ माञ्जिष्ठा विकसा जिङ्गी समङ्गा कालमेषिका ।
मण्डूकपर्णी मण्डीरी भण्डी योजनवल्ल्यपि ॥

10 *Jawāsā.* ९२ यासो यवासो दुःस्पर्शो धन्वयासः कुनाशकः ।
रोदनी कच्छुरा ऽनन्ता समुद्रान्ता दुरालभा ॥

वृषा । प्रतीची श्रेण्यस्याः प्रत्यक्श्रेणी । सुतानां मूलानां श्रेण्यस्याः सुतश्रेणी । चण्ड्यते चण्डा । मूषिकपर्णी–आखुकर्णाभपत्त्रा । आह च–द्रवन्ती शंवरी चित्रा न्यग्रोधी मूषिकाह्वया । प्रत्येकश्रेणी वृषा चण्डा पुत्रश्रेण्याखुपर्णिका (ध. नि. १।२२९) ॥ द्व्यर्थे–उपचित्रा दन्ती पृश्निपर्णी चेति (अ. द्र. २।६०), दन्त्यां द्रवन्ती-भ्रान्त्या ग्रन्थकृदुपचित्रामाह ॥ ८८ ॥ अपकृष्टः(आ)समन्तान्मार्गोऽस्यापामार्गः, अधःशय्या(ल्या)ख्यत्वाद् । शिखरे भवः शैखरिकः । अधमं मार्गं वाति धामार्गवः, धाम अर्जति वा । मयूरप्रतिकृतिर्मयूरकः । प्रत्यञ्चि पर्णान्यस्याः प्रत्यक्पर्णी । केशपर्णी कपिलोमत्वात्, अत एव केशवल्लीत्येके । किणिनो जिहीते याति किणिही, स्पर्शा-त्किणोत्पादनात् । आह च–अपामार्गस्तु शिखरी प्रत्यक्पुष्पी मयूरकः । अधःशय्याथ किणिही दुर्ग्रहः खरमञ्जरी ॥ स एवोक्तः शैखरिको मर्कटी दुरभिग्रहः । पत्त्रपुष्पी च शिखरः कूटो मर्कटपिप्पली (ध. १।२६०-२६१) ॥ द्व्यर्थे धामार्गवोऽपामार्गः कोशातकी च ॥ ८९ ॥ हन्ति रोगं हञ्जी । ब्राह्मणी पवित्रत्वात् । पद्मा पद्माभपुष्पा । भृज्जति भार्गी, भृगुजेत्येके, अत एव ब्राह्मी । अङ्गाराभा वल्ल्योऽस्या अङ्गारवल्ली । बालेयशाको गर्दभभोग्यत्वात् । वृणोति वर्वरो वर्चश्च, वर्वराकृतिपत्त्रो वा । आह च–भार्गी गर्दभशाकश्च पद्मा ब्राह्मणयष्टिका । अङ्गारवल्ली हञ्जी च वर्चो वर्वरकस्तथा (ध. १।६८)॥ द्व्यर्थे ब्राह्मी स्पृक्का भार्गी च (अ. द्र. २।२७) । आहेन्दुः–ब्रह्मरीति-स्तथा स्पृक्का भार्गी च ब्राह्मणी मता ॥ ९० ॥ मञ्जौ मनोज्ञे वर्णे तिष्ठति मञ्जिष्ठा, अम्बाम्बगोभूमीति ($\frac{८।३।९७}{२९१८}$) षत्वम् । विकसति दूरं विकसा । जिङ्गति प्रसरति जिङ्गी । समन्ततोऽङ्गति समङ्गा । काले मिष्य(श्य)ते शब्द्यते कालमेषी(शी) । भण्ड्यते भण्डीरी भण्डी च । योजनवल्ली दूरप्रसरा । आह च–मञ्जिष्ठा कालमेषी च समङ्गा विकसा-रुणा । मञ्जुका रक्तयष्टिश्च भण्डी योजनवल्ल्यपि (ध. नि१।१७) ॥ आहेन्दुः–विकसा कालमेषी तु कालमेष्टी च जिङ्गिका । रक्ता भण्डीरिका चेति–॥ ९१ ॥ याति प्रसरति यासः । यौति यवासः । दुःस्पर्शः कण्टकित्वात् । धन्वयासो मरुद्भवत्वात् । कुं

Solanum xanthocarpum (Watt, Vol VI, Pt III p. 273)

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

9 *Chākulīya.* ९३ पृश्निपर्णी पृथक्पर्णी चित्रपर्ण्यङ्घ्रिवल्लिका ।
क्रोष्टुविन्ना सिंहपुच्छी कलशी धावनी गुहा ॥

10 prickly nightshade. ९४ निदिग्धिका स्पृशी व्याघ्री बृहती कण्टकारिका ।
प्रचोदनी कुली क्षुद्रा दुःस्पर्शा राष्ट्रिकेत्यपि ॥

11 Indigo. ९५ नीली काला क्लीतकिका ग्रामीणा मधुपर्णिका ।
रञ्जनी श्रीफली तुत्था द्रोणी दोला च नीलिनी ॥

नाशयति कण्टकित्वात्कुनाशः । रोदयति खेदयति रोदनी, चोदनीति सभ्याः । कच्छूं रोगं राति कच्छुरा । अनन्ता समुद्रान्ता च दूरव्याप्तेः । कृच्छ्रेण लभ्यते दृश्यते दुरालभा । आह च–यासो यवासकोऽनन्तो बालपत्त्रो विकण्टकः । चीरमूलः समुन्द्रातो दीर्घमूलो मरूद्भवः (ध. १।२२) ॥ धन्वयासो दुरालम्भा ताम्रमूली च कच्छुरा । दुरालभा च दुःस्पर्शा यासो धन्वयवासकः (ध. १।२०) ॥ ९२ ॥ पृश्निश्चित्रगवीव पर्णान्यस्याः पृश्निपर्णी, सूक्ष्मपर्णा वा, यदाह पृश्निरल्पतनौ । अङ्घ्रेर्बुध्नादारभ्य पर्णान्यस्या अङ्घ्रिपर्णी । क्रोष्टुभिर्विन्ना दत्तेव, क्रोष्टुपुच्छीत्वात् । सिंहस्येव पुच्छमस्याः सिंहपुच्छी, लोकोक्त्या सिंहपुच्छकः । कलशिर्गर्गरी पृथुलत्वात् । धावति प्रसरति धावनिः । गूहति रसं गुहा । आह च– पृश्निपर्णी पृथक्पर्णी कलशिर्धावनी गुहा । शृगालविन्नाङ्घ्रिबलापर्णी क्रोष्टुकपुच्छिका (ध. १।९०) ॥ ९३ ॥ निदिह्यते निदिग्धिका । स्पृशति कण्टकैरुपतपति स्पृशी । व्याघ्री हिंस्रत्वात् । कण्टकबाहुल्याद् बृहती । कण्टकानियर्ति कण्टकारी । प्रचोदयति कण्टकैः प्रेरयति प्रचोदनी । कोलति कुली । क्षुणत्ति क्षुद्रा हिंस्रा, क्षुद्रवार्ताक्येकदेशो वा । राष्ट्रमस्त्यस्या राष्ट्रिका । बृहती तु निदिग्धिकेति भागुरिवाक्याद् ग्रन्थकृद् भ्रान्तः, यतोऽनयोर्महान्भेदः । आह च– कण्टकारी तु दुःस्पर्शा क्षुद्रा व्याघ्री निदिग्धिका । कण्टालिका कण्टकारी धावनी दुःप्रधर्षिणीति (ध. १।९५) ॥ यथा–बृहती सिंह्यनाक्रान्ता वार्ताकी राष्ट्रिका कुली । विशदा स्थूलभण्टाकी महती तु महोटिका (ध. १।९३) ॥ भागुरिर्हि द्वयोर्बृहतीत्वं मन्यते, यच्छाश्वतः–क्षुद्रायां क्षुद्रवार्ताक्यां बृहती छन्दसि क्वचित् (४२०) । द्व्यर्थे प्रचोदनी कण्टकारिका दुरालभा च ॥ ९४ ॥ नीली काला च वर्णे, नीलात्प्राण्योषध्योर्ङीष् (वा० ४९००) । क्लीतकं विनिमयोऽस्त्यस्याः क्लीतकिका । ग्रामे भवा ग्रामीणा । रञ्जयति नीलीकरोति रञ्जनी । श्रीफला रम्यफला । तुद्यते तुत्था । द्रवत्यस्याः स्पर्शाज्जनो द्रोणी, तूणीत्येके । दोल्यते दोला, मेलेत्येके । नीलोऽस्त्यस्या नीलिनी । आह च–नीलिनी नीलिका काला ग्राम्या तूणी विशोधनी । तुत्था श्रीफलिका मेला सारवाही च रञ्जनी (ध.१।२३२) ॥ त्र्यर्थे मधुपर्णी गुडूची काश्मरी नीलिका चेति (अ. द्र. ३।४५), द्व्यर्थे क्लीतकिका मधुयष्टी नीलिका च (अ. द्र. २।३२) ॥ ९५ ॥

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

8 *Sōmrāj.* ९६ अवल्गुजः सोमराजी सुवल्लिः सोमवल्लिका ।
कालमेषी कृष्णफली बाकुची पूतिफल्यपि ॥

10 Long pepper. ९७ कृष्णोपकुल्या वैदेही मागधी चपला कणा ।
5 Another Sort. उषणा पिप्पली शौण्डी कोला, ऽथ करिपिप्पली ॥

९८ कपिवल्ली कोलवल्ली श्रेयसी वशिरः पुमान् ।
2 The same. 3 *Retti.* चव्यं तु चविका, काकचिञ्ची-गुञ्जे तु कृष्णला ॥

7 *Gōc'haru.* ९९ पलङ्कषा त्विक्षुगन्धा श्वदंष्ट्रा स्वादुकण्टकः ।
गोकण्टको गोक्षुरको वनशृङ्गाट इत्यपि ॥

अवल्गोर रम्याज्जातोवल्गुजः । सोमेनाह्लादनेन राजते सोमराजी । कालेन मिष्यते शब्दयते कालमेषी कृष्णफलत्वात् । वातं संकोचयतीति निर्वचनाद्बाकुची । पूतिः फलमस्याः पूतिफली, पाककर्णोति ($\frac{४।१।६४}{५१९}$) ङीष् । व्यर्थे कालमेषी मञ्जिष्ठा बृहती बाकुचिका च (अ. द्र. ३।१२) ॥ ९६ ॥ कर्षति कृष्णा, श्यामलत्वाद्वा । उपकोलति संस्त्यायत्युपकुल्या । विदेहदेशे भवा वैदेही । मगधभवत्वान्मागधी । चपति चपला । कणाः सन्त्यस्या कणा । ऊषत्यूषणा, ऊष रुजायाम् । उषणापि, उष दाहे, तीक्ष्णतण्डुलत्वात् । पिपर्ति पिप्पली । शौण्डी शक्तत्वात् । कोला, कुल संस्त्याने । आह च—पिप्पली मागधी कृष्णा चपला तीक्ष्णतण्डुला । उपकुल्या कणा श्यामा कोला शौण्डी तथोषणा (ध. २।७३) ॥ इन्दुश्च—पिप्पली तण्डुलफला वैदेही कृष्णतण्डुला । करिपिप्पली बृहत्त्वाद् गजयोग्या वा ॥ ९७ ॥ कपिवल्ली मर्कटरोमत्वात् । एवं कोलवल्ली । वस्यते छाद्यते रोमभिर्वसिरः । चव्यं, फलं चैतत्, चव्यते चव्यं च्यवते वा । आह च—चविका कोलवल्ली तु चव्यं चवनमेव च ॥ तस्याः फलं विनिर्दिष्टं श्रेयसी हस्तिपिप्पली (ध. २।७६; ७८) ॥ **चन्द्रनन्दनः** सामान्येनाह चव्या कोला च चविका श्रेयसी गजपिप्पली । चवना कोलवल्ली तु चव्यं कुञ्जरपिप्पली । व्यर्थे मर्कटवल्ली—अपामार्गो हस्तिपिप्पली स्वयंगुप्ता चेति, तथा वसिरोऽपामार्गः समुद्रलवणं हस्तिपिप्पली चेति (अ. द्र. ३।२९; ७१) । काकवर्णा चिञ्ची प्रान्तोऽस्याः काकचिञ्ची । गुञ्जति शिम्ब्यां गुञ्जा । कृष्णं प्रान्तं लाति कृष्णला । रक्तिकापि ॥ ९८ ॥ पलं मांसं कषति पलंकषा । इक्षोरिव गन्धोऽस्याः स्वादुकण्टकत्वादिक्षुगन्धा । शुनो दंष्ट्रेव हिंस्रत्वाच्छ्वदंष्ट्रा । गवां कण्टको वेधको गोकण्टको गोक्षुरत्वात् । गौर्महीति तु युक्तं, अत एव वनशृङ्गाटो भूक्षुरश्चायम् । आह च गोक्षुरः स्याद् गोक्षुरको भक्षकः स्वादु-कण्टकः । गोकण्टको भक्षक[ट]कः षडङ्गः क्षुरकः क्षुरः ॥ गोकण्टो गोक्षुरः कण्टी षडङ्गस्त्रिकटस्त्रिकः । त्रिकण्टकः कण्टफलः श्वदंष्ट्र्यालदंष्ट्रकः (ध. नि. १।१०२; १०३) ॥ व्यर्थे पलंकषो लाक्षा गोक्षुरो गुग्गुलुश्च (अ. द्र. ३।५१) तथा—इक्षुगन्धा

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

8 *Atis.* १०० विश्वा विषा प्रतिविषा ऽतिविषोपविषाऽरुणा।
2 *Dugdhi.* शृङ्गी महौषधं, चाथ क्षीरावी दुग्धिका समे ॥
10 *Śatāvari.* १०१ शतमूली बहुसुता ऽभीरुरिन्दीवरी वरी।
ऋष्यप्रोक्ता-ऽभीरुपत्री-नारायण्यः शतावरी ॥
7 *Dāru haldi.* १०२ अहेरुरथ पीतद्रु कालीयक-हरिद्रवः।
दार्वी पचम्पचा दारुहरिद्रा पर्जनीत्यपि ॥
5 Orris root. १०३ वचोग्रगन्धा षड्ग्रन्था गोलोमी शतपर्विका।
1 A white sort. 8 Justicia. शुक्ला हैमवती, वैद्यमातृ-सिंह्यौ तु वाशिका ॥

विदारी कोकिलो गोक्षुरश्च (अ. द्र. ३।७८) ॥ ९९ ॥ विशत्यन्तर्विश्वा। वेवेष्टि विषा। प्रतीपा विषस्य प्रतिविषा, अगदत्वात्। शृङ्गयुक्तत्वाच्छृङ्गी। आह च–अतिविषा शुक्लकन्दा ज्ञेया विश्वा च भङ्गुरा। श्यामकन्दा प्रतिविषा शृङ्गी चोपविषा विषा [तथा] (ध. १।१०) ॥ महौषधं तु विषं नातिविषा। त्र्यर्थे तु हि महौषधं (विषं) शुण्ठी लशुनं चेति (अ. द्र. ३।३) विषा(ष)शब्दं बुद्धा भ्रान्तोऽयम्। क्षीरमवति क्षीरावी। दुग्धमस्त्यस्या दुग्धिका क्षीरकाकोलीयम्। आह च–द्वितीया क्षीरकाकोली क्षीरशुक्ला पयस्विनी। पयस्या [वयस्था] क्षीरमधुरा वीरा क्षीराविकारिका (ध. १।१३४)। अत्र क्षीरावी विकारिकेति च ग्रन्थकृन्मन्यते, क्षीरेति विकारिकेति तु वैद्याः ॥ १०० ॥ शतं बहूनि मूलान्यस्याः शतमूली। बहुधा सुवति बहुसुता। अभीरुः स्थिरपत्त्रा रसायनत्वाद्वा। इन्दीवर्युत्पलपुष्पा। वृणोति वरा। ऋष्यैः प्रोक्ताश्रिता द्वीपिशत्रुत्वात्। नारायणी विष्णुजाता। शतेन वृणोति शतावरी। न हिनोत्यहेरुः, अभीरोरपभ्रंशोऽयं वा। हरमेखलो निघण्टौ दृष्टः, यदाह–सहस्रमूली सहस्रावरी (ध. १।२९१) अहेरुरिति। आह च–शतवीर्या शतपदी पीवरीन्दीवरी वरी। सहस्रवीर्याऽभीरुश्च तुङ्गिनी बहुपत्रिका (ध. १।२९१) ॥ ऋष्यप्रोक्ता द्वीपिशत्रुर्दा[र्द्री]पिका वरकण्टकः। मता पुरुषदन्ता च शतावर्यूर्ध्वकण्टकः ॥ १०१ ॥ कालयति दोषान्कालीयकः। (ध. २।१९२) हरिः पीतो द्रुः स्कन्धोऽस्य हरिद्रुः। दार्वी दारुहरिद्रा (रा. निं. १।८३) च पिण्डहरिद्रातोन्या। अत्यर्थं पचति पचंपचा। पिपर्ति रोगेभ्यः पर्जनी। आह च–हरिद्रा पीतिका पिण्डा रजनी रञ्जनी निशा। गौरी वर्णवती पीता हरिता[द्रा]वरवर्णिनी (ध. १।५४) ॥ अन्या दारुहरिद्रापि हरिद्रुः पीतचन्दनम्। निर्दिष्टा वै कटकिनी स च कालेयकः स्मृतः ॥ कालीयको दारुनिशा दार्वीपीतद्रुपीतकाः। कटंकटेरी पर्जन्या पीतदारुपचंपचा (ध. रा. १।५७, ५८) ॥ १०२ ॥ वक्त्यनया वचा, वाक्पाटवकृत्। षड् ग्रन्थयः पर्वाण्यस्याः षड्ग्रन्था। गोरिव लोमान्यस्या लोमशत्वाद् गोलोमी। शुक्ला कृष्णा च द्वेधासौ,

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

१०४ वृषो ऽटरूषः सिंहास्यो वासको वाजिदन्तकः ।
4 Clitoria. आस्फोटा गिरिकर्णी स्याद् विष्णुक्रान्ताऽपराजिता ॥
5 Barleria. १०५ इक्षुगन्धा तु काण्डेक्षु-कोकिलाक्षेक्षुर-क्षुराः ।
6 Anethum. शालेयः स्याच्छीतशिवश् छत्रा मधुरिका मिसिः ॥
6 Euphorbia. १०६ मिश्रेया, ऽप्यथ सीहुण्डो वज्रःस्नुक् स्त्री स्नुही गुडा ।
6 *Bābreng.* समन्तदुग्धा, ऽथो वेल्लममोघा चित्रतण्डुला ॥
१०७ तण्डुलश् च कृमिघ्नश् च विडङ्गं पुन्-नपुंसकम् ।
2 Sida. 2 Crotalaria. बला वाट्यालका, घण्टारवा तु शणपुष्पिका ॥

यदाह–वचोग्रगन्धा गोलोमी जटिलोग्रा च लोमशा । अन्या श्वेतवचा मेध्या षड्ग्रन्था हैमवत्यपि (ध. २।६) । त्र्यर्थे शतपर्वा दूर्वा वशा वचा च (अ. द्र. ३।५५) । वैद्यानां मातेव रोगजित्त्वात् । हिनस्ति रोगान् सिंही । उश्यते काम्यते वाशिका ॥ १०३ ॥ वर्षति मधु वृषः । अटान् गच्छतो रूषत्यटरूषः । सिंहास्याकारपुष्पत्वात्सिंहास्यः । वाजिदन्ता इव केसराण्यस्य वाजिदन्तकः । आह च–वासकः सिंहपर्णी च वृषो वासोऽथ सिंहिका । अटरूषः सिंहमुखी भिषङ्मातातरूषकः (ध. १।२३) ॥ आस्फुटत्यास्फोता । गिरि(रे)रश्मवत्कर्णिकास्य(स्या) गिरिकर्णी । विष्णुनाक्रान्ता । अत एव रक्षाहेतुत्वान्न पराजिता । आह च–अश्वक्षुरा श्वेतपुष्पा श्वेता च गिरिकर्णिका । कटभी श्वेतसारा च श्वेताख्या चापराजिता (ध. ४।८४) । द्व्यर्थे आस्फोता सारिवा गिरिकर्णिका च (अ. द्र. २।३३) ॥ १०४ ॥ इक्षोरिव गन्धोऽस्याः, स्वाद्वित्यर्थः । इक्षुसदृक्काण्डत्वात् (काण्डेक्षुः) । कोकिलस्येवाक्षीण्यस्य कोकिलाक्षः । इक्षुं राती-क्षुरः । स एव लोकोक्त्या क्षुरः, पारुष्याद्वा । आह च–तथान्य इक्षुगन्धः स्यादिक्षुरः कोकिलाक्षकः । कासःकाण्डेक्षुसदृष्टिः कोकक्षुर्वायसेक्षुकः (ध. ४।१२२) ॥ शालायां भवः शालेयः, गुप्तत्वात्, अत एव शालीनः । शीतः शिवश्च । (छत्रा) छत्रातपत्रा । मस्यति परिणमति मिसिः । आह च–मिश्रेया तालपत्त्री च तालपर्णी मिसिस्तथा । शालेयः स च शालीनो नाम्ना शीतशिवो मतः (ध. २।४) ॥१०५॥ सीहुण्डः सिंहतुण्डापभ्रंशः, यन्मेखलाकुलिशतरू सीहुण्डौ । वज्रो भेदकत्वात् । स्त्रौ(स्नुह्य)ति क्षीरं स्नुक् स्नुही च, स्नुहेति वैद्याः । गुडा वृत्तत्वात्, गुहेत्यपपाठः, यच्छाश्वतः–गुडौ गोलेक्षुविकृती स्नुही गुडिकयोर्गुडा (४६७) ॥ सुधापि । आह च–स्नुक् सुधा च महावृक्षो गुडा निस्त्रिंशपत्त्रकः । समन्तदुग्धा गण्डीरा सीहुण्डो वज्रकण्टकः (ध. १।२३५) ॥ वज्रदुः स्नुक् स्नुहीत्येके पेठुः । वेल्लति वेल्लम् ॥ १०६ ॥ बिलति भिनत्ति विडङ्गं विलङ्गति वा । आह च–विडङ्गा जन्तुहन्त्री च कृमिघ्नी चित्रतण्डुला । तण्डुलः कृमिहाऽमोघा केश[केस]ला मृगगामिनी (ध.

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

5 A grape. १०८ मृद्वीका गोस्तनी द्राक्षा स्वाद्वी मधुरसेति च ।
7 *Téōri* : the white sort. सर्वानुभूतिः सरला त्रिपुटा त्रिवृता त्रिवृत् ॥
7 The black sort. १०९ त्रिभण्डी रोचनी, श्यामा-पालिन्द्यौ तु सुषेणिका ।
काला मसूरविदला ऽर्धचन्द्रा कालमेषिका ॥
4 Liquorice. ११० मधुकं क्लीतकं यष्टिमधुकं मधुयष्टिका ।
3 *Bhuīnkaonrā* the white sort. विदारी क्षीरशुक्लेक्षुगन्धा, क्रोष्ट्री तु या ऽसिता ॥
4 Another sort dark. १११ अन्या क्षीरविदारी स्यान् महाश्वेतर्क्षगन्धिका ।
4 *Kancharā*. लाङ्गली शारदी तोयपिप्पली शकुलादनी ॥

२।११) ॥ वलन्त्यनया वला, बलकृद्वा । वटति वाट्यालकः । चन्द्रनन्दनो बला भद्रौदनी हृद्या तथा वाट्यालक इत्याह । घण्टेवारौति घण्टारवा । शणस्येव पुष्पाण्यस्याः शणपुष्पी, पाककर्णपर्णेति (४।१।६४/५।२।९) ङीप् । आह च–शणपुष्पी बृहत्पुष्पी स चोक्तः शणघण्टकः (ध. नि. १।२००) ॥ १०७ ॥ मृद्वीका सौकुमार्यात् । गोस्तनाभा गोस्तनीति विशेषोऽपि सामान्यवृत्तिः । द्राति सरसत्वाद् द्राक्षा । आह च–द्राक्षा चारुफला कृष्णा पियाला कालमेषिका । स्वाद्वी गुडा मधुरसा मृद्वीका गोस्तनी स्मृता (ध. ५।५६) ॥ हारहूरा च । सर्वा अनुभूतयोस्याः सर्वानुभूतिः, नानारसेत्यर्थः । सरति सरला विरोचनीत्वात्, सरडेत्येके । त्रयः पुटाश्छादका अस्यास्त्रिपुटा, त्रिपुटी च, त्र्यस्रेत्येके । त्रिभिर्व्रियते त्रिभिर्वर्त्यते छाद्यते वा त्रिवृता त्रिवृत्, त्रिपुटत्वाद्वा ॥ १०८ ॥ त्रिभिर्भण्ड्यत उदघाट्यते त्रिभण्डी । रोचनी रुचिकर्त्री, रेचनीत्येके । शुक्लेयं, कृष्णामाह । पालयति पालिन्दी । सुषिणोति सुषेणी । आह च–श्यामा त्रिवृन्मालविका मसूरविदला च सा । कालार्धचन्द्रा पालिन्दी सुषेणी कालमेष्यपि (ध. १।२४३)॥ शुक्ला चापि त्रिभण्डीस्यात्काकाक्षी सरला त्रिवृत् । सर्वानुभतिस्त्रिपुटा त्र्यस्रा कूटरवृंहिणी ॥ आम्भसी रेचनी चैव कण्ठविक्षोभणी तथा (ध. १।२४५) ॥१०९॥ यष्टीरूपं मधुकं यष्टीमधुकम् । एकदेशान्मधुकम् । क्लीबत्वं तकति प्रतिहन्ति वृष्यत्वात्क्लीतकं, क्लीतसंज्ञं वा । आह च–मधुयष्टी च यष्टी च यष्टीमधु मधुस्रवा । यष्टीमधूकं मधुकं यष्ट्याह्वं मधुयष्टिका (ध. १।१४२) ॥ तल्लक्षणं क्लीतकं च–इति । विदार्य भक्ष्यते विदारी । क्षीरेण शुक्ला । इक्षुगंधा माधुर्यात्, क्षीरविदारीयं कृष्णो भूकूष्माण्डोऽयं वा[प्राक्षु देशेषु] । शुक्लो भूकूष्माण्डः सृगाली, रसं सृजतीति, क्रोष्ट्री तु लक्षणया । आह च–विदारिका मता शुक्ला स्वादुकन्दा शृगालिका । ऋष्यगन्धा विदारी च ऋष्यवल्ली विदारिका (ध. १।१४५) ॥ त्र्यर्थे–इक्षुगन्धा विदारी कोकिलाक्षको गोक्षुरश्च (अ. द्र. ३।७८) ॥ ११० ॥ ऋष्यान्गन्धयत्यर्दयति ऋष्यगन्धा । आह च–अन्या क्षीरविदारी स्यादिक्षुगन्धेक्षुवल्ल्यपि । क्षीरवल्ली क्षीरकन्दा

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

5 Celosia. ११२ खराश्वा कारवी दीप्यो मयूरो लोचमस्तकः ।
5 *Syām-latā.* गोपी श्यामा शारिवा स्यादनन्तोत्पलशारिवा ॥
4 *Rīddhi.* 4 *Vrīddhi.* ११३ योग्यमृद्धिः सिद्धि लक्ष्म्यौ, वृद्धेरप्या ह्वया-इमे ।
6 A banana. कदली वाराणवुसा रम्भा मोचांऽशुमत्फला ॥
3 *Mugānī.* ११४ काष्ठीला, मुद्गपर्णी तु काकमुद्गा सहेत्यपि ।
5 Egg plant. वार्ताकी हिङ्गुली सिंही भण्टाकी दुष्प्रधर्षिणी ॥
9 *Rasna.* ११५ नाकुली सुरसा रास्ना सुगन्धा गन्धनाकुली ।
नकुलेष्टा भुजङ्गाक्षी छत्राकी सुवहा च सा ॥

क्षीरशुक्ला पयस्विनी (रा. नि. १।१९६) ॥ व्यर्थे महाश्वेता नीलस्यन्दा यवशर्करा क्षीरविदारी च, तथा ऋष्यगन्धा मूकलं रक्तालुकं क्षीरविदारी च, तथा क्षीरशुक्ला क्षीरविदारी क्षीरकालोली नीलस्यन्दा च । लाङ्गली हलाकारा । शकुलादनी मत्स्य-भक्षणात् । आह च-जलपिप्पल्यभिहिता शारदी तोयपिप्पली । मत्स्यादनी मत्स्यगन्धा लाङ्गली शकुलादनी (ध. ४।६४) ॥ १११ ॥ खरमश्नुते खराश्वा । कारोरियं कारवी कर्मण्येत्यर्थः । दीप्योऽग्निदीपनः । मीनात्यग्निमान्द्यं मयूरः । लोच्यते लुच्यते वा मस्तकोऽस्य वर्वराकारत्वाल्लोचमस्तकः, लोचमर्कट इत्येके । आह च-अजमोदा वस्तमोदा दीप्यको लोचमस्तकः । खराश्वा कारवी वल्ली मोचा हस्ति-मयूरकः (ध. २।९८) ॥ व्यर्थे मयूरकोऽपामार्गोजमोदा तुत्थकश्च (अ.द्र.३।२३) । गोपायति गोपी । (श्यामा)श्यामवर्णा । यच्छाश्वतः-शारिवायां निशि श्यामा श्यामौ च हरितासितौ (३२६) । शीर्यन्तेऽनया दोषाः शारिवा । चन्दनाह्वा-दनत्वात्, अनन्तेत्येके । उत्पलाभपत्त्रोत्पलशारिवा । आहुश्च-शारिवा फणिजिह्वा च गोप्यास्फोता च चन्दना ॥ ११२ ॥ योजनीयं योगे साधु वा योग्यम् । ऋध्नोति ऋद्धिः । वृद्धेरोषधिविशेषस्यापि योग्यादीनि नामानि । आह च-ऋद्धिर्वृद्धिः सुखं सिद्धी रथाङ्गं मङ्गलं वसु । ऋद्धिपुष्टा[सृष्टा] युगं योग्यं लक्ष्मीः सर्वजनप्रिया (ध. १।१ ५) ॥ केन वायुना दल्यते कदली । वारणानां वुसो घासः, वारणवि(वि)षेत्येके । रभतेस्या रम्भा । मुञ्चति रसं मोचा । अंशुमानिव फलान्यस्या अंशुमत्फला, भानुफलाख्या ॥ ११३ ॥ ईषदष्ठीलमस्याः काष्ठीला, कार्ष्णी[ष्ठी]रस इत्येके । आह च -कदली सुकुमारा च रम्भा भानुफला मता । कार्ष्णी[ष्ठी] रसश्च निःसारा मोचा हस्तिवि(वु)षा तथा (ध. ४।७५) ॥ सहा क्षुद्रा, सहाख्यात्र । व्यर्थे हि सहा मुद्गपर्णी बला नाकुली च (अ. द्र. ३।७२), यतो महासहा माषपर्ण्युच्यते । वार्ताकं देश्याम् । भण्टाकी कण्टकार्या अन्येयमित्ययं मन्यते, वैद्यास्त्वभिन्ना प्राहुः, यदाह-हिङ्गुली बृहतीति च (अ. द्र. १।२१) ॥ ११४ ॥ नकुलानां प्रिया नाकुली।

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

5 *Sālparnī.*
4 Cotton.
1 Wild cotton.
3 *Rishabha.*
4 *Gōrakha.*
2 *Ghōshā* with white flowers.
1 With yellow flowers.
3 A small cucumber.
2 *Bhumijāmb.*
2 *Lāngalika.*
2 *Cāc-janghi.*
2 Cissus.
2 *Musal.*

११६ विदारिगन्धांऽशुमती सालपर्णी स्थिरा ध्रुवा ।
तुण्डिकेरी समुद्रान्ता कार्पासी बदरेति च ॥

११७ भारद्वाजी तु सा वन्या, शृङ्गी तु ऋषभो वृषः ।
गाङ्गेरुकी नागबला झषा ह्रस्वगवेधुका ॥

११८ धामार्गवो घोषकः स्यान्, महाजाली स पीतकः ।
ज्योत्स्नी पटोलिका जाली, नादेयी भूमिजम्बुका ॥

११९ स्याल् लाङ्गलिक्यग्निशिखा, काकाङ्घ्री काकनासिका ।
गोधापदी तु सुवहा, मुसली तालमूलिका ॥

नागसुगन्धा सर्पसुगन्धत्वात् । छत्राकी छत्राभपर्णा । सुष्ठु वहत्यामोदं सुवहा । अर्धेन रास्नार्धेन सर्पाक्षीति गौडाः, वैद्यास्तु नाकुलीगन्धनाकुल्यौ विदारीक्षीरविदारीवद् भिन्ने मन्यन्ते । आह च-नाकुली सर्पगन्धा च सुगन्धा भोगिगन्धिका । सैव सर्पसुगन्धेति-(ध. ४।१०३) । तथा-अन्या महासुगन्धा च सुवहा गन्धनाकुली । सर्पाक्षी नकुलेष्टा च छत्राकी विषमर्दनी (ध. ४।१०५) ॥ ११५ ॥ विदार्या गन्धोऽस्या विदारिगन्धा । अंशवः सन्त्यस्या अंशुमती दीर्घमूलत्वात् । शालस्येव पर्णान्यस्याः शालपर्णी । आह च-शालपर्णी स्थिरा सौम्या त्रिपर्ण्यतिगुहा ध्रुवा । विदारिगन्धांशुमती दीर्घमूला च पीतनी (ध. १।८७, ८८) ॥ तुण्डिकान् गन्धादीनीरयति कण्टकित्वात्तुण्डिकेरी । समुद्रः कण्टकैः कृतरक्षोऽन्तोस्याः समुद्रान्ता, दूरप्रसरत्वाद्वा । कल्पते कर्पासी । बदराणीव फलानि सन्त्यस्या बदरा, यन्माला-कर्पासो बदरः प्रोक्तो बादरः पिचवश्चाह । द्व्यर्थे तुण्डिकेरी चिञ्चा कर्पासी च (अ. द्र. २।७३) त्र्यर्थे समुद्रान्ता कर्पासी यवासकः स्पृक्का च (अ. द्र. ३।४०) ॥ ११६ ॥ वने भवा वन्या । सा कर्पासी । (भारद्वाजी) भरद्वाजसृष्टेत्यागमः । भद्रापि । शृङ्गाणि सन्त्यस्य शृङ्गी । अत एव वृषाख्यः । आह च-ऋषभो धूर्वहो वी[धी]रो मातृको वृषभो वृषः । वितानी ककुदिन्द्राक्षो बन्धुरो गोपतिः स्मृतः (ध. १।१२५) ॥ गाङ्गमीरयति पवित्रत्वात् गाङ्गेरुकी । नागानां बलकृन्नागबला । झषति हिनस्ति गन्धेन झषा । गवि जले-इन्द्धे (एधते) गवेधुका । आह च-गाङ्गेरुकी नागबला खरगन्धनिका झषा । विश्वदेवा तथारिष्टा ख[च]ण्डा ह्रस्वा गवेधुका (ध. १।२०४) ॥ ११७ ॥ धामार्जति धामार्गवः । घोषति शब्दायते घोषकः । स धामार्गवः पीतपुष्पो महाजाली, जालं वितानः । आह च-धामार्गवः कोशफलो राजकोशातकी फला । कर्कोटकी पीतपुष्पा महाजाली तथोच्यते (ध. १।१८९) ज्यौत्स्नी रात्रौ भासनात् । पटति विस्तीर्यते पटोली । जाली सवितानी । ऐरावतो नागरङ्गो नादेयी भूमिजम्बुकेत्युक्त्वापि भ्रान्त्यात्रोक्ता ॥ ११८ ॥ लाङ्गलवद् भेदनाल्लाङ्गली । अग्निशिखा स्प्रष्टुमशक्यत्वात्, अग्निमुखीत्येके । आह च-कलिकारी

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

2 *Mérāsrīngī.*
2 *Gōgī.*
3 Betel.
6 *Rénucā.*

१२० अजशृङ्गी विषाणी स्याद्, गोजिह्वा-दार्विके समे ।
ताम्बूलवल्ली ताम्बूली नागवल्ल्यप्यथ द्विजा ॥

१२१ हरेणू रेणुका कौन्ती कपिला भस्मगन्धिनी ।

5 *Elābāluca.*

एलावालुकमैलेयं सुगन्धि हरिवालुकम् ॥

4 *Cunduru.*
5 *Bālā.*

१२२ वालुकं, चाथ पालङ्क्यां मुकुन्दः कुन्द-कुन्दुरू ।
वालं ह्रीवेर-बर्हिष्ठोदीच्यं केशाऽम्बु नाम च ॥

5 Benzoin or Shilajit.
5 *Murā.*

१२३ कालानुसार्य-वृद्धाऽश्मपुष्प-शीतशिवानि तु ।
शैलेयं, तालपर्णी तु दैत्या गन्धकुटी मुरा ॥

तु फलिनी विशल्या गर्भपातनी। लाङ्गल्यग्निमुखी सौरी दीप्तानन्तेन्द्रपुष्प्यपि (ध. ४।९)॥ द्वयर्थे–अग्निमुखी भल्लातकी लाङ्गली च (अ. द्र. २।३१)। काकस्येवाङ्गं नासारूपं फलमस्याः काकाङ्गी, काकजङ्घेत्येके। आह च–काकनासा ध्वाङ्क्षनासा काकतुण्डफला च सा (ध. ४।३८)। गोधाया इव पदान्यस्या गोधापदी, कुम्भपदीषु च (५।४।१३९/८७८)। हंसपदी च। मुष्णा(स्य)ति खण्डयति दोषान्मुसली। द्वयर्थे तालपत्री मुसली मिश्रेया च (अ.द्र.२।५२)॥११९॥ अजस्येव शृङ्गाण्यस्या अजशृङ्गी, कर्कटशृङ्गीत्यर्थः। विषाणी शृङ्गीत्वात्। आह च–शृङ्गी कर्कटशृङ्गी च कुरङ्गी कर्कटाह्वया। कुलीरशृङ्गी वक्रा च महाप्येषा नताङ्ग्यपि (ध. १।८५)॥ गोजिह्वाभपत्त्रा। दारयति रोगान् दार्वी, ओषधिविशेषः। नागवल्ली फणिलता पातालानीतत्वात्। द्विर्जायते द्विजा ॥ १२० ॥ हरति हरेणुः। रेणुका भस्मयोगात्। कुन्त्या दुर्वाससा दत्ता कौन्ती। भस्मना धूल्या गन्धयति भस्मगन्धिनी। आह च–रेणुका राजपुत्री च नन्दिनी कपिला द्विजा। भस्मगर्भा पाण्डुफला भस्मगन्धा हरेणुका (ध. ३।५१)॥ गन्धद्रव्यं चैतत्। एला-ल-वालुकम्। हरि पिङ्गं वालुकं हरिवालुकम्। त्र्यर्थे सुरभिः सल्लकी सुरा–एलावालुका च (अ. द्र. ३।१९) ॥ १२१ ॥ पाल्यते पालङ्क्या। मुखात्कुन्द इव मुकुन्दः, मुञ्चति रसं वा। कुन्द्यति कुन्दुरुः। आह च–कुन्दुरुः स्यात्कुन्दुरुकः कुन्दश्चासौ विडङ्क्ष्यपि। मुकुन्दस्तीक्ष्णगन्धश्च पालिन्दो भीषणो बली (ध. ३।१३१)॥ वलते वालम्। जिह्वेति च ह्रीवेरम्। बर्हते वर्धते बर्हिष्ठम्। उदीचीभवमुदीच्यम्। केशपर्यायं वालत्वात्। अम्बुनाम तृड्घ्नत्वात्। आह च–वालकं वारि तोयं च ह्रीवेरं जलमम्बु च। केशं वज्रमुदीच्यं च पिङ्गमावपनं कचम् (ध. १।४७) ॥ १२२ ॥ कालमनुसरति शीतोष्णाभ्यां कालानुसार्यम्। वृद्धं कालस्थायि। अश्मनः पुष्पं, अश्मानं पुष्णाति वा, तदूर्ध्वजत्वात्। शीतत्वेन शिवं शीतशिवम्। द्वयर्थे शीतशिवं सैन्धवं मिश्रेया चेत्याहुः (अ. द्र. २।९८)। तानि

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

8 *Salāé.* १२४ गन्धिनी, गजभक्ष्या तु सुवहा सुरभी रसा ।
महेरुणा कुन्दुरुकी सल्लकी ह्रादिनीऽति च ॥

4 Lythrum. १२५ अग्निज्वाला-सुभिक्षे तु धातकी धातुपुष्पिका ।
5 Large Cardamoms. पृथ्वीका चन्द्रबालैला निष्कुटिर् बहुला, ऽथ सा ॥

5 Small Cardamoms. १२६ सूक्ष्मोपकुञ्चिका तुत्था कोरङ्गी त्रिपुटा त्रुटिः ।
6 *Cūṛ*, or *Cūṭ'h.* व्याधिः कुष्ठं पारिभाव्यं वाप्यं पाकलमुत्पलम् ॥

तु शैलेयं, शिलायां भवं शैलेयम् । आह च–शैलेयं पलितं वृद्धं जीर्णं कालानुसार्यकम् । स्थविरं च शिलादर्द्रु शिलापुष्पं शिलाभवम् (ध. ३।७३)॥ दैत्या मुराख्यदैत्य-नामत्वात् । (मुरा) मुर संवेष्टने । आह च–मुरा गन्धवती दैत्या गन्धाढ्या गन्ध-मालिनी । सुरभिः श्रुतगन्धा च कुटी गन्धकुटी स्मृता (ध. ३।६७) ॥ १२३ ॥ गजैर्भक्ष्यते गजभक्ष्या । सुष्ठु वहति स्रवति सुवहा, सुस्रवेति वैद्याः । महदीरणमस्या महेरणा । सत्कृत्य लक्ष्यते स्वाद्यते गजैः सल्लकी [शल्लकी] । ह्रादोऽस्त्यस्या ह्रादिनी । आह च–सल्लकी शल्लकी ह्रादा सुरभिः सुस्रवा रसा । अश्वमूत्री कुन्दुरुकी गजभक्ष्या महेरणा (ध. ३।१३५) ॥ १२४ ॥ अग्नेर्ज्वालेव रक्ता, मद्यपावनीत्वाद्वा । सुभिक्षा सुलभा । धातुरक्ता धातुकी, धातुपुष्पीत्वात् । आह च–धातुकी ताम्रपुष्पी च कुञ्जरा मद्यपावनी । पर्वतीया सुभिक्षा च वह्निपुष्पा च शब्दिता (ध. ३।९०) ॥ पृथ्वीका बहुफला पत्त्रैलात्वाद्वा । एवं बहुला । चन्द्रस्य कर्पूरस्य बाला पुत्रीव चमत्कारात् । एलयति मुखदौर्गन्ध्यमित्येला । निष्क्रान्ता कुटेः कोशान्निष्कुटिः । आह च–पत्त्रेला बृहदेला च त्रिदिवा त्रिदिवोद्भवा । स्थूलैला त्वक्सुगन्धा च पृथ्वीका चन्द्रकन्यका (ध. २।४६) ॥ त्रिपुटे(टी)तीन्दुः । व्यर्थे पृथ्वीका हिङ्गुपत्त्रिकोपकुञ्चिका सूक्ष्मैला चेत्याहुः (अ. द्र. ३।१६) । द्व्यर्थे तु त्रिपुटा त्रिवृत्सूक्ष्मैला चेति (अ. द्र. २।५९) लक्ष्याच्चाग्रेऽत्र विनिश्चयः ॥१२५॥ सा–एला सूक्ष्मा, उपकुञ्चयत्युपकुञ्चिका । तुत्था चाल्पत्वात् । कुरति शब्दायते कोरङ्गी । त्रिपुटा त्र्यश्रिः । त्रुट्यति त्रुटिः, सूक्ष्मत्वाद्वा । आह च–सूक्ष्मैला द्राविडी तुत्था कोरङ्गी बहुला त्रुटिः । एला कपोतवर्णा च चन्द्रबाला च निष्कुटिः (ध. नि. २।४४)॥ द्व्यर्थे त्रिपुटा त्रिवृत्सूक्ष्मैला च (अ.द्र.२।५९) । व्याधिपर्यायं कुष्ठत्वात् । कौ तिष्ठति कुष्ठम्, अम्बाम्बगोभूमीति (८।३।९७ / २९१८) षत्वं, कुष्णाति रोगान्वा । पारिषु तोयाशयेषु भवति पारिभव्यं, भव्यगेयेति (३।४।६८ / २८९४) साधुः । वाप्यां भवं वाप्यम्, व्याप्यमित्येके । पाकलं व्याधित्वात्, पाकं लाति वा । उत्पलं दाहहृत्त्वादुत्पल-पुष्पत्वाद्वा । आह च–कुष्ठो रोगो गदो व्याधिरुत्पलं पाकलं रुजा । वाप्यं वानीरजं

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

3 *Chór-cāntā.* १२७ शङ्खिनी चोरपुष्पी स्यात् केशिन्यथ वितुन्नकः ।
6 *Bhūmīāmalācī.* झटामला ऽज्झटा ताली शिवा तामलकीऽति च ॥
2 *Pundariya.* १२८ प्रपौण्डरीकं पौण्डर्यमथ तुन्नः कुबेरकः ।
6 *Tunna.* तुणिः कच्छः कान्तलको नन्दिवृक्षो, ऽथ राक्षसी ॥
6 *Chór*: sort of perfume. १२९ चण्डा धनहरी क्षेम-दुष्पत्र-गणहासकाः ।
4 *Nac'hī.* व्याडायुधं व्याघ्रनखं करजं चक्रकारकम् ॥
7 *Nalī.* १३० सुषिरा विद्रुमलता कपोताङ्घ्रि नटी नली ।
7Another perfume. धमन्यञ्जनकेशी च, हनुर् हट्टविलासिनी ॥
7 *Nac'hi.* १३१ शुक्तिः शङ्खः खुरः कोलदलं नखमथाऽऽढकी ।
6 *Tūbarī.* काक्षी मृत्स्ना तुवरिका मृत्तालक सुराष्ट्रजे ॥

रामं कौवीरं पारिभव्यकम् (ध. ३।४९) ॥ १२६ ॥ शंखिनी शौक्ल्यात् । चोरपुष्पी धनहरीत्वात्, रात्रौ विकाशाद्वा । केशाः सन्त्यस्याः केशिनी । चन्द्रनन्दनोऽत्र—चण्डा धनहरी चौरी चोरपुष्पा च तस्करी । तथा निशाचरी च स्यात्केशिनी ग्रन्थिकेत्यपि ॥ वितुद्यते वितुन्नकः । झटः संघातोऽस्या झटा । आमला—आमलकीत्वात् । अज्झटाश्चर्य-कारिसंघाता, अद् आश्चर्येऽद्भुतवत् । ताडयति मलांस्ताडी(ली) । आमलकीत्वाच्छिवा । ताम्यति तामलकी । आह च—तामलक्युत्तमा ताली तमलं(कं)तु पुलाकिनी । वितुन्नकस्त्वज्झटा च झटा चामलकीति च (ध. ३।८४) ॥ १२७ ॥ प्रकर्षेण पुण्डरीकस्येदं दाहहत्त्वात्प्रपौण्डरीकम् । अस्यैकदेशानुकाराल्लोके पुण्डर्यम् । आह, च—प्रपौण्डरीकं चक्षुष्यं पौण्डर्यं पुण्डरीयकम् (ध. ३।९२) । स्थलपद्ममिति गौडाः । तुद्यते तुन्नः । कुबेरः कुत्सितदेहः । अत एव तुणिस्थाने कुणिं पेठुः । कच्छ्य(च्य)ते कच्छः । आह च—तुणिस्तुन्नक आपीतस्तुणिकः कच्छकस्तथा । कुबेरकः कान्तलको नन्दिवृक्षोऽथ नन्दकः (ध. ३।१८) ॥ अश्वत्थाकारोऽयम् ॥ १२८ ॥ रक्ष्यतेऽस्या राक्षसी । क्षियति वसत्यस्मिन्गन्धः क्षेमकः । दुष्पुत्रश्चोरकत्वात् । गणं हासयति गणहासकः कोहनत्वात् । आह च—चोरकः शङ्कितश्चण्डा दुष्पुत्रः क्षेमको रिपुः । गणहासः कोहनकः कितवः फलको(चो)रकः (ध. ३।७१) । गन्धद्रव्यं चैतत् । व्याडायुधं नखत्वात् । चक्रमेलं धूपद्रव्यैः करोति चक्रकारकम् ॥ १२९ ॥ नखीयं, विद्रुमलताभा । कपोताङ्घ्रिर्नलिकात्वात् । नटति वायुना नर्तकीत्वान्नटी । धमनी शौषिर्यात् । अञ्जनाभकेशा (अञ्जनकेशी) । आह च—नलिका विद्रुमलता कपोतचरणा नली । शुषिरा धमनी शून्या निर्मथ्या नर्तकी नटी (ध. ३।४३) ॥ हन्ति हनुस्ती-क्ष्णाग्रत्वात् । हट्टे विलसति हट्टविलासिनी वेश्येव वा ॥ १३० ॥ शुक्त्याकृतिः । अत एव शंखः । खुरति विलिखति खुरः, प्राणिशफत्वाद्वा । कोलदलं बदरी-

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh

8 Cyperus rotundus.
१३२ कुटन्नटं दाशपुरं वानेयं परिपेलवम्।
प्लव-गोपुर-गोनर्द-कैवर्तीमुस्तकानि च ॥

5 *Gānt'hīala.*
10 *Piring* or *Asparac.*
१३३ ग्रन्थिपर्णं शुकं बर्हपुष्पं स्थौणेय-कुक्कुरे।
मरुन्माला तु पिशुना स्पृक्का देवी लता लघुः ॥

१३४ समुद्रान्ता वधूः कोटिवर्षा लङ्कोपिकेत्यपि।
5 Spikenard.
तपस्विनी जटामांसी जटिला लोमशामिषी ॥

पत्त्राख्ययेन्दुनोक्तम्। न खनति नखम्। आह च–नखः कररुहः शिल्पी करजोऽथ खुरः शफः। शुक्तिः शंखः ख[च]लः कोशी[ली] हनुर्नागहनुः सहः (ध. ३।५८) ॥ आढकीसंज्ञा धानाख्या तुवरीत्वात्, तुवरो हि कषायो रसः। कषति काक्षी। प्रशस्ता मृद् मृत्स्ना, सस्नौ प्रशंसायाम् (५।४।४० / २१०८)। म्रियतेऽनेन हेम मृतालकम्। सुराष्ट्रदेशे जातम्। आह च–सौराष्ट्री च मृतासङ्गः काक्षी कामी सुराष्ट्रजा। अजिता तुवरी स्तुत्या मृत्स्ना मृत्या(त्सा) मृतालकम् (ध. ३।१०५) ॥ १३१ ॥ कुटन्तो नटति, कुटन्नटापि। दशपुरे भवं दशपुरं, दाशान्पिपर्ति वा, कैवर्तीमुस्तत्वात्। वने जातं वानेयं, नद्यादिभ्यो ढक् (४।२।९७ / १३१७)। प्लवते लघुत्वात्प्लवः। गाः पिपर्ति गोपुरम्। अत एव गोनर्दम्। आह च–परिपेलवं प्लवं वन्यं गोपुरं स्यात्कुटन्नटम्। सितपुष्पं दाशपुरं गोनर्दं जीर्णबुध्नकम् (ध. ३।५५) ॥ १३२ ॥ ग्रन्थिप्रधानानि पर्णान्यस्य ग्रन्थिपर्णं, ग्रन्थीन्वा पिपर्ति ग्रन्थिमत्त्वात्। शुकस्येव बर्हाणि पर्णान्यस्य शुकबर्हं, शुकं बर्हमिति पदैकदेशत्वाद्वा द्वे संज्ञे। पुष्प्यति पुष्पं विकचाख्यम्। स्थूणाया इदं रूपेण स्थौणेयम्। कुक्कुरं श्वाकृति। आह च–स्थौणेयकं वह्निचूडं शुकगुच्छं शुकच्छदम्। विकचं शुकबर्हं च हरितं शीर्णलोमकम् (ध. ३।६९) ॥ मरुन्माले मारुतस्रगाख्ये द्वे संज्ञे एते, अयं तु तुशब्दादेकां मन्यते, मरुत्सहिता माला वा। पिशुना गन्धसूचनात्। स्पृशति गन्धैः स्पृक्का। देवी देवपुत्रीत्वात् ॥ १३३ ॥ वधूराशावधूत्वात्। कोटिभिर्वर्षति मधु कोटिवर्षा। लङ्कासूप्यते लङ्कोपी, समुद्रान्तत्वात्। इन्द्राद्याः–स्पृक्का माला पङ्कमुष्टिर्नीला देवी लतागुरुः। देवपुत्री च लङ्कोपी शीता पङ्कजमुष्टिका ॥ स्रग्मारुता कोटिवर्षा निर्माल्याशावधूः स्मृता। धन्वन्तरिश्च–स्पृक्का स्रग्ब्राह्मणी देवी लता लङ्कोपिकेत्यपि। पङ्कमुष्टिर्देवपुत्री निर्माल्या पिशुना वधूः (ध. ३।६२)। व्यर्थे समुद्रान्ता कपासी यवासकः स्पृक्का च (अ. द्र. ३।४०)। जटाः सन्त्यस्या जटा। अत एव तपस्विनी। समांसत्वान्मांसी। अत एवामिषी। गन्धमांसी चेयम्, यदाह–मांसी कृष्णजटा हिंस्रा नलदा जटिलामिषी। जटा च पिशिता मेषी क्रव्यादा च तपस्विनी (ध. ३।४५) ॥ द्वितीया गन्धमांस्यन्या भूतकेशी जटा स्मृता। पिशाची पूतना केशी

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

6 Woody Cassia. १३५ त्वक्पत्रमुत्कटं भृङ्गं त्वचं चोचं वराङ्गकम् ।
4 Zerumbet or zedoary. कर्चूरको द्राविडकः काल्पको वेधमुख्यकः, ॥
1 A herb, or deciduous plant. १३६ ओषध्यो जाति-मात्रे स्युर-जातौ सर्वमौषधम्,। 1 A drug, or simple.
Any esculent plant.
2 Amaranth. शाकाऽऽख्यं पत्र-पुष्पा ऽऽदि, तण्डुलीयो ऽल्पमारिषः॥
5 A sort of potherb. १३७ विशल्याऽग्निशिखाऽनन्ता फलिनी शक्रपुष्पिका ।
5 Another sort. स्याद्दक्षगन्धा छगलात्त्रयावेगी वृद्धदारकः ॥
4 The moonplant. १३८ जुङ्गो, ब्राह्मी तु मत्स्याक्षी वयःस्था सोमवल्लरी ।
4 A medicinal sort. पटुपर्णी हैमवती स्वर्णक्षीरी हिमावती ॥

भूतकेशी च लोमशा ॥ १३४ ॥ त्वग्वृक्षशकलत्वात् । पत्त्राकृति पत्त्रम् । उत्कटं चमत्कारात् । भृङ्गं कार्ष्ण्यतैक्ष्ण्याभ्याम् । चोचमग्निचोदकम् । वरमङ्गं त्वग्रूपमस्य वराङ्गकम् । आह च–त्वचं वराङ्गं भृङ्गं त्वक् चोचं शकलमुत्कटम् (ध. २।५०) । कृन्तति त्वग्दोषं कर्चूरः, हरिद्राभः । द्रावयति द्राविडः । कल्यकारी काल्यः । आह च–कर्चूरको गन्धमूलो द्राविडः काल्य एव च । वेधमुख्यो दुर्लभश्च कस्य चित्संमता शटी (ध. ३।९४) ॥ १३५ ॥ ओषं धयत्योषधी फलपाकान्ता जातिः । सर्वौषधं रोगहृत् । सर्वमिति क्षौद्रघृततैलाद्यमप्यौषधं, ओषधेरजातौ (५।४।३७ / २१०५) इत्यण् । तद्विशेषाच्छाकादीनाह । शक्यतेऽनेन भोक्तुं इयति देहं वा शाकम् । पत्त्रं निम्बादेः, पुष्पं कोविदारादेः । आदिशब्दात्फलं वार्ताक्यादेः, मूलं मूलकविशादेः, कन्दः सूरणादेः, अङ्कुरो वंशादेः । आह च–मूलपत्त्रकरीराग्रफलकाण्डविरूढकाः । त्वक्पुष्पं कवकं चेति शाकं दशविधं स्मृतम् ॥ विरूढकं तालास्थिमज्जेति गौडः, वयं तु क्षेत्रोध्दृतस्य फलमूलादेः सेकान्नवोद्भिन्नानङ्कुरान्विरूढान्मन्यामहे । कवकं छत्त्रिका । शाकविशेषानाह । ताडयति दोषांस्तण्डुलीयकः, लघुतण्डुलाभबीजो वा । अल्पं मृष(ष्य)त्यल्प मारिषः । आह च–तण्डुलीयक उद्दिष्टः स्वटाला तण्डुलेरकः । भण्डीरस्तण्डुलीबीजो मेघनादो घनस्वनः (ध.४।११६) ॥१३६॥ लाङ्गलिकीयं पूर्वोक्तापि शाकत्वादिहोपात्ता । ऋक्षवद्गन्धयति ऋक्षगन्धा, ऋष्यगन्धा वृक्षगन्धेति च पाठभेदः । छगलस्येवाण्डान्यस्थीन्यस्याश्छगलाण्डी । आवेगी वृक्षत्वात्, उद्वेजको वा । वृद्धं वृद्धत्वं दारयति वृद्धदारकः, वृद्धं दारकीकुरुते वा । जुङ्गति वृङ्क्ते दोषाञ्जुङ्गः, जुगि वर्जने । आह च–वृद्धदारक आवेगी जुङ्गको जीर्णबालकः । अन्तःकोटकपुष्पा स्यादजाङ्गी छगलाण्ड्यपि (ध. ४।१२७) ॥ त्र्यर्थे वृक्षगन्धा वृद्धदारकः पिण्डालुकं विदारी च ॥ १३७ ॥ ब्राम्ही पावनीत्वात् । मत्स्याक्षी मत्स्यपुष्पा । वयस्था वयसः स्थैर्यकृत् । त्र्यर्थे सोमवल्ली वाकुची गुडूची ब्राह्मी च । हिमावती हिमजातत्वात् । आह च–क्षीरिणी काञ्चनक्षीरी पटुपर्णी च कर्शिनी । तिक्तदुग्धा हैमवती हेमदुग्धा हिमावती

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh

4 *Māshānī.* १३९ हयपुच्छी तु काम्बोजी माषपर्णी महासहा ।
5 *Télācuchā.* तुण्डिकेरी रक्तफला बिम्बिका पीलुपर्ण्यपि ॥
9 *Barbarā.* १४० बर्बरा कवरी तुङ्गी खरपुष्पा ऽजगन्धिका ।
4 *Elānī.* एलापर्णी तु सुवहा रास्ना युक्तरसा च सा ॥
5 Wood Sorrel. १४१ चाङ्गेरी चुक्रिका दन्तशठाऽम्बष्ठाऽम्ललोणिका ।
4 Sorrel. सहस्रवेधी चुक्रो ऽम्लवेतसः शतवेध्यपि ॥
4 A sensitive plant. १४२ नमस्कारी गण्डकारी समङ्गा खदिरेत्यपि ।
5 *Jīyatī.* जीवन्ती जीवनी जीवा जीवनीया मधुस्रवा ॥

(ध. १।२४०) स्वर्णक्षीरी स्वर्णवती सुवर्णक्षीरिकापि च । त्र्यर्थे हैमवती हरीतकी श्वेतवचा च ॥ १३८ ॥ हयपुच्छाकृतिः । कम्बोजदेशे भवा काम्बोजी । महासहेति मुद्गपर्ण्याः सहाया भिन्नेयम् । आह च–माषपर्णी तु काम्बोजी कृष्णवृन्ता महासहा । आर्द्रमाषा सिंहवृन्ता माष माषाश्वपुच्छिका (ध. १।१३६) ॥ तुण्डिकेरी–ओष्ठोपमफलत्वात् । बम्बमिव बिम्बिका । आह च–बिम्बी रक्तफला तुण्डी तुण्डिकेरफला च सा । ओष्ठोपमफला गोह्ला(?)पीलुपर्णीच तुण्डिका (ध.१।१०२॥) द्व्यर्थे तुण्डिकेरी बिम्बी कर्पासी च (अ. द्र. २।७३) ॥ १३९ ॥ शाकोऽयम्, वर्वरा कुटिलह्रस्वकेशाभा, अत एव कवरी । आह च–अजगन्धा खरपुष्पा वस्त्रगन्धामगन्धिका । कवरी वर्वरागन्धा तुङ्गी पीतमयूरकः (ध. २।१००) ॥ रस्यते रास्ना । आह च–रास्ना युक्तरसा रस्या श्रेयसी रसनी रसा । सुगन्धमूला विरसा सैव युक्ताफला मता (ध. १।२७०) ॥ त्र्यर्थे सुवहा रास्ना शेफालिका नाकुली च (अ. द्र. ३।५०) ॥ १४० ॥ चाङ्गं दन्तपटुत्वमीरयति चाङ्गेरी । चुक्यते व्यथतेऽस्याश्चुक्रिका । अम्बे तिष्ठत्यम्बष्ठा । अम्ललेव लुनात्यम्ललोणिका, अपभ्रष्टोऽयम् । आह च–क्षुद्राम्लीका तु चाङ्गेरी लोणिका चाम्ललोणिका (ध. ५।३६)। त्र्यर्थे–अम्बष्ठा पाठा मोचिका चाङ्गेरी च, तथा चुक्रिकाम्लिका चाङ्गेरी भण्डाकी च (अ.द्र.३।४१)। आह चअम्लोम्लवेतसो भीमो रसाम्लोम्लितवेतसः । रक्तस्रवो वेतसाम्लः शतवेधी च वेधकः (ध. २।९६) ॥ त्र्यर्थे चुक्रको वृक्षाम्लोम्लवेतसश्चुकश्च, (अ. द्र. ३।४२) तथा सहस्रवेधी–अम्लवेतसो हिङ्गुलता कस्तूरी च (अ. द्र. ३।३३) ॥ १४१ ॥ नमस्कारी अञ्जलिरूपपत्त्रत्वात् । गण्डेषु ग्रन्थिषु कृष्णा गण्डकाली । समान्यङ्गान्यस्याः समाङ्गा । खदिरा कृष्णसूक्ष्मपत्त्रत्वात्। आह च–रक्तपाठी शमीपत्त्रा समङ्गाञ्जलिकारिका । नमस्कारी गण्डकाली रास्ना खदिरकेत्यपि (ध. ४।१०९) जीवन्यनया जीवनी । आह च–जीवन्ती जीवनीया च जीवाजीवन वर्धनी । मङ्गल्यनामधेया च शाकश्रेष्ठा यशस्करी (ध. १।१४०) ॥१४२॥

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

5 *Jīvaca.* १४३ कूर्चशीर्षो मधुरकः शृङ्ग-ह्रस्वाङ्ग-जीवकाः ।
3 Sort of Gentian. किराततिक्तो भूनिम्बो ऽनार्यतिक्तो, ऽथ सप्तला ॥
5 *Charmaghas.* १४४ विमला शातला भूरिफेना चर्मकषेत्यपि ।
3 *Cācōlī.* वायसोली स्वादुरसा वयःस्था, ऽथ मकूलकः ॥
5 *Danti.* १४५ निकुम्भो दन्तिका प्रत्यक्श्रेण्युदुम्बरपर्ण्यपि ।
4 Carui.
3 *Ajwaen.* अजमोदा तूग्रगन्धा ब्रह्मदर्भा यवानिका ॥
3 Costus. १४६ मूले पुष्कर-काश्मीर-पद्मपत्राणि पौष्करे ।
5 *St'halpadma* अन्यथाऽतिचरा पद्मा चारटी पद्मचारिणी ॥

कूर्चः शीर्षेस्य कूर्चशीर्षः । शृङ्गः शृङ्गाभः । जीवयति जीवकः, जीवतीति वा दीर्घायुष्ट्वात् । आह च–जीवकः शृङ्गकः सर्जो दीर्घायुः कूर्चशीर्षकः । ह्रस्वाङ्गो मधुरः स्वादुः प्राणदश्चिरजीव्यपि (ध. १।१२३) किरातदेशे भवस्तिक्तः किरात-तिक्तः । अनार्यः किरातः । आह च–किराततिक्तको हैमकाण्डतिक्तः । किरा-तकः । भूनिम्बोऽनार्यतिक्तश्च कैरातो रामसेनकः (ध. १।३३) ॥ १४३ ॥ सपति समवैति सप्तला । शातं सुखं लाति शातला । भूरयः फेनाभा बिन्दवोऽस्या भूरिफेनाः चर्मे कसति वर्धते चर्मकसा, चर्मकषेत्येके । आह च–शातला सप्तला सारा बिन्दुला विमलामला । बहुफेना चर्मकसा फेना दीप्ता सनालिका (ध. १।२३८) ॥ वायसवद्वलीयते वायसोली काकोल्याख्या । काये तिष्ठति कायस्था, कि ज्ञाने । आह च–काकोली मधुरा शुक्ला क्षीरी श्वाङ्-क्षोलिका मता । कायस्था स्वादुमांसी च वायसोली च कालिका (ध. १।१३२) ॥ व्यर्थे स्वादुरसा पृथ्वीका शतावरी काकोली च (अ. द्र. ३।६९) ॥ १४४ ॥ मङ्कते चित्रत्वान्मकूलकः । नियतः कुम्भो निकुम्भः । दन्ताभा दाम्यन्त्यनया दोषा वा दन्ती । आह च–दन्ती शीघ्रा निकुम्भा स्यादुपचित्रा मकू-लकः । तथोदुम्बरपर्णी च विशल्या च घुणप्रिया (ध. १।२५३) ॥ द्व्यर्थे प्रत्यक्श्रेणी द्रवन्ती दन्ती च (अ. द्र. २।६०) अजवन्मोदो गन्धोऽस्या अजमोदा । ब्रह्मद-र्भाभा । यच्छत्यग्निमान्द्यं यमानी, पूर्वोक्तापीह शाकत्वात् पुनरुक्ता, यवानीं मत्वा वा ग्रन्थकृद् भ्रान्तः । आह च--यवानी दीप्यको दीप्यो यवसाह्वयनामकः । यमानि कोग्रगन्धा च दीपनीया च दीपनी (ध. २।९१) ॥ पूर्वोक्ता हि खराश्चैवाजमोदा ब्रह्मकुशा च । तथा चेन्द्राद्याः अजमोदा ब्रह्मकुशाखराश्वा लोचमर्कटः । वल्लीमोदा वस्तमोदा सैव हस्तिमयूरकः ॥ १४५ ॥ पुष्करमूले त्रीणि नामानि । पद्मपत्त्रमिति ग्रन्थकृद् भ्रान्तः, पद्मपर्णमिति बुद्धवान्, यदाह–मूलं पुष्करमूलं च पौष्करं पुष्कराह्वयम् । काश्मीरं पुष्करजटा धीरं तत्पद्मवर्ण-

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

5 *Śundā-róchanī.* १४७ काम्पिल्यः कर्कशश् चन्द्रो रक्ताङ्गो रोचनीऽत्यपि ।
6 Cassia. प्रपुन्नाडस् त्वेडगजो दद्रुघ्नश् चक्रमर्दकः ॥

1 Onion. १४८ पद्माट उरणाख्यश् च, पलाण्डुस् तु सुकन्दकः ।
2 A green onion. लताकं-दुद्रुमौ तत्र हरिते, ऽथ महौषधम् ॥

6 Garlick. १४९ लशुनं गृञ्जनाऽरिष्ट-महाकन्द-रसोनकाः ।
2 Hogweed.
2 A sort of potherb. पुनर्नवा तु शोथघ्नी, वितुन्नं सुनिषण्णकम् ॥

कम् (ध. १।६६) अत्यर्थं चरति-अतिचरा । पद्माभा । चरति चारटी । आह च-पद्मचारिण्यतिचरा पद्मा पद्मावतीति च । चारटी गन्धमूला च लक्ष्मीः श्रेष्ठा सुपुष्करा (ध. ४।९१)॥ व्यर्थे-अव्यथा हरीतकी महाश्रमणी पद्मचारिणी च (अ. द्र. ३।५३) ॥ १४६ ॥ कम्पिलदेशे भवः काम्पिल्यः । चन्द्रोह्लादनात्क्षैण्याद्वा । (रोचनी) रेचनीतिपाठः, यदाह-कम्पिल्यकोऽथ रक्ताङ्गो रेचनी रेचकस्तथा । रञ्जनो लोहिताङ्गश्च कर्कशो रक्तचूर्णकः (ध. ३।१३८) ॥ आहेन्दुः-कर्कशाख्यः करंजः स्यात्स काम्पिल्यः पटोलकः । प्रपुनाति प्रपुणति वा प्रपुन्नाडः। एडवन्मेषाक्षवद् गज्यते शब्द्यत एडगजः ॥ चक्राणि दद्रुमण्डलानि मृद्नाति चक्रमर्दकः ॥१४७॥ पद्मवदटति पद्माटः । उरणवन्मेषवदक्षीण्यस्योरणाक्षः । इन्द्वाद्याः-चक्रमर्दः स्मृतश्चक्री प्रपुन्नाडश्च नामतः । एकरेतो दद्रुहरो मेषाक्षैडगजश्च सः ॥ पिपर्ति धातून्पलाण्डुः । तत्र हरिते तत्र नीले पलाण्डौ लताकौ लवतर्काख्यः । दुष्टो द्रुमोपवित्रत्वात् । धन्वन्तरिस्त्वभेदेनाह-पलाण्डुर्भवनेष्टश्च मुकुन्दो मुखदूषकः । हरिणोन्य पलाण्डुस्तु लताकौ दुर्द्रुमश्च सः (ध. ४।७१) ॥ १४८ ॥ सुश्रुतस्त्वाह-लशुनो दीर्घपत्त्रश्च पिच्छगन्धो महौषधम् । फरणश्च पलाण्डुश्च लवतर्कोपराजितः ॥ गृञ्जनं यवनेष्टश्च पलाण्डोर्दश जातयः । महौषधं सर्वरोगजित्त्वात् । लशति छिनत्ति रोगान्-लशुनम् । गृञ्जति कुत्सितं शब्द्यते गृञ्जनः । न रिष्यत्यरिष्टः । रसोनः पञ्चरसत्वात् । आह च-रसोनो लशुनोरिष्टो म्लेच्छकन्दो महौषधम् । महाकन्दो रसाख्योऽन्यो गृञ्जनो दीर्घपत्त्रकः (ध. ४।६६) । महौषधगृञ्जनादीनामाकृतिभेदेपि रसाद्यैक्यादभेदं मन्यते । पुनर्नवेव (छिन्नापि) विशाखत्वात् । आह च-पुनर्नवो विशाखश्च कटिल्लः स शिलाटकः । वृश्चीवः क्षुद्रवर्षाभूर्दीर्घपत्त्रः कटिल्लकः (ध. १।२७४) ॥ वितुद्यते वितुन्नकं नाम शाकम् । सुष्ठु निषीदन्त्यमस्मिन्गुणाः सुनिषण्णकम् । आह च-शितिसारः सूतपुत्रस्तुल्या च सुनिषण्णकः (ध. १।१५५) । शाकभेदोऽयम्, यदाह-पाठा शूषा शटी शाकं वास्तुकं सुनिषण्णकम् । विबन्धघ्नमवस्रंसि वर्चोभेदि तु

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

4 *Asan-parni.* १५० स्याद् वातकः शीतलो ऽपराजिता शणपर्ण्यपि ।
5 Heart-pea. पारावताङ्घ्रिः कटभी पण्या ज्योतिष्मती लता ॥
4 *Trāyamāṅa.* १५१ वार्षिकं त्रायमाणा स्यात् त्रायन्ती बलभद्रिका ।
5 *Vārāhi* or *chāmārālu.* विश्वक्सेनप्रिया-गृष्टिर् वाराही बदरेत्यपि ॥
4 *Bhrin-gariva.* 2 A potherb. १५२ मार्कवो भृङ्गराजः स्यात्, काकमाची तु वायसी ।
7 *Sónph.* शतपुष्पा सितच्छत्राऽतिच्छत्रा मधुरा मिसिः ॥
१५३ अवाक्पुष्पी कारवी च, सरणा तु प्रसारिणी ।
5 *Gand'habhādāliyā.* तस्यां कटम्भरा राजबला भद्रबलेत्यपि ॥
6 *Chacawat.* १५४ जनी जतूका रजनी जतुकृच् चक्रवर्तिनी ।
5 *Ambahaldī.* संस्पर्शा,ऽथ शटी गन्धमूली षड्ग्रन्थिकेत्यपि ॥

वास्तुकम् ॥ १४९ ॥ शीतलवातक इत्येका संज्ञा, यद्धन्वन्तरिः—शणपर्णी शीतलवातक इत्याह । द्व्यर्थेऽपराजिता शीतलवातको गिरिकर्णिका च (अ. द्र. २।६१)। कटत्यावृणोति कटभी । पण्या स्तुत्या । ज्योतिष्मती–अग्न्याभत्वात् । लता दूरप्रसरात् । आह च–ज्योतिष्मती तु कटभी स्यात्सुवर्णलतेति च । ज्योतिष्का चाग्निभासा च लवणोत्का च दुर्दिना (ध. १।२६७)।। त्र्यर्थे लता प्रियङ्गुर्ज्योतिष्मती सारिवा च (अ. द्र. ३।१७)। द्व्यर्थे पारावतपदी काकजङ्घा ज्योतिष्मती च (अ. द्र. २।५२) ॥ १५० ॥ वर्षासु भवं वार्षिकम् । आह च–त्रायमाणा कृतत्राणा त्रायन्ती त्रायमाणिका । बलभद्रा बलदेवा वार्षिकं गिरिसानुजम् (ध. १।२५४°) ॥ वाराही वराहक्रान्ता, (अत एव विष्णुवल्लभा)। अत एव घृष्टिर्घर्षणात् । त्र्यर्थे बदरा सुवर्चला अश्वगन्धा वाराही च (अ. द्र. ३।३०) ॥१५१॥ मर्वति संपृच्यते मार्कवः । भृङ्गवद्राजते रञ्जति कृष्णीकरोति च भृङ्गराजः, भृङ्गरजोपि । आह च–भृङ्गराजो भृङ्गरजो मार्कवो भृङ्ग एव च । अङ्गारकस्त्वेकरजो भृङ्गारः,केशरञ्जनः (ध.४।११)॥ काकवन्मचति(ते) वर्णेन संपृच्यते काकमाची । अत एव वायसी, काचमाच्यपि । आह च–काचमाची ध्वाङ्क्षमाची काकसाह्वा च वायसी। शतपुष्पा बहुपुष्पा । सितच्छत्राभा (ध. ४।२१)॥१५२॥ अवाञ्च्यधोमुखानि पुष्पाण्यस्या अवाक्पुष्पी ।। कारोरियं कारवी कर्मण्या । आह च–शतपुष्पा मिसिर्घोषाषाढका माधवी शफा । अतिच्छत्रा त्ववाक्पुष्पी शताह्वा कारवी स्मृता (ध. २।१) ॥ सरति वातसंकोचान्निवर्ततेऽङ्गमनया सरणा, सरणी तु युक्तः पाठः । कटं बिभर्ति कटंभरा । राजरूपा मुख्या बला बलकृत् । आह च–प्रसारणी तु प्रसरा सरणी सारणी च सा । चारुपर्णी राजबला भद्रपर्णी प्रसारिका (ध. १।२८९) ॥ १५३ ॥ जायतेऽस्या जन्तुर्जनी । जतु करोति जतूका । संगतः स्पर्शोस्याः संस्पर्शा । आह च–जतुकारा तु जतुकृज्जतुकारी जनी

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

3 Momardica charantia. १५५ कर्चूरोऽपि पलाशो, ऽथ कारवेल्लः कठिल्लकः ।
4 Trichosanthes. सुषवी चा,ऽथ कुलकं पटोलम् तिक्तकः पटुः ॥
2 A pumpkin gourd. १५६ कूष्माण्डकम् तु कर्कारुरुर्वारुः कर्कटी स्त्रियौ । 2 A sort of cucumber.
2 A bitter gourd. इक्ष्वाकुः कटुतुम्बी स्यात्, तुम्ब्यलाबूरुभे समे ॥
2 A long gourd sweet.
3 Another sort of cucumber. १५७ चित्रा गवाक्षी गोडुम्बा, विशाला स्विन्द्रवारुणी ।
1 Coloquintida. अर्शोघ्नः सूरणः कन्दो, गण्डीरस् तु समष्ठिला ॥
3 An esculent root.
2 A potherb.

स्मृता । जननी चैव संकर्षा जतूका चक्रवर्तिनी (ध. ४।८८) ॥ शटति शटी, षड्-ग्रन्थिकैकदेशः षटीति मूर्धन्यादिमाहुः ॥ १५४ ॥ पलाशाः सन्त्यस्य पलाशः । आह च-शटी षटी पलाशश्च ज्ञेया पृथुपलाशिका । सुगन्धमूला । गन्धाली षड्ग्रन्था सुव्रता वधूः (ध. १।६१) ॥ कस्यचित्संमता । षटीति कर्चूरस्य षटीत्वं षट्याः कर्चूरत्वं चेतीह कर्चूरोपादानम् (अ. द्र. २।९७) ॥ द्वयर्थे चाह षटी गन्धपलाशः कर्चूरश्चेति । कारेण वेल्लति कारवेल्लः । कटिं लाति कठिल्लः, कटल्यावृणोति वा । सुष्ठु सूयते सुषवी । कोलति संस्त्यायते कुलकं, कुत्सितं लक्ष्यत आस्वाद्यते वा । पटति सरलत्वात्पटोलः । तिक्तो रसेन । पटुर्देहपटुत्वकृत्, लवणानुसर इत्येके । आह च-पटोलः कुलकस्तिक्तः पटुकः कर्कशश्छदी । राजीफलः पाण्डुफलो राजिमानमृताफला (ध. १।४९) ॥१५५॥ कोरूष्मणानिति, कुत्सितोष्माण्डेषु बीजेष्वस्य वा पित्तकारित्वात्कूष्माण्डः, कुष्यते करोति तृप्तिं वा । कर्कश्चासावियर्ति-अरुर्वस्तिशोधनः सरणत्वात्कर्कारुः । आ ईर्यते-एर्वारुः कटुचिर्भटी, उर्वारुकमिव बन्धनाद् इति श्रुतेः-(ऋ. वे. ७।५९।३०) उर्वारुकं स्वादुचिर्भटीमाहुः । ह्रस्वः कर्कः कर्कटी, ग्रामटीवल्लौकिकष्टप्रत्ययः । इष्यत इक्ष्वाकुः, क्षत्रियधनत्वाद्वा । कटुका तुम्बी, तुबि अर्दने । आह च-कटुकालाबुनी तुम्बी लम्बा पिण्डफला तथा । इक्ष्वाकु, क्षत्रियधनस्तिक्तबीजो महाफलः (ध.१।१७०) ॥ न लम्बतेलाबूः, काक्का नञ्, न लाति वान्तर्जलम् । समे इति स्त्रीत्वेनापि । अत्रेन्द्राद्याः-अलाबूस्तुम्बकः प्रोक्तो जलालाबूरलाम्बुनी । भक्षलाम्बुमहातुम्बीति-॥१५६॥ गोतुम्बा, अपभ्रंशोयं गवाक्षीत्वात् । आह च-ऐन्द्रीन्द्रवारुणी द्राक्षा इन्द्रेर्वारुवृषादनी । गवादनी क्षुद्रफला वृषभाक्षी गवाक्ष्यपि (ध. १।२४८) ॥ द्वयर्थे चित्रा विशाला द्रवन्ती (अ. द्र. २।६८) चेति विशालायाश्चित्रात्वाद् भ्रान्तो ग्रन्थकृत् । गवाक्षीविशेषो वा विशालेति न दोषः । विशाला महाफलत्वात् । इन्द्रवदक्षैर्वृणोतीन्द्रवारुणी । आह च-अन्येन्द्रवारुणी प्रोक्ता विशाला तु महाफला । आत्मरक्षा चित्रफला तुवसी त्रपुषी च सा (ध. १।२५०) ॥ सूर्यते प्रेर्यते सूरणः । कन्द्यतेन्विष्यते कन्दो मूलविशेषः । गण्डीन् ग्रन्थीनीरयति गण्डीरः, पुंसि । सम्यगस्थीनि लाति समष्ठिला सान्द्रत्वात्, समष्ठिला नाम शाकं, यन्माला-गण्डीरो ना समष्ठिला ॥ १५७ ॥

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh

5 Various sorts of pot-herbs. १५८ कलम्ब्युपोदिका स्त्री तु मूलकं हिलमोचिका ।
6 Bent grass. वास्तुकं शाक-भेदाः स्युर्, दूर्वा तु शतपर्विका ॥

4 A similar grass with white blossoms. १५९ सहस्रवीर्या-भार्गव्यौ रुहाऽनन्ताऽथ सा सिता ।
गोलोमी शतवीर्या च गण्डाली शकुलाक्षका ॥

4 A fragrant grass. १६० कुरुविन्दो मेघ-नामा मुस्ता मुस्तकम-स्त्रियाम् ।
2 Another sort. 3 A different kind. स्याद् भद्रमुस्तको गुन्द्रा, चूडाला शक्रलोचटा ॥

10 A bamboo. १६१ वंशे त्वक्सार-कर्मार-त्वचिसार-तृणध्वजाः ।
शतपर्वा यवफलो वेणु-मस्कर-तेजनाः ॥

कलम्बमस्याः कलम्बी। अपगतोदका जाङ्गलत्वात्, अपोदकामत्स्यकालीति धन्वन्तरिः। संज्ञितं मूलं मूलकः, अवदंशत्वेप्यस्य शाकत्वं, यो त्वुभयोर्भवति लभते सोऽन्यतरतो व्यपदेशमिति। हिलाद्वीर्यान्मोचयति हिलमोचिका। वसन्त्यस्मिन्गुणा वास्तुकं क्षारपत्राख्यम्। कलम्ब्याद्याः पञ्चते शाकप्रकाराः, शाकाख्यं पुष्पमूला(पत्रपुष्पा) दीयत आरभ्य वा (पृ० ११५) यन्माला–मण्डूकपर्णी पालङ्क्या चिल्लिका चाप्य-पोदका। चाङ्गेरी हिलमोचा च कलम्बी शाकजातयः॥ दूरं वाति दूर्व्यते वा पशु-भिर्दूर्वा ॥ १५८ ॥ भृगोरियं भार्गवी। सहस्रवीर्या बहुपर्वा महाप्रभावा वा। रोहति मूले रुहा। अनन्ता दूरप्रसरणात्, नीलदूर्वेयं, यदाह–नीलदूर्वा स्मृता शष्पं शाद्वलं हरिता तथा। शतपर्वा शतवीर्या शतवल्ल्यसिता लता (ध. ४।१४३)॥ सहस्रवीर्या-नन्ता च दुर्मरा भार्गवी रुहा। गोरिव लोमान्यस्या गोलोमी। आह च–गोलोमी श्वेतदूर्वा च श्वेतगर्भा सिता लता (ध. ४।१४४)। नीलश्वेतयोः पर्यायविपर्या-सोऽन्वेष्यः। श्वेतदूर्वाविशेषोयम्। गण्डैर्ग्रन्थिभिरल्यते गण्डाली। मत्स्याक्षितुल्यग्रन्थिः (शकुलाक्षकः)। आह च–गण्डदूर्वा तु गण्डाली तीव्रा मत्स्याक्षिकापि च। वह्नि-नाडी कलापश्च वारणी शकुलाक्षकः (ध. ४।१४५)॥ १५९ ॥ कुरुदेशं विन्दति कुरुविन्दः। मेघपर्यायोऽम्बुधरत्वात्। मुस्यति खण्डयति रोगान् मुस्ता, लक्ष्ये त्रिलिङ्गा। गुणैर्द्रान्ति रोगा अस्या गुन्द्रा। धन्वन्तरिरभेदेनाहमुस्तमम्बुधरो मेघो घनो राजकशेरुकः। भद्रमुस्तो वराहोऽब्दो गाङ्गेयः कुरुविन्दकः (ध. १।४०)॥ उच्चटत्युत्फलत्युच्चटा, चक्राङ्केयम्॥ १६० ॥ वन्यते वंशः। त्वचि सरति त्वक्सारः, सृस्थिरे ($\frac{३।३।१७}{३१८३}$) इति घञ्। (त्वचिसारः) तत्पुरुषे कृतिबहुलम् ($\frac{६।३।१४}{६७२}$) इति सप्तम्या अलुक्। कर्म इयर्ति कर्मारः। तृणानां ध्वजो मुख्यः। यवाभं फलमस्य यवफलः। वेणन्ति वियन्ति वानेन वेणुः। मा क्रियतेऽनेन मस्करः, मस्कर-मस्करिणौ वेणुपरिव्राजकयोः ($\frac{६।१।१५४}{१०६८}$)। तेजयति तेजनः। द्व्यर्थे तेजनः शरो

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh

1 The same rattling or whistling.
3 A knot or joint.
3 *Saraharī*.

१६२ वेणवः कीचकास् ते स्युर् ये स्वनन्त्यनिलोद्धताः ।
ग्रन्थिर् ना पर्व-परुषी, गुन्द्रस् तेजनकः शरः ॥

3 A reed.
3 *Cās*.
1 *Bugai*.

१६३ नडस् तु धमनः पोटगलो, ऽथो काशम-स्त्रियाम् ।
इक्षुगन्धा पोटगलः, पुंसि भूम्नि तु बल्वजाः ॥

2 Sugarcane.
Varieties of the same.
2 A fragrant grass.

१६४ रसाल-इक्षुस्, तद्-भेदाः पुण्ड्र-कान्तारकाऽऽदयः ।
स्याद् वीरणं वीरतरं, मूले ऽस्योशीरम-स्त्रियाम् ॥

10 Its root.
A gramineous plant.

१६५ अभयं नलदं सेव्यममृणालं जलाशयम् ।
लामज्जकं लघुलयमवदाहेष्टकापथे ॥

वेगुश्च ॥ १६१ ॥ कीति चकति कीचकः, कीचेति कायति वा । ग्रन्थते ग्रन्थिः । पर्वति पर्व । पिपर्ति परुः । गुन्द्रो दर्भविशेषे रूढः, यदाहुः-दर्भाणां स्थाने शरैः प्रस्तरितव्यम् (सि. तत्त्वबो. सू. ३८)। तेजयति निशिनोति तेजनकः । शृणाति पारुष्याच्छरः । काशस्त्विषीका च ॥ १६२ ॥ नडयत्यर्दयति नडः, नल गन्धे । धमनोन्तःसुषिरत्वात्, धमिः सौत्रः, यथा धान्तो धान्तः काञ्चनस्येव राशिः । पोटेन संश्लेषेण गलति पोटगलः । आह च-नलो नटो नडश्चैव स च पोटगलः स्मृतः । धमनोनन्तकश्चेति नडस्तु शर उच्यते (ध. ४।१४१) ॥ काशते काशः । कोकिलाक्षपर्याय इक्षुगन्धेत्येके । द्वयर्थे पोटगलः काशो नडश्च (अ.द्र.२।९१)। वलन्ते वल्वजास्तृणविशेषाः ॥१६३॥ रस्यते रसालः । इष्यत इक्षुः । पुण्ड्रदेशजत्वाद् (पुण्ड्रः), पौण्ड्रोपि । कान्तमुखमियर्ति कान्तारः, कान्ता अरका भागा अस्य वा । आदिशब्दात्कोशकाराद्याः । आह च-इक्षुः कर्कटको वंशः कान्तारो वेणुनिः स्मृतः । इक्षुरन्यः पौण्ड्रकश्च रसालः सुकुमारकः (ध. ४।१२०) ॥ अन्यः करङ्कशालिः स्यादिक्षुयोनीक्षुबालिका । तथान्य इक्षुगन्धा स्यादिक्षुलः कोकिलाक्षकः (ध. ४।१२२) ॥ वीरयते वीरणं वीरतरं च तृणभेदः । अस्य वीरणस्य मूलं उश्यते काम्यत इत्युशीरम् ॥ १६४ ॥ अभयं रोगहरत्वात् । आह च-उशीरममृणालं स्यादभयं समगन्धिकम् । रणप्रियं वीरतरं वीरं वीरणमूलिका (ध. ३।१४)। नलं द्यति नलदं अपारुष्यात्, नलति वा । अत एवामृणालमहिंस्रम् । जल आशेते जलाशयं, शीतवीर्यत्वाद्वा । लाति दोषान्-ला, ला मज्जासारोस्य लामज्जकम् । लघुगुणेन लीयते लघुलयम् । अवली[दी]यते दाहोनेनावदाहम् । इष्टं कापथमस्याधोवातकृत्त्वादिष्टकापथम् । आह च-लामज्जकं सुनालं[वासं] स्यादमृणालं लयं लघु । इष्टकापथकं शीघ्रं दीर्घमूलं जलाशयम् (ध. ३।८६) ॥ ब्यर्थेऽमृणालं लामज्जकमुशीरं च (अ. द्र. २।७०), तथा सेव्यं लामज्जकमुशीरं चेति (अ. द्र. २१)। अवदाहमवदत्तमाहुस्तच्चोशीरं नलदं, यदिन्दुः-अवदत्तं रणप्रियम् । ग्रन्थकृत्तु सेव्यामृणाल-

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

१६६ नलाऽऽदयस् तृणं गर्मुच्छामाक-प्रमुखा अपि ।
4 Sacrificial grass. अ-स्त्री कुशं कुथो दर्भः पवित्रमथ कत्तृणम् ॥

6 A fragrant grass. १६७ पौर-सौगन्धिक-ध्याम-देवजग्धक-रौहिषम् ।
3 A mushroom.
2 Andropogon. छत्रा ऽतिच्छत्र-पालघ्नौ मालातृणक-भूस्तृणे ॥

2 Young grass. १६८ शष्पं बालतृणं, घासो यवसं, तृणमर्जुनम् ।
2 Meadow grass.
1 Abundance of grass. तृणानां संहतिस् तृण्या, नड्या तु नडसंहतिः ॥
2 Grass in general.

1 Plamyra. १६९ तृणराजाह्वयम् तालो, नालिकेरम् तु लाङ्गली ।
2 Coconut.
5 Faufel. घोण्टा तु पूगः क्रमुको गुवाकः खपुरो, ऽस्य तु ॥

योर्नलदोर्शीरैकार्थत्वाद् भ्रान्तः ॥ १६५ ॥ (नलादयः) तृणजातीया इत्यर्थः । तृण्यतेद्यते पशुभिस्तृणम् । गर्मुच्छयामाकौ तृणधान्यविशेषौ । गीर्यते गर्मुत् । श्यामं वर्णमकति श्यामाकः । प्रमुखशब्दान्नीवाराद्याः । तृणगर्मुती एकार्थे इत्येके । कौ शेते कुशः । कु(को)थति कुथः । दृणाति पारुष्याद्दर्भः, दृभ्यते वा । पूयतेनेन पवित्रं, सग्रन्थि तु पवित्रकमिति स्मृतिः । कुत्सितं तृणं कत्तृणं, तृणेचजाताविति ($\frac{६।३।१०३}{१०३९}$) कोः कत् ॥ १६६ ॥ पुरे भवं पौरम् । सुगन्धप्रयोजनं सुरभिः (सौगन्धिकम्) । ध्यायते पशुभिर्ध्यामं धूसरवर्णं वा । देवैर्जग्धमिव जर्जरत्वात् । यत्र तत्र रोहति रौहिषं, रुहेर्वृद्धिश्च (उ० ४७) इति इषच् । आह च–कत्तृणं शकलिर्भूरिभूतिकं रौहिषं ततम् । ध्यामकं भूमकं पौरं मुद्गलं देवजग्धकम् (ध. १।८०) ॥ त्र्यर्थे सौगन्धिकं नीलपद्मं कत्तृणं गन्धपाषाणश्च (अ. द्र. ३।४९) । छत्राकारस्तृणविशेषश्छत्रा । अतिक्रान्तश्छत्रा मतिच्छत्रः, छत्रातिच्छत्रामित्येके । पारुष्यात्पालं हन्ति पालघ्नः । मालारूपाणि तृणान्यस्य मालातृणकः । भुवस्तृणं भूस्तृणः, पारस्करादित्वात् ($\frac{३।२।१५७}{२०७१}$) सुट्, भूरव्ययं वा । आह च–भूस्तृणो रौहिणो भूतिर्भूमिकोथ कुटुम्बकः । मालातृणश्च पालघ्नश्छत्रातिच्छत्रकस्तथा ॥ १६७ ॥ शस्यते शष्पं, शसु हिंसायाम् । बालं नवं तृणम् । घस्यतेद्यते घासः । यूयते यवसं तृणजातिः । अर्ज्यतेर्जुनं, सर्वं च तृणमर्जुनमिति भागुरिः । (तृण्या) पाशादित्वाद्यत् पाशादिभ्येयः ($\frac{४।२।६९}{१२४८}$) । (नड्या) प्राग्वद्यत् ॥ १६८ ॥ तृणराजाख्यस्तृणद्रुममध्ये मुख्यत्वात् । तलति प्रतितिष्ठति बहुमूलत्वात्तालः । भूमिपिशाचो देश्याम् नालिकान्नलयुक्तान्पुष्पादीनीरयति नालिकेरः । हालाकारपत्त्रशाखात्वाल्लाङ्गली । तत्फलं चोचम् । घुणति (घोणते) भ्रमति–अनया घोण्टा । पवते पूगः । क्रामति क्रमुकः । गुवत्यनेन स्रंसकत्वाद्गुवाकः । खानि पृणाति

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh

*1 Its nut, called Betel-nut.
1 Pandanus.
1 Carypha.
1 Wild date tree.

१७० फलमुद्वेगमेते च हिन्ताल-सहितास् त्रयः । 3 Marshy date tree.
खर्जूरः, केसरी, ताली, खर्जूरी, च तृणद्रुमाः ॥ 1 A Palm.

इति वनौषधि-वर्गः ४, अत्र मूलश्लोकाः १७० ॥, क्षे०.

अथ सिंहादि-वर्गः ५

14 A lion.

१ सिंहो मृगेन्द्रः पञ्चास्यो हर्यक्षः केसरी हरिः ।
'कण्ठीरवो मृगरिपुर् मृगदृष्टिर् मृगाशनः ।
पुण्डरीकः पञ्चनख-चित्रकाय-मृगद्विषः ॥१॥'

3 A tiger.
2 A hyena.

शार्दूल-द्वीपिनौ व्याघ्रे, तरक्षुस् तु मृगादनः ॥

12 A hog.

२ वराहः सूकरो घृष्टिः कोलः पोत्री किरिः किटिः ।
दंष्ट्री घोणी स्तब्धरोमा क्रोडो भूदार इत्यपि ॥

9 A monkey or ape.

३ कपि-प्लवङ्ग-प्लवग-शाखामृग-वलीमुखाः ।
मर्कटो वानरः कीशो वनौका, अथ भल्लुके ॥

खपुरः कारपत्त्रशाखः ॥ १६९ ॥ अस्य पूगस्य फलमुद्वतो वेगोस्योद्वेगं स्रंसकत्वात् । पूगादयो हि फलवृत्तयः क्लीबे, फलेलुक् (४।३।१६३ / २५४१) घोण्टा तु, हरीतक्यादिभ्यश्च (४।३।१५७ / २५४६) इति लुपा, लुपियुक्तवद्व्यक्तिवचने (२।२।५३ / २२९४) इति वृक्षे फले च स्त्रियामेव । एते तालनालिकेरपूगास्त्रयो हिन्तालेन चतुर्थेन सहिताः खर्जूराद्याश्चत्वारस्तृणप्रधाना वृक्षाः । ताली जात्यन्तरम् । एवं खर्जूरी भूमिखजरः । हिनोति वर्धते हिन्तालः । खर्जूरः, खर्ज व्यथने । केत्यते ज्ञायते गन्धेन केतकी । तालयति ताली ॥ १७० ॥ इति वनौषधिवर्गः । ४ ।

हिनस्ति सिंहः । मृगाणां द्वीप्यादिशशकान्तानामिन्द्रः । पञ्चास्यो विस्तृतास्यः, पचि विस्तारवचने, कर्मणि घञर्थेकविधानम् (वा० ३।३।९४ / ३२३४), मुखपादैर्योध्दृत्वाद्वा । हर्यक्षः । अत एव हरिः, हरत्याकर्षति वा । कण्ठीरवो देश्याम् । शृणाति शार्दूलः । द्वौ वर्णावीयते द्वीपोस्त्यस्य वा । तन्निवासित्वाद् द्वीपी । व्याजिघ्रन् हन्ति व्याघ्रः । चित्रकायः पञ्चशिखश्च । तरं क्षिणोति मार्गं रुणद्धि तरक्षुः—आरण्यः श्वा, तरक्ष इत्येके । वृकोऽपि ॥१॥ वरमाहन्ति वराहः । सूयतेत्यर्थं सूकरः । घर्षति घृष्टिः । पीनत्वात्कोलः, कुल संस्त्याने । पोत्रं मुखाग्रमस्यास्तीति पोत्री । किरति क्ष्मां किरः, इगुपधेति (सू०) कः । केटति किटिः, किट गतौ । क्रुड घनत्वेस्मात्क्रोडः, क्रोडः कुद्दालो मुस्तादो दंष्ट्रास्त्रो मुखलाङ्गल इति दुर्गः ॥ २ ॥ कम्पते चलति कपिः । प्लवैर्गच्छति प्लवगः प्लवंगोऽपि, गमेःसुपि (वा० ३।२।९९ / ३९९६) खच्चडित् (वा० ३।२।९१ / ३९९८)

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

4 A bear.
3 A rhinoceros.
5 A buffalo.

४ ऋक्षाऽच्छभल्ल-भल्लूका, गण्डके खड्ग-खड्गिनौ ।
लुलायो महिषो वाहद्विषत्-कासर-सैरिभाः ॥

10 A shakal.

५ स्त्रियां शिवा भूरिमाय-गोमायु-मृगधूर्तकाः ।
शृगाल-वञ्चुक-क्रोष्टु-फेरु-फेरव-जम्बुकाः ॥

5 A cat.
3 An iguana.

६ ओतुर् बिडालो मार्जारो वृषदंशक आखुभुक् ।
त्रयो गौधेर-गौधार-गौधेया गोधिकाऽऽत्मजे ॥

2 A porcupine.
3 His quills.
2 A swift antelope.
3 A wolf.

७ श्वावित् तु शल्यस्, तल्-लोम्नि शलली शललं शलम् ।
वातप्रमीर् वातमृगः, कोकस् त्वीहामृगो वृकः ॥

इति प्लवंगः,अन्यत्रापिदृश्यते (वा० $\frac{३०१८}{२१६८}$) इति डे प्लवगः, गमश्च (सू०) इति खचि प्लवंगमोपि । शाखासंचारी मृगः (शाखामृगः) । वलयः मुखेस्य वलीमुखः । म्रियते मर्कटः कुम्भकर्णनिगीर्णत्वात् । वने रमते वनरस्तस्यायं वानरः, पक्षे नरो वा । चिकेति जानाति कीशः, कीशब्दमीष्टे वा । वनेओकोऽस्य वनौकाः । कृष्णमुखो गोलाङ्गलः कापेयं चापलादिकम् ॥ ३ ॥ भल्लति (ते) हिनस्ति भल्लुकः, लक्ष्ये तु (भल्लूकः), दधति कुहरभाजामत्र भल्लूकयूनामिति (उ०राम०२-२१) । ऋक्षति (ऋक्ष्णोति) ऋक्षः । अच्छ आभिमुख्येन भल्लति (ते) अच्छभल्लः, अच्छेत्याभिमुख्यार्थेऽव्ययम् । भालयति(ते)भालूकः । भल्लकोपि गण्डति संहन्यते गण्डकः । खडति भिनत्ति खड्गः । खड्गं शृङ्गमस्यास्तीति खड्गी । वाध्रीणसोपि । लुलति पङ्करे लुलायः । महति मह्यां शेते वा महिषः । महोपि । वाहं हयसमूहं द्वेष्टि वाहद्विषत्, द्विषोऽमित्रे ($\frac{३।२।१३}{३१११}$) इति शतृप्रत्ययः । वाहद्विषन्नित्येके । धर्मार्तः कं जलमासरति कासरः, ईषत्सरति वा महाकायत्वात् । सोरिभिर्दान्तैर्भाति सीरिभः कुटुम्बी तस्यायं सैरिभः । रजस्वलोपि ॥ ४ ॥ शिनोति शिवा, शकुनावेदिनी वा, शृगालेऽपि स्त्रीलिङ्गः, यच्छाश्वतः–शिवः कीलः शिवा क्रोष्टा भवेदामलकी शिवा । १ । गां मिनोति मीनाति या गोमायुः । मृगान् धूर्वति मृगधूर्तः ॥ असृगालाति सृगालः, सरति सृजति वा । क्रोशति क्रोष्टा । फे–इत्यव्यक्तं रौति फेरुः फेरवश्च । जमति जम्बुकः सर्वभक्षत्वात् । फेरण्डोपि ॥५॥ अवत्याखुभ्य ओतुः । विशन्–आलात्याखून् विडालः, विलालो वा, बिलान्यलति पर्याप्नोति वा, बिलति भिनत्ति–आखून्वा, विड् आलस्याशुचित्वाद्वा, विड आक्रोश इत्यस्माद्वा । आखुभ्यो गृहं मार्ष्टि मार्जारः । वृषानाखून्दशति वृषदंशः । जलेशयादन्या बिलेशया गोधेयम्, अहेर्गोधायां जातो जास्यन्तरमित्येके । (गौधेर इ०) गोधाया ढुक् ($\frac{४।१।१२९}{११३५}$), आरगुदीचाम् ($\frac{४।१।१३०}{११३६}$), शुभ्रादित्वाड्ढक् ($\frac{४।१।१२६}{११२३}$) ॥ ६ ॥ श्वानं विध्यतीति श्वावित् , नहिवृतिवृषिव्यधीति ($\frac{६।३।११६}{१०३७}$) दीर्घः । शलति शल्यानि

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

5 A deer or antelope.
1 Belonging to a doe.
1 Sorts of deer, of which the hides are used.
1 Various sorts of deer.
1 Various animals. A beast in general.
8 A rat.
2 A mouse, or small rat.

८ मृगे कुरङ्ग-वातायु-हरिणाऽजिनयोनयः ।
ऐणेयमेण्याश् चर्माऽऽद्यमेणस्यैणमुभे त्रिषु ॥ 1 Belonging to a buck.

९ कदली कन्दली चीनश् चमूरु-प्रियकावपि ।
समूरुश् चेति हरिणा अमी अजिनयोनयः ॥

१० कृष्णसार-रुरु-न्यङ्कु-रङ्कु-शम्बर-रौहिषाः ।
गोकर्ण-पृषतैण-ऋय-रोहिताश् चमरो मृगाः ॥

११ गन्धर्वः शरभो रामः सृमरो गवयः शशः ।
इत्याऽऽदयो मृगेन्द्राऽऽद्या गवाऽऽद्याः पशुजातयः ॥

'अधोगन्ता तु खनको वृकः पुन्ध्वज उन्दुरः ॥'

१२ उन्दुरुर् मूषकोऽप्याखुर्, गिरिका वालमूषिका ।
छुछुन्दरी गन्धमुखी दीर्घतुण्डी दिवान्धिका ॥ २ ॥

किरति वा शल्यको बिलेशयः । शलको [लो] पि । तस्य लोम्नि शलाकाख्ये, यन्मलाश्वाविच्छलाकी शल्ली, शल गतौ । वातं प्रमिमीते (वातप्रमीः), वाताभिमुखधावनात् । कोकते गृह्णाति कवते याति वा कोकः । ईहा मृगस्येवास्य ईहामृगः, ईहां मृगयते वा । ईहां वर्कते—ईहावृक एवैकदेशेन वृक इत्युक्तः । आरण्यः श्वेत्येके । कुक वृक आदाने ॥ ७ ॥ मृग्यते व्याधैर्मृगः । कौ रङ्गति कुरङ्गः । वातमयते वातायुः, वानं शुष्कमयते वानायुरित्येके । ह्रियते गीतेन हरिणः । अजिनस्य योनिः । (ऐणेयं) विगारेवयवे का, एण्यावञ् (४।३।१५९) । (ऐणं) विकारादौ, प्राणिरजतादिभ्योऽञ् (४।३।१५४) । ऐणेयमैणं च वाच्यलिङ्गौ ॥ ८ ॥ के दलति कदली, कन्दे लीयते कन्दली इन्नन्तौ । चिनोतीति चीनः । चमति चमूरुः । प्रीयते प्रियकः । समूर्य (र्य्य) ते समूरुश्चित्रवर्णः । एतेचर्मण्युपयुक्तः ॥ ९ ॥ अमी मृगविशेषाः । कृष्णेन सारः शबलः कृष्णसारः । रौति रुरुः । न्यञ्चति न्यङ्कुः न्यङ्क्वादित्वात् (७।३।५३) कुत्वम् । रमते रम्यते वा रङ्कुः । शं वृणोति शंवरः । रोहिषाख्ये तृणे भवो रौहिषः । पृषतो बिन्दुचित्रः, मत्वर्थीयो—अच् । एरयेणः । इषर्ति ऋश्यः, ऋषी गतावित्यस्मान्मूर्धन्यः षः स्यात् । रोहितो रक्तत्वात् । चमति चमरः ॥ ॥ १० ॥ गन्धयत्यर्दयति गन्धर्वः । शृणाति शरभः । रमन्तेस्मिन् रामः । सरति सृमरः । गुवति गवते वा गवयः । शशति प्लुत्या गच्छति शशः । आदिशब्दान्नुरुजा- [या]दयः (?) । मृगेन्द्राद्यां उक्ताः । गवाद्याश्च वक्ष्यमाणाः पाश्यन्ते पाशैः पशवः, तिर्यञ्चोपि । श्वापदा हिंस्रपशवः ॥ ११ ॥ उनत्त्युन्दुरुः, अदन्तोपि । मूषेति मूषिकः । आखनत्याखुः । पुंध्वजोपि । खनको गुहाशयो गर्ताटश्चं । वृषो नानार्थे । गिरति

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

2 A lizard, chameleon, &c. १३ सरटः कृकलासः स्यान्, मुसली गृहगोधिका। 2 A small house-lizard.
4 A spider. लूता स्त्री तन्तुवायोर्णनाभ-मर्कटकाः समाः ॥
2 An insect.
1 A centipede. १४ नीलङ्गुस् तु कृमिः, कर्णजलौकाः शतपद्युभे।
2 A caterpillar.
3 A scorpion. वृश्चिकः शुककीटः स्यादलि-द्रुणौ तु वृश्चिके ॥
3 A dove or pigeon. १५ पारावतः कलरवः कपोतो, ऽथ शशादनः।
3 A hawk or falcon. पत्री श्येन, उलूकस् तु वायसाराति-पेचकौ ॥
8 An owl. 'दिवान्धः कौशिको घूको दिवाभीतो निशाटनः ॥२॥'
2 A sky-lark.
2 A wagtail. १६ व्याघ्राटः स्याद् भरद्वाजः, खञ्जरीटस् तु खञ्जनः।
2 A heron.
2 A blue jay. लोहपृष्ठस् तु कङ्कः स्याद,थ चाषः किकीदिविः ॥
3 The forktailed shrike. १७ कलिङ्ग-भृङ्ग-धूम्याटा, अथ स्याच्छतपत्रकः। 2 A wood-pecker.
3 *Pipihā*. दार्वाघाटो, ऽथ सारङ्गः स्तोककश् चातकः समाः ॥

गिरिका, खर्वासुर्बालमूषिकेति दुर्गः। [गन्धज्ञापि स्त्रियाम्] ॥१२॥ सरति सरटः। कृकं शिरोग्रीवं लासयति कृकलासः, कृकिलास इत्यपि(प)पाठः। प्रतिसूर्यः शयानकश्च। जाहको गात्रसंकोची हलाहलोञ्जलिकेति वाच्यम्। मुस्यति भिनत्ति मुसली, मुस खण्डते, मुशलीति गौडः। गृहगोलिकेति सभ्यः पाठः, यस्या घरगोलीति प्रसिद्धिः। लूपते लूता। तन्त्रं तन्तून्वयति तन्त्रवायः [तन्तुवायः]। ऊर्णा नाभावस्योर्णनाभः। मर्कट इव रोहणावरोहणान्मर्कटकः। जालिको जालकारश्च ॥ १३ ॥ नीलति नीला [ल] :। क्रामति क्रि[कृ]मिः, क्रमितमिशतिस्तम्भामतइच्च (उ० ७२१)। चु(पु)लकोपि। शतं पदानामस्याः शतपदी, कुम्भपदीपुच (५।४।१३९/८७८) इति साधुः। उभे द्वे स्त्रियाम्। वृश्चति वृश्चिकः। शूकः कण्टकस्तत्प्रधानः कीटः (शूककीटः), भ्रमरभेदोयम्। आलमनर्थोत्रास्त्याली, ज्यौतिषेऽली। द्रुणति द्रुणः, द्रुण हिंसायां, कः, द्रोण इत्येके, विषकीटोयम् ॥ १४ ॥ पा(प)रापतस्यायं पारावतः, जपादित्वात् (ग०) वत्वम्। रञ्जकश्च। केन पवते कपोतः, कस्य वायोः पोत इत्यागमः, आरण्योयं, आद्यस्तु गृहकपोतः, अयं त्वमेदं मन्यते। पत्रीति सामान्यं विशेषे वर्तते, यच्छाश्वतः–श्येनाख्यो विहगः पत्री पत्त्रिणो शरपक्षिणौ, (२२३) माला–श्येनः पत्त्रिशशादनौ। श्यायते श्येनः। उलति नेत्राभ्यां दहत्युलूकः, ऊर्ध्वालोकनादिति निरुक्तम्। पचति पीयते वा पेचकः। घूको निशाटश्च ॥१५॥ व्याजिघ्रन्नटति व्याघ्राटः। भरद्वाजापत्यं भरद्वाजोस्त्यस्य वा भरद्वाजश्चाटकेराख्यः। खञ्जतीति खञ्जनः। लोहवर्णं पृष्ठमस्य। कङ्कते कङ्कः। चषति चाषः। किकीति दीव्यति बाशते किकीदिविः, द्वे नामनी इत्येके, किकिदीविरित्यन्ये ॥१६॥ के लिङ्गं चुडास्य कलिङ्गः। भृङ्गवत्कृष्णपक्षी (भृङ्गः)। धूमवानिवाटति धूम्याटः, धूम्र

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh

4 A gallinaceous fowl.
१८ कृकवाकुस् ताम्रचूडः कुक्कुटश् चरणायुधः ।

2 A sparrow.
१९ चटकः कलविङ्कः स्यात्, तस्य स्त्री चटका, तयोः ।
1 Its female. Their offspring
पुमपत्ये चाटकैरः, स्त्र्यपत्ये चटकैव सा ॥ 1 male and 1 female.

2 Numidian crane.
२० कर्करेटुः करेटुः स्यात्, कृकण-क्रकरौ समौ । 2 *Cáēr.*
4 The black cuckoo.
वनप्रियः परभृतः कोकिलः पिक इत्यपि ॥

13 A crow.
२१ काके तु करटाऽरिष्ट-बलिपुष्ट-सकृत्प्रजाः ।
ध्वाङ्क्षाऽऽत्मघोष-परभृद्-बलिभुग्-वायसा अपि ॥
'स एव च चिरञ्जीवी चैकदृष्टिश् च मौकुलिः ॥'

2 A raven. 2 A gallinule. 2A kite. 2 A vulture. 2 A parrot.
२२ द्रोणकाकस् तु काकोलो, दात्यूहः कालकण्ठकः ।
आतापि- चिल्लौ, दाक्षाय्य-गृध्रौ, कीर-शुकौ समौ ॥

आटश्च पदैकदेशत्वात् । शतं बहवः पत्त्राणि पक्षा अस्य शतपत्त्रः। दार्वाहन्ति दार्वाघाटः, दारावाहनोऽणन्त्यस्य । चटःसंज्ञायाम् (वा० ?)। सरति सारङ्गः, सह—आरङ्गति वा यूथकाचारित्वात् । स्तोकं कायति वाशते याचते वा स्तोककः । चतते(ति) याचते चातकः । जलरङ्गोपि ॥ १७ ॥ कृकेण शिरोग्रीवेण वक्ति कृकवाकुः । कुगुच्चारणेन कुटति कुक्कुटः । शिखी कालज्ञश्च ॥ १८ ॥ चटति भिनत्ति—आहारं चटकः । कं शिरो लुनाति वलयति कलविङ्कः । (चटका) आजाद्यतष्टाप् ($\frac{४।१।१४}{४५४}$), क्षिपकादित्वाभावः (क्षिपकादीनां च) । (तयोः) चटकस्य चटकायाश्चापत्यं पुमान्—चाटकैरः, चटकाया एरक् ($\frac{४।१।१२८}{१।१३४}$), चटकाच्चेत्युपसंख्यानं (चटस्येति वाच्यम्) । स्त्री च तदपत्यं च तत्र, स्त्रियामपत्ये लुग्वक्तव्यः (वा० $\frac{२६२५}{११२४}$), लुक्तद्धितलुकि ($\frac{१।२।४९}{१४०८}$) इति टापो लुक्यपि स्त्रीत्वात्पुनष्टाप् ॥ १९ ॥ कर्केति रेटते । केति च रेटते वाशते (करेटुः) । कृ इति कणति कृकं नयति वा कृकणः । क्रेति करोति वाशते क्रकरः । परभृतः काकीपुष्टत्वात् । कोकते चित्तं गृह्णाति कोकिलः । अपिकायति पिकः । कलकण्ठस्ताम्राक्षश्च ॥ २० ॥ काशब्दं कायति ककते वा लौल्यात्काकः । केति रटति करटः । नास्ति रिष्टं हिंसास्यामृतभुकस्त्वादरिष्टः । बलिभिः पुष्टो वैश्वदेवभागार्हत्वाद् बलिपुष्टः । सकृत्प्रजायते सकृत्प्रजाः, एकाण्डप्रसवात् । ध्वाङ्क्षति ध्वाङ्क्षः । आत्मनः स्वनाम्नो घोषोऽस्यात्मघोषः, काकेति वाशनात् । परान् पिकान् बिभर्ति परभृत् । वय एव वायसः, प्रज्ञादित्वादण् ($\frac{५।४।३८}{२१०६}$), वयते वा । एकदृष्टिश्चिरजीवी मौकुलिर्द्विकश्च ॥ २१ ॥ (द्रोणकाकः) वृद्धकाकोद्विकाको वा, यदाहुः—द्रोणकाको दग्धकाको वृद्धकाको वनाश्रयः, (रा. नि. ६।४८६) द्रुण हिंसायां, द्रोणोपि । द्वितीयं तृतीयं वा रूपं वहति दित्य-

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

2 A curlew.
2 A crane. 2 The Indian crane.
4 The ruddy goose.

२३ कुङ्क्रौञ्चो,ऽथ बकःकह्वः, पुष्कराऽऽह्वस् तु सारसः ।
कोकश् चक्रश् चक्रवाको रथाङ्गाऽऽह्वय-नामकः ॥

2 A drake.
2 An osprey.
4 Geese.

२४ कादम्बः कलहंसः स्यादुत्क्रोश-कुररौ समौ ।
हंसास् तु श्वेतगरुतश् चक्राङ्गा मानसौकसः ॥

1 Varieties of geese.
3 *Sarali*.

२५ राजहंसास् तु ते चञ्चु-चरणैर् लोहितैः सिताः ।
मलिनैर् मल्लिकाक्षास् ते, धार्तराष्ट्राः सितेतरैः ॥

2 A small crane. Female duck or goose.

२६ शरारिराटिराडिश् च, बलाका बिसकण्ठिका ।
हंसस्य योषिद् वरटा, सारसस्य तु लक्ष्मणा ॥ 1 A female Indian crane.

2 A bat.
2 A cock-roach.
2 A blue fly.
2 Bee.

२७ जतुका ऽजिनपत्रा स्यात्, परोष्णी तैलपायिका ।
वर्वणा मक्षिका नीला, सरघा मधुमक्षिका ॥

वाट्, तस्यापत्यं दात्यूहः, देविकाशिंशपेत्यात्वम् (७।३।१ / १४३९)। कालः कण्ठोऽस्य काला: कण्टका रोमोद्भेदा वास्य कालकण्ठः कालकण्टकः। जलरक्षो(ओ)पि। सिंहावलोकितेन समावित्येव। आतपत्यातापी। चिल्लति चिल्लः, चिल्ल शैथिल्ये। दक्षते दक्षाय्यः, श्रुदक्षिस्पृहिगृहिभ्य आय्यः (उ० ३७६), ततोऽपत्येऽण् (तस्येदम्)। गृध्यति मांसं गृध्रः। कीशब्दमीरयति कीरः। शुको नीलत्वात्, शवतीत्येके। प्रियदर्शनोऽपि ॥ २२ ॥ कुञ्चति क्रुङ्। (क्रौञ्चः) प्रशादित्वादण् (५।४।३८ / २१०३), स्त्रियामजादित्वात्क्रौञ्चा। वक्ति वकः, न्यङ्क्वादिः (७।३।५३ / २८६४)। वकोटोऽपि। केन के जले वा ह्वयते कह्वः। सरति भवः सारसो लक्ष्मणाख्यः। विलीनाङ्गो दीर्घजङ्घश्च। कोकते वाशते कोकः। चकते चक्रः। चक्रेति वाक्—आख्यास्य चक्रवाकः। रथाङ्गं चक्रमाह्वयो नाम चास्य रथाङ्गाह्वयो रथाङ्गनामा च ॥ २३ ॥ कदम्बस्यायं संघचारित्वात्कादम्बः। कलो मधुरवाग्हंसः (कलहंसः)। उच्चैः क्रोशत्युत्क्रोशः। कुरति कुररः, कुर शब्दे, कुरेति शब्दं राति वा। हन्ति गच्छति हंसः। श्वेता गरुतः पक्षा अस्य श्वेतगरुत्। चक्राकाराङ्गो वृत्तत्वात्, चक्राङ्क इत्येके। मानसाख्ये देवसरस्योकोऽस्य मानसौकाः ॥ २४ ॥ चञ्चुसहितैश्चरणैरिति लक्षणे तृतीया। मलिनैश्चञ्चुचरणैस्ते सिता मल्लिकाक्षाः, [मल्लिकाकाराक्षाः] शुक्लापाङ्गत्वात्। कृष्णैश्चञ्चुचरणैर्धृतराष्ट्रे—अमात्ये भवा धार्तराष्ट्राः, राजहंसेभ्यो न्यूनत्वात् ॥ ॥ २५ ॥ शृणन्त्येनां शरारिः। अतत्यातिः। अटत्याटिः। एताः स्त्रियाम्, बलाहकान् कायति बलेनाकति याति वा बलाका। बिसमिव कण्ठोऽस्याः, बिसकण्टिकेत्येके। शारिका गोराटी पीतपादेति च वाच्यम्। व्रियते वरटा, स्त्रीविषयत्वाज्जातेर्ङीष् नास्ति, वरलापि। योषिदित्येव, लक्ष्मणीत्येके, अत एव लक्ष्मणाख्योऽसौ ॥ २६ ॥ जत्विव कृष्णपिङ्गलत्वाज्जतुका। अजिनं पत्त्राणि पक्षा अस्या अजिनपत्त्रा चर्मवटकत्वात्।

CC-0. Agamnigam Foundation. Chandigarh

2 A small bee. 2 A gadfly. 2 A smaller sort of gadfly. 2 A wasp.

२८ पतङ्गिका पुत्तिका स्याद्, दंशस् तु वनमक्षिका ।
दंशी तज्-जातिरल्पा स्याद्, गन्धोली वरटा द्वयोः ॥

4 A cricket. 2 A grass-hopper. 2 A firefly.

२९ भृङ्गारी झीरुका चीरी झिल्लिका च समा इमाः ।
समौ पतङ्गशलभौ, खद्योतो ज्योतिरिङ्गणः ॥

11 A large black bee.

३० मधुव्रतो मधुकरो मधुलिण्-मधुपाऽलिनः ।
द्विरेफ-पुष्पलिड्-भृङ्ग-षट्पद-भ्रमराऽलयः ॥

9 A peacock.

३१ मयूरो बर्हिणो बर्ही नीलकण्ठो भुजङ्गभुक् ।
शिखावलः शिखी केकी मेघनादानुलास्यपि ॥

1 His cry. 2 His crest. 3 His tail.

३२ केका वाणी मयूरस्य, समौ चन्द्रक-मेचकौ । 1 The eye of his tail.
शिखा चूडा, शिखण्डस् तु पिच्छ-बर्हे न-पुंसके ॥

परमुष्णत्वमस्याः शीतापहतत्वात्, परं विरुद्धं वा तेजसोऽन्धकारात् (परोष्णी)। तैलं पिबतीति तैलपायिका, नित्यमास्यविकासात्। चतुःसंज्ञे(ज्ञी)त्येके, तैलाटया–अजिनपक्षत्वात्। मुखविष्टा वल्गुलिका निशाटनी च। वृणोति वर्वणा। मक्षन्ति रुष्यन्त्यस्यै मक्षिका। सरन्तो घातयति सरघा ॥ २७ ॥ पतति–अपतङ्गति वा पतङ्गिका। पुत्कुत्सितं तनोति पुत्तिका, मधुमक्षिकाभेदोयं, यान्निमिः–माक्षिकं तैलवर्णं स्याद् घृतवर्णं तु पौतिकम्। भ्रामरं तु भवेच्छुक्लं क्षौद्रं तु कपिलं भवेत्॥ दशति दंशः। (दंशी) दंशजातीया, जातेरिति ($\frac{६।३।४१}{८४२}$) ङीष्। गन्धयतेऽर्दयति गन्धोली, गन्धालीत्येके। वृणोति वरटा तैलाटाख्या ॥ २८ ॥ आकृत्या भृङ्गमियर्ति भृङ्गारी। चीति रौति चीरुका। चीति रिणाति चीरी। झिल्ली वाद्यभेदस्तत्तुल्यशब्दा झिल्लिका चक्राख्या, केऽणः ($\frac{७।४।१३}{८३४}$) इति ह्रस्वः, झिल्लिकार्ति (झां)कृतीनामिति तु लक्ष्यम्। शलति शमं लभते वाग्नौ शलभः। खे द्योतते खद्योतः। ज्योतिषेङ्गति चलति ज्योतिरिङ्गणः। इन्द्रगोपको ज्योतिर्माली कीटमाणिक्यं च [–मणिश्च] ॥ २९ ॥ मधु मधु व्रतयति भुङ्क्ते मधुव्रतः। अलत्यली, अलिश्च। द्वौ रेफौ नाम्न्यस्य द्विरेफः। मृज्जति बिभर्ति वा भृङ्गः। षट् पदानि चरणा अस्य षट्पदः। भ्रमति भ्रमरः। चञ्चरीकभसले(ने)न्दिन्दिरोलम्बा देश्याम् ॥ ३० ॥ मीनात्यहीन् मयूरः। बर्हमस्यास्ति (बर्हिणः), फलबर्हाभ्यामिनन् (वा० $\frac{३२१५}{३४९८}$)। शिखास्यस्य शिखावलः, दन्तशिखात्संज्ञायां ($\frac{५।२।११३}{१९२०}$) वलच्। शिखी, व्रीह्यादित्वात् ($\frac{५।२।११६}{१९२३}$)। मेघनादमनुलसति नृत्यति–अवश्यं मेघनादानुलासी। चन्द्रको शुक्लापाङ्गश्च ॥३१॥ के मूर्ध्नि कायति केका। चन्द्रप्रतिकृतिश्चन्द्रकः। मेचको मिश्रवर्णत्वात्, यत्काव्यः–बर्हिकण्ठसमं वर्णं मेचकं ब्रुवते बुधः। मयूरस्येत्येव, अन्यत्रोपचारात्। शिखाभिर्डयते शिखण्डः। पिच्छति पिच्छम्। बर्हति नृत्येनोर्ध्वीभवति बर्हम्। प्रचलाकोपि। कलापो

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

27 A bird in general.

३३ खगे विहङ्ग-विहग-विहङ्गम-विहायसः ।
शकुन्ति-पक्षि-शकुनि-शकुन्त-शकुन-द्विजाः ॥

३४ पतत्रि-पत्रि-पतग-पतत्-पत्ररथाऽण्डजाः ।
नगौको-वाजि-विकिर-वि-विष्किर-पतत्त्रयः ॥

३५ नीडोद्भवा गरुत्मन्तः पित्सन्तो नभसंगमाः ।

13 Various birds.

तेषां विशेषा—हारीतो मद्गुः कारण्डवः प्लवः ॥

३६ तित्तिरिः कुक्कुभो लावो जीवञ्जीवश् च कोरकः ।
कोयष्टिकष् टिट्टिभको वर्तको वर्तिकाऽऽदयः ॥

6 A wing.
2 Its root.
2 The beak.

३७ गरुत्-पक्षच्छदाः पत्त्रं पतत्रं च तनूरुहम् ।
स्त्री पक्षतिः पक्षमूलं, चञ्चुस् त्रोटिरुभे स्त्रियौ ॥

नानार्थे ॥३२॥ खे गच्छति खगः, अन्यत्रापि दृश्यते (वा० २०१८/२९५६) इति डः। विहायसा गच्छति, गमेःसुपि वाच्यः (२००९/२९५३) खच् वक्तव्यः, विहायसो विह इति (वा० २०१०/२९५३) डे, खच्चडिद्वा (२०११/२९५३)। विजिहीते विहायाः, यच्छाश्वतः–विदुर्विहायसं व्योम पक्षिणश्च विहायसः (३६५)। शक्नोतीति, शकेरुनोन्तोन्त्युनयः (उ० ३२९)। पक्षाः सन्त्यस्य पक्षी। द्विर्जायत इति द्विजः॥३३॥ पतत्त्राणि विद्यन्ते येषु ते पतत्त्रिणः। पतन्त्यनेनेति पतः पक्षः, पुंसि संज्ञायां घः (३।३।११९/३२९६), पतैर्गच्छति पतगः। पतति पतन्। पत्त्राणि पक्षा रथोऽस्य पत्त्ररथः। नगे ओकोऽस्य नगौकाः। वाजो वेगोऽस्यास्तीति वाजी। विकिरति भक्षं विकिरः–विष्किरः, विष्किरःशकुनिर्विकिरो वा (६।१।१५०/१०६५)। वाति वयति वा विः, वेजोडित् (उ० ५१२) पतत्त्राणि सन्त्यस्य पतति वा पतत्त्री, पतेरत्रिन् (उ० ५०९), पतेरत्रिरिति भ्रान्त्या पतत्रिं ग्रन्थकृदिदन्तं मन्यते ॥ ३४ ॥ पतितुमिच्छन् पित्सन्, सनिमिमेति (७।४।५४/२६२३) इस्–इडभ्यासलोपौ। नभसा गच्छति नभसंगमः, गमेःसुप्युपसंख्यानात्खच् (वा० २००९/२९५३) वाचंयमपुरंदरौ च (६।३।६९/२९५७) इति चकारादमागमः, अत्यविचमितमिरभिलभिनभितपिपतिपनिपणिमहिभ्योऽसजिति (उ० ३९७) नभः(भस) शब्दोऽस्तीत्येके। पतङ्गो नानार्थे। एते पत्त्रिविशेषाः। हरिणं वर्णमितो हारितः। मज्जति मद्गुर्जलकाकः, न्यङ्कादीनां च (७।३।५३/२८६४) करण्डे भवं कारण्डं पञ्जरबन्धं वाति कारण्डवः। प्लवते प्लवः ॥ ३५ ॥ तित्तिशब्दं राति तित्तिरिः। कुक्कुशब्दं करोति (भाषते) कुक्कुभः। लाति [लावयति] लूयते वा लावः। जीवेन सहचरेण जीवति जीवंजीवः, बाहुलकात्खच्। चकते (ति) ज्योत्स्नया तृप्यति चकोरः। ओको यजति कोयष्टिः शिखरी। टिट्टिशब्दं भाषते टिट्टिभः। कुकति [कोकते] कोकः। क्रेति करोति क्रकरः। वर्तत इति (वर्तकः),। वर्तका शकुनौ प्राचां (वा० ४५३३/४६४) इति साधुः, पक्षे वर्तिका। आदिशब्दात्कपिञ्जलादयः ॥ ३६ ॥ गिरति खं गरुत्। (पक्षः) पक्ष परिग्रहे। छाद्यतेऽनेनाङ्गं छदः, छादेर्घे

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh

3 Acts of flying. ३८ प्रडीनोड्डीन-संडीनान्येताः खग--गति-क्रियाः ।
3 An egg. 2 A nest. पेशी कोशो द्वि-हीनेऽण्डं, कुलायो नीडम-स्त्रियाम् ॥
7 Young of any animal. ३९ पोतःपाकोऽर्भको डिम्भः पृथुकः शावकः शिशुः ।
3 A couple, male and female. स्त्रीपुंसौ मिथुनं द्वन्द्वं, युग्मं तु युगुलं युगम् ॥ 2 A pair or brace.
22 A flock or multitude. ४० समूहे निवह-व्यूह-संदोह-विसर-व्रजाः ।
स्तोमौघ-निकर-व्रात-वार-संघात-संचयाः ॥
४१ समुदायः समुदयः समवायश् चयो गणः ।
स्त्रियां तु संहतिर् वृन्दं निकुरम्बं कदम्बकम् ॥
1 A multitude of similar things. ४२ वृन्द-भेदाः–समैर् वर्गः, संघ-सार्थौ तु जन्तुभिः । 1 Of animals.
1 Of homogeneous animals. सजातीयैःकुलं, यूथं तिरश्चां पुन्-नपुंसकम् ॥ 1 Of birds and beasts.

($\frac{६।४।९६}{३२९७}$) इति ह्रस्वः पतत्यनेन पत्त्रम् । पतन्तं त्रायते पतत्त्रम् । मूले, पक्षात्तिः ($\frac{५।२।२५}{१८२६}$) । चञ्चति चलति चञ्चुः । त्रोटयति त्रोटिः । तुण्डं च ॥३७॥ प्रकृष्टमूर्ध्वं संहतं वा डयनं, स्वादय ओदितः (ग०सू०१९६), (ओदितश्च $\frac{८।२।४५}{३०९६}$) इति निष्ठानत्वम् । एता इति हि डीनाद्युपलक्षणार्थे । पेशीनां मांसखण्डानां कोशः । कुश्यति कोशः । अमति निःसरत्यस्मादण्डम् । तिस्रः संज्ञा इति गौडाः । कौ लीयते कुल्यते कुलमेति वा कुलायः । निलीयतेऽस्मिन् नीडः ॥ ३८ ॥ पुनाति पोतः । पान्त्येनं पिबति स्तनौ वा पाकः । ऋभ्यते(अर्यते) वृद्धिं प्राप्यतेऽर्भकः । डयति (ते) डिम्भः । प्रथते वर्धते पृथु कायति वा पृथुकः । श्यति शवति वा शावकः । शिनोति स्नेहेन शेते । वात्यर्थं शिशुः । स्त्री च पुमांश्च स्त्रीपुंसौ, अचतुरविचतुरेति($\frac{५।४।७।७}{९४८}$) साधुः । मेथते संगच्छते मिथुनम् । मिथृमेथृ संगमने । द्वन्द्वमिति, द्वन्द्वं रहस्यमर्यादेति ($\frac{८।१।१५}{३९५०}$) साधुः, यत्कालिदासः–द्वन्द्वानि भावं क्रियया विवव्रुः (कु. सं. ३।३५) युज्यते धर्मिवृत्त्या युगम् । धर्मवृत्तौ तु युगं लाति युगलं, मत्वर्थीयो वा लच् (सिध्मादिभ्यश्च $\frac{५।२।९७}{९०८४}$) ॥३९॥ समूह्यते ढौक्यते समूहः । निवहति निवहः । व्यूहते व्यूहः । संदुह्यते प्रपूर्यते संदोहः विस्त्रियते विसरः । व्रज्यते व्रजः, गोचरसंचरवहव्रजेति ($\frac{३।३।११९}{३२६८}$) साधुः । स्तूयते स्तोमः । ओह्यते–ओघः, न्यङ्क्वादिः ($\frac{७।३।५३}{२८६४}$)। निकीर्यते निकरः। व्रियते वारः। संहन्यते संघातः,हो हन्तेरिति(सू० $\frac{७।३।५४}{३५८}$) घः । संचीयते संचयः ॥४०॥ समुदयनं समुदायः, अयतेर्घञ् । समुदयः, इणोऽच् । समवेयते समवायः । चीयते चयः । गण्यते गणः । वृणोति वृन्दम् । निकुरति निकुरम्बम् । कदम्बप्रतिकृतिः केसरसंचयात्मकत्वात्(कदम्बकम्), कुत्सितमम्बते वा ॥४१॥ समूहविशेषा वक्ष्यन्त इति शेषः । सजातीयैः प्राणिभिरप्राणिभिश्च समूहो वर्गः,

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

1 Of other beings (men, etc.)
1 Of persons practising like duties.

४३ पशूनां समजो, ऽन्येषां समाजो, ऽथ सधर्मिणाम् ।
स्यान् निकायः, पुञ्ज-राशी तूत्करः कूटमस्त्रियाम् ॥

4 A heap of grain, etc.

Flocks of various animals.
2 Domesticated (a bird or beast).

४४ कापोत-शौक-मायूर-तैत्तिराऽऽदीनि तद्-गणे ।
गृहाऽऽसक्ताः पक्षि-मृगाश् छेकास् ते गृह्यकाश् च ते ॥

इति सिंहादि-वर्गः ५, अत्र मूलश्लोकाः ४३, क्षे० २॥

अथ नृवर्गः ६

6 Man : mankind.
5 Man ; or male.

१ मनुष्या मानुषा मर्त्या मनुजा मानवा नराः ।
स्युः पुमांसः पञ्चजनाः पुरुषाः पूरुषा नरः ॥

11 A woman ; or female.

२ स्त्री योषिदबला योषा नारी सीमन्तिनी वधूः ।
प्रतीपदर्शिनी वामा वनिता महिला तथा ॥

वृज्यते विजातीयेभ्य इति । प्राणिभिः समूहः (संघः), संहन्यते संघः, संघोद्घौगणप्रशंसयोः (३।३।८६ / ३२६४) इति साधुः, यथा गोसंघः, मेघसंघाद्युपचारात् । सरति सार्थोऽध्वगवृन्दम् । जन्तुभिरित्येव, कुलं संस्त्याने बन्धुषु च, (यथा) विप्रकुलम् । वृन्दमित्येव, यथा मृगयूथः, यु मिश्रणे ॥ ४२ ॥ संवीयते समजः, समुदोरजःपशुष्विति (३।३।६९ / ३२४६) अप् । पशुभ्योऽन्येषां वृन्दं (समाजः), यथा श्रोत्रियसमाजः । (सधर्मिणां) समूह इत्येव, यथा श्रमणनिकायः, निचीयते निकायः, निवासचितिशरीरेष्विति (३।३।४१ / ३२२३) घञ् कर्त्वं च । धान्यादेरुच्छ्रितं वृन्दं, पुञ्ज्यते पुञ्जः पूर्यते वा । रश्यते राशिः, रशिः सौत्रो दीप्त्यर्थः । उत्कीर्यत उत्किरः । कुट्यते कूटः ॥ ४३ ॥ कपोतादिसमूह एतानि वर्तन्ते, अनुदात्तादेरञ् (४।२।४४ / २२५३) । आदिशब्दात्काकादि । छायन्ते छेकाः पञ्जरादौ स्थाप्यन्ते । गृह्यन्ते गृह्यकाः, पदास्वैरीति (३।१।१४० / २८७०) क्यप्, स्वार्थे कन् ॥४४॥ इति सिंहादिवर्गः ।५।

मनोरपत्यं मनुष्यो मानुषश्च, मनोर्जातावञ्यतौ षुक् च (४।१।१६१ / २१८५) । म्रियते मर्त्यः, स्वार्थे यत् । मानवः, तस्येदमर्थेऽण्, (४।३।१२० / २५००) अपत्यार्थे अञ्यद्भ्यां बाधितत्वात् । नृणाति नरः, नृ नये । पाति पुमान् । पञ्चभिर्भूतैर्जातः पञ्चजनः । पुरि पुरि शयनात्पूरणाद्वा पुरुषः । (पूरुषः) अन्येषामपीति (६।३।१३७ / ३५३९) वा दीर्घः । नयति ना, नयतेर्डिच्च (उ० २५७) इति ऋः ॥ १ ॥ स्त्यायतेऽस्यां गर्भः । स्त्री स्त्यायेते शुक्रशोणिते अस्यां इति वा । यौति पुंसा [योषति] योषित्, हसृरुहियुषिभ्य इतिः (उ० ९७) । युष्य (योष) त्यन्यं यौति

CC-0. Agamnigam Foundation. Digitized by eGangotri Foundation, Chandigarh

12 Various descriptions of women.
2 A passionate woman.

३ विशेषास् त्वङ्गना भीरुः कामिनी वामलोचना ।
प्रमदा मानिनी कान्ता ललना च नितम्बिनी ॥

4 An excellent woman.

४ सुन्दरी रमणी रामा, कोपना सैव भामिनी ।
वरारोहा मत्तकाशिन्युत्तमा वरवर्णिनी ॥

1 A queen.
1 Other wives of a king.
6 A wife or wedded woman.

५ कृताऽभिषेका महिषी, भोगिन्यो ऽन्या नृप-स्त्रियः ।
पत्नी पाणिगृहीती च द्वितीया सहधर्मिणी ॥

2 A matron.
4 A virtuous faithful wife.

६ भार्या जायाऽथ पुम्-भूम्नि दाराः, स्यात् तु कुटुम्बिनी ।
पुरन्ध्री, सुचरित्रा तु सती साध्वी पतिव्रता ॥

वा योषा । नारीति, नृनरयोर्वृद्धिश्च (ग० सू० ५४) इति शार्ङ्गरवादिपाठान्ङीन् । सीमन्तः केशवेशोऽस्त्यस्याः सीमन्तिनी। उह्यतेऽसौ भर्त्रा, बध्यतेऽनया भर्ता वा वधूः। प्रतीपं वक्रं पश्यति, अपाङ्गनिरीक्षणात् । वामा विपरीतलक्षणया शृङ्गारवेदनाद्वा । वनति भजति वनिता । मह्यते महिला । तथाशब्दान्महेलापि, यल्लक्ष्यम्–अजयद् द्विषतः प्राप्तनयः परमहेलया । स्वप्नेऽपि मनसि स्पृष्टो न यः परमहेलया ? ॥ २ ॥ प्रशस्तान्यङ्गान्यस्या अङ्गना, अङ्गात्कल्याणे (ग०सू०११८) इति पामादित्वान्नः (लोमादिपामादीति $\frac{५।२।१००}{१०७}$) । बिभेति तच्छीला भीरुः, भियःक्रक्लुकनौ ($\frac{३।२।१७४}{३१५४}$) । कामयते कामिनी। वामे बाधके लोचने अस्या वामलोचना । प्रकृष्टो मदःकामवेगोऽस्याः प्रमदा । मानः प्रणयकोपोऽस्या मानिनी । काम्यते कान्ता । लडति ला(ल)ह्यते वा ललना, लड विलासे, लल ईप्सायां वा । नितम्बिनी गुरुनितम्बा ॥ ३ ॥ विशेषा इत्येव । सुष्ठु–आद्रियते सुन्दरी । रमन्तेऽस्यां रमणी । रमते रामा, ज्वलितिकसन्तेभ्यो णः ($\frac{३।१।१४०}{२०२}$) । कुप्यति तच्छीला कोपना, क्रुधमण्डार्थेभ्यश्च ($\frac{३।२।१५१}{३१३१}$) इति युच् । भामिनी, भाम क्रोधे । उत्तमा स्त्रीपर्याया । आरुह्यतेऽस्मिन्नारोहो नितम्बः, स वरोऽस्या वरारोहा । मत्ता क्षीवेव काशते भाति मत्तकाशिनी, कर्तर्युपमाने ($\frac{३।२।७९}{२८९}$) णिनिः । वरो वर्णोऽस्या वरवर्णिनी ॥ ४ ॥ नृपस्त्रीत्येव । श्रीमहादेवीत्वे कृताभिषेका, यथा वासवदत्ता, मह्यते पूज्यते महिषी । पद्मावत्याद्याः, भोगोऽस्त्यासां भोगिन्यः । पत्युर्नो यज्ञसंयोगे ($\frac{४।१।३३}{४९०}$) इति पत्नी । पाणिगृहीतोऽस्याः, बहुव्रीहेश्चान्तोदात्तात् ($\frac{४।१।५२}{५०८}$) इत्यत्र पाणिगृहीतीत्यादिना (वा० $\frac{५००}{२४७९}$) विशेष इति ङीप् । द्वितीया धर्मसहाया । सह धर्मोऽस्त्यस्याः सहधर्मिणी, यज्ञादौ सहाधिकारात् ॥ ५ ॥ भरणीया भार्या, संज्ञायां भृञः–ऋहलोर्ण्यत् ($\frac{३।१।१२४}{२८७२}$) । जायतेऽस्यां पतिर्जाया, यन्मनुः–जायायास्तद्धि जायात्वं यदस्यां जायते पुनः (म. ९–८) । दारयन्ति दाराः, दारजारौ कर्तरि णिलुक्च (वा० $\frac{३।१।१००}{२१८२}$) । अथशब्दात्पुंभूम्नोर्न पूर्वभावत्वम् । सहचरी च ।

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

3 A superseded wife.
3 A bride choosing her husband.
2 A chaste woman.

७ कृतसापत्निका ऽध्यूढा ऽधिविन्ना, ऽथ स्वयंवरा
पतिंवरा च वर्या, ऽथ कुलस्त्री कुलपालिका ॥

2 A maiden.
3 A girl.
2 One arrived at puberty.
2 A young woman.

८ कन्या कुमारी, गौरी तु नग्निका ऽनागतार्तवा ।
स्यान् मध्यमा दृष्टरजास्, तरुणी युवतिः समे ॥

3 A daughter-in-law.
2 A woman staying in her father's house.
2 A woman desirous of any thing.
2 One amorous or lustful.

९ समाः स्नुषा-जनी-वध्वश्, चिरिण्टी तु सुवासिनी ।
इच्छावती कामुका स्याद्, वृषस्यन्ती तु कामुकी ॥

1 One who goes to an assignation.
8 A disloyal or unchaste woman.

१० कान्ताऽर्थिनी तु या याति संकेतं सा ऽभिसारिका ।
पुंश्चली धर्षिणी बन्धक्यसती कुलटेत्वरी ॥

कुटुम्बं पुत्रभृत्याद्यस्त्यस्याः कुटुम्बिनी । पुरं धत्ते पुरंध्री । पतिसेवैव व्रतं यस्याः सा पतिव्रता, यत्स्मृतिः–नास्ति स्त्रीणां पृथग्यज्ञो न व्रतमिति (म.५।१५५) ॥६॥ कृतं सापत्नकं सपत्नीभावोऽस्याः (कृतसापत्नका)। अध्युपर्युह्यते द्वितीया (अन्या) स्या अध्यूढा। अधिविन्दत्यस्यामधिविन्ना। स्वयं वृणीते स्वयंवरा, संज्ञायां भृतृविजीति ($\frac{३।२।४६}{२९६३}$) खच्। पतिं वृणीते पतिंवरा, खच्। व्रियतेऽनया वर्या, अवद्यपण्येति ($\frac{३।१।१०१}{२८४९}$) साधुः, वरमर्हति वा। कुलस्य संपादयित्री स्त्री (कुलस्त्री) ॥७॥ कनति कन्या, कनी दीप्तौ, अध्न्यादिः (उ० ५५१), कन्यायाःकनीनच ($\frac{४।१।११६}{१११९}$) इति लिङ्गाद् ङीप्–नास्ति। कुमारयति क्रीडति कुमारी कुत्सितो मारोऽस्या वा, अनूढत्वात्। अष्टवर्षा भवेद् गौरी दशमे नग्निका भवेदिति (?) स्मार्तो विशेषो नाद्रितः। गो(गु) रते गौरी। नजते नग्ना, ओणजी ओलजी व्रीडे। ऋतौ भवमार्तवं रजः। (मध्यमा) अजाद्यतष्टाप् ($\frac{४।१।४}{४७४}$)। (तरुणी) वयसि प्रथमे ($\frac{४।१।२०}{४७८}$) इति ङीप् स्यात्, नञ्स्नञीकक्ख्युंस्तरुणतलुनानामुपसंख्यानात् (वा. $\frac{२४२५}{४७०}$) वा ङीप्। (युवतिः) यूनस्तिः ($\frac{४।१।७७}{५३१}$) ॥ ८ ॥ स्नौति स्नुषा। जायतेऽस्यां जनी। वधूटी च ग्रामटिकावत्। चिरिणोति चिरिण्टी, चरति चरण्टीत्येके, वयस्यचरमे ($\frac{२४३५}{४७८}$) इति ङीप्। सुष्ठु वसति सुवासिनी, स्ववासिनीति द्रविडाः। (कामुका) लषपतपदेत्युकञ् ($\frac{३।२।१५४}{३१३४}$)। वृषमिच्छति, सुप आत्मनःक्यच् ($\frac{३।१।८}{२६५७}$), अश्वक्षीरवृषलवणानामात्मप्रीतौ क्यचि ($\frac{७।१।५१}{२६६२}$) इत्यात्राश्ववृषयोर्मैथुनेच्छायामिति (वा० $\frac{४३०९}{२६६२}$) असुक्। जानपदकुण्डेति ($\frac{४।१।४२}{५७७}$) मैथुनेच्छायां ङीपि कामुकी ॥ ९ ॥ यद्भरतः–हित्वा लज्जाभये श्लिष्टा मदनेन मदेन च। अभिसारयते कान्तं सा भवेदभिसारिका (ना. शा. २४।१२) ॥ ण्वुलन्तोऽयं (अभिसारिका)। वासकसज्जा विरहोत्कण्ठिता खण्डिता विप्रलब्धा कलहान्तरिता तथा प्रोषितभर्तृका स्वाधीनदयितेत्यन्या सप्तान्वर्थत्वान्न दर्शिताः (ना. शा. २४।२१६, २१७)। पुमांसं चलयति पुंश्चली। कर्षति

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh

1 A childless woman. ११ स्वैरिणी पांशुला च, स्यादशिश्वी शिशुना विना ।
1 One who has neither husband nor son. अवीरा निष्पतिसुता, विश्वस्ता-विधवे समे ॥ 2 A widow.

3 A woman's female friend. १२ आलिः सखी वयस्या, ऽथ पतिवत्नी सभर्तृका ।
2 A woman whose husband is living.

2 Old or greyhaired. 2 Intelligent. 2 Wise. वृद्धा पलिक्नी, प्राज्ञी तु प्रज्ञा, प्राज्ञा तु धीमती ॥

1 The wife of the Sudra. १३ शूद्री शूद्रस्य भार्या स्याच्छूद्रा तज्-जातिरेव च । 1 A woman of the *Sūdrā* tribe.
2 A milk-woman. आभीरी तु महाशूद्री जाति-पुं-योगयोः समा ॥

2 A woman of the *Vaisya* tribe. १४ अर्याणी स्वयमर्या स्यात्, क्षत्त्रिया क्षत्त्रियाण्यपि ।
2 One of the *Kshatriya* tribe.

2 A female teacher. 1 A spiritual instructress. उपाध्यायाऽप्युपाध्यायी, स्यादाचार्याऽपि च स्वतः ॥

चेतश्चर्षणी, कृषेरादेश्च चः (उ० २६१)। बध्नाति बन्धकी। कुलान्यटति कुलटा शकन्ध्वादिः (वा० $\frac{३६३२}{७९}$), कुत्सितं लटतीत्येके। एति तच्छीला–इत्वरी चपला, इण्नशूजिसर्तिभ्यः क्वरप् ($\frac{३।२।१६३}{३१४३}$) ॥ १० ॥ स्वेनेर्ते तच्छीला स्वैरिणी, स्वादीरेरिणोः (वा० $\frac{३६०६}{७३}$) इति वृद्धिः। पांशुर्मालिन्यहेतुरस्त्यस्याः पांशुला। (अशिश्वी), सख्यशिश्वीति भाषायां ($\frac{४।१।६२}{५,१७}$) इति साधुः। न विद्येते वीरौ पतिपुत्रावस्या अवीरा। विश्वसिति स्म विश्वस्ता। विगतो धवो भर्ताऽस्या विधवा ॥ ११ ॥ अल(आलय)त्यालिः, यच्छाश्वतः–आलिः सखी सेतुरालिरालिरावलिरिष्यते (४२३)। समानं ख्याति सखी। वयसा तुल्या वयस्या, नौवयोधर्मेति ($\frac{४।१।९१}{१६४३}$) यत्। सध्रीची च। (पतिवत्नी) अन्तर्वत्पतिवतोर्नुक् ($\frac{४।१।३२}{४८९}$), ङीप् च। (पलिक्नी) असितपलितयोर्न (वा० $\frac{२४५३}{४९६}$), छन्दसि क्नमेके (वा० $\frac{२४५४}{४९३}$), भाषायामपीष्यत इति ङीप् च। प्रजानातीति प्रज्ञा, इगुपधेति कः ($\frac{३।१।१३५}{३८९७}$)। (प्राज्ञी) प्रज्ञादिभ्यश्चेति ($\frac{५।३।१३८}{१६६}$) स्वार्थेऽण्। प्रज्ञास्त्यस्याः (प्राज्ञा), प्रज्ञाश्रद्धार्चावृत्तिभ्योऽणः ($\frac{५।२।१०१}{१९०८}$) ॥ १२ ॥ (शूद्री) पुंयोगादाख्यायां ($\frac{४।१।४८}{५०४}$) इति ङीप्। शूद्रजातीया स्त्री शूद्रा, शूद्राचामहत्पूर्वाजातिः (वा० $\frac{४६४}{२४००}$) इति–अजादित्वाट्टाप्। आभीरजातीया महाशूद्रस्य स्त्री च, जातिलक्षणे पुंयोगे च ङीप्। वैश्यभेद एवाभीरो गवाद्युपजीवी। अन्यत्र महती चासौ शूद्रा च महाशूद्रा ॥ १३ ॥ स्वयं पुंयोगं विना। अर्यक्षत्त्रियाभ्यां वा स्वार्थे (वा० $\frac{२४७८}{५०५}$) इति ङीषानुकौ, पक्षे टाप्, योपधत्वाज्जातिलक्षणो ङीप्–नास्ति। स्वयमित्येव। उपेत्याधीयतेऽस्याः, अपादाने स्त्रियामुपसंख्यानं तदन्ताच्च वा ङीप् (वा. $\frac{११८४}{३१९९}$) इति घञ् वा च ङीप्। स्वयं मन्त्रव्याख्याकृदाचार्या। स्वता जाता-

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh

1 The wife of a spiritual preceptor. १५ आचार्यानी तु पुं-योगे, स्यादर्यी, क्षत्रियी तथा ।
1 Wife of a *Vaisya*. 1 Wife of a *Kshatriya*.

2 Wife of a tutor.
1 A masculine woman. उपाध्यायान्युपाध्यायी, पोटा स्त्री-पुंस-लक्षणा ॥

2 Hero's wife.
2 A hero's mother. १६ वीरपत्नी वीरभार्या, वीरमाता तु वीरसूः ।
4 A woman who has borne a child. जातापत्या प्रजाता च प्रसूता च प्रसूतिका ॥

1 A naked woman. १७ स्त्री नग्निका कोटवी स्याद्, दूती-संचारिके समे ।
2 A female messenger or go-between.

1 A middle-aged widow. कात्यायन्यर्ध--वृद्धा या काषाय-वसना ऽथवा ॥

1 A female artisan in another's house. १८ सैरन्ध्री पर-वेश्म-स्था स्व-वशा शिल्प-कारिका ।
1 A female servant. असिक्नी स्यादवृद्धा या प्रेष्या ऽन्तःपुर-चारिणी ॥

4 A courtesan or harlot. १९ वारस्त्री गणिका वेश्या रूपाजीवा, ऽथ सा जनैः ।
1 The head of a set of harlots. सत्कृता वारमुख्या स्यात्, कुट्टनी शम्भला समे ॥
2 A bawd or procuress.

वित्यर्थः, योपधत्वाज्जातेर्ङीप्–नास्ति ॥ १४ ॥ (आचार्यानी) इन्द्रवरुणेति (४।१।४९) ङीषानुकौ आचार्यादणत्वंचेति (वा० २४७७) । पुंयोग इत्येव, (उपाध्यायानी) उपाध्यायमातुलाभ्यां वेति (मातुलोपाध्याययोरानुग्वा) पक्षे ङीषानुकौ । पुट संश्लेषणे, उभयव्यञ्जना पोटा नपुंसकाख्या ॥ १५ ॥ (वीरपत्नी) नित्यं सपत्न्यादिषु (४।१।३५) इति नान्तत्वाद्–ऋन्नेभ्यो ङीप् (४।१।५) । वीरं सूतवती वीरसूः सत्सूद्विषेति (सू० ३।२।६१) क्विप् । वीरप्रसूर्जगति भार्गवरेणुकैव (वा० रा० ?) वीरस्य प्रसूर्मातेत्यर्थः । जीवत्तोका तु जीवसूः । कोटा तु कटहारिणी । जनयितुं प्रवृत्ता सा प्रजाता । (प्रसूतिका) सूतकापुत्रिकावृन्दारकाणां वा (वा० ४६४) इति पक्षे–इत्वम्, आख्याग्रहणात्पुंयोगेऽपि ङीप् नास्ति ॥ १६ ॥ विवस्त्रा योषिन्मुक्तकेशीत्यागमः । कोटेन लज्जावशात्कुटिलत्वेन वेति याति कोटवी । दूयन्तेऽस्या मौखर्याद् दूती । संचारयति (संदेशं) प्रापयति संचारिका । कतस्यापत्यमिव कात्यायनी, ऋषिपत्न्याकारत्वात् । त्रिलक्षणेयं, कषायेण रक्तं वस्त्रं शुद्धत्वादस्याः काषायवसना, अथवा–अपुंस्का रण्डेत्यर्थः ॥ १७ ॥ शिल्पं प्रसाधनादि तेन या परवेश्मान्युपजीवति, स्ववशा स्वायत्ता, एकायत्ता न भवतीत्यर्थः । सह-एरं प्रेरणं धरते सैरन्ध्री, चतुःषष्टिकलाभिज्ञा शीलरूपादिसेविनी । प्रसाधनोपचारज्ञा सैरन्ध्री स्ववशेति चेति कात्यः । असितपलितयोः क्नम् ङीप् च (वा० २४५३) प्रादेषैष्ययोर्वृद्धिः (प्रादूहोढोढ्येषैष्येषु वा० ३६०५) । द्वे वाक्ये इत्येके तन्न, यन्मुनिः–असिक्नी स्यादवृद्धा या प्रैष्यान्तःपुरयोषिता ॥ १८ ॥ वारे राजदेवादिसेवाक्रमे स्त्री वारस्त्री ।

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

3 A fortune-teller. 8 A woman in her courses.
२० विप्रश्निका त्वीक्षणिका दैवज्ञा, ऽथ रजस्वला ।
स्त्रीधर्मिण्यविरात्रेयी मलिनी पुष्पवत्यपि ॥

3 The courses. 2 Longing, as in pregnancy.
२१ ऋतुमत्यप्युदक्याऽपि, स्याद् रजः पुष्पमार्तवम् ।
श्रद्धालुर् दोहदवती, निष्कला विगतार्तवा ॥ 2 Past child-bearing.

4 Pregnant.
२२ आपन्नसत्वा स्याद् गुर्विण्यन्तर्वत्नी च गर्भिणी ।

1 An assemblage of harlots.
गणिकाऽऽदेस् तु गाणिक्यं, गार्भिणं, यौवतं गणे ॥
1—of pregnant women. 1—of young women.

2 A twice married woman.
२३ पुनर्भूर् दिधिषूरूढा द्विस् तस्या दिधिषुः पतिः ।
1 Her second husband.

1 One in whose family she presides.
स तु द्विजो ऽग्रेदिधिषूः सैव यस्य कुटुम्बिनी ॥

गणः पेटकोऽस्त्यस्याः, गणयतीश्वरानीश्वरौ वा गणिका । वेशे वेश्यावाटे भवा वेश्या । पुण्यस्त्री पणस्त्री च । वारे सेवाक्रमे मुख्या (वारमुख्या) । कुट्टयति कुट्टनी । शं श्रेयो भालयति शंभं श्रेयोयुक्तं लाति वा शंभली । चुन्दी देश्याम् ॥ १९ ॥ विप्रश्नो देवप्रच्छन्नं शुभाशुभेक्षणं वास्त्यस्याः (विप्रश्निका) । दैवं शुभाशुभं कर्म जानाति दैवज्ञा, अन्तःपुरस्यापुंस्प्रवेश्यत्वात् । रजोऽस्त्यस्या रजस्वला, रजःकृष्यासुतीति (५।२।१२२ / १९१९) वलच् । स्त्रीधर्मो रजोऽस्त्यस्याः स्त्रीधर्मिणी । अत्रेरपत्यमात्रेयी । (मलिनी) मलिनाद्रजसि ङीप् (वा० ?) मलादिन्नन्ताद्वा ङीप् ॥ २० ॥ ऋतू रजोऽस्त्यस्या ऋतुमती । उदकात्संज्ञायां यति उदक्या, उदकर्महतीति । पुष्पितेति माला । पुष्पमत्यवीरिति प्राच्याः पेठुः, अव्यते रक्ष्यतेऽन्येभ्योऽवीः अविवृस्तृतन्त्रिभ्य ईः (उ० ४३८) । अविरात्रेयीत्येके, यत्कात्यः—अविं स्त्रीधर्मिणीं विद्यादिति । पुष्पं सुतफलहेतुत्वाद्रजः । ऋतुरेवार्तवम्, ऋतुः स्त्रीरजोऽत्र, ऋतौ गर्भग्रहणकाले भवं वा, ऋतुः प्राप्तोऽस्य वा । स्पृहिगृहिपतिदयिनिद्रातन्द्राश्रद्धाभ्य आलुच् (३।२।१५८ / ३१३८) । दोहदं गर्भिण्यभिलाषोऽस्त्यस्या दोहदवती । निष्क्रान्ता कलाभ्योऽशुद्धिभ्यो निष्कला जीर्णर्तुः ॥ २१ ॥ आपन्नं गृहीतं सत्त्वं गर्भोऽनयापन्नसत्त्वा । गुरुर्गर्भोऽस्या गुर्विणी, व्रीह्यादित्वादिनिः (५।२।११६ / १९२३) । गुर्वीति च भागुरिः । अन्तर्विद्यतेऽस्याः (अन्तर्वत्नी), अन्तर्वत्पतिवतोर्नुक् (४।१।३२ / ४८९) । गणिकानां समूहो गाणिक्यं, गणिकाया यञिति वक्तव्यं (वा० १२४८ / ३७१९) इति यञ् । गर्भिणीनां समूहो गार्भिणं, इनण्यनपत्ये (६।४।१६४ / १३४५) इति प्रकृतिभावः (नस्तद्धित इति टिलोपे प्राप्ते) । युवतीनां समूहो यौवतं, युवत्या अपुंवदिति गणपाठात् (भिक्षादिषु) । भस्याढे तद्धिते (वा० ८३६ / ३९३८; ८४२ / ३९३८) इति पुंवद्भावो नास्ति ॥ २२ ॥ पुनर्भवति पुनर्भूः । दिधेष्टि वाच्या भवति दिधिषूः । द्वौ वारौ द्विरूढा संस्कृता, यदाहुः—अक्षता च क्षता चैव पुनर्भवति पुनर्भूः संस्कृता पुनः (याज्ञ० १-६७) । मनुस्त्वन्य-

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

2 Son of an unmarried woman.
2 Son of an auspicious mother.

२४ कानीनः कन्यकाजातः सुतो, ऽथ सुभगासुतः ।
सौभागिनेयः स्यात्, पारस्त्रैणेयस् तु पर-स्त्रियाः ॥

1 Son by another's wife.

1 Paternal aunt's son.
1 Maternal aunt's son.
1 Step-mother's son.

२५ पैतृष्वसेयः स्यात् पैतृष्वस्त्रीयश् च पितृ-ष्वसुः ।
सुतो, मातृ-ष्वसुश् चैव, वैमात्रेयो विमातृजः ॥

5 A bastard.
1 A son of a female beggar.

२६ अथ बान्धकिनेयः स्याद् बन्धुलश् चाऽसतीसुतः ।
कौलटेरः कौलटेयो, भिक्षुकी तु सती यदि ॥

२७ तदा कौलटिनेयो ऽस्याः कौलटेयोऽपि चाऽऽत्मजः ।

5 A son.

आत्मजस् तनयः सूनुः सुतः पुत्रः, स्त्रियां त्वमी ॥

5 A daughter.

२८ आहुर् दुहितरं सर्वे, ऽपत्यं तोकं तयोः समे ।

2 Offspring, male or female.

2 A legitimate son.
3 Father.

स्व-जाते त्वौरसोरस्यौ, तातस् तु जनकः पिता ॥

थाह–ज्येष्ठायां यद्यनूढायां कन्यायामुह्यतेऽनुजा। सा चाग्रेदिधिषूर्ज्ञेया पूर्वा तु दिधिषूर्मता (?) ॥ तस्याः पुनर्भ्वाः पतिः, किं च–पुनर्भूपतिरुक्तश्च पुनर्भूर्दिधिषूस्तथेत्येषोऽप्यूदन्तः, दिधिषूमिच्छत्यात्मन इति क्यच् (सुप आत्मनःक्यच्), क्विप् (अन्येभ्योऽपि दृश्यते ३।२।१३८) अग्रेऽनन्यभार्यत्वात्प्रधानं दिधिषूर्यस्य सोऽग्रेदिधिषूः, समासान्तविधिरनित्यः ॥ २३ ॥ (कानीनः), कन्यायाः कनीनचेत्यण् (४।१।११६)। (सौभागिनेयः) कल्याण्यादीनामिनङ् (४।१।१२६) इति ढगिनङौ। एवं दौर्भागिनेय इत्याद्युन्नेयं, हृद्भगसिन्ध्वन्ते. पूर्वपदस्य च (७।३।१९) इत्युभयपदवृद्धिः, उत्तरत्र अनुशतिकादीनां चेति (७।३।२०)। सुत इत्येव, परस्त्री कल्याण्यादिः ॥ २४ ॥ (पैतृष्वस्त्रीयः) पितृष्वसुश्छण् (४।१।१३२)। (पैतृष्वसेयः) ढकि लोपः (४।१।१३३) इति ज्ञापकाड्–ढक्–अन्त्यलोपश्च। सुत इत्येव, मातृष्वसुश्च (४।१।१३४) इति छणि मातृष्वस्त्रीयः, (४।१।१३३) इति ढकि मातृष्वसेयः। विरुद्धाया मातुरपत्यं वैमात्रेयोऽसोदर्यो भ्राता, शुभ्रादित्वात् (४।१।१२३) ढक्, स्त्रीभ्यो ढक् (४।१।१२०) इत्यत्र स्त्रीप्रत्ययग्रहणात्। सांमातुरस्तूभयमातृकः ॥ २५ ॥ बन्धक्या अपत्यं, कल्याणादीनामिनङ् (४।१।१२६) इति ढगिनङादेशः। बन्धून्–लाति बन्धुला। कुलटाया अपत्यं, स्त्रीभ्यो ढक् (४।१।१२०) (कौलटेरः) क्षुद्राभ्यो वा (४।१।१३१) इति ढक् ॥२६॥ सा हि भिक्षार्थिनी कुलान्यटति, कुलटाया वा (४।१।१२७) इति ढगिनङौ, पक्षे ढगेव क्षुद्रात्वाभावात्, अङ्गशीलहीना हि क्षुद्रा। तनोति कुलं तनयः। सूयते सूनुः। सुवति सुतः। पुन्नरकात्त्रायते पुत्त्रः, पुनाति वा, पुवोहस्वश्च (उ०६०४) इति क्त्रः। दारकदायादौ च ॥२७॥ आत्मजादयः स्त्रियां वृत्ता दुहितृवाचकाः। गौरादौ पुत्री। दोग्धि पितरौ दुहिता। (तयोः

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh

4 Mother.
2 Sister.
1 Husband's sister.
3 Grand-daughter.

२९ जनयित्री प्रसूर् माता जननी, भगिनी स्वसा ।
ननान्दा तु स्वसा पत्युर्, नप्त्री पौत्री सुतात्मजा ॥

1 Husband's brother's wife.
1 Brother's wife.
2 Maternal uncle's wife.

३० भार्यास् तु भ्रातृ-वर्गस्य यातरः स्युः परस्परम् ।
प्रजावती भ्रातृजाया, मातुलानी तु मातुली ॥

1 Mother-in-law.
1 Father-in-law.
1 Paternal uncle.
1 Maternal uncle.

३१ पति-पत्न्योः प्रसूः श्वश्रूः, श्वशुरस् तु पिता तयोः ।
पितुर् भ्राता पितृव्यः स्यान्, मातुर् भ्राता तु मातुलः ॥

1 Wife's brothers.
2 Husband's brother.
2 Sister's son.
1 Daughter's husband.

३२ श्यालाः स्युर् भ्रातरः पत्न्याः, स्वामिनो देवृ-देवरौ ।
स्वस्रीयो भागिनेयः स्याज्, जामाता दुहितुः पतिः ॥

2 Father's father.
1 His father.
1 Maternal grand-father.

३३ पितामहः पितृपिता, तत्-पिता प्रपितामहः ।
मातुर् मातामहाऽऽद्येवं, सपिण्डास् तु सनाभयः ॥ 2 Kinsmen.

समे) पुत्रे दुहितरि च सामान्येन वर्तेते । अपतनमपत् , अपति साध्वपत्यम् । स्तूयते तोकम् । संततिः संतानः, नन्दनोद्वहप्रजाः, [तन्तुश्च] । उरसा निर्मिते यच्चेति-अण्यतौ (उरसोयच्च उरसोण्च) । तनोति कुलं तातः, स्वार्थेऽण् । जनयति जनकः । पिता । वसा च ॥ २८ ॥ या जनित्री त्रिलोक्या (?) इति त्वन्तर्भावितण्यर्थत्वात् । प्रसूयते प्रसूः । मात्यस्यां गर्भो माता । भगं कल्याणमस्त्यस्या भगिनी । सुष्ठ्वस्यते स्वसा, सावसेर्ऋन् (उ०२५३), न षट्स्वस्रादिभ्यः ($\frac{४।१।१०}{३०८}$) इति ङीप् नास्ति । न नन्दति भ्रातृजायां ननन्दा, नञि च नन्देः (उ० २५५) इति ऋन् । न पतत्यनया कुलं नप्त्री । पुत्रस्यापत्यं पौत्री सुतस्यात्मजा ॥ २९ ॥ यतते स्पर्धया याता, यतेर्वृद्धिश्च (उ०२५४)इसि ऋन् । (भ्रातृजाया) ऋतो विद्यायोनिसंबन्धेभ्यः ($\frac{६।३।२३}{९८१}$) । इति षष्ठ्या अलुग्नास्ति, सप्तमीसमासात् , यथा-द्रक्ष्यसि भ्रातृजायाम् (पृ. मे.१०) (मातुलानी) इन्द्रवरुणेति ($\frac{४।१।४९}{५०४}$) ङीषानुकौ । उपाध्यायमातुलाभ्यां वा (मातुलोपाध्यययोरानुग्वा) इति पक्षे ङीप् ॥ ३० ॥ पत्युर्माता पत्न्याः श्वश्रूः, पत्न्या माता पत्युः श्वश्रूः, श्वशुरस्योकाराकारलोपश्च(वा० $\frac{५२२}{६०३९}$) इत्यङ् । तयोः पतिपत्न्योःपितान्योन्यं श्वशुरः, शु पूजितं कृत्वाश्नुते । (पितृव्यः) पितृव्यमातुलमातामहपितामहाः ($\frac{४।२।३६}{१२४२}$) इति साधुः । (मातुलः) प्राग्वत् ॥ ३१॥ श्यायते श्यालः, स्यम वितर्केऽस्माद्वा (स्यालः), पत्युः श्याला इत्यर्थः । स्वामिनः पत्युः-भ्राता कनिष्ठः पत्न्याः, दीव्यति देवा, दिवेर्क्रः (उ० २५६) । अर्तिकमिभ्रमिचमिदेविवासिभ्यश्चिदित्यरः (उ० ४१२) देवरः । स्वसुरपत्यं स्वस्रीयः, स्वसुश्छः ($\frac{४।१।१४३}{१२६६}$) । जायां मिमीते जामाता ॥३२॥ प्रगतः पितामहात् (प्रपितामहः) । मातुः पिता मातामहः, [तत्पिता प्रमातामहः] । समानः पिण्ड एषां, यत्स्मृतिः-

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

4 A brother of the whole blood.
6 A distant kinsman.

३४ समानोदर्य-सोदर्य-सगर्भ्य-सहजाः समाः ।
सगोत्र-बान्धव-ज्ञाति-बन्धु-स्व-स्वजनाः समाः ।

1 Relationship.

३५ ज्ञातेयं, बन्धुता, तेषां क्रमाद् भाव-समूहयोः । 1 An aggregate of kinsmen.

4 A husband.
1 A paramour.

धवः प्रियः पतिर् भर्ता, जारस् तूपपतिः समौ ॥

1 An adulterine.
1 A widow's bastard.

३६ अ-मृते जारजः कुण्डो, मृते भर्तरि गोलकः ।

2 A brother's son.
2 Brother and sister.

भ्रात्रीयो भ्रातृजो, भ्रातृभगिन्यौ भ्रातरावुभौ ॥

4 Father and mother.
2 Husband's or wife's father and mother.

३७ मातापितरौ पितरौ मातरपितरौ प्रसूजनयितारौ ।
श्वश्रूश्वशुरौ श्वशुरौ, पुत्रौ पुत्रश् च दुहिता च ॥

1 Son and daughter.

सपिण्डता तु पुरुषे सप्तमे विनिवर्तते (म. टीका ३।५)। सप्तमादूर्ध्वं सगोत्राः। समानो नाभिर्मूलमेषां सनाभयः, ज्योतिर्जनपदेति ($\frac{६।३।८५}{१०१६}$) समानस्य सत्वम् ॥३३॥ समान उदरे शयितः समानोदर्यः, समानोदरे शयितः ($\frac{४।४।१०८}{१६५२}$) इति यत्। सोदरशब्दात्—सोदराद्यः ($\frac{४।४।१००}{१६६०}$), विभाषोदर इति ($\frac{६।३।८८}{१०१६}$) समानस्य सत्वं वा। समाने गर्भे भवः सगर्भ्यः, सगर्भसयूथसनुताद्यन् ($\frac{६।३।८५}{१०१६}$), छान्दसोऽपि लोकेऽभिधानात्। सह जायते सहजो भ्राता। समानं गोत्रमेषां सगोत्राः, ज्योतिर्जनपदेति ($\frac{६।३।८५}{१०१६}$) सत्वम्। क्षायते ज्ञातिः। बध्नाति बन्धुः। (बान्धवः) स्वार्थेऽण्। एकः स्वो ज्ञातिवचनः, अन्य आत्मीयार्थः ॥ ३४ ॥ ज्ञातेर्भावो ज्ञातेयं, कपिज्ञात्योर्ढक् ($\frac{५।१।१२७}{१७१२}$)। बन्धूनां समूहो बन्धुता, ग्रामजनबन्धु (सहाये) भ्यस्तल् ($\frac{४।२।४३}{१२५२}$), तलि स्त्रीलिङ्गवचनम्। धुनोति धवः। प्रीणाति प्रियः, इगुपधेति ($\frac{३।१।१३५}{३८९७}$) कः। पाति पतिः, पातेर्डतिः (उ० ४९७)। सेक्ता वरयिता वरश्च। जारयति जारः, दारजारौकर्तरि णिलुक् च (वा० $\frac{२।१८२}{३१९०}$)। उपजातः पतिरुपपतिः ॥ ३५ ॥ भर्तरीत्येव। कुण्डयते कुलमनेन कुण्डः, कुडि दाहे। जारज इत्येव। गुडयते लज्जाकरत्वाद् गोप्यते गोलकः, परनार्यां प्रजायेते द्वौ सुतौ कुण्डगोलकौ। पत्यौ जीवति कुण्डस्तु मृते भर्तरि गोलक इति स्मृतिः (मनु.३।१७४)। भ्रातुरपत्यं भ्रात्रीयः, भ्रातुर्वच्च ($\frac{४।१।१४४}{१११७}$) इति वा छः। भ्रातृव्यो नानार्थे। भ्राता च भगिनी चेति (भ्रातरौ), भ्रातृपुत्रौस्वसृदुहितृभ्याम् ($\frac{१।२।६८}{९३४}$) इत्येकशेषः। [एवं पुत्रो] ॥ ३६ ॥ माता च पिता च मातापितरौ, आनङ् ऋतो द्वन्द्वे ($\frac{६।३।२५}{९२१}$)। (पितरौ) पितामात्रा ($\frac{१।२।७०}{९३६}$) इत्येकशेषो वा। मातरपितरावुदीचां ($\frac{६।३।३२}{९२९}$) इति—अन्यः साधुः। प्रसूर्माता जनयिता चेति द्वौ त्रिसंज्ञौ। (श्वशुरौ) श्वशुरःश्वश्वा ($\frac{१।२।७१}{९३७}$) इत्येकशेषो वा। [पुत्रश्च दुहिता च प्रागुक्तम्]

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh

4 Husband and wife.
2 The womb.
2 Amnion.
2 The last month of gestation.
2 A fetus.
5 A eunuch.

३८ दम्पती जम्पती जायापती भार्यापती च तौ ।
गर्भाशयो जरायुः स्यादुल्बं च कललो ऽस्त्रियाम् ॥
३९ सूतिमासो वैजननो, गर्भो भ्रूण इमौ समौ ।
तृतीयाप्रकृतिः षण्ढः क्लीबः पण्डो नपुंसके ॥

3 Childhood.
3 Old age.
2 An assemblage of old men.
1 Greyness of hair.
2 Decrepitude.
4 An infant.
2 A child.
3 A young man.
6 An old man.

४० शिशुत्वं शैशवं बाल्यं, तारुण्यं यौवनं समे । 2 Youth or man-hood.
स्यात् स्थाविरं तु वृद्धत्वं, वृद्धसंघे ऽपि वार्धकम् ॥
४१ पलितं जरसा शौक्ल्यं केशादौ, विस्रसा जरा ।
स्यादुत्तानशया डिम्भा स्तपुनी च स्तनन्धयी ॥
४२ बालस् तु स्यान् माणवको, वयःस्थस् तरुणो युवा ।
प्रवयाः स्थविरो वृद्धो जीनो जीर्णो जरन्नपि ॥

॥ ३७ ॥ राजदन्तादौ (२।२।३१) जायापत्योर्जायाशब्दस्य दंभावो जंभावो वा निपात्यते, दं भार्येति निघण्टुः । गर्भं आशेतेऽत्र गर्भाशयः । जरामेति जरायुः । उलति वृणोत्युल्वः । कलयति के ललति वा कललः शुक्रशोणितसमवायः, प्रसिध्यास्य पर्यायो नोक्तः, अस्त्रीत्वविधानार्थं तु विधिः । उल्वपर्यायः कलल इत्येके, यन्मुनिः-तदुल्वं कललं च तत् ॥ ३८ ॥ दशमे मासि सूतव इति श्रुतेः, नवमे दशमे मासि प्रबलैः सूतिमारुतैः ॥ निःसार्यते बाण इव यन्त्रच्छिद्रेण सत्वर इति स्मृतेश्च नवमो दशमो वा मासो, विजनने भवो वैजननः । गीर्यते गर्भः । भ्रियते भ्रूणः कुक्षिस्थः । स्त्रीपुंसाभ्यामन्या तृतीया प्रकृतिः, लिङ्गान्तरत्वात् । शाम्यति शण्ढः, [षण्ढोपि] । क्लीबते क्लीबः । पण्डते पण्डः, पिण्डोपि । न स्त्रीपुंसौ नपुंसकं, नभ्राण्नपादिति (६।३।७५) साधुः, स नपुंसको भवेदिति भाष्यात्पुंस्यपि ॥ ३९ ॥ शिशोर्भावः शैशवं, प्राणभृज्जातीत्यञ् (५।१।१२९) । यूनो भावो यौवनं, हायनान्तयुवादिभ्योण् (५।१।१३०) । (वार्धकं) गोत्रोक्षोष्ट्रेत्यत्र (४।२।३९) वृद्धाच्चेतिवक्तव्यात् (वा० २७१६) वुञ्, मनोज्ञादित्वात् (द्वन्द्वमनोज्ञादिभ्यश्च (५।१।१३३) भावकर्मणो (१।३।१३) रप्याहुः, यथा-वार्धके मुनिवृत्तीनाम् (रघु० १-८) ॥ ४० ॥ पलति शोभतेऽनेन पलितं, पल गतौ । आदिशब्दाद्रोमादौ च । विस्रंसतेऽनया कचाङ्गं विस्रसा । जीर्यन्त्यनया जरा, पिद्भिदादिभ्योऽङ् (३।३।१०४) । उत्ताना शेते-उत्तानशया, अधिकरणे शेतेः (३।२।१५) इत्यत्र-उत्तानादिषुकर्तृषु (वा० १९९८) इत्यच् । डिम्भेति प्राक् पक्षिक्रमेणोक्तं इह मानुषक्रमात् । स्तनं पिबति स्तनपा, (सुपिस्थ इत्यत्र) सुपीति योगविभागात्कः । स्तनं धयति स्तनंधयी, नासिकास्तनयोर्मा धेटोः (३।२।२९) इति खश्, धेटष्टित्वाद्ङीप् । स्त्रीलिङ्गेन निर्देशः स्त्रीप्रत्ययप्रदर्शनार्थः ॥४१॥ बलति(ते) प्राणिति बालः, ज्वलादित्वाण्णः (३।१।१४०), वाडृ आप्लावेऽस्माद्वा

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

3 One very aged.
3 Elder brother; first born.
5 Younger brother.
३ वर्षीयान् दशमी ज्यायान्, पूर्वजस् त्वग्रियोऽग्रजः ।
जघन्यजे स्युः कनिष्ठ-यवीयोऽवरजानुजाः ॥

3 Feeble; thin.
3 Strong; lusty.
5 Corpulent; pot-bellied.
४४ अमांसो दुर्बलश् छातो, बलवान् मांसलो ऽसलः ।
तुन्दिलस् तुन्दिभस् तुन्दी बृहत्कुक्षिः पिचिण्डिलः ॥

4 Flat-nosed.
3 Having much, or fine, hair.
2 Flaccid.
४५ अवटीटो ऽवनाटश् चा ऽवभ्रटो नतनासिके ।
केशवः केशिकः केशी, वलिनो वलिभः समौ ॥

2 Deformed.
3 A dwarf.
2 Sharp-nosed.
2 Noseless.
४६ विकलाङ्गस् त्वपोगण्डः, खर्वो ह्रस्वश् च वामनः ।
खरणाः स्यात् खरणसो, विग्रस् तु गतनासिकः ॥

अपत्ये कुत्सिते मूढे मनोरौत्सर्गिकः स्मृतः । नकारस्य च मूर्धन्यस्तेन सिध्यति माणवः (?) ॥ स्वार्थे कन् (माणवकः) । वयसि प्रत्यग्रे तिष्ठति वयस्थः । तरति तरुणः । यौति मिश्रीभवती स्त्रिया युवा । प्रगतं वयोऽस्य प्रवयाः । तिष्ठति स्थविरः । वर्धते स्म वृद्धः, एवमादौ गड्डरिकाप्रवाहेण भूते क्तः, वर्तमाने युक्तः शीलितादिवत् । जिनाति स्म जीनः, ग्रहिज्यावयीति (६।१।१६ / २४१२) संप्रसारणं, संप्रसारणस्येति (६।३।१३९ / १००४) दीर्घः, त्वादित्वात् (१।४।२७ / १८६५) निष्ठा नत्वम् । जीर्यति स्म जीर्णः, युकः–किति (७।२।११ / २३८१) इत्यनिट् (जरन्) जीर्यतेरतृन् (३।२।१०४ / ३०९२) ॥ ४२ ॥ अतिशयेन वृद्धो वर्षीयान्, ईयसुनि प्रियस्थिरेति (६।४।१५७ / २०१६) वर्षादेशः । दशमोवस्थाविशेषोऽस्यास्ति दशमी, वयसिपूरणात् (५।२।१३० / १९३६) इतीनिः, यन्मुनिः–इष्टो वयोदशोपेतः सप्तमी दशमीति च । अतिशयेन वृद्धो ज्यायान्, ज्यच (५।३।११ / २०३१), वृद्धस्य च (५।३।६२ / २०१३) इति ज्यादेशः, ज्यादादीयसः (६।४।१६० / २०१२) इत्यात्वम् । अग्रे जातोग्रियः, अग्राद्यत् (४।४।११६ / ३४६२), घच्छौच (४।४।११७ / ३४६३) इति घः । अग्र्याग्रीयौ च । अग्रिमपाठे, अग्रादिपश्चाड्डिमच् (वा० २८४४ / १३९१) जघन्यजः पश्चाज्जातः । अत्यर्थं युवा कनिष्ठो यवीयांश्च, युवाल्पयोः कन्नन्यतरस्यां (५।३।६४ / २०१९), स्थूलदूरेति (६।४।१५६ / २०१५) यणादिलोपः पूर्वस्य गुणः । एवं कनीयान् यविष्ठश्च । अवरे जायतेऽवरजः ॥ ४३ ॥ छयति स्म छातः, छो छेदने । मांसमस्यास्ति मांसलः, सिध्मादित्वात् (५।२।१३९ / १९४९) लच् । अंसावस्य स्तः (अंसलः), वत्सांसाभ्यां कामबले (५।२।१३९ / १९४५) इति लच् । तुन्दं पिचण्डश्चास्यास्ति, तुन्दादिभ्य इलच्च (५।२।१३९ / १९४५) इति चादिनिठनौ । उदरिलोपि । तुन्दिरस्यास्ति तुन्दिभः, तुन्दिवलिवटेर्भः (५।२।१३९ / १९४५) ॥ ४४ ॥ नते नासिकायाः संज्ञायां टीटज्नाटज्भ्रटचः (५।२।१३१ / १८३२), नतनासिकश्चिपिटघोणः । नतायां नासिकायां नासानमनेष्येते वर्तन्ते । प्रशस्ताः केशाः सन्त्यस्य केशवः, केशाद्वोन्यतरस्याम् (५।२।१०९ / १९३६), वलिस्वक्सङ्कोचोऽस्यास्ति, पामादित्वान्नः (लोमादिपामादीति ५।२।१०० / १९०७) । (वलिभः) तुन्दिवलिवटेर्भः (५।२।१३९ / १९४५) ॥ ४५ ॥ पूयतेऽपसार्यते पोगण्डः । खर्वति खर्वः ।

CC-0. Agamnigam Foundation. Digitized by eGangotri Siddhanta Kosha, Chandigarh

2 Having a nose like a hoof. ४७ खुरणाः स्यात् खुरणसः, प्रञ्जुः प्रगतजानुकः । 2 Bandy-legged.
2 Long shanked. ऊर्ध्वञ्जुरूर्ध्वजानुः स्यात्, संञ्जुः संहतजानुकः ॥
2 Knock-kneed.

2 Deaf. ४८ स्यादेडे बधिरः, कुब्जे गडुलः, कुकरे कुणिः । 2 Having a crooked arm.
2 Hump-backed. पृश्निरल्पतनौ, श्रोणः पङ्गौ, मुण्डस् तु मुण्डिते ॥
2 Small, short, or thin. 2 Bald ; closeshaved. 2 A cripple.

2 Squint-eyed. ४९ बलिरः केकरे, खोडे खञ्जस्, त्रिषु जराऽवराः ।
2 Lame
3 A freckle or mark. जडुलः कालकः पिप्लुस्, तिलकस् तिलकालकः ॥
2 A mole or spot.

2 Health. ५० अनामयं स्यादारोग्यं, चिकित्सा, रुक्प्रतिक्रिया ।
2 Physicking. भेषजौषध-भैषज्यान्यगदो जायुरित्यपि ॥
5 Medicament.

हसति ह्रस्वः । वामोऽस्यातीति वामनः । निखर्वः खट्टरः [नः]खर्व इति **नाममाला** । खरा तीक्ष्णा खरस्येव वा नासास्य खरणाः, खुरखाराभ्यांवानस्वक्तव्य (वा०-$\frac{३३६३}{८५७}$), पक्षे-अञ्नासिकायाःसंज्ञायां नसचा स्थूलात् ($\frac{५।४।११८}{८५६}$), पूर्वपदात्संज्ञायामगः ($\frac{८।४।३}{८५७}$) इति णत्वम् । नःक्षुद्रः क्षुद्रनासिकः । (विग्रः) वेर्गोवक्तव्यः (वा० $\frac{८५९}{३३९५}$) ॥ ४६ ॥ खुराकारा नासिकास्य खुरणाः-विकटघोणः । प्रगते विरले वातादिदोषात्तथोर्ध्वे संहते च जानुनी अस्य, प्रसंभ्यां जानुनोर्ज्ञुः ($\frac{५।४।१२९}{८६८}$), ऊर्ध्वाद्विभाषा ($\frac{५।४।१३०}{८६९}$) ॥ ४७ ॥ एडपशुरिव-एडः । बद्धौ कर्णावस्य बधिरः । कुत्सित उब्जः, कुब्जः, पृषोदरादिः (ग.सू.२३४) । गडुरस्यास्ति गडुलः, सिध्मादित्वात् ($\frac{५।४।९७}{६९८४}$) लच् । कुण शब्दे, कुपाणिः कुणिरिति **नैरुक्ताः** । कलंवकस्ववाक्कर्णः खलतिस्त्विन्द्रलुप्तकः । स्पृश्यते पृच्छति वा पृश्निः । (श्रोणः) श्रोणृ संघाते, कुटिलजङ्घापादः । मुण्ड्यते मुण्डः ॥ ४८ ॥ वलते चेष्टते वलिरं नेत्रं तद्योगाद्वलिरः । के मूर्ध्नि करोत्यक्षिणी चलत्तारकत्वात्केकरः, **एनमुपाध्यायः** काच[व]र इत्याख्यत् । (खोडः) खुड प्रतिघाते । (खञ्जः) खजि वैकल्ये । वण्डो दुश्चर्मा द्विनग्नोऽपि । जराशब्दादुत्तरा उत्तानशयादयः खञ्जन्तास्त्रिलिङ्गाः । जडति जडुलः, जडुलोजडत्वाद्वा । काल एव कालकः । अपिप्लवते पिप्लुः । तिलप्रतिकृतिस्तिलकः । तिल इव कालकस्तिलकालकः, देहे कृष्णं लक्ष्म ॥४९॥ आमयस्यभावोऽनामयं, अव्ययं विभक्तिसमीपेति ($\frac{२।१।६}{६५२}$) अर्थाभावे व्ययीभावः । क्तितेर्व्याधिप्रतीकारे सन् । भिषज्यत्यनेन भेषजं, भिषज कण्ड्वादिः, अनन्तावसथेतिहभेषजादिति ($\frac{५।४।३७}{२०९१}$) निर्देशाद् गुणः, भेषं रोगं जयतीति **दुर्गः** । (औषधं) ओषधेरजाताविति ($\frac{५।४।२३}{२१०५}$) स्वार्थेऽण् । (भैषज्यं) अनन्तावसथेतिहभेषजाञ्ज्यः ($\frac{५।४।२३}{२०९१}$) स्वार्थे । अविद्यमानो गदोऽस्मिन्नगदः । जयति रोगाञ्जायुः, कृवापाजीत्युण् (उ० १) ॥ ५० ॥

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

7 A disease.
3 Pulmonary consumption. 2 Catarrh.

५१ स्त्री रुग् रुजा चोपताप-रोग-व्याधि-गदाऽऽमयाः ।
क्षयः शोषश् च यक्ष्मा च, प्रतिश्यायस् तु पीनसः ॥

3 Sneezing.
2 Cough.
3 Intumescence.
2 Kibe.

५२ स्त्री क्षुत् क्षुतं क्षवः पुंसि, कासस् तु क्षवथुः पुमान् ।
शोफस् तु श्वयथुः शोथः, पादस्फोटो विपादिका ॥

2 Blotch.
4 Scab.
3 Itch.
2 Boil.

५३ किलास-सिध्मे, कच्छ्वां तु पाम-पामे विचर्चिका ।
कण्डूः खर्जूश् च कण्डूया, विस्फोटः पिटकः स्त्रियाम् ॥

3 Sore or wound.
1 Ulcer.
2 Ringworm.
2 White Leprosy.

५४ व्रणो ऽ स्त्रियामीर्ममरुः क्लीबे, नाडीव्रणः पुमान् ।
कोठो मण्डलकं, कुष्ठ-श्वित्रे, दुर्नामकाऽर्शसी ॥ 2 Hemorrhoids.

2 Constipation.
2 Diarrhœa.
3 Vomiting.

५५ आनाहस् तु निबन्धः स्याद्, ग्रहणीरुक् प्रवाहिका ।
प्रच्छर्दिका वमिश् च स्त्री पुमांस्तु वमथुः समाः ॥

रुज्यतेऽनया रुक्, क्विप् । (रुजा) भिदाद्यङ् (षिद्भिदादिभ्योङ् $\frac{३।३।१०४}{३२८१}$)। व्याधीयतेऽपथ्यैर्व्याधिः । गदति व्यथां गदः । आमीनात्यामयः, अम रोगेऽस्माद्वा । आमोपि । यक्ष्यते पूज्यते रोगराजत्वाद्यक्ष्मा । राजयक्ष्मापि । क्षीयतेऽनेन क्षयः । शुष्यत्यनेन शोषः । प्रतिश्यायते स्रवति प्रतिश्यायः, श्याङ्व्यधेति ($\frac{३।१।१४१}{२९०३}$) णः । पीनं स्यत्यन्तं नयति पीनसः ॥ ५१ ॥ क्षवणं क्षुत् , क्विप् , क्तः, अप् । काशतेऽनेन काशः । क्षौत्यनेन क्षवथुः । शवति विसर्पति शोफः शोथश्च । शूयतेऽनेन श्वयथुः। विपद्यतेऽनया विपादिकाः पादशतस्य ($\frac{५।४।१}{३०७३}$) इत्यत्रान्यत्रापीति वक्तव्याद् वुन्–लोपो वा ॥ ५२ ॥ समे इति शेषः । किलमस्यति किलासम् । सिध्यति सिध्मं मलश्वित्राख्यम् । कपति कच्छूः । पिबत्यङ्गं पामा । (पामा) डाबुभाभ्यामन्यतरस्यां ($\frac{४।१।१३}{४६१}$) । विवर्चयति विचर्चिका, अङ्गुल्यादिसंधिषु सूक्ष्माः पिटकाः, खर्जूविशेष इत्येके । कण्डूमति कण्डूः, भावे क्विप् (संपदादिभ्यः क्विप्) । (कण्डूया) अप्रत्ययात् ($\frac{३।३।१०२}{३२७९}$) खर्जति खर्जूः, कर्ज खर्ज व्यथने। विस्फोटयति विस्फोटः । पटति संश्लिष्यति पेटति वा पिटकः ॥ ५३ ॥ व्रणयति व्रणः । ईरयत्यङ्गमीर्मम् । इयर्त्यरुः, उस् । नाड्या व्रणं, समासे पुंस्त्वम् । नालिश्च । कूयते शब्द्यते कोठः । (मण्डलकं) मण्डलाकृति कुष्ठम् । समे इति शेषः । कुष्णात्यङ्गं कुष्ठं, कुत्सितं तिष्ठति वा, अम्बाम्बगोभूमीति ($\frac{८।३।९७}{२९१८}$) षत्वम् । श्वेतते श्वित्रं श्वेतकुष्ठम् । पापरोगत्वाद् दुर्नामकम् । इयर्त्यर्शः । गुदजं गुदकीलकं च ॥५४॥ आनहनं विण्मूत्रनिरोधः । गृह्णाति ग्रहणी, जाठरोऽग्निर्गृह्यतेऽनया वा तच्छैथिल्यात् । रुग्रोगः । मलप्रवहणं प्रवाहिका, रोगाख्यायांण्वुल् ($\frac{३।३।१०९}{३२८९}$) ।

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh

Various diseases. ५६ व्याधि-भेदा—विद्रधिः स्त्री ज्वर-मेह-भगन्दराः ।
1 Abscess. 1 Fever. Diabetes. Fistula.

2 Elephantisis. 2 Baldness. 2 Stone: 1 Stricture.
'श्लीपदं पादवल्मीकं, केशघ्नम् त्विन्द्रलुप्तकः ॥' (१)
अश्मरी मूत्रकृच्छ्रं स्यात्, पूर्वे शुक्राऽवधेस् त्रिषु ॥

5 A Physician. ५७ रोगहार्यगदङ्कारो भिषग्-वैद्यौ चिकित्सके ।
4 Recovered from sickness.
वार्तो निरामयः कल्य उल्लाघो निर्गतो गदात् ॥

2 Emaciated or weak. 7 Diseased. ५८ ग्लान-ग्लास्नू, आमयावी विकृतो व्याधितोऽपटुः ।
2 Scabby.
आतुरोऽभ्यमितोऽभ्यान्तः, समौ पामन-कच्छुरौ ॥

2 Afflicted with herpes. ५९ दद्रुणो दद्रुरोगी स्यादर्शोरोगयुतो ऽर्शसः । 2—with hemorrhoids.
2 Afflicted with gout or rheumatism.
वातकी वातरोगी स्यात्, सातिसारो ऽतिसारकी ॥
2—with dysentery.

प्रच्छर्दनं प्रच्छर्दिका, रोगाख्यायांण्वुल् (सू० $\frac{३।३।१०८}{३२८५}$) । वमनं वमिः । छर्दिश्छर्दी च ॥५५॥ विद्रात्यनया विद्रधिः, विद्रो धीयतेऽस्यां वा । मेहति मूत्रयतेऽनेन मेहः । प्रमेहोऽपि, दीपप्रदीपवत् । भगं दारयति भगंदरः स्फिक्संधौ पिटकं, पूःसर्वयोर्दारिसहोः ($\frac{३।२।४१}{२९५८}$) इत्यत्र भगे च दारेर्वक्तव्यात् (वा० $\frac{२०१३}{३।२।४६}$) खच् । श्लीपदं पादवल्मीकं केशघ्नं त्विन्द्रलुप्तकम् । व्याधिभेद इत्येव । अश्मानं शुक्रं रात्यश्मरी । शुक्रात्पूर्वे मूर्च्छितान्ता वाच्यलिङ्गा ॥ ४६ ॥ अगदः क्रियतेऽनेनागदंकारः, कारेसत्यागदस्य ($\frac{६।३।७०}{१००७}$) इति मुम् । भिषज्यति भिषक् । विद्यामधीते वेद वा वैद्यः । आद्यौ सामान्येनौषधादावपीत्येके । वमति वान्तः, वार्त्त इति तु युक्तं, यद्वक्ष्यति—वार्त्तं फल्गुन्यरोगे च त्रिषु, वृत्तिरस्यास्ति, प्रज्ञाश्रद्धार्चावृत्तिभ्यो णः ($\frac{५।२।१०१}{१९०८}$) । कलासु साधुः कल्यः । उल्लाघ्यते स्मोल्लाघः, क्तः, अनुपसर्गात्फुल्लेति ($\frac{८।२।५५}{३०३५}$) साधुः ॥ ५७ ॥ ग्लायति स्म ग्लानः, संयोगादेरातोधातोः ($\frac{८।२।४३}{३०१७}$) इति निष्ठा नत्वम् । ग्लायति तच्छीलो ग्लास्नुः, ग्लाजिस्थश्चग्रस्नुः ($\frac{३।२।१३९}{३११९}$) । आमयोऽस्यास्त्यामयावी, सर्वत्रा—आमयस्योपसंख्यानाद्विनिर्दीर्घश्च (वा० $\frac{३।२।१३}{५।२।१२२}$) । व्याधिः संजातोऽस्य व्याधितः । अपटुर्मन्दः । आतोरत्यातुरः, आतरति रोगं वा । अभितोम्यते स्माभ्यान्तः (अभ्यमितश्च), रुष्यमत्वरेति ($\frac{७।२।२८}{३०६९}$) वेट् । संघातमृत्युमरकं [को] मारिमारी च देवतेति श्रीहर्षः । पामास्यास्ति पामनः, पामर इत्येके, द्वावपीति श्रीभोजः । [कच्छूरस्यास्ति] कच्छुरः, कच्छ्वाहस्वत्वंच (वा० $\frac{३।२।१००}{५।२।१०७}$) इति रः ॥ ५८ ॥ (दद्रुणः) पामादित्वाच्छाकीपलालीदद्रूणां ह्रस्वश्च (ग० १७८) इति नः। दीर्यन्तेऽनया दद्रूः। अर्शांसि सन्त्यस्यार्शसः, अर्शआदिभ्योऽच् ($\frac{५।२।१२७}{१९३३}$) वातो विद्यतेऽस्य वातकी, वातातिसाराभ्यां कुक्च ($\frac{५।२।१२९}{१९३५}$) इतीतिः ।

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

4 Blear-eyed. ६० स्युः क्लिन्नाक्षे चुल्ल-चिल्ल-पिल्लाः, क्लिन्ने ऽक्षिण चाप्यमी ।
2 Insane. उन्मत्त उन्मादवति, श्लेष्मलः श्लेष्मगः कफी ॥
3 Phlegmatic.
1 Gibbous from disease. ६१ न्युब्जो भुग्ने रुजा, वृद्धनाभौ तुन्दिल-तुन्दिभौ ।
2 Having an elevated novel.
2 Having blotches. किलासी सिध्मलो, ऽन्धो ऽदृक्, मूर्च्छाले मूर्तमूर्च्छितौ ॥
2 Blind. 3 Fainting.
6 Seed. ६२ शुक्रं तेजो-रेतसी च बीज-वीर्येन्द्रियाणि च ।
2 Bile. 2 Phlegm. मायुः पित्तं, कफः श्लेष्मा, स्त्रियां तु त्वगसृग्धरा ॥
2 The skin.
6 Flesh. ६३ पिशितं तरसं मांसं पललं क्रव्यमामिषम् ।
3 Dry flesh. उत्तप्तं शुष्कमांसं स्यात् तत् वल्लूरं त्रि-लिङ्गकम् ॥

एकदेशे विकृतत्वादतीसारक्यपि ॥ ५९ ॥ क्लिन्नस्य चुल्चिल्पिल्लश्चास्यचक्षुषीति वक्तव्यात् (वा० $\frac{३१२२}{जा२।३३}$) साधवः । चक्षुःक्लेदेऽपि, तेन चक्षुर्गतं क्लेदश्चुल्लो नाम रोगः, तद्योगाच्चुल्लं चक्षुः, चुल्लचक्षुष्ट्वाच्चुल्लः पुमान् । उन्मादो वातभूतादिदोषाच्चित्तविभ्रमः । श्लेष्मास्यास्ति, सिध्मादित्वाल्लच् ($\frac{५।२।९७}{१९७४}$) । (श्लेष्मणः) पामादित्वान्नः । लोमादिपामादीति ($\frac{५।२।१००}{१९००}$) ॥ ६० ॥ न्युब्जनं न्युब्जः, घञ्, भुजन्युब्जौपाण्युपतापयोः ($\frac{७।३।६१}{२८७७}$) इति साधुः । भुग्नः कुब्जः, न्युब्जेन पाणिगतेन भुग्नत्वेन योगाद् न्युब्जः पुमान्, यच्छाश्वतः—विद्यादधोगतं न्युब्जं न्युब्जः कुब्ज उदाहृतः (४६१) तुण्डिरुन्नतनाभिः, तुन्दिस्तु जटरं, इलच् तुन्दादिभ्य इलच् ($\frac{५।२।११७}{१९२४}$) । (तुण्डिभः) तुन्दिवलीति ($\frac{५।२।१३}{१९४५}$) भश्च, एकदेशविकृतत्वात् । (सिध्मलः) सिध्माचित्वाल्लच् ($\frac{५।२।९७}{१७७४}$), अन्धोऽदृक्, अन्ध दृष्ट्युपसंहारे । नास्ति दृगस्यादृक् । मूर्च्छास्त्यस्येति (मूर्च्छालः), प्राणिस्थादातो लच् ($\frac{५।२।९६}{१९७३}$), क्षुद्रजन्तूपतापाच्चेष्यते (ग० ११७) मूर्च्छति मूर्तः, राल्लोपः ($\frac{६।४।२१}{२६५५}$) इति छलोपः, नव्याख्येति ($\frac{८।२।५७}{३७४७}$) नत्वाभावः । मूर्च्छा संजातास्य मूर्च्छितः, चुरादिमूर्च्छेः क्तो वा ॥ ६१ ॥ शोकति स्रवति शुक्रम् । तेजयति तेजः, असुन् । रीयते रेतः, रीङ् स्रवणे । वीज्यते वेति वा वीजं, वीजिर्लौकिकः । वीरेऽक्लीबे साधु वीर्यम् । इन्द्रस्यामनो लिङ्गमितीन्द्रियं, इन्द्रियमिन्द्रलिङ्गमिति ($\frac{५।२।९३}{१८९३}$) साधुः । मिनोति मलान् स्रंसकत्वान्मायुः । पतति स्रंसते पित्तम् । कात्फलति कफः । श्लिष्यति श्लेष्मा । (त्वक्) त्वच संवरणे । असृजो धरा (असृग्धरा) ॥६२॥ (पिशितं) पिश अवयवे । तरो बलमस्त्यस्य तरसं, तरन्त्यनेन कार्श्यं वा । मन्यते मांसं, मांसभक्षयितामुत्रेति नैरुक्ताः [मांसभक्षयितामुत्र यस्य मांसमिहाद्म्यहम् । एतन्मांसस्य मांसत्वे निरुक्तं मुनिरब्रवीदिति नैरुक्ताः] । पाल्यतेऽनेन देहः पललं, यच्छाश्वतः– पललं तिलमिश्रे स्यात्पललं च पिशितेऽपि (२९६) ।

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh

7 Blood. ६४ रुधिरे ऽसृग-लोहितास्र-रक्त-क्षतज-शोणितम् ।
2 The heart. बुक्काऽग्रमांसं, हृदयं हृन्, मेदस् तु वपा वसा ॥
3 Fat.

1 Muscles at the nape of the neck. ६५ पश्चाद्-ग्रीवा-शिरा मन्या, नाडी तु धमनिः शिरा ।
3 A nerve tendon or gut.
2 Lungs. 2 The brain. तिलकं क्लोम, मस्तिष्कं गोर्दं, किट्टं मलोऽस्त्रियाम् ॥
2 An excretion.

2 Entrails. ६६ अन्त्रं पुरीतत्, गुल्मस् तु प्लीहा पुंस्यथ वस्रसा ।
2 The spleen. स्नायुः स्त्रियां, कालखण्ड-यकृती तु समे इमे ॥ 2 The liver.
2 A tendon or muscle.

3 Saliva. ६७ सृणिका स्यन्दिनी लाला, दूषिका नेत्रयोर् मलम् ।
1 Rheum of the eyes. 'नासामलं तु सिङ्घाणं, पिञ्जूषं कर्णयोर्मलम् ।' (१)
2 Dirt of nose.
1 Cerumen. मूत्रं प्रस्राव, उच्चाराऽवस्करौ शमलं शकृत् ॥
2 Urine.
9 Fæces.

क्रवते (क्रूयते) क्रव्यं, क्रुङ्गतौ । आमिष्यत आमिषम् । जाङ्गलं च, पलं नानार्थे । उत्तप्यते शोष्यते–उत्तप्तम् । वलं लुनाति वल्लूरं, वल्लिः सौत्रो वा ॥ ६३ ॥ रुणद्धि स्रोतांसि रुधिरम् । अस्वते न सृज्यते वासृक् । लोहितं रक्तं च वर्णतः । अस्यतेऽस्रम् । शोणति शोणितं, शोणृ वर्णे । बुक्क्यते स्वादुत्वान्मृग्यते बुक्का, नान्तः पुंस्ययं, स्त्रीत्येके, बृक्केति वैद्याः । अग्रं मुख्यम् । ह्रियते हृत्–जीवाधारं पद्मं, दान्तं प्रकृत्यन्तरम् । मेद्यति स्निह्यति मेदः, असन्तत्वात्क्लीबे । उप्यते वपा । वस्ते मांसं वसा, शुद्धमांसस्य यः स्नेहः सा वसेति वैद्याः ॥ ६४॥ पश्चाद्भागे ग्रीवायाः कृकाटिकायां सिरा, मन्यते मन्या, संज्ञायां समजनिषदेति (३।३।९९ / ३२७६) क्यप् । नडस्येयं नाडी सौषीर्यात् । धमति धमनिः, धमिः सौत्रः । सिनोति कायं सिरा, षिञ् बन्धने । तिलति तिलकम् । क्लाम्यति क्लोम, उदर्यो जलाधारः । हृदयस्य दक्षिणे यकृत्क्लोम वामे प्लीहा पुप्फुसश्चेति वैद्याः । मस्तकमज्जा, मस्तकमिष्यतीति मस्तिष्कं, इष गतौ । गुर्द्यते गोर्दं, गुर्द परिवेष्टने । केटति किट्टम्, किट गतौ । मलते धारयति कायं मलः ॥ ६५ ॥ अमत्यनेनान्नमन्त्रम् । पूर्यते पुरीतत्, तान्तोऽयम् । गुड्यते रक्ष्यते मा वाधिष्टेति गुल्मः । प्लेहते प्लीहा, नान्तः । वस्ते छादयति कायं वस्रसा । स्रसा रु-[न]हारुश्च । स्नायत्यङ्गं स्नायुः, ष्णै वेष्टने । महास्नायुश्च कण्डरा, स्नायुसंघात इति वैद्याः । दक्षिणपार्श्वे कृष्णमांसांशः कालखण्डम्, कालखञ्जमित्येके । यमं करोति यकृत् ॥ ६६ ॥ सरति सृणिका । स्यन्दते स्यन्दिनी । ललति लाति वा लाला । दूषयत्यक्षि दूषिका, दूषीकापि । (प्रस्नावः) प्रेद्रुस्तुस्रुव इति (३।३।२७ / ३१९८) घञ् । उच्चार्यते प्रेर्यते–उच्चारः । अवाधः कीर्यत इति, वर्चस्केवस्करइति (६।१।४८ / १०६३) साधुः ।

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

६८ पुरीषं गूथ-वर्चस्क्रम-स्त्री विष्ठा-विशौ स्त्रियौ ।
स्यात् कर्परः कपालोऽस्त्री, कीकसं कुल्यमस्थि च ॥

2 The skull; cranium.
3 Any bone.

६९ स्याच्छरीरास्थि कङ्कालः, पृष्ठास्थिन तु कशेरुका ।
शिरोस्थनि करोटिः स्त्री, पार्श्वास्थनि तु पर्शुका ॥

2 The skeleton.
2 The back-bone.
2 The skull; or bones of the head.
2 A rib.

७० अङ्गं प्रतीकोऽवयवो ऽपघनो, ऽथ कलेवरम् ।
गात्रं वपुः संहननं शरीरं वर्ष्म विग्रहः ॥

4 A limb or member.
12 The body.

७१ कायो देहः क्लीव-पुंसोः स्त्रियां मूर्तिस् तनुस् तनूः ।
पादाग्रं प्रपदं, पादः पदङ्घ्रिश् चरणोऽस्त्रियाम् ॥

2 Point of the foot.
4 A foot.

७२ तद्-ग्रन्थी घुटिके गुल्फौ, पुमान् पार्ष्णिस् तयोरधः ।
जङ्घा तु प्रसृता, जानूरुपर्वाऽष्ठीवद-स्त्रियाम् ॥

2 The ancles.
1 A heel.
2 A leg.
3 A knee.

शाम्यति शमलम् । शक्नोत्यनेन शकृत् ।। ६७ ॥ पिपर्त्यन्त्रं पुरीषम् । गूयत उत्सृज्यते गूथम् । वर्च एव वर्चस्कम् । विविष्ठतेऽनया विष्ठा । वेवेष्टि विट्, विशतीति सभ्याः । कल्पते कर्परः, कृपे रो लो नास्ति बाहुलकात् । कं पालयति कपालं मूर्ध्नोऽस्थि, घटादिखण्डोप्युपचारात् । कीति कसति कीकसम् । कुले शरीरे साधु कुल्यं, कोलति संस्त्यायते वा । अस्यतेऽस्थि ॥ ६८ ॥ कं कालयति कङ्कालति वा कंकालः, देहारम्भकोऽस्थिपञ्जरः । करङ्कोऽपि । कशारुकेति मुनिः, कश्यत इति । पृष्ठग्रन्थौ° गडुः पुमान् । के रटति करोटिः करोटी च । पूर्यते पर्शुः, पर्शुरेव पर्शुका ॥ ६९ ॥ अङ्गत्यङ्गम् । प्रत्येति प्रतीकः । अवयौत्यवयवः । अपहन्यतेऽपघनः, अपघनोङ्गमिति (३।३।८१ / ३२५८) साधुः । कल्यते कलेवरम् । गाते गच्छति गात्रम् । उप्यते वपुः । संहन्यते संघात्यन्तस्मिन्नङ्गानि संहननम् । शीर्यते शरीरम् । वृष्यते सिध्यते वर्षति मलान्वा वर्ष्म । विगृह्यते विग्रहः, ग्रहवृदृइति (३।३।५८ / ३२३४) अप् ॥ ७० ॥ चीयते कायः, निवासचितिशरीरोपसमाधानेष्वादेश्च कः (३।३।४१ / ३२१३) दिह्यते देहः । मूर्च्छति वर्धते मूर्तिः । तन्यते तनुः । प्रारम्भः पदस्य प्रपदं, पदशब्दः पादपर्यायोऽस्ति । पद्यतेऽनेन पादः । पदिति लक्ष्यलक्षणयोर्नास्ति, यस्तु गौः पदा न स्प्रष्टव्या, पद्भ्यामेव यथा-तथेत्यादौ स पदन्नोमासिति (६।१।६३ / २८८) पदादेशः, अतः पदोङ्घ्रिरिति पाठ्यम्, क्रमे तु पदम् । अंहत्यनेनाङ्घ्रिः । चरत्यनेन चरणः ॥ ७१ ॥ पादग्रन्थी पार्श्वनिःसृते, घोटते घुटिका, घुट परिवर्तने । गुड्यते गुल्फः । गुल्फाधः पश्चाद्भागः पार्ष्णिः, पुमानिति प्रायिकं, पृष्यते स्नेह्यते विपादिका चिकित्सार्थं पार्ष्णिः।जङ्घन्यते कुटिलं गच्छति जङ्घा । प्रसरति प्रसृता । जायते जानु । ऊर्वोः पर्व ग्रन्थिःअस्थि विद्यतेऽत्राष्ठीवत्,

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

2 A thigh.
1 The plubis.
3 The anus.
1 The abdomen.

७३ सक्थि क्लीबे पुमानूरुस्, तत्-संधिः पुंसि वङ्क्षणः । 1 The groin.
गुदं त्वपानं पायुर् ना, बस्तिर् नाभेरधो द्वयोः ॥

5 The hip and loins.
1 A woman's buttocks.
1 Mons veneris.

७४ कटो ना श्रोणिफलकं, कटिः श्रोणिः ककुद्मती ।
पश्चान् नितम्बः स्त्री-कट्याः, क्लीबे तु जघनं पुरः ॥

1 Cavities of the loins.
2 The buttocks.
1 Parts of generation.

७५ कूपकौ तु नितम्ब-स्थौ द्वय-हीने कुकुन्दरे ।
स्त्रियां स्फिचौ कटिप्रोथ्यावुपस्थो वक्ष्यमाणयोः ॥

2 Vulva.
4 Penis.
3 The scrotum.
1 Osmnominaturm

७६ भगं योनिर् द्वयोः, शिश्नो मेण्ढ्रो मेहन-शेफसी ।
मुष्कोऽण्डकोशो वृषणः, पृष्ठ-वंशाऽधरं त्रिकम् ॥

5 The belly.
2 The paps.
2 A nipple.
5 The bosom.

७७ पिचण्ड-कुक्षी जठरोदरं तुन्दं, स्तनौ कुचौ ।
चूचुकं तु कुचाग्रं स्यान्, न ना क्रोडं भुजान्तरम् ॥

1 The back.
3 A shoulder; scapula.
1 The collar bones.

७८ उरो वत्सं च वक्षश् च, पृष्ठं तु चरमं तनोः ।
स्कन्धो भुजशिरोंऽसोऽस्त्री, संधी तस्यैव जत्रुणी ॥

आसन्दीवदष्ठीवदिति ($\frac{८।२।१२}{६१९०}$) साधुः ॥ ७२ ॥ सजति सक्थि । ऊर्वत्यूरुः । वस्त्यध ऊरुसंधिः, वङ्क्ते वङ्क्षणः । गवते गयते वानेन गुदम्, गुद परिवेष्टने वा । अपानित्यनेनापानम् । पाति मलोत्सर्गात्पायुः, पिबति वा स्नेहम् । वसत्यस्मिन्मूत्रं वस्तिर्मूत्रपुटकम् ॥ ७३ ॥ कट्यत आव्रियते कटः, शवे श्रोणौ कलिङ्गे च गजगण्डे भृशे कट इति शाश्वतः (२३७) कटीरोऽपि । संहन्यते श्रोणिः, तस्याः फलकमिव ककुत्पार्श्वनिःसृतांशोऽस्त्यस्याः ककुद्मती । कट्याः पश्चाद्भागः, नितान्यति सुरतसंभर्दान्नितम्बः । स्त्रीकट्याः पुरो भागः, हन्यते जघनम् ॥ ७४ ॥ कुत्सितं कुं दृणाति कुकुन्दरं, द्वयहीने क्लीबे । स्फायते स्फिक् । प्रथत उद्भिद्यते प्रोथः । प्रोहोऽपि । (उपस्थः) वक्ष्यमाणौ भगशिश्नौ ॥ ७५ ॥ भज्यते भगं, खनोझचेत्यत्र ($\frac{३।३।१२५}{३३०४}$) खलो भगःपदमितिवक्तव्याद्धः (ज्ञा०) । यौति योनिः । स्त्रीचिह्नं स्मरगृहं च । शिनोति घर्षति भगं शिश्नः, शेफ[प]श्च । मेहत्यनेन मेढ्रम् । मुष्णाति गोपायति शुक्रं मुष्कः । अण्डयोः कोशोऽण्डकोशः । वर्षति शुक्रं वृषणः । पेलश्च । पृष्ठास्थ्नोध ऊर्वोः संधौ त्रिसंघट्टस्त्रिकम् ॥ ७६ ॥ पचत्यन्नं पिचण्डः, अपिचमत्याहारं वा । कुप्यते कुक्षिः । जमत्याहारं जठरम् । उदीर्यति (दियर्ति) उदरम् । तुदति तुन्दं, तुन्दिश्च । स्तन्येते बालैः स्तनौ । कूयते कुच्यते वा कुचौ । वक्षोरुहौ उरसिजौ च । चुच्चित्यव्यक्तं कायति पीयमानं चुचुकम् । (क्रोडं) क्रूड घनत्वे, ना पुंलिङ्गं न भवति । वक्षोमध्याद्भिन्नास्थि क्राडा ॥ ७७ ॥ उरस्यति सहते–उरः, उरस् कण्डवादिः । वस्यते छाद्यते वत्सम् ।

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

2 The arm-pits.
1 A side.
3 The waist.

७९ बाहुमूले उभे कक्षौ, पार्श्वम-स्त्री तयोरधः।
मध्यमं चा ऽवलग्नं च मध्यो ऽस्त्री, द्वौ परौ द्वयोः ॥

4 An arm.
3 An elbow.
1 Humerus.
1 A fore-arm.

८० भुज-बाहू प्रवेष्टो दोः, स्यात् कफोणिम् तु कूर्परः।
अस्योपरि प्रगण्डः स्यात्, प्रकोष्ठम् तस्य चाप्यधः ॥

1 Metacarpus.
3 A hand.
2 A fore finger.
2 Fingers.

८१ मणि-बन्धादा-कनिष्ठं करस्य करभो बहिः।
पञ्चशाखः शयः पाणिम्, तर्जनी स्यात् प्रदेशिनी ॥

1 The several fingers.
Thumb and others.

८२ अङ्गुल्यः करशाखाः स्युः, पुंस्यङ्गुष्ठः प्रदेशिनी।
मध्यमाऽनामिका चापि कनिष्ठा चेति ताः क्रमात् ॥

4 A nail.
1 A short span of three kinds.

८३ पुनर्भवः कररुहो नखो ऽस्त्री नखरो ऽस्त्रियाम्।
प्रादेश-ताल-गोकर्णाम् तर्जन्याऽऽदि-युते तते ॥

(वक्षः) वक्ष संघाते, असुन्। पञ्च (क्रोडादयः) एकार्था इत्येके। पृष्यते सिच्यते पृष्ठं देहस्य पश्चाद्भागः, पश्चान्मात्रे तूपचारात्। स्कन्द्यते भारेण स्कन्धः। अस्यते भारेणांसः। अंसवसयोः सन्धिरुद्भिन्नास्थि, जायते जत्रु ॥ ७८ ॥ कष्यते कक्षौ, यान्तावपि वक्ष्यौ। (पार्श्वं) पर्श्वा णस् वक्तव्यः (वा० २७२४/१२५१), पार्श्वे इति द्विवचनं न्याय्यम्। मध्ये भवं मध्यमं, मध्यान्मः (४।३।८/१३७८) अवलगत्यवलग्नमतिकृशत्वात्। विलग्नं च। मन्यते मध्यम्। परौ भुजो बाहुश्च ॥ ७९ ॥ भुज्यतेऽनया भुजा, भुजन्युब्जाविति (७।३।६१/२८७७) साधुः। वहति वाहते प्रयतते वा बाहुः, वाह प्रयत्ने। प्रवेष्टते प्रवेष्टः। द्यति ददाति वा दोः, सान्तः। कं फणति कफोणिः। कुरति कूर्परः, बाहूपबाहुसंधेररत्निसंज्ञस्य पश्चाद्भागः, तथा च–कफोणिः कूर्परोऽ रत्नेः पृष्ठमिति **नाममाला**। अस्य कूर्परस्योर्ध्वे, प्रगण्यते प्रगण्ड्यते वा प्रगण्डो बाहुः। कूर्पस्याधः, प्रकुष्यते प्रकोष्ठ उपबाहुः, यत्कात्यः–प्रकोष्ठमन्तरं विद्यादरत्निमणिबन्धयोः ॥ ८० ॥ मणेर्बन्धोऽत्र मणिबन्धो भुजपाण्योः संधिः। तस्मादारभ्याकनिष्ठायाः करभः, करे भातीति आङभिविधौ (२।१।१३/६६७)। शेतेऽस्मिन्सर्वं शयः, शम इत्येके, **नाममाला** तूभयं पपाठ–पाणिः शमः शयो हस्त इति। पणन्तेऽनेन पाणिः। हस्तकरौ नानार्थे। मणिबन्धः पाणिमूले। तर्जयत्यनया तर्जनी। प्रदिशत्यवश्यं प्रदेशिनी ॥ ८१ ॥ अङ्गुं पाणिपादं लात्यङ्गुली। अङ्गौ तिष्ठत्यङ्गुष्ठः, सुपिस्थ इति (३।२।४/२१२६) कः, अम्बाम्बगोभूमीति (८।३।९७/२९१८) षत्वम्। अनामिका नामग्रहणायोग्या, ब्रह्मणोऽनया शिरश्छेदनादत एवास्यां पवित्रं क्रियते। कनिष्ठात्यल्पा। ता अङ्गुष्ठाद्याः पञ्चाङ्गुल्यः ॥ ८२ ॥ नास्ति खमस्य नखः, नञ्श्नान्नपादिति (६।३।७५/७७९) साधुः, न खनति याति वा। नखं राति नखरः, न खन्यते वा, डडरेकवका (रूनेर्डडरेकेकवका-

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh

2 A long span. ८४ अङ्गुष्ठ स-कनिष्ठे स्याद् वितस्तिर् द्वादशाङ्गुलः ।
3 The palm with extended fingers. पाणौ चपेट-प्रतल-प्रहस्ता विस्तृताऽङ्गुलौ ॥

1 Both such palms joined. ८५ द्वौ संहतौ संहतलः प्रतलौ वाम-दक्षिणौ ।
1 The palm bent. पाणिर् निकुब्जः प्रसृतिस्, तौ युतावञ्जलिः पुमान् ॥

1 A cubit. ८६ प्रकोष्ठे विस्तृत-करं हस्तो, मुष्ट्या तु बद्धया । 1 Both such palms joined.
1 A short cubit.
1 An intermediate one. स रत्निः स्यादरत्निस् तु निष्कनिष्ठेन मुष्टिना ॥

1 A fathom. ८७ व्यामो बाह्वोः स-करयोस् ततयोस् तिर्यगन्तरम् ।
1 The measure of a man's reach. ऊर्ध्व-विस्तृत-दोष्-पाणि-नृ-माने पौरुषं त्रिषु ॥

2 The throat.
3 The neck. ८८ कण्ठो गलो, ऽथ ग्रीवायां शिरोधिः कन्धरेत्यपि ।
1 One streaked with three lines. कम्बुग्रीवा त्रि-रेखा सा, ऽवटुर् घाटा कृकाटिका ॥
3 Back of the neck.

वाच्याः)। पुनर्नव कररुह इत्येके पेठुः। त्रिभुवनचरणत्वाभावः। कामाङ्कुशोऽपि। तर्जन्या युते तते प्रसारितेऽङ्गुष्ठे मध्यं, प्रादिश्यते प्रादेशः। मध्यमया युतेऽङ्गुष्ठे तते तालः, तल प्रतिष्ठायाम्। अनामिकया युते ततेऽङ्गुष्ठे, गोकर्णाकृतिर्गोकर्णः ॥८३॥ सह कनिष्ठया ततेऽङ्गुष्ठे वितस्तिः, वितस्यतीति। दिष्टिश्च। द्वादशाङ्गुल इति सिद्धस्यानुवादः, चप्यतेऽनेन चपेटः, चपेटाऽपि। प्रसृतं तलमस्य प्रतलः। प्रसृतो हस्तोऽस्य प्रहस्तः ॥ ८४ ॥ द्वौ प्रसृततलौ संहतौ सिंहतलाख्यौ, सिंहो हि मिलिताभ्यां चपेटाभ्यां हन्ति, संहतलो वा–इत्येके संहतं संघट्टं लातीति। संकुचितो हस्तस्तालादिना प्रस्रियत इति प्रसृतः प्रसृतिश्च। निकुब्ज इत्यपपाठः। प्रकुब्जस्त्वर्धप्रसृतिः। तौ युतौ प्रसृतौ पार्श्वश्लिष्टौ लौकिकोञ्जलिः, अङ्क्ते(अज्यते)ऽनेनेति, अज्यते जलमनेनेति नैरुक्ताः। नाट्ये तु–पताकाभ्यां तु हस्ताभ्यां संश्लेषादञ्जलिः स्मृतः ॥ ८५ ॥ बाहौ (प्रकोष्ठे) प्रसारितपाणौ हस्तश्चतुर्विंशत्यङ्गुलं मानम्। स हस्तः, रत्नेः। पुंस्त्वार्थो वा। रमन्तेस्मिन्मल्ला रत्निः, सह रत्न्या मुष्ट्या वर्तत इत्येके। नास्ति रत्निर्मुष्टिरस्यारत्निः, निष्क्रान्ता कनिष्ठास्मिन्निष्कनिष्ठो मुष्टिस्तेनोपलक्षितः स हस्तोऽरत्न्याख्यः ॥ ८६ ॥ व्यामीयते रज्ज्वाद्यनेन व्यमति वा व्यामः, स्वे स्वे पार्श्वे प्रसारितयोर्बाह्वोर्मध्यम्। ऊर्ध्वं विस्तृतो दोः पाणिश्च नुः पुंसो यत्र तन्मानमध्ये पौरुषं नाम मानम्, पुरुषोर्ध्वमानं तत्पौरुषमित्येके, पुरुषहरितभ्यामण् च (५।२।३।८ / १९३८) द्वादशाङ्गुलं तु पौरुषं छायामानम् ॥ ८७ ॥ कणति कण्टते वा कण्ठः। गिलति गलो गीर्वाग्रभागः। गृणाति गिरति वा ग्रीवा। शिरो धीयतेऽस्यां शिरोधिः। कं धारयति कंधरा, संज्ञायां भृतृवृजीति (३।२।४६ / २९६३) खच्। शंखाकृतिर्ग्रीवा कम्बुग्रीवाख्या, असौ त्रिवलया चेति। न वटत्यवति वावटुः। घटयति

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

7 Face. ८९ वक्त्राऽऽस्ये वदनं तुण्डमाननं लपनं मुखम् ।
5 The nose. क्लीबे घ्राणं गन्धवहा घोणा नासा च नासिका ॥

4 The lips. ९० ओष्ठाऽधरौ तु रदनच्छदौ दशनवाससी ।
1 The chin. 2 The cheeks. अधस्ताच् चिबुकं, गण्डौ कपोलौ, तत्-परा हनुः ॥ 1 The jaw.

4 Teeth. 2 The palate. 3 The tongue. 1 The corners of the mouth. ९१ रदना दशना दन्ता रदास्, तालु तु काकुदम् ।
रसज्ञा रसना जिह्वा, प्रान्तावोष्ठस्य सृक्किणी ॥

3 The forehead. 1 The eyebrows. ९२ ललाटमलिकं गोधिरूर्ध्वे दृग्भ्यां भ्रुवौ स्त्रियौ ।
1 Space between the eye-brows. कूर्चमस्त्री भ्रुवोर् मध्यं, तारकाऽक्ष्णः कनीनिका ॥ 1 Pupil of the eye.

8 An eye. ९३ लोचनं नयनं नेत्रमीक्षणं चक्षुरक्षिणी ।
5 A tear. दृग्-दृष्टी चाऽस्रु नेत्राम्बु रोदनं चाऽस्रमश्रु च ॥

घाटा । कृकं शिरोग्रीवमटति कृकाटिका ग्रीवापश्चाद्भागः ॥ ८८ ॥ उच्यतेऽनेन वक्त्रम् । अस्यतेऽस्मिन्नास्यम्, कृत्यल्युटोबहुलं ($\frac{३।३।११३}{२८४१}$) इति ण्यत्, मुखं मुखान्तरालं च द्वयमास्यमिति शाश्वतः (४८५) । उद्यतेऽनेन वदनम् । तुण्ड्यतेऽनेन तुण्डं, तुडि तोडने । अनिति श्वसित्यनेनाननम् । लप्यतेऽनेन लपनम् । खन्यतेऽनेन मुखं, डित्खनेर्मुट् स चोदात्तः (उ० ६९८), मुदितानि खान्यत्रेत्येके । जिघ्रत्यनेन घ्राणम् । घोणति भ्रमति गन्धाथ घोणा । नासते नासिका, कुल्या गन्धवहा घोणा घ्राणं नासा च नासिकेति मुनिः कुल्यामप्याह । सिद्धा [धि] णी च ॥ ८९ ॥ उष्यते तीक्ष्णाहारेणौष्ट इत्युभयार्थोपि—अधरसान्निध्यादुत्तरौष्ठेऽत्र वर्तते । अधो भवोऽधरः । ओष्ठाभ्यां सहितावधरौ वा, अधरोऽप्योष्ठमात्रे वर्तते । ओष्ठाधः, चीव्यते चिबुकं हन्वग्रसंधिः । गण्डति संहन्यते गण्डः । कम्पते कपोलः । तदधो गल्लः । तत्परस्तत्पश्चाद्भागे कपोलाधः, हन्त्याहारं हनुः, पुंस्यपि ॥ ९० ॥ रद्यते विलिख्यतेमीभी रदनाः । दश्यते दम्यते चामीभिर्दशना दन्ताश्च । रदन्ति लिखन्ति रदाः । तलत्याहारोऽस्मिंस्तालु । ईषत्कवते काकुं ददाति वा काकुदम् । रस्यतेऽनया रसना । लेढि जिह्वा । लोला च । घण्टिकान्तर्गलशुण्डिका । ओष्ठस्येति जातावेकवचनम् । सृजति लालां सृक्कि, सृक्कणी इत्यपि क्वचित्कन्नन्तत्वात् ॥ ९१ ॥ ललत्यत्रालंकारः, ललश्चटुलस्तिलकोऽटत्यत्र वा ललाटम् । अल्यते भूष्यतेऽलिकं, अलीकं च । गुध्यते पट्टादिना वेष्ट्यते गोधिः । भालं च । भ्रमति भ्रूः, नेत्रोर्ध्वे रोमराजिः । कूर्ममिति भागुरिः, तन्न, लक्ष्यादर्शनात्, एवं कूर्चम् । तारयति तमस्तारका, तारकाज्योतिषीतीत्वाभावः (वा० $\frac{४५३१}{जा३।४५}$) । अक्ष्ण इति खेचरीव्यवच्छेदः । (कनीनिका) कनी दीप्तौ ॥ ९२ ॥ लोच्यतेऽनेन लोचनं विलोचनं च । नीयतेऽनेन दृश्यं

CC-0. Agamnigam Foundation. Digitized by eGangotri, Chandigarh

1 The outer corners of the eyes.
९४ अपाङ्गौ नेत्रयोरन्तौ, कटाक्षो ऽपाङ्ग-दर्शने । 1 A glance or sidelook.
6 An ear.
कर्ण-शब्दग्रहौ श्रोत्रं श्रुतिः स्त्री श्रवणं श्रवः ॥

5 The head.
९५ उत्तमाङ्गं शिरः शीर्षं मूर्धा ना मस्तकोऽस्त्रियाम् ।
6 Hair.
चिकुरः कुन्तलो वालः कचः केशः शिरोरुहः ॥

2 Hair-collection of hair.
९६ तद्-वृन्दे कैशिकं कैश्यमलकाश् चूर्णकुन्तलाः । 2 Curls.
1 The same on the forehead.
ते ललाटे भ्रमरकाः, काकपक्षः शिखण्डकः ॥ 2 Locks, left at the tonsure.

2 A braid or tress.
1 Braided hair.
९७ कबरी केशवेशो, ऽथ धम्मिल्लः संयताः कचाः ।
3 A lock left on the crown of the head.
शिखा चूडा केशपाशी, व्रतिनस् तु सटा जटा ॥
2 An ascetic's clotted hair.

2 Unornamented hair.
९८ वेणिः प्रवेणी, शीर्षण्य-शिरस्यौ विशदे कचे ।
2 Clean and unentangled hair.
पाशः पक्षश् च हस्तश् च कलापार्थाः कचात् परे ॥
3 Much or ornamented hair.

नयनं नेत्रं च । ईक्ष्यतेऽनेनेक्षणम् । चष्टे व्यक्ति चक्षुः । अक्ष्णोत्यक्षि, द्वन्द्वाच्चक्षुः क्लीबे । दृश्यतेऽनया दृक्, द्वन्द्वात्स्त्रियाम् । अस्यतेऽस्रु, अस्रं च । अश्नुत आकण्ठमश्रु । बाष्पो नानार्थे ॥ ९३ ॥ बाह्याविति शेषः । अपकृष्टावङ्गादपाङ्गौ । कटे क्षिपति कटाक्षः, अपाङ्गेन दर्शनं यत्र, नेत्रविभागाख्यम् । कीर्यते शब्दोऽस्मिन्कर्णः । शब्दस्य ग्रहोऽनेन शब्दग्रहः । श्रूयतेऽनया श्रुतिः । शृणोति श्रवः, असन्तः क्लीबे । श्रोत्रं च ॥ ९४ ॥ शीर्यते जरसा शिरः । एवं कुमारशीर्षयोर्णिनिः (३।२।५१ / २९६८) इति लिङ्गाच्छीर्षं प्रकृत्यन्तरम् । मूर्च्छति मूर्धा, पुमान् । मस्यति परिणमते मस्तकम् । कं वराङ्गं च नानार्थे । चीयते चिकुरः, चिहुरः प्राकृतं कस्य हादेशात्, संस्कृतेऽपीति दुर्गः—कुन्तला मूर्धजाः स्वस्ताश्चिकुराश्चिहुराः कचा इति । कुन्ताकारं लाति कुणति वा कुन्तलः । वल्यते वालः, ज्वलादित्वाण्णो वा, ज्वलितिकसन्तेभ्योणः (३।१।१४० / २९०२) । कचति कचः । के शेते केशः । शिरसिजश्च ॥ ९५ ॥ केशानां समूहे, अचित्तहस्तिधेनोष्टक् (४।२।४७ / ९२५६), केशाश्वाभ्यां यञ्छावन्यतरस्याम् (४।२।४८ / ९२५७) । अल्यन्ते भूष्यन्तेऽलकाः । चूर्णकाख्याः केशाः (चूर्णकुन्तलाः), चर्चराख्याः । कुरलाश्च । भ्राम्यन्ति भ्रमरप्रतिकृतयो वा (भ्रमरकाः) । काकस्येव पक्षः । शिखेव डयते शिरसि खण्ड्यते वा शिखण्डकः । क्षत्रियाणां चूडा काकपक्ष इति गौडः ॥ ९६ ॥ कृष्णवर्णा, कं वृणोति वा कबरी, जानपदकुण्डगोणेति (४।२।४२ / ९००) ङीप् । वेषो रचना । संयता बद्धाः । उर्ध्वं मिलति धम्मिलो जूटाख्यः, धमिः सौत्रो वा । धम्मेर्ल इति सभ्याः । शेते मूर्ध्नि शीय (शय्य) ते वा शिखा, शीङोहस्वश्च (उ० ७०२) । चोड्यते चूडा । प्रशस्ताः केशाः केशपाशी । शिखेत्येव, (सटा) षट अवयवे । (जटा) जट संघाते ॥ ९७ ॥ (वेणिः) वेणृ गतौ । शिरसि भवः शीर्षण्यः, शरीरा-

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

3 Hair of the body.
1 The beard.
5 Dress or embellishment.

९९ तनूरुहं रोम लोम, तद्-वृद्धौ श्मश्रु पुम् मुखे ।
आकल्प-वेषौ नेपथ्यं प्रतिकर्म प्रसाधनम् ॥

5 Adorned.
2 Act of adorning.

१०० दशैते त्रिष्वलङ्कर्ताऽलङ्करिष्णुश् च, मण्डितः ।
प्रसाधितो ऽलङ्कृतश् च भूषितश् च परिष्कृतः ॥

3 Elegant.
5 Ornaments; jewels or trinkets.

१०१ विभ्राट् भ्राजिष्णु-रोचिष्णू, भूषणं स्यादलङ्क्रिया ।
अलङ्कारस् त्वाभरणं परिष्कारो विभूषणम् ॥

2 A crest.
3 A gem on the crest.

१०२ मण्डनं चाथ मुकुटं किरीटं पुन्-नपुंसकम् ।
चूडामणिः शिरोरत्नं, तरलो हार-मध्य-गः ॥
1 The middle gem of a string.

1 A trinkler for the hair.
2—for the ear.
2 An ear-ring.

१०३ वालपाश्या पारितथ्या, पत्रपाश्या ललाटिका ।—for the forehead.
कर्णिका तालपत्रं स्वात्, कुण्डलं कर्णवेष्टनम् ॥

वयवाच्च (५।१।६ / २१६६) इति यत्, ये च तद्धिते (६।१।६१ / २६६७) इत्यत्र वाकेशोष्विति (वा० ३४९३ / ६।१।६१) शिरसः शीर्षन् वक्तव्यः । विशदेऽन्योन्यासंपृक्ते—अविकृते स्नानादिनिर्मले वा, शद्लृ शातने । कचादित्यर्थनिर्देशः, केशपाशः, केशपक्षः, केशहस्तः, प्रशंसावचनैश्च (२।१।६६ / ७४७) इति समासः ॥ ९८ ॥ शिरसोऽन्यत्र रोहति रोम । रलयोरैक्याल्लोम, लूयते वा । पुरुषमुखे रोमवृद्धिः, समश्नुते स्मश्रु । दाढिकापि । व्यञ्जनं नानार्थे । आकल्प्यत आकल्पः । वेवेष्टयङ्गं वेषः, विशति चेतसीत्येके तालव्यं शमाहुः, कर्मवेशाद्यत् (५।१।१०० / २७६४) इत्यत्र तथा विचारात् । नेत्रयोः पथ्यं (नेपथ्यं) वस्त्रादिशोभा । प्रत्यङ्गं कर्म प्रतिकर्म । प्रसाध्यतेऽनेनाङ्गं प्रसाधनम् । पञ्चैकार्था इत्येके तच्चासत्, वेषो हि वस्त्रालंकारमाल्यप्रसाधनैरङ्गशोभा, प्रसाधनं तु समालम्भनं तिलकपत्त्रभङ्गादिना ॥ ९९ ॥ एते वक्ष्यमाणा रोचिष्णवताः । (अलंकरिष्णुः) अलंकृञ्निराकृञ्इति (३।२।१३६ / ३१।६) इष्णुच् । परिष्क्रियते स्म, संपर्युपेभ्यइति (६।१।१३७ / ३०५८) सुट् ॥ १०० ॥ भ्राजते तच्छीलो भ्राजिष्णुः, भुवश्च (३।२।१३८ / ३०५९) इति चाद् (भ्राजतेः) इष्णुच् । (अलंक्रिया) अलंकारसाध्या शोभा । करणे घञ्ल्युटौ ॥ १०१ ॥ मौलिनानार्थे । मुखे कुट्यते मुकुटं, मङ्क्यतेऽनेन वा (मुकुटं) । कीर्यते किरीटम् । कोटीरं च । मणिरिति शेषः, तरतीव तरलः । नायको नानार्थे ॥ १०२ ॥ वालपाशे साधुर्वालपाश्या, बालबन्धनार्थं मुक्तावलयः, उत्फुल्लतिकादि, वालेषु पाशसमूहो वा । परितस्तथा भवा पारितथ्या, पार्यां तथ्या वा, सीमन्तादिः । पत्त्रपाशानां समूहः पत्त्रपाश्या । ललाटस्यालंकारो ललाटिका, कर्णललाटात्कनलंकारे (४।३।६५ / २४४४) । कर्णालंकारस्तालपत्त्रवत्सौवर्णोऽपि । कुण्डं लाति वृत्तत्वात्कुण्डलम् । कर्णो वेष्टयतेऽनेन कर्णवेष्टनम् ।

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

2 A collar.
2 A necklace.
1 A golden one.
1 One of Pearls.

१०४ ग्रैवेयकं कण्ठभूषा, लम्बनं स्याल् ललन्तिका ।
स्वर्णैः प्रालम्बिका, ऽथोरःसूत्रिका मौक्तिकैः कृता ॥

2 A garland of pearls etc.

१०५ हारो मुक्तावली, देवच्छन्दो ऽसौ शत-यष्टिका ।
1 One composed of 100 strings.

Garlands of various sorts.

हार-भेदा—यष्टि-भेदाद् गुच्छ-गुच्छार्ध-गोस्तनाः ॥

1 A single string.
1 One containing 27 pearls.

१०६ अर्धहारो माणवक, एकावल्येक-यष्टिका ।
सैव नक्षत्रमाला स्यात् सप्तविंशति—मौक्तिकैः ॥

4 A bracelet.
2 Ornament of the arm.

१०७ आवापकः पारिहार्यः कटको वलयो ऽस्त्रियाम् ।
केयूरमङ्गदं तुल्ये, अङ्गुलीयकमूर्मिका ॥

2 A finger-ring.
1 A seal ring.
2 Ornament of the wrist.
5 A woman's girdle.

१०८ साऽक्षरा ऽङ्गुलिमुद्रा स्यात्, कङ्कणं करभूषणम् ।
स्त्री-कट्यां मेखला काञ्ची सप्तकी रशना तथा ॥

१०९ क्लीबे सारसनं चा ऽथ पुंस्-कट्यां शृङ्खलं त्रिषु । 1 A man's belt.

6 Ornament of the feet.

पादाङ्गदं तुलाकोटिर् मञ्जीरो नूपुरो ऽस्त्रियाम् ॥

भिन्नरूपास्त्रयः कर्णालंकारा इत्येके ॥ १०३ ॥ ग्रीवाया अलंकारो ग्रैवेयकं, कुलकुक्षिग्रीवाभ्य इति (४।२।१०६ / १३१६) ढकञ् । लडत्यलंकारान्ते ललन्तिका । सिंहावलोकितेन कृतेत्येव । स्वर्णमयी कण्ठभूषा प्रालम्बिकेत्येव ॥ १०४ ॥ ह्रियतेऽनेन चित्तं हारः । देवानां छन्दोऽभिप्रायोऽत्र । यष्टिर्लता सरः सरिरित्येकार्थाः, यदाहुः—चतुःषष्टिलतो हारोऽथाष्टहीना यथोत्तरम् । रश्मिः कलापो माणवकोऽर्धहारोऽर्धगुच्छकः । कलापच्छन्दो मन्दरश्च गुच्छः सप्ततियष्टिकः । अन्ये त्वाख्यन्—द्वात्रिंशल्लतो गुच्छो, गुह्याच्छादनात् । चत्वारिंशल्लतो गोस्तनो लम्बमानात्, गोपुच्छोऽपि ॥१०५॥ चतुःपञ्चाशल्लतोऽर्धहारो देवच्छन्दार्धत्वात् । विंशतिलयो माणवकोऽल्पत्वात् । एका—आवलते (अत्र), सैव—एकावली ॥ १०६ ॥ हस्तसूत्राख्यः, आ—उप्यत आवापकः । परिह्रियते परिहारे भवो वा पारिहार्यः । कटति कटकः । वलते वलयः । के बाहुशीर्षे यौति केयूरम् । अङ्गं दयतेऽङ्गदम् । अङ्गुल्यां भवमङ्गुलीयकं, जिह्वामूलाङ्गुलेश्छः (४।३।६२ / १४४२) स्वार्थ कन् । ऊर्मिप्रतिकृतिरूर्मिका ॥ १०७ ॥ अङ्गुल्या मोदयते मुद्रयति वाङ्गुलिमुद्रा, सा ऊर्मिका । आहुश्च—कङ्कणं स्यात्प्रतिसरः, कं शुभं कणति कङ्कते सरति वा । मीयते प्रक्षिप्यते मेखला । कच्यते बध्यते काञ्ची । सपति समवैति सप्तकी । रशन्ति तां (रशना), रश कान्तौ सौत्रः । सिञ्जिनी च । कलापो नानार्थे ॥ १०८ ॥ सारं सनोति सारसनं स्त्रीकट्यां वस्त्रग्रन्थनम् । उच्चयो नीवी च । पुंस्कट्यां या काञ्ची सा शृङ्खला शृङ्गैः खलतीति । पादेऽङ्गदमिव पादाङ्गदम् ।

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

2 Bells or tinkling ornaments.
1 Materials of cloth.

११० हंसकः पादकटकः, किङ्किणी क्षुद्रघण्टिका ।
त्वक्-फल-कृमि- रोमाणि वस्त्रयोनिर्, दश त्रिषु ॥

1 Made of bark.
3 Made of cotton.
1 Silken.
1 Woolen.

१११ वाल्कं क्षौमाऽऽदि, फालं तु कार्पासं बादरं च तत् ।
कौशेयं कृमिकोशोत्थं, राङ्कवं मृग-रोम-जम् ॥

4 New and unbleached cloth.
1 A pair of bleached cloth.

११२ अनाहतं निष्प्रवाणि तन्त्रकं च नवाम्बरे ।
तत् स्यादुद्गमनीयं यद् धौतयोर् वस्त्रयोर् युगम् ॥

1 Bleached silk.
2 Wove silk.
2 A veil or mantle.

११३ पत्रोर्णं धौत-कौशेयं बहु-मूल्यं महाधनम् । [1] Any thing precious.
क्षौमं दुकूलं स्याद्, द्वे तु निवीतं प्रावृतं त्रिषु ॥

2 Ends of a cloth.
3 Length.
2 Width.

११४ स्त्रियां बहुत्वे वस्त्रस्य दशाः स्युर् वस्तयो द्वयोः ।
दैर्घ्यमायाम आरोहः, परिणाहो विशालता ॥

2 Old cloth.
6 Cloth.

११५ पटच्चरं जीर्णवस्त्रं, सभौ नक्तक-कर्पटौ । [2] Dirty or tattered cloth.
वस्त्रमाच्छादनं वासश् चैलं वसनमंशुकम् ॥

तुलाकृतेर्जङ्घायाः कोटिरिव तुलाकोटिः । मञ्जु मधुरमीरयति मञ्जीरः । नुवति नूपुरः, णू स्तवने ॥ १०९ ॥ हंसवत्कायति हंसकः । अवान्तरभेदस्त्वेषां भरतोक्तो नादृतः । किञ्चित्क्वणति किंकणी, किंकिणीत्येके । क्षुद्राल्पा घण्टिका घुघुरकाख्या । ग्रहणकवाक्यमिदम् (त्वक्फलकृमिरोमाणीति) । त्वगादयो वस्त्रस्य योनिरुपादानकारणं, आविष्टलिङ्गत्वम् । वाल्कक्षौमफालकार्पासबादरकौशेयराङ्कवानाहतनिष्प्रवाणितन्त्रकाणि वाच्यलिङ्गानि ॥ ११० ॥ वल्कस्य त्वचो विकारो वाल्कम् । क्षुमाया विकारः क्षौमम् । आदिशब्दाद् भ (भा) ङ्गादि । फलस्य विकारः फालम् । कोशस्येदं कौशेयं नेत्रपट्टादि, कोशाड्ढञ् ($\frac{४।३।४२}{१४१७}$) । रङ्कुर्मृगविशेषः, कच्छादिभ्यश्च ($\frac{४।२।३३}{१३५७}$) इत्यण् ॥ १११ ॥ छेदः क्षालनं भोगश्चाहननं तद्रहितमनाहतम् । प्रोयतेऽस्यां प्रवाणी तन्तुवायशलाका सा निर्गतास्य (निष्प्रवाणि), निष्प्रवाणिश्च ($\frac{५।४।१६०}{८९७}$) इति साधुः । तन्त्रादचिरापहृते ($\frac{५।२।७०}{१८७०}$) इति कनि तन्त्रकः । उद्गम्यतेऽभिलष्यते- उद्गमनीयम् । युगमविवक्षितं, यल्लक्ष्यम्- गृहीतपत्युद्गमनीयवस्त्रेति (कु० सं० ७।११) ॥ ११२ ॥ लकुचवटादिपत्त्रेषु कृमिलालोर्णाकृतं पत्त्रोर्णम्, पृषोदरादित्वात् (समासः) । क्षुमाया विकारः क्षौमम् । दुह्यते क्षुमाया आकृष्यते दुकूलम् । निवीयत आच्छाद्यते निवीतम्, व्येञ् संवरणे, निवृतमिति मुनिः ॥ ११३ ॥ दश्यन्ते दशाः, पुंसीत्येके । वस्यते याभिस्ता वस्तयः, अच्छिन्नदशस्य वस्त्रस्याच्छादनान्नानात्, वर्तय इत्येके । आनह्यतेऽनेनानाहः, सर्वत्रेदम् । (परिणाहो विशालता) विस्ताराख्या ॥ ११४ ॥ पट इवाचरति पटति, सर्वप्राति-

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

2 Fine cloth.
2 Coarse cloth.
2 A cover or wrapper.

११६ सुचेलकः पटो ऽस्त्री स्याद्, वराशिः स्थूलशाटकः ।
निचोलः प्रच्छदपटः, समौ रल्लक-कम्बलौ ॥ 2 A blanket.

4 Lower garment.
5 Upper garment.

११७ अन्तरीयोपसंव्यान-परिधानान्यधोंऽशुके ।
द्वौ प्रावारोत्तरासङ्गौ समौ बृहतिका तथा ॥

2 A bodice.
1 A warm cloak.

११८ संव्यानमुत्तरीयं च, चोलः कूर्पासको ऽस्त्रियाम् ।
नीशारः स्यात् प्रावरणे हिमाऽनिल-निवारणे ॥

1 A petti-coat.
1 A dress reaching to the feet.

११९ अधोरुकं वर-स्त्रीणां स्याच् चण्डातकम-स्त्रियाम् ।
स्यात् त्रिष्वाप्रपदीनं तत् प्राप्नोत्याप्रपदं हि यत् ॥

2 An awning.
1 A tent.
3 A screen or wall of cloth.

१२० अ-स्त्री वितानमुल्लोचो, दूष्याऽऽद्यं वस्त्र-वेश्मनि ।
प्रतिसीरा जवनिका स्यात् तिरस्करिणी च सा ॥

पदिकेभ्यःक्विब्वा (वा० $\frac{१७२२}{२६६५}$) इत्येके, ततः शत्रन्ताद् भूतपूर्वेचरट् ($\frac{५।३।५३}{१९९९}$)। नक्तं भवो नक्तकः, नजतें वा, ओणजी व्रीडे, द्रवद्रव्यं येन पूयते तत्र रूढोऽयं तत्तुल्येऽपि वस्त्रे वर्तते। कल्पते कर्पटः। वस्यतेऽनेनाङ्गं वासः, असन्तं क्लीबे। चिल्यते चेलम्, चैलमित्यसत्, चिल वसने। अंशूंस्तन्तून्कायत्यंशुकम्। प्रोतः सिचयश्चीरं च ॥ ११५ ॥ पटति विस्तीर्यते पटम्, अस्त्रीति चिन्त्यं द्वयोर्दर्शनात्। वृणोत्यङ्गं वराशिः, ना पुंलिङ्गः। चत्वार एकार्था इत्येके। निचोल्यतेऽनेन निचोलः येन तूलशय्यादि प्रच्छाद्यते, चुलिः सौत्रश्चुडेर्लत्वं वा। रमतेऽस्मिन् रल्लकः। काम्यते कम्बलः, कम्वलः कमनीयो भवतीति निर्वचनात् ॥ ११६ ॥ अन्तरे भवमन्तरीयं, गहादित्वाच्छः ($\frac{४।२।१३८}{१३६२}$)। उपसंवीयतेऽनेनाङ्गमुपसंव्यानम्। प्राव्रियतेऽनेनाङ्गं प्रावारः, वृणोत्तेराच्छादने ($\frac{३।३।५४}{३२२९}$) घञ्। उत्तर ऊर्ध्वाङ्ग आसज्यत उत्तरासङ्गः। (बृहतिका) बृहत्याआच्छादने ($\frac{५।४।६}{२०७८}$) कन् ॥ ११७ ॥ संवीयतेऽनेन संव्यानम्। उत्तर ऊर्ध्वे भवमुत्तरीयम्। चोल्यते छाद्यतेऽनेन चोलः, आप्रपदीनं कञ्चुकम्। कूर्परेऽस्यते कूर्पासः स्त्रीणां कञ्चुलिकाख्यः। निशीर्यते शीताद्यनेन नीशारः, शृवायुवर्णनिवृतेष्विति (वा० $\frac{२१८५}{३१९१}$) घञ्, यल्लक्ष्यम्— गौरिवाकृतनीशारः प्रायेण शिशिरे कृशः (प. महा. ?) ॥ ११८ ॥ ऊर्वोरर्धाच्छादकमंशुकमधोरुकम्। चण्डं भगमतति चण्डातकं, यस्य चल्लनकोपभ्रंशः। पादाग्रं प्रपदं, आ प्रपदादाप्रपदं, आप्रपदं प्राप्नोति ($\frac{५।२।८}{१८०९}$) इति खः ॥ ११९ ॥ वितन्यते वितानः। उपरि लोच्यत उल्लोचः, उल्लोच्यतेऽपनीयतेऽनेनातपादि वा चंद्रकाख्यः। कदर्कोऽपि। दूष्यतेऽनेनान्यदर्शनं दूष्यम्। आद्यशब्दात्पटकुटी। पटकुडयं गुणशालि [लय] नी स्थूला [लं] च। प्रतिसिनोति प्रतिबध्नाति प्रतिसीरा। जवन्त्यस्यां जवनिका।

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

2 Embellishment of person.
3 Cleaning of it.
2 Cleaning with perfumes.
3 Perfuming.
2 Reviving a fragrancy.
2 Painting the person.
4 A circle on the fore-head.

१२१ परिकर्माऽङ्गसंस्कारः, स्यान् मार्ष्टिर् मार्जना मृजा ।
उद्वर्तनोत्सादने द्वे समे, आप्लाव आप्लवः ॥ 3 Bathing.

१२२ स्नानं, चर्चा तु चार्चिक्यं स्थासको, ऽथ प्रबोधनम् ।
अनुबोधः, पत्रलेखा पत्राङ्गुलिरिमे समे ॥

१२३ तमालपत्र-तिलक-चित्रकाणि विशेषकम् ।
द्वितीयं च तुरीयं च न स्त्रियामथ कुङ्कुमम् ॥

11 Saffron.

१२४ काश्मीरजन्माऽग्निशिखं वरं बाह्लीक-पीतने ।
रक्त-संकोच-पिशुनं धीरं लोहितचन्दनम् ॥

6 Lac.
2 Cloves.
3 A yellow fragrant wood.

१२५ लाक्षा राक्षा जतु क्लीबे यावो ऽलक्तो द्रुमामयः ।
लवङ्गं देवकुसुमं श्री-संज्ञमथ जायकम् ॥

तिरस्करोति छादयति तिरस्करिणी काण्डपटाख्या । क्वचित्–पर्यङ्किका परिकरः पर्यङ्कश्चावसक्थिका । अञ्चलं त्वंशुकान्ते नीवी सारसनमुच्चयः ॥ १२० ॥ मलपरिमार्जनार्थं क्रिया परिकर्म स्नानोद्वर्तनादि । मार्जनं मार्ष्टिः शुद्धिमात्रम्, वसेस्तिः(उ० ६१९) इति बाहुलकात्तिः, व्रश्चभ्रस्जेति (८।३।३६ / २९४१)षः, मृजेर्वृद्धिः (३।३।१०४ / ३२८१)। मृजेति षिद्भिदादित्वादङ् (३।३।१०४ / ३२८१) । उत्साद्यते मलोऽनेनोत्सादनम् । छद अपवारणे, उच्छादनमिति तु सभ्याः । (आप्लवः, आप्लवः) विभाषाऽिरुप्लुवोरिति (७।२।११४ / २४७३) वा घञ् । मज्जनं च ॥ १२१ ॥ चर्च्यतेऽनयाङ्गं चर्चा । चर्चिकायां चर्चने साधु चार्चिक्यं चन्दनादिना पुण्ड्रादि । तिष्ठत्यङ्गे स्थासकः । चर्चिक्यं त्वपभ्रष्टम् । अनुबोधः, यथा कस्तूरिकादेर्मद्यादिना । पत्त्राकृतिर्लेखा (पत्त्रलेखा) । (पत्त्राङ्गुलिः) द्राविडकादि (षु) लिङ्गादिभेदेन कपाले पत्त्रभङ्गः ॥ २२ ॥ तमालपत्त्राकृति कस्तूर्या ललाटे तमालपत्त्रम् । तिलकाकृति तिलकम् । चित्त्रकं नानावर्णम् । विशिनष्टि विशेषकम् । इत्थं तिलकभेदा एते, पर्यायत्वं त्वदूरविप्रकर्षात् । अत्र द्वितीयचतुर्थौ तिलकविशेषकौ पुंनपुंसकयोः । पुण्ड्रं च । कुं कौति कुङ्कुमम् ॥ १२३ ॥ अग्नेरिव शिखा केसरोऽस्याग्निशिखम् । वियते वरं, ग्रहवृद–इत्यप् (३।३।५८ / ३२३४) । वह्लिकदेशजं (वाह्लीकं), यद्रघोरुत्तरदिग्विजये–दुधुवुर्वाजिनः स्कन्धालग्नकुङ्कुमकेसरान् (र.४।६७)। पीतयत्यङ्गं पीतनम्। रञ्जनाद्रक्तम्,अत एवासृक्संज्ञम्। सकोचस्य पिशुनं सूचकम् । वीरं स्थिररागम् । लोहितं चन्दनमिव । वर्ण्यं च । घुसृणं देश्याम् ॥ १२४ ॥ लक्ष्यते लाक्षा । रक्षति देहं राक्षा, रातिलात्योर्वा । जायते जतु । यौति यावकः । न लजते स्म–अलक्तकः, अलति वा । द्रुमस्यामय इव निर्यासः ।

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh

7 A gallochum. १२६ कालीयकं च कालानुसार्यं चाथ समाऽर्थकम् ।
वंशिकाऽगुरु-राजार्ह-लोहं कृमिज-जोङ्गकम् ॥

A black kind. १२७ कालागुर्वगुरु स्यात् तु मङ्गल्या माल्लि-गन्धि यत् । 1 A very fragrant sort.
5 Resin. यक्षधूपः सर्जरसो राल-सर्वरसावपि ॥

2 Compounded perfume. १२८ बहुरूपो ऽप्यथ वृकधूप-कृत्रिमधूपकौ ।
4 Incense. तुरुष्कः पिण्डकः सिह्लो यावनो ऽप्यथ पायसः ॥

5 Terpentine. १२९ श्रीवासो वृकधूपो ऽपि श्रीवेष्ट-सरलद्रवौ ।
3 Musk. मृगनाभिर् मृगमदः कस्तूरी चाथ कोलकम् ॥

3 Bdellium. १३० कङ्कोलकं कोशफलमथ कर्पूरम-स्त्रियाम् ।
5 Camphor. घनसारश् चन्द्र-संज्ञः सिताभ्रो हिमवालुका ॥

4 Sandal wood. १३१ गन्धसारो मलयजो भद्रश्रीश् चन्द्रनो ऽस्त्रियाम् ।
Varieties of sandal wood. तैलपर्णिक-गोशीर्षे हरिचन्दनम-स्त्रियाम् ॥

धन्वन्तरिस्तु–लाक्षा पलंकषा राक्षा दीप्तिश्च कृमिजं जतु । कृतघ्नानङ्गमाता च द्रुमव्याधिरलक्तकः (ध. ३।८०)॥ लूयते लवंङ्गम् । देवद्युतिमत्कुसुमं देवानां वा । (श्रीसंज्ञं) श्रीपर्यायम् । (जायकं जायकाख्यपर्वतभवम् ॥१२५॥ (कालीयकं) कालवर्णसारम् । वंशाभं वंशकम्, वंशिकेत्येके । न गुरु–अगुरु । कालागुरु काकतुण्डाख्यम् । रोहति लोहम् । कृमिभिर्जन्यते कृमिजम् । जोङ्गक गिरिजम् । आहुश्च–अगुरुप्रवरं लोहं कृमिजगन्धमनार्यजमिति शाश्वतः (?) ॥ १२६ ॥ मल्लिकापुष्पगन्ध्यगुरु मङ्गल्याख्यम् । यक्षान्धूपयति यक्षधूपः । सर्जवृक्षस्य रसः सर्जरसः । राति प्रीतिं रालः, रालाऽपि ॥ १२७ ॥ बहुरूपो नानाकृतिगन्धः । वृकान्धूपयति वृकधूपः । तुरुष्को यवनदेशजः । पिण्डको द्रव्यान्तरैः सह पिण्डितः स्वरूपान्न च्यवते । सिह्लाख्यो वृक्षः, पिल उच्छे, सुगन्धिप्रस्तावात्पुनरिहोक्तः । पयसो द्रुमक्षीरस्य विकारः स्रुतिः पायसः ॥ १२८ ॥ श्रिया वासो वेष्टश्च निर्यासः, वेष्टते वेष्टः । सरलस्य देवदारुभेदस्य द्रवो निर्यासः । विकसति सौगन्ध्यमस्याः कस्तूरी, के स्तूयते वा । कोलमिव कोलकम् ॥ १२९ ॥ ककन्ते कक्, (ककं) कोलति संस्त्यायति कक्कोलकम् । कोशे फलान्यस्य कोशफलम् । कल्पते कर्पूरः । घनस्येव सारोऽस्य शैत्यात् सिताभ्रत्वाच्च । चन्द्रपर्यायो ह्लादकत्वात् । हिमा शीतला चासौ वालुका च हिमवालुका ॥ १३० ॥ भद्रा श्रीरस्य । चन्द्यते ह्लाद्यतेऽनेन चन्दनम् । तैलपर्णगोशीर्षौ गिरी आकरावस्य । हरेरिन्द्रस्य चन्दनं,

क्षीरस्वामी is nearer to tradition about जायक and जोंगक, तैलपर्ण and गोशीर्ष

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

5 Red sanders. १३२ तिलपर्णी तु पत्राङ्गं रञ्जनं रक्तचन्दनम् ।
2 Mace. कुचन्दनं चाथ जातीकोश-जातीफले समे ॥

1 Perfumed paste. १३३ कर्पूराऽगुरु-कस्तूरी-कङ्कोलैर् यक्षकर्दमः ।
4 Perfume for the person. गात्रानुलेपनी वर्तिर् वर्णकं स्याद् विलेपनम् ॥

2 Powder. १३४ चूर्णानि वासयोगाः स्युर्, भावितं वासितं त्रिषु ।
2 Perfumed. संस्कारो गन्ध-माल्याऽऽद्यैर् यः स्यात् तदधिवासनम् ॥
1 Adjusting with perfumes.

3 A chaplet. १३५ माल्यं माला-स्रजौ मूर्ध्नि, केश-मध्ये तु गर्भकः । 1 One worn in the hair.
1 One suspended from the middle lock. प्रभ्रष्टकं शिखा-लम्बि, पुरो-न्यस्तं ललामकम् ॥
1 Or falling over the forehead.

1 Or hung round the neck. १३६ प्रालम्बमृजु-लम्बि स्यात् कण्ठाद्, वैकक्षिकं तु तत् ।
1 Or worn as a scarf.
यत् तिर्यक् क्षितमुरसि, शिखास्वापीड-शेखरौ ॥

2 completion or fullness. १३७ रचना स्यात् परिस्यन्द, आभोगः परिपूर्णता । 2 Or tied on the crown.
2 A pillow. उपधानं तूपबर्हः, शय्यायां शयनीय-वत् ॥
3 A bed.

हरि कपिलं वा, तच्चातिशीतलं पीतमाहुः । श्रीखण्डं च ॥१३१॥ तिलस्येव पर्णान्यस्याः तिलपर्णी नदी–आकरोऽस्या इत्येके । पत्त्रेष्वङ्गति पत्त्राङ्गम् । पतङ्गं च पत्त्राङ्गापभ्रंशोऽयम् । (कुचन्दनं) कौ चन्दनम् । जातीलतायाः कोशं जातिसस्याख्यम् ॥१३२॥ एतैः पिण्डीकृतैर्यक्षप्रियः पङ्कः । सकुङ्कुमैरित्यागमः, धन्वन्तरिस्तु–कुङ्कुमागुरुकस्तूरीकर्पूरं चन्दनं तथा । महासुगन्धमित्युक्तं नामतो यक्षकर्दमः (घ. ७।२५) ॥ द्वौ द्वौ भिन्नार्थावित्येके । वर्तिर्हि नटादौ प्रसिद्धा ॥ १३३ ॥ चूर्णं पटवासादिक्षोदः । वास्यते सुगन्धीक्रियते यैर्युज्यमानैर्मिश्रैस्ते वासयोगाः । भाव्यते मील्यते भावितं, भुवोऽवकल्कने (धा. सू. १७४८); णिच् । वास्यते छाद्यते स्म, वसूस्नेहच्छेदापहरणेषु (धा. सू. १७४५) । गन्धद्रव्यैर्भावितं पुष्पाद्यैर्वासितमित्येके । संस्कारस्तिलादीनां गुणाधानम् । आद्यशब्दाद्धपादिभिः । मालैव माल्यं, चातुर्वर्ण्यादित्वात्ष्यञ् (चतुर्वर्णादीनांस्वार्थउपसंख्यानम्) । माल्यते धार्यते माला । सृज्यते स्रक्, ऋत्विग्दधृगिति (३।२।५९/३७३) साधुः । माल्यमित्येव, गर्भस्थत्वाद्गर्भकः । माल्यमित्येव, मध्यात्प्रभ्रष्टकम् । ललत्यग्रे ललामकं मुण्डमालाख्यम् ॥१३५॥ कण्ठाद्वक्षस्यवलम्बमानं माल्यं प्रालम्बम् । विकक्षायां भवं वैकक्षकं, यज्ञोपवीतन्यायेन माल्यम् । माल्यमित्येव, आपीड्यत आपीडः । शेते शिरसि शेखरः । उत्तंसोऽपि ॥१३६॥ शिल्पादिना रचना, अन्यापि । आभुज्यतेऽनेनाभोगः । उपधीयतेऽस्मिन् शिर उपधानम् । उपबृह्यतेऽनेनोपबर्हते वा–उपबर्हः शिरोनिवेशनम् । शेरतेऽत्र शय्या, संज्ञायां समजेति क्यप् (३।३।९३/३२७६) (शयनीयं)

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

4 A bedstead. १३८ शयनं, मञ्च-पर्यङ्क-पल्यङ्काः खट्वया समाः । 2 Decoration of hair.
2 A ball to play with. गेन्दुकः कन्दुको, दीपः प्रदीपः, पीठमासनम् ॥
2 A lamp.

2 A chair or stool. १३९ समुद्गकः संपुटकः, प्रतिग्राहः पतद्ग्रहः ।
2 A casket.
2 A spitting pot. प्रसाधनी कङ्कतिका, पिष्टातः पटवासकः ॥
2 A comb. 2 Perfumed powder.

3 A mirror. १४० दर्पणे मुकुराऽऽदर्शौ, व्यजनं तालवृन्तकम् ।
2 A fan.

इति नृवर्गः ६, अत्र मूलश्लोकाः १३९ ॥, क्षे. श्लो. १.

अथ ब्रह्म-वर्गः ७

9 Race or lineage. १ संततिर् गोत्र-जनन-कुलान्यभिजनाऽन्वयौ ॥
वंशोऽन्ववायः संतानो, वर्णाः स्युर् ब्राह्मणाऽऽदयः ॥

1 Tribes or classes. २ विप्र-क्षत्रिय-विट्-शूद्राश् चातुर्वर्ण्यमिति स्मृतम् ॥
2 Sprung from any family. राजबीजी राजवंश्यो, बीज्यस् तु कुलसंभवः ॥
2 Sprung from a royal house.

कृत्यल्युटो बहुलम् (३।३।११३) इत्यधिकरणेऽनीयर् । तूलिकापि ॥ १३७ ॥ मञ्चते धार्यतेऽनेन मञ्चः । पर्यङ्क्यते पल्यङ्कः, परेश्चघाङ्कयोरिति (८।२।२२) वा लत्वम् । खट्त्येनां श्रान्तः खट्वा । गाते गाः, गच्छन्निन्दुको गुडको गेन्दुकः, गिन्दुक इत्येके, (गे) गगने—इन्दुरिवेति वा । कन्द्यतेऽर्थ्यते क्रीडार्थिभिः कन्दुकः, कं शिरो दुनोति वा नमनोन्नमनेक्षणात् । वीटा भारते । च्युतादानक्रीडायां गुलिका गिरिकश्च तौ । (प्रदीपः) प्रः स्वार्थे मेरुसुमेरुवत् । (कज्जलध्वजः, दशेन्धनो गृहमणिः स्नेहाशश्च)। पीयत उपवेशनेन ग्रस्यते पीठम् ॥ १३८ ॥ समुद्यते समुद्गच्छति वा समुद्गकः । संपुट्यते श्लेष्यते संपुटकः, भूषणाद्यावपनम् । प्रतिगृह्णात्याविलकादि प्रतिग्राहः, विभाषा ग्रहः (३।१।१४३) इति णः । पतद् गृह्णाति पतद्ग्रहः । कर्षण्याख्या, प्रसाध्यन्तेऽनया केशाः । कङ्कते कङ्कती, कङ्कान्दन्तांस्तनोति वा । पिष्टेन कुङ्कुमचूर्णादिनातति पिष्टातः । पटो वास्यतेऽनेन पटवासः ॥ १३९ ॥ दृप्यन्त्यनेन सुवेषा । दर्पणः । मङ्क्यते मण्ड्यतेऽनेन मु (म)कुरः । आदृश्यते रूपमस्मिन्नादर्शः । आत्मदर्शोऽपि । व्यजति वातोऽनेन विक्षिप्यते वा व्यजनम्, तालस्येव वृन्तमस्य तालवृन्तम् तालस्य वृन्तैरुभ्यत इत्येके (तालवृन्ताभाऽस्त्यस्येत्येके) ॥१४०॥ इति नृवर्गः । ६ ।

संतन्यतेऽनया संततिः । गूयते जन्यते कुल्यते वानेन । अन्वीयतेऽन्वयः । वश्य (न्य)ते जन्यते वंशः । अन्ववैत्यन्ववायः । व्रियन्ते वर्ण्यन्ते वा वर्णाः ॥ १ ॥ चत्वार एव वर्णाः, स्वार्थे ष्यञ् (चतुर्वर्णादीनां स्वार्थउपसंख्यानम्) । राजबीजमस्यास्ति

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

6 Of honourable parentage.
1 The four orders.
1 An order, or religious state.

३ महाकुल-कुलीनाऽऽर्य-सभ्य-सज्जन-साधवः ॥
ब्रह्मचारी गृही वानप्रस्थो भिक्षुश् चतुष्टये ॥
४ आश्रमो ऽस्त्री, द्विजात्यग्रजन्म-भूदेव-वाडवाः ॥

6 A man of the sacerdotal tribe.
1 One, practising the six-allowed acts.

विप्रश् च ब्राह्मणो, ऽसौ षट्कर्मा यागाऽऽदिभिर् वृतः ॥

22 Wise or learned.

५ विद्वान् विपश्चिद् दोषज्ञः सन् सुधीः कोविदो बुधः ॥
धीरो मनीषी ज्ञः प्राज्ञः संख्यावान् पण्डितः कविः ।
६ धीमान् सूरिः कृती कृष्टिर् लब्धवर्णो विचक्षणः ॥

2 A priest conversant with scripture.

दूरदर्शी दीर्घदर्शी, श्रोत्रियच्छान्दसौ समौ ।

राजबीजी । राजवंशे साधुर्भवो वा राजवंश्यः । बीजे साधुर्भवो वा यथा, सूर्यबीज्यो रामः, यत्प्रकरणे–अन्येभ्योऽपि दृश्यते (वा० ५।३।१२०) ॥ २ ॥ कुलस्यापत्यं कुलीनः । आरात्पापकेभ्यः कर्मभ्यो यात आर्यः, अरणीयो गम्यो वा । सभायां साधुः सभ्यः । संश्चासौ जनश्च सज्जनयते वा सज्जनः । साध्नोति परकार्यं साधुः । आमुष्यायणोऽमुष्यपुत्रश्च । ब्रह्म वेदा ब्रह्म तपो ब्रह्म ज्ञानं च शाश्वतं, तच्चरत्यर्जयत्यवश्यं ब्रह्मचारी वर्णी । गृही गृहमेधी गृहाश्रमी ज्येष्ठाश्रमी । प्रतिष्ठन्तेऽस्मिन्प्रस्थः, वनप्रस्थे भवो वानप्रस्थो वैखानसाख्यः । भिक्षते तच्छीलो भिक्षुर्यतिः, सनाशंसभिक्ष उः (३।२।८०) । अस्मिंश्चतुष्के, आश्राम्यन्ति तपस्त्यन्त्यस्मिन्नाश्रमं प्रत्येकं वर्तते ॥३॥ मातुर्यदग्रे जननं द्वितीयं मौञ्जीबन्धनादिति-द्विजातिः । अग्रे–आदौ–अग्रान्मुखाद्वा जन्माऽस्य, यच्छ्रुतिः–ब्राह्मणोऽस्य मुखमासीत् (ऋ. १०।९०।१२) । वाडव इवातृप्तः । विशेषेण प्राति पूरयति विप्रः विपाति विपति पापं वा विप्रः, विप क्षेपे । ब्रह्मणोऽपत्यं ब्राह्मणः । जातिमात्रोपजीवी स्याद्विप्रस्तु ब्राह्मणब्रुवः । षट् कर्माणि ब्राह्मणस्य–अध्ययनमध्यापनं यजनं याजनं दानं प्रतिग्रहश्चेति (म.१।८८) ॥ ४ ॥ वेत्ति विद्वान्, विदेःशतुर्वसुः (७।१।३६) । विपश्यं-श्चिन्तयते विपश्चित् । दोषाज्ञानाति ज्ञात्वा जह्यादिति दोषज्ञः । सन् विद्यमान उत्तम इत्यर्थः, अन्ये ह्यसत्कल्पाः । शोभनं ध्यायति सुधीः, अन्येभ्योऽपि दृश्यते (३।२।१७८) इति क्विप् संप्रसारणं च । ओकः स्थानं वेत्ति कोविदः, कुङ् शब्देऽस्माद्वा । धियमीरयति धीरः । मनस ईष्टे, मनीषास्त्यस्य वा मनीषी । जानातीति ज्ञः, इगुपधेति (३।१।१३५) कः । प्रज्ञ एव प्राज्ञः, प्रज्ञादिभ्यश्च (५।४।३८) इत्यण्, प्रज्ञास्त्यस्य वा, प्रज्ञाश्रद्धेति (५।२।१०१) णः । सम्यक् ख्यानं ज्ञानमस्त्यस्य संख्यावान् संख्या विचारणा वा, पण्डते जानाति पण्डितः पडि गतौ, सर्वे गत्यर्था ज्ञानार्था इति, पण्डा धीः संजाताऽस्य वा । कवते वर्णयति कविः, कविताऽपि ॥५॥ सुवति सूरिः । कृतमस्यास्तीति कृती कृतकृत्यः । कर्षति विविङ्क्ते कृष्टिः । लब्धं वर्णनं प्रसिद्धिर्येन

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

2 Mimansaka.
2 Brahmavadin.
2 Vaisheshika.
2 Buddha.
2 Logicians.
2 Jain.
2 Nihilist.
3 Sankhyas.

'मीमांसको जैमिनीये, वेदान्ती ब्रह्मवादिनि ॥१॥
वैशेषिके स्यादौलूक्यः, सौगतः शून्यवादिनि' ।
'नैयायिकस्त्वक्षपादः स्यात्, स्याद्वादिक आर्हकः ।
चार्वाक-लौकायतिकौ, सत्कार्ये सांख्य-कापिलौ' ॥२॥

2 Teacher.
1 A spiritual parent
1 An instructor in holy writ.

७ उपाध्यायोऽध्यापको,ऽथ स्यान् निषेकाऽऽदि-कृद् गुरुः ।
मन्त्र-व्याख्या-कृदाचार्य, आदेष्टा त्वध्वरे व्रती ॥ 3 Sacrificer.

2 Sacrificer in soma.
2 One who sacrifices in due form.

८ यष्टा च यजमानश् च, स सोमवति दीक्षितः ।
इज्याशीलो यायजूको, यज्वा तु विधिनेष्टवान् ॥
One who frequently sacrifices.

1 Who does so in a certain form.

९ स गीष्पतीष्टया स्थपतिः, सोमपीथी तु सोमपाः ।
2 Who has drunk the juice of acid Asclepias.

1 Who has bestowed all his wealth.

सर्ववेदाः स येनेष्टो यागः सर्व-स्व-दक्षिणः ॥

लब्धवर्णः । विचष्टे विचक्षणः । (दूरदर्शी) अप्रत्यक्षमूहत इत्यर्थः । (श्रोत्रियः) श्रोत्रियंश्छन्दोऽधीते ($\frac{५।२।८४}{१८८४}$) श्रोत्राभ्यां कृतकर्मेति । छन्दोऽधीते छान्दसः ॥६॥ उपेत्याधीयतेऽस्मादुपाध्यायः, इङश्चेति ($\frac{३।३।२१}{३१९१}$) घञ् । गृणात्युपदिशति गुरुः, यन्मनुः–निषेकादीनि कर्माणि यः करोति यथाविधि । संभावयति चान्नेन स विप्रो गुरुरुच्यते (म. २-१४२) ॥ निषेको गर्भाधानविधिः । आदिशब्दात्पुंसवनसीमन्तोन्नयनजा । तकर्मनामकरणान्नप्राशनचौडोपनयनादीनि । आचरणीयः सेव्य आचार्यः आचारं ग्राहयतीति नैरुक्ताः, मन्त्र (व्याख्या) कृद्वेदाध्यापनाद्विशिष्टाख्याकृदुपनयनेन द्विजत्वापादनात्, यदाह–उपनीय तु यः शिष्यं वेदमध्यापयेद् द्विजः । संकल्पं सरहस्यं च तमाचार्यं प्रचक्षते (मनु २–१४०) ॥ स्वाम्येनादिशत्यादेष्टा, आदिष्टीति पाठे–आदिष्टमनेनेति, इष्टादिभ्यश्च ($\frac{५।२।८८}{१८८८}$) इतीनिः, क्तस्येन्विषयस्यकर्मण्युपसंख्यानात् (वा० $\frac{१४८५}{६३३}$) सप्तमी । व्रती सनियमः ॥ ७ ॥ यजते यजमानः, पूङ्यजोःशानन् ($\frac{३।२।१२८}{३१०८}$) । स व्रती सोमवत्यध्वरे दीक्षिताख्यः, दीक्षा संजातास्येति । सोमपानग्निष्टोमादिक्रतुः, यद् गौतमः–अग्निष्टोमोऽत्यग्निष्टोम उक्थ्यः षोडशी वाजपेयोऽतिरात्रोऽप्तोर्याम इति सोमसंस्था । यजनमिज्या, व्रजयजोर्भावे क्यप् ($\frac{३।३।९८}{३२७५}$) । अत्यर्थं यजति तच्छीलो यायजूकः, यजजपदशां यङः ($\frac{३।२।१६६}{३१४६}$) इत्यूकः । (यज्वा) सुयजोर्ङ्वनिप् ($\frac{३।२।१०३}{३०९१}$) ॥ ८ ॥ स यज्वा बृहस्पतिसवनहेतुना, स्थापयतीति स्थपतिः । पानं पीथः, पातृतुदिवचीतिथक् (उ० १६४), घुमास्थेतीत्वम् ($\frac{६।४।६६}{२४६२}$), सोमपीती तु प्राच्याः पेठुः । सर्वदायं,

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

1 Who is completely learned.
1 Who has taken leave of his preceptor.

१० अनूचानः प्रवचने साऽङ्गे ऽधीती, गुरोस् तु यः ।
लब्धाऽनुज्ञः समावृत्तः, सुत्वा त्वभिषवे कृते ॥

1 Who has made ablutions.

3 A pupil.
1 Novices.
1 Fellow students.

११ छात्राऽन्तेवासिनौ शिष्ये, शैक्षाः प्राथमकल्पिकाः ।
एक-ब्रह्म-व्रताऽऽचारा मिथः सब्रह्मचारिणः ॥

1 Spiritual brethren.
2 Traditional instruction.

१२ सतीर्थ्यास् त्वेक-गुरवश्, चितवानग्निमग्निचित् ।
पारम्पर्योपदेशे स्यादैतिह्यमितिहाऽव्ययम् ॥

1 Chayana Sacrificer.

1 Untaught knowledge.
7 A sacrifice.

१३ उपज्ञा ज्ञानमाद्यं स्याज्ज्ञात्वा ऽऽरम्भ उपक्रमः ।
यज्ञः सवो ऽध्वरो यागः सप्ततन्तुर् मखः क्रतुः ॥

1 Deliberate commencement.

दीक्षितस्तु तत्कालम् । सर्वं विन्दत्यस्मात्सर्ववेदाः, असुन् ॥ ९ ॥ अनुक्तवान्, उपेयिवाननाश्वाननूचानश्च (३।२।१०९/३०९८) इति कानचि साधुः । प्रोच्यते प्रवचनं वेदः । अधीतमनेनाधीती, इष्टादिभ्यश्च (५।२।८८/१८८८) इतीनिः, उक्तस्येन्विषयस्यकर्मण्युपसंख्यानात्सप्तमी (वा० १४८५/६३३) । अधीत्य गुर्वाज्ञया गुरुगृहाद्यः समावर्तते स समावृत्तः – स्नातकाख्यः, गुरुगेहादनावृत्तस्नातको हि न कथ्यते ॥ सुनोति सुत्वा सुयजोर्ङ्वनिप् (३।२।१०३/३०९१) । अभिषवः सोमकुट्टनसंधानम् ॥१०॥ छत्रमेव शीलमस्य छात्रः, छत्रादिभ्यो णः (४।४।६२/१६१२), छात्रेण गुरुसेवा लक्ष्यते । गुरोरन्ते वसत्यन्तेवासी-शयवासवासिष्विति (६।३।१८/९७६) सप्तम्या अलुक् । शासनीयः शिष्यः । शिक्षायां-भवाः शैक्षाः । प्रथमकल्प आद्यारम्भः प्रयोजनमेषां तमधीयते वा प्राथमकल्पिकाः । तुल्यवेदास्तुल्यव्रतास्तुल्याचाराश्चान्योन्यं, समानं ब्रह्म चरन्ति सब्रह्मचारिणः, ब्रह्म वेदा ब्रह्म तपो ब्रह्म ज्ञानं च शाश्वतमिति, एकस्मिन्वेदे व्रतमाचरन्ति वा व्रते (३।२।८०) इति णिनिः, चरणेब्रह्मचारिणि (६।३।८६/२०१४) इति समानस्य सः ॥ ११ ॥ (सतीर्थ्याः) समानतीर्थेवासी (४।४।१०७/१६५८) इति यत्, तीर्थेये (६।३।८७/१०१५) इति सत्वम् । तरन्त्यनेनाविद्यां तीर्थं गुरुः । अग्निचिदाहिताग्निः, अग्नौ-चेरिति (३।२।९१/३००१) क्विप् । इत्येवं ह किलेति मुखपारंपर्य स्थितमितिह, ततः स्वार्थपक्षे, अनन्तावसथेतिहभेषजाञ्ज्यः (५।४।२३/२०९१) ॥१२॥ उपज्ञायत इत्युपज्ञा, इदं प्रथमतया ज्ञानं चन्द्रस्योपज्ञा चन्द्रोपज्ञसंज्ञकं व्याकरणम् । उपज्ञाय–आरम्भणमुपक्रमः, यत्कात्यः–यस्मात्प्रवृत्त आरम्भः स उपक्रमः, नन्दस्योपक्रमः–नन्दोपक्रमाणि मानानि, उपज्ञो-पक्रमंतदाद्याचिख्यासायाम् (२।४।२१/८३४) इति नपुंसकत्वम् । इज्यते यज्ञः, यजया-चेति (३।३।९० / ३२२६८) नङ् । सूयते सोमोऽस्मिन्सवः । अध्वानं रात्यध्वरः, न ध्वरति वा, ध्वृ हूर्छने । सप्ततन्तुः सप्तभिश्छन्दोभिस्तन्यत इति । मखति धर्मं मखः । क्रियते

CC-0. Agamnigam Foundation. Digitized by eGangotri, Chandigarh

1 The great sacraments.
१४ पाठो, होमश्, चाऽतिथीनां सपर्या, तर्पणं, बलिः ।
एते पञ्च महायज्ञा ब्रह्मयज्ञाऽऽदि-नामकाः ॥

9 An assembly or meeting.
१५ समज्या परिषद् गोष्ठी सभा-समिति-संसदः ।
1 A room in front of the offerings.
आस्थानी क्लीबमास्थानं स्त्री-नपुंसकयोः सदः ॥

1 By-standers.
१६ प्राग्वंशः प्राग्घविर्-गेहात्, सदस्या विधि-दर्शिनः ।
4 Members of the assembly.
सभासदः सभास्ताराः सभ्याः सामाजिकाश् च ते ॥

1 Reciters of the prayers.
१७ अध्वर्यूद्गातृ-होतारो यजुः-साम-र्ग्-विदः क्रमात् ।
2 Officiating priest.
आग्नीध्राऽऽद्या धनैर् वार्या ऋत्विजो याजकाश् च ते ॥

1 The altar.
2 Sacrificial ground.
१८ वेदिः परिष्कृता भूमिः, समे स्थण्डिल-चत्वरे ।
2 A ring on the post.
1 An enclosure.
चषालो यूपकटकः, कुम्बा सुगहना वृतिः ॥

क्रतुः ॥ १३ ॥ स्वाध्यायो ब्रह्मयज्ञः, होमो देवयज्ञः, अतिथिपूजनं नृयज्ञः, तर्पणं श्राद्धाख्यं पितृयज्ञः, बलिर्भूतयज्ञः, यन्मनुः—अध्याप (य) नं ब्रह्मयज्ञः पितृयज्ञस्तु तर्पणम् । होमो दैवो बलिर्भौतो नृयज्ञोऽतिथिपूजनम् (म. ३।७०) ॥१४॥ समजन्ति मिलन्त्यस्यां समज्या, संज्ञायां समजनिषदेति (३।३।९९ / ३२७६) क्यप् । परिषीदन्त्यस्यां परिषद्, पर्षच्च । गावो नानोक्तयस्तिष्ठन्त्यस्यां गोष्ठी । सह भान्त्यस्यां सभा । संयन्त्यस्यां समितिः । संसीदन्त्यस्यां संसद् । आतिष्ठन्त्यस्यामास्यामास्थानी । सीदन्त्यस्मिन् सदः, असुन्, सान्तः क्लीबे ॥१५॥ साधवः, वंशकुलं स्थूणा वा प्राग्वंशोऽत्र । प्राग्वंशः पत्नीशालाख्योऽग्निशालायाः प्राग्यो भागः । सदसि ऊनाधिकजागरूका ऋत्विग्भेदाः सदस्याः । सभायां सीदन्ति सभासदः । सभां स्तृण्वन्ति सभास्ताराः । समाजं समवयन्ति सामाजिकाः, समवायान्समवैतीति (४।४।४३ / १५९१३) ठक् । पार्षद्याः परिषद्याः सभाशूराश्च ॥ १६ ॥ ऋत्विज इत्येव । अध्वरं याति न ध्वरति वाध्वर्युर्नामर्त्विग्विशेषः, स यजुर्वित्कठः स्यात् । उद्गायत्युद्गाता छन्दोगः स्यात् । जुहोति होता बह्वृचः स्यात् । अग्नीनिन्द्धेऽग्नीद्, तस्य (अग्नीधः) शरणमाग्नीध्रः, अग्नीधःशरणेरञ्भंच (वा० ३।१।११ / १५००) इति रञ् आद्यशब्दात्पोतृप्रशास्तृब्राह्मणाच्छंस्यच्छावागूग्रावस्तुद्ब्रह्ममैत्रावरुणप्रतिप्रस्थातृप्रतिहन्तृनेष्टृनेतृसुब्रह्मण्याः । इत्थं सदस्याः सप्तदशर्त्विजः । एतिग्तुशास्वृदृजुषइति (३।१।९०९ / २८७७) वृञो ग्रहणाद् वृङोऽपि, व्रियन्त इति वार्याः, ऋहलोर्ण्यत् (३।१।१२४ / २८७३) वृताः कुर्वन्ति ये यज्ञमृत्विजस्त इति कात्यः । ऋतौ यजतीति ऋत्विक्, ऋत्विगुदधृगिति (३।२।५९ / ३७३) साधुः ॥ १७ ॥ विदन्त्येनां वेदिः, परिष्कृता चातुरस्रेण भूषिता यागार्थम् । अपरिष्कृतां त्वाह, [illegible]न्त्यस्मिन्स्थण्डिलम् । चत्यते चत्वरम्, यागार्थमसंस्कृता भूमिः । तक्ष्णा घटितो य[illegible] कटकाकृतिः, चष्यत उत्कीर्यते चषालः ।

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

2 Top of the post. १९ यूपाग्रं तर्म, निर्मन्थ्य- दारुणि त्वरणिर् द्वयोः । 1 Wood for lighting a fire.
3 Three sorts of sacred fire. दक्षिणाग्निर् गार्हपत्याऽऽहवनीयौ त्रयो ऽग्नयः ॥

1 The three sacred fires. २० अग्नि-त्रयमिदं त्रेता,प्रणीतः संस्कृतो ऽनलः । 1 Fire consecrated by prayers.
Sacrificial fire. समूह्यः परिचाय्योपचाय्यावग्नौ प्रयोगिणः ॥
3 Sort of sacred fire.

२१ यो गार्हपत्यादानीय दक्षिणाऽग्निः प्रणीयते ।

3 The wife of fire. तस्मिन्नानाय्यो, ऽथाऽग्नायी स्वाहा च हुतभुक्प्रिया ॥

2 Prayer uttered to excite fire. २२ ऋक् सामिधेनी धाय्या च या स्यादग्नि-समिन्धने ।
1 Metre. गायत्री-प्रमुखं छन्दो, हव्य-पाके चरुः पुमान् ॥
1 A prepared oblation for the gods.

1 Curd of two milk whey. २३ आमिक्षा सा शृतोष्णे या क्षीरे स्याद् दधि-योगतः ।
1 A leather fan. धवित्रं व्यजनं तद् यद् रचितं मृग-चर्मणा ॥

(कुम्बा) कुबि छादने, चिन्तिपूजिकथिकुम्बीत्यङ् ($\frac{३।३।१७५}{३२८२}$) । व्रियतेऽनया वृतिः, यज्ञवाटे पर्णिका ॥ १८ ॥ तरन्त्यनेन यूपं तर्म । निर्मन्थनीयं दारु यतोऽग्निर्जायते, इयर्त्यग्निर्यतः सोऽरणिः । दक्षिणोऽग्निर्दक्षिणाग्निः । गृहपतिना संयुक्तो गार्हपत्यः, गृहपतिनासंयुक्तेऽन्यः ($\frac{४।४।९०}{१६४२}$) । आहोतव्य आहवनीयः ॥ १९॥ त्रीनिता त्रेता, पृषोदरादित्वादेत्वम् ($\frac{६।३।१०९}{१०३४}$) । प्रणयनं मन्त्रादिना संस्कारैः प्रादुष्करणम् । अग्नौपरिचाय्यापचाय्यसमूह्याः ($\frac{३।१।१३१}{२८९२}$) इति निपात्यन्ते, समूह्यते ढौक्यत इत्यग्निः समूह्यः परिचीयते परिचाय्य उपचीयत उपचाय्य इत्यग्निनामधेयानि प्रयोगविषयाणि ॥ २० ॥ आनाय्योऽनित्यइति ($\frac{३।१।१२८}{२८८८}$) साधुः, आनीयत आनाय्यः, प्रणीयते दक्षिणाग्नित्वेन संस्क्रियते । (अग्नायी) वृषाकप्यग्निकुसीदेति ($\frac{४।१।३७}{४९४}$) ङीप्प्रसङ्गे-ऐत्वम् । सुष्ठु–आहूयते स्वाहा, स्वाहास्यस्या वा ॥२१॥ समिधामाधानी सामिधेनी, समिधामाधानेषेण्यण् (वा० $\frac{२९१२}{१८७७}$) । धीयतेऽनया धाय्या, पाय्यसान्नाय्यनिकाय्येति ($\frac{३।१।१२९}{१८९७}$) साधुः । गायन्तं त्रायते गायत्री । गायत्र्युष्णिगनुष्टुब्बृहतीपङ्क्तित्रिष्टुब्जगत्यतिजगतीशक्वर्यतिशक्वर्यष्ट्यत्यष्टिधृत्यतिधृतिविकृतिसंकृत्यतिकृत्युत्कृत्याख्यं षडक्षरादाभ्यर षड्विंशत्यक्षरं यावत्, छन्दति (चन्दते) छन्दः । अक्षरनियमात्मकं लघुगुरुनियमात्मकं च वृत्तं तनुमध्यादि । हव्यस्य पाको हव्यपाकः । पक्वं होतव्यं, चरुः चर्यतेभक्ष्यते [रध्यते] इति । स्थाल्यपि चरुः, हव्यकव्यपाकोऽत्रेति ॥ २२ ॥ पक्वे तप्ते च क्षीरे दधियोजनादामिक्षा, पक्वे पयसि दध्यानयति सा वैश्वदेव्यामिक्षेति श्रुतिः, आसीयते प्रक्षिप्यते दध्यत्रेति । धूयतेऽग्निर्येनेति धवित्रं, अर्तिलूधूस्वतीत्रः ($\frac{३।२।१८४}{३६६८}$) ॥२३॥

CC-0. Agamnigam Foundation. Digitized by eGangotri Chandigarh

1 Oblation of butter and curds. २४ पृषदाज्यं स-दध्याऽऽज्ये, परमान्नं तु पायसम्। 1—of rice. Milk and sugar.
1 Food of the gods and manes. हव्य-कव्ये दैव-पित्र्ये अन्ने, पात्रं स्रुवाऽऽदिकम्॥
1 A vase or vessel.

1 Various sorts. २५ ध्रुवोपभृज्जुहूर्, ना तु स्रुवो, भेदाः स्रुचः स्त्रियः।
1 A victim. उपाकृतः पशुरसौ यो ऽभिमन्त्र्य क्रतौ हतः॥

3 Slain or immolated. २६ परंपराकं शमनं प्रोक्षणं च वधाऽर्थकम्।
1 An intended oblation. वाच्य-लिङ्गाः प्रमीतोपसंपन्न-प्रोक्षिता हते॥

1 Burnt as a sacrifice. २७ सान्नाय्यं हविरग्नौ तु हुतं त्रिषु वषट्कृतम्।
1 An act of sacrifice. दीक्षाऽन्तो ऽवभृथो यज्ञे, तत्-कर्माऽर्हं तु यज्ञियम्॥
1 Supplemental sacrifice. 1 Suitable to a sacrifice.

1 Act of Sacrifice. २८ त्रिष्वथ क्रतु-कर्मेष्टं, पूर्तं खाताऽऽदि कर्म यत्। 1 of pious liberality.
1 Remains of a sacrifice or oblation. अमृतं विघसो यज्ञशेष-भोजनशेषयोः॥

पृषद्भिर्दधिबिन्दुभिः सहितमाज्यं पृषदाज्यम्। पयसि संस्कृतं पायसम्। अग्निमुखेन देवेभ्योऽन्नं हव्यं, ब्राह्मणमुखेन पितृभ्योऽन्नं कव्यं, कूयते शब्द्यते पितृभिः कव्यम्। उभयमुभयत्रेति तु श्रुतिज्ञाः। पिबन्त्यस्मात्पात्रम्। आदिग्रहणात्स्रुग्ग्रहादि ॥२४॥ ध्रुवति ध्रुवा। [उपभ्रियतेऽनया] उपभृत्। हूयतेऽनया जुहूः। एते च स्रुचो विशेषाः। स्त्रीलिङ्गाः। स्रवत्यस्मात्स्रुवस्तु स्रुग्विशेषः पुंलिङ्गः। उपामन्त्र्य क्रियते हन्यते स्म (उपाकृतः), यज्ञ इति शेषः॥२५॥परंपरामकति परंपराकम्। शसनमिति तु युक्तः पाठः, शसु हिंसायाम्। प्रोक्षणं लक्षणया वधः, प्रोक्ष्य हि यज्ञे पशुर्हन्यते। यज्ञ इति शेषः। (प्रमीतः) मीञ् हिंसायाम्॥ २६॥ संनीयते (सान्नाय्यं), पाय्यसान्नाय्येति ($\frac{३।१।१२९}{२८९०}$) साधुः। हूयते हविः। वषण्मन्त्रलिङ्गेन कृतं हुतं वषट्कृतम्। अवभ्रियते पूर्यतेऽनेनावभृथः। यज्ञकर्मार्हति यज्ञियं, यज्ञर्त्विग्भ्यां घखञौ ($\frac{५।१।७१}{१७३५}$), यज्ञर्त्विग्भ्यांतत्कर्मार्हतीत्युपसंख्यानात् ($\frac{५।१।७१}{१७३५}$) घः ॥ २७॥ इज्यते स्मेष्टं यागादि, यदाह-एकाग्निकर्म हवनं त्रेतायां यच्च हूयते। अन्तर्वेद्यां च यद्दानमिष्टं तदभिधीयते। पिपर्ति स्म पूर्तं, नध्याख्यापृमूर्च्छिमदामिति ($\frac{८।२।५७}{६०४०}$) निष्ठानत्वाभावः। खातं वाप्यादि, आह च-वापीकूपतडागानि देवतायतनानि च। अन्नप्रदानमारामः पूर्तमार्याः प्रचक्षते॥ न म्रियते न नश्यत्यमृतम्। विशिष्टमदनं विघसः, उपसर्गेऽदः ($\frac{३।३।५९}{३२३५}$) इत्यप्, घञपोश्च ($\frac{२।४।३८}{३२३६}$) इति घस्लादेशः यन्मुनिः-विघसाशी भवेन्नित्यं नित्यं चामृतभोजनः। विघसो भुक्तशेषं स्याद्यज्ञशिष्टमथामृ-

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh

13 Gift or donation.

२९ त्यागो विहापितं दानमुत्सर्जन-विसर्जने ।
विश्राणनं वितरणं स्पर्शनं प्रतिपादनम् ॥

३० प्रादेशनं निर्वपणमपवर्जनमंहतिः ।

1 Obsequies of a deceased person.

मृताऽर्थे तदहे दानं त्रिषु स्यादौर्ध्वदेहिकम् ॥

2 Gifts in honour of the deceased.

३१ पितृदानं निवापः स्याच्छ्राद्धं तत्-कर्म शास्त्रतः । 1 Funeral repast.

1 Monthly obsequies.

अन्वाहार्यं मासिकं,ऽशो ऽष्टमो ऽह्नः कुतपो ऽस्त्रियाम् ॥
1 Eighth hour of the day.

4 Research or inquiry.

३२ पर्येषणा परीष्टिश् चा ऽन्वेषणा च गवेषणा । 2 Request or solicitation.

4 Asking or begging.

सनिम् त्वध्येषणा, याञ्चाऽभिशस्तिर् याचनाऽर्थना ॥

1 A respectful oblation.

३३ षट् तु त्रिष्वर्घ्यमर्घाऽर्थे, पाद्यं पादाय वारिणि । 1 Water for ablution of the feet.

1 Proper for a guest

क्रमादातिथ्याऽऽतिथेये अतिथ्यर्थे ऽत्र साधुनि ॥

6 A guest.

३४ स्युरावेशिक आगन्तुरतिथिर् ना गृहागते ।

2 Getting up.

'प्राघूर्णिकः प्राघुणकश् चाऽभ्युत्थानं तु गौरवम्' । (३)

6 Worship.

पूजा नमस्याऽपचितिः सपर्याऽर्चाऽर्हणाः समाः ॥

तम् ॥ २८ ॥ स्वत उपसर्गवशाच्चैते दानार्थाः । स्पर्शनं तूपचाराद्दानं, पुच्छादौ नवादि स्पृष्ट्वा हि दीयते । ओहाक् त्यागे । श्रण दाने ॥ २९ ॥ अंह्यर्तेऽहतिः । उत्सर्गाद्यति । तदहे प्रेतदिने मृतमुद्दिश्य दानं पिण्डोदकादि, ऊर्ध्वदेहाद्भवमौर्ध्वदैहिकं, ऊर्ध्वंदमाच्चदेहाच्चेति (ग० ?) ठञ्, अनुशतिकादित्वात् ($\frac{७।३।२०}{२४३८}$) उभयपदवृद्धिमाहुः ॥ ३० ॥ पितृभ्यो दानं, न्युप्यते निवापः । श्रद्धास्त्यत्र श्राद्धं पितृकर्म, प्रज्ञाश्रद्धाचेति ($\frac{५।२।१०१}{२९०८}$) णः । अन्हा ह्रियतेन्वाहार्यममावास्याश्राद्धम् । कुं तपति सूर्योऽत्रेति कुतपो मध्याह्नात्प्रवृत्तः श्राद्धकालः, यत्स्मृतिः–दिवसस्याष्टमे भागे मन्दीभवति भास्करे । स कालः कुतपो यत्र पितृभ्यो दत्तमक्षयम् (शातातपस्मृतिः ॥३१॥ श्राद्धे द्विजशुश्रूषा (पर्येषणा), इषेरनिच्छार्थस्य (वा० $\frac{२।२।२३}{३२८४}$) युज्वक्तव्यः, परेर्वा (वा० $\frac{२२२४}{३२८४}$)। गवेष मार्गणे । गुर्वादेः क्वचिदर्थे प्रार्थनया नियोजनं सनिः, षणु दाने । याचनं याच्ञा, यजयाचेति ($\frac{३।३।९०}{३२६८}$) नङ् । (याचना) ण्यासश्रन्थइति ($\frac{३।३।१०७}{३२८४}$) बाहुलकाद्युच् । अभिषसनमभिषस्तिः, षस स्वप्ने ॥ ३२ ॥ आगन्त्वन्ताः षट् त्रिलिङ्गाः । वारिणीत्येव,, पादार्घाभ्यां च ($\frac{५।४।२५}{२०९३}$) इति यत् । अतिथय इदमातिथ्यं, अरिथेर्व्यः ($\frac{५।४।२६}{२०९४}$)। अतिथौ साधु–आतिथेयं पथ्यतिथीति ($\frac{४।४।१०४}{२६५६}$) ढञ् । कात्यस्त्वाह–आवेशिकं विपश्चिद्भिरातिथ्यमभिधीयते, आतिथ्योऽतिथिरागन्तुरिति च माला, शाश्वतोऽत एवोभयमाह –आतिथ्यं स्यादतिथ्यर्थं आतिथ्यमतिथिं विदुः (२४७) ॥ ३३ ॥ अवेशे–अप्रति-

CC-0. Agamnigam Foundation. Digitized by eGangotri. Chandigarh

4 Service. ३५ वरिवस्या तु शुश्रूषा परिचर्या ऽप्युपासना ।
4 Roaming. व्रज्या ऽटा ऽट्या पर्यटनं, चर्या त्वीर्या पथे स्थितिः ॥
1 Perseverance in austerities.

2 Sipping. ३६ उपस्पर्शस् त्वाचमनमथ मौनमभाषणम् । 2 Silence.
4 Valmiki. 'प्राचेतसश्चाऽऽदिकविःस्यान् मैत्रावरुणिश् च सः॥३॥
3 Viswamitra. वाल्मीकिश् चाऽथ गाधेयो विश्वामित्रश् च कौशिकः
4 Vyāsa. व्यासो द्वैपायनः पाराशर्यः सत्यवतीसुतः' ॥ ४ ॥
5 Order, method. आनुपूर्वी स्त्रियां वा ऽऽवृत्-परिपाटी अनुक्रमः ।

3 Neglect. ३७ पर्यायश् चा ऽतिपातस् तु स्यात् पर्यय उपात्ययः ।
2 Meritorious act. नियमो व्रतम-स्त्री, तच् चोपवासाऽऽदि पुण्यकम् ॥

वेशे भव आवेशिकः, नैकग्रामीणमतिथिं विप्रं सांगतिकं तथेति स्मृतेः । नास्ति तिथिरस्यातिथिः, अतति सततं गच्छति वा, यत्स्मृतिः–अध्वनीनोऽतिथिर्ज्ञेयः, किं च– तिथिपर्वोत्सवाः सर्वे त्यक्ता येन महात्मना । अतिथिः स हि विज्ञेयः शेषः प्राघूर्णिकः स्मृतः(?)। प्राचूर्णिकः प्राघूणकोऽप्यभ्युत्थानं तु गौरवम् ॥ (नमस्या) नमोवरिवश्चित्रङःक्यजिति (३।१।१९/२६७५) नमः पूजायां क्यच् , अप्रत्ययात् (३।३।१०२/३२७९)। अपचायनमपचितिः, अपचितश्च (५।२।३०/३७७६) इत्यत्र चायतेःक्तिनि (तित्वं) चिभावोऽनिट्त्वं च वक्तव्यात् (वा० २२१५/३२७८)सपरे साधुः सपर्या, सह पर्यायक्रमेण वर्तते वा ॥ ३४ ॥ वरिवसः परिचर्यायां क्यच् , नमोवरिवश्चित्रङःक्यच् (३।१।१९/२६७५) शुश्रूषा गुरुसेवात्र लक्षणया । परिचरणं (परिचर्या), परिचर्यापरिसर्यामृगयाटाट्यानामुपसंख्यानम् (वा० २२१५/३२७८), परिचर्या तु पर्येष्टिरिति भागुरिः । परिव्रज्या तपस्याथ रुद्रांकुशो विशाखिका । व्रजनं व्रज्या, व्रजयजोर्भावे क्यप् (३।३।९८/३०७५) कुटिलमटनमटाट्या, सूचिसूत्रिमूत्र्यट्यर्त्यशूर्णोतीनामुपसंख्यानाद्यङ्ण्यन्तात् (वा० १७५१/२६३७), अट्यापि, यन्मनुः–तार्यत्रिकं वृथाट्या च कामजो दशमो गुणः (म.७।४७), "स्त्रीत्वं च निवरा कन्येतिवत् " (३।३।४८/३२३३) काशिकायां । एवं गदमचरेति (३।१।१०७/२८४८) चर्या । ईर्यापथे ध्यानमौनादिके संबोधमार्गाख्ये भिक्षुव्रते स्थितिरनुष्ठानम्, चर्यां त्वीर्यां विदुर्बुधा इति मुनिः ॥३५॥ उपस्पृश्यन्तेऽद्भिः खान्यत्रोपस्पर्शः आचम्यतेऽम्भोऽत्राचमनम् । मुनेर्भावः कर्म वा मौनं, इगन्ताच्च लघुपूर्वात् (५।१।१३१/२७९६) इत्यण् । पूर्वानुक्रमेणानुपूर्वं तस्य भावश्चानुपूर्व्यं, ष्यञ्, षित्वादा स्त्रीत्वम् । आवर्तनमावृत् । उणादौ, परिपाटनं परिपाटिः, इञ् , आवृत्परिपाट्योर्द्वन्द्वात्स्त्रीत्वम् ॥३६॥ पर्ययणं पर्यायः, परावनुपात्ययइणः (३।३।३८/३२२०) इति घञ् । विपर्ययः क्रमोल्लङ्घनमति-

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

2 A fast.
1 Discrimination. ३८ औपवस्तं तूपवासो, विवेकः पृथगाऽऽत्मता ।
1 Joining both hands while reading the *Vedas*. स्याद् ब्रह्मवर्चसं वृत्ताऽध्ययन-द्विरथा ऽञ्जलिः ॥

1 Sanctified saliva. ३९ पाठे ब्रह्माञ्जलिः, पाठे विप्रुषो ब्रह्मबिन्दवः ।
1 Holiness.
1 A holy posture. ध्यान-योगाऽऽसने ब्रह्मासनं, कल्पे विधि-क्रमौ ॥
3 A sacred precept.

1 A chief injunction. ४० मुख्यः स्यात् प्रथमः कल्पोऽनुकल्पस् तु ततो ऽधमः ।
1 A secondary one.
1 Holy study. संस्कार-पूर्वं ग्रहणं स्यादुपाकरणं श्रुतेः ॥

2 Obeisance. ४१ समे तु पादग्रहणमभिवादनमित्युभे ।
5 A mendicant. भिक्षुः परिव्राट् कर्मन्दी पाराशर्यपि मस्करी ॥

क्रमश्च । व्र [वृ] त्यत वर्ज्यतेऽन्नादि यत्रेति (व्रतम्) तद्व्रतमुपवासकृच्छ्रचान्द्रायणादिकं पुण्यपर्यायम् (पुण्यक्रम्), संज्ञायां कन् ($\frac{५।३।७६}{२०३७}$) ॥ ३७ ॥ उपवस्ताप्राप्तोऽस्यौपवस्त्रं, उपवस्त्रादिभ्य (?) इत्यण्, उपवस्तस्येदमौपवस्तमित्येके, वसु स्तस्भे, क्तः, उपवस्तुरिदमित्यन्नाद्यपि, यत्स्मृतिः–माषान्मधु मसूरांश्च वर्जयेदौपवस्त्रके । प्रकृतिपुरुषयोः पृथग्ज्ञानं विवेकः, भावानां पृथक्स्वरूपत्वमित्येके, विचिर् पृथग्भावे । ब्रह्मणस्तपःस्वाध्यायादेर्वर्चस्तेजो ब्रह्मवर्चसं, ब्रह्महस्तिभ्यां वर्चसः ($\frac{५।४।७८}{६४८}$) इत्यच् ॥ ३८ ॥ ब्रह्मणे वेदायाञ्जलिः यन्मनुः–संहत्य हस्तावध्येयं स हि ब्रह्माञ्जलिः स्मृतः (म. १।७१) । वेदपाठे– आस्यनिर्गता जलकणा ब्रह्मबिन्दवः । (ब्रह्मासनं) ध्यानयोगयोरास्यतेऽनेन । ध्यानमेकाग्र(तया)चिन्तनं, यदाह–तत्र प्रत्ययैकतानता ध्यानम् (पा०३.२।१।१) । योगश्चित्तवृत्तिनिरोधः (पा.यो२) । कल्पते विधीयते प्रक्रम्यते वानेन विनियोगशास्त्रेणेति ॥३९॥ (मुख्यः) आद्यो विधिरित्यर्थः । (अनुकल्पः) मुख्याभावे प्रतिनिधिसंज्ञः । उपाक्रियतेऽनेनेत्युपाकर्म वेदपाठारम्भे विशिष्टो विधिः, रोहिण्यां छन्दांस्युपाकुर्यादिति हि श्रुतिः ॥ ४० ॥ वामेन वामः स्प्रष्टव्यो दक्षिणेन तु दक्षिण इति पादोपसंग्रहणम् ॥ अभिवाद्यते–आशिषं कार्यतेऽनेनेत्यभिवादनम्, अत एवाभिवाद्योपसंग्राह्यः । भिक्षते भिक्षुः, सनाशंसभिक्ष उः । ($\frac{३।२।१६८}{३१४८}$) । परिवर्ज्य सर्वं संन्यस्य व्रजति परिव्राट्, परौव्रजेःपश्चपदान्ते (उ० २१७), इति विण् (क्विप्) षत्वं च । कर्मन्देन पाराशर्येण प्रोक्तं भिक्षुतन्त्रमधीते, कर्मन्दकृशाश्वादिनिः ($\frac{४।३।१११}{६४९१}$), पाराशर्यशिलालिभ्यां भिक्षुनटसूत्रयोः ($\frac{४।३।११०}{६४९०}$) इति णिनिः । मा कृ(कुरु)त कर्माणि मुक्ति [शान्ति]र्वः श्रेयसीति मस्करी, मस्करमस्करिणोर्वेणुपरिव्राजकयोः ($\frac{६।१।१५४}{१०६८}$) इति साधु

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh

3 An ascetic.
2 A holy sage.
1 Patient of austerity.
2 Religious students.

४२ तपस्वी तापसः पारिकाङ्क्षी, वाचंयमो मुनिः ।
तपः-क्लेश-सहो दान्तो, वर्णिनो ब्रह्मचारिणः ॥

2 Saints.
2 Sages with subdued senses.

४३ ऋषयः सत्यवचसः, स्नातकस् त्वाप्लुतो व्रती ।
ये निर्जितेन्द्रिय-ग्रामा यतिनो यतयश् च ते ॥

Annilitiated householder.

2 One who sleeps on the bare ground.
2 Men perfectly virtuous.

४४ यः स्थण्डिले व्रत-वशाच्छेते स्थण्डिलशाय्यसौ ।
स्थाण्डिलश् चाथ विरजस्तमसः स्युर् द्व्यातिगाः ।

3 A purified person.
1 A student's staff.

४५ पवित्रः प्रयतः पूतः, पाखण्डाः सर्वलिङ्गिनः ।
पालाशो दण्ड आषाढो व्रते, राम्भस् तु वैणवः ॥

2 Hereties and impostors.
1 One cut from a Bambu.

2 His waterpot.
1 His cushion.
3 A hide used by him.

४६ अ-स्त्री कमण्डलुः कुण्डी, व्रतिनां साऽऽसनं बृषी ।
अजिनं चर्म कृत्तिः स्त्री, भैक्षं भिक्षा-कदम्बकम् ॥

1 Aggregate of alms.

॥४१॥ तपोऽस्यास्तीति, तपःसहस्राभ्यांविनीनी (५।२।१०२ / १०९), अण्च (५।२।१०३ / १९१०) । अन्येषामपि दृश्यते (६।३।१३७ / ३५३९) इति दीर्घात्पारिकाङ्क्षी । पारिरक्षि(क्ष)कः सांन्यासिकश्च । वाचं यच्छति मौनेनास्ते वाचंयमः, वाचियमोव्रते (३।२।४० / २९५६) इति खच् । मन्यते मुनिः । भिक्षुपर्यायावेतावित्येके । दाम्यति दान्तस्तपःक्लेशानुद्विग्नः, वादान्तशान्तेति (७।२।२७ / ३०६८) साधुः । वर्णोऽस्यास्तीति वर्णी, वर्णाद्ब्रह्मचारिणि (५।२।१३४ / १९४०) इतीनिः । ब्रह्म चरति तच्छीलो वा ब्रह्मचारी ॥ ४२ ॥ दर्शनादृषिरविसंवादिवाक् (सत्यवचाः) । (स्नातकः) स्नातवेदसमाप्तौ (ग० १९६ / २०९७) इति यावादित्वात् (५।४।२९ / २०९७) कन् । यो व्रतवांस्तीर्थेष्वाप्लवते स्नातीत्याप्लुतः स स्नातकः, यस्मृतिः–गुरवे तु धनं दत्त्वा स्नायाद्वा तदनुज्ञया । वेदव्रतानि वा पारं नीत्वा ह्युभयमेव च यतं यमनमस्यास्तीति यती । यच्छत्युपरमति यातः ॥ ४३ ॥ आद्यस्य (स्थण्डिलशायिनः), व्रते (३।२।८० / २९९०) इति णिनिः । परस्य (स्थाण्डिलस्य), स्थण्डिलाच्छयितरिव्रते (४।२।१५ / १२१६) इत्यण् । विगते रजस्तमसी येभ्यः, सात्त्विका इत्यर्थः । द्व्यमतिगच्छन्त्यतिक्रामन्ति द्व्यातिगाः ॥४४॥ पूयतेऽनेन पवित्रः । प्रयतते प्रयच्छत्युपरमति वा प्रयतः । शुचिः पुण्यः पावनश्च । पाप(प)मणन्ति पाषण्डा वेदबाह्यव्रताः सर्वलिङ्गिनः क्षपणकाद्याः । सर्वाणि लिङ्गानि सन्त्येषां, भग्नव्रता इत्येके, आहुश्च–नानाव्रतधरा नानावेषाः पाषण्डिनो मताः । आषाढासु जात आषाढः, विशाखाषाढादण् मन्थदण्डयोः (५।१।१०० / १७७३), यदाह–आषाढो व्रतिनां दण्डः । व्रत इत्येव, रम्भो वेणुपर्यायः ॥ ४५ ॥ कं जलमण्डे मध्ये लाति कमण्डलुः । कुण्डात् जानपदकुण्डेत्यमत्रे (५।१।४२ / ५००) ङीष् । बुवन्तोऽस्यां सीदन्ति बृषी । अज्यते क्षिप्यतेऽजिनम् । चरितं चर्म । कृत्यते कृत्तिः । (भैक्षं)

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

2 Religious bathing. ४७ स्वाध्यायः स्याज् जपः, सुत्या ऽभिषवः सवनं च सा।
2 Reading or muttering of prayers. सर्वेनसामपध्वंसि जप्यं त्रिष्वघमर्षणम् ॥
1 An expiatory prayer. ४८ दर्शश् च पौर्णमासश् च यागौ पक्षाऽन्तयोः पृथक् ॥
1 Half-monthly sacrifice.

1 A perpetual duty. ४९ शरीर-साधनाऽपेक्षं नित्यं यत् कर्म तद् यमः।
1 A voluntary one. नियमस् तु स यत् कर्म नित्यमागन्तु-साधनम् ॥
4 Shaving. 'क्षौरं तु भद्राकारणं मुण्डनं वपनं त्रिषु।
2 Robe. 1 Petticoat. कक्षापटी च कौपीनं शाटी च स्त्रीति लक्ष्यतः' ॥ ५ ॥

५० उपवीतं ब्रह्म-सूत्रं प्रोद्धृते दक्षिणे करे। 1 The cord passed over the left shoulder.
1 Over the right shoulder. प्राचीनावीतमन्यस्मिन्, निवीतं कण्ठ-लम्बितम् ॥
1 Suspended over the neck.

1 Part of the hand sacred to the gods. ५१ अङ्गुल्यग्रे तीर्थं दैवं, स्वल्पाऽङ्गुल्योर् मूले कायम्।
1 Part of the hand sacred to the creator.
1—to the manes. मध्ये ऽङ्गुष्ठाङ्गुल्योः पित्र्यं, मूले त्वङ्गुष्ठस्य ब्राह्मम् ॥

भिक्षादिभ्योऽण् (४।२।३८/१२४४) ॥ ४६ ॥ स्वस्य वेदस्याध्ययनं स्वाध्यायः, इङश्चेति (३।३।२१/३१९१) घञ्। जपनं जपः, व्यधजपोरनुपसर्गे (३।३।६१/१२३८) इत्यप्। सोमं सुन्वन्त्यद्भिः परिवासयन्त्यस्यां सुत्या, संज्ञायां समजेति (३।३।९९/३२७६) क्यप्। अभिषवणमभिषवः, उपसर्गात्सुनोतीति (८।३।३५/२३७०) षत्वम्। अघं मृष्यते शोध्यतेऽनेनाघमर्षणं, अब्दैवत्यो मन्त्रस्तद्रूपो वा, करणाधिकरणयोश्च (३।३।११७/३२९३) इति ल्युट्, त्रिरात्रोपवासादिस्तूपचारात् ॥ ४७ ॥ अमावास्या(यां) दर्शः, दृश्यते चन्द्रोऽत्रेति, यागस्तूपचारात्। पूर्णिमायां पौर्णमासः, पूर्णो मासश्चन्द्रस्तत्र भवः ॥ ४८ ॥ शरीरमात्रेणैव यत्क्रियते तत्, यम्यतेऽनेन चित्तं यमः, यमःसमुपनिविषुचेत्यप् (३।३।६७/३२४०), आह च—अहिंसासत्यास्तेयब्रह्मचर्यापरिग्रहा यमाः(पा.यो २।३०) आगन्तु बाह्य मृज्जलादि साधनं यत्रेति, अत एव कृत्रिमं कर्म नियमः, यदाह—शौचसंतोषतपः-स्वाध्यायेश्वरप्रणिधानानि नियमाः(पा.यो २।३२)॥४९॥ शैव उर्ध्वस्रोतसिकः सिद्धान्ती शुद्धमार्गिकः [शुद्धान्ती सिद्धमार्गिकः]। पाञ्चार्थिकः पाशुपतो लाकुलोऽथ महाव्रती ॥ कापाली सोमसिद्धान्ती तान्त्रिकः स्याद्विशेषदृक्। यामलोद्वयमार्गी स्यात्त्रिकभेदी षडर्धिकः ॥ पूर्वाम्नायी महामार्गो भैरवी दक्षिणागमः। शाक्तो वामस्रोतसिकः कौल आन्वयिको मतः। एकायनः शाश्व[सात्व]तश्च वैष्णवः पाञ्चरात्रिकः। रक्ताम्बरो भदन्तश्च शाक्यः श्रमणवन्दकौ। भिक्षुः श्वेतः श्वेतपटः क्षपणार्षिर्दिगम्बरः-(र्दिगीश्वरः)। नग्नाटः श्रावकोऽह्रीको निर्ग्रन्थो जीवजीवकौ ॥ उपवीयते प्राव्रियते स्मोपवीतम् [यज्ञोपवीतं च]। अन्यस्मिन्वामे करे प्रोद्धृते प्राचीनावीतं,

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh

2 Deified state. 1—to the *Vedas*. 1 Inferior deification. 1 Penance

५२ स्याद् ब्रह्मभूयं ब्रह्मत्वं ब्रह्मसायुज्यमित्यपि ।
देवभूयाऽऽदिकं तद्-वत्, कृच्छ्रं सांतपनाऽऽदिकम् ॥

1 Fasting to die. 1 One who has left his sacred fire.

५३ संन्यासवत्यनशने पुमान् प्रायो, ऽथ वीरहा ।
नष्टाग्निः, कुहना लोभान् मिथ्येर्या-पथ-कल्पना ॥ 1 Hypocrisy.

1 An uninitiated person.

५४ व्रात्यः संस्कार-हीनः स्यादस्वाध्यायो निराकृतिः ।
2 One who has not made his studies.
धर्मध्वजी लिङ्गवृत्तिरवकीर्णी क्षतव्रतः ॥ 2 A violator of his vow.

2 A hypocrite or impostor.

प्रागेव प्राचीनं, विभाषाञ्चेरदिक् स्त्रियाम् (५।४।८ / ३३८७) इति खः, आवीयते स्मावीतम् । यज्ञसूत्रमित्येव, नियतं वीयते स्म निवीतं, यन्मनुः—प्रोध्दृते दक्षिणे पाणावुपवीत्युच्यते द्विजः । सव्ये प्राचीनमावीती निवीती कण्ठसज्जने (म. २-६३) ॥ ५० ॥ देवेभ्यस्तीर्यते दीयते तीर्थम् । स्वल्पा कनिष्ठाङ्गुलिः, द्वित्वमञ्जलिमध्येन प्रजापतिभ्यो जलदानाम्नानान् । कः प्रजापतिर्देवतास्य कायं, कस्येत् (४।२।२५ / १२४७) इत्यण्-इत्वं च । अङ्गुलिस्तर्जन्यत्र, पितरो देवतास्य पित्र्यं तीर्थं वाय्वृतुपित्रुपसो यत् (४।२।३१ / १२३३) । ब्रह्मा देवतास्य ब्राह्मं तीर्थं, ब्राह्मोऽ जातौ (६।४।१७१ / ११५८) इति साधुः, यद्याज्ञवल्क्यः—कनिष्ठादेशिन्यङ्गुष्ठमूलान्यग्रं करस्य च । प्रजापतिपितृब्रह्मदेवतीर्थान्यनुक्रमात् ॥ करमध्यं सौम्यं त्वाहुः (या. १-१९) ॥ ५१ ॥ ब्रह्मणो ज्ञानस्य भवनं ब्रह्मभूयं, ब्रह्मणैकध्यं(कात्य)मोक्ष इत्यर्थः, भुवोभावे (३।१।१०७ / ३८५५) इति क्यप् । सह युनक्ति सयुक्, तस्य भावः सायुज्यम् । तद्वदिति देवत्वं देव सायुज्यं च । आदिशब्दान्मूर्खभूयादि । कृन्तति पापं कृच्छ्रं नाम तपः । संतपने भवं सांतपनं, यत्स्मृतिः—त्र्यहं सायं त्र्यहं प्रातस्त्र्यहमद्यादयाचितम् । त्र्यहं परं च नाश्नीयात्कृच्छ्रं सांतपनं स्मृतम् (म. ११।२११) ॥ आदिशब्दात्पराकादि ॥ ५२ ॥ संन्यसनं सर्वत्यागः, (तद्युक्तः) मरणाध्यवसायः (प्रायः) पुमानिति प्रायस्य सान्तत्वं माविज्ञायीती; प्रायोपवेशनमतिर्नृपतिर्बभूव (रघु० ८-३४) नष्टाग्निः, वीरयते वीरोग्निस्तमुपेक्षया हन्ति (वीरहा) । ईर्यापथाख्यस्य भिक्षुव्रतस्य दम्भेन परविस्मापनार्थं मिथ्याकल्पना कुहना, कुह विस्मापनेस्माद्युच् । अर्थलिप्सया विज्ञानदर्शनं वा कुहनिकाख्यम् । शाश्वतस्त्वाह (३८६) ईर्ष्यालुर्दम्भचर्या च कुहनः कुहना क्रमात् ॥५३॥ व्रते साधुः कालो व्रत्यः तत्र भवो व्रात्यः प्रायश्चित्तार्हः, संस्कारोऽत्रोपनयनम्, यत्स्मृतिः—(या. १-३८०) सावित्रीपतिता व्रात्या व्रात्यस्तोमादृते क्रतोः । व्रतेऽसाधुरित्येके, पृथग्व्यपदेशेनेत्यर्थः । निराक्रियते वेदहीनत्वान्निराकृतिः, प्राकृतेर्जातेर्वा निष्क्रान्तः, यत्स्मृतिः—अनधीत्य तु यो वेदमन्यत्र कुरुते श्रमम् । स जीवन्नेव शूद्रत्वमाशु गच्छति सान्वयः॥ (म. २-१६८) धर्मो ध्वजश्चिह्नमिवास्त्यस्य

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

1 One who is asleep at sunset, or at sunrise.

५५ सुते यस्मिन्नस्तमेति सुते यस्मिन्नुदेति च ।
अंशुमानभिनिर्मुक्ताऽभ्युदितौ च यथा-क्रमम् ॥

1 One married before his elder brother.
1 The unmarried elder brother.

५६ परिवेत्ता ऽनुजो ऽनूढे ज्येष्ठे दार-परिग्रहात् ।
परिवित्तिस् तु तज्-ज्यायान्. विवाहोपयमौ समौ ॥

6 Marriage.

५७ तथा परिणयोद्वाहोपयामाः पाणिपीडनम् ।

5 Copulation.

व्यवायो ग्राम्यधर्मो मैथुनं निधुवनं रतम् ॥

3 Three human pursuits.
1 The same equally potent.

५८ त्रिवर्गो धर्म-कामाऽर्थैश्, चतुर्वर्गः स-मोक्षकैः । 1 Four objects.
स-बलैस् तैश् चतुर्भद्रं, जन्याः स्निग्धा वरस्य ये ॥
1 The bridegroom's friends.

इति ब्रह्म-वर्गः ७, अत्र मूलश्लोकाः ५८, क्षे० श्लो० ५

अथ क्षत्रिय-वर्गः ८

5 A man of the military tribe.
7 A king.

१ मूर्धाभिषिक्तो राजन्यो बाहुजः क्षत्रियो विराट् ।
राजा राट् पार्थिव-क्ष्माभृन्-नृप-भूप-महीक्षितः ॥

धर्मध्वजी । लिङ्गाज्जटादेर्वृत्तिर्जीविकाऽस्य, भिक्षिष्य इत्यस्य जटा इति यावत् । अत्रान्तरे कीर्णं रेतोऽस्यावकीर्णी, यत्स्मृतिः—ब्रह्मचार्यवकीर्णी स्यात्कामतस्तुस्त्रियं व्रजेत् (?) ॥ ५४ ॥ अभिभूय निर्मुक्तोऽस्तमितोऽर्कोस्याभिनिर्मुक्त अभिभूयोदितोऽर्कोस्याभ्युदितः ॥ ५५ ॥ ज्येष्ठे भ्रातर्यकृतविवाहे कनिष्ठो विवाहाद्धेतोः, परिवर्ज्य विन्दति परिवेत्ता, यत्स्मृतिः—येऽग्रजेष्वकलत्रेषु कुर्वते दारसंग्रहम् । ज्ञेयास्ते परिवेत्तारः परिवित्तिस्तु पूर्वजः (?) ॥ उपलक्षणं चैतद्यतोऽग्निहोत्रव्रतादावपि परिवेदनव्यवहरोऽस्ति । तस्य ज्यायानग्रजः, परिवर्ज्य विन्दति स परिवित्तिः ॥५६॥ विवहनं विवाहः । उपयमनमुपयमः, यमःसमुपनिविषु च (३।३।६३ / ३२४७) इति पक्षे अप् । व्यवयनं व्यवायः । मिथुनस्य स्त्रीपुंसयोरिदं मैथुनम् । निधूयन्तेऽङ्गान्यस्मिन्निधुवनम् । रमणं रतम् । रतिः संवेशनं रहः सुरतं संमोहनं संप्रयोगोऽपि ॥ ५७ ॥ त्रिसंख्याको वर्गः, धर्मकामार्थैरित्येव । चतुर्णां भद्राणां समाहारश्चतुर्भद्रं, पात्रादिः (पात्राद्यन्तस्य न) । तैर्धर्मकामार्थैः, यत्कात्यः—आहुश्चत्वारि भद्राणि बलं धर्मं सुखं धनम् । जनीं वधूमर्हन्ति (वहन्ति), संज्ञायां जन्याः (४।४।८२ / २६०४) इति साधुः । जामातुर्वयस्याः, जनीवोढारोऽपि, यल्लक्ष्यम्—याहीति जन्यामवदत्कुमारी (रघु० ६—३७) ॥ ५८ ॥ इति ब्रह्मवर्गः । ७ ।

मूर्धन्यभिषिच्यते स्म, मूर्धावसिक्तोऽपि । राज्ञोऽपत्यं राजन्यः, राजश्वशुराद्यत् (४।१।१३७ / २१५३) इत्यत्र राज्ञोऽपत्ये जातिग्रहणम् । हिरण्यगर्भबाहुभ्यां जातो बाहुजः, बाहू

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

1 An emperor.
2 A universal monarch.

२ राजा तु प्रणताऽशेष सामन्तः स्यादधीश्वरः ।
चक्रवर्ती सार्वभौमो, नृपो ऽन्यो मण्डलेश्वरः ॥

1 A paramount.
1 An assemblage of princes.

३ येनेष्टं राजसूयेन मण्डलस्येश्वरश् च यः । 1 Any other prince.
शास्ति यश् चाऽऽज्ञया राज्ञः स सम्राडथ राजकम् ॥

1--of soldiers.
2 A minister or counsellor.

४ राजन्यकं च नृपति-क्षत्रियाणां गणे क्रमात् ॥
मन्त्री धीसचिवोऽमात्यो, ऽन्ये कर्मसचिवास् ततः ॥
1 Other ministers.

2 The king s companions.
2 The judge.

५ महामात्राः प्रधानानि, पुरोधास् तु पुरोहितः । 2 The priest or chaplain.
द्रष्टरि व्यवहाराणां प्राड्विवाकाऽक्षदर्शकौ ॥

राजन्यः कृत इति श्रुतेः (ऋ.वे.१०।९०।१२)। क्षत्त्रस्यापत्यं जातिः क्षत्त्रियः, क्षत्त्राद्धः (४।१।१३८)। क्षत्त्रं च क्षतत्राणात् । राजते राट्, व्रश्चभ्रस्जसृजमृजेति (८।२।३६) षत्वं, झलांजशोऽन्ते (८।२।२९) इत्वं, वावसाने (८।४।५६) चर्त्वम् । पृथिव्या राजा पार्थिवः, सर्वभूमिपृथिवीभ्यामणञौ (५।१।४१) । महीं क्षियत्यधिवसति महीक्षित् । [नराधिपश्च] ॥ १ ॥ अध्युपरीष्टे तच्छीलोऽधीश्वरः । अप्रतिरथोऽपि । नृपचक्रे राजके वर्तते स्वाम्येन, चक्रं राष्ट्रं वर्तयति वा चक्रवर्ती । सर्वस्या भूमेरीश्वरः सार्वभौमः अनुशतिकादित्वात् (७।३।२०) उभयपदवृद्धिः । अत्राहुः- रामो दाशरथी रावणारिकाकुत्स्थराघवाः । सौमित्रिर्लक्ष्मणो लङ्कापतिपौलस्त्यरावणाः ॥ दशास्योऽपीन्द्रजिन्मेघनादो मन्दोदरीसुतः । आञ्जनेयस्तु हनुमान्हनूमान्मारुतात्मजः । किष्किन्धाधिपसुग्रीवौ द्वौ जटायुजटायुषौ ॥ अजातशत्रुः शल्यारिर्धर्मपुत्रो युधिष्ठिरः । राधेयोऽङ्गाधिपः कर्णो भीमसेनो हिडिम्बजित् ॥ मारुतिः कीचकारातिर्बकवैरी वृकोदरः । धनंजयोऽर्जुनः पार्थो विजयः शक्रनन्दनः ॥ गाण्डीवी फाल्गुनः सव्यसाची मध्यमपाण्डवः । जिष्णुः किरीटी बीभत्सुः श्वेतवाजी कपिध्वजः ॥ पृथा कुन्ती च कृष्णा तु पाञ्चाली याज्ञसेन्यपि । द्रौपदी विक्रमादित्यः साहसाङ्कः शकान्तकः ॥ शूद्रकस्त्वग्निमित्रो वा हालः स्याच्छालिवाहनः [सातवाहनः] । वैरोचनो बलिः कार्तवीर्योऽर्जुनः सहस्रदोः ॥ अन्यो भूम्येकदेशे यो नृपः (स मण्डलेश्वरः) ॥ २ ॥ इज्यते स्मेष्टम् । मण्डलस्य द्वादशराजकस्य, समुदितं लक्षणं चैतत् । सम्यग्राजति सम्राट्, मोराजिसमःक्वौ- (८।३।२५) इति मस्य मः ॥ ३ ॥ राज्ञां समूहो राजकम्, राजन्यानां समूहो राजन्यकम्, गोत्रोक्षोष्टति (४।२।३९) वुञ् । मन्त्रः कर्तव्यावधारणमस्त्यस्य मन्त्री । धिया सचति समवैति धीसचिवः । अमा सह समीपे वा भवोऽमात्यः । सामवायिकोऽपि । ततो मन्त्रिणोऽन्येऽमात्याः कर्मसहाया नियोग्याख्याः ॥४॥ अमात्या इत्येव । महती मात्रा परिच्छद एषां महामात्राः प्रदधाति प्रधानमाविष्टलिङ्गकम् । पुरो धीयते हिनोति वा पुरोहितः । सौवस्तिकोऽपि । द्रष्टा निर्णेता । व्यवहार ऋणादानादिन्यायः

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh

5 The warder or porter.
2 An armed guard.
2 A superintendent.
1 An overseer of a village.

६ प्रतीहारो द्वारपाल-द्वाःस्थ-द्वाःस्थित-दर्शकाः ।
रक्षिवर्गस् त्वनीकस्थो, ऽथाऽध्यक्षाऽधिकृतौ समौ ॥
७ स्थायुकोऽधिकृतो ग्रामे, गोपो ग्रामेषु भूरिषु ।

1 An inspector of a district
2 The treasurer.
2 The master of the mint.

भौरिकः कनकाध्यक्षो, रूप्याध्यक्षस् तु नैष्किकः ॥

1 The chamberlain.
4 Attendants of the women.
2 A eunuch.
3 A servant.
1 A foe. 1 A stranger or neutral.

८ अन्तःपुरे त्वधिकृतः स्यादन्तर्वेशिको जनः ।
सौविदल्लाः कञ्चुकिनः स्थापत्याः सौविदाश् च ते ॥
९ षण्ढो वर्षवरस् तुल्यौ, सेवकाऽर्थ्यनुजीविनः ।
विषयाऽनन्तरो राजा शत्रुर्, मित्रमतः परम् ॥

यत्स्मृतिः–वि नानार्थेव संदेहे हरणं हार उच्यते । नानासंदेहहरणाद् व्यवहारः प्रकीर्तितः ॥ पृच्छतीति प्राट्, क्विब्वचिप्रच्छिश्रीति (उ.२१५) क्विपि दीर्घोऽसंप्रसारणं च। प्राट् चासौ विविधं वक्ति (विवाकश्च) प्राड्विवाकः। अक्षाण्यायमुखानि रूप्याणि वा पश्यति (अक्षदर्शकः), आक्षदर्शकोऽपि । धर्माधिकरणिकोऽक्षपटलिकश्च ॥ ५ ॥ प्रतिह्रियन्ते वार्यन्तेऽनेन प्रतिहारः । द्वारि तिष्ठति द्वाःस्थः । द्वारि स्थितं दर्शयत्या वेदयति (द्वाःस्थितदर्शकः), द्वे संज्ञे इत्येके, द्वाःस्थित एव हि दर्शयति, द्वाःस्थोपस्थितदर्शका इत्येके पेठुः । दण्डी दौवारिको वेत्री, उत्सारकश्च । अङ्गरक्षकवृन्दे, अनीके तिष्ठत्यनीकस्थः। राजशिक्षाविचक्षणो वेति शाश्वतः (३४२) अधिकृतोऽक्षेष्वायमुखेष्वध्यक्षः, अध्यक्ष्णोति वा, अक्षू व्याप्तौ, अधिकान्यक्षाणीन्द्रियाण्यस्य वा । अधिक्रियते– उपरि नियुज्यते स्माधिकृतः ॥ ६ ॥ तिष्ठति तच्छीलः स्थायुकः, लषपतपदस्थाभूवृषेत्युकञ् ($\frac{३।२।१५४}{३१३४}$) । अधिकृत इत्येव, गां भुवं पाति गोपायति वा गोपः । भूरिणि हेम्नि नियुक्तो भौरिकः । हैरिक इति पाठे हिरण्ये नियुक्तः । रूपमाहतमस्य रूप्यं दीनारादिरूपादाहतप्रशंसयोर्यप् ($\frac{५।२।१२०}{१९३७}$), निष्के दीनारादौ नियुक्तो नैष्किकः ॥ ७ ॥ वंशस्यान्तरन्तर्वंशं कुलं, स्त्रियस्ताः सन्त्यस्यान्तर्वंशिकः, अन्तःपूर्वपदाट्ठञ् ($\frac{४।३।६०}{१४३७}$) इत्येके । जनः कुब्जवामनादिसमूहः सुविदन्तं विवाहं जानन्तं लान्ति सुविदल्ला ऊढाः स्त्रियः, तत्र भवाः सौविदल्लाः । कञ्चुकं विनीतवेशार्थमस्त्यस्य (कञ्चुकी)। कुलस्त्रीर्व्यवस्थायां स्थापयन्ति स्थापत्यः । यद्वा तिष्ठन्त्यस्मिन्वेशाः स्थः, घञर्थे कः (वा० $\frac{२२०४}{३२३४}$), स्थश्चासौ पतिः स्थपतिः तत्र भवा इति, दित्यदित्यादित्यपत्युत्तरपदाण्ण्यः ($\frac{४।१।८५}{१०७७}$) । सुविदस्योद्वहत इमे सौविदाः ॥ ८ ॥ शाम्यति शण्ढः, अत एवान्तःपुरपालकः । वर्षं रेतः सेकं वृणोत्याच्छादयति वर्षवरः, वृष शक्तिप्रतिबन्धे वा । अर्थयते तच्छीलोऽर्थी, अर्थाच्चा संनिहिते (वा० $\frac{३३२७}{१९४१}$) इतानिर्वा । विजिगीषुविषयादव्यवहितः (शत्रुः)

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh

1 A stranger.
19 Any enemy.

१० उदासीनः परतरः, पार्ष्णिग्राहस् तु पृष्ठतः । 1 An enemy in the rear.
रिपौ वैरि-सपत्नाऽरि-द्विषद्-द्वेषण-दुर्हृदः ॥

११ द्विड्-विपक्षाऽहिताऽमित्र-दस्यु-शात्रव-शत्रवः ।
अभिघाति-पराऽराति-प्रत्यर्थि-परिपन्थिनः ॥

3 A friend and contemporary.
2 Friendship.
2 Complaisance.

१२ वयस्यः स्निग्धः सवया, अथ मित्रं सखा सुहृत् । 3 A friend.
सख्यं साप्तपदीनं स्यादनुरोधो ऽनुवर्तनम् ॥

7 A spy.
2 Trusted; confidential.

१३ यथार्हवर्णः प्रणिधिरपसर्पश् चरः स्पशः ।
चारश् च गूढपुरुषश् चाऽऽप्त-प्रत्ययितौ समौ ॥

अतः शत्रोः परभूमिस्थं विजिगीषोर्मित्रम् ॥ ९ ॥ ऊर्ध्वमासीन इवोदासीनः शत्रुमित्रभूमिभ्यो बाह्योऽत एव तटस्थः । ने(जे)तुः पश्चात्स्थितो राजा, पार्ष्णिमिव पार्ष्णि गृह्णात्यवष्टभ्नाति (पार्ष्णिग्राहः)। पञ्चस्वेतेषु द्वादशराजकमण्डलं परिसमाप्तं, यदाहुः—अरिर्मित्रमरेर्मित्रं मित्रमित्रमतः परम् । तथारिमित्रमित्रं च विजिगीषोः पुरः स्मृताः ॥ पार्ष्णिग्राहस्तथास्क[क्र]न्द आसारश्च तयोः पृथक् । मध्यमोऽथाप्युदासीन इति द्वादशराजकम् ॥ रेपयति रिपुः, रेपृ गतौ । समानं पतत्येकार्थाभिनिवेशात् सपत्नः । इयर्त्यरिः । द्वेष्टि द्विषन्, द्विषोऽमित्रे (३।२।१३१) इति शतृ । द्वेष्टि तच्छीलो द्वेषणः, क्रुधमण्डार्थेभ्यश्च (३।१।१५१) इति युच् । दुष्टं हृदयमस्य दुर्हृत्, सुहृद्दुर्हृदौ मित्रामित्रयोः (५।४।१५०) इति साधुः ॥ १० ॥ विरुद्धः पक्षो विपक्षः । अमत्यमित्रः । शातयति शत्रुः । (शात्रवः) प्रज्ञादिभ्यश्च (५।४।३८) इति पक्षेऽण् । अभिहन्यतेऽभिघाती । प्रियते परः, पृङ् व्यायामे । इयर्त्यरातिः । प्रतीपमर्थयते प्रत्यर्थी । परिपन्थयति परिपन्थी, छन्दसिपरिपन्थिपरिणौ-पयवस्थातरि (५।१।८९) इति साधुः । प्रत्यवस्थाता प्रत्यनीकः परिपन्थकोऽपि [भ्रातृव्यासहनद्वेषिजिघांसुप्रत्यनीकिनः] ॥ ११ ॥ वयसा तुल्यो वयस्यः, नौवयोधर्मेति (४।४।९१) यत् । समानं वयोऽस्य सवयाः । मेद्यति स्निह्यति मित्रम् । समानं ख्याति सखा, समाने ख्यः स चोदात्तः (उ० ५७६) इतीण् (स) डिच्च यलोपश्च । सख्युर्भावः सख्यं, सख्युर्यः (५।१।१२६)। सप्त पदानि क्रमाः सुप्तिङन्तानि वा व्याप्नोति (साप्तपदीनं), साप्तपदीनं सख्यं (५।२।२२) इति साधुः । तद्योगात्सख्यापि साप्तपदीनः । सौहृदं सौहार्दं सौहृदीयमजर्यं च। इच्छानुवर्तनमित्यर्थः, अनुरुध कामे ॥१२॥ देशकालोचितो वर्ण आकारो जातिवर्णनं वास्य यथार्हवर्णः। प्रकर्षेण गुप्तो धीयते परेषु प्रणिधिः। अवच्छन्नं सर्पत्यवसर्पः। चरति चरश्चारश्च, ज्वालादित्वाण्णो वा। ज्वलितिकसन्तेभ्यो णः (३।१।१४०)। स्पशति बाधते पराःस्पशः। आप्यते स्माप्तः,

CC-0. Agamnigam Foundation. Digitized by Siddhanta eGangotri Gyaan Kosha

8 An astiologer. १४ सांवत्सरो ज्यौतिषिको दैवज्ञ-गणकावपि ।
स्युर् मौहूर्तिक-मौहूर्त-ज्ञानि-कार्तान्तिका अपि ॥

2 A man versed in any science. १५ तान्त्रिको ज्ञातसिद्धान्तः, सत्री गृहपतिः समौ ॥ 2 A generous house-holder.

4 A scribe. लिपिङ्करो ऽक्षरचणो ऽक्षरचञ्चुश् च लेखके ।

4 Scripture or writing. १६ लिखिताऽक्षरसंस्थाने लिपिर् लिबिरुभे स्त्रियौ ।

2 A messenger or ambassador. स्यात् संदेशहरो दूतो, दूत्यं तद्-भाव-कर्मणी ॥
1 An embassy or message.

5 A traveller. १७ अध्वनीनोऽध्वगोऽध्वन्यः पान्थः पथिक इत्यपि ॥

1 The requisites of regal administration. १८ स्वाम्यमात्य-सुहृत्-कोश-राष्ट्र-दुर्ग-बलानि च ।

1 Including citizens. राज्याङ्गानि, प्रकृतयः, पौराणां श्रेणयोऽपि च ॥

अविसंवादिवाक् । प्रत्यय आश्वासोऽस्य प्रत्ययितः ॥१३॥ संवत्सरः कालोपलक्षणं, तद्वेद सांवत्सरः, तदधीते तद्वेद (४।२।५९ / १२६९) इत्यण् । ज्योतींषि ग्रहादीनधिकृत्य कृतो ग्रन्थो ज्योतिषः, ज्योतिषं वेद ज्यौतिषिकः, क्रतूक्थादिसूत्रान्ताठक् (४।२।६० / १२७०) । दैवं पूर्वकृतं कर्म जानाति दैवज्ञः। मुहूर्तं वेद मौहूर्तिकः, क्रतूक्थादित्वात् (४।२।६०) ठग्वा । कालादिज्ञानमस्यास्तीति ज्ञानी । कृतान्तं वेद कार्तान्तिकः तन्त्र्यते तन्यतेऽनेन वा तन्त्रं पारमेश्वरवैद्यकज्योतिषादि, तद्वेद तान्त्रिकः । सिद्धो निवारितविप्रतिपत्तिरन्तो निष्ठात्र सिद्धान्तः। सीदत्यस्मिन्सत्त्रं गृहं सदादानं च । लिपिं करोति, दिवा विभेति (३।२।२१ / १९३५) टः । अक्षरैर्वित्तोऽक्षरचणः, तेनवित्तश्चञ्चुप्चणपौ (५।२।२६ / १८२७) ॥ १५ ॥ अक्षरविन्यासे त्रयं वर्तते । लिख्यते स्म लिखिता (–तम्) । लिप्यतेऽनया पत्त्रं लिपिः । (लिविः) जपादित्वात् (७।४।८६ / २६३८) पक्ष वत्वम् । संदिश्यते संदेशो मुखस्वरूपम् । दूयतेऽनेन यथोक्तवादित्वात्पर इति दूतः । (दूत्य) दूतवणिग्भ्यां चतिवक्तव्यात् (वा० ५।१।१२६ / १७९१) यः ॥ १६ ॥ अध्वानं गच्छत्यध्वनीनः, अध्वनोयत्खौ (५।२।१६ / १८१७) । पन्थानं गच्छति पथिकः पथःष्कन् (५।१।७५ / १७३९) पन्थानं नित्यं गच्छति पान्थः, पन्थो णनित्यं (५।१।७६ / १७४०) इति णः पन्थदेशश्च । अदूरावप्रकषास्वनयोः पर्यायत्वम् । दै(दे)शिकोऽपि । पाथेयं शम्बलम् ॥ १७ ॥ स्वं विद्यतेऽस्य स्वामी, स्वामिन्नैश्वर्ये (५।२।१२६ / १९३२) इति साधुः । अमा सह समीपे वा भवोऽमात्यः, अमहकतसित्रेभ्यस्तद्विधिर्याव्ययात्स्मृतः (वा० २७७९ / १३२४) ईत्यप् (अव्ययात्स्यप्) । कूयते मृग्यत इति कोशः; कुष्णातः कोष इत्येके । राजते राष्ट्रम् दुःखेन गन्यतेऽस्मिन्दुर्गः, सुदुरोधिकरणे चात् (वा० २०१६ / १९६५) डः । बलन्त्यनेनेति बलम् । अङ्गान्यारम्भकाणि । प्रक्रियतेऽनया प्रकृतिः । एकमुख्यः सजातीयसमूहः श्रेणिः । प्रकृतया राज्याङ्गानीत्येव, यत्कात्यः—अमात्याद्याश्च पौराश्च सन्निः

CC-0. Agamnigam Foundation. Digitized by eGangotri. Courtesy Panjab University, Chandigarh

1 Six expedients of defence. १९ संधिर् ना विग्रहो यानमासनं द्वैधमाश्रयः ।
1 Power. षड् गुणाः, शक्तयस् तिस्रः प्रभावोत्साह-मन्त्र-जाः ॥
1 Threefold object. २० क्षयः स्थानं च वृद्धिश् च त्रिवर्गो नीति-वेदिनाम् ।
1 Majesty. स प्रतापः प्रभावश् च यत् तेजः कोश-दण्ड-जम् ॥
1 Four means of success. २१ साम-दाने भेद-दण्डावित्युपाय-चतुष्टयम् ।
3 Punishment. 2 Conciliation. साहसं तु दमो दण्डः, साम सान्त्वमथो समौ ॥
2 Disunion. २२ भेदोपजापावुपधा धर्माऽऽद्यैर् यत् परीक्षणम् ॥
1 Trial or test of honesty.
1 Secret. २३ पञ्च त्रिष्वषडक्षीणो यस् तृतीयाऽऽद्य-गोचरः ।
7 Solitary, or private. विविक्त-विजनच्छन्न-निःशलाकास् तथा रहः ॥
२४ रहश् चोपांशु चाऽलिङ्गे, रहस्यं तद् भवे त्रिषु । 1 Occurring in private.
2 Trust or confidence. 1 Deviation from right. समौ विस्रंभ-विश्वासौ, भ्रेषो भ्रंशो यथोचितात् ॥

प्रकृतयः स्मृताः ॥ १८ ॥ संधानं संधिः, एकत्वमित्यर्थः । विरुद्धं ग्रहणं स्वस्थाना-त्परमंडला दाहविलोदिर्विग्रहः । यानं यातव्यं प्रति यात्रा । आसनं विग्रहादिनि-वृत्तिः । द्वौ प्रकारौ द्वैधं, द्वित्र्योश्चधमुञ् (५।३।४५ / १९९१) एकेन संधायान्यत्र यात्रेत्यर्थ यद्वा—बलिनोर्द्विषतोर्मध्ये वाचात्मानं समर्पयन् । द्वैधीभावेन वर्तेत काकाक्षिवदल-क्षित : ॥ अशक्त्या बलवदाश्रयणमाश्रयः । गुणा राज्योपकारकाः । शक्यते जेतुमाभिः शक्तयः । कोशदण्डर्द्धिः प्रभुशक्तिः । उद्यम्य सहनमुत्साहशक्तिः । मन्त्रः पञ्चाङ्गो मन्त्रशक्तिः ॥ १९ ॥ प्रागवस्थानतः शक्तिसिद्धयोरपचयः क्षयः, साम्यं स्थानं उप-चयो वृद्धिः । नीतेरन्यत्र धर्मादिस्त्रिवर्गः [एतत्त्रयं नीतिवादिनां राज्ञां त्रिवर्ग इत्युच्यते प्रतपन्त्यनेन प्रतापः । प्रभवन्त्यनेन प्रभावः । तेज उत्कटत्वं, यद्भरतः—अधिक्षे-पावमानादेः प्रयुक्तस्य परेण यत् । प्राणात्ययेऽप्यसहनं तत्तेजः समुदाहृतम् ॥ २० ॥ उपैत्यनेनोपायः । मायोपेक्षेन्द्रजालान्यत्रैवान्तर्भूतानि । सहसि बले भवं साहसम् । स्यति वैरं सामयति वा साम प्रियवचनादि, साम सान्त्वने । सान्त्व सामप्रयोगे ॥ २१ ॥ संहतयोर्भेदनं भेदः । उपांशु जपनमुपजापः । उपधीयते समीपे ढौक्यते परोक्षार्थमुपधा, धर्मकामार्थभयोपन्यासेनाशयान्वेषणं, यत्कौटिल्यः—उपधाभिः शौचा-शौचपरिज्ञानममात्यानाम्, (कौ. १।१०) आत्माध्वानौखे (६।४।१६९ / १६७१) इति प्रकृतिभावः ॥ २२ ॥ पञ्च (शब्दाः) निःशलाकान्ता वक्ष्यमाणा वाच्यलिङ्गाः । न षड-क्षीणि यत्रापडक्षीणोमन्त्रः, अषडक्षशितंग्वलंकर्मेति (५।४।७ / २०७१) स्वार्थे खः, यदाहुः—षट्कर्णो भिद्यते मन्त्रः (हि. ७७) । विविच्यते पृथक् क्रियते स्म विविक्तम् । विगतो जनो (यतः) विजनम् । छाद्यते स्म छन्नम् । निर्गता शलाका व्यथकोऽत्र निःशलाकम् । रहयति रह इत्येको रहः शब्दः सान्तः क्लीबे ॥ २३ ॥ अन्योऽव्ययम् । अव्यये अलिङ्गे

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh

5 Propriety or fitness.
6 Right, fit or proper.
२५ अभ्रेष-न्याय-कल्पास् तु देशरूपं समञ्जसम् ।
युक्तमौपयिकं लभ्यं भजमानाऽभिनीत-वत् ॥

2 Deliberation.
6 An order or command.
२६ न्याय्यं च त्रिषु षट्, संप्रधारणा तु समर्थनम् ।
अववादस् तु निर्देशो निदेशः शासनं च सः ॥

4 Continuance in the right way.
4 Reform.
3 Offence or transgression.
2 Binding.
२७ शिष्टिश् चाऽऽज्ञा च, संस्था तु मर्यादा धारणा स्थितिः ।
'सुधारणा सुधारा स्त्री सुस्थितिः सुदशोन्नतिः' ॥
आगो ऽपराधो मन्तुश् च, समे तूद्दान-ऋन्धने ॥

1 Double penalty.
3 Royal revenue.
1 Toll.
२८ द्विपाद्यो द्वि-गुणो दण्डो, भागधेयः करो बलिः ।
घट्टाऽऽदि-देयं शुल्को ऽस्त्री, प्राभृतं तु प्रदेशनम् ॥

6 A present.
२९ उपायनमुपग्राह्यमुपहारस् तथोपदा ।
2 A special gift.
यौतकाऽऽदि तु यद् देयं सुदायो हरणं च तत् ॥

द्वे (रहश्चोपांशु च) । अनुरहसं च । रहसि भवं रहस्यं, दिगादित्वाद्यत् (४।३।५४ / १४२९) । विश्रम्भणं विश्रम्भ आश्वासः । यथोचिताद्रूपाद्भ्रंशो (भ्रंशो) धःपातो भ्रेषः, भ्रेषृ चलने ॥ २४ ॥ नियतमीयते न्यायः परिन्योर्नीणोः (३।३।३७ / ३२०९) इति घञ् । कल्पनं कल्पः सामर्थ्यम् । दिश्यमानस्योचितस्य रूपं देशरूपं, प्रशस्तं देशनं वा । सम्यग्ञ्जसा सत्यमत्र समञ्जसम् । उपाय एवौपयिकं, विनयादित्वात्–(५।४।३४ / १९४) उपायो ह्रस्वत्वंच इति ठक् । अभिनीयतेऽस्माभिर्नीतम् ॥ २५ ॥ तद्वन्न्याय्यं, न्यायादनपेतं, धर्मपथ्यर्थेति (४।४।९२ / १६६४) यत् । उचितं सांप्रतं च । संप्रधार्यते भ्रष्टं स्वरूपमापद्यते ययेति संप्रधारणा युक्तायुक्तपरीक्षा । अवनम्य वदनमववादो मुखस्वरूपम् । निःशेषेण देशनं निर्देशः । नियतं देशनं निर्देशः ॥ २६ ॥ शासनं नियोजनं शिष्टिः । आज्ञापनमाज्ञा । संतिष्ठतेऽनया संस्था । मर्येति समिपार्थं (सीमार्थं) मव्ययं, तत्र दीयते मर्यादा । आ–अगति कुटिलं गच्छति–आगः, असन्तः क्लीबे । मन्यते हृदि मन्तुः । उद्दीयतेऽस्मिन्नुद्दानं, दोऽवखण्डने, देङ् रक्षणे वा ॥ २७ ॥ द्वौ पादौ प्रमाणमस्य द्विपाद्यः, पणपादमाषशताद्यत् (५।१।३४ / १६९९), प्राण्यङ्गत्वाभावात् पद्यत्यतदर्थे (६।३।५३ / ९९१) इति पद्भावाभावः । भागोंऽश एव भागधेयः नामरूपभागेभ्यो धेयः (२।०।९३ / ३३३७) । कीर्यते प्रत्येकं करः । वलन्तेऽनेन बलिः, राजग्राह्यः षड्भागादिर्भागः । प्रत्येकं स्थावरजङ्गमादिदेयः करः । नियोज्योपजीव्यो बलिरित्यवान्तरभेदोऽर्थशास्त्रोक्तो नाश्रितः । घट्टन्तेऽनेन घट्टयति वा घट्टो नदीतरस्थानम् । आदिशब्दाद् गुल्मप्रतोल्यादौ प्रावेश्यनैष्का (ष्क) म्यद्रव्येभ्यो राजग्राह्यो भागः शुल्कः शवति शलति वा सुखेन यात्यनेनेति । प्रकर्षेणाराधनार्थमाभ्रियते ढौक्यते स्म प्राभृतम् । प्रदिश्यते प्रदीयते प्रदेशनम् ॥ २८ ॥ उप समीपेऽयतेऽनेनोपायनम् ।

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh

2 Present time.
1 Future time.
1 Immediate consequence.

३० तत्कालस् तु तदात्वं स्यादुत्तरः काल आयतिः ।
साद्दष्टिकं फलं सद्यः, उदर्कः फलमुत्तरम् ॥ 1 Future consequence.

1 Causal and unseen danger.
1 Latent danger.

३१ अदृष्टं वह्नि-तोयाऽऽदि, दृष्टं स्व-पर-चक्र-जम् । 1 Obvious danger.
महीभुजामाहिभयं स्व-पक्ष-प्रभवं भयम् ॥

2 Bearing of royal insignia.
2 A throne.
1 One made of gold.

३२ प्रक्रिया त्वधिकारः स्याच्, चामरं तु प्रकीर्णकम् । 2 A cow tail.
नृपासनं यत् तद् भद्रासनं, सिंहासनं तु तत् ॥

2 A parasol.
1 A royal one.
2 An auspious jar.
2 A golden vase.

३३ हैमं, छत्रं त्वातपत्रं, राज्ञस् तु नृपलक्ष्म तत् ।
भद्रकुम्भः पूर्णकुम्भो, भृङ्गारः कनकालुका ॥

2 A camp.
2A sentry or guard.
1 Component part of an army.

३४ निवेशः शिबिरं षण्ढे, सज्जनं तूपरक्षणम् ।
हस्त्यश्व-रथ-पादातं सेनाङ्गं स्याच् चतुष्टयम् ॥

15 An elephant.

३५ दन्ती दन्तावलो हस्ती द्विरदो ऽनेकपो द्विपः ।
मतङ्गजो गजो नागः कुञ्जरो वारणः करी ॥

उपगृह्यत उपग्राह्यम् । उपह्रियत उपहारः । उपदीयत उपदा । कौशलिकं ढौकनं च । उपदोत्कोच इत्येके, उपप्रदानमुत्कोच उपदा लञ्चया समाः । युतयोर्वधूवरयोरिदं यौतकम् । आदिशब्दाद् बन्धुदत्तादि । सुष्ठु दीयते सुदायः, स दाय इत्येके, यच्छाश्वतः यौतकादि धनं दायो दायो दानं च कथ्यते (४५) । ह्रियते हरणम् ॥२९॥ स चासौ कालश्च तत्कालः । तदेत्यस्य भावस्तदात्वम् । एष्यत्यायतिरागामी कालः । संदृष्टं प्रत्यक्षं प्रयोजनमस्य सांदृष्टिकम् । समानेऽहनि सद्यस्तात्कालिकं फलं, सद्यःपरुत्परारीति (५।३।३२ / १९७०) साधुः । उदृच्यतेऽभिलाषात्स्तूयत उदर्कः ॥ ३० ॥ भयमित्युत्तरेण योज्यम् । आदिशब्दात्पिशाचाशन्यादि । स्वराष्ट्राच्चौराटविकादिभयम्, परराष्ट्राद्दाहविलोपादिभयं च । स्वपक्षाद्राजपुत्रादेरहेरिव गृहस्थिताद्भयम् ॥ ३१ ॥ प्रारम्भात्करणं प्रक्रिया । अधिक्रियते प्रस्तूयतेऽधिकारः, व्यवस्थापनमित्यर्थः । चमर्या इदं चामरम् । प्रकीर्यते विक्षिप्यते प्रकीर्णम् । भद्रस्यासनं, भद्रं रूप्यादिमयं वासनं भद्रासनम् । हेम्न इदं हैमं सिंहोपलक्षितमासनम् ॥ ३२ ॥ छाद्यतेऽनेन च्छत्रम् । आतपात्त्रायत आतपत्रम् । तच्छत्रम्, यल्लक्ष्यं—नृपतिककुदं दत्त्वा यूने सितातपवारणम् (रघु० ३—५०) । भद्रार्थं भद्रो वा कुम्भः । भृज्यते भ्रियते वा भृङ्गारः । सौवर्ण आलुः (कनकालुका) ॥ ३३ ॥ निवश्यते संनिवेशेन स्थाप्यते निवेशः सैन्यावासः । शेरतेऽस्मिञ्शिबिरम् । स्कन्धावारोऽपि । सच्छोभनं जन्यतेऽनेन सज्जनं सज्ज्यत्वेनेन वा । उपरक्ष्यतेऽनेनोपरक्षणं सैन्यस्य प्रगुणीकरणं गुल्मको वा ॥ चतुरङ्गा हि सा (सेना), पदातीनां समूहः पादातं, भिक्षादित्वात् (४।२।३८ / १२४४) अण् ॥ ३४ ॥ दन्तौ स्तोऽस्य दन्ती दन्तावलः । दन्तशिखात्संज्ञायां (५।२।११३ / १९२७) इति वलच्, वले (६।३।११८ / १०४०)

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh

2 The leader of a wild herd.
2 A rutting elephant.
3 A furious elephant.

३६ इभः स्तम्बेरमः पद्मी, यूथनाथस् तु यूथपः ।
मदोत्कटो मदकलः, कलभः करिशावकः ॥ 1 A young elephant.

२ An elephant out of rut.

2 A herd of elephants.

३७ प्रभिन्नो गर्जितो मत्तः, समौ उद्वान्त-निर्मदौ ।
हास्तिकं गजता वृन्दे, करिणी धेनुका वशा ॥ 3 A female elephant.

2 The temples.

३८ गन्डः कटो, मदो दानं, वमथुः करशीकरः ।

2 The temporal juice. 2 Water emitted from the elephant's trunk.

1 His frontal globes.

कुम्भौ तु पिण्डौ शिरसस्, तयोर् मध्ये विदुः पुमान् ॥

1 His forehead.
1 His eyeball.
1 The hollow between them.

३९ अवग्रहो ललाटं स्यादीषिका त्वक्षि-कूटकम् ।
अपाङ्ग-देशो निर्याणं, कर्ण-मूलं तु चूलिका ॥ 1 Root of his ear.

1 Corner of his eye.
1 Part below the frontal globes.

४० अधः कुम्भस्य वाहित्थं, प्रतिमानमधो ऽस्य यत् ।

1 Under that; between the tusks.

1 His withers.

आसनं स्कन्ध-देशः स्यात्, पद्मकं बिन्दु-जालकम् ॥

1 Marks on his face and trunk.

इति दीर्घः । हस्ती, हस्ताज्जातौ (५।२।१३३/१९३९) इतीनिः । द्वौ रदावस्यद्विरदः । न एकेन पित्रत्यनेकपः । द्वाभ्यां पिबति द्विपः । मतङ्गाद्यपेर्जातो मतङ्गजः । गजति माद्यति गजः । नगे भवो नागः, न- अगो वा । कुञ्जौ कुम्भाधोगतौ दंष्ट्रे वा स्तोऽस्य कुञ्जरः, (रप्रकरणे) खमुखकञ्जेभ्यो रो वक्तव्यः (वा० ५।२।१०७/३१९८), कुञ्जेषु रमते, डः । वारयत्यरीन्वारणः ॥३५॥ एतीभः । स्तम्बे तृणे रमते स्तम्बेरमः, स्तम्बकर्णयोरमिजपोः (३।२।१३/२९३७) इत्यच् । पद्मानि यौवने रक्तबिन्दवोऽस्य सन्ति पद्मी । सामजः सिन्धुरः कुम्भी च । इतोऽश्वेभ्यः प्राग्गजवर्गः । मदेन दानाम्बुना कलो मनोज्ञः । कलो भाति कं लभते वा कलभः ॥ ३६ ॥ प्रभिद्यते स्म प्रभिन्नः । गर्जा संजाताऽस्य गर्जितः । उद्वमति स्मोद्वान्तः, टुवम (उद्गिरणे) । राजवाद्यस्वौपवाह्यः सन्नाह्यः समरोचितः । हस्तिनां समूहो हास्तिकं, अचित्तहस्तिधेनोष्ठक् (४।२।४७/१२५६) । गजानां समूहो गजता, गजाच्चेति वक्तव्यात्तल (गजसहयाभ्यांचेतिवक्तव्यम्) । धयत्येनां धेनुका । वष्टि कामयते वशा ॥ ३७ ॥ (गण्डति) गडि वदनैकदेशे । कटति वर्षति मदं कटः । माद्यत्यनेन मदः, मदोऽनुपसर्गे (३।३।७७/३३४४) इत्यप् । द्यति खण्डयत्यनेनेति दानम्, दत्तिर्वा । वम्यते वमथुः, ष्ठिवुतोथुच् (३।३।८९/३३६७) कुम्भाकृती मांससंघातौ । वेत्ति संज्ञां यस्मादङ्कुशस्यानात्स विन्दुः, यत्पालकाप्यः – तत्र रक्षाविताने द्वे विद् द्वौ श्रवणे गतौ । प्राक्च पश्चाच्च तिर्यक्च षड्भेदाङ्कुशवारणा (?) ॥३८॥ अवगृह्यतेङ्कुशेनावग्रहः । ईषा लाङ्गलकीलेव – ईषिका । निर्यात्यनेनाश्रु निर्याणम् । चोल्यते पार्श्वगमनायाङ्कुशेनास्यां चूलिका ॥३९॥ वाह्यतेऽनेननाङ्कुशचोदनया वाहित्थम्, मदवाहिनि स्थाने तिष्ठति वा, वाह्यस्यापभ्रंशोऽयम् ।

CC-0. Agamnigam Foundation. Digitized by eGangotri Research Foundation, Chandigarh

1 His side or flank. ४१ पार्श्व-भागः पक्षभागो, दन्तभागस् तु यो ऽग्रतः ।
1 His front.
1 His shoulder and thigh. द्वौ पूर्व-पश्चाज्जङ्घाऽऽदि-देशौ गात्राऽवरे क्रमात् ॥

1 Pike to drive him. ४२ तोत्रं वेणुकमालानं बन्ध-स्तम्भे, ऽथ शृङ्खले ।
1 Post to which he is secured. 1 Chain for his feet.
2 Hook to guide him. अन्दुको, निगडोऽस्त्री-स्यादङ्कुशोऽस्त्री सृणिः स्त्रियाम् ॥

2 Leather girt. ४३ चूषाकक्ष्या वरत्रा स्यात्, कल्पना सज्जना समे । 2 Dressing an elephant.
4 His trappings. प्रवेण्यास्तरणं वर्णः परिस्तोमः कुथो द्वयोः ॥

1 Unfit for riding. ४४ वीतं त्वसारं हस्त्यऽश्वं, वारी तु गजबन्धनी । 2 An elephant-stable.
13 A horse. घोटके पीति-तुरग-तुरङ्गाऽश्व-तुरङ्गमाः ॥

४५ वाजि-वाहाऽर्व-गन्धर्व-हय-सैन्धव-सप्तयः ।
1 Horses of a good breed. आजानेयाः कुलीनाः स्युर्, विनीताः साधु-वाहिनः ॥
1—trained for the manege.

अस्य वाहित्थस्याधः प्रतिमानं, प्रतिमीयतेऽनेनेति, डुमिञ् प्रक्षेपणे, मीनाति मिनोतिदीङांल्यपिच (६।१।५४ / ३८०८) इत्यात्वम् । आस्यतेऽस्मिन्नासनम् । पद्मप्रतिकृति रक्तत्वात्पद्मकं, तारुण्ये हि हस्तिनां देहे रक्तबिन्दवः स्युः ॥ ४० ॥ हस्तिनां योऽग्रतो भागः (दन्तभागः) हस्तिनः पूर्वः पादजङ्घादिभागो गात्रम्, पश्चाद्भागोऽवरम् ॥ ४१ ॥ तुद्यतेऽनेन वेणुमयेन प्रेषणेनेति तोत्त्रम् । आलायते बध्यतेऽत्रालानं, ला—आदाने । शृणाति बन्धनेन शृङ्खलम् । अन्दति बध्नाति—अन्दूः, अदि बन्धने, स्वार्थे कन्, इकोह्रस्वोङ्योगालवस्य (६।३।६१ / ९९९) । निगल्यते बध्यतेऽनेन निगडः । अङ्क्यते गम्यतेऽनेनाङ्कुशः । सरत्यनया सृणिः ॥ ४२ ॥ दूष्यते दूयते वानया दूष्या । कक्षायां मध्यदेशे भवा कक्ष्या । व्रियतेऽनया वरत्रा मध्यबन्धनी चर्मरज्जुः । (कल्पना) हस्तिनः सज्जीकरणं, मक्कोलगौरिकादिना शृङ्गारेणेत्येके । प्रवयत्येनां प्रवेणी । आस्तीर्यते हस्तिपृष्ठ आस्तरणम् । वर्णो वर्णकम्बलो भीमवत् । परिस्तोम्यते प्रस्तीर्यते परिस्तोमः, वर्ण परिस्तोम इत्येके । कुथ्यते कुथा ॥ ४३ ॥ वेति स्मयाति भुङ्क्ते च वीतं, विशेषेणेतं नष्टं वा । (हस्त्यश्वं) सेनाङ्गत्वात्समाहारः । वार्यतेनया वारी गजदानभूः । घोटते भूपौ परिवर्तते घोटकः । वेति यति वीतिः । तुरं त्वरितं गच्छति तुरगः, डः । (तुरङ्गः) खच्चडिद्वच्यः (वा० ३।२।११ / ३९७४) । (तुरंगमः) गमश्चेति (३।२।४७ / ३९६४) खच् । अश्नुतेऽध्वानमश्वः ॥ ४४ ॥ वजति तच्छीलो वाजी, वाजाः पक्षा अभूवन्नस्येति वा । वाह्यते वाहः । अर्वति यात्यर्वा । गन्ध्यतेऽर्द्यते गन्धर्वः । हयति याति हयः । सिन्धौ भवः सैन्धवः, विशेषोऽपि सामान्यवृत्तिः । सपति समवैति सप्तिः । इतो रथप्रकरणात्प्रागश्वपरिकरः । आजेन क्षेपेणानेयाः

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh

1 Horses of certain local breeds.
1 A horse fit for sacrifice.

४६ वनायुजाः पारसीकाः काम्बोजा वाह्लिका हयाः ।
ययुरश्वोऽश्वमेधीयो, जवनस् तु जवाऽधिकः ॥
1 A fleet horse ; a courser.

2 A pack horse.
1 A white horse.

४७ पृष्ठ्यः स्थौरी, सितः कर्को, रथ्यो वोढा रथस्य यः ।
1 A chariot-horse.

1 A colt.
3 A mare.

बालः किशोरो, वाम्यश्वा वडवा, वाडवं गणे ॥ 1 A stud.

1 A day's journey for a horse.
2 Neighing.
1 A horse's flank.

४८ त्रिष्वाश्वीनं यदश्वेन दिनेनैकेन गम्यते ।
कश्यं तु मध्यमश्वानां, हेषा ह्रेषा च निस्वनः ॥

1 The throat.
5 A horse's paces.

४९ निगालस् तु गलोद्देशे, वृन्दे त्वश्वीयमाश्व-वत् । 1 A multitude of horses.
आस्कन्दितं धौरितकं रेचितं वल्गितं प्लुतम् ॥

(आजानेयाः), आयत्ता इत्यर्थः । विनीयन्ते विनीताः सुशिक्षाः ॥ ४५ ॥ वनायुजादिषु देशेषु–एते जाता हयविशेषाः । एवं तुक्खारादयोऽपि । लक्ष्ये वाह्लीकोश्वः । याति–अत्यर्थं ययुः । अश्वमेधाय हितोऽश्वमेधीयः, अश्वमेधाच्छच (?) जवते तच्छीलो जवनः, जुचङ्क्रम्येति ($\frac{३।२।१५०}{३१३०}$) युच् । मृगादिरपि । प्रजोरिनिः ($\frac{३।२।३५६}{३१५६}$) इति प्रजवीति च ॥ ४६ ॥ यत्पृष्ठे जलादिकमुह्यतेऽसौ पृष्ठ्यः, साधौ यत् (तत्रसाधुः) । स्थूराणां पश्चाज्जङ्घादिभागानामिदं स्थौरं बलमस्त्यस्य स्थौरी । कर्कः शुक्लोऽश्वः, क्रियन्ते वर्णान्तराण्यस्येति । रथं वहति रथ्यः, तद्वहतिरथयुगेति यत् ($\frac{४।४।७६}{१६२७}$) । क्रीयते बोध्यते कश्यते वा किशोरः । वाम्यते गर्भं वामी, यल्लक्ष्यम्–अयोष्ट्वामीशतहारि(वाहि)तार्थम् (रघु० ५।३२) । वडं बलं हयं वा वाति वडवा, स्त्रीविषयत्वाद् ङीप् नास्ति । अश्वा त्वजादिः । प्रसूर्नानार्थे । वाडवानां समूहो वाडवं, खण्डिकादिभ्यश्च ($\frac{४।२।४५}{१२५४}$) इत्यञ् ॥ ४७ ॥ (आश्वानं) अश्वस्येकाहगम इति ($\frac{५।२।१९}{१८२०}$) खञ् । कशामर्हति काश्यम् । हेषृ हेषृ अव्यक्ते शब्दे, गुरोश्चहल इति ($\frac{३।३।१०३}{३२२०}$) अः ॥ ४८ ॥ निगलन्त्यनेन निगलः, गलो जत्रुसन्धिः, उन्न्योर्ग्र इति ($\frac{३।३।१२९}{३२००}$) घञ् । गलस्योद्देशः प्रदेशः देवमणेरावर्तस्य स्थानम् । अश्वानां समूहः (आश्वीयं आश्वं), केशाश्वाभ्यांयञ्छावन्तरस्याम् ($\frac{४।२।४८}{१२५७}$), पक्षे तु–अनुदात्तादेरञ् ($\frac{४।२।४४}{१२५३}$) । अश्वानां धाराख्या इमाः पञ्च गतयः, धार्यते गतौ स्थाप्यतेऽनया धारा, भिदादित्वात्साधुः (षिद्भिदादिभ्योङ् $\frac{३।३।१०४}{३२८१}$) । आस्कन्दनमास्कन्दितं, उत्तेरिताख्योतिवेगः । धोरणं धोरितं, धोर्क्ष गतिचातुर्ये । रेचितमुत्तजिताख्यम् । क्रमस्त्वन्यथा, यदाहुः–धोरितं वल्गितं धारा प्लुन्मुत्तेजितं क्रमात् । उत्तेरितं चेति पञ्च शिक्षयेत्तुरगं गतम् ॥ धोरितं गतिमात्रे यद्योजनं वल्गितं पुरः । अग्रकायसमुल्लासात् कुञ्चितास्यं नतत्रिकम् ॥ पूर्वापरोन्नमनतः क्रमादारोपणं प्लुतम् ॥

CC-0. Agamnigam Foundation. Digitized by eGangotri Chandigarh

1 His paces generally.
2 The bit of the bridle.
2 A horse's hoof.

५० गतयो ऽमूः पञ्च धारा, घोणा तु प्रोथमस्त्रियाम् । 1 His nose.
कविका तु खलीनो ऽस्त्री, शफं क्लीबे खुरः पुमान् ॥

5 His tail.
2 A horse rolling himself.

५१ पुच्छोऽस्त्री लूम-लाङ्गूले बालहस्तश् च बालधिः ।
त्रिषूपावृत-लुठितौ परावृत्ते मुहुर् भुवि ॥

3 A war chariot.

५२ याने चक्रिणि युद्धाऽर्थे शताङ्गः स्यन्दनो रथः ।

1 Any other car.

असौ पुष्परथश् चक्र-यानं न समराय यत् ॥

3 A covered car.
2 A cart.
1 A carriage drawn by oxen.

५३ कर्णीरथः प्रवहणं हयनं च समं त्रयम् ।
क्लीबे ऽनः शकटोऽस्त्री स्याद्, गन्त्री कम्बलि-बाह्यकम् ॥

2 A litter.
2 A hammock or swing.

५४ शिबिका याप्ययानं स्याद्, दोला प्रेङ्खाऽऽदिकाः स्त्रियाम् ।

2 A car covered with tigerskin.

उभौ तु द्वैप-वैयाघ्रौ द्वीपि-चर्माऽऽवृते रथे ॥

1—with white woolen cloth.
1—with blanket or cloth, etc.

५५ पाण्डु-कम्बल-संवीतः स्यन्दनः पाण्डुकम्बली ।
रथे काम्बलवास्त्राऽऽद्याः कम्बलादिभिरावृते ॥

उत्तेजितं मध्यवेगं योजनं श्लथवल्गया । उत्तेरितेति वेगान्धो न श्रृणोति न पश्यति ॥ ४९ ॥ घोणते श्वासेन वलते घोणा । प्रवते प्रोथः, वृत्तो नासान्तः-प्रदेशः । कक्ते दन्तचर्वणाच्छब्दायत इति कविका । खलति चलति खलीनं, खे तालुनि लीनं वा । शण्यते भुवा घृष्यते शफम् । खुरति विलिखति क्ष्मां खुरः ॥ ॥ ५० ॥ पूयते दंशादीनुत्सारयति पुच्छं, पूतौ छादयति वा । लूयते लूमम् । लङ्गति चलति लाङ्गूलम् । वालो हस्त इव दंशवारणाद् वालहस्तः, प्रशस्ता वाला वा । बाला धीयन्तेऽस्मिन्बालधिः । उपावर्तते स्मोपावृत्तोऽश्वः । लुठति स्म लुठितः ॥५१॥ यात्यनेन यानं साम्परायिकाख्यम् । शताङ्गो बह्वरकः । स्यन्दते याति स्यन्दनः । रमन्तेऽस्मिन् रथः । इतो भटादेः प्राग्रथप्रकरणम् । पुष्ये यात्रोत्सवादौ मङ्गल्यो रथः पुष्यरथः । चक्रयुक्तं यानं (चक्रयानम्) ॥ ५२ ॥ कर्णिषु स्कन्धेषु रथः कर्णीस्थः, दीर्घो लक्ष्यात्, पुंस्कधोह्यमानो रथः । प्रवहन्त्यनेन प्रवहणम् । डयन्ते विहायसा यान्तीवानेन (डयनम्) विमानाख्यम् । अनिति चीत्करोत्यनः, असुन् । शक्नोति भारं वोढुं शकटम् । गच्छति तच्छीला गन्त्री शकटिका । कम्बलिभिर्दान्तैर्वोढव्यं (कम्बलिबाह्यकम्) ॥ ५३ ॥ (शिबिका) शिवा श्रेयस्करी, संज्ञायां कन् ($\frac{५।३।८७}{२०४२}$) । याप्यस्याशक्तस्य यानं, युगाख्यं यानमिति गौडः । दोल्यते दोला काष्ठमयी रज्जु-प्रालम्बश्च । प्रेङ्ख्यते प्रेङ्खा हिन्दोलाख्या । आदिशब्दाच्छया [य] नकादि याप्य-यानानुवृत्तेः । द्वीपिनश्चर्मणावृतो रथः, द्वैपवैयाघ्रादञ् ($\frac{४।२।१२}{१२१३}$) ॥ ५४ ॥ पाण्डु-कम्बलेन प्रावृतौ रथः, पाण्डुकम्बलादिनिः ($\frac{४।२।११}{१२१२}$) । (काम्बलवास्त्राद्याः)

CC-0. Agamnigam Foundation. Digitized by Siddhanta eGangotri Gyaan Kosha

2 A multitude of cars. ५६ त्रिषु द्वैपाऽऽदयो, रथ्या रथकट्या रथ-व्रजे ।
2 Fore-part of a carriage. धूः स्त्री क्लीबे यानमुखं, स्याद् रथाङ्गमपस्करः ॥
2 Any part of a carriage.

2 A wheel. ५७ चक्रं रथाङ्गं, तस्याऽन्ते नेमिः स्त्री स्यात् प्रधिः पुमान् ।
2 Its periphery.
2 Its nave. पिण्डिका नाभिरक्षाग्र-कीलके तु द्वयोरणिः ॥
1 The pin of the axle.

2 The fender of a carriage. ५८ रथगुप्तिर् वरूथो ना, कूबरम् तु युगंधरः । 2 The pole.
1 Bottom of a carriage. अनुकर्षो दार्वधःस्थं, प्रासंगो ना युगाद्-युगः ॥
1 A separate yoke.

5 Any vehicle. ५९ सर्वं स्याद् वाहनं यानं युग्यं पत्रं च धारणम् ।
1 A mediate one. परम्परा-वाहनं यत् तद् वैनीतकम-स्त्रियाम् ॥

4 Elephant drivers. ६० आधोरणा हस्तिपका हस्त्यारोहा निषादिनः ।
8 A charioteer. नियन्ता प्राजिता यन्ताः सूतः क्षत्ता च सारथिः ॥

परिवृतोरथः (४।२।१२ / १२१३) इत्यण् । आदिशब्दाद् दुकूलाद्याः ॥ ५५ ॥ वाच्यलिङ्गत्वाद् द्वैपी गन्त्री, द्वेपो रथः, द्वैपमनः । शकटाद्यपि रथत्वेन मन्यन्ते । रथानां समूहे, खलगोरथात् (४।२।५० / १२५९), इनित्रकट्यचश्च (४।२।५१ / १२६०) इति यत्कट्यच्च । धूर्वति हिनस्ति वोढारं धूः, यस्या अग्रे वोढारो बध्यन्ते । यानमुखं रथादेरग्रम् । रथारम्भकं चक्रादन्यत्, अपकरोति (कीर्यते) अपस्करः, अपस्करोरथाङ्गमिति (६।१।४९ / १०६४) साधुः ॥ ५६ ॥ रथस्य यच्चक्रं तद्वूढ्या रथाङ्गम् । तस्य चक्रस्यान्ते नेमिः, नयतीति । प्रान्ते धीयत इति प्रधिः । पिण्ड्यतेऽरा यस्यां सा पिण्डिका । नभ्यते हिस्यतेऽक्षेण नाभिः । अक्षस्य नाभिक्षेप्यकाष्ठस्थान्ते बन्धार्थं कीलकः, अणति शब्दायतेऽणिः, लक्ष्ये त्वाणी ॥ ५७ ॥ व्रियते गुप्त्यर्थं रथो येन स वरूथो लोहादिमयी वृतिः । कूयते शब्दायते कूवरः । युगं वोढृस्कन्धकाष्ठं धारयति युगंधरः, संज्ञायाभृतृवृजीति (३।२।४६ / २९६३) खच् । अनुकृष्यतेऽनुकर्षः । प्रसज्यते वोढृस्कन्धे प्रासङ्गः । युगेनातति युगाद्रथादिस्तस्य युगो ना पुमान्, अन्यस्तु क्लीबे युगं कालो युग्मं वा । युगाद्युगान्तरं वत्सदमनार्थमिति गौडः, यत्कात्यः [मुनिः]-युगं द्वितीयं प्रासङ्गः ॥ ५८ ॥ सर्वं हस्त्यश्वरथादि दोलान्तम् । योक्तव्यं युग्यं, युग्यं च पत्रे (३।१।१२१ / २०७३) इति साधुः । पतन्त्यनेन पत्त्रं, दाम्नीशयेति (३।२।१८२ / ३१६२) ष्ट्रन् । धोर्यतेत्र धोरणम् । वोढृभिः परम्परया वाह्यते, प्राबन्धिकमभ्यासस्थितम् । विनीता (तका) नामिदं (वैनीतकं) याप्ययानादि ॥ ५९ ॥ आधोर्यते हस्ती यैराधोरणाः । हस्तिनः पान्ति हस्तिपकाः । हस्तिनमारोहन्ति हस्त्यारोहाः । निषीदन्त्यवश्यं निषादिनः । द्वौ द्वौ भिन्नार्थावित्येके, आद्यौ द्वौ पालकौ परौ द्वौ योद्धारौ । नियच्छति नियन्त्रयति नियन्ता । प्राजयति (प्राजति) प्राजिता, वानुवृत्तेर्वीभावो

CC-0. Agamnigam Foundation. Digitized by eGangotri Chandigarh

६१ सव्येष्ठ-दक्षिणस्थौ च संज्ञा रथ-कुटुम्बिनः ।
2 Warriors in chariots. 2 Horsemen. रथिनः स्यन्दनारोहा, अश्वारोहास् तु सादिनः ॥

3 Warriors generally. ६२ भटा योधाश् च योद्धारः, सेनारक्षास् तु सैनिकाः ।
2 Guards or sentinels.
2 Arrayed troops. सेनायां समवेता ये सैन्यास् ते सैनिकाश् च ते ॥

2 A thousand strong. ६३ बलिनो ये सहस्रेण साहस्रास् ते सहस्रिणः ।
2 A guard or attendant. 2 A general. परिधिस्थः परिचरः, सेनानीर् वाहिनीपतिः ॥

2 Armour; hawberk. ६४ कञ्चुको वारवाणो ऽस्त्री यत् तु मध्ये स-कञ्चुकाः ।
2 The girdle over the coat of mail. बध्नन्ति तत् सारसनाधिकाङ्गे, ऽथ शीर्षकम् ॥ 3 A helmet.

६५ शीर्षण्यं च शिरस्त्रे, ऽथ तनुत्रं वर्म दंशनम् ।
7 Mail. उरश्छदः कङ्कटको जागरः कवचो ऽस्त्रियाम् ॥

नास्ति (इ०)। सुवति सूतः, पू प्रेरणे। क्षदति क्षत्ता। सरथस्यापत्यं सारयति वाहान्वा सारथिः ॥ ६० ॥ सव्ये तिष्ठति सव्येष्टः (ष्टा), सव्येस्थश्छन्दसीति (उ० २५८) ऋत् (ऋ)-डिच्च, स्थास्थिन्स्थूणामितिवक्तव्यात् (वा० ४।१।६२) षत्वम्। रथस्य कुटुम्बी वाहकः। (रथिनः) रथे योद्धारः। (अश्वारोहाः) अश्ववाराख्याः ॥ सीदन्त्यवश्यं सादी ॥ ६१ ॥ भटन्ति काङ्क्षन्ति युद्धं भटाः। युध्यते योधः, पचाद्यच् (नन्दिग्रहीति)। (सैनिकाः) रक्षतीति (४।४।३३/१५८३) ठक्, प्राहरिकाद्याः। सेनां समवयन्ति श्लिष्यन्ति (सेन्याः), सेनाया वा (४।४।४५/१५९५) इति ण्यः, पक्षे ठक् ॥ ६२ ॥ बलं सैन्यं, सहस्रं योद्धारः सन्त्यस्य, तपःसहस्राभ्यांविनीनी (५।२।१०२/१९०९), अण्च (५।२।१०३/१९१०)। परिधौ सेनान्त तिष्ठति परिधिस्थः। परितः समन्ताच्चरति रक्षितुं परिचरः। सेना नयति नियुङ्क्ते सेनानीः ॥ ६३ ॥ कञ्च्यते बध्यते कञ्चुकः। वारमाच्छादकः। वानमस्य वारवाणः, पूर्वपदात्संज्ञायाम् (८।४।३/८५७) इति णत्वम्। वाणवारस्य व्यत्ययेन मयूरव्यंसकादित्वादिति **श्रीभोजः**। सारं सनोति ददाति सारसनम्। अविकमङ्गादधिकाङ्गः। सारसनाधिपाङ्ग इत्येके पेठुः, यन्मुनिः-अधिपाङ्गं सारसनम्, दुर्गस्तु-तस्य सारसनं ज्ञेयं धिपाङ्गं च निबन्धनम् ॥ ६४ ॥ शीर्षप्रतिकृतिः शीर्षकम्। शिरसि भवं शीर्षण्यं, शरीरावयवाद्यत् (५।१।१६/१६६६), शीर्षश्छन्दसि (६।१।६०/३५१४), येचतद्धिते (६।१।६१/१६६७) शिरस्त्रायते शिरस्त्रम्। वृणोत्यङ्गं वर्म। दंश्यते बध्यते दंशनम्। कङ्कटत्याच्छादयति कङ्कते वा (कङ्कटकः)। जागर्तेरचि ह्रस्वज्जगरः यन्माला-उरश्छदोऽथ जगरः। कवते कवचः, कं वञ्चयति वा ॥ ६५ ॥

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh

4 Clothed, or accoutred. ६६ आमुक्तः प्रतिमुक्तश् च पिनद्धश् चाऽपिनद्ध-वत् ।
5 Armed or mailed सन्नद्धो वर्मितः सज्जो दंशितो व्यूढकङ्कटः ॥
1 Multitude of soldiers mailed. ६७ त्रिष्वामुक्ताऽदयो, वर्मभृतां कावचिकं गणे ।
7 A foot-soldier. पदाति-पत्ति-पदग-पादातिक-पदातयः ॥
1 Infantry. ६८ पद्गश् च पदिकश् चाऽथ पादातं पत्ति-संहतिः ।
4 A soldier by profession. शस्त्राजीवे काण्डस्पृष्टाऽऽयुधीयाऽऽयुधिकाः समाः ॥
3 Skilled in archery ६९ कृतहस्तः सुप्रयोगविशिखः कृतपुङ्ख-वत् ।
3 Unskilled ; missing the butt. अपराद्धपृषत्को ऽसौ लक्ष्याद् यश् च्युत-सायकः ॥
6 An archer or bowman. ७० धन्वी धनुष्मान् धनुष्को निषङ्गयस्त्री धनुर्धरः ।
2 One fighting only with arrows. स्यात् काण्डवांस्तु काण्डीरः, शाक्तीकः शक्तिहेतिकः ॥
2 A warrior armed with an iron lance.
७१ यष्टीक-पारश्वधिकौ यष्टि-परशु-हेतिकौ ।
2—with a club, or a battle-axe. नैस्त्रिंशिको ऽसिहेतिः स्यात्, समौ प्रासिक-कौन्तिकौ ॥
2—with a sword. 2—with a spear.

आमुच्यते बध्यते स्मामुक्तः । अपिनह्यते स्मापिनद्धः । (पिनद्धः) वष्टि भागुरिरल्लोपमवाप्योरुपसर्गयोः (कौ०) इति पक्षेऽल्लोपः । संनह्यते स्म संनद्धः । वर्म संजातमस्य वर्मितः । सज्जायते सज्जति वा सज्जः । व्यूढो धृतः कङ्कटोऽनेन व्यूढकङ्कटः ॥ ६६ ॥ नवेत्यर्थः । (कावचिकं) ठञ्कवचिनश्च (४।१।४१) इति ठञ् । पादाभ्यामतति गच्छति पदातिः । पदाभ्यामजति पदाजिः, पादस्यपदाज्यातिगोपहतेषु । (६।३।५२) इति पदः । हलन्तपक्षे पद्गः, यल्लक्ष्यं-पद्गा भरद्वाजमुनिं सशिष्यम् (भट्टि० ३-४१) । पादाभ्यामतति पादातिकः, औणादिक इकः, विनयादित्वात्स्वार्थे ठग्वा (५।४।३४) । पतति (पद्यते) पत्तिः ॥ ६७ ॥ पादाभ्यां चरति पदिकः, पर्णदिभ्यष्ठन् (४।४।१०), इकेचरतौपद्वक्तव्यात् (वा० ३९५८) । पदातीनां समूहः पादातं, भिक्षादिभ्योण् (४।२।३८) । काण्डानि पृष्टेस्य काण्डपृष्टः । आयुधेन जीवति, आयुधाच्छचेति (४।१।१४) ठन्-छौ ॥ ६८ ॥ कृतौ सिद्धौ हस्तावस्य कृतहस्तः । कृतः पुङ्खोऽनेनेति कृतपुङ्खः । अपराद्धा अलब्धलक्ष्या बाणा अस्यापराद्धपृषत्कः ॥६९॥ धन्व-अस्यास्ति धन्वी, व्रीह्यादित्वादिनिः (५।२।११६) । धनुः प्रहरणमस्य धानुष्काः, तदस्य-प्रहरणमिति (४।४।५७) ठक्, इसुसुक्तान्तात्कः (७।३।५१) । निषङ्गस्तूणोऽस्यास्ति निषङ्गी । अस्त्राणि सन्त्यस्यास्त्री । (काण्डीरः) काण्डाण्डादीरन्नीरचौ (५।२।११९) शक्तिः प्रहरणमस्य शाक्तीकः, शक्तियष्टयोरीकक् (७।४।५९) ॥ ७० ॥ पर्श्वधः परशौ न दृष्टः, अतो यष्टिस्वधितिहेतिकाविति

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh

2—bearing a shield.
2 A standardbearer.
4 A companion or follower.

७२ चर्मी फलकपाणिः स्यात्, पताकी वैजयन्तिकः ।
अनुप्लवः सहायश्चा ऽनुचरो ऽनुचरोऽभिचरः समाः ॥

7 A leader.
2 Marching slow.

७३ पुरोगाऽग्रेसर-प्रष्ठाऽग्रतःसर-पुरःसराः ।
पुरोगमः पुरोगामी, मन्दगामी तु मन्थरः ॥

2 Marching fast.
2 A runner express.
6 Runner.

७४ जङ्घालोऽतिजवस् तुल्यौ, जङ्घाकरिक-जाङ्घिकौ ।
तरस्वी त्वरितो वेगी प्रजस्वी जवनो जवः ॥

2 Able to conquer. Fit for conquest.
1 A conqueror.

७५ जय्यो यः शक्यते जेतुं, जेयो, जेतव्य-मात्रको ।
जैत्रस् तु जेता, यो गच्छत्यलं विद्विषतः प्रति ॥

3 One who ably faces the foe.
2 Strong; powerful.

७६ सो ऽभ्यमित्र्यो ऽभ्यमित्रीयोऽप्यभ्यमित्रीण इत्यपि ।
ऊर्जस्वलः स्यादूर्जस्वी य ऊर्जोऽतिशयाऽन्वितः ॥

काश्मीराः पठन्ति, यन्मुनिः—परश्वधः कुठारश्च स्वधितिः, तदस्य-प्रहरणमिति (४।४।५७ / २६०७) परश्वधाट्ठञ् च। निस्त्रिंशोऽसिः प्रहरणमस्य नैस्त्रिंशिकः । (प्रासिककौन्तिकौ) प्रासः कुन्तश्च प्रहरणमस्य ॥ ७१ ॥ चर्मफरोऽस्यास्ति चर्मी । फलति विशीर्यते घातैः फलकः, रलयोरैक्यात्फरकोऽपि । वैजयन्त्या चरति वैजयन्तिकः, चरतीति (४।४।८ / २५९६) ठक् ॥ अनु पश्चात्प्लवतेऽनुप्लवः । सह अयते सहायः ॥ ७२ ॥ पुरो गच्छति पुरोगमः । (पुरोगः) गमश्च (३।२।४७ / २९६४) इति डः । अग्रे सरत्यग्रेसरः, पुरोऽग्रतोऽग्रेपुसर्तेः (३।३।१८ / २९३२) इति टः। प्रतिष्ठते प्रष्ठः, प्रष्ठोऽग्रगामिनीति (८।३।१०२ / २९२७) साधुः। मथ्नाति पादौ मन्थरः ॥ ७३ ॥ जङ्घे स्तोऽस्य जङ्घालः । जङ्घे एव करो राजदेयोंऽशोऽस्य जङ्घाकरिकः । जङ्घाभ्यां जीवति जाङ्घिकः । तरोऽस्यास्तीति तरस्वी, अस्मायामेधेति (५।२।१२१ / २९२८) विनिः । त्वरते स्म त्वरितः । प्रजवते प्रजवी, प्रजोरिनिः (३।२।१५६ / ३२५६)। जवते तच्छीलो जवनः, जुचङ्क्रम्येति (३।२।१५० / ३१३०) युच्। जवते जवः, नन्दिग्रहि पचाद्यच् (३।१।१३४ / २८९६) ॥ ७४ ॥ क्षय्यजय्यौ शक्यार्थे (६।१।८१ / ६५) इति साधुः । (जेयः) शक्यादन्यत्रेत्यर्थः । जेतैव जैत्रः, तृन्नन्तत्वात्—प्रज्ञादित्वात् (५।४।३८ / २१०२) अण्, जेतुरयं वा, फलतस्तुल्यार्थत्वम् ॥७५॥ आभिमुख्येनामित्रानल गामी, अध्वनो यत्खौ (५।२।१४४ / २९२२), अभ्यमित्राच्छवेति (५।२।१७ / २८१८) छः, चकाराद्यत्खौ च । अभ्यमित्रश्च । ऊर्ज ऊर्जा वास्त्यस्येति, ज्योत्स्नातमिस्रेति (५।२।१४४ / २९२१) साधुः । ऊर्जोऽसन्तं मन्यते, घञन्तोऽत्रेति तु युक्तं, अन्यथोर्जस्वीति निपातनं व्यर्थं स्यात्, अस्मा-

CC-0. Agamnigam Foundation. Digitized by eGangotri

2 Broad-chested. ७७ स्यादुरस्वानुरसिलो, रथिको रथिरो रथी। 2 The owner of a car.
2 One who goes as he lists. कामगाम्यनुकामीनो, ह्यत्यन्तीनस् तथा भृशम्॥
2 One who moves much.

3 A hero. ७८ शूरो वीरश् च विक्रान्तो, जेता जिष्णुश् च जित्वरः।
3 Victorious; used to conquer.
1 Skilled in war. सांयुगीनो रणे साधुः, शस्त्रजीवाऽऽदयस् त्रिषु॥

11 An army; or forces. ७९ ध्वजिनी वाहिनी सेना पृतनाऽनीकिनी चमूः।
वरूथिनी बलं सैन्यं चक्रं चाऽनीकम-स्त्रियाम्॥

1 Array of troops. ८० व्यूहस् तु बल-विन्यासो भेदा–दण्डाऽऽदयो युधि।
1 Different forms of array.
1 The rear.
2 Reserve. प्रत्यासारो व्यूहपार्ष्णिः, सैन्यपृष्ठे प्रतिग्रहः॥

1 A platoon. ८१ एकेभैक-रथा त्र्यऽश्वा पत्तिः पञ्च-पदातिका।
1 Greater bodies. पत्त्यङ्गैस् त्रि-गुणैः सर्वैः क्रमादाख्या यथोत्तरम्॥

यामेधेति (५।२।१२१ / १९२८) विनिना सिद्धत्वात्॥ ७६॥ उरसा बलं लक्ष्यते, तदस्यास्ति, पिच्छादित्वादिलच् (लोमादिपामादीति)। रथोऽस्यास्ति रथिकः, अतइनिटनौ (५।२।११५ / १९२२)। (रथिरः) मेधारथाभ्याभिरन्निरचौ (३२०३ / १९१६), रथिन इत्यपपाठः। अनुकामं यथेच्छं गामी–अनुकामीनः, अवारपारात्यन्तानुकामंगामीति (५।२।११ / १८१२) खः। अत्यन्तं भृशं कृत्वा गामी–अत्यन्तीनः, खः॥ ७७॥ विक्रमते स्मोत्सहते विक्रान्तः। जयनशीलः (जेता), तृन्। (जिष्णुः) ग्लाजिस्थश्वस्नुः (३।२।१३९ / ३१११९) (जित्वरः) इष्णश्जिसर्तिभ्यःक्वरप् (३।२।१६३ / ३१४३)। संयुगे साधुः सांयुगीनः, प्रतिजनादिभ्यःखञ् (४।४।९९ / १६५.१)। (त्रिषु) वाच्यलिङ्गत्वात्॥ ७८॥ वाहाः सन्त्यस्यां वाहिनी। सिनोति सेना, सह–इनेन वर्तते वा। प्रियते पृतना, पृङ् व्यायामे। चमत्यरींश्चमूः। वरूथो रथगुप्तिरस्त्यस्या वरूथिनी। वलति प्राणिति बलम्। सेनैव सैन्यम्, चतुर्वर्णादित्वात् (३०९१ / १७८९) ष्यञ्। करोति चकते चक्रम्। अनित्यनीकम्, न नीयते वा, सैन्यैकदेशोऽयम्॥ ७९॥ व्यूह्यते रच्यते व्यूहः। व्यूहस्येति शेषः, यदाहुःदण्डो मण्डलभोगौ चाप्युत्सन्नश्चाचलो दृढः। व्यूहास्तेषां विशेषाः स्युश्चक्रव्यूहादयोऽपि च॥ प्रत्यासरति भग्नान् प्रत्यासारः, सस्थिरइति (३।३।१७ / ३१८३) घञ्। पार्ष्णिः पश्चाद्भागः। (प्रतिग्रहः) प्रतिगृह्यतेऽवष्टभ्यतेऽनेन सैन्यम्॥ ८०॥ पतति (पद्यते) पत्तिः सेनांशः, यद् भारतं–एको गजो रथश्चैको नराः पञ्च पदातयः। त्रयश्च तुरगास्तज्ज्ञैः पत्तिरित्यभिधीयते॥ पत्तिस्त्रिगुणा सेनामुखं–गजत्रयं ३, रथत्रयं

CC-0. Agamnigam Foundation. Digitized by eGangotri Siddhanta Gyaan Kosha Chandigarh

८२ सेनामुखं, गुल्म-,गणौ वाहिनी, पृतना, चमूः, ।
1 A complete army. अनीकिनी, दशाऽनीकिन्यक्षौहिण्यथ संपदि ॥

3 Success or prosperity. ८३ संपत्तिः श्रीश् च लक्ष्मीश् च, विपत्त्यां विपदापदौ ।
3 Adversity.

4 A weapon. आयुधं तु प्रहरणं शस्त्रमस्त्रमथाऽस्त्रियौ ॥

7 A bow. ८४ धनुश्-चापौ धन्व-शरासन-कोदन्ड-कार्मुकम् ।
1 The bow of Karna. इष्वासो ऽप्यथ कर्णस्य कालपृष्ठं शरासनम् ॥

2 That of Arjuna. ८५ कपि-ध्वजस्य गाण्डीव-गाण्डिवौ पुन्-नपुंसकौ ।
1 Notched extremity of a bow. कोटिरस्याऽटनी, गोधा-तले ज्या-घात-वारणे ॥
1 Leathern fence for the arm.

३, अश्वनवकं ९, पदातयः पञ्चदश १५ ॥ ८१ ॥ तत्त्रिगुणं गुडति गुल्मः—गजाः ९, रथाः ९, अश्वाः २७, पदातयः ४५ । स त्रिगुणो गण्यते गणः—गजाः २७, रथाः २७, अश्वाः ८१, पदातयः १३५ । स त्रिगुणो वाह्यते वाहिनी—गजाः ८१, रथाः ८१, अश्वाः २४३, पदातयः ४०५ । सा त्रिगुणा पृतना—गजाः २४३, रथाः २४३, अश्वाः ७२९, पदातयः १२१५ । सा त्रिगुणा पृतना—गजा २४३, रथाः २४३, अश्वाः ७२९, पदातयः १२१५ । सा त्रिगुणा चमूः—गजाः ७२९, रथाः ७२९, अश्वाः २१८७, पदातयः ३६४५ । सा त्रिगुणाऽनीकिनी—गजाः २१८७, रथाः २१८७, अश्वाः ६५६१, पदातयः १०९३५ । अक्षाणां रथकाष्ठानामूहोऽस्त्यस्यां, अक्षादूहिन्यामिति (वा० $\frac{३६०४}{७३}$) वृद्धिः ॥८२॥ (संपद्) संपदादिभ्यः क्विप् (वा० $\frac{२२३३}{३२७२}$) । श्रयन्ति तां श्रीः, क्विब्वचिप्रच्छिश्रीति (उ०२१५) क्विप्—दीर्घश्च । विपत्तिर्दारिद्र्यम् । आयुध्यन्तेऽनेनायुधं, घञर्थेकविधानं (वा० $\frac{२२०४}{३२३४}$), स्थास्नापाव्यधिहनियुध्यर्थम् । शस्यतेऽनेन शस्त्रं, दाम्नीशसेति ($\frac{३।२।१८२}{२०६९}$) ष्ट्रन् । अस्यतेऽस्त्रम् । हेतिर्नानार्थे ॥८३॥ धन्यतेर्ध्यते धनुः, अर्धर्चादिः ($\frac{२।४।३१}{८१६}$) । चपस्य वेणोर्विकारश्चापम् । धन्वति (धन्व), कनिन् (उ०१५४) । शरा अस्यन्तेऽनेन शरासनम् । कुद(द्रि) अनृतभाषणे, अस्मादण्डन्, कुर्देर्वा रेफलोपे कोदण्डम् । कर्मणे प्रभवति कार्मुकम्, कर्मणउकञ् ($\frac{५।१।१०३}{१७६७}$) । इषवोऽस्यन्तेऽनेन—इष्वासः । आसोऽपि ॥ ८४ ॥ गाण्डिः पर्वास्यान्ति गाण्डीवं, गाण्ड्यजगात्संज्ञायामिति ($\frac{५।२।११०}{१९२७}$) वः, गाण्डिरिदन्त इदन्तश्चात्र प्रश्लिष्य निर्दिष्टः । पुंनपुंसके इति प्रथमाद्विवचनमजहल्लिङ्गम् । अस्य धनुषः प्रान्ते कोटिः, कुटतीति । अटत्यटनी, अर्त्यटनी, इत्येके । गोधा च गोधा च गोधे द्वे, सव्यसाचित्वात्, गुध परिवेष्टने । तलं चर्मादिमयो ज्याघाताधारः ॥ ८५ ॥

CC-0. Agamnigama Digital Preservation Foundation, Chandigarh

2 Middle of the bow.
4 The bow-string.
1 Two attitudes in shooting.

८६ लस्तकसू तु धनुर्मध्यं, मौर्वी ज्या शिञ्जिनी गुणः ।
स्यात् प्रत्यालीढमालीढमित्याऽऽदि स्थान-पञ्चकम् ॥

3 A butt or mark.
2 Archery.

८७ लक्ष्यं लक्षं शरव्यं च, शराभ्यास उपासनम् ।

12 An arrow.

पृषत्क-बाण-विशिखा अजिह्मग-खगाऽऽशुगाः ॥

८८ कलम्ब-मार्गण-शराः पत्री रोप इषुर् द्वयोः ।

2 Iron arrows.
2 Feather of an arrow.

प्रक्ष्वेडनास् तु नाराचाः, पक्षो वाजस्, त्रिपूत्तरे ॥

1 Shot as an arrow.
2 Poisoned arrow.

८९ निरस्तः प्रहितं बाणे, विषाऽक्ते दिग्ध-लिप्तकौ ।

6 Quiver.

तूणोपासंग-तूणीर-निषङ्गा इषुधिर् द्वयोः ॥

9 A scimitar.

९० तूण्यां, खड्गे तु निस्त्रिंश-चन्द्रहासाऽसि-रिष्टयः ।
कौक्षेयको मण्डलाग्रः करवालः कृपाण-वत् ॥

(लस्तकः) लस श्लेषणे । मूर्वाख्यतृणस्य विकारो मौर्वी । जिनाति ज्या । जीवापि । शिङ्क्ते शब्दायते शिञ्जिनी । गुण्यतेऽभ्यस्यते गुणः । जङ्घयोश्चारि(वि)निवृत्तौ स्थितिः स्थानकमिति तु विशेषः । आलेढि भुवमालीढम् । आदिशब्दात्समपादं वैशाखं मण्डलं च धनुर्वेदप्रसिद्धम् । भरतस्त्वन्यथाह–वैष्णवं समपादं च वैशाखं मण्डलं तथा । प्रत्यालीढमथालीढं स्थानान्येतानि षड् नृणाम् (१०-५१) ॥ ८६ ॥ लक्ष्यत इति (लक्षं), घञ् ण्यच्च । श्रणोति शरुर्हिंस्रस्तस्मै हितं शरव्यं, उगवादिभ्यो यत् ($\frac{५।१।२}{१६६२}$), शरैर्वीयते छाद्यते वा । (उपासनं) असु क्षेपणे । पर्षति सिञ्चति–असृजा पृषत्कः, पृथक्पट्कमस्येति धनुर्वेदः–पुङ्खः शरस्तथा शल्यं पक्षस्नायुजतूनि षट् ॥ वणति वण्यतेऽनेन वा बाणः । विशीयते । विशिखः, शिञ् निशाने, विविधशिखो वा । अजिह्मग ऋजुगामी ॥ ८७ ॥ कल्यते क्षिप्यते कलम्बः । मार्गयति लक्ष्यं मार्गणः श्रणाति शरः । रोप्यते निखन्यते रोपः । इष्यति–इषुः, इष गतौ । प्रदरो नानार्थे । प्रक्ष्वेडते प्रक्ष्वेडनः, क्ष्विदे रूपे, क्ष्वेडिर्वोन्नेयः । नरमञ्चति, नराच एव नाराचः, स्वार्थेऽण्, सर्वलोहोऽयम् । (पक्षः) पक्ष परिग्रहे । वजति गच्छत्यनेन वाजः न्यङ्क्वादेः ($\frac{७।३।५३}{१८६४}$)अकुत्वम् ॥८८॥ लिप्तान्ता वाच्यलिङ्गाः । निरस्यते स्म प्रहीयते स्म, क्षिप्त इत्यर्थः । विषेणाक्ते म्रक्षिते, दिह्यते स्म लिप्यते स्म । तूण्यते पूर्यते शरैस्तूणः, तूणीति लिङ्गरूपभेदार्थम् । उपासज्यन्ते निषज्यन्ते च बाणा यत्रेत्युपासङ्गनिषङ्गौ । इषवो धीयन्तेऽत्रेषुधिः । कलापो नानार्थे ॥ ८९ ॥ खड(ण्ड)ति भिनत्ति खड्गः । निष्क्रान्तस्त्रिंशतोऽङ्गुलिभ्यो निस्त्रिंशः । चन्द्रवद् हासः प्रभाऽस्य चन्द्रहासः । अस्यतेऽसिः । ऋषेर्गत्यर्थाद् ऋष्टिः, ऋत्यकः ($\frac{६।१।१२८}{९२}$) इति प्रकृतिः, हिंसार्थाद्रिषेस्तु रिष्टिः । कुक्षौ भवः कौक्षेयकः, कुलकुक्षीति

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh

1 A hilt or handle.
1 A sword knot.
3 A shield.
1 A gripe of a shield.

९१ त्सरुः खड्गाऽऽदि-मुष्टौ स्यान्, मेखला तन्-निबन्धनम्।
फलको ऽस्त्री फलं चर्म, संग्राहो मुष्टिरस्य यः ॥

3 A maliet.
2 A cudgel.
2 A short arrow.
2 A bludgeon.

९२ द्रुघणो मुद्गर-घनौ, स्यादीली करवालिका।
भिन्दिपालः सृगस् तुल्यौ, परिघः परिघातिनः ॥

4 An axe.

९३ द्वयोः कुठारः स्वधितिः परशुश्च परश्वधः।

4 A knife.

स्याच्छस्त्री चाऽसिपुत्री च छुरिका चाऽसिधेनुका।

2 A javelin.
2 An iron crow.

९४ वा पुंसि शल्यं शङ्कुर् ना, सर्वला तोमरोऽस्त्रियाम्।

2 A bearded dart.

प्रासस् तु कुन्तः, कोणस् तु स्त्रियः पाल्यश्रि-कोटयः ॥
4 Sharp edge of a sword.

(४।२।९६ / १३१६) ढकञ्। मण्डलाकृत्यग्रमस्य मण्डलाग्रः। करे वलनमस्य करवालः। कल्पते कृपाणः, वतिः पूरणार्थः ॥ ९० ॥ (त्सरुः) त्सर छद्मगतौ। मीयते मणिबन्धे प्रक्षिप्यते मेखला, यथा प्रहरतो हस्तान्न निर्याति। फलति विशीर्यते प्रहारैः (फलं, फलकं) फलं मुनिना खड्गाद्यग्रे दृष्टं, अयं तु लोकात् फलकं मन्यते, यच्छाश्वतः–लाभे शस्त्रे शराद्यग्रे व्युष्टौ च फलके फलम् (४४२)। चर्ममयत्वाच्चर्म। संगृह्यतेऽनेनेति संग्राहः समिमुष्टाविति (३।३।३६ / ३२०८) घञ्, अस्य चर्मणो मुष्टिर्ग्रहण-स्थानम् ॥ ९१ ॥ द्रुं वृक्षाङ्गं हन्ति द्रुघणः, द्रार्घनो वा, अश्रोघनोन्यः। मुद्गं गिरति ग्रसते मुद्गरः। हन्यतेऽनेन घनः, मूर्तौघनइति (३।३।७७ / ३२५४) साधुः, यच्छाश्वतः–वाद्ये मुस्तेऽम्बुदे सान्द्रे घनः स्वाल्लोहमुद्गरे (शा. ६)। ईडयत ईली, एकधारोस्याऽसिस्तुरुष्कायुधम्। करवालात्, अल्पे (५।३।८५ / २०४०) कन्, तरवालिकेत्येके। भिन्दतः पालयति भिन्दिपालः, भिण्डिपालो वा हस्तक्षेप्यो लगुडः। सृज्यते सरति वा सृगः। परितो हन्ति परिघः, परौघ इति (३।३।८४ / ३२६१) डे घत्वम्, लोहबुद्धो लगुडः ॥९२॥ कुठान्वृक्षा नियर्ति कुठारः। स्वं धियति बिभर्ति स्वधितिः। पराञ्श्रणाति परशुः परश्वधश्च, पर्श्वधोऽपि, यदाह–याष्टीकपारश्वधिकौ यष्टिपर्श्वधहेतिकौ। शस्यतेऽनया शस्त्री। असेः पुत्रीवाल्पत्वात्। छुरति छिनत्ति छुरिका, क्षुरिकापि ॥ ९३ ॥ शलति विशल्यन्तः शल्यः। शङ्कतेऽस्माच्छङ्कुरायुधविशेषः, यच्छाश्वतः–संख्या कीलक्योः शङ्कुः शङ्कुः प्रहरणान्तरे (३८५)। अन्यत्रोपचाराच्छल्यम्। सर्वान्–लाति सर्वला। स्तोम्यते प्रश्लाघ्यते तोमरः, तुः सौत्रो वा। प्रास्यते प्रासो हस्तक्षेप्यः शल्यः। कुणति कुन्तः। कोणो गृहादेर्विदिक्–अस्त्र्याख्या, कुण शब्दोपकरणयोः। पाति

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh

3 Assembling of a complete army.
1 Lustration of arms.

९५ सर्वाभिसारः सर्वौघः सर्वसन्नहनाऽर्थकः ।
लोहाभिसारो ऽस्त्रभृतां राज्ञां नीराजना-विधिः ॥

1 March to repel an enemy.
6 March of an assailant.

९६ यत् सेनया ऽभिगमनमरौ तदभिषेणनम् ।
यात्रा व्रज्या ऽभिनिर्याणं प्रस्थानं गमनं गमः ॥

2 Surrounding a foe.
1 A gallant attack.

९७ स्यादासारः प्रसरणं, प्रचक्रं चलिताऽर्थकम् । 1 An army in motion.
अ-हितान् प्रत्य-भीतस्य रणे यानमभिक्रमः ॥

2 Awakeners.
2 Bards in throngs.
2 Bards by birth.
2 Panegyrists.

९८ वैतालिका बोधकराश्, चाक्रिका घाण्टिकाऽर्थकाः ।
स्युर्मागधास् तु मगधा, वन्दिनः स्तुतिपाठकाः ॥

2 Chosen soldiers.

९९ संशप्तकास् तु समयात् संग्रामाद-निवर्तिनः ॥

पालिः । अश्रुतेऽश्रिः । कुटति कोटिः ॥ ९४ ॥ सर्वेण सैन्येनाभिसरणं सर्वाभिसारः । सर्वेषामोघो वहनं सर्वौघः । सर्वे संनह्यन्तेऽत्र सर्वसंनहनम् । शस्त्रभृतां राज्ञां यः शास्त्रिको विधिः प्रस्थानात्प्राक् स लोहाभिसारः, लोहं शस्त्रमभिसार्यते प्रस्थानेऽत्रेति । नीरस्य शान्त्युदकस्याजनं क्षेपोऽत्र नीराजनं, मन्त्रोक्त्या वाहनायुधादेर्निशेषेण राजनं वात्र । नीराजनादनन्तरं कर्म लोहाभिसार इति मुनिः–विधिर्लोहाभिसारस्तु राज्ञां नीराजनोत्तरः, दुर्गोऽपि–लोहाभिसारस्तु विधिः परो नीराजनान्नृपैः । दशम्यां दंशितैः कार्य इति । अत एव नीराजनाद्विधिरित्येके पठन्ति ॥ ९५ ॥ (अभिषेणनं) सत्यापपाशेति (३।१।२५/२५६२) णिच्, उपसर्गात्सुनोतीति (८।३।६५/३२७०) षत्वम् । यान्त्यस्यां यात्रा । व्रजनं व्रज्या, व्रजयजोर्भावेक्यप् (३।३।९८/३२७५) । (प्रस्थानं) प्रपूर्वस्तिष्ठतिर्गत्यर्थः । गनेः–ग्रहवृद (३।३।५८/३२३४) इत्यपि गमः ॥९६॥ सैन्यस्य सर्वतो व्यासिरासारः, आस्त्रियते येनेत्यासारोऽन्वागच्छद्बलम्। प्रसारस्तु सैन्याद्बहिस्तृणजलाद्यर्थं प्रसरणमिति कौटिल्यः, यल्लक्ष्यं–निरुद्धवीवधासारप्रसारा गा इव व्रजम् (शिशु०२-६४) । प्रस्थितं चक्रं सैन्यं प्रचक्रम् । आभिमुख्येनाभिभूयारीन्वा यानमभिक्रमः ॥९७॥ वितालः शब्दः प्रयोजनमेषां वैतालिका राज्ञोऽवसरपाठका मङ्गला[मङ्ग्वा]ख्याः, प्रातर्बोधका इत्येके । (चाक्रिकाः) चक्रं राष्ट्र घण्टाघातेन देवताद्यग्रे ये शंसन्ति ते, श्रावकाख्याः । (मागधाः) वंशोदीरणेन ये याचन्ते, आहुश्च–वैतालिकाश्च कथ्यन्ते कविभिः सौखशायिकाः । राज्ञः प्रबोधसमये घण्टाशिल्पास्तु घाण्टिकाः । मागधाः स्तुतिवंशज्ञा इति, मगधेति याच्ञार्थः कण्डवादिः, यच्छीभोजः–कमर्थिनः कुषुभ्यन्तु कं मगध्यन्तु मागधाः । कमिषुध्यन्तु यज्वा[युध्वा]नो रामेरण्यं तुरण्यति ॥ वन्दन्ते स्तुवन्ति तच्छीलाः (वन्दिनः) । चत्वार एकार्था इत्येके ॥९८॥ संशयन्ति पलायमानं, सशपथं वा युध्यन्ते

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh

4 Dust. १०० रेणुर् द्वयोः स्त्रियां धूलिः पांसुर् ना न द्वयो रजः ।
2 Powder. चूर्णे क्षोदः, समुत्पिञ्ज-पिञ्जलौ भृशमाकुले ॥
2 An army in great disorder.

4 A flag or banner. १०१ पताका वैजयन्ती स्यात् केतनं ध्वजम-स्त्रियाम् ।
1 The post of danger. सा वीराशंसनं युद्ध-भूमिर् या ऽति-भय-प्रदा ॥

1 Emulative onset. १०२ अहं पूर्वमहं पूर्वमित्यहंपूर्विका स्त्रियाम् ।
1 Boasting. आहोपुरुषिका दर्पाद् या स्यात् संभावना ऽऽत्मनि ॥

1 Conceit of superiority. १०३ अहमहमिका तु सा स्यात् परस्परं यो भवत्यहङ्कारः ।
10 Strength or power. द्रविणं तरः सहो-बल-शौर्याणि स्थाम शुष्मं च ॥

2 Great power. १०४ शक्तिः पराक्रमः प्राणो, विक्रमस् त्वतिशक्तिता ।
1 Drink of warriors. वीरपाणं तु यत् पानं वृत्ते भाविनि वा रणे ॥

31 War, battle, combat. १०५ युद्धमायोधनं जन्यं प्रधनं प्रविदारणम् ।
मृधमास्कन्दनं संख्यं समीकं सांपरायिकम् ॥

दृढनिश्चयाः संशप्तकाः ॥ ९९ ॥ रीयते रेणुः, रीङ् गतौ । धूयते धूलिः । पंशयति वस्त्रादि पांशुः, पशि नाशने । रज्यते वस्त्राद्यनेन रजः क्लीबे, रजनरजकरजःसूपसंख्यानं (वा०?) इति नलोपः । (क्षोदः) क्षुदिर संपेषणे, धूलिप्रायोऽयं, यच्छाश्वतः चूर्णानि वासयोगाः स्युश्चूर्णो धूलिः सशर्करा (३८०) । पिजि हिंसायां, आह च– समुत्पिञ्जोऽतिसंकुलः ॥ १०० ॥ पतति धूयते पताका । विजयते विजयन्तः, औणादिको झच् (तृभूवहीति), तस्येयं वैजयन्ती । केत्यते संज्ञायतेऽनेन केतनम् । ध्वजति धूयते ध्वजः, पताकादण्डो ध्वज इत्येके । केतुर्नानार्थे । वीरा आशंस्यन्तेऽत्र (वीराशंसनम्) ॥ १०१ ॥ अहं पूर्वमस्यां क्रियायामिति सर्वे यत्र ब्रुवते साऽहंपूर्विका । स्वार्थे कन्–मत्वर्थीयो वा ठन् (अत इनिठनौ ५।२।११५/१९२३) । अहो पुरुषोऽहमित्यस्य भावः (आहोपुरुषिका), मनोज्ञादित्वाद्वुञ् (द्वन्द्वमनोज्ञादिभ्यश्च ५।१।१३३/१७९८) ॥१०२॥ अहं शक्तोऽहं शक्त इत्यस्यामहमहमिका, ठन् (व्रीह्यादिभ्यश्च ५।२।११६/१९२३), अहं शब्दो निपातः । द्रवत्यनेनारिं द्रविणम् । तरत्यनेनापदं तरः । सहतेऽनेनारिं सहः, असन्तौ द्वौ । शूरस्य भावः शौर्यम् । तिष्ठत्यनेन स्थाम । शुष्यत्यतेनारिः शुष्मम्, शुष्मेत्येके ॥१०३॥ शकनं शक्तिः । प्राणनं प्राणः । विक्रमन्तेऽनेन विक्रमः । वीराणां मद्यपानं वीरपानम् ॥ १०४ ॥ जायते जन्यं, भव्यगेयेति (३।४।६८/२८९४) साधुः । प्रदधन्ति प्रधनम्, धनिर्मारणार्थोऽत्र निधनवत् । म्रियन्तेऽस्मिन् मृधम् । आस्कन्द्यतेऽत्रास्कन्दनम् । संचक्षतेऽस्मिन् संख्यं, संपूर्वश्चक्षिर्वधार्थः । समीयन्तेऽस्मिन् समीकं, ईङ् गतौ । संपरायो मृत्युः प्रयोजनमस्य सांपरायिकं, [टञ्], विनयादि-

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh

१०६ अ-स्त्रियां समराऽनीक-रणाः कलह-विग्रहौ ।
संप्रहाराऽभिसंपात-कलि-संस्फोट-संयुगाः ॥

१०७ अभ्यामर्द-समाघात-संग्रामाऽभ्यागमाऽऽहवाः ।
समुदायः स्त्रियः संयत्-समित्याऽऽजि-समिद्-युधः॥

2 Close fight; struggle. १०८ नियुद्धं बाहुयुद्धे, ऽथ तुमुलं रणसंकुले । 2 Mingled combat.
2 War-Whoop. क्ष्वेडा तु सिंहनादः स्यात्, करिणां घटना घटा ॥
2 Troops of elephants.

2 Mutual defiance of combatants. १०९ क्रन्दनं योधसंरावो, बृंहितं करिगर्जितम् । 2 Roaring of elephants.
1 Twang of a bow. विस्फारो धनुषः स्वानः, पटाहाऽऽडम्बरौ समौ ॥
2 Drum used in battle.

3 Violence. ११० प्रसभं तु बलात्कारो हठो, ऽथ स्खलितं छलम् ।
2 Fraud ; stratagem ; circumvention.
3 A portent. अजन्यं क्लीबमुत्पात उपसर्गः समं त्रयम् ॥

त्वात्स्वार्थे ($\frac{५।४।३४}{२१०२}$) ठग्वा ॥ १०५ ॥ समियृति (ते) संघट्टन्तेऽस्मिन् समरः । न नीयन्ते चाल्यन्तेऽत्रानीकम्, अनीकमस्त्यत्र वा । रणन्ति दुन्दुभयोऽत्र रणं, वशिरण्योश्चेतिवक्तव्यादप् (वा० $\frac{२२०३}{३२३४}$) । कल्यते क्षिप्यतेऽत्र कलहः, कलं हीनबलं हन्ति वा । विगृह्णन्त्यत्र विग्रहः, ग्रहवृद–इति ($\frac{३।३।५८}{३२३४}$) अप् । संप्रहरन्तेऽन्योन्यं ध्नन्त्यत्र संप्रहारः । अभिसंपतन्त्यत्राभिसंपातः ($\frac{३।३।५८}{३२३४}$)। कल्यतेऽत्र कलिः। संस्फुटन्त्यत्र संस्फोटः, संस्फेट इति युक्तः पाठः, स्फिट अनादरे, भरते तु संफेटः । संयुज्यतेऽत्र संगता रथयुगा अत्र वा संयुगः ॥ १०६ ॥ अभ्यामृद्नन्त्यत्राभ्यामर्दः । समाघ्नन्त्यत्र समाघातः । संग्रामयन्तेऽस्मिन् संग्रामः । अभ्यागच्छन्त्यत्राभ्यागमः । आह्वयन्तेऽत्राहवः, आङियुद्धे ($\frac{३।३।७७}{३२५०}$) इत्यप्, संप्रसारणम् । समुदीयन्ते मिलन्त्यत्र समुदायः । संयतन्ते संयच्छन्ति वास्यां संयत् । संयन्ति संगच्छन्तेऽत्र समितिः । आ–अज्यन्ते क्षिप्यन्तेऽत्राजिः । युध्यन्तेऽस्यां युत्–द् ॥ १०७ ॥ नियतं युद्धं (नियुद्धं) । ताम्यन्त्यत्र तुमुलं, तुमुः सौत्रो वा । (क्ष्वेडा) क्ष्वेडृ अव्यक्ते शब्दे–इति दुर्गः । सिंहानामिव नदनं भटानां सिंहनादः । क्ष्वेला वा । (घटा) घटादयःपितः (ग० १८६) इति षिद्भिदादिभ्योङ् ($\frac{३।३।१०४}{३२८१}$) ॥ १०८ ॥ समन्ताद्रवणं संरावः, उपसर्गेरुवः ($\frac{३।३।२२}{३१९२}$) इति घञ् । (बृंहितं) बृहि शब्दे । (विस्फारः) स्फुर संचलने । पटो हन्यतेऽस्य पटहः । आदम्यते–आडम्बरः, डमरुवद्दस्य डत्वम् ॥ १०९ ॥ प्रगता सभात्र प्रसभं, सभया युक्तायुक्तविचारो लक्ष्यते, [प्रसभ] प्रसप्रसवे वा । बलादिति निपातो हठार्थः । (हठः) हठ प्लुतिशठत्वयोः । स्खलनं मार्गाच्चलनम् । छयति छिनत्ति छलम् । न जने साधु–अजन्यम् । उत्पतत्यकस्मादायाति–उत्पातः, ज्वलादिस्वाण्णः (ज्वलिति-

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh

3 Fainting.
2 Devastation.
2 Striking to disable the foe.

१११ मूर्छा तु कश्मलं मोहो ऽप्यवमर्दस् तु पीडनम् ।
अभ्यवस्कन्दनं त्वभ्यासादनं, विजयो जयः ॥ 2 Victory.

3 Revenge.

११२ वैरशुद्धिः प्रतीकारो वैरनिर्यातनं च सा ।

8 Flight ; retreat.

प्रद्रावोद्दाव-संद्राव-संदावा विद्रवो द्रवः ॥

1 Defeat.
2 Defeated ; vanquished.

११३ अपक्रमो ऽपयानं च, रणे भङ्गः पराजयः ।
पराजित-पराभूतौ, त्रिषु नष्ट-तिरोहितौ ॥
2 Missing, lost having vanquished.

30 Slaughter.

११४ प्रमापणं निबर्हणं निकारणं विशारणम् ।
प्रवासनं परासनं निपूदनं निहिंसनम् ॥

११५ निर्वासनं संज्ञपनं निर्ग्रन्थनमपासनम् ।
निस्तर्हणं निहननं क्षणनं परिवर्जनम् ॥

११६ निर्वापणं विशसनं मारणं प्रतिघातनम् ।
उद्वासन-प्रमथन-क्रथनोज्जासनानि च ॥

कसन्तेभ्योणः ($\frac{३।१।१४०}{२९०३}$)। उपसृज्यत उपद्रूयतेऽत्रोपसर्गः॥ ११०॥ कशति(ते)वैचित्यात्कश्मलम्। (पीडनं) पीड अवगाहने । (अभ्यवस्कन्दनं) छलाद्राक्रमणमित्यर्थः । धाटी च । रात्रौ च सौप्तिकम्। (विजयः) विः स्वार्थे लोचनविलोचनवत् ॥ १११ ॥ प्रतीपं करणं प्रतीकारः शुद्धिः । निर्यातनं शोधनं, यत निकारोपस्कारयोः । जितकाशीः जिताहवः । एतेऽष्टौ पलायनार्थकाः, प्रेद्रुस्तुस्रुवः ($\frac{३।३।१२७}{३१९८}$), उदि श्रयतियौतिपूद्रुवः ($\frac{३।३।४९}{३२२४}$),समि युद्रुदुबः ($\frac{३।३।१२३}{३१९४}$) इति घञ् ॥ ११२॥ अपद्वारेण क्रमणं (अपक्रमः)। भङ्गोऽपसरणं, अन्यत्रोपचारात्। परिभूतोऽभिभूतोऽपि। त्रिष्वित्येव, नश्यति स्म नष्टम्-अदृश्यम् । तिरोधीयते स्म तिरोहितं गृहीतदिक्कम् ॥ ११३ ॥ अत्राहिंसार्था अप्युपसर्गवशाद् हिंसार्था ज्ञेयाः, अकर्मकाश्च णिचा सकर्मकाः । प्रमापणं, मीञ् हिंसायां णिच्, मीनातिमिनोतीति ($\frac{६।१।५०}{२५०८}$) आत्वं, युच् । निपूर्वाद् बर्हेर्बृहेर्वा निबर्हणम् । विकारणं, कृञ् हिंसायाम् । विशारणं, शॄ हिंसायाम् । प्रवसतः प्रयुक्तिः प्रवासनम् , एवं निर्वासनम् । असु क्षेपणेऽस्मात्परासनमपासनं च । पूद क्षरणेऽस्मान्निपूदनं जीवाच्चलनम् ॥ ११४ ॥ (संज्ञपनं) ज्ञपेर्मारणतोषणेति मित्त्वाद् ह्रस्वः (मितांह्रस्वः $\frac{६।४।९२}{२५६८}$)। निर्ग्रन्थनं, ग्रथि कौटिल्ये । निस्तर्हणं, तृहेर्हिंसार्थान्निः पूर्वात् , स्तृहेर्वा निपूर्वात् । क्षणनं, क्षणु हिंसायाम् ॥ ११५ ॥ निर्वापणं, पै ओवै शोषणे । विशसनं, शसु हिंसायाम् । कथनं, कथ हिंसायाम् । उज्जासनं, जसु हिंयायाम् ॥ ११६ ॥

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh

११७ आलम्भ-पिञ्ज-विशर-घातोन्माथ-वधा अपि ।
10 Death. स्यात् पञ्चता कालधर्मो दिष्टान्तः प्रलयोऽत्ययः ॥

११८ अन्तो नाशो द्वयोर् मृत्युर् मरणं निधनो ऽस्त्रियाम् ।
7 Dead; having expired. परासु-प्राप्तपञ्चत्व-परेत-प्रेत-संस्थिताः ॥

3 A funeral pile. ११९ मृत-प्रमीतौ त्रिष्वेते, चिता चित्या चितिः स्त्रियाम् ।
1 A headless trunk. कबन्धो ऽस्त्री क्रिया-युक्तमपमूर्ध-कलेवरम् ॥

2 A cemetery. १२० श्मशानं स्यात् पितृवनं, कुणपः शवमस्त्रियाम् ।
2 A dead body.
2 A prisoner. प्रग्रहोपग्रहौ बन्द्यां, कारा स्यात् बन्धनालये ॥
2 A prison or jail.

2 Breath. १२१ पुंसि भूम्यसवः प्राणाश् चैवं, जीवो ऽसुधारणम् ।
2 Life.
2 Age; duration of life. आयुर् जीवितकालो, ना जीवातुर् जीवनौषधम् ॥
2 Drug to revive the dead.

इति क्षत्रिय-वर्गः ८, अत्र मूलश्लोकाः १२१, क्षे० श्लो० १

आलम्भः, लभिराङ्पूर्वो हिंसार्थः, (लभेः) उपसर्गात्खल्घञोरिति ($\frac{७।१।६७}{३३०६}$) नुम् । पिञ्जः, पिञ्ज हिंसार्थः । विशरणं हिंसनं विशरः । हननं वधः, हनश्च वध इति ($\frac{३।३।७६}{३२५२}$) अप्, वधादेशश्च, पक्षे घञि घातः । (उन्माथः) मथ संक्लेशने । व्यापादनं विशमनं कदनं च निशुम्भनम् । (पञ्चता) देहस्तावन्महाभूतारब्धः, मरणं त्वेतस्य पञ्चभावः प्रत्येकं स्वांशनं क्रमात् । कालो मृत्युद्यूतलक्षणः, क्षयाद्यात्मकौ वा यदाहुः—कालः संहरति प्रजाः (हारीत स्मृतिः), तस्य धर्मः कालधर्मः संहारः। दिष्टस्य कालस्य जीवितावधेरन्तो दिष्टान्तः ॥११७॥ अमत्यन्तः पर्यन्तः । मरणं मृत्युः, द्वयोः स्त्रीपुंसयोः । निवृत्तं धनमत्र निधनं, निपूर्वो धनिर्मरणार्थ इति सभ्याः । प्रमयोऽस्त्री दीर्घनिद्रा हिंसा संस्था प्रमालनम् । परागता असवोऽस्य परासुः । संतिष्ठते स्म संस्थितः, संपूर्वस्तिष्ठतिर्भरणे वर्तते । सप्तैते वाच्यलिङ्गाः ॥ ११८ ॥ चीयते स्म चित्ता । चेतव्या चित्या, चित्याग्निचित्ये चेति ($\frac{३।१।१३८}{३८९३}$) साधुः । चीयते चितिः । एते प्रेतदाहार्थेऽग्न्याधाने वर्तन्ते । कस्य शिरसो बन्धोऽत्र कबन्धः, केन बन्धो वा । क्रियया युक्तं नृत्यदपगतो मूर्धास्यापमूर्धं यत्कलेवरम् ॥११९॥ शवशयनं श्मशानम् । पितॄन्प्रेतान्वनति भजति पितृवनम् । प्रेतवनं करवीरं च । कुणं शब्दं पाति कुणपः, धनं जयाख्यस्य बायोः शवे संभवात् । शवति याय्यस्माज्जीवः शवः । प्रगृह्यते बध्यते प्रग्रहः । वन्यते याच्यते वन्दी हठहृता स्त्री, बलवतो हस्तक्षिप्तो राजपुत्रादिश्च, यदाहुः—वन्दी स्यात्पणबन्धस्थः । कीर्यते क्षिप्यतेऽस्यां कारा, भिदाद्यङ् (षिद्भिदादीति $\frac{३।३।१०४}{३२८१}$) ॥१२०॥ अस्यन्तेऽसवः, स्वभावाद्बहुत्वे पुंलिङ्गः । प्राणन्त्यमीभिः

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

अथ वैश्य-वर्गः ९

6 Men of the third tride.
6 Livelihood; profession.

१ ऊरव्या ऊरुजा अर्या वैश्या भूमिस्पृशो विशः ।
आजीवो जीविका वार्ता वृत्तिर् वर्तन-जीवने ॥

1 Various professions.
2 Service.
2 Agriculture.

२ स्त्रियां कृषिः पाशुपाल्यं वाणिज्यं चेति वृत्तयः ।
सेवा श्ववृत्तिरनृतं कृषिरुञ्छ-शिलं त्वृतम् ॥ 2 Gleaning.

1 Alms solicited; or unsolicited.
2 Traffic; commerce.

३ द्वे याचिताऽयाचितयोर् यथा-संख्यं मृताऽमृते ।
सत्यानृतं वणिग्भावः, स्यादृणं पर्युदञ्चनम् ॥ 3 Debt.

प्राणाः, एवं शब्दात्पुंसि भूम्नि । प्राणो नाम वायुरित्येकत्वमजीवार्थत्वात् । जीवनं जीवः प्राणधारणम् । जीवापि । आयत्यायुर्जीवितावधिः, उसन्तः क्लीबे, छन्दस्युदन्तोऽपि । जीवत्यनेन जीवातुः, जीवनायौषधं जीवनरक्षोपायः, यथा—जीवातवे विसृज शूद्रमुनौ कृपाणम् (उ० रा० २-१०), जीवितमौषधं चेत्युपाध्यायः ॥ १२१ ॥ इति क्षत्रियवर्गः ॥ ८ ॥

ऊर्वोर्भवा ऊरव्याः, शरीरावयवाच्चेति (५।१।६) यत्, यच्छ्रुतिः—ऊरू तदस्य यद्वैश्यः (ऋ. वे. १०।९०।१२) । अरणीयोर्यः, अर्यःस्वामिवैश्ययोः (३।१।१०३) इति साधुः । विशोऽपत्यं जातिर्वैश्यः, गर्गादिभ्यो यञ् (४।१।१०५) । भूमिं स्पृशति कृष्यादिना भूमिस्पृक् । विशतीति विट् । (आजीवः) आजीवन्त्यनेनेति करणे भावे वा साध्यः । जीवनं जीविका, रोगाख्यायां (३।३।१०८) इत्यत्र धातुमात्राद् भावे ण्वुल् वक्तव्यः (धात्वर्थनिर्देशेण्वुल्) । कृष्यादिस्तूपचारात् । वर्तनं वृत्तिरस्यस्यां वार्त्ता, प्रज्ञाश्रद्धार्चावृत्तिभ्यो णः (५।२।१०१) । वर्तन्तेऽनया वृत्तिः । वेति खादत्यनेन वेतनम् ॥१॥ कर्षणं कृषिः, इक्कृष्यादिभ्यः (३।३।३२) । पशुपालस्य कर्म पाशुपाल्यम् । वणिजः कर्म वाणिज्यम्, ब्राह्मणादित्वात्ष्यञ् (गुणवचनं ब्राह्मणादिभ्यः कर्मणि च) । दूतवणिग्भ्यां चेतिवक्तव्यात् वणिज्यापि । चात्कुसीदम् । ऋतामृताभ्यां जीवेत्तु मृतेन प्रमृतेन वा । सत्यानृताभ्यामपि वा न श्ववृत्त्या कथंचनेति ये षड्वृत्तिभेदास्तानाह । (सेवा) शुन इव वृत्तिः परपिण्डोपजीवितत्वादधमेत्यर्थः । न ऋतमनृतं पापिष्ठत्वात्, प्रमृतमिति तु सभ्यः पाठः । उञ्छा धान्यकणोच्चयः—शिलं धान्यमञ्जरी, समस्तं व्यस्तं विपर्यस्तं वैतत्, वन्द्यत्वादृतं सत्यम् ॥ २ ॥ मृतं निर्जीवमिव । अमृतमनश्वरम् । किंचिसत्यं किंचिच्चासत्यं, अत्र मनुः—ऋतमुञ्छशिलं ज्ञेयं स्यादयाचितममृतम् । मृतं तु याचितं भैक्ष्यं प्रमृतं कर्षणं स्मृतम् ॥ सत्यानृतं तु वाणिज्यं तेनापि खलु जीव्यते । सेवा श्ववृत्तिराख्याता तस्मात्तां परिवर्जयेत्

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

3 Profession of usury.
1 A thing borrowed for use.

४ उद्धारो, ऽर्थप्रयोगस् तु कुसीदं वृद्धिजीविका ।
याञ्चया ऽऽतं याचितकं, निमयादापमित्यकम् ॥

1 Obtained by barter.

1 Creditor and Debtor.
4 A usurer.

५ उत्तमर्णाऽधमर्णौ द्वौ प्रयोक्तृ-ग्राहकौ क्रमात् ।
कुसीदिको वार्धुषिको वृद्ध्याजीवश् च वार्धुषिः ॥

4 A husbandman.
1 (Field) fit for corn and rice.

६ क्षेत्राजीवः कर्षकश्च कृषिकश् च कृषीवलः ।
क्षेत्रं व्रैहेय-शालेयं व्रीहि-शाल्युद्भवोचितम् ।

1 —producing barley, &c.
2 —producing seamum, &c.

७ यव्यं यवक्यं यष्टिक्यं यवाऽऽदि-भवनं हि यत् ।
तिल्य-तैलीन-वन् माषोमाऽणु-भङ्गा-द्विरूपता ॥

(मनु. ४-५-६१) अर्यते स्म ऋणं, ऋणमाधमर्ण्य इति (८।२।६० / ३७४३) साधुः । (पर्युदञ्चनं) परित उदञ्चनमुत्तमर्णामुद्धारत्वेन ग्रहणम् ॥ ३ ॥ अर्थस्य प्रयोगः कलान्तरेण दानम् । कुत्सितं सीदन्त्यत्र कुसीदम् । (याचितकं) अपमित्ययाचिताभ्यां-कक्कनौ (४।४।२१ / १५७३) । विनिमयाद् भाण्डपरिवर्तनादागतमापमित्यकं, मेङ् प्रणिदाने, उदीचांमाङोव्यतीहारे (३।४।१९ / २३१७), मयतेरिदन्यतरस्यां (६।४।७० / ३३१८) इति ल्यप्-तुक्, तत आगतेऽर्थे, अपमित्ययाचिताभ्यांकक्कनौ (४।४।२१ / १५७२) । मुनिस्तु-निमयः परिवर्तः स्यादुद्धारोऽप्यापमित्यकः ॥ ४ ॥ उत्तम ऋणे-उत्तमर्णः प्रयोक्ता, अधम ऋणे-अधमर्णो ग्राहकः, सुप्सुपेति समासः । कुसीदं गृह्णाति कुसीदिकः, कुसीद-दशैकादशात्ष्ठन्ष्ठचौ (४।४।३१ / १५८१) । वृद्धिं गर्ह्यां प्रयच्छति वार्धुषिकः, प्रयच्छतिगर्ह्यमिति (४।४।३० / १५८०) ठक्, वृद्धेर्वृधुषिभावः (वा० २९६५ / १५८०) । (वार्धुषिः) लक्ष्यादिन्नन्तोऽपि, यन्मनुः-श्रोत्रियस्य कदर्यस्य वदान्यस्यापि वार्धुषेः (मनु ४।२२४) । वृद्धिमाजीवति वृध्याजीवः । द्वैगुणिकश्च । वृद्धिर्लाभः कलान्तरम् ॥ ५ ॥ कर्षति कृषिकः, औणादिक इकः (वृश्चिकृष्योः किकन्) । कार्षकोऽपि । कृषिरस्त्यस्य कृषीवलः, रजःकृष्यासुतीति वलच्, वले (६।३।१३९८ / १०४०) इति दीर्घः । व्रीहीणां भवनं क्षेत्रं व्रैहेयं, व्रीहिशाल्योर्ढक् (५।२।११२ / १८०३) ॥ ६ ॥ यवानां भवनं क्षेत्रं यव्यं, यवयवकपष्टिकाद्यत् (५।२।१३ / १८०३) यवकोऽल्पयवः । षष्टिकाःषष्टिरात्रेण पच्यन्ते । उपाध्यायो यवादिभवने हितमिति पाठं परिकल्प्य प्रस्तावात्-चोद्यमित्यशुद्धं पठति । तिलानां भवनं क्षेत्रं, विभाषा तिल-माषोमाभङ्गाणुभ्यः (५।२।४ / १८०५) इति यत्खञौ । एवं माषादीनां द्विरूपता-माष्यं माषीण, उम्यमौमीनं (उमा-अतसी), अणव्यमाणवीनं, भङ्ग्यं भाङ्गीनम् ॥ ७ ॥

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh

1 —fit for other grain as pulse, &c.
2 Fit for vegetation.
2 (Land) ploughed after sowing.

८ मौद्गीन-कौद्रवीणाऽऽदि शेष-धान्योद्भव-क्षमम् ।
' शाक-क्षेत्राऽऽदिके शाकशाकटं शाकशाकिनम् ' ॥१॥
बीजाकृतं तृप्तकृष्टे, सीत्यं कृष्टं च हल्य-वत् ॥

3 Land any how ploughed or tilled.

4 Thrice ploughed.
5 Twice ploughed.

९ त्रिगुणाकृतं तृतीयाकृतं त्रिहल्यं त्रिसीत्यमपि तस्मिन् ।
द्विगुणाकृते तु सर्वं पूर्वं शम्बाकृतमपीह ॥

1 Sown with certain measures of seed.

१० द्रोणाऽऽढकाऽऽदि-वापाऽऽदौ द्रौणिकाऽऽढकिकाऽऽदयः
खारी-वापस् तु खारीक, उत्तमर्णाऽऽदयस् त्रिषु ॥

3 A field.
4 A multitude of fields.

११ पुन्-नपुंसकयोर् वप्रः केदारः क्षेत्रमस्य तु ।
कैदारकं स्यात् कैदार्यं क्षेत्रं कैदारिकं गणे ॥

2 Clods of earth.
2 A harrow.
3 A goad.
2 A spade or hoe.

१२ लोष्टानि लेष्टवः पुंसि, कोटिशो लोष्टभेदनः ।
प्राजनं तोदनं तोत्रं, खनित्रमवदारणे ॥

मुद्गानां कोद्रवाणां च भवनं क्षेत्रं, धान्यानां भवने क्षेत्रेखञ् (५।२।१/१८०२) । आदिशब्दान्मासूरीणादि । शेषाणि व्रीह्यादिभ्योऽन्यानि । शाकक्षेत्रे द्वयं–शाकशाकटं शाकशाकिनं भवने क्षेत्रे शाकटशाकिनौ वक्तव्यात् (वा० ३।१।१९/१८३०) । अबीजं सबीजं संपन्नं बीजाकृतं, कृञो द्वितीयतृतीयशम्बबीजात्कृषौ (५।४।५८/२१२९) इति डाच् । आदावुप्तं पश्चात्कृष्टं (उप्तकृष्टं), पूर्वकालैकेति (३।१।४०/७२६) समासः । सीतया हललेखया समितं संगतं सीत्यं,. नौवयोधर्मेति(४।४।९१/१२४३) सीतया समिते यत् । हलेन कृष्टं हल्यं, मतजन हलात्करणजल्पकर्षेषु (४।४।९७/२१३०) इति यत् ॥८॥ त्रिगुणं कृष्टं क्षेत्रं त्रिगुणाकृतं, संख्यायाश्च गुणान्तायाः (५।४।५९/१६४९) इति डाच् । त्रिहल्यं त्रिसीत्यमपि प्राग्वद्यत्, रथसीताहलेभ्यो यद्विधौ तदन्तविधिः येन विधिस्तदन्तस्य (३।१।७२/१६) । सर्वं पूर्वं डाच्–यच्च, द्वितीयाकृतं द्विहल्यं द्विसीत्यम् । शम्बाकृतं हि सम्यक् कृष्ट्वा तिर्यक् कृष्टमाहुः ॥९॥ द्रोणस्य वापः क्षेत्रं द्रौणिकं, उप्यतेऽस्मिन्वापः तस्य वापइति (५।१।४५/१७१२) ठञ् । आदिशब्दात्प्रस्थादिभ्यः, संभवत्यवहरति पचतीति (५।१।५२/१७१८) ठनि प्रास्थिकादयः । (खारीकः) खार्या ईकन् (५।१।३३/१६९८) वाच्यलिङ्गत्वात्क्षेत्रम् ॥ १० ॥ उप्यतेऽस्मिन्वप्रम् । के जले दार्यते केदारः । क्षीयते धान्यैरुप्यतेऽत्र फलैर्हीय (हिंस्य) ते वा क्षेत्रं, क्षि निवासे, क्षिणु हिंसायां वा । अस्य क्षेत्रस्य समूहेऽर्थे–एते स्युः । (कैदार्यं, इ०) केदाराद्यञ्चेति (४।२।४०/१२४८) यञ्वुञ्च (कैदारिकं) ठञ्कवचिनश्चेति (४।२।४१/१२४९) ठञ् । (क्षेत्रं) क्षेत्रात्–अचित्तहस्तीति (४।२।४७/१२५६) ठकि प्राप्ते भिक्षादित्वात् (४।२।३८/१२४४) अण् ॥ ११ ॥ लुप्यते लुपति वा लोष्टम् । लेष्टुश्च मृत्खण्डः । कोटिभिः कोणैः इयति भिनत्ति कोटिशः । प्राज्यते (प्रवीयते) प्रेर्यतेऽनेन

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

2 A sickle.
3 The tie of the yoke.
5 The ploughshare.
4 A plough.

१३ दात्रं लवित्रमाबन्धो योत्रं योक्त्रमथो फलम् ।
निरीषं कुटकं फालः कृषको, लाङ्गलं हलम् ॥

1 The body of the plough.

2 The pin of yoke.
2 The pole or shaft of the plough.

१४ गोदारणं च सीरो, ऽथ शम्या स्त्री युगकीलकः ।
ईषा लाङ्गलदण्डः स्यात्, सीता लाङ्गलपद्धतिः ॥

2 A furrow.

1 Post of the threshing floor.
3 Rice ripening in the rains.

१५ पुंसि मेधिः खले दारु न्यस्तं यत् पशु-बन्धने ।
आशुर् व्रीहिः पाटलः स्याच्छितशूक-यवौ समौ ॥

2 Barley.

1 Green or unripe barley.
4 Peas.
2 Sort of grain.

१६ तोक्मम् तु तत्र हरिते, कलायम् तु सतीनकः ।
हरेणु-रेणुकौ चाऽस्मिन्, कोरदूषस् तु कोद्रवः ॥

2 Lentil.
3 Mustard seed.

१७ मङ्गल्यको मसूरो, ऽथ मकुष्ठक-मयुष्ठकौ ।
वनमुद्गे, सर्षपे तु द्वौ तन्तुभ-कदम्बकौ ॥

3 Sort of kidney bean.

प्राजनं, वायाविति (२।४।५७) पक्षेऽजेर्वी, प्रवयणं च । तुद्यतेऽनेनेति तोत्त्रम् । प्रेषणं च । खन्यतेऽनेन खनित्रं कुद्दालादि ॥ १२ ॥ द्य(दा)न्ति लुनन्ति चानेन, दात्रीतिष्ट्रन् (३।२।१८२) । (लवित्रं) अर्तिलूधूसूखनसहचरइत्रः (३।२।१८४), आबध्यते यूयते युज्यते चानेनेति, चर्मरज्जुः । इतो हलप्रकरणमारब्धमित्यर्थः । निष्कान्ता–ईषास्मान्निरीषम् । कुटति कुटकं यस्याग्रे फालो बध्यते । फलति विशीर्यते भूमिरनेन फालः । कृषति क्ष्मां कृषकः, क्कुन्–शिल्पिसंज्ञयोः (उ० १९०), कृषिकः फलं च । लङ्गति लाङ्गलम् । हलति विलिखति हलम् ॥ १३ ॥ गौर्भूमिर्दार्यतेऽनेन गोदारणम् । सीयते बध्यतेऽनेन सीरः । शाम्यति शम्या । ईषति–ईषा, ईष उञ्छे ॥ स्यति भुवं सीता हललेखा ॥ १४ ॥ मीयते क्षिप्यते मेधिः, मेध्यन्ते (सं)गम्यन्तेऽस्मिन्वा, खलेदार्विति हलदन्तात्सप्तम्याः (६।३।९) इत्युलुक्, पशुबन्धननिमित्तम् । खलेवाली च । खलं तु खलवान[धान्य]कम् । अश्यतेऽश्नुते वा–आशुः, शीघ्रपाको वा, यद् दुर्गः–आश्वाख्या शालिशीघ्रयोः । व्रीणाति व्रीहिः षष्टिकादिधान्यविशेषः, व्री भरणे, यतः–व्रीहिर्ययो मसूरो गोधूमो मुद्गमाषतिलचणकाः । अणवप्रियङ्गुकोद्रव-मयुष्टकाः (शालिराढक्यः) ॥ द्वौ च कलायकुलत्थौ शणसप्तदशानि धान्यानि । शितस्तीक्ष्णः शूकः किंशारुरस्य शितशूकः । यूयते यवः ॥ १५ ॥ तत्र नीले यवे, तुज्यते तोक्मः, तुजिर्हिंसार्थः । कल[म]यति सारमयते कलायः कं लाति वा । सीदन्त्यनेन सतीनकः, सातीनकोऽपि । ह्रियते हरेणुः । खण्ड्यते खण्डिकः । कोरं भक्तं दूषयति कोरदूषः कदन्नत्वात् । केनाम्भसा–उद्यते कोद्रवः ॥ १६ ॥ (मसूरः) मसी परिणामे । मङ्क्यतेऽनेन मकुष्ठः । मीयते मयुष्टकः । सरति सर्षपः । तुदति तुन्तुभः ।

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

1 The white sort.
2 Wheat.
2 Half ripe barley.
2 Chich pea.

१८ सिद्धार्थस् त्वेष धवलो, गोधूमः सुमनः समौ ।
स्याद् यावकस् तु कुल्माषश्, चणको हरिमन्थकः ॥

2 Barren sesamum.
5 Black mustard.

१९ द्वौ तिले तिलपेजश् च तिलपिञ्जश् च निष्फले ।
क्षवः क्षुताभिजननो राजिका कृष्णिकाऽऽसुरी ॥

2 Panic seed.
3 Lin; and linseed.
2 Hemp.
1 *China.*

२० स्त्रियौ कङ्गु-प्रियङ्गू द्वे, अतसी स्यादुमा क्षुमा ।
मातुलानी तु भङ्गायां, व्रीहि-भेदस् त्वणुः पुमान् ॥

2 Beard of corn.
2 Ear or spike.
3 Corn or rice.
1 Clump of grass. &c.

२१ किंशारुः सस्यशूकं स्यात्, कणिशं सस्यमञ्जरी ।
धान्यं व्रीहिः स्तम्बकरिः, स्तम्बो गुच्छस् तृणादिनः ॥

2 Stalk or culm.
1 Straw.
2 Chaff.
2 Husk of rice or corn.

२२ नाडी नालं च काण्डोऽस्य, पलालोऽस्त्री स निष्फलः ।
कडङ्गरो बुसं क्लीबे, धान्यत्वचि तुषः पुमान् ॥

कुत्सितमम्बते कदम्बः ॥ १७ ॥ (सिद्धार्थः) सिद्धण्योजनो रक्षोघ्नत्वात्, एष सर्षपः । गुध्यति परिवेष्टयति गोधूमः, गां धुनोति वा । सुष्ठु मन्यते सुमनः, अकारान्तः । यूयतेऽम्भसा यावकः । कोलति कलेन मस्यति परिणमति वा कुल्माषः, अर्धस्विन्नो यवादिः, धान्यविशेष इत्येके । चण्यते दीयते चणकः । हरिभिर्मथ्यते हरिमन्थः ॥ १८ ॥ तिलान्निष्फलात्पिञ्जपेजौवक्तव्यौ (वा० $\frac{२७१३}{१२४२}$) जातिकः स्याद्वनतिलः । क्षौत्यनेन क्षवः । क्षुतमभिजनयति क्षुताभिजननः । कृष्णसर्षपोऽयं राजसर्षपाख्यः । राजते राजिका । कृष्णा वर्णेन, कर्षति विलिखति वा । अस्यते-आसुरी, असुरस्त्रीव वा ॥ १९ ॥ कुत्सितं कृत्वाङ्ग्यते कङ्गुः, कङ्गुः कङ्गश्चेत्येके । प्रीणाति प्रियङ्गुः । न तस्यते-अतसी । अवते-उमा, ऊङ् शब्दे । क्षौत्यनया भुक्तया क्षुमा । न तोल्यते मातुलानी । भज्यते भङ्गा । शणोऽपि । अणुरल्पकणत्वात्, अणति पर्दत्यनेनेति वा । तुवरि त्वरके वल्लो निष्पावे श्यामाकः श्यामके च ॥ २० ॥ कुत्सितं शृणाति किंशारुः । श्यति शूकम् । कणः सन्त्यस्य कणिशम् । धान्ययवादिशिलः, शिलं च । धन्यतेऽर्थ्यते धान्यम् । स्तम्बं करोति स्तम्बकरिः, स्तन्बशकृतोरिन् ($\frac{३।२।२४}{२९३८}$) । शी [सी] त्यं च । कुसूलो वलजः कोष्ठागारं धान्यादिकोष्ठकः । तृणादेर्यः स्तम्बो नालं, स गुध्यतेऽनेनेति गुच्छः । यं प्रति स्तंबोऽप्रसिद्धस्तं प्रत्यन्यथाविध्यनुवादौ कार्यौ । एवं सर्वत्रोन्नेयम् ॥ २१ ॥ अस्य गुच्छस्य यः काण्डः-कण्ड (य) त्यनेन-सा नाडी, नड-(ता) ति । (नालं) णल गन्धे । स काण्डः पलालः, पलतीति । कटत्यावृणोति, कट् (ड्) अङ्गं रूपमस्य कडङ्गरः । बुस्यते-

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

1 An awn.
2 A legume or pod.
2 Stored, as grain.

२३ शूकोऽस्त्री श्लक्ष्ण-तीक्ष्णाऽग्रे, शमी शिम्बा, त्रिपूत्तरे।
ऋद्धमावसितं धान्यं, पूतं तु बहुलीकृतम् ॥
2 Threshed out and winnowed.

1 Grain in pods.
1 Bearded corn.
1 Rice.

२४ माषाऽऽदयः शमीधान्ये, शूकधान्ये यवाऽऽदयः।
शालयः कलमाऽऽद्याश् च षष्टिकाऽऽद्याश् च, पुंस्यमी ॥

2 Wild grains.
2 Coix.
2 A pestle for cleaning rice.

२५ तृणधान्यानि नीवाराः, स्त्री गवेधुर् गवेधुका।
अयोग्रं मुसलोऽस्त्री स्यादुदूखलमुलूखलम् ॥ 2 A mortar.

2 A winnowing basket.
2 A sack.
2 A granary.

२६ प्रस्फोटनं शूर्पमस्त्री, चालनी तितउः पुमान्। 2 A sieve or cribble.
स्यूत प्रसेवौ, कण्डोल-पिटौ, कट-किलिञ्जकौ ॥ 2 A mat.

3 A kitchen.
1 Overseer of the kitchen.

२७ समानौ, रसवत्यां तु पाकस्थान-महानसे।
पौरोगवस् तदध्यक्षः, सूपकारास् तु वल्लवाः ॥ 7 Cooks.

उत्सृज्यते बुस तृणादिक्षोदः। तुष्यत्यनेनाग्निस्तुषः ॥ २२ ॥ श्यति शूकम्, श्लक्ष्णं च तीक्ष्णाग्रं च तत्। सस्यादेरन्यत्र वृश्चिकादिकण्टकोऽपि शूक इति किंशारोरन्यत्र निर्दिष्टः, शूकधान्यशमीधान्यभेदार्थं वा पुनरुक्तः। शाम्यत्यस्यां सस्यं शमी। शिनोति शिम्बा। शामः शिम्बिरित्यपि। रिद्धाद्याश्चत्वारो वाच्यलिङ्गाः। रिद्धं संसिद्धं राधेः, ऋद्ध संपन्नमित्यके ऋधेः। आवसितं रक्षार्थमाच्छादितं, वस आच्छादने, आ-अवसितं निष्पन्नमित्येके। पूयते स्म पूतं निर्बुसीकृतम्। बहु लाति बहुलं सारं, ततश्चिवः, मार्जनीशोधितमित्येके ॥ २३ ॥ वर्तन्त इति शेषः। (माषादयः) आदिशब्दान्मुद्गमसूरादयः। (यवादयः) आदिशब्दाद् गोधूमशालयः। शाल्यते शालिः। कल्यते कलमः। आद्यशब्दाद्राजशाल्याद्या जलजाः। षष्टिकाः षष्टिरात्रेण पच्यन्ते। आद्यशब्दात्कक्कोलाद्याः स्थलजाः। अमी इति पुंलिङ्गनिर्देशान्माषाद्याः शाल्यंताः पुंसि ॥ २४ ॥ नियतैर्व्रियन्ते नीवाराः, मुन्यन्नत्वात्, नौ वृ धान्य इति (३।४।४८ / ३२२३) घञ्। बहुवचनाच्छ्यामाकादयोऽपि। गवे (वि) अम्भसि निधीयते गवेधुर्नाम मुन्यन्नम्। अयोऽग्रेऽस्य-अयोग्रं, अयोनिरित्येके पेठुः। मुस्यते खण्ड्यतेऽनेन मुसलम्। ऊर्ध्वे खं लाति (उदूखलमुलुखलं) उद्वणो ल्वणवत् पृषोदरादित्वात् (६।३।१०९ / १२७२) उभयम् ॥ २५ ॥ प्रस्फोट्यतेऽसारं बहिः क्रियतेऽनेन प्रस्फोटनम्। शीयते शीर्यते वानेन शूर्पं, शूर्प माने वा। चाल्यतेऽनेनेति चालनं, काल्यः-क्षुद्रच्छिद्रसमोपेतं चालनं तितउः स्मृतः। तनोति सारं तितउः, तनोतेर्डउःसन्वच्च (उ० ७३०)। परिपवनं च। समानावित्येव। सीव्यते स्म स्यूतः वस्त्राद्यावपनं च। प्रसीव्यते प्रसेवकः। कण्ड्यते कण्डोलः। पिण्ड्यते पिण्डः, वंश-दलादिमयं भाण्डम्। पिटकोऽपि। कटत्यावृणोति कटः। किल्यते क्षिप्यतेऽस्मिन् किलिञ्जः, वीरणतृणादिमयं कुणालाख्यम् ॥ २६ ॥ रस आस्वादोऽस्त्यस्यां रसवती।

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

२८ आरालिका आन्धसिकाः सूदा औदनिका गुणाः ।
आपूपिकः कान्दविको भक्ष्यकार, इमे त्रिषु ॥

3 A baker.

२९ अश्मन्तमुद्धानमधिश्रयणी चुल्लिरन्तिका ।
अङ्गारधानिकाऽङ्गारशकट्यपि हसन्त्यपि ॥

5 A furnance or fire-place.
4 A portable furance.

३० हसन्यप्यथ न स्त्री स्यादङ्गारो, ऽलातमुल्मुकम् ।
क्लीबेऽम्बरीषं भ्राष्ट्रो, ना कन्दुर् वा स्वेदनी स्त्रियाम् ॥

1 A fire.
2 Fire brand.
2 A frying pan.
2 An iron plate or pan.

३१ अलिञ्जरः स्यान् मणिकं, कर्कर्य्यालुर् गलन्तिका ।
पिठरः स्थाल्युखा कुण्डं, कलशस् तु त्रिषु द्वयोः ॥

2 A jar.
3 A pitcher.
4 A pot.
4 A waterpot.

३२ घटः कुट-निपाव-स्त्री शरावो वर्धमानकः । 2 A lid.
ऋजीषं पिष्टपचनं, कंसो ऽस्त्री पानभाजनम् ॥

2 A seether or boiler.
2 A goblet.

महदनोऽस्य महानसं, अनसोपकरणं लक्ष्यते, अनोश्मायःसरसामिति (५।४।९४ / ७९६) समासान्तष्टच् । पुरो गौमांसं जलं वास्याः पुरोगुस्तस्या रसवत्या अयं पौरोगवः । सूपं कुर्वन्तीत्युपलक्षणं मांस्याकादेः । (वल्लवः) वल्लिः सौत्रः प्रीत्यर्थः ॥ २७ ॥ (आरालिकाः, इ०) अरालमन्ध ओदनं च पण्यमेषाम् । सूदयन्ति तण्डुलान्सूदाः । गुणयन्ति गुणाः । भक्तकाराश्च । अपूपाः कन्दुश्च पण्यमस्य, इसुसूक्तान्तात् (५।३।४ / १२२१) के, कान्दुक इति न्याय्यम् । खरविशदमभ्यवहार्यं भक्ष्यम् । पौरोगवाद्या वाच्यलिङ्गाः ॥ २८ ॥ अश्नुतेऽश्मन्तम् । उद्ध (द्ध) पते (ति) उद्धा (ध्म) नम् । अधिश्रीयतेऽनयाधिश्रयणी, श्रीञ् पाके । चुल्ल भावकरणेऽस्माच्चुदेर्वा चुल्लिः । अन्तोऽस्त्यस्यस्यामन्तिका, अन्त्यधिश्रयणी भवेदिति माला । अङ्गारा धीयन्तेऽस्यामङ्गारधानी मन्नाग्निः । हसन्त्यङ्गारैर्हसनी ॥ २९ ॥ अङ्गत्यङ्गारः, लिङ्गार्थं विधिः । अलन्ति वारयन्त्येतदवाते न लान्ति वा (अलातम्) । उल्कां मुञ्चत्युल्मुकमर्धदग्धं काष्ठं, उलति वा, उलिः सौत्रः । अम्ब्यतेऽर्थ्यतेम्बरीषम् । भृज्ज्यते भ्राष्ट्रम् । वेत्येव विकल्पेन कन्दुर्ना पुमान्, पक्षे स्त्री, कन्दत्येनां कन्दुः । स्वेदयति स्वेदनी ॥ ३० ॥ अलं जीर्यत्यलंजरो महाकुम्भः । मणत्यञ्जसा भ्रियमाणो मणिकः । किरत्यम्बु कर्करी । आलात्यालुः, अड उद्यमेऽस्मादाड्यूर्वा । गलत्यम्भोऽस्या गलन्तिका, वर्धनीत्यर्थः । पि (पे) ठति पिठरः पिठरी च, पिठ अवयवे । तिष्ठत्यस्यां स्थाली । स्थालं कुम्भी च । ओखत्युखा । कुण्ड्यते पच्यतेऽस्मिन्कुण्डं कुण्डी च । कं लाति कलयति वा कलशः ॥ ३१ ॥ घटते घटः । कुटति कौत्यम्भसा वा कुटः । निपिबन्त्यस्मान्निपः । शीर्यमाणमवति शरावः । वर्धते मृत्पिण्डाद्वर्ध्यते छिद्यते वा चक्राद्वर्धमानकः ।

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

1 A leather bottie for oil. ३३ कुतूः कृत्तेः स्नेह-पात्रं, सैवाऽल्पा कुतुपः पुमान् । 1 A small one.
5 Any vessel. सर्वमावपनं भाण्डं पात्राऽमत्रे च भाजनम् ॥

3 A ladle or spoon. 2 A wooden ladle. ३४ दर्विः कम्बिः खजाका च, स्यात् तद्दूर् दारुहस्तकः ।
3 A potherb. अ-स्त्री शाकं हरितकं शिग्रुरस्य तु नाडिका ॥

2 Its stalk. ३५ कलम्बश् च कडम्बश् च, वेषवार उपस्करः । 2 A condiment.
3 Acid seasoning. 6 Pepper. तिन्तिडीकं च चुक्रं च वृक्षाम्लमथ वेल्लजम् ॥

३६ मरीचं कोलकं कृष्णमूषणं धर्मपत्तनम् ।
4 Cumin. 6 *Calónji*. जीरको जरणो ऽजाजी कणाः कृष्णे तु जीरके ॥

शालाजिरोऽपि । अर्च्यते पाकोत्कर्षादृचीकं, ऋजीषसिति **तान्त्रिकाः**, ऋजीभृजी भर्जने । पिष्टकृतं भक्ष्यं पच्यतेऽस्मिन् पिष्टपचनम् । काम्यतेऽस्मात्कंसः । चषको मल्लिका पारी च ॥३२॥ कुत्सितं तन्यते कुतूः । कृत्तेश्चर्मणः (स्नेहपात्रम्) । ह्रस्वा कुतूः कुतुपः, कुत्वाडुपच् ($\frac{५।३।८९}{२०४४}$) । आ–उप्यते–आधेयमस्मिन्नावपनम् । भण्ड-[य]त्याधेयं भाण्डम्, भडि परिभाषणे । पात्याधेयं पीयतेऽस्माद्वा पात्रम् । अमत्यधेयामत्र मत्रम् । भज्यतेऽस्मिन्नाधेयं भाजनम् । भाण्डावपने पृथगाहुः, यन्मुनिः–उष्ट्रिकादि तु यद्भाण्डं सर्वामावपनं विदुः ॥३३॥ दृणाति पाक्यं दर्विः । काम्यते कम्बिः । खजति मथ्नाति खजाका । ततं दुनोति खण्डयति तन्दूः, तण्डुरिति सभ्यः पाठः तनोति वा । दारुमयो हस्तप्रतिकृतिर्दारुहस्तकः, दर्वीभेदोऽयम् । श्यति देहं शक्यतेनेन वा भोक्तुं शाकम् । हरितकं नीलत्वात् । शिनोति शिग्रुः, द्वयर्थं शिग्रुः शोभाञ्जनं हरितकविशेषश्च ॥ ३४ ॥ अस्य शाकस्य नाडी, कडति के लम्बते वा कडम्बः (कलम्बः), शाकविशेष इत्येके, प्राकृते दस्य(श्च)लाडात्कदम्ब इत्याहुः । काडंवो वा । वेषं व्याप्तिं वृणीते वेषवारः । कासमर्दकसुरसादिर्येन मांसान्युपस्क्रियन्तेऽसावुपस्करः, समवाये च ($\frac{६।१।१३८}{२५५१}$) इति सुट् । तन्नेदानाह । तिन्तिडिशैलजं-तिन्तिडीकम् । चक्रं, चुक्र व्यथने । वृक्षस्याम्लवेतसमाहुः । वेल्ले वेल्लातटे जायते वेल्लजं, वेल्लाख्यः शाखीत्येके ॥ ३५ ॥ म्रियते जिह्वाऽनेन मरीचम् । सौक्ष्म्यात्कोलकं, कुड बाल्ये । कृष्णं वर्णेन कर्षति तैक्ष्ण्याद्वा । ऊषति ऊजति–उषणम् । धर्मपत्तने भवं धार्मपत्तनम् । आह च–मरीचं वलितं श्यामं वेल्लकं(जं)कृष्णमूषणम् । यवनेष्टं सितवृन्तं कोलकं धार्मपत्तनम् ॥ जीर्यतेऽनेनान्नं जीरकः । जरयतीति जरण इति सभ्याः । अजं स्वाभाविकं मन्दाग्नित्वमजति–अजाजी, स्त्री । कणाः सन्त्यस्याः कणा, अर्श आदिभ्योऽच् ($\frac{५।२।१२७}{१९३३}$) । कणा कृष्णा तु पिप्पलीत्येके पेटुः ॥ ३६ ॥

धर्मपत्तन also called धर्मराजनगर was an ancient name of the country round Ligor in the Malaya Peninsula. (Nakhon Si Thammarat), called तम्बरट्ठ in Pali, equal to धर्मराष्ट्र (Journal of Greater India Society,

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

३७ सुषवी कारवी पृथ्वी पृथुः कालोपकुञ्चिका ।
आर्द्रकं शृङ्गवेरं स्यादथ छत्रा वितुन्नकम् ॥

2 Ginger.
4 Coriander.

३८ कुस्तुम्बरु च धान्याकमथ शुण्ठी महौषधम् ।
स्त्री-नपुंसकयोर् विश्वं नागरं विश्वभेषजम् ॥

5 Dry ginger.

३९ आरनालक-सौवीर-कुल्माषाऽभिषुतानि च ।
अवन्तिसोम-धान्याम्ल-कुञ्जलानि च काञ्जिके ॥

8 Sour gruel.

४० सहस्रवेधि जतुकं बाल्हीकं हिङ्गु रामठम् ।
तत्-पत्री कारवी पृथ्वी बाष्पिका कबरी पृथुः ॥

5 Assa fœtida.
5 *Hingupatri.*

४१ निशाऽऽख्या काञ्चनी पीता हरिद्रा वरवर्णिनी ।
साम्रुद्रं यत् तु लवणमक्षीवं वशिरं च तत् ॥

5 Turmerick.
2 Sea salt.

सुष्ठु सुवति प्रेरयति दोषान् सुषवी । कारोरियं कारवी । पृथ्वी बृहत्कणा । काला वर्णेन । उपकुञ्चयत्यल्पीकरोति दोषानुपकुञ्चिका । आह च–उपकुञ्चिकोपकुञ्ची च कालिका चोपकालिका । सुषवी कुञ्चिका कुञ्ची पृथ्वीका कृष्णजीरके ॥ (आर्द्रकं) आर्द्रात्संज्ञायां कन् (५।३।७५) । शृङ्गोपलक्षितं वेरं देहोऽस्य शृङ्गवेरम् । आह च–महौषधं शृङ्गवेरं कटुभद्रं तथार्द्रकम् । छत्रातपत्रा, छादयति दोषान्वा छत्रा । वितुदति मन्दाग्नित्वं वितुन्नकम् ॥ ३७ ॥ कुत्सितं तुम्बति कुस्तुम्बरु, लुबि तुबि अर्दने, पारस्करादित्वात्सुट् (३।१।१५७) । धान्यमकति धान्याकं, अल्लुका धान्यकं च । शुण्ठति शुष्यति शुण्ठी । नागराख्ये देशे भवं नागरम् । विश्वभेषजमनेकदोषजित् । विश्वं विश्वा च भीमवत् ॥ ३८ ॥ आरनालो भक्तं तज्जमारनालम् । सुवीरेषु प्रायो भवं सौवीरम् । (अभिषुतं) षुञ् अभिषवे, अस्माद्वा पृथक् कुल्माषाख्या नास्ति, चेद् भीमवत् स्यात् । कुल्माषैर्यवादिभिरर्धस्विन्नैरभिषूयते परिवास्यते स्म कुल्माषाभिषुतम् । अवन्तिषु सूयते –अवन्तिसोमम् । कुञ्जं लाति कुत्सितं जलमस्य वा कुञ्जलम् । कञ्ज(ञ्च) यति दीपयत्यग्निं बध्नाति दोषान्वा काञ्जिकं, काञ्च्यां पुरि भवं वा । आह च (धन्वन्तरिः)–काञ्जिकं काञ्जिकं वीरं कुल्माषाभिषुतं तथा । अवन्तिसोमं धान्याम्लमारनालं महारसम् (ध. ६।२९४) ॥ सौवीरकं सुवीराम्लं तथा शुक्तं तुषोदकम् ॥ ३९ ॥ सहस्रं बहु विध्यति सहस्रवेधि । जायते जतुकम् । बाह्लीकरामठावुदग्देशौ । हिनोति हिङ्गु । अत्युग्रं भूतनाशनमगूढगन्धं च । तस्य हिङ्गोः पत्त्री, कारोरियं कारवी संस्कर्त्री । बाष्पं स्रवति बाष्पिका । कबर्याकृतिः कवरी, कर्वरीति च पाठभेदः ॥ ४० ॥ निशाख्या रात्रिपर्याया नानार्थे रजनीत्वात् । काञ्चनवर्णा काञ्चनी । हरि पीतं वर्णं द्राति (गच्छति) हरिद्रा । वरो वर्णोऽस्त्यस्या

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh

4 Rock salt. ४२ सैन्धवो ऽस्त्री शीतशिवं माणिमन्थं च सिन्धुजे ।
2 Another sort.
2 Factitious salt. रौमकं वसुकं, पाक्यं बिडं च कृतके द्वयम् ॥
3 *Sóchal* salt:white. ४३ सौवर्चले ऽक्ष-रुचके, तिलकं तत्र मेचके ।
1 The same : black.
1 Raw sugar.
1 Refined sugar. मत्स्यण्डी, फाणितं, खण्डविकारे, शर्करा सिता ॥
2 Inspissated milk. ४४ कूर्चिका क्षीरविकृतिः स्याद्रसाला तु मार्जिता ।
2 Curds with sugar and spices.
2 Sauce or condiment. स्यात् तेमनं तु निष्ठानं, त्रि-लिङ्गा वासिताऽवधेः ॥

वरवर्णिनी । आह च–हरिद्रा पीतिका पिण्डा र (रं) जनी रजनी [काञ्चनी] निशा । गौरी वर्णवती पीता हरिता वरवर्णिनी ॥ (ध. नि. १।१७) लुनाति जाड्यं लवणं, नन्द्यादित्वाल्लयुः ($\frac{३|१|१३४}{२८९६}$), णत्वं च । अक्ष्णोति व्याप्नोति–अक्षीवम् । उश्यते वशिरं, वश कान्तौ ॥ ४१ ॥ सिंधुनद्युपलक्षिते देशे भवं सैन्धवम् । शीतं शिनोति शीतशिवं, उष्णवीर्यत्वात् । मणिबंधगिरौ भवं मणिबन्धम् । मणिमन्तं (न्थं) माणिमन्थं वाऽऽहुः । आह च–सैन्धवं साधु सिन्धूत्थं नादेयी-(यं) सिंधुजं शिवं । शुद्धं शीतशिवं चान्यन्माणिबन्धं शिलातकम् (ध.नि.२।११)॥ रुमायामाकरे भवं रौमकम् । वस्तगंधि वस्तकं नाम लवणं, रौमके वस्तकं वस्त्रिति माला । पाके साधु पाक्यं पक्तव्यं वा कल्लाराख्यम् । विलति भिनत्ति मलं बिडम् । कृतकस्य लवणस्य द्वे नामनी, पाक्यबिड-लवणयोर्भेदेऽपि कृतकत्वादैक्यम् । व्यर्थे पाक्यं बिडलवणं यवक्षारः काचश्चेति (अ. द्र. ३।२४)॥४२॥ सुवर्चलाकरे भवं सौवर्चलं, सुवर्चस्येदमग्निदीपनं लाति वा, वर्चं दीप्तौ, अच् । अक्ष्णोति व्याप्नोत्यक्षम् । रोचतेऽनेन रुचकम् । हृद्यगन्धं च । तिलति स्निह्यति तिलकम् । तत्र तस्मिन्मेचके कृष्णे लवणे वर्तते पूर्वं तु मधु (र) लवणम् । अगन्धं कृष्णलवणं तिलकमित्येके, यद्वैद्याः–कृष्णे सौवर्चलगुणा लवणे गन्धवर्जिते । मदं स्यन्दते मत्स्यण्डी सामान्यशर्करा, मत्स्यानमति रुजति मत्स्य(त्स्या) ण्डीति वैद्याः, यद्धन्वन्तरिः–शर्करोक्ता तु मीनाण्डी श्वेता मत्स्यण्डिका सिता (ध. नि. २।१०४) । मत्स्यण्डिकाखण्डसिताः क्रमेण गुणवत्तरा इति तु वाह(ग्भ)टः । फाण्यते द्रवत्वात्फाणितं खण्डश्वेता । क्षौद्रकं त्विक्षुरसविकारः खण्डवत् । शीर्यते शर्करा । सीयते सिता खण्डशर्कराख्या ॥ ४३ ॥ कूर्चस्तत्(क्र)मस्तु तदस्त्यस्याः कूर्चिका, कुचति कुचिका, कुचिकेत्येके किलाटिकाख्या । रसमलति रसाला । मार्ज्यते मार्जिता दधिसितामरीचादिकृतं लेह्यं, यत्सूदशास्त्रम्–अर्धाढकं सुचिर[ढ]पर्युषितस्य दध्नः खण्डस्य षोडश पलानि शशिप्रभस्य । सर्पिष्पलं मधुपलं मरिच-द्विकर्षं शुण्ठ्याः पलार्धमपि वा[चा]र्वपलं चतुर्णाम् । श्लक्ष्णे पटे ललनया मृदुपाणिघृष्टा कर्पूरधूलिसुरभीकृतभाण्डसंस्था । एषा वृकोरदरकृता सु[स]-

CC-0. Agamnigam•Digital Presevation Foundation, Chandigarh

3 Roasted on a spit.
2 Dressed.

४५ शूलाकृतं भटित्रं स्याच्छूल्यमुख्यं तु पैठरम्। 2 Boiled in a caldron.
प्रणीतमुपसंपन्नं, प्रयस्तं स्यात् सुसंस्कृतम् ॥ 2 Seasoned.

2 Sauce mixed with rice-gruel.
3 Bland, soft.

४६ स्यात् पिच्छिलं तु विजिलं, संमृष्टं शोधितं समे। 2 Strained.
चिक्कणं मसृणं स्निग्धं, तुल्ये भावित-वासिते ॥ 2 Scented.

3 Food half dressed.
2 Rice, &c. flattened.
2 Fried barley or rice.

४७ आपक्कं पौलिरभ्यूषो, लाजाः पुम्-भूम्नि चाऽक्षताः। 2 Fried grain.
पृथुकः स्याच् चिपिटको, धाना भृष्टयवे स्त्रियः ॥

3 Cake.
2 —mixed with curds.
6 Boiled rice.

४८ पूपो ऽपूपः पिष्टकः स्यात्, करम्भो दधिसक्तवः।
भिस्सा स्त्री भक्तमन्धोऽन्नमोदनो ऽस्त्री स दीदिविः ॥

रसा रसाला या स्वादिता भगवता मधुसूदनेन ( )॥ तिम्यत्यार्दीभवत्यन्नमनेन तेमनमुपसेचनं क्नोपनाख्यम्। नितिष्ठत्यन्नमनेन निष्ठानम्। व्यञ्जनं च सूपाद्युपचारात् ॥ ४४ ॥ इतः प्रभृति वासितान्ता वाच्यलिङ्गाः (शूलाकृतं) शूलात्पाके (५।४।६५/२२३६) इति डाच्। भटत्यनेनेन भटित्रं, भट भृतौ। शूले संस्कृतं शूल्यं, शूलोखाद्यत् (४।२।१७/२३२८)। भारुटकं भृष्टं च। संस्कृतं सर्पिषा दध्ना सार्पिष्कं दाधिकं क्रमात्। उदलावणिकं तत्स्याद्यत्सिद्धं लवणाम्भसा॥ उखायां स्वाल्यां संस्कृतं-उख्यम्। पिठरे संस्कृतं पैठरं, संस्कृतं भक्षाः (४।२।१६/२२२७) इत्यण्। रूपरसादिनिष्पन्नमन्नं, प्रणीयते स्म प्रणीतम्। परिव्ययपाकादिना प्रयत्ननिष्पन्नं प्रयस्तम्। संस्कृतं (४।४।३/२७७२) अनित्ये साधुः ॥ ४५ ॥ (पिच्छिलं) पिच्छादित्वादिलच् (लोमादिपामादीति)। विजते चलति विजिलं, विज्जलमिति वैद्याः। वालमक्षिकादिरहितं संमृष्टं, मृजू शुद्धौ। चिगित्यव्यक्तं कणति चिक्कणम्। मस्यति मसृणम्। भाव्यते मिश्रीक्रियते स्म भावितं, भुवोऽवकल्कने (धा. सू.) णिच्। वास्यते द्रव्यान्तरेण मेल्यते, धूपपुष्पादिना वाधिवास्यते वासितं, यन्मुनिः-धूपितं वासितं विदुः ॥ ४६ ॥ ईषद्भृष्टं कलायादि-आपक्कं खलभर्जिताख्यम्। पु(पो)लति वर्धते पौलिः पुल महत्त्वे। ऊषेरुजार्थादभ्यूषः, उषेर्दाहार्थादभ्योष इत्येके। लज्यन्ते लाजाः, लज भर्जने। न क्षण्यन्तेऽक्षताः, चाद्भिन्नक्रमात्तेऽपि पुंसि बहुत्वे च। अक्षता यवा इति पुराणं तन्मते पुंबहुत्वार्थो विधिः। आर्द्रं भृष्टं सस्यं तद्विपाकात्पृथूभवति चिपिटीभवति च, नीलधान्यं वा भृष्टमुलूखलक्षोदाच्चिपिटीभूततण्डुलम्। धीयन्ते धानाः। भृष्टयव इति जात्याख्यायामेकत्वम्। धानाचूर्णं सक्तवः स्युर्बुस्तिः स्यान्मांसशष्कुली, भूस्तिरिति द्रवि[मि]डाः ॥ ४७ ॥ पुनाति पूपः। न पूय[य्य]तेऽपूपः पिष्टातकमयो मण्डकाख्यः, पूयी विशरणे; अद्भिरुप्यत इति नैरुक्ताः। (पिष्टकः) पिष्टाच्चसंज्ञायां (४।३।१४७/२७७८) कन्। मुनिस्तु-अपूपः पिष्टपूपः स्यात्पूपा भक्ष्याः प्रकीर्तिताः। केन रभ्यते मीह्यते

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

2 The same scorched.
3 Scum of boiled rice.

४९ भिस्सटा दग्धिका, सर्व-रसाऽग्रे मण्डम-स्त्रियाम् ।1 Scum.
मासराऽऽचाम-निस्रावा मण्डे भक्त-समुद्भवे ॥

5 Rice gruel.

५० यवागूरुष्णिका श्राणा विलेपी तरला च सा ।
'म्रक्षणाऽभ्यञ्जने तैलं, कृसरम् तु तिलौदनः' ॥(१)

1 Belonging to a cow.
1 Dry cowdung.
3 Milk.
1 Prepared from milk.
1 Thin or diluted curds.

गव्यं त्रिषु गवां सर्वं, गोविड् गोमयम-स्त्रियाम् ।।2 Cow-dung.
५१ तत् तु शुष्कं करीषो ऽस्त्री, दुग्धं क्षीरं पयः समम् ।
पयस्यमाज्य-दध्याऽऽदि, त्रप्स्यं दधि घनेतरत् ॥

4 Clarified butter.
2 Fresh butter.
1 Butter of yesterday's milk.

५२ घृतमाज्यं हविः सर्पिर्, नवनीतं नवोद्धृतम् ।
तत् तु हैयङ्गवीनं यत्ह्यो-गो-दोहोद्भवं घृतम् ॥

कीर्यते वा करम्भः । दध्युपसिक्ताः (दधिसक्तवः) । भस्यते भक्ष्यते भिस्सा, भ्यसेः संप्रसारणं वा, ब्राह्मणभिस्सेति भाष्यम् । भज्यते भक्तम् । अनित्यनेनान्धः सान्तम् । अद्यतेऽन्नम् । उनत्ति क्लिद्यत्योदनम् । भृशं दिव्यत्यनेन दीदिविः, स इति विशेषणात्पुंसि ॥ ४८ ॥ कुत्सिता भिस्सा भिस्सटा, ययौदनभिस्सटा, लक्ष्यानुरोधाद्वः–यथा स्वर्गग्रामटिका, (?) वधूटिका । सर्वद्रवद्रव्याणामग्रं मुख्यं, मण्डयति मण्डः । मस्यति परिणमते मासरः । आचम्यत आचामः । निस्राव्यते निस्रावः ॥ ४९ ॥ यूयते पिष्टादिना यवागूः, सृयुवचिभ्य इत्यागूच् (उ० ६४१)। संज्ञितोष्णः–उष्णिका, ब्राह्मणकोष्णिके संज्ञायाम् ($\frac{५।२।७१}{१८७१}$) । श्रायते श्राणा, श्रा पाके । विलिम्पति विलेपी । तरला लेह्यत्वाच्चपला । म्रङ्क्षणाभ्यञ्जने तैलं कृश[स]रस्तु तिलौदनः । गोरिदं गवि भवमित्यादिष्वर्थेषु गव्यं क्षीरादि, सर्वत्रगोरजादिप्रसंगे यत् (वा० $\frac{२५६१}{१०७७}$) । गोर्विष्ठा गोविट् गोमयं च गोश्चपुरीषे ($\frac{४।३।१४९}{१५३५}$) मयट् ॥ ५० ॥ करोत्यग्निं करीषं शुष्कगोमयम् । दुह्यते दुग्धम् । घस्यते (अद्यते) क्षीरम्, घसेःकिच्च (उ. ४७४) इतीरन्, गमहनजनेति ($\frac{४।६।९८}{२६६७}$) उपधालोपः, खरिच ($\frac{८।४।५५}{१२१}$) इति चर्त्वम्, शासिवसिघसीनां च ($\frac{८।३।६०}{२४१०}$) षत्वम् । पीयते पयते वा रसत्वात्पयः, असुन्, । सममिति पयसो नपुंसकत्वार्थम् । पयसो विकारः पयस्यं, गोपयसोर्यत् ($\frac{४।३।१६०}{१५३८}$) । आदिशब्दान्नवनीतादि । दृप्यति(अनेन) द्रप्सम् । घनादन्यद-घनमित्यर्थः, यन्माला द्रप्सं दध्यघनं तथा । एतच्च द्रप्सं शरमिति भागुरिपाठे सरमिति बुध्द्वा मालाकारो भ्रान्तः । केचिन्नष्टैस्तु नाशिता इत्ययमपि मालापाठेन विप्रलब्धः, यदाह दुर्गः–बाणद्रप्सौ शराविति । इत्थं तु समर्थ्यं, तरत्–उपरि प्लवमानं घनं दधि द्रप्सम् ॥ ५१ ॥ जिघर्ति घृतम् । आ–अङ्गनीयमाज्यं, आङ्पूर्वा-दञ्जेःसंज्ञायां क्यप् (वा० $\frac{१९२५}{२८९८}$) । हूयते हविः, हविष्यं च । सर्पति सर्पिः,

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

4 Butter-milk. ५३ दण्डाहतं कालशेयमरिष्टमपि गोरसः ।
1 —with proportions of water. तक्रं ह्युदश्विन् मथितं पादाम्बर्धाम्बु निर्जलम् ॥
1 Whey of curds. ५४ मण्डं दधि-भवं मस्तु, पीयूषो ऽभिनवं पयः ।
1 Milk of a cow which lately calved.

3 Hunger. अशनाया बुभुक्षा क्षुद्, ग्रासस् तु कवलः पुमान् ॥
2 A mouthful.

2 Drinking together. ५५ सपीतिः स्त्री तुल्यपानं, सग्धिः स्त्री सहभोजनम् ।
2 Eating together.
4 Thirst. उदन्या तु पिपासा तृट् तर्षो, जग्धिस् तु भोजनम् ॥
7 Food.

५६ जेमनं लेह आहारो नियासो न्याद इत्यपि ।
3 Satiety. सौहित्यं तर्पणं तृप्तिः, फेला भुक्तसमुज्झितम् ॥
2 Outs, leavings.

6 Voluntarily. ५७ कामं प्रकामं पर्याप्तं निकामेष्टं यथेप्सितम् ।
6 Herdsman. गोपे गोपाल-गोसंख्य-गोधुगाभीर-वल्लवाः ॥

इसन्तौ । दध्नो मथितान्नवं तत्कालं नीतमुद्धृतं नवनीतं घृतयोनिः । ह्योगोदोहस्य विकारो हैयङ्गवीनं, हैयङ्गवीनं संज्ञायां (५।२।२३) इति साधुः । कात्यो नवनीतमित्याह ॥ ५२ ॥ मन्थदण्डेनाहतं दण्डाहतम् । कलश्यां गर्गर्यां भवं कालशेयम् । न रिष्यति हिनस्ति–अरिष्टं, सर्वरोगचिरत्वात् । तद्विशेषानाह । तञ्चति द्रुतं गच्छति तक्रं चतुर्भागाम्बु । उदकेन श्वयति–उदश्विदर्धाम्बु । दध्नो मथनमात्रसाध्यं मथितं निर्जलम् । द्विगुणाम्बु श्वेतरसमर्धोदकमुदश्वितम् । तक्रं त्रिभागभिन्नाम्बु केवलं मथितं स्मृतमिति धन्वन्तरिः (६।२११) ॥५३॥ दध्नो मण्डं द्रवो भागः, मस्यति परिणमते मस्तु । पीयते पीयूषः, नवप्रसूतगवीक्षीरं क्वथितं सत् । अशनेच्छा-अशनाया, अशनायोदन्येति (७।४।६४) साधुः । भोक्तुमिच्छा बुभुक्षा । क्षुत्, क्षुध बुभुक्षायाम् । रोचकोऽस्त्री रुचिश्च । प्रस्यते ग्रासः । के तालुनि बलते कवलः ॥ ५४ ॥ सहपानं सपीतिः । सहादनं सग्धिः, क्तिन्, बहुलं छन्दसि (२।४।३९) इति घस्लृ, घसिभसोर्हलि च (६।४।१००) इत्युपधालोपः, झलो झलि (८।२।२६) इति सलोपः, झषस्तथोर्धोऽधः (८।२।४०), झलां जश् झशि (८।४।५३) । उदकेच्छा उदन्या, अशानायोदन्येति (७।४।३४) साधुः । तर्पणं तृट् तर्षश्च, वितृष पिपासायाम् । तृष्णा नानार्थे । अदनं जग्धिः आदोजग्धिर्ल्यप्ति किति (२।४।३६) ॥ ५५ ॥ जमेर्जेमनमाहुः, जमनं जवनं वा, यद् दुर्गः–जवनं भोजनं क्वचित् । न्यदनं निधसः, नौ णच (३।३।६०) इत्यप्, घञपोश्च (२।४।३८) इति घस्लादेशः । णे (नौण च) न्यादः । प्रत्यवसानमभ्यवहारश्च । सुहितस्य भावः सौहित्यम् । फलति विशीर्यते फेला, फेल चलनेऽस्माद्वा ॥ ५६ ॥ काम्यते कामम् । पर्याप्तिः पर्याप्तम् । इष्यत इष्टम् । ईप्सितमनतिक्रम्य यथेप्सितम् । प्रायः क्रियाविशेषणान्येतानि अत एवा-

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh

1 Stock of cattle.
3 Owner of kine.
2 A herd.
1 Formerly grazed by cattle.
9 A bull or ox.

५८ गो-महिष्याऽऽदिकं पादबन्धनं, द्वौ गवीश्वरे ।
गोमान् गोमी, गोकुलं तु गोधनं स्याद् गवां व्रजे ॥
५९ त्रिष्वाशितंगवीनं तद् गावो यत्राऽशिताः पुरा ।
उक्षा भद्रो बलीवर्द ऋषभो वृषभो वृषः ॥

1 A herd of oxen.
2 A herd of kine.

६० अनड्वान् सौरभेयो गौरुक्ष्णां संहतिरौक्षकम् ।
गव्या गोत्रा गवां, वत्स-धेन्वोर् वात्सक-धैनुके ॥

1 —of calves, and milch cows.

1 A large bull or ox.
2 An old bull.
1 A bullock.
1 A newborn calf.
2 A calf.
2 A steer.
2 One fit to be set free.
2 A bull at liberty.

६१ उक्षा महान् महोक्षः स्याद्, वृद्धोक्षस् तु जरद्गवः ।
उत्पन्न उक्षा जातोक्षः, सद्यो जातस् तु तर्णकः ॥
६२ शकृत्करिस् तु वत्सः स्याद्, दम्य-वत्सतरौ समौ ।
आर्षभेयः षण्ढतायोग्यः, षण्ढो गोपतिरिट्चरः ॥

व्ययत्वे–एतेषां श्रीभोजो भ्रान्तः, यच्छाश्वतः–कामे निकामे कामाख्या (१०३) । गाः पाति गोपः । गाः संख्याति गोसंख्यः । गा दोग्धि गोधुक् । आ–अभित ईरयति–आभीरः । वल्लयति गा वल्लवः, वल्लिः सौत्रो वा ॥ ५७ ॥ पादे बन्धनमस्य पादबन्धनम् । आदिशब्दात्स्वरादि । यादवं धनमित्येके पेठुः । गावः सन्त्यस्य गोमी-ज्योत्स्नातमिस्रेति (५।२।११४/१०२१)साधुः । व्रजन्त्यस्मिन्व्रजःगोसंबन्धी समूहः, गोचर-संचरेति (३।३।११९/३२९८) साधुः । धनं च ॥ ५८ ॥ आशिता भोजिता गावो यत्राशितं-ववीनं, अपडक्षाशितंग्विति (५।४।७/२७७९) स्वार्थे खः । आसितंगवीनमिति प्राच्यानां भ्रमः यद्व्याख्यन्–गावो यत्रोषिताः पुरेति । उक्षति–उक्षा । भन्दते भद्रः । वलीन्वृदते वलीवर्दः । ऋषति गच्छति ऋषभः ॥ ५९ ॥ अनोवहत्यनड्वान्, अनसिवहेः क्विबनसोऽश्च (उ०) । सुरभेरपत्यं सौरभेयः । गच्छति गौः । अवान्तरभेदोऽस्य न विवक्षितः । शक्करशाक्करौ वाढवेयः शाङ्करश्च । (औक्षकं) गोत्रोक्षोष्ट्रेति (४।२।३९/१२४६) वुञ् । संहतिरित्येव । (गव्या, गोत्रा) खलगोरथादिति (४।२।५०/१२५९) यः, इनित्रकट्यचश्चेति (४।२।५१/१२६७) त्रः । वत्सानां समूहो वात्सकं, गोत्रोक्षोष्टेति (४।२।३९/१२४६) वुञ्, धेनूनां समूहो धैनुकम्, अचित्तहस्तिधेनोष्ठक् (४।२।४७/१२५६) ॥ ६० ॥ महांश्चासावुक्षा च महोक्षः, अचतुरविचतुरेति (५।४।७७/६४७) साधुः । एवं वृद्धोक्षजातोक्षौ । माला च–महोक्षः स्यादुक्षतरे स्कान्धिकः स्कन्धवाहकः । षोडन् षड्दशनो वत्सः कूटो भग्नविषाणकः ॥ जरंश्चासौ गौश्च जरद्गवः, गोरतद्धितलुकि (५।४।९२/७३४) इति टच् । तृणोत्यत्ति केवलं तर्णकः ॥ ६१ ॥ शकृत्करोति शकृत्करिः, स्तम्बशकृतोरिन् (३।२।२४/२९६८), व्रीहिवत्सयोरुपसंख्यानात् (वा० २००३/२९३६) । वसति वत्सः । दमार्हो दम्यः । वत्सत्वं तनुत्वमस्य वत्सतरः, वत्सोक्षाश्वर्षभेभ्यश्च

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh

1 A bull's shoulder. 2 His dewlap. 2 An ox, with a rein through his nose.

६३ स्कन्ध-देशे त्वस्य वहः, सास्ना तु गलकम्बलः ।
स्यान् नस्तितस् तु नस्योतः, प्रष्ठवाड् युगपार्श्वगः ॥

2 Young cattle in training.

3 Cattle yoked &c. 2 Ploughman; plough-cattle, &c.

६४ युगाऽऽदीनां तु वोढारो युग्य-प्रासंग्य-शाकटाः ।
खनति तेन तद् वोढा ऽस्येदं हालिक-सैरिकौ ॥

5 Cattle for burden. 3 Cattle for special burden.

६५ धूर्वहे धुर्य-धौरेय-धुरीणाः स-धुरन्धराः ।
उभावेकधुरीणैकधुरावेकधुरावहे ॥

1 —for any carriage. 9 A cow.

६६ स तु सर्वधुरीणः स्याद् यो वै सर्व-धुराऽऽवहः ।
माहेयी सौरभेयी गौरुस्रा माता च शृङ्गिणी ॥

(५।३।९१ / २७४६) इति ष्टरच्, तनुत्वं द्वितीयवयःप्राप्तिः । (आर्षभ्यः) अण्डकर्षणोचितः, षण्डतेत्येके, अत एव ऋषभस्य प्रतिकृतिरार्षभ्यः, ऋषभोपानहोर्ज्यः (५।१।१४ / २६७६) । सन्यत उत्सृज्यते षण्डः । एषणमिट्, इषा चरति—इट्चरः स्वेच्छाचारी, इत्वर इत्येके पेतुः ॥ ६२ ॥ वहत्यनेनेति वहः, गोचरसंचरेति (३।३।११९ / ३२९८) साधुः । सस्ति स्वपितीव व्याप्रियमाणत्वात् सीयते वा सास्ना, षस स्वप्ने, षोन्तकर्मणि । नासाया नस्तः, नस्नासिकायायतः क्षुद्रेष्विति: (वा० २६६७ / ३४९३) नस् । नस्तः क्रियते स्म नस्तितः, प्रातिपदिकाद्धात्वर्थे इति (ग० २०३) णिजन्तान्निष्ठा, नासायां कृतच्छिद्रो गौरित्यर्थः । नासिकायां भवे नस्ये नासाकृते रन्ध्रे रज्ज्वादिना—उत उत्तम्भितो नस्योतः । पञ्चमं षष्ठं वा वर्षं वहति षष्ठवाड् युवा गौः, वहश्च (६।२।६४ / ३४५०) इति ण्विः । युगस्य स्कन्धकाष्ठस्य पार्श्वं गच्छति युगपार्श्वगो हलवोढेत्यर्थः । दमनाय योजित इत्येवं लक्षणविचक्षणेनापि ग्रन्थकृता वहंलिहाद्या नोक्ताः ॥ ६३ ॥ (युग्य इ०) युगं प्रासङ्गं शकटं च वहति, तद्वहतिरथयुगप्रासङ्गं—(४।४।७६ / २६२७) इति यत्, शकटादण् (४।४।८० / १८३२) । (हालिक इ०) हलेन खनति, तेनदीव्यतिखनतीति (४।४।२ / २७५०) ठक् । हलं वहति हलस्येदं वेति, हलसीराट्ठक् (४।४।८१ / २६३३) ॥६४॥ (धुर्य इ०) धुरं वहति, धुरो यड्ढकौ (४।४।७७ / २६२८), खः सर्वधुरादिति (४।४।७८ / २६) योगविभागात्खः । धुरं धारयति धुरंधरः, कथंचित्संज्ञात्वात्खच् (संज्ञायांभृतृवृजीति ३।२।४६ / २९६३), धूर्धरोऽन्यथा स्यात् । (एकधुरीण इ०) एकधुराल्लुक्च (४।४।७९ / २६३१) इति खो लुक्च, लुक्पक्षे, ऋक्पूरब्धूरिति (६।४।७४ / २४०) अः समासान्तः ॥ ६५ ॥ (सर्वधुरीणः) खः सर्वधुरात् (४।४।७८ / २६३०) । मह्यते पूज्यते महा, तस्या अपत्यं माहेयी । वसति क्षीरमस्यामुस्रा । शृङ्गिण्यादयः सामान्यान्यपि

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh

1 An excellent one. ६७ अर्जुन्यघ्न्या रोहिणी, स्यादुत्तमा गोषु नैचिकी ।
1 Cows brindle, white, &c. वर्णाऽऽदि-भेदात् संज्ञाः स्युः शबली-धवलाऽऽदयः ॥

1 A heifer two years old. ६८ द्विहायनी द्वि-वर्षा गौरेकाऽब्दा त्वेकहायनी । 1 —one year old.
1 —four years old. चतुरब्दा चतुर्हाण्येवं त्र्यब्दा त्रिहायणी ॥ 1 —three years old.

2 A barren cow. ६९ वशा वन्ध्या, ऽवतोका तु स्रवद्गर्भा, ऽथ संधिनी ।
2 A cow miscarrying by accident. 1 One which has gone to the bull.
2 Miscarrying from going unseasonably. आक्रान्ता वृषभेणाथ वेहद् गर्भोपघातिनी ॥

1 Fit for the bull. ७० काल्योपसर्या प्रजने, प्रष्ठौही बालगर्भिणी । 1 A pregnant heifer.
2 A tractable cow. स्यादचण्डी तु सुकरा, बहुसूतिः परेष्टुका ॥ 2 A cow bearing many claves.

विशेषे वर्तन्ते ॥ ६६ ॥ अर्जुनीति शुक्लगवी । न हन्त्यघ्न्या, अघ्न्यादयश्च (उ० ५५१) इति साधुः । रोहिणी शबला । अनड्वाही गौरनडुही, प्रशस्ता गोमतल्लिका । सुरभिर्नानार्थे । नीचैश्चरति नैचिकी, ठक्, अव्ययानां भमात्रे टिलोपो वक्तव्यः (वा० $\frac{६।४।१४}{४१८७}$) । इतो गवाधिकारः प्रागुष्ट्रात् । शबलीति, अन्यतो ङीप् ($\frac{४।४।४८}{४९७}$) । धवला, अन्तोदात्त इत्यनुदात्तत्वाभावाद् ङीप् नास्ति । आद्यादिशब्दाच्चण्डामुण्डाद्याः, द्वितीयात्कृष्णाकपिलाद्याः ॥ ६७ ॥ द्वौ हायनौ वयःप्रमाणमस्यां इत्योर्हीयस्य टञ्-अध्यर्धपूर्वे यदिता ($\frac{५।१।२८}{१६९३}$) लुक्, दामहायनान्ताच्च ($\frac{४।१।२७}{४८६}$) इत्यत्र हायनीद् वयसि प्रथमे ($\frac{४।१।२०}{४७८}$) इति ङीप् । द्वे वर्षे प्रमाणमत्या द्विवर्षा (गौः), वर्षाल्लुक्च ($\frac{५।१।८८}{१७५३}$), चित्तवति नित्यम् ($\frac{५।१।८९}{१७५५}$), अपरिमाणविस्ताचितेति ($\frac{४।२।२२}{४८०}$) ङीप्-नास्ति, कालसंख्या च न परिमाणमिति । त्रिचतुर्भ्यांहायनस्य णत्वं वाच्यं (वा० $\frac{५०३८}{४८६}$) वयसि ॥६८॥ वटि कामयते परं वशा । बध्नाति प्रसूतिं बन्ध्या बन्धनीया वा । अवस्रुतं तोकमपत्यमस्या अवतोका, अप (व) स्रवन्ती च, मृतवत्सा स्रवद्गर्भेति **माला** । संधानं संधा गर्भग्रहणमस्त्यस्याः संधिनी अदुग्धा दोहकाले तु संधिनीति **कात्यः**, संधिन्यकालदुग्धा गौर्वृषाक्रान्ता च संधिनीति **शाश्वतः** (५२८)। विहन्ति गर्भं वेहत्, वेह प्रयत्नेऽस्माद्वा, वेहद्वृषोपगतेति **भागुरिः** ॥ ६९ ॥ प्रजने गर्भग्रहणे (काल्या) प्राप्तकाला, वृषेणोपसरणीयोपसर्या, उपसर्याकाल्यान्प्रजने ($\frac{३।१।१०४}{२८५२}$) इति साधुः । प्रष्ठं वहति प्रष्ठौही, वहश्च ($\frac{३।२।९४}{३७२}$) इति ण्विः, वाहइति ($\frac{४।१।६१}{५१६}$) ङीप्, बाह ऊठ् ($\frac{६।४।१३२}{३२९}$) एत्येधस्यूठ्सु ($\frac{६।१।८९}{७३}$) इति वृद्धिः । प्रष्ठौही गर्भिणीति सर्वे, असिक्नी बालगर्भिणीति **भागुरिः**, पलिक्नी बालगर्भिणीति **माला** । अचण्डा- अकोपनेत्यर्थः, वाह्वादित्वात् ($\frac{४।१।९६}{१०९६}$) वा ङीप् । सुखेन क्रियते सुकरा, सुशक्करीत्यागमः । परमिच्छति परेष्टुका । सकृत्प्रसूता

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh

2 One which has lately calved.
2 Easily milked.
2 With a large udder.

७१ चिरप्रसूता बष्कयणी, धेनुः स्यान् नवसूतिका ।
सुव्रता सुखसंदोह्या, पीनोध्नी पीवरस्तनी ॥

1 Yielding a *dróna* of milk.
1 Calving every year.

७२ द्रोणक्षीरा द्रोणदुग्धा, धेनुष्या बन्धके स्थिता । 1 Standing at the dairy.
समांसमीना सा यैव प्रति-वर्षं प्रसूयते ॥

2 An udder.
2 A pillar.
2 A rope or cord.
2 A string or tie.

७३ ऊद्धस् तु क्लीबमापीनं, समौ शिवक-कीलकौ ।
न पुंसि दाम संदानं, पशुरज्जुस् तु दामनी ॥

5 A churningstick.
2 A post round which its string winds

७४ वैशाख-मन्थ-मन्थान-मन्थानो मन्थदण्डके ।
कुठरो दण्डविष्कम्भो, मन्थनी गर्गरी समे ॥ 1 A churn.

4 A camel.
1 A young one.
1 Young camels clogged.

७५ उष्ट्रे क्रमेलक-मय-महाङ्गाः, करभः शिशुः ।
करभाः स्युः शृङ्खलका दारवैः पाद-बन्धनैः ॥

गृष्टिः ॥ ७० ॥ बष्कतेऽतिशामति बष्कयश्चिरकालः: औणादिकत्वात् (अयन्), सोऽस्त्यस्याः (बैष्कयिणी), बष्कयणीति सभ्याः । धयत्येनां धेनुः । (सुव्रता) सुशीलेत्यर्थः। पीनमूधोऽस्याः पीनोध्नी, ऊधसोऽनङ् (५।४।१३१), बहुव्रीहेरूधसो ङीष् (४।१।२५) । पीवरस्तनी, स्त्राङ्गाच्चोपसर्जनादिति (४।१।५४) ङीष् ॥ ७१ ॥ द्रोणं दोग्धि द्रोणदुग्धा, दुहःकब्घश्च (३।२।१०)। धेनुष्या संज्ञायां धेनुष्येति (४।४।८९) साधुः, आ ऋणशुद्धेर्या बन्धके स्थापिता पीतदुग्धाख्या । (समांसमीना) समांसमां विजायते (४।४।७९) इति खः ॥ ७२ ॥ उनत्यूधः । आप्यायत आपीनं, प्यायःपी (६।१।२८) सोपसर्गान्न (वा० ५०६५), आङ्य (आङ्पूर्वस्या) न्धूधसोर्वक्तव्यात् (वा० ३४६१), ओदित्वात् ओदितश्चेति (८।२।४५) निष्ठानत्वम् । हम्भा (म्बा) रावो गवां ध्वनिः । शिवात्कम्, शिनोति वा शिवकः । कीलयते बध्यतेऽस्मिन्कीलकः । दीयते रक्ष्यतेऽनेनेति संदानं बन्धा रज्जुः । (दामनी) नित्यं संज्ञाछन्दसोः (४।१।२९) इति ङीष् ॥७३॥ विशाखासु जातो वैशाखः, विशाखापाढादण्मन्थदण्डयोः (५।२।११०), विशाखस्यायं वा । मथ्यतेऽनेन मन्थः, पुंसि संज्ञायां घःप्रायेण (३।३।११८)। मथ्नाति मन्थानः, शानच् । (मन्थाः) मथिन्–शब्दस्य–इतोऽत्सर्वनामस्थाने (७।१।८६), थो न्थः (७।१।८७) । मन्थानार्थो दण्डो मन्थनदण्डः । खजकः क्षुब्धोऽपि । कुटति कटरः, कुटको वा दण्डकटके वर्तते । दण्डं विष्कम्भ्नाति दण्डविष्कम्भः, यस्मिन्बद्ध्वा दण्ड आकृष्यते । मञ्जीरोऽपि, दण्डकरोटकमित्यके । मथ्यतेऽस्यां मन्थनी । गिरति दधि-गर्गरी । कलशिश्च ॥ ७४ ॥ उष्यते दह्यते मरौ–उष्ट्रः । क्रमानेलयति क्रमेलकः । मीनात्यहीन्मयः, मयते गच्छति वा, मर्यत इत्येके । दासेरको दीर्घजङ्घो ग्रीवी

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh

2 A she-goat.
5 A he-goat.
7 A ram.

७६ अजा छागी, शुभच्छाग-वस्तच्छगलका अजे ।
मेढ्रोरभ्रोरणोर्णायु-मेष-वृष्णय एडके ॥

1 Herd of camels; flock of sheep and goats.
5 An ass.

७७ उष्ट्रोरभ्राऽज-वृन्दे स्यादौष्ट्रकौरभ्रकाऽऽजकम् ।
चक्रीवन्तस् तु बालेया रासभा गर्दभाः खराः ॥

8 A trader.

७८ वैदेहकः सार्थवाहो नैगमो वाणिजो वणिक् ।
पण्याजीवो ह्यापणिकः क्रयविक्रयिकश् च सः ॥

2 A vender.
2 A buyer.
2 Traffic.
3 Price.

७९ विक्रेता स्याद् विक्रयिकः, क्रायिक-क्रयिकौ समौ ।
वाणिज्यं तु वणिज्या स्यान्, मूल्यं वस्नोऽप्यवक्रयः ॥

रवणधूम्रकौ । कं शिरो रभत उत्तम्भयति करभो बालोष्ट्रः । (शृङ्खलकः) शृङ्खलमस्य बन्धनंकरभइति ($\frac{५।२।७९}{१८७९}$) कन् । विकारे नित्यंवृद्धशरादिभ्यः ($\frac{४।३।१४४}{१७,३४}$) इति मयटा दारुमयैरिति भवितुं युक्तम् ॥ ७५ ॥ अजति गच्छति व्यायामशीलत्वादजा, अजाद्यतष्टाप् ($\frac{४।१।४}{४७,४}$) । छयति रोगं छागी, जातेरस्त्रीविषयादयोपधात् ($\frac{४।१।६३}{७,१८}$) इति ङीप् । स्त्रीविषयप्रत्ययार्थं पृथक्पाठः । शोभते शुभः, शु(तु)भो निघण्टुषु । वस्ते वस्तः । छयति रोगांश्छागः, छालश्च । छागोऽपि । मेहति मेढ्रः । उरु भ्राम्यति– उरभ्रः, उच्चै रभते वा, उः स्वरप्रतिरूपको निपातः । एवमुच्चैरणोऽस्येत्युरणः, उरण्यति देवताः प्रीणातीति श्रीभोजः कण्ड्वादिपाठात् । ऊर्णास्त्यस्योर्णायुः, ऊर्णाया युस् ($\frac{५।२।१२३}{१७९३९}$) । मेषति वाशते मेषः, पचाद्यच् (नन्दिग्रहीति $\frac{३।१।१३४}{१८९६}$) । वर्षति वृष्णिः । आ–ईड्यन्ते देवा अनेन एडकः । हुडुश्च । अर्विनार्थे ॥७६॥ (औष्ट्रकं, इ०) गोत्रोक्षोष्ट्रोरभ्रेतिवुञ् ($\frac{४।२।३९}{२४६}$) चक्रमस्त्यस्य तैलिकादिचक्रभ्रमणाच्च, आसन्दीवदष्ठीवच्चक्रीवदिति ($\frac{८।२।१२}{१९००}$) साधुः । चक्रवालस्तु बालेय इति माला । बालेभ्यो हितो बालेयः, वाले व[च]लने भवो वा । रासते रासभः, रासृ शब्दे । गर्दति गर्दभः, गर्द शब्दे । खं शब्दं राति खरः, खमस्त्यस्य वा, (रप्रकरणे) खमुखकुञ्जेभ्यो रः वा० ($\frac{३।१।९८}{१९१४}$) । क्रूरोऽपि, शङ्कुकर्णोऽपि । षड्द्वित्वयोः पशुभ्यः षड्गवमथ गोयुगं च परं यथा मेषषड्गवं गोगोयुरम्, पशुनामभ्यो द्वित्वे गोयुगच् (वा० $\frac{३।१।१६}{१८३०}$), षट्त्वे षड्गवच् ($\frac{३।१।१७}{१८३०}$) । अविसोढमविमरीसं तथाविदूसं पयो मेष्याः, अवेर्दुग्धेसोढदूसमरीसचोवक्तव्याः ($\frac{२७।१२}{१२४२}$) ॥ ७७ ॥ विदेहे–उपचये भवो वैदेहकः । सार्थान्सधनान्सरतो वा पान्थान्वहति सार्थवाहः । निगमे–आपणे भवो नैगमः । पणते वणिक् । वणिगेव वाणिजः, प्रज्ञादित्वात्स्वार्थेऽण् ($\frac{५।४।३८}{१९७६}$) । आपणः प्रयोजनमस्त्यस्यापणिकः । क्रयविक्रयाभ्यां जीवति क्रयविक्रयिकः, विस्नक्रयविक्रयाठन् ($\frac{४।४।१६}{१७,६३}$) इति संघातविगृहीताठन् ॥ ७८ ॥ विक्रीणीते भाण्डेन मूल्यं गृह्णाति विक्रेता । क्रीणाति मूल्येन भाण्डं क्रायकः । क्रयेण

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh

3 Capital; principal.
4 Barter.
1 Gain; profit.

८० नीवी परिपणो मूलधनं, लाभो ऽधिकं फलम् ।
पारिदानं परीवर्तो नैमेय-निमयावपि ॥

2 A deposit.
1 The return of it.

८१ पुमानुपनिधिर् न्यासः, प्रतिदानं तदर्पणम् ।

1 Exposed for sale.
2 Purchasable.

क्रये प्रसारितं क्रय्यं, क्रेयं क्रेतव्य-मात्रके ॥

3 Vendible.
3 Ratification of a bargain.

८२ विक्रेयं पणितव्यं च पण्यं, क्रय्याऽऽदयस् त्रिषु ।
क्लीबे सत्यापनं सत्यङ्कारः सत्याकृतिः स्त्रियाम् ॥

2 Contract of sale.
1 Numerals.

८३ विपणो विक्रयः, संख्याः संख्येये द्वादश त्रिषु, ।
विंशत्याऽऽद्याः सदैकत्वे सर्वाः संख्येय-संख्ययोः, ॥

जीवति क्रयिकः । वणिजो भावो वाणिज्यं, ब्राह्मणादित्वात्ष्यञ् (गुणवचनब्राह्मणादिभ्यः कर्मणि च) । (वणिज्या) दूतवणिग्भ्यां चेतिवक्तव्याद्यच्च (वा० ?) । मूलेनानाम्यं मूल्यं, नौवयोधर्मेति (४।४।९१ / २६४३) यत् । वसत्यस्मिन्पण्यं वस्नः । अवक्रीयतेऽनेनावक्रयः ॥ ७९ ॥ नीवीव परहस्तेऽर्प्यमाणत्वात् । परिपण्यते वृद्ध्यर्थं प्रयुज्यते परिपणः । मूलं लाभकारणम् । मूलधनादधिकं निष्पन्नं स लाभः फलं च । कलान्तरादि । परिवर्तादानं परिदानम् । निमेये परिवर्तनीये भवो नैमेयः । निमानं निमयः, मेङ् प्रणिदाने ॥८०॥ उपसृत्य समीपे निधीयते गुप्तं स्थाप्यते-उपनिधिः, उपसमीपे निधेर्वा । न्यस्यते निक्षिप्यते न्यासः । निक्षेपोऽपि । स्मार्ते(याज्ञव० २, ६५)-त्वेषां भेदोऽस्ति–वासनस्थमनाख्याय हस्तेऽन्यस्य यदर्पितम् । द्रव्यमुपनिधिर्न्यासः प्रकाश्य स्थापितं तु यत् ॥ निक्षेपः शिल्पिहस्ते तु भाण्डं संस्कर्तुमर्पितम् ॥ तस्य न्यासस्य निक्षेप्त्रे प्रतीपं दानं प्रतिदानं, परिदानमित्येके । प्रत्यक्षादानं स्वीकारोऽवक्रयः [वक्तव्यः] क्लृप्तकं च तत् । क्रयनिमित्तमापणे न्यस्तं (क्रय्यं), क्रय्यस्तदर्थ इति (६।१।८२ / ६२) साधुः । (क्रेयं) यथा क्रेयो गौर्वर्तते न च क्रय्योऽस्ति ॥ ८१ ॥ (पण्यं) अवद्यपण्यवर्येति (३।१।१०१ / २८४९) साधुः । (त्रिषु) वाच्यलिङ्गा इत्यर्थः । अवश्यं मयैतद्विक्रेयमिति सत्यस्य करणं सत्यापनं, सत्यापपाशरूपेति (३।१।२५ / २५६३) णिच्, अर्थवेदसत्यानामापुक् (वक्तव्यः) (वा० १७५८ / २६७७) । (सत्यकारः) कारेसत्यागदस्येति (६।३।७० / २००७) मुम् । (सत्याकृतिः) सत्यादशपथ इति (५।४।६६ / २२३७) डाच् ॥८२॥ विपणनं विपणः, चुराद्यदन्तादच्, नन्दिग्रहीति ३।१।१३४ / २८९६), अन्यतो विपाणः स्यात् । एकाद्या दशान्ताः संख्याः संख्येयेषु वर्तमानास्त्रिलिङ्गाः, एका शाटी, एकः पटः, एकं कुण्डं, दश स्त्रियः, दश पटाः, दश कुण्डानि । आदशेत्यष्टादशान्ताः । विंशत्याद्याः सर्वा एव संख्याः संख्येये संख्यायां च नित्यमेकवचनान्ता एव वर्तन्ते, यद् भाष्यम्–आदशभ्यः संख्या संख्येये वर्तते, ऊर्ध्वं संख्याने संख्येये च, विंशतिः पटाः, विंशतिः पटानां, शतं गावः, शतं गवाम् ।

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

८४ संख्याऽर्थे द्विबहुत्वे स्तस्, तासु चाऽऽनवतेः स्त्रियः ।
पङ्क्ते शत-सहस्राऽऽदि क्रमाद् दश-गुणोत्तरम् ॥

3 Measure.
1 Of three sorts.
1 A *Másha*.

८५ यौतवं द्रुवयं पाय्यमिति मानाऽर्थकं त्रयम् ।
मानं तुलाऽङ्गुलि-प्रस्थैर्, गुञ्जाः पञ्चाऽऽद्यमाषकः, ॥

1 Sixteen times as much.
2 A *karsha* of gold.
1 A *pala* of gold.

८६ ते षोडशाऽक्षः कर्षो ऽस्त्री, पलं कर्ष-चतुष्टयम्, ।[1] Four times the last.
सुवर्ण-विस्तौ हेम्नो ऽक्षे, कुरुविस्तस् तु तत्-पले, ॥

1 100 *Palas*.
1 Twenty times as much.
1 Ten times the last.

८७ तुला स्त्रियां पल-शतं, भारः स्याद् विंशतिस् तुलाः, ।
आचितो दश भाराः स्युः, शाकटो भार आचितः. ॥

[अत्र विंशतिशब्देनैकान्नविंशतिशब्दोऽपि ज्ञेयः] ॥८३॥ संख्यामात्रार्थे वर्तमानाया विंशत्यादेः संख्याया द्विवचनबहुवचने अपि स्तः [भवतः] एकशेषात्, द्वे विंशती, तिस्रो विंशतयः, गवां विंशती, गवा विंशतयः । विंशत्याद्या नवत्यन्ताः स्त्रीलिङ्गाः । द्वौ(द्वे) पञ्चतौ पङ्क्तिर्दशाख्या, पङ्क्तिर्विंशतिस्त्रिंशदिति ($\frac{५।१।५९}{१७२५}$) साधुः । दश पङ्क्तयः शतम् । दश शतानि सहस्रम् । दश सहस्राण्ययुतम् । इत्थं परार्धान्तान्यष्टादश गणितस्थानानि, यदाहुः–एकदशशतसहस्राण्ययुतं प्रयुताख्यलक्षमथ नियुतम् । अर्बुदकोटिन्यर्बुदपद्मं खर्वं निखर्वमिति दशभिः ॥ गुणनान्महाब्दशङ्कू समुद्रमध्यान्तमथ परार्धं च । स्वहतं परार्धममितं तत्स्वहतं पूर्यते संख्येति । प्रयुतसंज्ञं लक्षमर्बुदसंज्ञा कोटिरित्यर्थः ॥ ८४ ॥ पुनाति पोतुः–मानभाण्डशोधकः पौतवाध्यक्षः, तस्येदं पौतवम् । द्रोर्विकारो द्रुवयं, द्रोश्च ($\frac{४।३।१६१}{२५३९}$), माने वयः ($\frac{४।३।१६२}{२५४०}$) । माति पाय्यं, पाय्यसान्नाय्येति ($\frac{३।१।१२९}{२८९०}$) साधुः । मीयतेनेनेति मानम् । पौतवं तुलादि, द्रुवयं प्रस्थादि, पाय्यं हस्तादीति गौडो भ्रान्तः । मितिर्मानं मीयतेऽनेन च । तत्र तुलाद्युन्मानं, अङ्गुल्यादि प्रमाणं, प्रस्थादि परिमाणं, यदाहुः–ऊर्ध्वं मानं किलोन्मानं परिमाणं तु सर्वतः । आयामस्तु प्रमाणं स्यात्संख्या भिन्ना तु सर्वतः ॥ गुञ्जा रक्तिकाः । आद्यो मुख्यः । धान्यकणा दश माषकः । तथा द्वे कृष्णले रूप्यमाष इत्यपि दर्शनात् । अस्मिन्काले–अद्य–इत्येके, यदाहुः–माषकं सप्त कृष्णलाः ॥ ८५ ॥ अक्षणोत्यक्षः । कर्षति कर्षः । (पलं) पल रक्षायाम् । सुवर्णमस्त्यस्य सुवर्णः, अर्शआदिभ्योऽच् ($\frac{५।२।१२७}{१९३३}$) । विस्यते विस्तः, विस उत्सर्गे । अक्षे षोडशमाषके माने द्वौ वर्तेते, यत्स्मृतिः–पञ्चकृष्णलको माषस्ते सुवर्णस्तु षोडश । कुरुदेशे प्रसिद्धो विस्तो हेमपलम्, यन्माला–पलेन हि सुवर्णस्य कुरुविस्तः ॥ ८६ ॥ तोल्यते तुला, चिन्तिपूजीति ($\frac{३।३।१०५}{३२८२}$) चकारादङ्, ङित्करणसामर्थ्याद् गुणाभावः । भ्रियते

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

2 A *karsha* of silver.
2 A *pana* of copper.
1 Various measures of capacity.

८८ कार्षापणः कार्षिकः स्यात्, कार्षिके ताम्रिके पणः ।
अ-स्त्रियामाढक-द्रोणौ खारी वाहो निकुञ्चकः ॥

८९ कुडवः प्रस्थ इत्याऽऽद्याः परिमाणाऽर्थकाः पृथक् ।
पादस् तुरीयो भागः स्यादंश-भागौ तु वण्टके ॥

1 A quarter.
3 A part, share, or portion.

13 Substance, thing or wealth.

९० द्रव्यं वित्तं स्वापतेयं रिक्थमृक्थं धनं वसु ।
हिरण्यं द्रविणं द्युम्नमर्थ-रै-विभवा अपि ॥

2 Wrought and unwrought gold, &c.
1 Base metals.
1 Bullion.

९१ स्यात् कोशश् च हिरण्यं च हेम-रूप्ये कृताऽकृते ।
ताभ्यां यदन्यत् तत् कुप्यं, रूप्यं तद् द्वयमाहतम् ॥

भारः, पुंसा हि द्वे पलसहस्रे वोढुं शक्येते । आचीयत आचितः स च शकटेन वोढुं शक्यः । अन्ये तु विंशतिः पलसहस्राण्याचितमाहुः । शाकटभारस्तूनोऽतिरिक्तो वाप्याचित एव । अत एव शाकटाख्योप्याचित इति पुनराचितशब्देन द्योत्यते ॥ ८७ ॥ कर्षसंबन्धिना पण्यते व्यवह्रियतेऽनेन रूप्यरूपकेण कार्षापणः । कर्षः प्रमाणमस्य कार्षिकः । ताम्रमयं कर्षप्रमाणं तु रूप्यं पणः । तन्मूल्यं चोपचाराद-शीतिः श्वेतकाः । पृथगित्येषामपर्यायत्वम् । परिमाणविशेषा एते, यदाहुः—पलं प्रकुञ्चकं मुष्टिः कुडवस्तच्चतुष्टयम् । चत्वारः कुडवाः प्रस्थश्चतुःप्रस्थमथाढकम् ॥ अष्टाढको भवेद् द्रोणो द्विद्रोणः शूर्प उच्यते । सार्धशूर्पो भवेत्खारी द्विशूर्पा गोण्युदाहृता ॥ तामेव भारं जानीयाद्वाहो भारचतुष्टयम् । शुष्कमेये त्विदं मानं द्विगुणं तद् द्रवेषु तु ॥ तत्र देशभेदात्संख्यान्यथात्वं, तथा क्वचिच्चतुराढको भवेद् द्रोणः, षोडश-द्रोणा खारी, विंशतिद्रोणः कुम्भः, दशकुम्भो वाहः ॥ ८८ ॥ रूपकादेशश्चतुर्थोंऽशः पादः, पदरुजेति (३।३।१६ / ३१८२) कर्तरि घञ् । अंश्यतेऽशः । भज्यते भागः । वण्ठ्यते विभज्यते वण्टः ॥८९॥ (द्रव्यं) द्रव्यं च भव्य इति (५।३।१०४ / ३०५९) साधुः । विन्द(द्य)ते तद्वित्तं, वित्तो भोगप्रत्यययोरिति (८।२।५८ / ३०४१) साधुः । स्वपतौ साधु स्वापतेयं, पथ्यतिथिवसतिस्वपतेर्ढञ् (४।४।१०४ / १६५६) । ऋच्यते स्तूयते ऋक्थम् । रिच वियोजनेऽस्माद्वा(द्), रिच्यते विभज्यते रिक्थम् । दधन्ति धनम् । वस्ते छादयति वसु, वसतीश्वरगृहे वा वसु । ह्रियते हिरण्यम् । द्रवति द्रविणम् । द्यूयते द्युम्नं, द्यु अभिगमने । अर्थ्यतेऽर्थः । रात्येनं राः, स्त्रीत्येके । विभवति विभवः ॥९०॥ कूयते शब्द्यते कोशः, कृष्यत आकुष्यत आयस्थानेभ्यः कोष इत्येके । हेम कृताकृतं घटिताघटितं, रूप्यं चेयम् । हेमरूप्याभ्यामन्यत्तैजसं कुप्यं, राजसूयसूर्यमृषोद्यरुच्य-कुप्येति (१।३।११४ / २८६५) साधुः । आहन्यत आहतम् । रूप्यं, रूपादाहतप्रशंसयोर्यत्

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh

4 An emerald. ९२ गारुत्मतं मरकतमश्मगर्भो हरिन्मणिः ।
3 A ruby.
2 A pearl. शोणरत्नं लोहितकः पद्मरागो, ऽथ मौक्तिकम् ॥

९३ मुक्ता, ऽथ विद्रुमः पुंसि प्रवालं पुन्-नपुंसकम् । 2 Coral
2 Any gem. रत्नं मणिर् द्वयोरश्म-जातौ मुक्ताऽऽदिके ऽपि च ॥

19 Gold. ९४ स्वर्णं सुवर्णं कनकं हिरण्यं हेम हाटकम् ।
तपनीयं शातकुम्भं गाङ्गेयं भर्म कर्बुरम् ॥

९५ चामीकरं जातरूपं महारजत-काञ्चने ।
रुक्मं कार्तस्वरं जाम्बूनदमष्टापदो ऽस्त्रियाम् ॥

1 Gold for ornament. ९६ अलङ्कार-सुवर्णं यच्छृङ्गीकनकमित्यदः ।
5 Silver. दुर्वर्णं रजतं रूप्यं खर्जूरं श्वेतमित्यपि ॥

($\frac{५।२।१२०}{१९२७}$)। तद् द्वयं कुप्याकुप्यम् ॥ ९१ ॥ गरुत्मत इदं जातं विषं हन्तुं गारुत्मतम्। मरकं तरन्त्यनेन मरकतम् । अश्मगर्भोऽश्मयोनिः । हरिन्नीलवर्णो मणिः। शोणं च तद्रत्नं च । लोहित एव लोहितकः, लोहितान्मणौ ($\frac{५।४।३८}{२०९८}$) इति कन्। मुच्यते शुक्तिभिर्मुक्ता। (मौक्तिकं) विनयादित्वात् ($\frac{५।४।३४}{२१०२}$) स्वार्थे ठक् ॥ ९२ ॥ विशिष्टो द्रुमो विद्रुमः, विद्रवत्यब्धौ वा। प्रवलते प्र(प्र)वते वा–अब्धेरूर्ध्वं प्रवालम्। सूर्यकान्तस्त्वग्निमणिर्वैडू(दू)र्यं बालबायजम्। रमन्तेऽस्मिन् रत्नम्। मण्यते शब्द्यते मणिः पुंस्त्रीलिङ्गः। अश्मजातीयं मरकतेन्द्रनीलादि। आदिशब्दाद्विद्रुमादि, वज्रपद्मरागादि वा पानीयभाण्डत्वात् ॥ ९३ ॥ शोभनो वर्णोऽस्य स्वर्णं, समासे वर्णस्य वा वलोपमाहुः–यथा पञ्चार्णो मन्त्रः। कनति कनकं, कनी दीप्तिकान्तिगतिषु। हिनोति हेम। हटति हाटकं, हट दीप्तौ। तपसि तपनीयम्। शातकुम्भे गिरौ भवं शातकौम्भं, अनुशतिकादित्वात् ($\frac{७।३।२०}{१४३८}$) उभयपदवृद्धिः, शातकुम्भमित्येके। गङ्गाया अपत्यं गाङ्गेयम्। भ्रियते धार्यते भर्म। कर्वति लोकमध्ये दृप्यति कर्बुरं, नानारूपं वा ॥ ९४ ॥ चमीकरकृतस्वरावाकरौ, तत्रभवइति ($\frac{४।३।५२}{१४३८}$) अण्। जातरूपमकृतकरूपं, भोट्टदेशजम्। महच्च तद्रजतं रज्जकं (महारजतं)। कञ्चति(ते) काञ्चनं, कचि दीप्तौ। रोचते रुक्मम्। जम्बूद्वीपे जम्बूफलरसोत्थनद्यां जातं जाम्बूनदम्। अष्टसु लोहेषु पदं प्रतिष्ठास्याष्टापदं, अष्टनःसंज्ञायां ($\frac{६।३।१२५}{१०४६}$) इति दीर्घः। कल्याणमर्जुनं कलधौतं गैरिकं [भूरि] चन्द्रं वसु च ॥ ९५ ॥ शृङ्ग्यलंकारमकरिका, तदर्थं कनकम्। दुर्वर्णं स्वर्णापेक्षया। रज्यते हेम्ना रजतम्। रुप्यति रूप्यं(रुप्यं), रुप लुप विमोहने। खर्जति खर्जूरं, कर्ज खर्ज व्यथने।

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

2 Brass. ९७ रीतिः स्त्रियामारकूटो न स्त्रियामथ ताम्रकम् । 6 Copper.
शुल्वं म्लेच्छमुखं द्व्यष्ट-वरिष्ठोदुम्बराणि च ॥

7 Iron. ९८ लोहो ऽस्त्री शस्त्रकं तीक्ष्णं पिण्डं कालायसाऽयसी ।
2 Rust of iron. अश्मसारो, ऽथ मण्डूरं सिंहाणमपि तन्-मले ॥

1 Any thing metallic. ९९ सर्वं च तैजसं लौहं, विकारस् त्वयसः कुशी । 1 Wrought iron ;
2 Glass. 4 Quicksilver. क्षारः काचो, ऽथ चपलो रसः सूतश् च पारदे ॥ bar iron.

1 Buffalo's horn. १०० गवलं माहिषं शृङ्गमभ्रकं गिरिजाऽमले । 3 Talc.
4 Antimony. स्रोतोञ्जनं तु सौवीरं कापोताञ्जन-यामुने ॥

5 Blue vitriol. १०१ तुत्थाञ्जनं शिखिग्रीवं वितुन्नक-मयूरके ।
3 Collyrium. 3 Another sort. कर्परी, दार्विका-क्वाथोद्भवं तुत्थं रसाञ्जनम् ॥

इति शब्दात्सितादि । अपिशब्दात्तारं कलधौतं च ॥ ९६ ॥ रीयते स्रवति रीतिः, इयर्ति–आरस्तस्य कूटं पित्तलाख्यम् । आरोऽपि, कपिलोहं च । ब्राह्मी पिङ्गा ब्रह्मरीतिः कांस्यं घोषो द्विलोहकम् । ताम्यति ताम्रम् । शवति द्रवति शुल्वम् । म्लेच्छदेशो मुखमुत्पत्तिरस्य । द्वे हेमरूप्ये अश्नुते द्व्यष्टम् । अतिशयेन वरं वरिष्ठम् । कालिकानिवृत्तौ स्वर्णं हि तत्, अत एवोदुम्बरं, उद्गताम्बरमिति नैरुक्ताः । औदुम्बरमित्येके । रक्तधातुकं च । सौराष्ट्रकं पञ्चलोहे तु वर्तकम् ॥ ९७ ॥ लुनाति लोहम्, लुह कत्थनादौ वा । शस्यतेऽनेन शस्त्रं, शसु हिंसायाम् । तेज्यते तेजयति वा तीक्ष्णं, शस्त्रान्तरच्छेदकत्वाद्वैकृतकाख्यं तत्, तिज निशाने । पिण्ड्यते पिण्डम् । कालं च तदयश्च कालायसम्, अनोश्यायःसरसामिति ($\frac{५।४।९४}{७९६}$) टच् । अयते भेद्यमयः । अश्मनः सारोऽश्मसारः, यत्स्मृतिः–अश्मभ्यो लोहमुत्थितम् । पारशवं घनं च । मण्डते मण्डूरम् । हिनस्ति सिंहानं ध्मायमानस्यायसो मलः ॥ ९८ ॥ तेजसो विकारस्तैजसं हेमाद्यपि लोहं, यदाहुः–सुवर्णं रजतं ताम्रं रीतिः कांस्यं तथा त्रपु । सीसं च वीमरं (कालायसं) चैव ह्यष्टौ लोहानि चक्षते ॥ शस्त्रं तु विशेषाल्लोहम् । कुत्सितं श्यति कुशी फालः, यच्छाश्वतः–कुशो दर्भः कुशी फालः (३३७), जानपदकुण्डेति ($\frac{४।१।४२}{५०७}$) अयोविकारे कुशाद् ङीष् । क्षरति गलति क्षारः । कचति(ते) काचः । चपलोऽस्थैर्यात् । रस्यते रसायनार्थिभी रसः । सूते हेमायुषी सूतः, शिवात्प्रसूतो वा । पिपर्ति पारतः, पारं तनोति वा ॥ ९९ ॥ गा अलति वारयत्यनेन गवलं, गवते वा । अभ्रप्रतिकृतिरभ्रकम् । गिरिजं च तदमलं च गिरिजामलं, गौर्या मलमिति धातुविदः । अज्यतेऽनेनाक्षि–अञ्जनं, यमुनास्रोतसो जातम् । सुवीरदेशे भवं सौवीरम् । कपोतवर्णं कापोताञ्जनम् । धन्वन्तरिस्तु–अञ्जनं मेचकं कृष्णं सौवीरं स्यात्सुवीरजम् । कापोतं यामुनं तच्च स्रोतोञ्जनमुदाहृतम् (ध.नि. ३।१५१) ॥ १०० ॥ तुदत्यक्षिरोगं तुत्थम् । शिखिग्रीवं मयूरग्रीवाभम् । वितुदति रोगान् वितुन्नकम् । मयूरप्रतिकृतिर्म-

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh

3 Sulphur.
3 A blue stone used as a collyrium.

१०२ रसगर्भं तार्क्ष्यशैलं, गन्धाश्मनि तु गन्धिकः ।
सौगान्धिकश् च, चक्षुष्या-कुलत्थौ तु कुलत्थिका ॥

4 Calx of brass.
5 Yellow orpiment.

१०३ रीतिपुष्पं पुष्पकेतु पुष्पकं कुसुमाञ्जनम् ।
पिञ्जरं पीतनं तालमालं च हरितालके ॥

5 Red chalk.
5 Myrrh.

१०४ गैरेयमर्थ्यं गिरिजमश्मजं च शिलाजतु ।
बोल-गन्धरस-प्राण-पिण्ड- गोपरसाः समाः ॥

3 Cuttle fish bone.
2 Minium, or red lead.
4 Lead.

१०५ डिण्डीरोऽब्धिकफः फेनः, सिन्दूरं नागसंभवम् ।
नाग-सीसक-योगेष्ट-वप्राणि, त्रिपु पिच्चटम् ॥ 4 Tin.

यूरकम् । कल्पते रोगाञ्जेतुं कर्परी । दारुहरिद्राक्वाथोत्थं, तुत्थं च तद्रसाञ्जनं च तुत्थरसाञ्जनम् ॥ १०१ ॥ दार्वीरसस्य गर्भो रसगर्भम् । तार्क्ष्यशैले कुलूतायां भवं (तार्क्ष्यशैलं) । रसजातं रसाढ्यं च । गन्धोऽस्यास्तीति गन्धिको गन्धपाषाणः, रसग्रन्थे गन्धकोऽयम् । चक्षुषे हिता चक्षुष्या दृक्प्रसादाख्या । कुलमलति कुलाली । कुले तिष्ठति कुलत्था, कुलत्थप्रतिकृतिर्वा, लोकोक्तौ ताड[तर्क्ष]काख्या, आह च–कुलाली लोचनहिता दृक्प्रसादा कुलत्थिका (ध. नि. ५।१८) ॥ १०२ ॥ रीतेर्म्रायमानस्य पुष्पाभं मलं रीतिपुष्पम् । पुष्पप्रतिकृतिः पुष्पकं, पक्षे स्वार्थेऽण् । पिजि हिंसादौ, पिज्यते पिञ्जरम् । पीयते पीतनं, पीतं वर्णं नयति वा । आलाति शोभामालं, अलति भूषयति वा । हरेः पीतवर्णस्य तालः प्रतिष्ठाऽस्मिन् हरितालं, हरिमलति भूषयति वा । तालं च भीमवत्, यद्धन्वन्तरिः–हरितालं च गोदन्तं पीतकं नटमण्डनम् । आलं च तालं गौरं च पिञ्जरं विस्रगन्धिकम् (ध. नि. ७।११९) ॥१०३॥ गिरेरिदं गैरेयम् । अर्थ्यते रसायनार्थिभिरर्थ्यम् । शिलातः स्रवज्जत्वाकृति शिलाजतु । बोल्यते बोलः, बुल निमज्जने । गन्धप्रधानो रसोऽस्य गन्धरसः, [रसगन्धोऽपि] । प्राणित्यनेन प्राणः । पिण्ड्यते द्रव्यान्तरैः पिण्डः पिण्डसहत्वात् । पिष्ट इत्येके । गां पाति रसोऽस्य गोपरसः, गोपो रसोऽपि भीमवत् ॥ १०४ ॥ डिण्डीति शब्दमीरयति डिण्डीरः, दादिर्वा डि(दि)ण्डिमवत् । अब्धेः कफ इवाधिक्येन बहिःप्रसारादब्धिकफः सागरमलाख्यः, नद्यादौ तूपचारात् । स्फायते फेनः । सिनोति बध्नाति चेतः स्यन्दते वा सिन्दूरम् । नागात्सीसात्संभवोऽस्य नागसंभवम् । चीनपिष्टं गान्धारपिष्टो[पङ्को]पि । धन्वन्तरिस्तु–सिन्दूरं रक्तरेणुश्च रागरक्तं च नागजम् । श्रृङ्गारभूषणं श्रीमद्वसन्तोत्सवमण्डनम् (ध.नि.३।१०१) ॥ हंसपादो हिङ्गुलके– । न न गच्छति चलत्वान्नागम् । सिनोति बध्नाति पारतं सीसं सीसपत्रं च । हेम्नो वर्णोत्कर्षार्थं योगे श्लेषे–इष्टं (योगेष्टम्) । उप्यते वप्रं वर्णोत्कर्षे बीजत्वात् । त्रपत इवा-

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh

2 Cotton.
4 Safflower ; carthamus.

१०६ रङ्ग-वङ्गे, अथ पिचुस् तूलो, ऽथ कमलोत्तरम् ।
स्यात् कुसुम्भं वह्निशिखं महारजनमित्यपि ॥

2 A woollen blanket.

१०७ मेषकम्बल ऊर्णायुः, शशोर्णं शशलोमनि ।
2 Hare's or rabbit's hair.

2 Honey.
2 Wax.

मधु क्षौद्रं माक्षिकाऽऽदि, मधूच्छिष्टं तु सिक्थकम् ॥

4 Red arsenic.

१०८ मनःशिला मनोगुप्ता मनोह्वा नागजिह्विका ।

3 Nitre ; saltpetre.

नैपाली कुनटी गोला, यवक्षारो यवाग्रजः ॥

3 Natron ; alkali.
2 Manna of bamboos.

१०९ पाक्यो, ऽथ सर्जिकाक्षारः कापोतः सुखवर्चकः ।
सौवर्चलं स्याद् रुचकं, त्वक्क्षीरी वंशरोचना ॥

प्रेराशु द्रवते(ति) त्रपु । पिच्च्यते कुट्यते पिच्चटम् ॥ १०५ ॥ रज्यतेऽनेन रङ्गम् । वङ्गति वङ्गम् । आलीनमपि । पञ्च्यते सूत्रमस्य पिचुः पिचयति वा, पिचि गतौ । तूल्यते फलात्तूलः, तूल निष्कर्षे, निर्बीजः कार्पासोऽयम् । रङ्गवङ्गेऽथ पिचुल इति प्रगह्यसंज्ञाविस्मृतेः पाठः । कमलेभ्य उत्तरं वर्णाधिक्यात्कमलोत्तरम् । कुस्यति कुसुम्भं, कुस श्लेषणे, कौ सुम्भ्यते निकुट्यते वा, सुभिः सौत्रः । वह्नेरिव शिखाऽस्य वह्निशिखम् । महच्च तद्रजनं च, रज्यतेऽनेनेति रजनं, रजकरजनरजःसूपसंख्यानात् (वा० $\frac{४०६७}{२९०७}$) नलोपः ॥ १०६ ॥ काम्यते शीतार्तैः कम्बलः, कम्बलः कमनीयो भवतीति **निरुक्तम्** (२।०।३) । ऊर्णास्यास्ति–ऊर्णायुः उर्णाया युस् ($\frac{५।२।१२३}{१९२९}$) । शशस्योर्णा शशोर्णं, गृहस्थूणवत्क्लीबे । मन्यतेऽभिलष्यते मधु पुष्परसाख्यम् । क्षुद्राभिर्मक्षिकाभिश्च कृतं (क्षौद्रं माक्षिकं च), क्षुद्राभ्रमरेति ($\frac{४।३।१११}{१४९९}$) अञ् । सारघं च । आदिशब्दात्तौत्तिकभ्रामरादि । अगणितावान्तरभेदा गजनिमीलिकयैते, यन्निमिः–माक्षिकं तैलवर्णं स्याद् घृतवर्णं तु पौत्तिकम् । विज्ञेयं भ्रामरं श्वेतं क्षौद्रं तु कपिलं मतम् । मधुनोच्छिष्यते त्यज्यते मधूच्छिष्टम् । सिञ्चति सिक्थकम् ॥ १०७ ॥ मनोवाच्या शिला मनःशिला । मनःशब्देन ह्वयते मनोह्वा । नागजिह्वाप्रतिकृतिर्नागजिह्विका । शिला च । नेपालदेशे भवा मनःशिला नैपाली द्विसंज्ञा, अभेदान्नपाली पाली वा । कौ नटति कुनटी । गां लाति गोला, गुडति वा । सप्तैकार्था इत्येके । दग्ध्वायवाङ्कुराञ्जन्यते यवक्षारः ॥ १०८ ॥ पचनीयः पाक्यः । स्वर्जिका दग्ध्वा क्षार्यते स्वर्जिकाक्षारः । कापोतः कपोतवर्णः, कपोतस्यायमिति वा, ईषत्पूयते वा । (सुखवर्चकः) वर्च दीप्तौ । सुवर्चलाख्याकरस्येदं सौवर्चलम् । रुच्यते दीप्यते जाठराग्निरनेन रुचकं, क्षारप्रसङ्गात्पुनरुक्तम् । एवं ग्रन्थिकपत्त्राङ्गादि । त्वचो वंशात्क्षीरमस्यास्त्वक्क्षीरी, त्वक्षीरं च । वंशोत्था रोचना वंशरोचना, आह च (धन्वन्तरिः)–स्याद्वंशरोचना वांशी तुकाक्षीरी तुका शुभा । त्वक्क्षीरी वंशजा शुभ्रा

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh

2 Seed of morunga. 3 Root of long pepper. 1 Root of sugarcane.

११० शिग्रुजं श्वेतमारिचं, मोरटं मूलमैक्षवम् ।
ग्रन्थिकं पिप्पलीमूलं चटिकाशिर इत्यपि ॥

2 Root of sweet flag. 2 Red-wood 3 Three spices. 2 Three myro-balans

१११ गोलोमी भूतकेशो ना, पत्राङ्गं रक्तचन्दनम् ।
त्रिकटु त्र्यूषणं व्योषं, त्रिफला तु फलत्रिकम् ॥

इति वैश्य-वर्गः ९, अत्र मूलश्लोकाः १११, क्षे० १.

अथ शूद्र-वर्गः १०

4 Men of the fourth tribe. 1 Men of mixed origin.

१ शूद्राश् चाऽवरवर्णाश् च वृषलाश् च जघन्यजाः ।
आ-चण्डालात् तु संकीर्णा अम्बष्ठ-करणाऽऽदयः ॥

1 A scribe. 1 Ambasta. 1 An *Ugra*. 1 A bard.

२ शूद्रा-विशोस् तु करणो, ऽम्बष्ठो वैश्या-द्विजन्मनोः, ।
शूद्रा-क्षत्रिययोरुग्रो, मागधः क्षत्रिया-विशोः, ॥

वंशक्षीरी तु वैणवी (ध.नि. २।५५) ॥१०९॥ शिनोति तैक्ष्ण्याच्छिग्रुः, (तस्माज्जातं) शौभाञ्जनबीजम् । मुरति मोरटं, मुर संवेष्टने । ग्रन्थिप्रतिकृतिर्गन्थिकम् । चटकाशिरोरूपत्वाचटकाशिरः ॥ ११० ॥ गोरिव लोमान्यस्या गोलोमी । भूताः केशा अस्य भूतकेशः, भूतस्येव केशा अस्य वा । ना पुमान् । पत्त्राण्यङ्क्ते (गे) पन्त्राङ्गम् । त्रीणि कटून्यूषणानि च शुण्ठीपिप्पलीमरीचानि समाहृतानि (त्रिकटु, त्र्यूषणम्) । विशेषेणौषति दहति व्योषम् । कटुतिक्तं च । त्रयाणां फलानां हरीतक्यामलकविभीतकानां समाहारस्त्रिफला, अजाद्यतष्टाप् ($\frac{४।३।४}{४५४}$) । वरा च ॥ १११ ॥ इति वैश्यवर्गः । ९ ।

शु पूजितं कृत्वोन्दन्ति सूरीन् क्लेदयन्ति शूद्राः, शीयन्ते वा । वृषान्–लुनन्ति वृषलाः; नारदस्तु–वृषो हि भगवान्धर्मस्तस्य यः कुरुते लयम् । वृषलं तं विजानीयात्– । ' जघन्याज्जाता जघन्यजाः ' यच्छ्रुतिः–पद्भ्यां शूद्रो अजायत । (ऋ. वे. १०।९०।१२) । पद्याः पज्जाश्च । चाण्डालो ब्राह्मण्यां शूद्राज्जातोऽत्र । संकीर्णाः प्रतिलोमानुलोमजत्वान्मिश्राः, यस्मृतिः (याज्ञव. १।९१–९५)–विप्रान्मूर्धावसिक्तस्तु क्षत्रियायां विशः स्त्रियाम् । जातोऽम्बष्टस्तु शूद्रायां निषादः पार्शवोऽपि वा ॥ माहिष्योग्रौ प्रजायेते विट्शूद्राङ्गनयोर्नृपात् । करणो वैश्याद्विन्नास्वेष विधिः स्मृतः ॥ ब्राह्मण्यां क्षत्रियात्सूतो वैश्याद्वैदेहिकः स्मृतः । शूद्राज्जातस्तु चाण्डालः सर्वधर्मबहिष्कृतः ॥ क्षत्रिया मागधवैश्यच्छूद्राक्षत्तारमेव च । शूद्रादायोगवं वैश्या जनयामास वै सुतम् ॥ माहिष्येण करण्यां तु रथकारः प्रजायते । असत्सन्तस्तु विज्ञेयाः प्रतिलोमानुलोमजाः ॥ १ ॥ सिंहावलोकितन्यायेन सुतं इत्येव ।

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

1 A *Máhishya.*
1 A *Kshattri.*
1 A charioteer.
1 A trader.

३ माहिषो ऽर्या-क्षत्रिययोः, क्षत्ता ऽर्या-शूद्रयोः सुतः, ।
ब्राह्मण्यां क्षत्रियात् सूतस्, तस्यां वैदेहको विशः, ॥

1 A charmaker.
1 A *Chandála.*

४ रथकारस् तु माहिष्यात् करण्यां यस्य संभवः, ।
स्याच् चण्डालस् तु जनितो ब्राह्मण्यां वृषलेन यः ॥

2 An artisan.
1 A company of artists.
2 One eminent by birth.
2 A florist.

५ कारुः शिल्पी, संहतैस् तैर् द्वयोः श्रेणिः स-जातिभिः ।
कुलकः स्यात् कुलश्रेष्ठी, मालाकारस् तु मालिकः ॥

2 A potter.
2 A bricklayer or plaisterer.
2 A weaver.
2 A tailor.

६ कुम्भकारः कुलालः स्यात्, पलगण्डस् तु लेपकः ।
तन्तुवायः कुविन्दः स्यात्, तुन्नवायस् तु सौचिकः ॥

2 A painter.
2 An armourer.
2 A shoemaker.
2 An ironsmith.

७ रङ्गाजीवश् चित्रकरः, शस्त्रमार्जो ऽसिधावकः ।
पादूकृच् चर्मकारः स्याद्, व्योकारो लोहकारकः ॥

शूद्रायां वैशाज्जातः, करोति प्रेष्यकर्माणीति करणः, ल्युट् । एवं सर्वत्राध्याहारानुषङ्गादि । अम्बायां तिष्ठत्यम्बष्ठः, अम्बाम्बगोभूमीति (८।३।९७) षत्वम्, ह्रस्वो निर्देशात् । द्विजन्माऽत्र विप्रः । वैश्येति, यजश्च (४।१।१६) इति ङीप्–नास्ति लक्ष्यात् । शूद्राचामहत्पूर्वेति (वा. २४००) अजादित्वाट्टाप् । उच्यत्युग्रः, उच समवाये । मगध्यति स्तौति मागधः ॥ २ ॥ महिष्मां साधुर्माहिष्यः, स हि–अन्तःपुररक्षितेति स्मार्ताः । अर्या वैश्या । क्षदति द्वाःस्थत्वात्क्षत्ता तृन्तृचौ शंसि क्षदादिभ्यः (उ० २५०) इत्यनिट् तृच्. क्षदस्त्वौणादिको धातुः क्षदादिपाठात् । सुवति प्रेरयत्यश्वान् सूतः । ब्राह्मण्यं वैश्याज्जातो [वैदेहका] वणिक्कर्मा ॥ ३ ॥ माहिष्याद्वैश्याक्षत्रियजातात् करण्यां शूद्रावैश्यजातायां सूतो रथाकारस्त्वक्षा । चण्डमुग्रं कर्मालति पर्याप्नोति चण्डालः ॥ ४ ॥ करोति कारुः, कृवापाजीति (उ० १) उण् । शिल्पं कलास्त्यस्य शिल्पी । समानजातीयकारुसंघः, श्रीयत इति श्रेणिर्द्विलिङ्गः । कुलं कायति कुलकः, कुलिक इत्यन्ये, श्रेण्यादौ श्रेष्ठार्थः । कुले वणिग्वृन्दे श्रेष्ठत्वमस्त्यस्य कुलश्रेष्ठी । (मालिकः) तदस्य पण्यमिति (४।४।५१) ठक् ॥ ५ ॥ कुलानि गृहाण्यलति कुलालः, कुं मृदं लाडयति मृद्नाति वा । पलेन मांसेनेव मृदादिना गण्डति संहन्ति पलगण्डो लेप्यकृत् । तन्त्रं तन्त्वातानं वयति तन्त्रवायः, ह्रावामश्चेत्यण् (३।२।३) । कु विन्दति कुविन्दः । तुन्नं विद्धं वयति तुन्नवायः । सूचिवानं शिल्पमस्य सौचिकः ॥ ६ ॥ रङ्गान् रक्तपीतान्याजीवति रङ्गाजीवः । चित्रंकरोति चित्रकरः, दिवाविभेत्यादिना (३।२।२१) टः । शस्त्रं मार्ष्टि तेजयति शस्त्रमार्जः । असीन्धावति शोधयति–असिधावकः । पादूः पादत्राणानि करोति

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh

4 A goldsmith.
2 A shellcutter.
2 A coppersmith.

८ नाडिन्धमः स्वर्णकारः कलादो रुक्मकारकः ।
स्याच्छाङ्खिकः काम्बविकः, शौल्विकस् ताम्रकुट्टकः ॥

5 A carpenter.
1 One working for the village.

९ तक्षा तु वर्द्धकिस् त्वष्टा रथकारश् च काष्ठतट् ।
ग्रामाऽधीनो ग्रामतक्षः, कौटतक्षो ऽनधीनकः ॥ [1] One independent.

5 A barber.
2 A washerman.
2 A distiller.

१० क्षुरी मुण्डी दिवाकीर्ति-नापिताऽन्तावसायिनः ।
निर्णेजकः स्याद् रजकः, शौण्डिको मण्डहारकः ॥

2 A goatherd.

११ जावालः स्यादजाजीवो, देवाजीवस् तु देवलः ।
[2] An attendant on an idol.

2 A female juggler.
2 A juggler.

स्यान् माया शाम्बरी, मायाकारस् तु प्रतिहारकः ॥

6 Dancers and tumblers.
2 Dancers and mimics.
2 Players on drums.

१२ शैलालिनस् तु शैलूषा जायाजीवाः कृशाश्विनः ।
भरता इत्यपि नटाश्, चारणास् तु कुशीलवाः ॥

पादूकृत्, पादकृदित्येके । विशेषेणौकं समवायमियर्ति व्योकारः, व्योरित्ययःपर्याय इति श्रीभोजः ॥ ७ ॥ नाडीं धमति नाडिंधमः, नाडीमुष्टयोश्च (३।२।३० / २९४५) इति खश् । कला आदत्ते कलादः, कलं सुवर्णकालिकामाद्यत्याखण्ड[य]ति वा, अत एव कलं धौतं यत्रेति कलधौतं रुक्मम् । हेममुष्टिकोऽपि । कम्बुघटनं शिल्पमस्य काम्बविकः शङ्खवलयादिकृत्, लक्ष्याठ्ठस्य कादेशाभावः । शुल्बघटनं शिल्पमस्य शौल्विकः । मणिकारो वैकटिकः ॥८॥ तक्ष्णोति तक्षा । वर्धयति वर्धकिः, वर्ध छेदने । त्वक्षति तनूकरोति दारु त्वष्टा । काष्ठं तक्ष्णोति काष्ठतट् । स्थपतिश्च । ग्रामस्यायत्तस्तक्षा ग्रामतक्षः, ग्रामकौटाभ्यां च तक्ष्णः (५।४।९५ / ७९७) इति टच् । कुट्यां भवः कौटः स्वतन्त्रः नास्त्यध्युपरि–इनः स्वाम्मस्यानधीनः ॥९॥ क्षुरोऽस्यास्ति क्षुरी । मुण्डयति मुण्डी । दिवा कीर्त्यते दिवाकीर्तिः, रात्रौ क्षुरकर्मनिषेधात् । नाप्यते नापितः, नञ् प्रकृत्या । अन्तमवस्यत्यन्तावसायी । चण्डिलोऽपि । संवाहकोऽङ्गमर्दः स्यात् । निर्णेनेक्ति क्षालयति निर्णेजकः । रञ्जयति रजकः, शिल्पिनि क्वुन्, ष्वुन् शिल्पिसंज्ञयोरिति (३।१।१४५ / २९०७), रजकरजनरजः सूपसंख्यानात् (ना० ४०६७ / २९०७) नलोपः । क्वचित्तु य एव धावकः स एव रजकः, स्मार्ते तु भिन्नावेतौ । शुण्डा पानमदस्थानं सुरा वा पण्यमस्य शौण्डिकः । मण्डमच्छसुरां हरति मण्डहारकः । सुराजीवी कल्यपालाख्यः ॥१०॥ जवमलति जवालश्छागस्तस्यायं जावालः, अजपालापभ्रंशो वा । देवान्–लाति देवलः । मात्यस्यां विश्वं माया । शम्बराख्यस्यासुरस्येयं शाम्बरी, शं वृणोति शंवरो व्याज इति तु युक्तम् । इन्द्रजालं तु कुसृतिः कुहकं कुहिका च । प्रतिहरणं व्याजः प्रयोजनमस्य प्रातिहारिका ऐन्द्रजालिकः ॥ ११ ॥ शिलालिना कृशाश्वेन च प्रोक्तं नटसूत्रमधीते शैलाली कृशाश्वी च, पाराशर्यशिलालिभ्याम्

2 Players on the flute.
2 —on the lute.

१३ मार्दङ्गिका मौरजिकाः, पाणिवादास् तु पाणिघाः ।
वेणुध्माः स्युर् वैणविका, वीणावादास् तु वैणिकाः ॥
2 Striking with their hands only.

2 A fowler or bird-catcher.

१४ जीवान्तकः शाकुनिको, द्वौ वागुरिक-जालिकौ ।
2 A hunter using nets.

3 A vender of flesh-meat.

वैतंसिकः कौटिकश् च मांसिकश् च समं त्रयम् ॥

4 A hireling; a servant or labourer.
2 A chandler.
3 A porter.

१५ भृतको भृतिभुक् कर्मकरो वैतनिको ऽपि सः ।
वार्तावहो वैवधिको, भारवहस् तु भारिकः ॥

10 A low man.

१६ विवर्णः पामरो नीचः प्राकृतश् च पृथग्जनः ।
निहीनो ऽपसदो जाल्मः क्षुल्लकश् चेतरश् च सः ॥

11 servant or slave.

१७ भृत्ये दासेर-दासेय-दास-गोप्यक-चेटकाः ।
नियोज्य-किङ्कर-प्रैष्य-भुजिष्य-परिचारकाः ॥

(४।३।११०/१४९०) इति णिनिः, कर्मन्दकृशाश्वात् (४।३।१११/१४९१) इनिः । शिलूषस्यपेरपत्यं शैलूषः । भरतस्यापत्यं, बिदाद्यञि बहुत्वे लुक् (यञञोश्च) । नटति नटः । चरणस्य भ्रमणस्यायं चारणः, यतो देशान्तरभ्रमणाज्जीवति । कुत्सितं शीलं वाति कुशीलवः ॥१२॥ मृदङ्गमुरजवादनं शिल्पमेषां (मार्दङ्गिका मौरजिकाः) । पाणी हन्ति पाणिघः, पाणिघताडघौ शिल्पिनीति (३।२।५५/२९७२) साधुः । वेणुं धमति वेणुध्मा वांशिकः । वीणावादनं शिल्पमस्य वैणिकः ॥ १३ ॥ शकुनान् हन्ति शाकुनिकः, पक्षिमत्स्यमृगान्हन्तीति (४।४।३५/१५८५) ठक् । एकार्थाविति शेषः । वागुरया मृगबन्धनरज्ज्वा चरति वागुरिकः । वितन्यते वीतंसः प्राणिबन्धोपकरणं, कूटः कूटयन्त्रं, ताभ्यां जीवति चरति वेति ठक् (चरतीति) । मांसं पण्यमस्य मांसिकः । सौनिकार्था इत्येके ॥ १४ ॥ भ्रियते भृतकः, स्वार्थे कन् । भृतिं वेतनं भुङ्क्ते भृतिभुक् । कर्मकरः, कर्मणि भृतौ (३।२।२२/२९३६) इति टः । वेतनेन जीवति वैतनिकः, वेतनादिभ्यो जीवति (४।४।१२/१५६२) इति ठक् । वृत्तिर्जीविकास्त्यस्यां वार्त्ता—अन्नाद्यं, प्रज्ञाश्रद्धार्चेति (५।२।१०१/१९०८) णः, वार्त्ताया वहो वार्त्तावहः । विवध्यते विवधो भारः पर्याहारो वा, वध संयमने, पुंसि संज्ञायां घःप्रायेण (३।३।११८/३२९६), तं वहति वैवधिकः, विभाषा-विवधवीवधात् (४।४।१७/१५६७) इति ठन् । भारोऽस्त्यस्य भारिकः ॥ १५ ॥ विरुद्धो वर्णोऽस्य विपर्णः, वर्णान्तरालत्वात् । पामाः सन्त्यस्याधमत्वात् पामरः, पामा(नं) राति वा । निम्नमञ्चतीति नीचः । प्रकृतौ भवः प्राकृती गुणासंस्कृतः । पृथग्जनेभ्यः पृथग्जनः । नियतं हीयते निहीनः । अपशीयतेऽपशदः । जलति जाल्मः, जल घातने । क्षुधं लाति क्षुल्लस्तुच्छत्वात् । इतं रात्येति वा—इतरः । वर्वरोऽपि [यथाजातोऽपि] । भारतादौ रेफशकारौ ॥ १६ ॥ भरणीयो भृत्यः, भृञोऽसंज्ञायां (३।१।११३/२८६१) इति

CC-0. Agamnigam Foundation. Digitized by eGangotri

4 One nourished by a stranger. १८ पराचित-परिस्कन्द-परजात-परैधिताः ॥

6 A lazy man. १९ मन्दस् तुन्दपरिमृज आलस्यः शीतकोऽलसोऽनुष्णः ।
6 A dexterous person. दक्षे तु चतुर-पेशल-पटवः सूत्थान उष्णश् च ॥

10 A *Chandala*. २० चण्डाल-प्लव-मातङ्ग-दिवाकीर्ति-जनङ्गमाः ।
निषाद-श्वपचावन्तेवासि-चाण्डाल-पुक्कसाः ॥

1 Barbarians. २१ भेदाः—किरात-शबर-पुलिन्दा म्लेच्छजातयः ।
4 A hunter, or deer-killer. व्याधो मृगवधाजीवो मृगयुर् लुब्धको ऽपि सः ॥

क्यप् । दासस्यापत्यं दासेरो दासेयश्च, क्षुद्राभ्यो वा (४।१।१३१/२१३७) इति ढक्–ढ्रकौ । दीयते दासः, दस्यते(ति) वा, दसु उपक्षये । गोपनीयो गोप्यः । चेटति चेटः, चिट प्रेष्ये । (नियोज्यः) प्रयोज्यनियोज्यौ शक्यार्थे साधू (४।३।६८/२८८४) । किं करोमीत्याज्ञाप्रतीक्षकः किंकरः, दिवाविभानिशेति (३।२।२१/२९३५) टः । प्रेषणीयः प्रैष्यः, प्रादृहोढोढ्येषैष्येष्विति (वा० ३६०५/७३) वृद्धिः, ईप उञ्छे–इत्यस्मात्तु प्रेष्यः । भुङ्क्ते स्वाम्युच्छिष्टं भुजिष्यः ॥ १७ ॥ परैराचीयते वर्ध्यते पराचितः । परिस्कन्द्यते–आक्रम्य नियुज्यते परिस्कन्दः, परिस्कन्दः प्राच्यभरतेषु (८।३।७५/३०२६) परैरेध्यते वर्ध्यते परैधितः ॥१८॥ मन्दते स्वपितीव मन्दः, अत एव मदि जाड्य इति चान्द्रो धातुः । तुन्दं परिमार्ष्टि तुन्दपरिमृजः, तुन्दशोकयोः परिमृजापनुदोः (३।२।५/२९) इति सूत्रे–आलस्यसुखाहरणयोरितिवक्तव्यात् (१९८८/२५९) कः । आलस्यमस्त्यस्यालस्यः, अर्श आदित्वात् (५।२।१२७/२९३३) अच् । (शीतकः) शीतादलसे, शीतोष्णाभ्यां कारिणीति (५।२।५७२/२८७२) कन् । न लसत्यलसः । दक्षते दक्षः । चतते कर्म चतुरः । पिशति पियति वा पेशलः, पिश अवयवे, रि पि गतौ । पटति पाटयति वा पटुः । सुष्ठूत्थानमुद्योगोऽस्य सूत्थानः । उषति दहतीवोष्णः । उष्णलोऽपि ॥१९॥ चण्डते चण्डालः । प्लवते प्लवः । मा निषिद्धं तङ्गति मातङ्गः, अ मा नो नाः प्रतिषेधे (?), मतङ्गस्यापत्यमिति पौराणिकः । दिवा कीर्त्यते दिवाकीर्तिः, रात्रौ भयदत्वात् । जनं गच्छति जनंगमः, गमश्च (३।२।४७/२९६४) इति खच् । निषण्णमस्मिन्पातकमिति निषादः, निषीदति वा, ज्वलादित्वाण्णः, ज्वलितिकसन्तेभ्यो णः (३।१।१४०/२९७३) । श्वानं पचति श्वपचः, पचादित्वादणोपवादोऽच्, नन्दिग्रहीति (३।१।१३४/२८९६) । ग्रामान्ते वसति–अन्तेवासी, अन्तावसायी च । (चाण्डालः) कुलालवरुड(कर्मार)निषादचण्डालमित्रामित्रेभ्यश्छन्दस्युपसंख्यानात् (वा० ?) स्वार्थेऽण् । पुत्कुत्सितं कसति पुक्कसः, पुष्कस इत्येके । अवान्तरभेदोऽत्र नादृतः, यतः श्वपचो [श्वपो] डोम्बः [मः] पुक्कसो मृतपः ॥ २० ॥ किरातास्तथा म्लेच्छजातीयाः—दरद्भुट्टभेदादयश्चाण्डालभेदाः । किरति शरान् किरातः । शबत्यरण्यं शबरः । पोलति भ्रमति पुलिन्दः । एतेऽरण्यचरा

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

7 A dog. २२ कौलेयकः सारमेयः कुक्कुरो मृगदंशकः ।
1 A mad dog. शुनको भषकः श्वा स्यादलर्कस् तु स योगितः ॥
9 A dog trained for for chase. २३ श्वा विश्वकद्रुर् मृगया-कुशलः, सरमा शुनी । 2 A bitch.
9 A village hog. 1 Any young animal. विट्चरः सूकरो ग्राम्यो, वर्करस् तरुणः पशुः ॥
4 Chase ; hunting. २४ आच्छोदनं मृगव्यं स्यादाखेटो मृगया स्त्रियाम् ।
1 A deer wounded on its right side. दाक्षिणाऽरुर् लुब्ध-योगाद् दक्षिणेर्मा कुरङ्गकः ॥
10 A thief or robber. २५ चौरैकागारिक-स्तेन-दस्यु-तस्कर-मोषकाः ।
प्रतिरोधि-परास्कन्दि-पाटच्चर-मलिम्लुचाः ।

देशभेदाद् भिन्नाः । म्लेच्छत्यव्यक्तं वक्ति म्लेच्छः । रिष्टया मालभटा भिल्ला नाहलाश्चान्त्यजाः पृथक् । विध्यति व्याधः, इयाद्व्यधेति ($\frac{३।१।१४१}{२९०३}$) णः । मृगान् याति मृगयते वा मृगयुः । लुभ्यते (स्म) गृध्यति मांसे लुब्धकः ॥ २१ ॥ कुले गृहे भवः कौलेयकः, कुलकुक्षीति ($\frac{४।२।९६}{१३१६}$) ढकञ् । सरमाया अपत्यं सारमेयः । कोकते कुक्, चोरग्राहिकुक्शब्दं वा कुरति (कुक्कुरः), कुर शब्दे । मृगान्दशति मृगदंशकः । शुनति शुनकः, शुन गतौ । भषति कुत्सितं वाशते भषकः । शवति श्वयति वा श्वा । मण्डली च । रथ्यामृगो देश्याम् । स श्वा संजातगरण्यो गोल्यते वार्यते दशनभयादलर्क उन्मत्तः श्वा ॥ २२ ॥ विश्वं कन्दत्याह्वयते विश्वकद्रुः, विगतं श्वकदनमस्येत्येके, विश्वकं द्रवति वा । सरति सरमा देवशुनी, विशेषवृत्तिरपि सामान्येऽभिधानात् । विषं गूथं चरति (अति) विट्चरः । सूयते बहून् सुकरः । वर्कतेऽवीन् वर्करः, वृक आदाने ॥२३ ॥ आचोद्यन्ते त्रास्यन्ते प्राणिनोऽत्रेत्याच्छोदनं, चुदेश्छत्वम् । मृगान्व्ययति मृगव्यं, मृगव्येति मुनिः व्येञ् संवरणे । आखेट्यन्ते प्राणिनोऽत्राखेटः, खिट उत्त्रासने । मृग्यन्ते प्राणिनोऽस्यां मृगया, मृगयाटाट्येत्यङ् (परिचर्यापरिसर्येति) । पापद्धिश्च । लुब्ध [क] संबन्धाद् दक्षिणे पार्श्वेऽरुर्व्रणमस्य दक्षिणारुः (दक्षिणेर्मा), दक्षिणेर्मा लुब्धकयोग इति ($\frac{५।४।१२६}{८६५}$) साधुः, व्रणोऽस्त्रियामीर्ममरुरित्युक्तम् ॥ २४ ॥ चोरयति चोरः, स्वार्थेण् (चौरः), चुराशीलो वा, छत्रादित्वाण्णः ($\frac{४।४।६२}{१६१२}$) । एकस्मिन्नसहायेऽगारे भव ऐकागारिकः, ऐकागारिकट् चौरे ($\frac{५।१।११३}{१७७६}$) । स्तेनयति स्तेनः, स्तेन चौर्ये, इयास्त्यहृजविभ्य इति (उ० २०४) इनचि स्त्येनः स्यात् । दस्यत्युपक्षिणोति दस्युः । तत्करोति तस्करः, तद्वृहतोःकरपत्योश्चौरदेवतयोःसुट् तलोपश्च (वा० $\frac{३७१३}{१०७१}$) । मुष्णाति मोषकः । प्रतिरुणद्धि प्रतिरोधी । परानास्कन्दति परास्कन्दी । पाटयंश्चरति पाटच्चरः, पटच्चरे जीर्णवस्त्रे भवो वा । मलिनैर्म्लोचयति मलिम्लुचः, म्लुच स्तेयकरणे । पारिपन्थिकः पश्यतोहरश्च, वाग्दिक्पश्यद्भ्यो युक्तिदण्डहरेष्विति (वा० $\frac{३८९७}{९७९}$) षष्ठ्या अलुक् ।

CC-0. Agamnigam Foundation. Digitized by eGangotri Foundation, Chandigarh

4 Theft, robbery.
1 Booty.
1 A net, chain, or cage.

२६ चौरिका स्तैन्य-चौर्ये च स्तेयं, लोप्त्रं तु तद्-धने ।
वीतंसस् तूपकरणं बन्धने मृग-पक्षिणाम् ॥

2 A snare or trap.
2 A net.
5 A cord, rope or string.

२७ उन्माथः कूटयन्त्रं स्याद्, वागुरा मृगबन्धनी ।
शुल्वं वराटकं स्त्री तु रज्जुस् त्रिषु वटी गुणः ॥

2 Rope and bucket of a well.
2 A loom.
2 Threads.

२८ उद्घाटनं घटीयन्त्रं सलिलोद्वाहनं प्रहेः ।
पुंसि वेमा वायदण्डः, सूत्राणि नरि तन्तवः ॥

2 Weaving.
1 Plaistering.
1 A doll or puppet.

२९ वाणिर् व्यूतिः स्त्रियौ तुल्ये, पुस्तं लेप्याऽऽदि-कर्मणि ।
पाञ्चालिका पुत्रिका स्याद् वस्त्र-दन्ताऽऽदिभिः कृता ।
'जतु-त्रपु-विकारे तु जातुषं त्रापुषं त्रिषु' ॥ १ ॥

व्यलीकं चातिसंधानं व्यञ्जनं च प्रतारणम् ॥ २५ ॥ चोरस्य भावश्चौरिका, मनोज्ञादित्वात्, द्वन्द्वमनोज्ञादिभ्यश्च (५।१।१३३/१७९८) वुक्। ब्राह्मणाद्वित्वात्ष्यञि गुणवचनब्राह्मणादिभ्यः कर्मणि च (५।१।१२४/१७८८) चौर्यम्। स्तेनस्य भावः कर्म वा सौन्यं, स्तेनादिनियोगाविभागात्ष्यम् (इ०)। स्तेनान्नलोपश्च (५।१।२५/१७९०) इति स्तेयम्। लुप्यते लोप्त्रं चौर्यधनम्। मृगादिबन्धननिमित्तं जालवागुरादिसाधनं, वितन्यत इति वीतंसः, वितस्यते बध्यतेऽनेन वा, तसिः सौत्रः ॥ २६ ॥ ऊर्ध्वपातान्मथ्यतेऽनेनोन्माथः । छलेन यम्यतेऽनेन कूटयन्त्रं, पाशयन्त्रमित्येके। (मृगबन्धिनी) रज्जुरिति शेषः। अवागुरयति मृगान् वागुरा जालाकृतिः। शु[सु]पूजार्थेऽव्ययं, पूजितमीयते शु[सु]म्यं, शुम्यं वा। वट्यते वेष्टयते वटाकरः, वटी च सृज्यते। रज्जुः। गुण्यतेऽभ्यस्यते गुणः। वटा गुण इति पृथवाहुः। यैर्वेष्टनैर्द्विगुणा त्रिगुणा वा रज्जुर्वेष्टयते वटीगुण इत्येके ॥ २७ ॥ उद्घाट्यते प्रकाश्यतेऽम्भोनेनोद्घाटन, ऊर्ध्वं हन्य [घात्यं] तेऽनेनेत्युद्घातनमिति कौटिल्यः । प्रहेररघट्टादेर्जलमूर्ध्वं बाह्यतननोद्वाहनम्। पादावर्तोपि। वयन्त्यनेन वेमा। उप्यते पीड्यते यन्त्रे सूत्रं येनेति वापस्तदर्थो दण्डो वायदण्डः, वायदण्ड इति तु युक्तम्। सूयते सूज्यते वा पटोऽनेन सूत्रम्। तन्यतेऽनेन तन्तुः। नरि पुंसि ॥ २८ ॥ व(वा)णनं वाणिः, वयनं वा, अत एव निष्प्रवाणिर्नवः पटः। विवयनं व्यूतिः, ऊतीयूतीति (३।३।९७/३२७४) साधुः। तुल्या च तुल्या च तुल्ये। पुस्यतेऽमिमर्द्यते मृदत्र पुस्तं, पुस्त आदरे वा। पञ्चालदेशे भवा पाञ्चालिका यया बालाः खेलन्ति। (पुत्रिका) पुत्रात्कृत्रिम, इति (ग०) कन् यावादिभ्यः कन् (५।४।२९/२०९७)। आदिशब्दाच्चर्मलवाद्यैः, स्यात्सालभञ्जिका स्तम्भे लेप्येनाञ्जलिकारिका।

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh

4 A basket. ३० पिटकः पेटकः पेटा-मञ्जूषा, ऽथ विहङ्गिका ।
2 A peg. भारयष्टिस्, तदाऽऽलम्बि शिक्यं काचो, ऽथ पादुका ॥
1 Its string.

3 A shoe, ३१ पादूरुपानत् स्त्री, सैवाऽनुपदीना पदाऽऽयता ।
1 A boot. नद्ध्री वर्ध्री वरत्रा स्यादश्वाऽऽदेस् ताडनी कशा ॥
3 A thong.
1 A whip.

3 A vulgar lute. ३२ चाण्डालिका तु कण्डोलवीणा चण्डालवल्लकी ।
2 Goldsmith's scales. नाराची स्यादेषणिका, शाणस् तु निकषः कषः ॥
3 A touchstone.

2 An iron chisel. ३३ व्रश्चनःपत्रपरशुरीषिका तूलिका समे । 2 A pencil or brush.
2 A crucible. तैजसावर्तनी मूषा, भस्त्रा चर्मप्रसेविका ॥
2 Bellows.

त्रपुजतुनोःपुक् (४।३।१३८) ॥ २९ ॥ पेटति पिटः, पिट संघाते, कः । ण्वुलि पेटिकः । पीड गहने (अवगाहने), अस्मात्पीडा, पीङ् पानेऽस्मात्पेटेति श्रीभोजः । मञ्जु मनोज्ञं कृत्वा शस्त्राद्यैरुष्यतेऽत्र मञ्जूषा । आद्यौ पेटारिकायां परौ महत्याम् । विहंगप्रतिकृतिश्चार्मादिमयी, या भित्त्यादौ लम्बमाना स्थाप्यते प्रयाणके च संचार्यते (विहंगिका) । भारोद्वहनाय यष्टिः, चतुर्दण्डिकेति सभ्याः, शिक्याधारस्कन्धग्राह्यो लगुड इति द्रवि[मि]डाः, विहंगमेत्येके । तदालम्बो भारालम्बः, तस्या आलम्बते वा । शक्नोति वोढुं शिक्यं, अध्न्यादिः (उ० ५५१) । कच्यतेऽनेनेति काचः, कच बन्धने, यत्र रज्जुपञ्जरे वोढव्यमास्ते ॥ ३० ॥ पद्यतेऽनया पादूः, णित्कसिपद्यर्तेरित्यूः (उ० ८५) । (पादुका) स्वार्थे कन्, केऽण इति (७।४।१३ / ८३४) ह्रस्वः । उपनह्यति पादमुपानत्, नहिवृतिवृषीति (६।३।११६ / १०३७) दीर्घः । पादत्राणं च । अनुपदं पादायामेन बद्धानुपदीना, अनुपदसर्वान्नेति (५।२।९ / १८१०) खः । नह्यति बध्नाति नद्ध्री । वर्धते दीर्घीभवति चर्मरज्जुत्वाद्वर्ध्री । व्रियतेऽनया वरत्रा, वरत्रा वैत्रवैणवीति तु चाणक्याः सूत्राध्यक्षे (?) उपचारादाख्यत् । कशति कशा चर्मयष्टिः ॥ ३१ ॥ चण्डालस्येयं चाण्डालिका । कव्य(ड्य)ते तन्त्रीभिराव्रियते कटो(ण्डो)लवीणा किन्नर्याख्या । नरमञ्चति नराङ् तस्येयं, नाराची । अन्विष्यते वर्णोऽनयेत्येषणिका, स्वर्णतुलेतीह युक्तम् । श्यति तनूकरोति शाणः । निकष्यतेऽत्र निकषः, गोचरसंचरेति (३।३।११९ / ३२९८) चकारात्साधुः, पुंसि संज्ञायां घो वा (३।३।११८ / ३२९६) । एवं कषः, निकषोपलः इत्येके, पचाद्यच् नन्दिग्रहीति, (३।२।१३४ / २८९६) मणिकारादिभाण्डमाहुः, यन्मुनिः-शाणस्तु निकषोपलः ॥ ३२ ॥ वृश्चति छिनत्ति व्रश्चनः । पत्त्राकारः पत्त्राणां वा परशुः (पत्त्रपरशुः) । एषत्येषिका, ईष उञ्छे । काष्ठलोहमयी शलका तूलिका, तूल निष्कर्ष । ईषिकेत्येके, शलाकेषिकयोस्तूलिरिति दुर्गो भेदेनाह । तैजसं हेमादि-आवर्त्यते द्रवीक्रियतेऽस्याम् । मूयते मूषा, मूङ्

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

2 A gimlet or auger.
2 A carpenter's chisel.
2 A saw.
3 An image of iron.
1 An art.
8 An image ; statue or picture.
2 Resemblance.
12 Like, similar. (In composition) Like.
11 Wages or hire.

३४ आस्फोटनी वेधनिका, कृपाणी कर्तरी समे । 2 Scissors or shears.
वृक्षादनी वृक्षभेदी, टङ्कः पाषाणदारणः ॥ 2 A hatchet.
३५ क्रकचो ऽस्त्री करपत्रमारा चर्मप्रभेदिका । 2 Shoemaker's knife.
सूर्मी स्थूणाऽयःप्रतिमा, शिल्पं कर्म कलाऽऽदिकम् ॥
३६ प्रतिमानं प्रतिबिम्बं प्रतिमा प्रतियातना प्रतिच्छाया
प्रतिकृतिरर्चा पुंसि प्रतिनिधिरुपमोपमानं स्यात् ।
३७ वाच्य-लिङ्गाः समस् तुल्यः सदृक्षः सदृशः सदृक् ।
साधारणः समानश् च स्युरुत्तर-पदे त्वमी ॥
३८ निभ-संकाश-नीकाश-प्रतीकाशोपमाऽऽदयः ।
कर्मण्या तु विधा-भृत्या-भृतयो भर्म वेतनम् ॥

बन्धने । बभस्ति भक्षयतीव स्थाप्यं भस्त्रा । चर्ममयी, प्रसीव्यते प्रसेविका, प्रसेवकोऽपि ॥ ३३ ॥ आस्फोट्यते विध्यते चानया मौक्तिकादि (आस्फोटनी, इ०) । कल्प्यते छिद्यतेऽनया कृपाणी। कर्त्यतेऽनया कर्तरी । वृक्षोऽद्यते छेद्यतेऽनेन शस्त्रकेण वृक्षादनः । टङ्क्यतेऽनेन टङ्कः, टकि बन्धने, हन्यमानः–टंशब्दं कायति वा ॥ ३४ ॥ क्रशब्दोच्चारणेन कचति क्रकचः । करसंचार्यं शस्त्रपत्त्रं करपत्त्रं, करशब्दोच्चारणेन पतति वा । इयर्त्यनयेत्यारा, भिदादौ–आराशस्त्र्यां (ग०) साधुः । चर्मसी वनी च । सुवति सूर्मी, शौभनोर्मिरित्येके । तिष्ठति स्थूणा, यच्छाश्वतः–स्थूणा स्तम्भेऽथ सूर्म्यां च (७२२)। अयोमयी प्रतिकृतिः (अयःप्रतिमा), यत्स्मृतिः–सूर्मी ज्वलन्तीमालिङ्गेन्मृत्यवे गुरुतल्पगः । शिनोति शिल्पं, शिञ् निशाने, शिल उञ्छेऽस्माद्वा । कला गीताद्याश्चतुःषष्टिः । आदिशब्दः प्रकारे ॥३५॥ प्रतिमीयतेऽनेनेति प्रतिमानं, प्रतिभा च । प्रतिबिम्ब्यते प्रतिबिम्बं, बिम्बसदृशं वा । प्रतियात्यतेऽनया प्रतियातना, यत निकारोपस्कारयोः । अर्च्यतेऽर्चा । प्रतिनिधीयते प्रतिनिधिर्मुख्यसदृशः । प्रतिरूपं [प्रतिच्छन्दः] प्रतिकायश्च । उपमितिरुपमा । केचिदेतत्पूर्वैः संबध्नन्ति ॥ ३६ ॥ समति समः । तुल्या संमितस्तुल्यः, नौवयोधर्मेति (४।४।९१) यत् । (सदृक्ष इ०) समान इव दृश्यते, त्यदादिषु दृशोरनालोचने कञ्च (३।२।६०) इत्यत्र समानान्ययोश्चेतिवक्तव्यात् (वा० ३।२।७४) क्सः कन् क्विन् च, दृग्दृशवतुष्विति (६।३।८९) समानस्य सः । समानमाधारणं मानं चास्य साधारणः समानश्च ॥ ३७ ॥ वाच्यलिङ्गास्तुल्यार्थाश्चेते, यथा चन्द्रनिभं मुखं, पद्मसंकाशम् । नियतं भाति निभम् । समं काशते संकाशः । आदिशब्दाच्चन्द्रप्रतिमः, पितृरूपः, आयासभृत इत्यादि । चन्द्रेण निभ इत्यादौ न भवति समास एवोत्तरपदत्वस्य रूढेः । कर्मणि साधु कर्मण्या, भर्मण्या वा । विधीयतेऽनया विधा, लक्ष्ये भोजनपिण्डे रूढा । (भृत्या, इ०) भ्रियतेऽनयेति, संज्ञायांसमजेति (३।३।९९) क्यप्, स्त्रियां क्तिन्, मनिन्, ल्युट् । वीयतेऽद्यते वेतनं,

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh

13 Spirituous liquor.

३९ भरण्यं भरणं मूल्यं निर्वेशः पण इत्यपि ।
सुरा हलिप्रिया हाला परिस्रुद् वरुणात्मजा ॥

४० गन्धोत्तमा-प्रसन्नेरा-कादम्बर्यः परिस्रुता ।
मदिरा कश्य-मद्ये चाप्यवदंशस् तु भक्षणम् ॥

2 Eating what excites thirst.
2 A tavern.
2 Tippling.
4 Spirit, distilled from Bassia.

४१ शुण्डापानं मदस्थानं, मधुवारा मधुक्रमाः ।
मध्वासवो माधवको मधु माध्वीकम-द्वयोः ॥

3 Rum.
2 Distillation.
2 Ferment.

४२ मैरेयमासवः सीधुर्, मंदको जगलः समौ ।
संधानं स्यादभिषवः, किण्वं पुंसि तु नग्नहूः ॥

2 Vinous liquor for distilling.

वी गत्यादौ ॥ ३८ ॥ भरणे साधु भरण्यम् । मूलेनानाम्यं मूल्यं, नौवयोधर्मेतियत् (४।४।९१ / १६४३) । निर्विश्यते भुज्यते निर्वेशः । पण्यते-आभाष्यते पणः, नित्यंपणः-परिमाण इति (३।३।६६ / ३२४३) साधुः । सूयते परिवास्यते सुरा । हलिनो बलस्य प्रिया । जहाति लज्जामनयेति हाला, हलति विलिखत्यङ्गं वा, ज्वलादित्वाण्णः, ज्वलितिकसन्तेभ्यो णः (३।१।१४० / २९०२) । परिस्रवति परिस्रुत्, परिस्रुता च । वरुणात्मजी वारुणी समुद्रोत्थत्वात् ॥ ३९ ॥ गन्धेनोत्तमा । प्रसीदति प्रसन्ना, अच्छसुरा । एति भ्राम्यत्यनया-इरा । कुत्सि ताम्बरस्य नीलवाससः इयं कादम्बरी, सहार्थे तृतीया । माद्यत्यनया मदिरा । कशांदेशे भवं कश्यम् । मदे साधु मद्यं, माद्यन्त्यनेन वा, कृत्यल्युटो बहुलं (३।३।११३ / २८४१) इति करणे गदमचरेति (३।१।१०० / २८४८) यत् । स्वादुरसा मदिष्ठा कल्यं हारहूरं कापिशायनं च । अवदश्यते पानरुचिजननार्थमवदंशः, खरविशदमभ्यवहार्यम् । चर्वणमुपदंशश्च ॥ ४० ॥ शुण्य(न्य)ते शुण्डा, शुण(न) गतौ । पानमदयोरास्पदं कल्यपालगृहैकदेशः । शाश्वतस्तु-कुञ्जराणां करः शुण्डा शुण्डा कादम्बरी मता (३४५) । (मधुवारा इ०) क्रमेण मधुपानावसराः । गौडी पैष्टी च माध्वी च फलोत्था च सुरा स्मृतेति सुराया भेदानाह । माक्षिकमिश्र आसूयते मध्वासवः । मधुनो विकारो मधुना कृतो वा माधवकः, कुलालादित्वाद्वञ् (४।३।११८ / १४९८) । मन्यते मधु, माद्यन्त्यनेन वा । मृद्वीकाया विकारो माद्वीकं, माध्वीकमित्युपाध्यायः । मद्यस्योक्तत्वाद्-अद्वयोरित्येके पेठुः, तन्न-सामान्यविशेषरूपत्वात् ॥४१॥ मिरायां देशे भवो गौड्याः सुराया विशेषो मैरेयः । शेरतेऽनेन शीधुः, शीङो धुक्-(उ.४७८) । शीधोरित्येके पठित्वा शीधुप्रतिकृतिक इति व्याख्यन् । यदाहुः-मध्वासवस्तु मैरेयं, तन्न-यन्माला-मैरेयो गदितः शीधुः, (इक्षोः) [अ] पक्करसोऽपि । मेद्यति स्निह्यत्यनेन मेदकः । भृशं गलति जगलः स्वच्छः सुरासंधानद्रव्यपङ्कः । संधीयते संधानं वंशांकुरफलादीन् बहुकालं संधाय क्रियते । अभिषूयते चिरं क्लिद्यतेऽभिषवः । भावसाधनो वा द्वौ सुरासंधौ वर्तेते । कि(क)णति कीयते वा सुराऽनेन किण्वं माषदलन्या(ला)दि सुराबीजाख्यम् । नग्नेनाह्वयते स्पर्धते सुराच्छादनाभावान्नग्नहूः, नग्नहुर्मालायाम् ॥ ४२ ॥

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh

2 Yest, barm, froth. ४३ कारोत्तरः सुरामण्ड, आपानं पानगोष्ठिका। 2 Place where people drink together.
2 A drinking vessel. चषको ऽस्त्री पानपात्रं, सरको ऽप्यनुतर्षणम् ॥

5 A gamester. ४४ धूर्तो ऽक्षदेवी कितवो ऽक्षधूर्तो द्यूतकृत् समाः।
2 Sureties. स्युर् लग्नकाः प्रतिभुवः, सभिका द्यूतकारकाः ॥
2 Keepers of gaming houses.

4 Gaming. ४५ द्यूतो ऽस्त्रियामक्षवती कैतवं पण इत्यपि।
3 Dice. पणोऽक्षेषु ग्लहो, ऽक्षास् तु देवनाः पाशकाश् च ते ॥

9 Moving a piece at play. ४६ परिणायस् तु शारीणां समन्तात् नयनेऽस्त्रियाम्।
2 A checkered board or cloth. अष्टापदं शारिफलं, प्राणिवृत्तं समाह्वयः ॥

2 A matsh of cocks, &c. ४७ उक्ता भूरि-प्रयोगत्वादेकस्मिन् ये ऽत्र यौगिकाः,।
ताद्धर्म्यादन्यतो वृत्तावूह्या लिङ्गाऽन्तरे ऽपि ते ॥

इति शूद्र-वर्गः १०, अत्र मूलश्लोकाः ४६॥, क्षे० ॥.

इत्यमरसिंह-कृतौ नाम-लिङ्गाऽनुशासने।
द्वितीयः काण्डो भूम्याऽऽदिःसाऽङ्ग एव समर्थितः

कारेण क्रियावशान्मद्यः कारोत्तमः। सुरोर्ध्वे स्वच्छो भागः (सुरामण्डः)। आपीयतेऽस्मिन्नापानम्। पानाय गोष्ठी–आसनबन्धः पानगोष्ठी, गावो नानाविधा वाचस्तिष्ठन्त्यत्रेति। चषन्त्यनेन चषकम्। गल्बर्कोऽपि, स्फाटिके पात्रेऽयं रूढः, विवक्षातोविध्यनुवादौ। सरसि सरकः। अनुतृष्यन्त्यनेनानुतर्षणं सुरापरिवेषणम्। चषकप्रर्यायावेतावित्येके, यन्मुनिः–चषकश्चानुतर्षश्च सरकश्चेति ॥ ४३ ॥ धूर्वति हिनस्ति धूर्तः। अक्षैर्दीव्यति विजिगीषते तच्छीलोऽक्षदेवी। किं तवास्तीति पणते कितवः। लगति लग्नकः। प्रतिनिधिर्भवति प्रतिभूः। सभा द्यूतशालास्त्यस्य सभिकः। द्यूतं कारयति द्यूतकारकः। द्वौ द्वौ भिन्नार्थौ, आद्ययोः सर्वसामान्यात् ॥ ४४ ॥ दीव्यतेऽस्मिन् द्यूतम्। कितवस्य कर्म कैतवम्। पणनं पणः। दुरोदरं नानार्थे। पण्यते पणो बन्धकः। गृह्यते ग्लहः अक्षेषु ग्लहः (३।३।७० / ३२४७) इत्यप। अक्ष्णोऽयक्षः। दीव्यत्यनेन देवनः। पाश्यते बध्यतेऽनेन पाशकः, प्राशक इत्येके ॥४५॥ वामदक्षिणयोः शारीणां परिणयनं परिणायः, परिन्योर्नीणोर्द्यूताभ्रेषयोः (३।३।३७ / ३२०९) इति घञ्। शृणातीति शारी खेलनी। अष्टौपदान्यस्याष्टापदम्। शारयः फलन्त्यत्र शारिफलं खेलनाधारः, चतुरङ्गफलकादि। आकर्षो नानार्थे। प्राणिभिर्मेषकक्कुटादिभिर्द्यूतं प्राणिद्युतम्। संघर्षेणाह्वयन्तेऽत्र समाह्वयः ॥४६॥ येऽत्र संबन्धिशब्दा लक्ष्यबाहुल्यादेकस्मिन्–लिङ्गे–उक्तास्ते तद्गुणयोगादन्यत्र वर्तमाना लिङ्गान्तरेऽप्युत्प्रेक्ष्याः, यथा कर्मण्या भृतिः, कर्मण्यं वेतनं, हलिप्रिया सुरा, हलिप्रियं मद्यं, अक्षवती सभा, अक्षवद् द्यूतम्। एवं मालाकारी स्त्री, अक्षदेविनी स्त्री। तथानुपदानं पादत्राणम् ॥ ४७ ॥ इति शूद्रवर्गः ॥१०॥
इति श्रीभट्टक्षीरस्वामिकृतटीकासहितेऽमरकोशे द्वाटने भूम्यादिकाण्डं द्वितीयं समाप्तम्।

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

तृतीयं सामान्य-काण्डम् ।

१ विशेष्य-निघ्नैः संकीर्णैर् नानाऽर्थैरव्ययैरपि ।
लिङ्गाऽऽदि-संग्रहैर् वर्गाः सामान्ये वर्ग-संश्रयाः ॥

२ स्त्री-दाराऽऽद्यैर् यद् विशेष्यं यादृशैः प्रस्तुतं पदैः ।
गुण-द्रव्य-क्रिया-शब्दास् तथा स्युस् तस्य भेदकाः ॥

3 Fortunate, well-fated.
३ सुकृती पुण्यवान् धन्यो, महेच्छस् तु महाशयः ।
2 Magnanimous.
2 Good hearted.
2 Perseverant, diligent.
हृदयालुः सुहृदयो, महोत्साहो महोद्यमः ॥

10 Skilful, conversant.
४ प्रवीणे निपुणाऽभिज्ञ-विज्ञ-निष्णात-शिक्षिताः ।
वैज्ञानिकः कृतमुखः कृती कुशल इत्यपि ॥

श्रीगणेशाय नमः । विशेष्यनिघ्नो विशेषणम् । विशेषणादिभिर्हेतुभूतैर्ये पञ्च वर्गास्ते काण्डद्वयोक्तसाधारण्यात्सामान्यकाण्डेऽस्मिंस्तृतीयेऽवान्तरवर्गान् संश्रयन्ति, यथा नानार्थे कान्तादिवर्गाः, अव्ययवर्गेऽनेकार्थैकार्थवर्गौ, लिङ्गशेषवर्गे स्त्रीलिङ्गादिवर्गाः । वर्गसंग्रह इत्येके पेठुः, सामान्यकाण्डे ये पञ्च वर्गाः स वर्गसंग्रह इति योजना । आदिशब्दः प्रकारे ॥ १ ॥ स्त्र्यादिभिः पदैर्यादृग्लिङ्गैर्यादृग्वचनैश्च विशेषणैर्यद्विशेष्यं भेद्यं प्रस्तुतं तस्य गुणादिशब्दास्तथा तादृग्लिङ्गास्तादृग्वचनाश्च भेदका विशेषणानि भवन्ति । गुणशब्दा यथा प्रवीणा स्त्री, प्रवीणा दाराः, प्रवीणं कलत्रम् । द्रव्यशब्दा यथा दण्डिनी स्त्री, दण्डिनो दाराः, दण्डि कलत्रम् । क्रियाशब्दा यथा पाचिका स्त्री, पाचका दाराः, पाचकं कलत्रम् । दाराद्यमिति पाठो युक्तः । स्त्रीनराद्यैरित्येके, स्त्रीपुंनपुंसकैरित्यर्थः । क्षेमंकऽरोरिष्टतातिः शिवतातिः शिवंकर इति वक्तव्यम् ॥ २ ॥ धने साधुर्धन्यः । महानाशयोऽस्य महाशय उदाराभिलाषः । उदीर्ण उद्भटोदारावुदात्तश्च महामनाः । प्रशस्तं हृदयमस्त्यस्य हृदयालुः, हृदयादेरा(ञा)लुरन्यतरस्याम् (वा० $\frac{३२१६}{५९२८}$) । स एव हि हृदयेन सह वर्तते, अन्ये मांसखण्डे सत्यप्यहृदयाः, यन्ममैव-हृदयं तद्विविङ्क्ते यद्भावमन्यच्चलं पलम् । शतैकीयाः सहृदया गण्यन्ते कथमन्यथा ॥ चिद्रूपोऽपि । (महोत्साहः) उद्यमवानित्यर्थः ॥ ३ ॥ प्रकृष्टा वीणास्येति प्रवीणः, मुख्यार्थं परित्यज्य निपुणे रूढः, यदाहुः (कुमारिलभ०)-निरूढा लक्षणाः काश्चित्सामर्थ्यादभिधानवत् । क्रियन्तेऽद्यतनैः काश्चित्काश्चिन्नैव त्वशक्तित इति । एवं निष्पातकुशलौ । निपुणति निपुणः, शोभनकर्मत्वात् । अभितो जानात्यभिज्ञः । विजानाति विज्ञः, इगुपधज्ञेतिकः ($\frac{३।१।१३५}{२८९७}$) । निष्णा(स्ना)ति

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

2 Venerable.
2 Dubious.
3 Meriting a fee or reward.

५ पूज्यः प्रतीक्ष्यः, सांशयिकः संशयापन्नमानसः ।
दक्षिणीयो दक्षिणार्हस् तत्र दाक्षिण्य इत्यपि ॥

4 Munificent.
2 Long-lived.

६ स्युर् वदान्य-स्थूललक्ष्य-दानशौण्डा बहुप्रदे ।
जैवातृकः स्यादायुष्मानन्तर्वाणिस् तु शास्त्रवित् ॥
2 Skilled in sacred sciences.

2 Acutely investigating.
4 Joyful, cheerful.

७ परीक्षकः कारणिको, वरदस् तु समर्द्धकः ।
हर्षमाणो विकुर्वाणः प्रमना हृष्टमानसः ॥
2 Granting a prayer.

3 Ssd, perplexed.
2 Regretting.
3 Sincere, candid.

८ दुर्मना विमना अन्तर्मनाः, स्यादुत्क उन्मनाः ।
दक्षिणे सरलोदारौ, सुकलो दातृभोक्तरि ॥
2 Liberal in giving and using.

निष्णातः, निनदीभ्यांस्नातेः कौशले (८।३।८९) इति षत्वम् । शिक्षा संजातास्येति शिक्षितः । विज्ञानं प्रयोजनमस्येति वैज्ञानिकः । कृतं संस्कृतं मुखमस्येति कृतमुखः । प्रशस्तं कृतं कर्मास्येति कृती । कुशान्–लाति कुशलः, ते हि व्युत्पन्नैरादातुं शक्याः । कृतकर्मा कृतकृत्यः कृतार्थश्च ॥ ४ ॥ प्रतीक्षणीयो मुख्यत्वात् (प्रतीक्ष्यः) । (सांशयिकः) संशयमापन्न इति (५।१।७३) ठक् । (दक्षिणीय इ०) दक्षिणामर्हति, कडङ्करदक्षिणाच्छ चेति (५।१।६९) छयतौ । तत्र दक्षिणार्थे ॥ ५ ॥ वदति दीयतामिति वदान्यः, वदेरान्यः (उ० ३८४) । वदन्योऽपि, साधौ यत् तत्र साधुः (४।४।९८) । (स्थूललक्षः) स्थूलं लक्षयत्यालोचयति ददातीति यावत् । दाने शौण्डः शक्त उपचारात्, शुण्डा हि पानमदस्थानं तत्र भवः शौण्डः । जीवति जैवातृकः, जीवेरातृकन्वृद्धिश्च (उ० ७९) । (अन्तर्वाणिः) अन्तर्वाण्यस्य ॥ ६ ॥ करणं प्रयोजनमस्य कारणिकः, मठादौ दानार्थं ब्राह्मणपरीक्षिता । आक्षपटलिकोऽपि । करणेनाधिकार (रि) वर्गेण चरतीति वा । समृध्नोति संवर्धयति समर्धुकः । हृष्यति हर्षमाणः, ताच्छील्यवयोवचनशक्तिषु चानश् (३।२।१२९) । हर्षाद्विकारं याति विकुर्वाणः । प्रकृष्टं मनोऽस्य प्रमनाः ॥ ७ ॥ अन्तर्लीनं मनोऽस्यान्तर्मनाः । उद्गतं मनोऽस्योत्कः, येनान्तर्जलचारिभिर्जलचरैरप्युत्कमुत्कूजितमिति धर्ममात्रेऽपि, उत्क उन्मना इति (५।२।८०) साधुः । सोत्कण्ठश्च । (दक्षिण इ०) दक्षते, सरति, उदियर्ति च । शोभना कलाऽस्य सुकलः, दाता भोक्ता च यः ॥ ८ ॥ तत्परं यस्य स तत्परस्तन्निष्ठः । प्रसिनोति स्म प्रसितः, षिञ् बन्धने । आसजति स्माऽऽसक्तः । प्रियमर्थं प्रेप्सुः, उच्छन्द उद्योगार्थः सुशब्दः शोभनार्थः, उत्कादिवत्कन् (ज्ञा०) । प्रत्येकमेति प्रतीतः । प्रथते प्रथितः । ख्यायते ख्यातः । विद्यते प्रतीयते वित्तः,

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh

3 Diligent, attentive. 2 Zealously active. ९ तत्परे प्रसिताऽऽसक्ताविष्टार्थोद्युक्त उत्सुकः ।
6 Known, celebrated, famous. प्रतीते प्रथित-ख्यात-वित्त-विज्ञात-विश्रुताः ॥

2 Noted for good qualities. १० गुणैः प्रतीते तु कृतलक्षणाऽऽहतलक्षणौ ।
3 Opulent, wealthy. इभ्य आढ्यो धनी, स्वामी त्वीश्वरः पतिरीशिता ॥
10 An owner or master.

११ अधिभूर् नायको नेता प्रभुः परिवृढो ऽधिपः ।
2 Every way happy. अधिकर्धिः समृद्धः स्यात्, कुटुम्बव्यापृतस् तु यः ॥

3 Attentive to support his family. १२ स्यादभ्यागारिकस् तस्मिन्नुपाधिश् च पुमानयम् ।
1 Handsome and well-shaped. वराऽङ्ग-रूपोपेतो यः सिंहसंहननो हि सः ॥

1 Acting fearlessly. १३ निर्वार्यः कार्य-कर्ता यः संपन्नः सत्त्व-संपदा ।
2 Dumb. 2 Fatherly. अवाचि मूको, ऽथ मनोजवसः पितृसंनिभः ॥

2 Giving a girl in marriage. १४ सत्कृत्याऽलङ्कृतां कन्यां यो ददाति स कूकुदः ।
4 Prosperous, happy. लक्ष्मीवाँल् लक्ष्मणः श्रीलः श्रीमान्, स्निग्धस् तु वत्सलः ॥
2 Affectionate.

वित्तो भोगप्रत्यययोः (८।२।५८/३०४१) इति साधुः ॥ ९ ॥ कृताः प्रसिद्धा लक्षणरूपा गुणा यस्याऽसौ कृतलक्षणः । आहतान्युद्घोषितानि लक्षणानि यस्याऽसावाहतलक्षणः । इभमर्हति– इभ्यः, दण्डादित्वाद्यत् (५।१।६६/१७३१) । आध्यायन्ति तमाढ्यः, कः, पृषोदरादिः (६।३।१०९/१४३४) । स्वमस्त्यस्य स्वामी, स्वामिन्नैश्वर्ये (५।२।१२६/१९३२) इति साधुः । ईष्टे तच्छील ईश्वरः, स्थेशभासेति (३।२।१७५/३१५५) वरच् । पातीति पतिः ॥ १० ॥ अध्युपरि भवत्यविभूः । नयति नियुङ्क्ते नायकः । प्रभवति प्रभुः, विप्रसंभ्यइति (३।२।१८०/३१६०) डुः । परिबृंहति परिवृढः, प्रभौ परिवृढइति (७।२।२१/३०६१) साधुः । ग्रामणीरग्रणीश्च ॥ ११ ॥ कुटुम्बे कलत्रादौ व्यापृतः, तत्पोषणोद्युक्तः, अभितोऽगारे भवोऽभ्यागारिकः । उपाधीयत उपाधिः । सिंहस्येव संहननं देहोऽस्य सिंहसंहननः ॥ १२ ॥ निर्धार्यः समुदायाद् गुणैः पृथग्व्यपदेश्यः । सत्त्वसंपच्चित्तोत्कर्षः, तया संपतन् (न्नः) संपद्यमानः । नास्ति वागस्य–अवाक् । मूयते बध्यते वागस्य मूकः, मूङ् बन्धने । मनो जवतेऽस्मिन् पिताऽयमिति धावति मनोजवसः, औणादिकोऽसः–चमसादिवत्, मनोजेऽभिलाषे वसति वा । पितेव सम्यङ् निभाति पितृसंनिभः ॥ १३ ॥ कोकत आदत्ते धर्मं कूकुदः, कुङ् शब्द इत्यस्य वा रूपमाकूतवत्, ब्राह्मे विवाहे दाता, यन्मनुः–आच्छाद्य चार्हयित्वा च श्रुतशीलवते स्वयम् । आहूय दानं कन्याया ब्राह्मो धर्मः प्रकीर्तितः (३-२७) ॥ लक्ष्मीरस्त्यस्य लक्ष्मणः, लोमादिपामादीति (५।२।१००/१९०७) लक्ष्म्या अच्चेतिणः (वा० ?) । श्रियं लाति श्रीलः, सिध्मादित्वा-

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

4 Compassionate. १५ स्याद् दयालुः कारुणिकः कृपालुः सूरतः समाः ।
5 Unrestrained. स्वतन्त्रो ऽपावृतः स्वैरी स्वच्छन्दो निरवग्रहः ॥

4 Dependent. १६ परतन्त्रः पराधीनः परवान् नाथवानपि ।
5 Docile. अधीनो निघ्न आयत्तो ऽस्वच्छन्दो गृह्यको ऽप्यसौ ॥

2 A sweeper.
2 Dilatory, slow.
2 Acting inconsiderately. १७ खलपूः स्याद् बहुकरो, दीर्घसूत्रश् चिराक्रियः ।
जाल्मोऽसमीक्ष्यकारी स्यात्, कुण्ठो मन्दः क्रियासु यः ॥
1 Indolent.

2 Competent to an act.
2 Laborious.
2 Finishing carefully. १८ कर्मक्षमो ऽलङ्कर्मीणः, क्रियावान् कर्मसूद्यतः। 1 Engaged in a business.
स कार्मः कर्मशीलो यः, कर्मशूरस् तु कर्मठः ॥

2 Working for hire.
2 Bathing after mourning. १९ भरण्यभुक् कर्मकरः, कर्मकारस् तु तत्-क्रियः । 1 Working without wages.
अपस्नातो मृतस्नात, आमिषाशी तु शौष्कुलः ॥
2 Eating fish and flesh.

लुञ्चा (५।२।९७ / १९७४)। रलयोरेकत्वस्मरणात्–श्लीलः। वत्सोऽस्यास्तीति वत्सलः, वत्सांसाभ्यां कामबले (५।२।९८ / १९७५) इति लच् ॥ १४ ॥ (दयालुः, इ०) दया कृपा चाऽस्यस्य। करुणाप्रयोजनमस्त्यस्य कारुणिकः। सुष्ठु रमते सूरतः, सूरोऽर्क इव तपति वा, डः। स्व आत्मा तन्त्रं मुख्योऽस्य स्वतन्त्रः। अपगतमावरणं नियन्ताऽस्येत्यपावृतः। स्वेन–ईर्ते तच्छीलः स्वैरी, स्वादीरेरिणोः (वा० ३६०६ / ७३) इति वृद्धिः। स्वश्छन्दोऽभिप्रायोऽस्य स्वच्छन्दः। निष्क्रान्तोवग्रहान्नियन्त्रणातो निरवग्रहः। निर्यन्त्रणो निरङ्कुशो यथाकामी च ॥१५॥ परोऽध्युपर्यस्य पराधीनः, अपडक्षाशितेति (५।४।७ / २०७९) खः। परो नियन्ताऽस्त्यस्य परवान्। अधि–उपरीनोऽस्याऽधीनः। निहन्यते निघ्नः, घञर्थेकविधानम् (वा० ३२०४ / २२३४) आयत्यते नियुज्यते–आयत्तः। गृह्यते गृह्यकः, पदास्वैरिवाह्येति (३।१।१९९ / २८७०) क्यप् ॥ १६ ॥ खलं पुनाति खलपूः। बहु करोति बहुकरः, दिवाविभेति (३।२।२१ / २९३५) टः, अत एत बहुकरी मार्जनी, बहुधान्यार्जक इत्येके। दीर्घं चिरेण सुवति सूत्रयते वा दीर्घसूत्रः। जडति जाल्मः। (कुण्ठः) कुठि आलस्ये। मन्दोऽलसः ॥१७॥ अलं कर्मणेऽलंकर्मीणः, पर्यादयोग्लानाद्यर्थेचतुर्थ्येति (वा० ?) समासः, अपडक्षाशितेति (५।४।७ / २०७९) खः। (क्रियावान्) नित्ययोगेव (म) तुप् (का०)। (कार्मः) कार्मस्ताच्छील्ये (६।४।१७२ / १६७३) इति साधुः। कर्मणि घटते कर्मठः, कर्मणि घटोऽठच् (५।२।३५ / १८३६) ॥ १८ ॥ कर्मणि साधु कर्मण्यं वेतनं भुङ्क्ते कर्मण्यभुक्। कर्म करोति कर्मकरः, कर्मणि भृतौ (३।२।२२ / २९३६) इति टः। (कर्मकारः) कर्मण्यण् (३।२।१ / २९२३), विना भृतिं कर्मसंपादकः। (अपस्नातः) अपेति विरुद्धार्थः। (मृतस्नातः) मृतसंस्कारार्थं स्नापितः। शुष्कली

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh

4 Hungry.
2 Feeding at another's cost.

२० बुभुक्षितः स्यात् क्षुधितो जिघत्सुरशनायितः ।
परान्नः परपिण्डादो, भक्षको घस्मरोऽद्मरः ॥ 3 Gluttonous.

3 Shamelessly voracious.
2 Selfishly voracious.

२१ आद्यूनः स्यादौदरिको विजिगीषा-विवर्जिते ।
उभौ त्वात्मम्भरिः कुक्षिम्भरिः स्वोदर-पूरके ॥

2 Eating every body's.
5 Covetous, greedy.
3 Very covetous.

२२ सर्वान्नीनस् तु सर्वान्नभोजी, गृध्नुस् तु गर्धनः ।
लुब्धोऽभिलापुकस् तृष्णक्, समौ लोलुप-लोलुभौ ॥

2 Mad; insane.
2 Misbehaving.
4 Drunk.
9 Lustful.

२३ सोन्मादस् तून्मदिष्णुः स्यादविनीतः समुद्धतः ।
मत्ते शौण्डोत्कट-क्षीवाः, कामुके कमिता ऽनुकः ॥

मांसोपलक्षणं, तामत्ति शौष्कलः [शाष्कलः], शेषे (४।२।९२ / १३१२) इत्यण् ॥ १९ ॥ बुभुक्षा संजाताऽस्य (बुभुक्षितः) । क्षुध्यति स्म क्षुधितः । अत्तुमिच्छति जिघत्सुः । अशनमिच्छति, सुप आत्मनः क्यच् (३।१।८ / ३६५,७), अशनायोदन्येति (७।४।३४ / २६६१) साधुः, ततः क्ते, इट् । परादन्नमस्य परान्नः । अत्ति तच्छीलोऽद्मरः, सृघस्यदः क्मरच् (३।२।१६० / १२४७), निर्देशात्पक्षे घस्लादेशः, घस्लृ अदने वा ॥ २० ॥ आ–ईषद्दीव्यति स्म–आद्यूः, दिवोऽविजिगीषायां (८।२।४९ / ३०२८) इति नत्वम् । उदरेण भृतः (उदरे प्रसितः) औदरिकः, उदराट्ठगाद्यूने (५।२।६७ / १८६७) । आत्मानं बिभर्त्यात्मंभरिः, आत्मोदरयोर्भृञः (?) इति खिः । उदरंभरिरपि । (कुक्षिंभरिः) कुक्षौ-चेतिवक्तव्यात् (वा० ?) खि(च) । स्वोदरयोः क्रमादात्मोदरयोः पूरकः ॥ २१ ॥ सर्वाण्यन्नानि भक्षयति सर्वान्नीनः, अनुपदसर्वान्नायानयमिति (५।२।९ / १८१०) खः । (गृध्नुः) त्रसिगृधीति (३।२।१४० / ३१२०) क्नुः । (गर्धनः) जुचङ्क्रम्येति (३।२।१५० / ३१३०) युच् । अभिलषति तच्छीलोऽभिलापुकः, लषपतपदेत्युकञ् (३।२।१५४ / ३१३४) । तृष्यति तच्छीलस्तृष्णक्, स्वपितृषोर्नजिङ् (३।२।१७२ / ३१५,२), तृष्णग्जान्तः, लुब्धे–उपचारः । तृषितस्तर्षिता, पिपासितश्च । भृशं लुम्पति भृशं लुभ्यति (लोलुप इ०), यङ्लुगन्तादच् । केचित्पूर्वैः संबध्नन्ति । लालसो लम्पटश्च ॥ २२ ॥ उन्माद्यति तच्छील उन्मदिष्णुः–भूताद्याविष्टः, अलंकृञ्निराकृञिति (३।२।१३६ / ३११६) इष्णुच् । (अविनीतः) निर्मर्यादोऽपि । मद्येन माद्यति स्म मत्तः । शुण्डायां भवः शौण्डः शुण्डाऽस्त्यस्य वा, अण्प्रकरणे ज्योत्स्नादिभ्य उपसंख्यानात् (वा० ३३९७) । उत्क्रान्तः कटीछादनादुत्कटः, उद्रिक्तो वा, संप्रोदश्च कटच् (५।२।२९ / १८३०) । क्षीवते स्म क्षीवः, क्षीवृ मदे, अनुपसर्गात्फुल्लक्षीवेति (८।२।५५ / ३०३५) साधुः । कामयते तच्छीलः (कामुक इ०), लषपतपदेत्युकञ् (३।२।१५४ / ३१३४), तृन् (३।२।३१५ / ३१२५) ॥२३॥

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

२४ कम्रः कामयिता ऽभीकः कमनः कामनोऽभिकः ।
विधेयो विनयग्राही वचनेस्थित आश्रवः ॥

4 Compliant.

२५ वश्यः प्रणेयो, निभृत-विनीत-प्रश्रिताः समाः ।
धृष्टे धृष्णग् वियातश् च, प्रगल्भः प्रतिभान्विते ॥

2 Governable.
3 Modest.
3 Impudent, shameless.
2 Bold, present.

२६ स्यादधृष्टे तु शालीनो, विलक्षो विस्मयान्विते ।
अधीरे कातरस्, त्रस्ते भीरु-भीरुक-भीलुकाः ॥

2 Ashamed.
2 Astonished.
2 Confused.
4 Timid.

२७ आशंसुराशंसितरि, गृहयालुर् ग्रहीतरि । श्रद्धालुः श्रद्धया युक्ते, पतयालुस् तु पातुके ॥

2 Wishing blessings.
1 Faithful ; believing.
2 Habitually falling.
2 Disposed to take.

(कम्रः) नमिकम्पीति (३।२।१६७) रः । (कमनः) अनुदात्तेतश्चेति (३।२।१४९) युच्, औणादिकस्त्वपरः । कामनः कमनोऽभिक इति तु युक्तः पाठः, आयादय आर्धधातुके वा (३।१।३१) इति पक्षे कमेर्णिङ् । अनुकाभिकाभीकः कमितेति (५।२।७४) अन्वभिभ्यां के (कनि) साधवः । [छेको विदग्धे व्यसनिपञ्चभद्रावुपप्लुते । वेश्यापतिर्भुजंगः स्यात्पिङ्गः पल्लविको विटः ॥ (?)] विधातव्यो विधेयो यथेष्टं विनियोज्यः । विनयः शास्त्रजः संस्कार इन्द्रियजयो वा । आश्रणोति वाक्यमाश्रवः ॥ २४ ॥ (वश्यः) वशं गतः (४।४।८६) इति यत् । प्रणेतव्य आयत्तः (प्रणेयः) । प्रणेयान्ताः षडेकार्था इत्येके । निभृतोऽचपलः । प्रश्रयति प्रश्रितः । धृष्णोति स्म धृष्टः, धृषिशसी वैयात्ये (७।२।१९) इतीडभावः । धृष्णोति तच्छीलो धृष्णुः, त्रसिगृधीति (३।२।१४०) क्नुः । धृषेश्चेतिवक्तव्यात् (३।२।१४०) नजिङि घृष्णक् । विरुद्धं याति स्म वियातः । प्रगल्भते प्रगल्भः । प्रज्ञा नवनवोन्मेषशालिनी प्रतिभा मता (रुद्रः), प्रतिभात्यस्यामिति (प्रतिभा) । प्रत्युत्पन्नमतिस्तत्कालधीश्च ॥ २५ ॥ शालां प्रवेष्टुमर्हति शालीनः, शालीनकौपीन इति (५।२।२०) साधुः । विरुद्धं लक्षयते विरुद्धं लक्षमस्य वा विलक्षः, निष्प्रतिपत्तिरित्यर्थः । ईषत्तरति कातरः, कतरस्यायं वा, अत्र कातरा स्त्रीति न स्यात् । इतो निद्राल्वन्तास्ताच्छील्ये । त्रस्यति त्रस्नुः, त्रसिगृधीति (३।२।१४०) क्नुः । (भीरुः, इ०) बिभेति तच्छीलः, भियः क्रुक्लुकनौ (३।२।१७४), क्रुकन्वक्तव्याच्च (वा० २१४५ ३।२।५४) । दरितो भीतस्त्रस्तश्चकितश्च ॥ २६ ॥ (आशंसुः) सनाशंसभिक्ष उः (३।२।१६८) । गृह्यते गृहयालुः, स्पृहिगृहीति (३।२।१५७) आलुच् । श्रद्धधाति तच्छीलः, श्रद्धालुः । आद्यः पतिश्चोरादिकोऽदन्तः, पतयति पतयालुः, स्पृहिगृहीति (३।२।१५७) आलुच् । पतति तच्छीलः पातुकः, लपपत-

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh

2 Bashful.
2 Civil ; polite.
3 Mischievous.
2 Thriving ; growing.

२८ लज्जाशीले ऽपत्रपिष्णुर्, वन्दारुराभिवादके ।
शरारुर् घातुको हिंस्रः, स्याद् वर्द्धिष्णुस् तु वर्द्धनः ॥

2 Jumping up.
2 Inclined to ornament.

२९ उत्पतिष्णुस् तूत्पतिता, ऽलङ्करिष्णुस् तु मण्डनः ।

3 Faring well.
2 Stationary.

भूष्णुर् श्वविष्णुर् भविता, वर्तिष्णुर् वर्तनः समौ ॥

3 Obstructive.
2 Very smooth, wet.
3 Knowing ; intelligent.
2 Expanding.

३० निराकरिष्णुः क्षिप्नुः स्यात्, सान्द्रस्निग्धस् तु मेदुरः ।
ज्ञाता तु विदुरो विन्दुर्, विकासी तु विकस्वरः ॥

4 Flowing or creeping.
6 Patient, content.

३१ विसृत्वरो विसृमरः प्रसारी च विसारिणि ।
सहिष्णुः सहनः क्षन्ता तितिक्षुः क्षमिता क्षमी ॥

3 Passionate ; wrathful.
2 Very passionate.

३२ क्रोधनो ऽमर्षणः कोपी, चण्डस् त्वत्यन्तकोपनः ।

2 Wakeful.
2 snoring, as in sleep.

जागरूको जागरिता, घूर्णितः प्रचलायितः ॥

पदेत्युकञ् (३।२।१५४/३१३४) ॥ २७ ॥ (अपत्रपिष्णुः) अपत्रपते तच्छीलः, भ्राज्यलंकृजिति वक्तव्यात् (वा० ३।२।१३६/३१२६) इष्णुच् । वन्दते तच्छीलः (वन्दारुः), शृवन्द्योरारुः (३।२।१७३/३१५३) । (शरारुः, इ०) शृणाति हन्ति हिनस्ति च तच्छीलः, शृवन्द्योरारुः (३।२।१७३/३१५३), लपपतपदेत्युकञ् (३।२।१५४/३१३४), नमिकम्पीति (३।२।१६७/३१४७) रश्च । (वर्धिष्णुः, इ०) अलंकृञिति (३।२।१३६/३१२६) इष्णुच्, अनुदात्तेतश्चेति (३।२।१४९/३१२९) युचू । भवति तच्छीलः (भूष्णुः), ग्लाजिस्थश्चग्रस्नुः (३।२।१३९/३१२९) (भविष्णुः, इ०) भुवश्चेति (३।२।१३८/३१२८) इष्णुच्, तृन् (३।२।१३५/३१२५) । (वर्तिष्णुः, इ०) इष्णुच्, युच ॥ २९ ॥ क्षिपति तच्छीलः क्षिप्नुः, त्रसिगृहीति (३।२।१४०/३१२०) क्नुः । [सान्द्रशब्दोऽत्यन्तार्थो भवति] सान्द्रः पीनः स्निग्धश्च (सान्द्रस्निग्धः) । मेद्यति मेदुरः, भञ्जभासमिदो घुरच् (३।२।१४१/३१४१) । वेत्ति तच्छीलो विदुरः, विदिभिदिच्छिदेः कुरच् (३।२।१६२/३१४२) । वेत्ति विन्दुः, विन्दुरिच्छुः इति साधुः । (विकासी) विकसति तच्छीलः, वौ कस (प) लसेति घिनुण् (३।२।१४३/३१२३) । (विकस्वरः) स्थेशभासपिसकसो वरच् (३।२।१७५/३१५५) ॥ ३० ॥ (विसृत्वरः) विसरति तच्छीलः, इण्नशजीति (३।२।१६३/३१४३) क्वरप् । (विसृमरः) सृघस्यदःक्मरच् (३।२।१६०/३१४०) । (प्रसारी) प्रे लपसृद्रुमथेति (३।२।१४५/३१२५) घिनुण् । (सहिष्णुः, इ०) सहेरिष्णुच्, युच । (क्षन्ता) क्षमेस्तृन्, ऊदित्वाद्वेट् । (तितिक्षुः) तिजेः क्षमायाम् (वा० १६८८/२३९४), गुमिजीति (३।१।५/२३९३) सन्, सनाशंसेति (३।२।१६८/३१४८) उः । (क्षमी) शमित्यष्टाभ्यो घिनुण् (३।२।१४१/३१२१) ॥ ३१ ॥ (क्रोधनः) क्रुधमण्डार्थेभ्यश्चेति (३।२।१५१/३१३१) युच् । कोपनो रोषणश्च । (चण्डः)

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh

3 Sleepy, sluggish. 2 Asleep. 2 Averting the face. 2 Down-looked.

३३ स्वप्नक् शयालुर् निद्रालुर्, निद्राण-शयितौ समौ ।
पराङ्मुखः पराचीनः, स्यादवाङप्यधोमुखः ॥

1 Adoring deities.

३४ देवानञ्चति देवद्र्यङ्, विष्वद्र्यङ् विष्वगञ्चति ।

1 Accompanying. 1 Moving tortuously. 1 Going every-where.

यः सहाऽञ्चति सद्र्यङ् स, स तिर्यङ् यस् तिरोऽञ्चति ॥

3 Speaking sensibly. 2 Eloquent. 4 Speaking much.

३५ वदो वदावदो वक्ता, वागीशो वाक्पतिः समौ ।
वाचोयुक्तिपटुर् वाग्मी, वावदूको ऽतिवक्तरि ॥

4 Talking non-sense 3 Foul-mouthed, scurrilous. 2 Speaking civilly.

३६ स्याज् जल्पाकस् तु वाचालो वाचाटो बहुगर्ह्यवाक् ।
दुर्मुखे मुखराऽबद्धमुखौ, शक्तः प्रियंवदे ॥

चडि कोपे । (जागरूकः) जागरूकश्च (३।२।१६५/३१४५) इति–ऊकञ्, (जागरिता) चकरात्तन् । प्रचल इवाचरन् प्रचलायितः, य उपविष्टो निद्रया घूर्णितः ॥ ३२ ॥ (स्वप्नक्) स्वपितृषोर्नजिङ् (३।२।१७२/३१५३) । (शयालुः) शीङ्श्वेतिवक्तव्यादालुच् (शीङोवाच्यः) । (निद्रालुः) निद्राति तच्छीलः, निद्रातन्द्रेत्यालुच्, स्पृहिगृहिपतिदयीति (३।२।१५७/३१३८) । निद्राति स्म निद्राणः, संयोगादेरातो धातो (८।२।४३/३०१७) इति निष्ठा नत्वम् । पराञ्चतीति पराङ् (पराचीनः), विभाषाञ्चेरदिक् स्त्रियाम् (५।४।८/२८८०) इति स्वार्थे खः । संमुखीनस्त्वभिमुखः । अवाञ्चत्यवाङ्, अवाचीनोऽपि ॥ ३३ ॥ (देवद्र्यङ्, इ०) विष्वग्देवयोश्च टेरद्र्यञ्चतावप्रत्यये (६।३।९२/४१८), विष्वक्सर्वतोऽर्थेऽव्ययम् । (सद्र्यङ्) सहस्य सध्रिः (६।३।९५/४२२) इत्यञ्चतौ परे सध्र्यादेशः । (तिर्यङ्) तिरसस्तिर्यलोपे (६।३।९४/४२३) ॥ ३४ ॥ वदति (वदः) वदावदः, चरिचलिपतिवदिभ्यो द्वित्वमभ्यासस्यात्वं वा (वा० ३४३०/२८९६) । वाचो युक्तौ पटुः, वाग्दिक्पश्यद्भ्यो युक्तिदण्डहरेषु (वा० ३८९७/९७९) इति षष्ठ्या अलुक् । प्रशस्ता वागस्त्यस्य वाग्मी, वाचोग्मिनिः (५।२।१२४/१९३०) । वावद्यते तच्छीलो वावदूकः, यजजप– (३।२।१६६/३१४६) इत्यत्र वदेरनु[प]देशः कार्य इति पदकारवाक्यादूकः । वक्तरीति, तृन् (३।२।१३५/३११५) । प्रवाक् प्रगल्भः सुमुखश्च ॥ ३५ ॥ (जल्पाकः) जल्पभिक्षेति (३।२।१५५/३१३५) ताच्छील्ये पाकन् । (वाचाल इ०) आलजाटचौ बहुभाषिणि (५।२।१२५/१९३१) । गर्ह्यजापी जञ्जपूकः । मुखेन वाग्लक्ष्यते, निन्दितं मुखमस्त्यस्य मुखरः, रप्रकरणे खमुखकुञ्जेभ्यो रो वक्तव्यः (वा० ३१९८/१९१४) । अबद्धमनियन्त्रितं मुखमस्त्यस्याबद्धमुखः । शक्नोति वक्तुं शक्तः । (प्रियंवदः) प्रियवशे वदःखच्

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh

2 Lisping.
2 Speaking ill.
2 Censorious, detracting.

३७ लोहलः स्यादस्फुटवाग्, गर्ह्यवादी तु कद्वदः ।
समौ कुवाद-कुचरौ, स्यादसौम्यस्वरो ऽस्वरः ॥
2 Having a bad voice.

2 Sonorous.
2 Idiot, stupid.
1 Deaf and dumb.

३८ रवणः शब्दनो, नान्दीवादी नान्दीकरः समौ ।
जडो ऽज्ञ, एडमूकस् तु वक्तुं श्रोतुम-शिक्षिते ॥
2 Speaker of a prologue.

2 Silent.
3 Naked.
2 Expelled.
2 Cursed.

३९ तूष्णींशीलस् तु तूष्णीको, नग्नोऽवासा दिगम्बरे ।
निष्कासितो ऽवकृष्टः स्यादपध्वस्तस् तु धिक्कृतः ॥

2 Humbled : subdued.

४० आत्तगर्वो ऽभिभूतः स्याद्, दापितः साधितः समौ ।
2 Condemned ; or adjudged.

4 Removed ; set aside.

प्रत्यादिष्टो निरस्तः स्यात् प्रत्याख्यातो निराकृतः ॥

2 Pale.
2 Deceived, tricked.
4 Disappointed.

४१ निकृतः स्याद् विप्रकृतो, विप्रलब्धस् तु वञ्चितः ।
मनोहतः प्रतिहतः प्रतिबद्धो हतश् च सः ॥

2 Turned away.
3 Confined.
2 Distressed.
2 Put to flight.

४२ अधिक्षिप्तः प्रतिक्षिप्तो, बद्धे कीलित-संयतौ ।
आपन्न आपत्प्राप्तः स्यात्, कान्दिशीको भयद्रुतः ॥

(३।२।३२ / २९५३) ॥ ३६ ॥ (लोहलः) लुह कत्थनादौ । कुत्सितं वदतीति कद्वदः, रथवदयोश्च (६।३।१०२ / १०२८) इति कोः कत् । अनुत्तरो यद्वदश्च । कुत्सितो वादोऽस्य कुवादः । कुत्सितं चरति कुचरः, पचाद्यच्, नन्दिग्रहीति (३।१।१३४ / २८९६) । विपरीतः स्वरोऽस्य—अस्वरः, नञ् तद्विरुद्धेऽनर्थवत् ॥ ३७ ॥ (रवणः, इ०) रौति शब्दायतीति, चलनशब्दार्थात् (३।२।१४८ / ३१२८) इति युच् । नान्दीं मङ्गलपाठं करोति नान्दीकरः, दिवाविभेति (३।२।२१ / २९३५) टः । (जडः) जल धान्ये (चान्द्रोधातुः), डलयोरेकत्वम् । अज्ञोऽतीक्ष्णधीः । मातृमुखो मातृशासितश्च । तीक्ष्णधीस्तु कुशाग्रीयः । न—एडोऽपि (अ)वर्करोऽपि मूकः—एडमूकसदृशो वा—अनेडमूकः, नञिवयुक्तमन्यसादृशाधिकरणे तथाह्यर्थः (भाष्यव०), एडो हि बधिरः ॥ ३८ ॥ (तूष्णीकः) तूष्णीमः शीले को मलोपश्च वक्तव्यः (वा० ३।२।८६ / १०२८) । ओणजी व्रीडे, नजते स्म नग्नः । अविद्यमानं वासोऽस्य—अवासाः । अवकृष्यते दूरीक्रियते स्माऽवकृष्टः, निःसारित इत्यर्थः ॥३९॥ आत्तो गृहीतो गन्धोऽभिमानोऽस्यात्तगन्धः । चत्वार एकार्था इत्येके । (समौ) दण्डितार्थे । प्रत्यादिश्यते स्म प्रत्यादिष्टः, अनङ्गीकृत इत्यर्थः । अपविद्धोऽपि ॥४०॥ निःक्रियते खलीक्रियते स्म निकृतः । मनसि हतो मनोहतः । प्रतिबन्धः प्रवृत्तिनिवारणार्थः ॥ ४१ ॥ प्रतिक्षिप्यते न्यक्क्रियते स्म प्रतिक्षिप्तः । (कीलितः) कील बन्धने । प्राप्त आपदं आपत्प्राप्तः, प्राप्तापन्ने च द्वितीययेति (२।२।४ / ७१५) समासः ।

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

3 Calumniated.
2 Unsteady.
2 Afflicted by vice.

४३ आक्षारितः क्षारितोऽभिशस्ते, संकसुकोऽस्थिरे ।
व्यसनार्तोपरक्तौ द्वौ, विहस्त-व्याकुलौ समौ ॥

2 Confounded, perplexed.

2 Overcome by fear, &c.

४४ विक्लवो विह्वलः, स्यात् तु विवशो ऽरिष्टदुष्टधीः ।

2 Apprehensive of death.

2 Deserving a whipping.
1 Murderous ; a felon.

कश्यः कश्यार्हे, सन्नद्धे त्वाततायी वधोद्यते ॥

2 Hateful, detestable.
1 Meriting death by poison.

४५ द्वेष्ये त्वक्षिगतो, वध्यः शीर्षच्छेद्य इमौ समौ । 2 Meriting beheading.
विष्यो विषेण यो वध्यो, मुसल्यो मुसलेन यः ॥

—by knocks of a pestle.

2 Innocent.
2 Inconsiderately guilty.
2 Malevolent and censorious.

४६ शिश्विदानो ऽकृष्णकर्मा, चपलश् चिकुरः समौ ।
दोषैकदृक् पुरोभागी, निकृतस् त्वनृजुः शठः ॥

3 Wicked ; perverse.

(कांदिशीकः) कां दिशं व्रजामीति व्याकुलः, पृषोदरादिः ($\frac{६।३।१०९}{१०३४}$)। भयाद् द्रुतः पलायितः ॥ ४२ ॥ आक्षार्यते स्वरूपाच्चाल्यते–आक्षारितः, अलीकोत्पन्नपातकव्यपदेशः। अभिशस्तोऽभिदूषितः, मैथुनं प्रतीत्येके । (संकसुकः) समि कस उकन् (उ० १८७), अनिश्चित इत्येके । समावित्येव । व्यस्यति श्रेयोमार्गाद्व्यसनं तेन ऋतो व्यसनार्तः, ऋते च तृतीयासमासे (वा० $\frac{३६०७}{७३}$) इति वृद्धिः । उपरज्यते स्मोपरक्तः । विगतो हस्तो यस्य स विहस्तः, किंकर्तव्यतामूढत्वात् ॥ ४३ ॥ विक्लवते कातरीभवति विक्लवः, क्लविर्धातुगणापरिसमाप्तेर्लौकिकः । विरुद्धं ह्वलति विह्वलः । विरुद्धं वष्टि कामयते विवशः । अरिष्टेन मरणचिह्नेन श्वासादिना दुष्टा धीर्यस्य । कशा चर्मयष्टिस्तद्धातोप्युपचारात्, तामर्हति कश्यः–अश्वादिः, दण्डादित्वाद्यः ($\frac{५।१।६६}{१७३१}$)। सन्नद्धः सन् यो वधार्थमुद्यतः स आततः सोद्योगः सन्नेति वधाद्यर्थं धावति अवश्यं, आतं पलायमानं तायते वा–आततायी । वध उपलक्षणं यत्स्मृतिः–अग्निदो गरदश्चैव शस्त्रपाणिर्धनापहः । क्षेत्रदारहरश्चैव षडेते त्वाततायिनः (?) ॥४४॥ अक्षिगतो यथा किंशारुकादिः खेदकृत् । वधं शीर्षच्छेदं चार्हति । (विष्यः) नौवयोधर्मेति ($\frac{४।४।९१}{१६४३}$) यत् । (मुसल्यः) मुसलेन वध्य इत्यर्थः ॥ ४५ ॥ (शिश्विदानः) श्विदि श्वैत्ये, लिटः कानज्वा ($\frac{३।२।१०६}{३०९४}$)। अकृष्णं निष्पापत्वाच्छुक्लं कर्मास्याकृष्णकर्मा । चप्यते चपलः चप सान्त्वने । चिनोति चिकुरः, चकेर्वा रूपं, लक्ष्यं च–तां वीक्ष्य लीलाचतुरामनङ्गः स्वचापसौन्दर्यमदं मुमोच (कु. सं. १–४७) । चलाचले स्यात्तरलश्चापलश्चञ्चलश्चलः । दोष एकस्मिन्नेव दृग्ज्ञानमस्य, यत्कात्यः–दोषैकग्राहिहृदयः पुरोभागीति कथ्यते । पुरोऽग्रे भजते पूर्व[सूर्प] वत्पुरो-

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

2 Informer.
3 Mischiefmaker.
4 Destructive, mischievous.

४७ कर्णेजपः सूचकः स्यात्, पिशुनो दुर्जनः खलः ।
नृशंसो घातुकः क्रूरः पापो, धूर्तस् तु वञ्चकः ॥

2 Fraudulent; crafty.

6 Idiot.
5 Miser; avaricious.

४८ अज्ञे मूढ-यथाजात-मूर्ख-वैधेय-बालिशाः ।
कदर्ये कृपण-क्षुद्र-किम्पचान-मितम्पचाः ॥

5 Poor; indigent.
5 Beggar; mendicant.

४९ निःस्वस् तु दुर्विधो दीनो दरिद्रो दुर्गतोऽपि सः ।
वनीयको याचनको मार्गणो याचकाऽर्थिनौ ॥

2 Proud.
2 Happy.
1 Of divine origin.
1 Viviparous.

५० अहङ्कारवानहंयुः, शुभंयुस् तु शुभान्वितः ।
दिव्योपपादुका देवा, नृ-गवाऽऽद्या जरायुजाः ॥

भागी। निकृणोति हिनस्ति स्म निकृतः। (शठः) शठ कैतवे ॥ ४६ ॥ कर्णे जपति सूचयति कर्णेजपः, स्तम्बकयोरमि जपोः (३।२।१३६) इत्यच्। पेशयत्येकदेशेन सूचयति पिशुनः, पिश अवयवे, अपिश्यति खण्डयतीति श्रीभोजः। दुष्टो जनः, दुष्टं जनयति वा दुर्जनः। खं शून्यं लाति खलः, खलति चलति वा। नृञ्शंसति नृशंसः। हन्ति तच्छीलो घातुकः, लषपतपदेति (३।२।१५४) उकञ्। कुडः गतिकौटिल्ये (अस्मात्) क्रूरः, कृणाति वा। पिबति धर्मं पापः, पापं वास्त्यस्य। धूर्तते (धुर्वति स्म) धूर्तः ॥ ४७ ॥ मुह्यति मूढः। यथैव जातस्तथैव स्थितोऽसंस्कृतत्वाद्यथाजातः। मुह्यति मूर्खः, मुहेःखो मूर्च (उ० ७००)। विधाया भोजनस्यापत्यमिव वैधेयः, विधेयात्स्वार्थेऽण् वा। बाल्यते बालिशः, बाडृ आह्वाव्ये, बडिशाच्छेषेऽण् वा। मातृशासितश्च। यद्भविष्यो दैवपरः। कुत्सितोऽर्थः स्वामी कदर्यः। कल्पते कृपणः। क्षुद्यतेऽल्पत्वात्क्षुद्रः। किंचित्पचति किंपचानः, औणादिक आनच्। मितं पचति मितंपचः, मितनखे च (३।२।३४) इति पचः खच्। कीनाशोऽपि ॥ ४८ ॥ दुष्टा विधा प्रकारो भोजनं वास्य दुर्विधः। दीयते दीनः, दीङ् क्षये, स्वादय ओदितः (८।२।४५)। दुःस्थः कीकटश्च। (वनीयकः) वनु याचने। याचते याचनः, युच् कन्। मार्गति मार्गणः। अर्थयते तच्छीलोऽर्थी, अर्थाच्चासंनिहित इति (५।४।१००) इनिर्वा। तर्कु [र्क] कश्च ॥ ४९ ॥ अहमिति विभक्तिप्रतिरूपको निपातः, अहमस्त्यस्य-अहंयुः, अहंशुभमोर्युस् (५।२।१४०), निपातनान्मान्तत्वम्। दिवि भवा दिव्या उपपा [प]द्यन्ते दिव्योपपादुकाः, द्युप्रागपागिति (४।२।१०१) यत्, लषपतपदेत्युकञ् (३।२।१५४)। अदृष्टसंहतेभ्यः परमाणुभ्यो जायन्ते सद्य इत्यर्थः। अयोनिजत्वार्थं पुनरिहोक्ताः। नरो

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

1 Engendered by damp. ५१ स्वेदजाः कृमि-दंशाऽऽद्याः, पक्षि-सर्पाऽऽदयोऽण्डजाः ।
1 Oviparous.

इति प्राणि-वर्गः, अत्र मूल श्लोकाः ५०॥ क्षे. श्लो. ०

1 Vegetables. उद्भिदस् तरु-गुल्माऽऽ द्या, उद्भिदुद्भिज्जमुद्भिदम् ।
3 Sprouting ; germinating.

17 Beautiful or pleasing. ५२ सुन्दरं रुचिरं चारु सुषमं साधु शोभनम् ।
कान्तं मनोरमं रुच्यं मनोज्ञं मञ्जु मञ्जुलम् ॥
'रम्यं मनोहरं सौम्यं भद्रकं रामणीयकम् ।' । १ ।

1 Charming. ५३ तदासेचनकं तृप्तेर् नास्त्यन्तो यस्य दर्शनात् ।

6 Beloved, desired. अभीष्टे ऽभीप्सितं हृद्यं दयितं वल्लभं प्रियम् ॥

13 Inferior ; low. ५४ निकृष्ट-प्रतिकृष्टाऽर्व-रेफ-याप्याऽवमाऽधमाः ।
कुपूय-कुत्सिताऽवद्य-खेट-गर्ह्याऽणकाः समाः ॥

गोमहिष्याद्याश्च जरायुजाः, जरायुर्गर्भशय्या ॥ ५० ॥ आद्यशब्दान्मशकयूकाद्याः । आदिशब्दः प्रकारे व्यवस्थायां वा पिपीलिकाद्यर्थः । आद्यशब्दात्तृणाद्याः । उद्भिनत्ति भुवमुद्भित्–उद्भिदं च, क्विप्, कश्च । उद्भेदनमुद्भित्ततो जायत इत्युद्भिज्जं, डः । इत्थमयोनिजजरायुजस्वेदजाण्डजोद्भिज्जत्वेन पञ्चधा भूतसर्गः । एषामेवा (वा)न्तरभेदाच्चतुर्दशविधत्वं, यदाहुः–अष्टविकल्पो दैवस्तिर्यग्योनिश्च पञ्चधा भवति । मानुष्य एकविधः स समासाद् भौतिकः सर्गः ॥ पैशाचो राक्षसो याक्षो गान्धर्वः शाक्र एव च । सौम्यश्च प्राजापत्यश्च ब्राह्मोऽष्टौ देवयोनयः (?) ॥५१॥ सुन्दरं सुष्ठु नन्दयतीति नैरुक्ताः । रोचते रुचिरं, रुचिं राति वा । चरति मनोऽस्मिंश्चारु । सुष्ठु सप्तं शोभना समात्रेति वा सुषमं, लक्षणया चारु । साध्नोति साधु । शोभते शोभनं, युच् । काम्यते कान्तम् । रोचते रुच्यं, राजसूयसूर्यमृषोद्यरुच्येति (३।१।११४ / २८६५) कर्तरि साधुः । जानातीति ज्ञं, इगुपधज्ञेति (३।१।१३५ / २८९७) कः, मन एव ज्ञं यत्र तन्मनोज्ञम् । सर्वैर्मन्यते मञ्जु, धर्मि । (मञ्जुलं) धर्ममात्रवृत्त्या तु मत्वर्थीयो लः श्यामलपिङ्गलादिवत् । हारि वल्गु मनोहारि च ॥ ५२ ॥ आसिच्यत आप्याय्यते दृगनेन–आसेचनकं, यस्य दर्शनाद् दृग् न तृप्यति । आभिमुख्येनेष्यतेऽभीष्टम् । अभ्याप्तुमिष्टमभीप्सितम् । हृदयस्य प्रियं हृद्यं, हृदयस्य प्रिय इति (४।४।९५ / २६४७) यत्, हृदयस्य हृल्लेखेति (६।३।५० / ९८८) हृत् । दयते चित्तमादत्ते दयितम् । (वल्लभं) वल्लेति सौत्रः प्रीत्यर्थः । प्रीणाति प्रियं, कः ॥५३॥ निकृष्यते निकृष्टः । एवं प्रतिकृष्टः । अर्वत्यर्वा । रिफति हिनस्ति रेफः । यापिता गुणा अस्माद्याप्यः, जपादित्वाद्वत्वे (७।४।८६ / २६३८) याव्योऽपि । अधोभवोऽवमः । अधोभवोऽधमः, अवोधसोर्लोपश्च (६।४।२९ / ३२८७) इति मः सलोपश्च । कुत्सितं पूयते कुपूयः । नोद्यते-

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

4 Foul, dirty.
3 Purified.
2 Clean.

५५ मलीमसं तु मलिनं कच्चरं मलदूषितम् ।
पूतं पवित्रं मेध्यं च, वीध्रं तु विमलाऽर्थकम् ॥

5 Cleansed.
2 Pithless.
4 Void, empty.

५६ निर्णिक्तं शोधितं मृष्टं निःशोध्यमनवस्करम् ।
असारं फल्गु, शून्यं तु वशिकं तुच्छ-रिक्तके ॥

17 Chief; principal.

५७ क्लीबे प्रधानं प्रमुख-प्रवेकाऽनुत्तमोत्तमाः ।
मुख्य-वर्य-वरेण्याश् च प्रवर्हो ऽनवरार्ध्य-वत् ॥

5 Excellent.

५८ परार्ध्याऽग्र-प्राग्रहर-प्राग्र्याऽग्र्याऽग्रीयमग्रियम् ।
श्रेयान् श्रेष्ठः पुष्कलः स्यात् सत्तमश् चाऽतिशोभने ॥

7 Pre-eminent (in comp).

५९ स्युरुत्तर-पदे व्याघ्र-पुङ्गव-र्षभ-कुञ्जराः ।
सिंह-शार्दूल-नागाऽऽद्याः पुंसि श्रेष्ठाऽर्थ-गोचराः ।

वद्यः, अवद्यपण्यवर्या गर्ह्येति ($\frac{३।१।१०१}{२८४९}$) साधुः । खेटति त्रस्यतीति खेटः, खिट उत्त्रासने । अणति रटतीत्यणकः, अचू कुत्सायां कन् (कुत्सिते) । कट्वरोऽपि ॥ ५४ ॥ (मलिनं, मलीमसं) मलोऽस्त्यस्येति, ज्योत्स्नातमिस्रेति ($\frac{५।२।११४}{१९२२१}$) साधुः । कुत्सितं चरति कच्चरम् । म्लानं कल्मषं च । पुनाति पूतम् । पूयतेऽनेनेति पवित्रम् । मेधनीयं मेध्यं, मेधायां साधु वा । विशेषेणेन्द्धे वीध्रं, रक् ॥ ५५ ॥ (निर्णिक्तं) णिजिर् शौचे । (मृष्टं) मृज् (प्) शुद्धौ । निष्क्रान्तं शोध्यान्निःशोध्यम् । अविद्यमानोऽवस्करो वर्चस्कोऽस्यानवस्करम् । फलति विशीर्यते फल्गु, जिफला विशरणे । शुने हितं शून्यं शुन्यं च, उगवादिभ्यो यत् ($\frac{५।१।२}{१६६३२}$) इत्यत्र शुनःसंप्रसारणं वा च दीर्घत्वम् (ग० ९६) । उश्यते काम्यतेऽनावृतत्वाद्वशिकम् । तुद्यते स्म तुच्छम् । रिच्यते रिक्तं, रिच वियोजने ॥ ५६ ॥ प्रधीयते प्रधानम् । प्रकृष्टं मुखमस्य प्रमुखः । प्रकृष्टो वेकः पृथक्त्वमस्य प्रवेकः । नास्त्युत्तमोऽस्मादनुत्तमः । अतिशयेनोद्गत उत्तमः । मुखमिव मुख्यः, शाखादिभ्यो यः ($\frac{५।३।१०३}{२०५८}$) । वरणीयो वर्यः । व्रियते वरेण्यः, वृञ एण्यः (उ० ३७८) । प्रकृष्टो वर्हः परिच्छदोऽस्य (प्रवर्हः), बृह वृद्धौ वर्ह प्राधान्ये वा, प्रबृहत्युद्यच्छते वा प्रवर्हः, बृह उद्यमे । अनवरार्धे मुख्ये भागे भवोऽनवरार्ध्यः ॥ ५७ ॥ परार्धे भवः परार्ध्यः, परावराधमोत्तमपूर्वाच्चेति ($\frac{४।३।५}{१३७८}$) यत् । अगति न गच्छति वा—अग्रं [ग्रः] । प्रकृष्टमग्रं हरति प्राग्रहरः । प्राग्रे भवः प्राग्र्यः । (अग्र्यः, इ०) अग्राद्यत् ($\frac{४।४।११६}{३४६३}$), घच्छौ च ($\frac{४।४।११५}{३४६३}$) । अग्रणीर्ग्रामणीः शालीवरश्च । (श्रेयान्, इ०) अतिशयेन प्रशस्यः, इष्ठन्नीयसुनौ, प्रशस्यस्य श्रः ($\frac{५।३।६०}{२००९}$) । पुष्यति पुष्कलः । अतिशयेन सन् सत्तमः ॥ ५८ ॥ पुरुषो व्याघ्र इव शूरः पुरुषव्याघ्रः, गोनागः । आद्यशब्दान्मुखचन्द्रपादपद्माद्याः, उपमितं व्याघ्रादिभिः ($\frac{२।१।५६}{७३५८}$) इति समासः । श्रेष्ठस्यार्थो

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh

3 Secondary, subordinate.
9 Great.

६० अप्राग्र्यं द्वय-हीने द्वे अप्रधानोपसर्जने ।
विशंकटं पृथु बृहद् विशालं पृथुलं महत् ॥

4 Fat; large.
11 Little, small.

६१ वड्रोरु-विपुलं, पीन-पीन्नी तु स्थूल-पीवरे ।
स्तोकाऽल्प-क्षुल्लकाः, सूक्ष्मं श्लक्ष्णं दभ्रं कृशं तनु ॥

5 Very small.

६२ स्त्रियां मात्रा त्रुटिः पुंसि लव-लेश-कणाऽणवः ।
अत्यल्पे ऽल्पिष्ठमल्पीयः कनीयोऽणीय इत्यपि ॥

12 Much, many.

६३ प्रभूतं प्रचुरं प्राज्यमदभ्रं बहुलं बहु ।
पुरुहूः पुरु भूयिष्ठं स्फारं भूयश् च भूरि च ॥

1 Countless.

६४ परःशताऽऽद्यास् ते येषां परा संख्या शताऽऽदिकात् ॥

गोचरो विषय एषाम् ॥ ५९ ॥ उपसृज्यते नियुज्यत उपसर्जनं, आविष्टलिङ्गत्वात्क्लीबे, यथा–उपसर्जनं भार्या । अप्राग्र्यस्तु वाच्यलिङ्गः । उपाग्रं च । विशी (स्ती)-र्यते विशंकटः, वेःशालच्शङ्कटचौ ($\frac{५।२।२८}{१८२९}$)। प्रथते पृथुः । गुणमात्रवृतेर्लः (पृथुलः) । बृंहते (बर्हति) बृहत् । महति महत्, वर्तमाने पृषद्बृहन्महदिति (उ० २४१) निपात्यते ॥ ६० ॥ वलते वड्रम् । अवते–उरु, उङ् शब्दे । विपोलति विपुलं, पुल महत्त्वे, किः । विकटं च । प्यायते पीनः, क्तः, प्यायःपी ($\frac{६।१।२८}{३०७२}$), ओदितश्च ($\frac{८।२।४५}{३०१९}$) इति निष्ठा नत्वम् । (पीवन्, पीवरं) क्वनिप् क्वरप् च । (स्थूलं) स्थूल परिबृंहणे । घनो बहलश्च । स्तौति स्तोकम् । अल्यते–अल्पम् । क्षुद्यते क्षुल्लः । सुष्ठु–उक्ष्यत आप्याय्यते सूक्ष्मम् । दभ्यते दभ्रम् । (कृशं) कृश तनूकरणे । तन्यते तनु ॥ ६१ ॥ मीयतेऽल्पत्वान्मात्रा । त्रुटति त्रुटिः । लूयते लवः । लिश अल्पीभावे, लिश्यते लेशः । कणति निमीलति कणः । अणत्यणुः । अतिशयेनाल्पं (अल्पीय इ०), इष्ठन्नीयसुनौ । (कनीयः) युवाल्पयोःकन्नन्यतरस्याम् ($\frac{५।३।६४}{२०१९}$)। अतिशयेनाणु–अणीयः, तुरिष्टेमेयस्सु ($\frac{६।४।१५४}{२००८}$), टेः ($\frac{६।४।४३}{३१६}$) इति टेर्लोपः ॥ ६२ ॥ प्रभवति प्रभूतम् । प्रचीयते प्रचोर्यते वा प्रचुरम् । प्राज्यते प्राज्यं, प्रकर्षेऽऽणाजी (वी) यते वा । न दभ्रमदभ्रम् । बंहते बहु । (बहुलं) प्रागान्मत्वर्थीयो लः । पूर्वते पुरु । पुविति हूयते पुरुहु । अतिशयेन बहु भूयिष्ठं, बहोर्लोपो भू च बहोः ($\frac{६।४।१५८}{२०१७}$), इष्ठस्य यिट् च ($\frac{६।४।१५९}{२०१८}$) इति भूरादेशो यिडागमश्च । स्फायते स्फिरम् । भवति भूरि ॥ ६३ ॥ शतात्परं परःशतं (परःशता अपि), यत–ब्रह्मर्षयो ब्रह्महिताय तप्त्वा परःसहस्राः शरदस्तपांसि (उ० रा० १. १५), पारस्करादित्वात्सुट् । श्रीभोजस्तु परःशब्दं निपातं मन्यते, यथा परोवरः, परोक्षम् ॥ ६४ ॥(गणेयं)

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh

2 Numerable.
2 Numbered, counted.
14 All ; entire.

६५ गणनीये तु गणेयं, संख्याते गणितमथ समं सर्वम् ।
विश्वमशेषं कृत्स्नं समस्त-निखिलाऽखिलानि निःशेषम् ।

3 Coarse.
3 Delicate, fine.

६६ समग्रं सकलं पूर्णमखण्डं स्यादनूनके ।
घनं निरन्तरं सान्द्रं, पेलवं विरलं तनु ॥

15 Near, proximate.

६७ समीपे निकटाऽऽसन्न-संनिकृष्ट-सनीड- वत् ।
सदेशाऽभ्याश-सविध-समर्याद-सवेश-वत् ॥

3 Adjoining, contiguous.

६८ उपकण्ठाऽन्तिकाऽभ्यर्णाऽभ्यग्रा अप्यभितोऽव्ययम् ।
संसक्ते त्वव्यवहितमपदान्तरमित्यपि ॥

2 Very near.
3 Distant.
3 Very remote.
2 Long.

६९ नेदिष्ठमन्तिकतमं, स्याद् दूरं विप्रकृष्टकम् ।
दवीयश् च दविष्ठं च सुदूरं, दीर्घमायतम् ॥

उणादौ गणेरेयः । (गणितं) कर्मणि क्तः । समति समं सर्वार्थे सर्वनाम, यथा–सूर्यः समेषां समः (स. कं. १।११२) । सर्वति सरति वा सर्वम् । वेवेष्टि विश्वम् । नास्ति शेषमस्याशेषम् । कृती वेष्टने, कृत्यते व्याप्यतेऽनेन कृत्स्नम् । समस्यते–एकीक्रियते समस्तम् । निवृत्तं खिलाच्छून्यान्निखिलम् । नास्ति खिलमस्याखिलम् । निष्क्रान्तं शेषान्निःशेषम् ॥ ६५ ॥ संगतमग्रमस्य समग्रं, समं ग्रसते वा । सह कलाभिर्भागैर्वर्तते सकलम् । न खण्डं भिन्नमखण्डम् । पिपर्ति पूर्वति वा पूर्वम् । पूर्णमित्येके । आदिशब्दादभिन्नादि । नास्त्यूनमस्यानूनम् । (घनं) मूर्तौ घनः ($\frac{३।३।७७}{३२५४}$) इति साधुः । निर्गतमन्तरं व्यवधानमस्य निरन्तरम् । सहान्द्यते बध्यते सान्द्रम् । निबिडं निविरीशं (सं) गाढं [निरन्तरे] च । पेल्यते क्षिप्यते पेलवम् । विरात्यन्तरं विरलम् । तन्यते तनु । शिथिलं श्लथं च ॥ ६६ ॥ संभूता आपोऽत्रेत्युपचारात्समीपं, द्व्यन्तरुपसर्गेभ्योऽप ईत् ($\frac{६।३।९७}{६४२}$) । निबध्नाति निकटं, संप्रोदश्चेति ($\frac{५।२।२९}{१८३०}$) कटच् । आसीदति स्मासन्नः । संनिकृष्यते स्म संन्निकृष्टः । समानं नीडमस्य सनीडं, सविधसनीडसमर्यादसवेशसदेशेषु सामीप्ये ($\frac{६।२।२३}{३७५७}$) इति सामीप्यं लक्षणयाऽत्र । समानो देशोऽस्य सदेशः । अभ्यस्यतेऽवाप्यतेऽभ्यासः । (सविध इ०) समाना विधा मर्यादा वेशश्चास्य ॥ ६७ ॥ कण्ठस्य समीपमुपकण्ठम् । अन्तोऽस्यास्तीत्यन्तिकः । अभ्यर्च्यतेऽभ्यर्णः, अभेश्चाविदूर्ये ($\frac{७।२।२५}{३०६७}$) इतीडभावः । अभिमुखमग्रमस्याभ्यग्रम् । अमित इति निपातः, अभेस्तसिर्वा । नास्ति पटेन तिरस्करिण्यान्तरं व्यवधात्रापटान्तरम् ॥ ६८ ॥ अतिशयेनान्तिकं नेदिष्ठं, नेदीयोऽपि, अन्तिकबाढयोर्नेदसाधौ ($\frac{५।३।६३}{२०१४}$) । दूयतेऽत्र दूरम् । अतिशयेन दूरं दवीयः, स्थूलदूरेति ($\frac{६।४।१५६}{२०१५}$) यणादि परं लुप्यते पूर्वस्य च गुणः । दृणाति दीर्घम् । आयम्यते आयतं, आयतते वा

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh

3 Round.
2 Uneven. wavy.
6 High, tall.
3 Bending, stooping.
11 Crooked.

७० वर्तुलं निस्तलं वृत्तं, बन्धुरं तून्नतानतम् ।
उच्च-प्रांशून्नतोदग्रोच्छ्रितास् तुङ्गे, ऽथ वामने ॥ 5 Short.

७१ न्यङ्-नीच-खर्व-ह्रस्वाः स्युरवाग्रेऽवनताऽऽनतम् ।
अरालं वृजिनं जिह्ममूर्मिमत् कुञ्चितं नतम् ॥

3 Straight.
3 Confounded.

७२ आविद्धं कुटिलं भुग्नं वेल्लितं वक्रमित्यपि ।
ऋजावजिह्म-प्रगुणौ, व्यस्ते त्वप्रगुणाऽऽकुलौ ॥

5 Eternal.
3 Permanent, firm.
1 Uniform; perpetually the same.
6 Moveable.
2 Immoveable.

७३ शाश्वतस् तु ध्रुवो नित्य-सदातन-सनातनाः ।
स्थास्नुः स्थिरतरः स्थेयानेक-रूप-तया तु यः ॥

७४ काल-व्यापी स कूटस्थः, स्थावरो जङ्गमेतरः ।
चरिष्णु जङ्गम-चरं त्रसमिङ्गं चराचरम् ॥

॥ ६९ ॥ वर्तते भ्रमति वर्तुलम् । निर्गतं तलं प्रतिष्ठाऽस्य निस्तलं, भूमौ नास्ते तत्र वा रजो न तिष्ठति । बध्नाति गतिं बन्धुरम् । (उन्नतानतं) उन्नतं सदुपाधिवशादीषन्नतं, यथा—कण्ठस्य तस्याः स्तनबन्धुरस्य (कु० सं० १।४२) । उच्चीयत उच्चम्, डः, उदश्चो वा, आजपराचादिवत्-मयूरव्यंसकादिर्वा (२।१।७३ / ७५४) । प्राश्नुते प्रांशु । उन्नमति स्मोन्नतम् । ऊर्ध्वमग्रमस्योदग्रम् । ऊर्ध्वं श्रयति स्मोच्छ्रितम् । तुङ्गत्यादत्ते तुङ्गम् । उत्तुङ्गमुध्दुरं च । वमति वामोऽस्त्यस्य वा वामनः ॥ ७० ॥ नियतमञ्चति न्यक् । निम्नं चीयते नीचं, नीचैर्विद्यतेऽस्य वा । खर्वति खर्वः । ह्रसति ह्रस्वः । अवनतमग्रमस्यावाग्रं, अधोमुखमित्यर्थः । अवनमति स्मावनतम् । आनमति स्मानतम् इयर्ति– अराः सन्ति वाऽस्य– अरालम् । वर्ज्यते वृजिनम । जी (ही) यते जहाति वा जिह्मम् । (उर्मिमत्) ऊर्मयो भङ्गाः सन्त्यस्य । (कुञ्चितं) कुञ्च गतिवैकल्ये । नमति स्म नतम् ॥ ७१ ॥ आविध्यत आविद्धम् । भुजो कौटिल्ये, भुग्नम् । वेल्लति वेल्लितम् । वञ्चति वक्रं रक् । भङ्गुरं च । इयर्ति ऋज्यते वा ऋजुः । प्रकृष्टो गुणोऽस्य सदृशो गुणेन सौर्य्या वा प्रगुणः । व्यस्यते विपर्यस्यते स्म व्यस्तम् । आकोलत्येकीभवति– आकुलम् ॥ ७२ ॥ शश्वद्भवः शाश्वतः, अव्ययानां भमात्रे टिलोपः (वा० ४।१।८७ / १।३।२४), आराच्छश्वतोर्नेष्यते (इ०) । शाश्वतिकोऽपि । ध्रुव, ध्रुव स्थैर्ये । नियतं भवं नित्यं, त्यदनेर्ध्रुवे (वा० २।७।८० / १।३।२४) इति त्यप् । (सदातन इ०) सदाभवः सनाभवश्चेति, सायं चिरमिति (४।३।२३ / १।३।९१) ट्युट् तुट् च । तिष्ठति तच्छीलः स्थास्नुः, ग्लाजिस्थश्च ग्स्नुः (३।२।१७५ / ३।१।१९) । अतिशयेन स्थिरः स्थेयान्, प्रियस्थिरेति (६।४।१५७ / २०१६) स्थादेशः ॥ ७३ ॥ एकरूपो निर्विकारः । निरवधिं कालं व्याप्नोति स्थिरत्वात् (कालव्यापी) । कूटेनाचलत्वेन तिष्ठति कूटस्थः, आत्माकाशादिः । तिष्ठति तच्छीलः स्थावरः शैलादिः, स्थेशभासेति (३।२।१७५ / ३।१।१९)

CC-0. Agamnigam Foundation. Digitized by eGangotri

3 Shaking. moving. ७५ चलनं कम्पनं कम्प्रं, चलं लोलं चलाचलम् ।
7 Fickle. चञ्चलं तरलं चैव पारिप्लव-परिप्लवे ॥

2 Exceeding. ७६ अतिरिक्तः समधिको, दृढसंधिस् तु संहतः ।
2 Strong knit.
9 Hard; solid. खक्खटं कठिनं क्रूरं कठोरं निष्ठुरं दृढम् ॥

2 Material, corporeal. ७७ जरठं मूर्तिमन् मूर्तं, प्रवृद्धं प्रौढमेधितम् । 3 Full-grown.
5 Old, ancient. पुराणे प्रतन-पत्न-पुरातन-चिरन्तनाः ॥

7 New. ७८ प्रत्यग्रो ऽभिनवो नव्यो नवीनो नूतनो नवः ।
4 Soft. नूत्नश् च, सुकुमारं तु कोमलं मृदुलं मृदु ॥

4 Following. ७९ अन्वगन्वक्षमनुगे ऽनुपदं क्लीबमव्ययम् ।
2 Perceptible.
2 Imperceptible प्रत्यक्षं स्यादैन्द्रियकमप्रत्यक्षमतीन्द्रियम् ॥

वरच् । जङ्गमात्प्राणिनोऽन्यः (जङ्गमेतरः) । (चरिष्णुः) चरेस्ताच्छील्ये-इष्णुच् । भृशं गच्छति जङ्गमः, अकौटिल्येऽप्यभिधानाद्यङ् (ज्ञा० (?)) । (चरं) (चरेरचि) चरिचलिपतीति (वा० $\frac{३४३०}{३८९६}$) वा द्विर्भाव आगागमश्च । त्रस्यति चलत्वात्त्रसम् । इङ्गतीङ्गं, इगि गत्यर्थः ॥ ७४ ॥ चलति तच्छीलश्चलन, चलन-शब्दार्थाद्युच् ($\frac{३।२।१४८}{३१२८}$) । (कम्पनः) कम्पते तच्छीलः, युच् । (कम्प्रः) नमिकम्पीति ($\frac{३।२।१६७}{३१४७}$) रश्च । लुड विलोडनेऽस्माल्लोलम् । (चलाचलं) चरिचलीति (वा० $\frac{३४३०}{३८९६}$) द्वित्वमागागमश्च ॥ ७५ ॥ अतिरिच्यतेऽतिरिक्तः । सम्यगध्युपरिभवः समधिकः । संहन्यते स्म संहतोऽच्छिद्रः । सक्ख हसने, कक्खटमित्येके । (कठिनं, कठोरं) कठ कृच्छ्रजीवनेऽस्मादिनच्-ओरश्चौरणादिकौ । कृणाति क्रूरम् । नियतं तिष्ठति निष्ठुरम् । (दृढं) दृह वृद्धौ, क्ते, दृढो बलवति साधुः । दृढःस्थूलबलयोः ($\frac{७।२।२०}{३०६०}$) ॥ ७६ ॥ जीर्यति जठरम् । मूर्च्छति मूर्तम् । नवैकार्था इत्येके । प्रोह्यते स्म प्रौढम्, प्रादूहोढोढिश्चिति (वा० $\frac{३६०५}{७३}$) वृद्धिः । (एधितं) एध वृद्धौ । पुरापि नवं (भवं) पुराणम्, नश्चपुराणे (वा० $\frac{३३२८}{३०९३}$) । (प्रतनं इ०) पुरात्-त्नतनौ प्रादेशश्च भवार्थे (नश्चपुराणे प्रात्) । पुराभवं चिरंभवं, सायंचिरमिति ($\frac{४।३।२३}{१३९१}$) ट्युट् तुट् च, निर्देशान्मान्तत्वम् ॥ ७७ ॥ प्रतिनवमग्रमस्य प्रत्यग्रः । अभीनूयतेऽभिनवं, णु स्तुतौ । नव एव नव्यः । (नवीन इ०) नवस्यनूभावे त्नप् तनप् खाश्च प्रत्ययाः (वा० $\frac{३३२७}{३०९३}$) यच्च । सद्यस्कश्च । सुष्ठु कुत्सितं म्रियते म्लायति वा सुकुमारं, कुमार क्रीडायामित्यस्माद्वा । मृद्यते मृदु । (मृदुलं) गुणमात्रवृत्तित्वे लच् ॥ ७८ ॥ अन्वञ्चत्यन्वक्- कान्तोऽव्ययत्वात्प्रागादिवत् अक्षस्य पश्चादन्वक्षम्, अक्षेण रथो लक्ष्यते । पदस्य क्रमस्य पश्चापदनुपदं, पश्चादर्थेऽव्ययीभावः । अनुगच्छत्यनुगं, डः । तत्रैतत्त्रयं (अन्वक्, अन्वक्षं, अनुपदं च) अव्ययं वर्तते, क्लीबत्वं तु द्वयोः (अन्वक्षं)

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh

7 Closely attentive. ८० एकतानो ऽनन्यवृत्तिरैकाग्र्यैकायनावपि ।
अप्येकसर्ग एकाग्र्यो ऽप्येकायनगतोऽपि सः ॥

5 Prior; first; initial. ८१ पुंस्यादिः पूर्व-पौरस्त्य-प्रथमाऽऽद्या, अथाऽस्त्रियाम् ।
6 Last, ultimate. अन्तो जघन्यं चरममन्त्य-पाश्चात्य-पश्चिमाः ॥

2 Vain, useless. ८२ मोघं निरर्थकं, स्पष्टं स्फुटं प्रव्यक्तमुल्बणम् । 4 Apparent, evident.
2 Common. साधारणं तु सामान्यमेकाकी त्वेक एककः ॥
3 Alone, solitary.

6 Other, different. ८३ भिन्नाऽर्थका अन्यतर एकस् त्वो ऽन्येतरावपि ।
2 Various. उच्चावचं नैकभेदमुच्चण्डमविलम्बितम् ॥
2 Quick, expeditious.

अनुपदं च)। अक्षिणी प्रतिगतं प्रत्यक्षं अत्यादयःक्रान्ताद्यर्थे द्वितीयया (वा०-$\frac{१३३६}{७८०}$) इति समासः। इन्द्रियेषु भवमैन्द्रियकम्। अक्षेष्वधिकृतमध्यक्षं,तदतिक्रान्तमत्यध्यक्षम् ॥७९॥ एकं तननमविच्छिन्नो विस्तारोऽस्यैकतानः। अनन्यैकरूपा वृत्तिर्व्यापारोऽस्यानन्यवृत्तिः। एकमग्रं पुरोगतं ज्ञेयमस्यैकाग्रः,स्वार्थेऽण् वा। एकमयनं गतिरस्यैकायनः। एकः सर्गो निश्चयोऽस्यैकसर्गः। एकमयनं गतः (एकायनगतः) ॥ ८० ॥ आदीयते प्रथममित्यादिः, धर्मिवृत्तित्वेऽप्यजहल्लिङ्गं, यथा– आदिर्गर्गकुलम्। धर्मवृत्तित्वे भवे यत्, आद्यो वाच्यलिङ्गः– अन्त्यवत्। पूर्वति पूर्वः। पुरो भवः पौरस्त्यः 'दक्षिणापश्चात्पुरसस्त्यक् ($\frac{४।२।९८}{१३१८}$)। प्रथते प्रथमः। आदिमोऽग्निमश्च। अमत्यन्तः, धर्म-(र्मि) वृत्तित्वेऽप्यस्त्रीलिङ्गः, यथा– कुलस्यान्तः प्रभु स्त्रियः (?)। जघने भवो जघन्यः, दिगादिभ्यो यत् ($\frac{४।३।५४}{१४२९}$)। चरति चरमः। पश्चाद्भवः पाश्चात्यः–पश्चिमः, दक्षिणापश्चात्पुरसस्त्यक् ($\frac{४।२।९८}{१३१८}$), अग्रादिपश्चाड्डिमच् ($\frac{४।४।२१६}{३४६२}$)। अन्तिमोऽपि ॥ ८१ ॥ मुह्यन्त्यस्मिन्मोघः, न्यङ्क्वादित्वात् ($\frac{७।३।५३}{३८६४}$) कुत्वम्। (स्पष्टं) स्पश बाधनस्पर्शनयोः। स्फुटति बहिः प्रकाशते स्फुटम्। प्रकृष्टं व्यज्यते स्म प्रव्यक्तम्। उद्वणत्युल्वणं, पृषोदरादित्वात् ($\frac{६।३।१०९}{१०३४}$) पक्षे लः। एतौ पूर्वत्र संबध्नंति। उद्धतमुत्कटमुद्रिक्त च। समानमाधारणमस्य साधारणम्। समानं मानमस्य सामान्यं, भावे (स्वार्थे) ष्यञ्। (एकाकी, इ०) एकादाकिनिश्चासहाये ($\frac{५।३।५२}{१९९८}$), चात्कन्–लुकौ च ॥ ८२ ॥ भिन्न इत्यर्थे। त्वोऽन्यार्थः सर्वनाम, यथा– उत त्वः पश्यन्न ददर्श वाचं [च्यं] (ऋ. वे. १०–७१–४०)। ऐष्येकः, यथा–इत्येके मन्यन्ते, (कौ. सू. २१७)यत्कात्यः– प्रधानान्यासहायेषु संख्यायां चैक ईष्यते। अनित्यन्यः, अघ्न्यादि (उ० ५५१)। (अन्यतरः) तरप्स्वार्थे–अल्पाच्तरवत् ($\frac{२।२।३४}{९०५}$)। एति– इतरः। उदक्चावाक्चोच्चावचं, उन्नतं चावनतं च वा, मयूरव्यंसकादिः ($\frac{२।१।७२}{७५४}$)। नैकशब्दः सुप्सुपेति ($\frac{२।४।७१}{६५०}$) समासात्, नानाप्रकारमित्यर्थः। उच्चण्डते– उच्चण्डम्। अवलम्बतेऽवलम्बित [म्बन] म्। अत एव उच्चण्डं जानु-

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh

2 Sharp, corrosive.
2 Unobstucted.
4 Contrary.

८४ अरुन्तुदस् तु मर्मस्पृगबाधं तु निरर्गलम् ।
प्रसव्यं प्रतिकूलं स्यादपसव्यमपष्ठु च ॥

1 Left.
1 Right,
2 Narrow.
2 Impervious.

८५ वामं शरीरं सव्यं स्यादपसव्यं तु दक्षिणम् ।
संकटं ना तु संबाधः, कलिलं गहनं समे ॥

3 Crowded, confused.
3 Strung; tied.
3 Spread; diffuse.

८६ संकीर्णे संकुलाऽऽकीर्णे, मुण्डितं परिवापितम् । 2 Shaved.
ग्रन्थितं संदितं दृब्धं, विसृतं विस्तृतं ततम् ॥

2 Forgotten.
2 Placed.
6 Shaken.

८७ अन्तर्गतं विस्मृतं स्यात्, प्राप्त-प्राणिहिते समे ।
वेल्लित-प्रेङ्खिताऽऽधूत-चलिताऽऽकम्पिता धुते ॥

7 Thrown, cast, sent.
2 Intrenched.
2 Stolen.

८८ नुत्त-नुन्नाऽस्त-निष्ठ्यूताऽऽविद्ध-क्षिप्तेरिताः समाः ॥
परिक्षिप्तं तु निवृत्तं, मूषितं मुषिताऽर्थकम् ॥

लम्बि चेति पेठुः । केचित्त्वविलम्बितमित्याशुकार्यमाहुः, उच्चण्डमुत्तालमिति हि सभ्याः ॥ ८३ ॥ अरूंषि तुदत्यरुंतुदं, विध्वरुषोस्तुदः ($\frac{३।२।३५}{२६५०}$) इति खच् - (मर्मस्पृक्) स्पृश उपतापे, मर्मव्यथकमित्यर्थः । निष्क्रान्तमर्गलाया निरर्गलमानयन्त्रणम् । उद्दाममुच्छृङ्खलं च । (प्रसव्यं, अपसव्यं) प्रगतं– अपगतं सव्याद्वामादित्यर्थः, सव्यशब्दो हि– आराच्छब्दवद्वामदक्षिणार्थः । प्रतीपं कूलात्प्रतिकूलं, लक्षणया विरुद्धार्थं प्रतिलोमवत् । अपतिष्ठत्यपष्ठु, कुः, सुषामादित्वात् ($\frac{८।३।९८}{२०२२}$) षत्वम् । विपरीतं विलोमं च ॥ ८४ ॥ वम्यते वामम् । सूयते सव्यं, षु प्रसवे । शरीर इत्येव । अपक्रान्तं सव्यादपसव्यम् । दक्षिणं, दक्ष वृद्धौ । संकटत्यावृणोति संकटं, संप्रोदश्चकटश्चा ($\frac{५।२।२०}{१८३०}$), विशेष्यलिङ्गम् । पुंलिङ्गस्तु संघट्टाद्वाध्यन्तेऽस्मिन् संबाधः। कल्यते क्षिप्यतेऽत्रान्यत्कलिलम् । गाह्यते व्याप्यत्वाद्गहनम् ॥ संकीर्यते संकीर्णं निरन्तरं व्याप्तम् । संकोलति निरन्तरीभवति संकुलम् । एतान्पूर्वत्र संबाध्नन्ति व्याप्त्यर्थत्वात् । (मुण्डितं) मुडि खण्डने । (परिवापितं) परिपूर्वो वपिर्मुण्डनार्थः यथा–मद्रात्परिवापणे ($\frac{५।४।६७}{२१३८}$)। संहितं दितं यत्रेति संदितं दोऽवखण्डने । संदानितं संयमितं बद्धं निगडितं च । दृब्धं, दृभी ग्रन्थे । विसरति स्म विस्तीर्यते स्म तन्यते स्म (विसृतं, इ०) ॥ ८६ ॥ स्मृतेर्व्यवहितमन्तर्गतम् । प्राणीधीयते स्म प्रणिहितम् । (वेल्लितं) वेल्ल चलने । (प्रेङ्खितं) इखि गत्यर्थः । धूञ् धुञ् वेत्युभयः पाठः । प्रेङ्खोलितस्तरलितो लुलितान्दोलुलितावपि ॥ ८७ ॥ (नुत्तं, नुन्नं), नुदविदेति ($\frac{८।२।५६}{२०३८}$) वा निष्ठा नत्वम् । अस्यते स्माऽस्तम् । निष्ठीव्यते स्म निष्ठ्यूतम् । आविध्यते स्माऽविद्धम् । परिक्षिप्यते समन्ताद्वेष्टयते स्म परिक्षिप्तम् । नियतं व्रियते स्म निवृतम् । परीतं परिवेष्टितं वलितं परिकृतं परिचारितं च । मुषिः क्र्यादिः,

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh

2 Expanded; dispersed.
८९ प्रवृद्ध-प्रसृते, न्यस्त-निसृष्टे, गुणिताऽऽहते ।
2 Deposited. 2 Multiplied.

2 Plaistered.
2 Hidden.
निदिग्धोपचिते, गूढ-गुप्ते, गुण्ठित-रूषिते ॥
2 Pounded.

2 Melted.
2 Raised, held up.
2 Smelled.
2 Smeared; anointed.
९० द्रुताऽवदीर्णे, उद्गूर्णोद्यते, काचित-शिक्यिते ।
2 Suspended in a swing.
घ्राण-घ्राते, दिग्ध-लिप्ते, समुदक्तोद्धृते समे ॥
2 Drawn; raised from a deep place.

5 Surrounded
2 Bent; crooked.
4 Sharpened, whetted.
९१ वेष्टितं स्याद् वलयितं संवीतं रुद्धमावृतम् ।
रुग्णं भुग्ने, ऽथ निशित-क्ष्णुत-शातानि तेजिते ॥

2 Mature.
3 Ashamed.
९२ स्याद् विनाशोन्मुखं पक्वं, ह्रीण-ह्रीतौ तु लज्जिते ।
3 Chosen; appointed.
2 Joined; annexed.
वृत्ते तु वृत-व्यावृत्तौ, संयोजित उपाहितः ॥

3 Attainable.
4 Flowing; dropping.
2 Arranged, or heaped.
2 Detested.
९३ प्राप्यं गम्यं समासाद्यं, स्यन्नं रीणं स्नुतं स्रुतम् ।
संगूढः स्यात् संकलितो, ऽवगीतः ख्यातगर्हणः ॥

मपिभ्वादिः ॥ ८८ ॥ आहन्यते स्म– एकादिरङ्कोऽङ्कान्तरेणाऽभ्यस्यते–आहतम् । द्वे द्वे तुल्यार्थे । गुण्ठितं गुण्डितमाहुः । रूषिर्लौकिको व्याख्यार्थः, यथा–अन्तर्गिरिरेणुरूषित (किरा० १–१४) । प्रवर्धते, प्रसरति, न्यस्यते, निसृज्यते, गुण्यते, आहन्यते, निदिह्यते, उपचीयते, गुह्यते, गुष्यते, गुण्ठ्यते, रूष्यते ॥ ८९ ॥ द्रूयते, अवदीर्यते, उद्गूर्यते । द्रुतमत्र विभिन्नम् । (उद्गूर्णं) गुरी उद्यमे । कार्यते शिक्षां कारितः । घ्रायते स्म घ्राणं, नुदविदोन्देति (८।२।५६/३०३८) वा निष्ठा नत्वम् । समुदक्तं समुदक्तं, अञ्चोऽनपादाने (सू ८।२।४८/३०२४) इतीण्नास्ति ॥ ९० ॥ वलयः संजातोऽस्य वलयितम् । (संवीतं) व्येञ् संवरणे । (रुग्णं) रुजो भङ्ग । (भुग्नं) भुज कौटिल्ये । (शातं, निशित) शो तनूकरणे, शाच्छोरन्यतरस्याम् (७।४।४१/३०७५) इति वेत्वम्, उपसर्गप्राधान्यात् । शितनिशातौ च । (क्ष्णुतं) क्ष्णु तेजने । (तेजितं) तिज निशाने ॥९१॥ पच्यते स्म पक्वं फलादि, पचो वः (८।२।५२/३०३१) इति निष्ठा वत्वम्, आहुश्च–ओषध्यः फलपाकान्ताः (धन्व०) । जिह्रेति स्म (ह्रीणह्रीतौ), नुदविदोन्देति (८।२।५६/३०३८) वा नत्वम् । व्रियते वृतः । वर्तते वृत्यते वा वृत्तः । वावृत्तः, वृतु– वावृतु वरणे [वर्तने], इत्थमबुद्ध्वा वृत्तव्यावृत्ताविति पेठुः, लक्ष्येऽपि–ततो वावृत्तमानसेति (–त्यमाना सेति) भट्टिः (४-२८)। उपाधीयते स्मोपाहितः ॥९२॥ (स्यन्नं) स्यन्दू स्रवणे । (रीणं) रीङ् स्रवणे, स्वादय ओदितः (८।२।४५/३०१९) । (स्नुतं) ष्णु उद्गिरणे । विरुद्धमवगीयतेऽवगीतः ॥९३॥ विचित्रा विधा प्रकारोऽस्य विविधः । बहुरूपः पृथग्रूपो नानाविधश्च । (अवरीणः) अवेति विरुद्धार्थः । चूर्णेनावध्वस्तोऽवचूर्णितः,

CC-0. Agamnigam Foundation, Chandigarh

4 Various, multi-form.
2 Coarsely pounded.
1 Diluted decoction.
6 Bound.

९४ विविधः स्याद् बहुविधो नानारूपः पृथग्विधः । 2 Censured, blamed.
अवरीणो धिक्कृतश् चाप्यवध्वस्तो ऽवचूर्णितः ॥

९५ अनायास-कृतं फाण्टं, स्वनितं ध्वनितं समे । 2 Sounded; making a noise.
बद्धे संदानितं मूतमुद्दितं संदितं सितम् ॥

2 Decocted.
1 Boiled.
1 Departed.
1 Become calm.
2 Mature, ripe.
2 Passed (as ordure).
2 Nourished.
2 Borne.

९६ निष्पक्के क्वथितं, पाके क्षीराऽऽज्य-हविषां शृतम् ।
निर्वाणो मुनि-वन्ह्याऽऽदौ, निर्वातस् तु गतेऽनिले ॥

९७ पक्वं परिणते, गूनं हन्ने, मीढं तु मूत्रिते । 2 Passed (as urine).
पुष्टे तु पुषितं, सोढे क्षान्तमुद्वान्तमुद्गते ॥ 2 Vomited.

2 Tamed; subdued or trained.

९८ दान्तस् तु दमिते, शान्तः शमिते, प्रार्थितेऽर्दितः ।
2 Pacified, appeased. 2 Asked, requested.
ज्ञप्तस् तु ज्ञपिते, छन्नश् छादिते, पूजितेऽञ्चितः ॥
2 Worshipped; revered.

2 Made known.
2 Covered.

2 Filled; full.

९९ पूर्णस् तु पूरिते, क्लिष्टः क्लिशिते, ऽवसिते सितः ।
1 Tired; fatigued. 2 Finished.
प्रुष्ट-प्लुष्टोषिता दग्धे, तष्ट-त्वष्टौ तनूकृते ॥ 3 Pared; made thin.

4 Burnt.

सत्यापपाशेति (३।१।२५ / ३०६७) णिचि क्तः ॥ ९४ ॥ क्षुब्धस्वान्तध्वान्तलग्नम्लिष्टविरिब्ध-फाण्टबाढानीति (७।२।१८ / ३०५८) फणेः फाण्टं साधुः त्रिफलाकषायादिसारम् । (स्वनितं, ध्वनितं) मनस्तमसोरन्यत्रेट् । (संदानितं) दान अवखण्डने । (मूतं) मूङ् बन्धने । द्यतिस्यतीति (७।४।४० / ३०७४) इत्वे-उद्दितं संदितं च । पिञ बन्धने, सितः ॥ ९५ ॥ निःशेषेण पक्वं निष्पक्वम् । श्रातेः श्रपेश्च शृतं पाके (३।१।२७ / ३०६७) इति साधुः । निर्वाति स्म निर्वाणः, वातादन्यत्र शान्त्यर्थे साधुः (निर्वाणोऽवाते)। आदिशब्दान्निर्वाणं मुक्तिर्निर्वृत्तिश्च, यथा- प्रिय [या] दर्शनमेवास्तु किमन्यैर्दर्शनान्तरैः । निर्वाणमाप्यते येन सरागेणापि चेतसा (सु. भा. ४५७-१)। निर्वाति निर्वातः, गतो वात इत्यर्थः ॥ ९६ ॥ परिणमतेऽवस्थान्तरं प्राप्नोति स्म, यथा- परिपक्वधीः । (गूनं) गु पुरीषोत्सर्गे, दुग्वोर्दीर्घश्च (वा० ४८३२ / ३०९८)। (मीढं) मिह सेचने, ढ्लोपे पूर्वस्य दीर्घोऽणः (६।३।१११ / १७४)। पुष्यति स्म पुष्टम् । पोषति स्म पुषितम् । सह्यते स्म सोढं, सहिवहोरोदवर्णस्य (६।३।११२ / २३०७)। (उद्वान्तः) टुवम उद्गिरणे ॥ ९७ ॥ (दान्तः) वा दान्तशान्तपूर्णदस्तस्पष्टच्छन्नज्ञप्ताः (७।२।२७ / ३०६८) इति ण्यन्तात्क्ते वा साधुः । एवं शान्तादयः । अर्द गतौ याचने च, अर्दितः । मारणादन्यत्र मित्वेऽपि ज्ञप्तः सामान्येन निपातनात्, यथा- आज्ञापितः, आज्ञप्तः । (अञ्चितः) अञ्चेःपूजायाम् (७।२।५३ / ३०४७) इतीड् नलोपाभावश्च ॥ ९८ ॥ (क्लिष्टः) क्लिशःक्त्वा-निष्ठयोः (७।२।५० / ३०४९) इति वेट् । (सितः) षोऽन्तकर्मणि, द्यति स्यति मास्थेति

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh

3 Pierced. १०० वेधितच्छिद्रितौ विद्धे, विन्न-वित्तौ विचारिते ।
3 Judged; discussed.
3 Gloomy. obscured. निष्प्रभे विगताऽरोको, विलीने विद्रुत-द्रुतौ ॥
3 Liquid.

3 Accomplished. १०१ सिद्धे निर्वृत्त-निष्पन्नौ, दारिते भिन्न-भेदितौ ।
3 Split.
3 Woven. ऊतं स्यूतमुतं चेति त्रितयं तन्तु-सन्तते ॥

6 Saluted; honoured. १०२ स्यादर्हिते नमस्यित-नमसितमपचायिताऽर्चिताऽपचितम् ।
4 Served; adored. वरिवसिते वरिवस्यितमुपासितं चोपचरितं च ॥

5 Sufferring pain. १०३ संतापित-संतप्तौ धूपित-धूपायितौ च दूनश् च ।
6 Pleased, glad, content. हृष्टो मत्तस् तृप्तः प्रह्लन्नः प्रमुदितः प्रीतः ॥

8 Cut. १०४ छिन्नं छातं लूनं कृत्तं दातं दितं छितं वृक्णम् ।
7 Fallen. स्रस्तं ध्वस्तं भ्रष्टं स्कन्नं पन्नं च्युतं गलितम् ॥

(७।४।४०/३०७५) इत्वम्। (प्रुष्ट इ०) प्रुषु प्लुषु उष दाहे। (तष्ट इ०) तक्षू त्वक्षू तनूकरणे ॥९९॥ (वेधितः) विध विधानेऽनेकार्थः। छिद्यते स्म छिद्रितः, छिद्रं संजातं वाऽस्य। व्यधेः क्तः, विद्धः। विद विचारणे, नुदविदोन्देति (८।२।५६/३०३८) नत्वं, यदाह– वेत्तेर्विन्नश्च वित्तश्च (भाष्यव० ६।२।५८)। नास्ति रोको रोचनमस्याऽरोकः। (विलीनः) लीङ् द्रवीकरणे ॥१००॥ (भिन्न इ०) भिदिः– रुधादिश्चुरादिश्चेति वा– इट्। ऊतं, ऊयी तन्तुसंताने, क्तः, लोपो व्योर्वलि (६।१।६६/८७३) स्यूतं, षिवु तन्तुसंताने, च्छ्वोःशूडिति (६।४।१९/२५६१) वस्योत्वम्। उतं, वेञ् तन्तुसंताने, क्तः, संप्रसारणम्। तन्तुभिः संतते विस्तृते ॥१०१॥ (निमस्यितं, इ०) नमोवरिव इति (३।३।११/२६७५) नमसः पूजायां क्यच्, क्यस्य विभाषा (६।४।५०/२६६०) इति यस्य वा लोपः। (अपचायितं, इ०) अपचितश्च (७।२।३०/३०७१) इति चायेर्वा साधुः। पूजितं च। वरिवसः परिचर्यायां क्यच् ॥ १०२ ॥ (संतापित इ०) तपिश्चुरादिर्भ्वादिश्च। (धूपित इ०) गुपूधूपेति (३।१।२८/३०३३) आयः, आयादय आर्धधातुके वा (३।१।३१/३०५५)। (दूनः) दूङ् परितापे, स्वादय ओदितः (८।२।४५/३०७६) इति निष्ठा नत्वम्। प्रह्लादते स्म प्रह्लन्नः, ह्लादो निष्ठायाम् (६।४।९५/३०७३) इति ह्रस्वः ॥१०३॥ ल्वादिभ्यश्च (८।२।४४/३०१८) इति नत्वे लूनम्। छो छेदने, शाच्छोरन्यतरस्याम् (७।४।४१/३०७५) इतीत्वं वा (छातं, छितं)। दाप् लवने, अस्माद्दातम्। दो अवखण्डने, अस्माद् द्यतिस्यतीति (७।४।४०/३०७४) इत्वे दितम्। वृश्च्यते स्म वृक्णं, ओव्रश्च छेदने। स्कन्नं, स्क्रन्दिर गतिशोषणयोः। पन्नं, पद गतौ। एते हस्तादेः

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh

6 Obtained. १०५ लब्धं प्राप्तं विन्नं भावितमासादितं च भूतं च ।
5 Sought. अन्वेषितं गवेषितमन्विष्टं मार्गितं मृगितम् ॥

7 Wet; moistened. १०६ आर्द्रं सार्द्रं क्लिन्नं तिमितं स्तिमितं समुन्नमुत्तं च ।
6 Preserved, saved, guarded. त्रातं त्राणं रक्षितमवितं गोपायितं च गुप्तं च ॥

5 Disregarded, despised. १०७ अवगणितमवमताऽवज्ञाते अवमानितं च परिभूते ।
6 Abandoned, left. त्यक्तं हीनं विधुतं समुज्झितं धूतमुत्सृष्टे ॥

7 Spoken, said. १०८ उक्तं भाषितमुदितं जल्पितमाख्यातमभिहितं लपितम्
7 Known, understood. बुद्धं बुधितं मनितं विदितं प्रतिपन्नमवसिताऽवगते ॥

11 Promised. १०९ ऊरीकृतमुररीकृतमङ्गीकृतमाश्रुतं प्रतिज्ञातम् ।
संगीर्ण-विदित-संश्रुत-समाहितोपश्रुतोपगतम् ॥

पतितेऽर्थे वर्तन्ते ॥१०४॥ प्राप्तं कर्मणि, प्राप्तप्रणिहिते समे इति कर्तरि । विन्नं, विद्लृ लाभे । भावितं, भू प्राप्तौ, आधृषाद्वा (ग० २०२) इत्यस्य वा णिच्, पक्षे भूतं, यथा—इत्थंभूतम् । आसादितं, आङः पदः पद्यर्थे णिच् । अन्वेषितं, जेष णेषृ ऐषृ गतौ । अन्विष्टं, इषेः तीषसहेति ($\frac{७।२।४८}{२३४०}$) वेट् । गवेष मार्गणे । मार्ग अन्वेषणे । मृग अन्वेषणे ॥ १०५ ॥ आ—अद्यते—आर्द्रः पटादिः । सहार्द्रेण गुणेन वर्तत इति सार्द्रः । तिम ष्टिम आर्द्रीभावे । (समुन्नं, इ०) उन्दी क्लेदने, नुदविदोन्देति ($\frac{८।२।५६}{३०३८}$) वा नत्वम् । (गोपायितं, इ०) गुपेः, आयादय आर्धधातुके वा ($\frac{३।१।३१}{२३०५}$) ॥१०६॥ (अवगणितं) अवेति विपर्ययेऽर्थे । अवमतं, मन ज्ञाने । अवमानितं, मनिश्चरादिः, मान पूजायां वा । अनादृतं च । हीनयते हीनम्, ओहाक् त्यागे, निष्ठा नत्वं ओदितश्च, ($\frac{८।२।४५}{३०१९}$) घुमास्थागेतिश्च ($\frac{६।४।६६}{२४६९}$) इत्वम् ॥ १०७ ॥ (उक्तं, उदितं) क्ते वचिवदोः संप्रसारणम् । (अभिहितं) अभिपूर्वो धाञ्—उक्त्यर्थः, दधातेर्हिः ($\frac{७।४।४२}{३०७६}$) । (बुद्धं) बुध अवगमने—अनिट् । (बुधितं) बुधिरवबोधने सेट् । मनु अवबोधनेऽस्मान्मनितं, कृतीचृतीनृतीनामीदित्करणेन सेऽसिचिकृतचृतछृदतृदनृतः ($\frac{७।२।५७}{२५०६}$) इति विकल्पे, यस्य विभाषा ($\frac{७।२।१५}{३०२५}$) इति निषेधस्यानित्यत्वज्ञापनात् । मतं तु मन्यतेः । वेत्तेस्तु विदितं, निष्ठा । प्रतिपन्नं, पद गतौ, सर्वे गत्यर्था ज्ञानार्था इति ॥ १०८ ॥ ऊर्यूरर्युररी तु विस्तारेऽङ्गीकारे च गतिसंज्ञाः ऊर्यादिच्विडाचश्च ($\frac{१।४।६१}{७६२}$), तेन ऊररीकृतमपि । (संगीर्णं) समःप्रतिज्ञाने

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh

12 Praised. ११० ईलित-शस्त-पणायित-पनायित-प्रणुत-पणित-पनितानि ।
अपि गीर्ण-वर्णिताऽभिष्टुतेडितानि स्तुताऽर्थानि ॥

14 Eaten. १११ भक्षित-चर्वित-लिप्त-प्रत्यवसित-गिलित-खादित-प्सातम् ।
अभ्यवहृताऽन्न-जग्ध-ग्रस्त-ग्लस्ताऽशितं भुक्ते ॥

Certain irregular Superlatives. ११२ क्षेपिष्ठ-क्षोदिष्ठ-प्रेष्ठ-वरिष्ठ-स्थविष्ठ-बंहिष्ठाः ।
1 Most quick; 1 Smallest; 1 Dearest, largest, 1 Most corpulent; 1 Most numerous.
क्षिप्र-क्षुद्राऽभीप्सित-पृथु-पीवर-बहुल-प्रकर्षाऽर्थाः ॥

1 Hardest; 1 Longest; ११३ साधिष्ठ-द्राघिष्ठ-स्फेष्ठ-गरिष्ठ-ह्रसिष्ठ-वृन्दिष्ठाः ।
1 Most firm. 1 Heaviest; 1 Shortest; 1 Most abundant.
बाढ-व्यायत-बहु-गुरु-वामन-वृन्दारकाऽतिशये ॥

इति विशेष्यनिघ्न-वर्गः १, अत्र मूलश्लोकाः ११२॥, क्षे० श्लो० ॥

($\frac{१।३।५२}{२७२५}$) इति संगीरङ्गीकारार्थः, गॄ शब्दे ॥ १०९ ॥ ईलितं, ईड स्तुतौ, डल योरेकत्वम् । (शस्तं) शसु स्तुतौ । (पणायितं, इ०) पण व्यवहारे स्तुतौ च, पन च. आयादय आर्धधातुके वा ($\frac{३।१।३१}{२३०५}$) । अपि स्वार्थे, उपसर्गं इत्येके । गीर्णं, गॄ शब्दे ॥ ११० ॥ लिप्तस्थाने लीढं पेठुः । (प्रत्यवसितं) प्रत्यवपूर्वः स्यतिर्भोजने वर्तते । (गिलितं) गॄ निगरणे, अचि विभाषा ($\frac{८।२।२१}{२५४१}$) इति लत्वम् । (प्सातं) प्सा भक्षणे । (अभ्यवहृतं) अभ्यववपूर्वो हृञ् भोजने । अद्यते स्माऽन्नं, अदोऽनन्ने ($\frac{३।२।६८}{२९७७}$) इति निपातनात्साधुः । (जग्धं) अबाधकान्यपि निपातनानि भवन्तीति पक्षे जग्धिः । वाच्यं चात्र–ब्रह्मण्यो ब्राह्मणहितो वीतदम्भस्त्वकल्मषः । असंमतः प्रणाय्यः स्याच्चक्षुष्यः प्रियदर्शनः ॥ वैरागिको विरागार्हः शंसितस्तु सुनिश्चितः । ईर्ष्यालुः कुहनो गोष्ठश्वोऽन्यद्वेष्टा स्वगेहगः (?) ॥ [गोष्ठश्वः, अचतुरेति ($\frac{५।४।७७}{९४५}$) साधुः ।] तीक्ष्णोपायेन योऽन्विच्छेत्स आयःशूलिको जनः (वै. १-५.४-७४) । गेहेशूरो गृहेनर्दी पिण्डीशूरोऽथ संस्कृतः (वै. १-५-४-७०) ॥ व्युत्पन्नप्रहतक्षुण्णा अन्वेष्टानुपदी समौ ॥ नीलीरागः स्थिरस्नेहो हरिद्रारागकोऽन्यथा (वै. १-५-४-२६) ॥ आसीन उपविष्टः स्यादुर्ध्वस्थोर्ध्वदमौ स्थिते (वै. १-५-४-१०) । उत्पश्य उन्मुखे गृह्यः पक्षे (क्ष्ये) न्युब्जस्त्वधोमुखे ॥ १११ ॥ अतिशयेन क्षिप्रः क्षेपिष्ठः । एवं क्षुद्रः क्षोदिष्ठः । अतिशयेन प्रियः प्रेष्ठः । एवमुरुर्वरिष्ठः, प्रियस्थिरस्फिरोर्विति ($\frac{६।४।१५७}{२०१६}$) प्रस्थस्फवर्बंहादेशाः । स्थूलः स्थविष्ठः, स्थूलदूरयुवेति ($\frac{६।४।१५६}{२०१५}$) यणादिर्लुप्यते पूर्वस्य च गुणः । बहुलो बंहिष्ठः ॥ ११२ ॥ अतिशयेन बाढं साधिष्ठं, अन्तिकबाढयोर्नेदसाधौ ($\frac{५।३।६३}{२०२४}$) । एवं दीर्घो द्राघिष्ठः । स्फिरः

CC-0. Agamnigam Foundation. Digitized by eGangotri Siddhanta Foundation, Chandigarh

अथ संकीर्ण-वर्गः २

१ प्रकृति-प्रत्ययाऽर्थाऽऽद्यैः संकीर्णे लिङ्गमुन्नयेत् ।
कर्म क्रिया, तत्-सातत्ये गम्ये स्युरपरस्पराः ॥

2 Action.
1 Continual.

२ साकल्याऽऽसंग-वचने पारायण-परायणे ।
यदृच्छा स्वैरिता, हेतु-शून्या त्वास्था विलक्षणम् ॥

1 Tolality.
2 Wilfulness; independence.
1 Adherence; attachment.
1 Vain and causeless state.

(बहुः) स्फेष्टः । गुरुर्गरिष्टः । ह्रस्वो ह्रसिष्टः । वृन्दारको वृन्दिष्टः, प्रियस्थिरेति ($\frac{६।४।१५७}{२०१६}$) आदेशः । वाच्यं चात्र–ग्राम्ये ग्रामेयकग्रामीणावाच्छिन्नो बलाध्दते । चोरिते मुषितं मुष्टं स्थपुटं तु नतोन्नतम् ॥ उत्पाटितोन्मूलितार्थमुध्दतं वर्हिते वृढम् । आचितं निचितं पूर्णे पूरितं निभृते भृतम् ॥ प्रतिश्रितं प्रविष्टं स्यादन्तर्गडु निरर्थके । न्यञ्चितं स्यादधः क्षिप्तं क्षिप्तमूर्ध्वमुदञ्चितम् ॥ स्पष्टेऽचितं चतुर्थे तु तुरीयं तुर्यमास्थिते आकारे श्लिष्टसंपृक्तः खचिते क्षुरितभूषितौ (?) ॥ प्रचर्चितं प्रतीष्टं द्वेष्याम्मृष्याक्षिगताः समाः । श्यानं शीनेऽन्वितेऽन्वीतं प्रकाशप्रकटौ स्फुटे ॥ ११३ ॥ इति विशेष्यनिघ्नवर्गः । १ ।

प्रकृत्याद्यैः प्रकीर्णकेऽत्र लिङ्गमुत्प्रेक्षेत । प्रकृत्या (यथा)– अपरस्पराः सार्था यान्ति, (सि. कौ. सू. १०५९) अपस्पराणि क्षणानि वहन्ति [अक्षराणि वदन्ति] । प्रत्ययेन (यथा)–क्तिन्, शान्तिः, नपुंसके भावे क्तः ($\frac{३।३।११४}{३०९०}$) ल्युट् च–आसितं, तर्पणम् । अर्थेन तु (यथा)– कामैंव कार्मणम् (सि. कौ. सू. २१०४) आद्यशब्दाद्रूपभेदसाहचर्यादिना (यथा)–यदृच्छा स्वैरिता, शमथस्तु शमः । (कर्म क्रिया) भावकर्मणोर्मनिन् (सर्वधातुभ्यो मनिन्), कृञः श च ($\frac{३।३।१००}{३२७७}$) । क्रियासंततत्वे गम्यमाने, अपरे च परे च–अपरस्पराः सार्था यान्ति, अपरे च परे च यत्र तदपरस्परं कृत्वा वा, अपरस्पराःक्रियासातत्ये ($\frac{६।१।४४}{१०५९}$) इति साधुः ॥ १ ॥ पारमयन्ते येन सकलं व्याप्नुवन्ति पारायणम् । त्वरणं तुरणं वा तूः, तया हेतुभूतया–अयन्ते येनासक्तं गच्छन्ति तत्तुरायणम् । या का–इच्छा यदृच्छा, यदृच्छाशक्तिजानुकरणेति (भाष्यव० १।१।२) वाक्यलिङ्गात्साधुः । स्वेन–इंतें तच्छीलः स्वैरी, भावे तल् तस्य भावस्त्वतलौ ($\frac{५।१।११९}{१७८१}$), स्वैरस्य भावो वा । आसनमास्या, प्यासश्रन्थेति ($\frac{३।३।१०७}{३२८४}$) युचि प्राप्ते, वाऽसरूपेण, वाऽसरूपोऽस्त्रियां ($\frac{३।१।९९४}{२८३०}$) ऋहलोर्ण्यत् ($\frac{३।१।१२४}{२८७२}$), अस्त्रियामिति निषेधो द्वयोरेवोत्सर्गापवादयोर्न त्वेकस्य । विगतं लक्षणमालोचनं यत्रेति विलक्षणमप्रतिपत्तिरित्यर्थः

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh

3 Quiet.
3 Self-command.
1 Approved occupation.
2 Subduing by charms.
2 Tremour.
3 Satisfaction.
3 Warding of a blow.
3 Sewing.
3 Tearing, rending.
2 Curse, imprecation.
2 Co-extending; pervading.

३ शमथस् तु शमः शान्तिर्, दान्तिस् तु दमथो दमः ।
अवदानं कर्म वृत्तं, काम्यदानं प्रवारणम् ॥ 2 A desirable gift.

४ वशक्रिया संवननं, मूलकर्म तु कार्मणम् । 2 Magic.
विधूननं विधुवनं, तर्पणं प्रीणनाऽवनम् ॥

५ पर्याप्तिः स्यात् परित्राणं हस्तधारणमित्यपि ।
सेवनं सीवनं स्यूतिर्, विदरः स्फुटनं भिदा ॥

६ आक्रोशनमभीषङ्गः, संवेदो वेदना न ना । 2 Sensation, perception.
संमूर्च्छनमभिव्याप्तिर्, याच्ञा भिक्षाऽर्थनाऽर्दना ॥ 4 Begging.

2 Cutting.

७ वर्धनं छेदने, ऽथ द्वे आनन्दन-सभाजने ।
3 Courtesy; welcome or adieu.
आप्रच्छन्नमथाऽऽम्नायः संप्रदायः, क्षये क्षिया ॥

2 Received doctrine.
3 Loss.

॥ २ ॥ (शमथः, इ०) औणादिकोऽथच्, घञि तु नोदात्तोपदेशस्येति (७।३।३४ / २७६३) वृध्द्यभावः । कामक्रोधाद्यभावः शान्तिस्तपःक्लेशसहिष्णुता दान्तिः । अवदीयतेऽनेन–अवदानं सोत्कर्षचरितं, वृत्तं परिशुद्धं, निर्व्यूढमित्येके । (कामदानं) कामनापूर्वं दानं स्वेच्छात्याग इत्यर्थः । काम्यदानमिति तु युक्तः पाठः ॥ ३ ॥ (वशक्रिया) वशीकरणम् । वनु च नोच्यते (ग० ?) इत्यनेकार्थत्वात्संवननं, वनु याचने वा । मूलैरोषधिभिर्यद्वशीकरणं तत्, कर्मैव कार्मणं, तद्युक्तात्कर्मणोऽण् (५।४।३६ / २१०४) । (विधूननं) धूञ् णिच्, धूञ्प्रीञोर्नुक् (वा० ४५१९ / २७७३), ल्युट् । विधुवनमिति धू विधूनने, कुटादित्वाद्ङित्, गाङ्कुटादिभ्योऽञ्णिङित् (१।२।१ / २४६१) । (अवनं) अव प्रीतौ ॥४॥ प्रहर्तुमुद्यतस्य हस्तधारणं रोधः, रक्ष्यस्य पृष्ठे हस्तस्थापनं वा । (सीवनं) ष्टिवुसिव्योर्दीर्घश्च (स. कं. २।४।१६७) इति वा दीर्घः । सेवनं स्यूतिः, ष्ठ्वोः शूडिति (?) ऊठ् । (विदरः) दृ विदारणे, ऋदोरप् (३।३।५७ / ३२३२) । (स्फुटनं) स्फुटः कुटादिः । भेदनं भिदा, षिद्भिदादिभ्योऽङ् (३।३।१०४ / ३२८१) ॥ ५ ॥ अभिषङ्गनं पराभिमुख्येन वाच्ययोजनमभीषङ्गः, उपसर्गस्य घञीति (६।३।१२२ / १०४४) दीर्घः । वेदना, विद चेतने, णिच्, ण्यासश्रन्थेति (३।३।१०७ / ३२८१) युच्, वेत्तेर्वा, घट्टिवन्दिविदिभ्यश्चोपसंख्यानात् (वा० २२२२ / ३२८४) । ल्युटि तु वेदनम् । (संमूर्च्छनं) मूर्च्छा मोहसमुच्छ्राययोः । अभिव्यापनं सर्वतो वृद्धिः । याचनं याच्ञा, यजयाचेति (३।३।९० / ३३६८) नङ् । (अर्दना) अर्द याचनेऽस्मात् स्वार्थे णिच्, युच् ॥ ६ ॥ (वर्धनं) वर्ध छेदनपूरणयोः । (सभाजनं) सभाज प्रीतिदर्शने । (आप्रच्छनं) आङ्पूर्वः प्रच्छिरालिङ्गनादिनानन्दनार्थः, यथा–आपृच्छस्व प्रियसखममुम् (मेघ० १–९) । वृद्धपारंपर्येणाम्नानमाम्नायः । (क्षयः)

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

2 Taking. 2 Wish, desire.
८ ग्रहे ग्राहो, वशः कान्तौ, रक्षणस् त्राणे, रणः क्वणे ।
2 Protection; defence. 2 Sound, noise.

2 Perforation, piercing.
व्यधो वेधे, पचा पाके, हवो हूतौ, वरो वृत्तौ ॥
2 Maturity. 2 Calling; challenging. 2 Engaging; appointing.

2 Combustion; burning.
९ ओषः प्लोषे, नयो नाये, ज्यानिर् जीर्णौ, भ्रमो भ्रमौ ।
2 Guiding; directing. 2 Wearing, growing old. 2 Whirling; going round.

2 Increase, growth. 2 Fame, notoriety.
स्फातिर् वृद्धौ, प्रथा ख्यातौ, स्पृष्टिः पृक्तौ, स्रवः स्रवे ॥
2 Touch, contact. 2 Oozing, dripping.

2 Thriving. 2 Throbbing. 2 Bringing forth (as young).
१० एधा समृद्धौ, स्फुरणे स्फुरणा, प्रमितौ प्रमा । 2 True knowledge.
प्रसूतिः प्रसवे, श्च्योते प्राधारः, क्लमथः क्लमे ॥
2 Pouring forth; aspersion. 2 Fatigue.

2 Excellence. 2 Union; junction. 2 Sending; directing.
११ उत्कर्षो ऽतिशये, संधिः श्लेषे, विषय आश्रये। 2 Refuge; asylum.
क्षिपायां क्षेपणं, गीर्णिर् गिरौ, गुरणमुद्यमे ॥
2 Swallowing. 2 Effort, exertion.

क्षि क्षये, एरच् (३।३।५६) । (क्षिया) क्षीप् हिंसायां, अङ् ॥ ७ ॥ (ग्रहः) ग्रहवृद्रिति (३।३।५८) अप् । (ग्राहः) बाहुलकाद् घञ् (भावे) । (वशः) वशिरण्योरुपसंख्यानादप् (वा० ३।२।३४) । (रक्षणः) यजयाचेति (३।३।९०) भावे नङ् । रक्ष इत्य च पाठः, गुरोश्च हलः (३।३।१०३) इत्यकारः स्यात् । रणनं रणः अप् । (क्वणः) क्वणो वीणायां च (३।३।६५) । व्यधनं व्यधः, व्यधजपोरनुपसर्गे (३।३।६१) इत्यप् । वेधनं वेधः, विध विधाने । पचनं पचा, षित्वादङ्, षिद्भिदादिभ्योऽङ्, (३।३।१०४) । पक्तिर्बाहुलकात् । (हवः) ह्वःसंप्रसारणं च (६।१।३२) इत्यप् वरणं वरः, व्रियते वा, यत्कात्यः—तपोभिरिष्यते यस्तु देवेभ्यः स वरो मतः, वृञ् वरणे, वृङ् संभक्तौ च ॥ ८ ॥ (ओषः) उष दाहे । (नायः) श्रिणीभुवोऽनुपसर्गे (३।३।२४) इति घञ् । (ज्यानिः) ग्लाम्लाज्याहाभ्योऽनिः (स. कं. २।४।१५६) । जरणं जीर्णिः, क्रल्वादिभ्यःक्तिन्निष्ठावत (वा० ४।८।२६) । (भ्रमः) घञ् । भ्रमणं भ्रमिः इक् कृष्यादिभ्यः (वा० ३।३।३२) । (स्फातिः) स्फायी वृद्धौ । प्रथनं प्रथा, घटादयः-षितः (ग० १८६) इत्यङ् । पृक्तिः, पृची संपर्के । (स्रवः) प्रस्रवणे ॥ ९ ॥ विधा समृद्धावित्येके पेठुः । एधनमेधा, षिद्भिदादिभ्योऽङ् (३।३।१०४) । स्फुरणं स्फुरणा, स्फुर चलने कुटादिः । (प्रमितिः) माङ् माने, क्तिन्, द्यतिस्यतीति (७।४।४०) इत्वम् । (प्रमा) आतश्चोपसर्गे (३।१।१३६) इत्यङ् । (प्रसूतिः, इ०) षूङ् प्राणिगर्भविमोचने, षू प्रसवे वा । (श्च्योतः) श्च्युतिर् क्षरणे । (प्राधारः) धृ क्षरण-दीप्त्योः । (क्लमथः) औणादिकोऽप्यथच्, क्लमथुरित्यपपाठः ॥ १० ॥ उर्ध्वं कर्षणं (उत्कर्षः) । (संधिः) उपसर्गे घोःकिः (३।३।९२) । विषीयतेऽत्र विषयः, विषि-

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

2 Raising.
१२ उन्नाय उन्नये, श्रायः श्रयणे, जयने जयः ।
2 Reliance; taking refuge. 2 Conquest, victory.
2 Discourse, speech. 2 Pride.
निगादो निगदे, मादो मद, उद्वेग उद्धमे ॥ 2 Regret.

2 Trituration of perfumes. 1 Disfavour. 2 Attack, onset.
१३ विमर्दनं परिमलो, ऽभ्युपपत्तिरनुग्रहः । 2 Conferring of a benefit.
निग्रहस् तद्-विरुद्धः स्यादभियोगस् त्वभिग्रहः ॥

2 Clinching of the fist. 3 Ligament. fetters. 3 Morbid heat.
१४ मुष्टिबन्धस् तु संग्राहो, डिम्बे डमर-विप्लवौ ।3 Affray, assault.
बन्धनं प्रसितिश् चारः, स्पर्शः स्प्रष्टोपतप्तारि ॥

3 Injury. 3 Hint, sign, token. 4 Change of form.
१५ निकारो विप्रकारः स्यादाकारस् त्विङ्ग इङ्गितम् ।
परिणामो विकारो, द्वे समे विकृति-विक्रिये ॥

णोति वा, आश्रयस्थानम् । (क्षिपा) भिदादित्वादङ् पिद्भिदादीति, (३।३।१०४) । गिरगं गिरिः, इक् कृष्यादिभ्यः (वा० ३।२।८५) । कुटादित्वाद् गुरणमाहुः, चुरादेर्गोरणमपि । अड उद्यमे इति निपातनादुद्यमः ॥ ११ ॥ ऊर्ध्वं नयनमनुसरणं वोन्नायः, अवोदोर्नियः (३।३।२६) इति घञ् । (उन्नयः) बाहुलकाद्– एरच् (३।३।५६) (श्रायः) श्रिणीभुवोऽनुपसर्गे (३।३।२४) इति घञ् । (जपः) व्यधजपोरनुपसर्गे (३।३।६१) इत्यप् । (निगाद इ०) स्फुटकथने, नौ गदनदेति (३।३।६४) वा घञ् । (मदः) मदोऽनुपसर्गे (३।३।६७) इत्यप् । (मादः) सध मादस्थयोश्छन्दसि (६।३।९६) इति निपातनाद् घञ् । (उद्वेगः) ओविजी भयचलनयोः, घञ् ॥ १२ ॥ (परिमलः) संज्ञापूर्वकत्वाद् वृध्यभावः । अभ्युपपत्त्यादिर्नानादिभिः स्वीकारे वर्तते । (अनुग्रहः) ग्रहेः–ग्रहवृद– (३।३।५८) इत्यप् । नियमनाय ग्रहणं निग्रहः, निरोध इति पाठ्यम्, विग्रहो विरोध इति वा । आभिमुख्येनोद्यमः (अभियोगः) ॥ १३ ॥ समि मुष्टौ (३।३।३६) इति घञ्, संग्राहो मल्लस्य (सि. कौ. सू. ३२०८) । डयनं विद्रवो डिम्बः, डीङ् गतौ, अशस्त्रकलहः, लुण्ड्यादिरित्येके । डयनं डमरः । (प्रसितिः) षिञ् बन्धने । स्वृ शब्दोपतापयोः, स्वरति स्वारः । (स्पर्शः) पदरुज– (३।३।१६) इत्यत्र स्पृश उपतापे एव (स. कं. २।४।२४) इति कर्तरि घञ् । (स्प्रष्टा) वाऽसरूपात्तृच्, वाऽसरूपोऽस्त्रियाम् (३।१।९४) ॥ १४ ॥ निकृष्टं करणं निकारः खलीकारः । (इङ्गः, इङ्गितं) भावे घञ्क्तौ । इङ्गिताकाराभ्यां भावज्ञानमित्यादौ गोबलीवर्दन्यायेन– इङ्गितं चेष्टितम् । आकृतिग्रहणमाकारो मुखरागादिरिति कौटिल्यो (१–१५) व्याख्यत्, अयं त्वनयोराशयज्ञापकत्वादैक्यं मन्यते । विकारेऽर्थे त्रयो वर्तन्ते,

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

2 Loss.
2 Assemblage.
2 Abstraction.

१६ अपहारस् त्वपचयः, समाहारः समुच्चयः ।
प्रत्याहार उपादानं, विहारस् तु परिक्रमः ॥
2 Walking for pleasure.

2 Robbery.
2 Extraction.
2 Imitation.
1 Expenditure.

१७ अभिहारो ऽभिग्रहणं, निहारो ऽभ्यवकर्षणम् ।
अनुहारो ऽनुकारः स्यादर्थस्याऽपगमे व्ययः ॥

2 Stream.
6 Forbearance.

१८ प्रवाहस् तु प्रवृत्तिः स्यात्, प्रवहो गमनं बहिः ।
वियामो वियमो यामो यमः संयाम-संयमौ ॥
1 Going forth; issuing.

2 Incantation to destroy.

१९ हिंसाकर्माऽभिचारः स्याज्, जागर्या जागरा द्वयोः ।
2 Waking, watching.

2 Obstacle; impediment.

विघ्नोऽन्तरायः प्रत्यूहः, स्यादुपघ्नोऽन्तिकाश्रये ॥
2 Contiguous support.

2 Enjoyment.
2 Encompassing; surrounding.
2 Separation.

२० निर्वेश उपभोगः स्यात्, परिसर्पः परिक्रिया ।
विधुरं तु प्रविश्लेषे, ऽभिप्रायश् छन्द आशयः ॥
3 Meaning; intention.

द्वयोस्तु साम्यं स्त्रीत्वात् ॥ १५ ॥ (अपहारः) हानिरित्यर्थः । उपसर्गवैचित्र्यादर्थभेदः । (समाहारः) अनेकस्यैकत्राध्यावापः । (प्रत्याहारः) एकत्र ढौकनं—अन्नादिकविषयेभ्य इन्द्रियाणामाकर्षणं च । (विहारः) क्रीडासंचारः ॥ १६ ॥ (अभिहारः) आभिमुख्येन हरणम् । (निर्हारः) युक्त्या निःसारार्कषणम् । अनु सादृश्ये । (व्ययः) व्यय वित्तसमुत्सर्गे ॥ १७ ॥ प्रारम्भो वहनस्य प्रवाहः कार्यारम्भः अविच्छिन्ना जलादेः प्रवृत्तिर्वा । (प्रवहः) गोचरसंचरेति (३।३।११९ / ३२९८) साधुः, बाहुलकादज्वा । द्वौ द्वौ भिन्नार्थौ, विविधं यमनं वियामः, उपरतिमात्रं यमः, संयमनं संयमः, यमःसमुपनिविषुचेति (३।३।६३ / ३२४०) वा घञ् ॥ १८ ॥ अभिभवितुं चरणं मारणोच्चाटनादिकृत्यासाधनम् । (जागर्या) इच्छा (३।३।१०१ / ३२७८) इत्यत्र जागर्तेरकारो वा वक्तव्यः (वा० २२१६ / ३२७८) पक्षे क्यप्, जाग्रोऽविचिण्णल्ङित्सु (७।३।८५ / ३४८०) इति गुणः, घञि तु जागरः । विहन्त्यस्मिन् विघ्नः, घञर्थे कविधानम् (वा० २२०४ / ३२३४), विहन्यते कार्यमनेन वा । अन्तरायनं कार्यव्यवधानमन्तरायः । प्रतीपमूहनं प्रत्यूहः । उपसमीपे हन्यते गम्यतेऽस्मिन्नुपघ्नः, उपघ्न आश्रये (३।३।८५ / ३२६३) इति साधुः ॥१९॥ निःपूर्वो विशिरुपभोगार्थे । सर्वत्राऽत्र प्रत्यये तन्त्रम्, अतो निर्वेशनमुपभुक्तिः, उपसर्पणं, परिकर इत्याद्युन्नेयम् । समन्तात्सर्पणं परिसर्पः । विघटि-[ट्टि] ता धूः कार्यभारोऽत्र विधुरमिति प्रतीच्याः, विरुद्धं धान (?) मित्युदीच्याः (अभिप्रायः) प्रीङ् कान्तौ । छन्दयति— आह्लादयते छन्दः, अच् । आशेरतेऽस्मिन्

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh

2 Abridgment.
2 Contradiction.
2 Perambulation.
3 Stay.

२१ संक्षेपणं समसनं, पर्यवस्था विरोधनम् ।
परिसर्या परीसारः स्यादास्या त्वासना स्थितिः ॥

2 Diffusion.
1 Prolixity.
2 Rubbing of the person.

२२ विस्तारो विग्रहो व्यासः, स च शब्दस्य विस्तरः ।
संवाहनं मर्दनं स्याद्, विनाशः स्याददर्शनम् ॥ 2 Disappearance.

2 Acquaintance.
2 Spreading.
2 Scarcity.
2 Proximity.

२३ संस्तवः स्यात् परिचयः, प्रसरस् तु विसर्पणम् ।
नीवाकस् तु प्रयामः स्यात्, संनिधिः संनिकर्षणम् ॥

3 Reaping.
2 Occasion; opportunity.

२४ लवो ऽभिलावो लवने, निष्पावः पवने पवः । 3 Winnowing; cleaning.
प्रस्तावः स्यादपसरस्, त्रसरः सूत्रवेष्टनम् ॥ 2 A Shuttle.

2 First pregnancy of cows.
2 Intellectual faculty.
2 Difficult progress.

२५ प्रजनः स्यादुपसरः, प्रश्रय-प्रणयौ समौ । 2 Affectionate solicitation.
धीशक्तिर् निष्क्रमो, ऽस्त्री तु संक्रमो दुर्गसंचरः ॥

2 Act tending to a main object.
2 Haste. hurry.

२६ प्रत्युत्क्रमः प्रयोगाऽर्थः, प्रक्रमः स्यादुपक्रमः । 2 Beginning.
स्यादभ्यादानमुद्घात आरम्भः, संभ्रमस् त्वरा ॥

भावा इत्याशयः ॥ २० ॥ संगृहीतो [वि] क्षेपो विप्रकीर्णता संक्षेपणम् । एवं समसनम् । पर्यवस्थानं (पर्यवस्था) । पर्यन्ते समन्ताद्वा सरणं परिसर्या, परिचर्या-परिसर्यामृगयाटाट्यानामुपसंख्यानात् (वा० $\frac{२२१५}{३२७८}$) क्यप् । (आस्या) वास-रूपत्वात् वाऽसरूपोऽस्त्रियाम् ($\frac{३।१।९४}{२८३०}$) ण्यत् । (आसना) ण्यासश्रन्थेति ($\frac{३।३।१०७}{३२८४}$) युच् ॥ २१ ॥ (विस्तारः) प्रथने वावशब्दे ($\frac{३।३।३३}{३२०४}$) इति घञ् । विस्तीर्णं ग्रहणं विग्रहः विविधमसनं व्यासः । (विस्तरः) घञः शब्दे निषेधाद् (अप्) । संवाहनं स्पर्शसुखमिति तु लक्ष्यम् (?) ॥ २२ ॥ संगतं स्तवनं संस्तवः, धातोरनेकार्थस्य चोपसर्गेणैपोऽर्थो द्योत्यते । समन्ताच्चयनं परि-चयः । प्रकर्षेण निकटे सरणं प्रसरः, बाहुलकादप् । नियतं वचनं नीवाकः, तुलाकृतं न्यूनाधिक्यं क्रयादरो वा । संनिपूर्वो धाञ् नैकट्यार्थे ॥२३॥ (अभिलावः) निरभ्योः पूल्वोः ($\frac{३।३।२८}{३९९९}$) इति घञ् । (निष्पावः) धान्यादेर्निर्बुसीकरणम् । प्रसङ्गेन स्तवनं प्रस्तावः, प्रे द्रुस्तुस्रुवः ($\frac{३।३।२७}{३९९८}$) इति घञ् । त्रस्यति चलति त्रसरः, सूत्रं वेष्टयते यत्र वानार्थम् ॥ २४ ॥ प्रजायतेऽस्मिन् प्रजनः पशूनां गर्भग्रहणकालः, (सि. कौ. सू. ३२४८) जनिवध्योश्च ($\frac{७।३।३५}{३५९२}$) इति वृध्यभावः । (उपसरः) प्रजने सर्तेः ($\frac{३।३।७१}{३२४८}$) इत्यप् । (प्रसरः) प्रीत्या प्रार्थनम् । धीशक्तिः प्रज्ञासामर्थ्य-मष्टधा । संक्रामन्त्यनेन संक्रामः, संक्रम इत्येके, सेत्वादिः, यत्कौटिल्यः– मुखसमः संक्रमः (?) । दुर्गं संचरन्त्यनेन, गोचरसंचरेति ($\frac{३।३।११९}{३२९८}$) साधुः, घञि

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh

2 Impediment. २७ प्रतिबन्धः प्रतिष्टम्भो, ऽवनायस् तु निपातनम् ।
2 Causing to descend.
2 Apprehension. 2 Smearing. उपलम्भस् त्वनुभवः, समालम्भो विलेपनम् ॥

2 Separation of lovers. २८ विप्रलम्भो विप्रयोगो, विलम्भस् त्वतिसर्जनम् ।
2 Liberality.
2 Celebrity. विश्रावस् तु प्रतिख्यातिरवेक्षा प्रतिजागरः ॥ 2 Attention.

3 Reading lecture. २९ निपाठ-निपठौ पाठे, तेम-स्तेमौ समुन्दने । 3 Wetness.
3 Ditress from disease. आदीनवाऽऽस्रवौ क्लेशे, मेलके संग-संगमौ ॥
3 Meeting; union.

5 Research. ३० संवीक्षणं विचयनं मार्गणं मृगणा मृगः ।
4 Embrace. परिरम्भः परिष्वङ्गः संश्लेष उपगूहनम् ॥

5 Sight; seeing; looking. ३१ निर्वर्णनं तु निध्यानं दर्शनाऽऽलोकनेक्षणम् ।
4 Rejection; disallowance. प्रत्याख्यानं निरसनं प्रत्यादेशो निराकृतिः ॥

तु संचारः ॥२५॥ प्रयुक्तिः कर्मारम्भे प्रयोगः, प्रकृष्टो युद्धार्थो (योगः) (प्रत्युत्क्रमः), [प्रकृष्टार्थे प्रत्युदौ प्रार्थौ], प्रत्युत्क्रान्तिर्वा । (प्रक्रम इ०) प्रोपौ– आरम्भार्थे । आभिमुख्येनादानमभ्यादानम् । उद्धननमुद्घातः, उपोद्घातोऽपि, यदाहुः–चिन्तां प्रकृतसिध्यर्थामुपोद्घातं प्रचक्षते (?) । (त्वरा) त्वरेर्घटादित्वात् पित्त्वादङ्, पिद्भिदादीति (३।३।१०४) ॥ २६ ॥ प्रतिष्टम्भनं रोधः, प्रतेस्तन्भेः (८।३।६७) इति षत्वम् । अवनयनमवनायः खलीकारः, अवोदोर्नियः (३।३।२६) इति घञ् । नियातनं, यत निकारोपस्कारयोः । उपलब्धिरुपलम्भः, उपसर्गात्खल्घञोः (७।१।६७) इति नुम् । समाङ्पूर्वो लभिश्चर्चार्थे ॥ २७ ॥ विरहो विसंवादो वा । (विलम्भः) दानार्थे । (विश्रावः) वौ क्षुश्रुवः (३।३।२५) इति घञ्, प्रसिध्यर्थे । (अवेक्षा) अवधानार्थे ॥ २८ ॥ (निपाठ इ०) नौ गदनदेति (३।३।६५) वा घञ् । (तेम इ०) तिम ष्टिम ष्टीम आर्दीभावे । (समुन्दनं) उन्दी क्लेदने । (आदीनवः) दीङ् क्षये । आस्रवन्तीन्द्रियाण्यनेनास्रवः, यज्ञैनाः– जीवाजीवास्रवसंवरनिर्जरबन्धमुक्तयः सप्त पदार्थाः । मेलनं मेलः, सिलिलौकिकः । सञ्जनं सङ्गः, घञ् । संगतिः संगमः गृहवृद्ध निश्चिगमश्च (३।३।५८) इत्यप् ॥ २९ ॥ अन्वीक्षणमन्वेषणमित्येके पेठुः । (मार्गणं) मार्ग अन्वेषणे, ल्युट् । (मृगणा) मृग अन्वेषणे, युच्, अदन्तत्वाद् गुणाभावः । मृगः एरच् (३।३।५६), एरजण्यन्तानाम् (ज्ञा०?) इत्यस्य प्रायिकत्वात् । गवेषणं च । (परिरम्भः) रभेरशब्लिटोः (७।१।६३) इत्यचि नुम्, आलिङ्गनार्थे ॥३०॥ (प्रत्याख्यानं, इ०) निराकरणार्थे ॥३१॥ (उपशायः) व्युपयोःशेतेःपर्याये (३।३।३९)

CC-0. Agamnigam Foundation. Digitized by eGangotri, Chandigarh

2 Watching alternately.
4 Censure; reproach.

३२ उपशायो विशायश् च पर्याय-शयनाऽर्थकौ ।
अर्तनं च ऋतीया च हृणीया च घृणाऽर्थकाः ॥

4 Contrariety; opposition.
4 Transgression.

३३ स्याद् व्यत्यासो विपर्यासो व्यत्ययश् च विपर्यये ।
पर्ययोऽतिक्रमस् तस्मिन्नतिपात उपात्ययः ॥

1 Mission after calling.
1 Place where the priests stand.

३४ प्रेषणं यत् समाहूय तत्र स्यात् प्रतिशासनम् ।
स संस्तावः क्रतुषु या स्तुति-भूमिर् द्विजन्मनाम् ॥

1 A carpenter's work-bench.
2 Tool for cutting corn and grass.

३५ निधाय तक्ष्यते यत्र काष्ठे काष्ठं स उद्धनः ।
स्तम्बघ्नस् तु स्तम्बघनः स्तम्बो येन निहन्यते ॥

1 An auger.
1 Round; circular
2 Winnowing of corn.

३६ आविधो विध्यते येन तत्र, विष्वक्-समे निघः ।
उत्कारश् च निकारश् च द्वौ धान्योत्क्षेपणाऽर्थकौ ॥

1 Swallowing, etc.
4 Stopping, ceasing.
4 Spitting.

३७ निगारोद्गार-विक्षावोद्ग्राहास् तु गरणाऽऽदिषु ।
आरत्यवरति-विरतय उपरामे, ऽथा ऽस्त्रियां निष्ठेवः ॥

इति घञ् । पर्यायः क्रमः, (यथा)– तवाऽद्य राजोपशायः । (सि. कौ. ३२११) ऋतिः सौत्रो घृणार्थः, ऋतेरीयङ् (३।१।२९) । हृणीङ् कण्डूवादिः, यक्, अ प्रत्ययात (३।३।१०२) ॥३२॥ व्यतिक्रम्यासनं व्यत्यासः । विपरीतासनं विपर्यासः, अस्यतेर्घञ् । विपरीतायनमिति णोऽचि विपर्ययः, परावनुपात्यय इणः (३।३।२५) इत्यपि विपर्ययः । परित्यज्यायनं पर्ययः, परावनुपात्यय इणः (३।३।३८) इति– उपात्यये क्रमोल्लङ्घने घञ् नास्ति । अतिक्रम्य पतनं यथा– कालातिपातः । उपपन्नस्यात्ययोऽतिक्रमणमुपात्ययः ॥ ३३ ॥ आकारणं कृत्वा यद् भृत्यानां कार्येषु विसर्जनं तत्प्रतिशासनम् । समं स्तूयतेऽस्मिंश्छन्दोगैः संस्तावः, यज्ञे समि स्तुवः (३।३।३१) इति घञ् ॥ ३४ ॥ उद्धन्यतेऽस्मिन्नुद्घनः, उद्घनोऽत्याधानम् (३।३।८०) इति साधुः । (स्तम्बघ्नः) स्तम्बे क च (३।३।८३) इति कः, स्तम्बस्तृणं विरुच्च । (स्तम्बघनः) अप् च ॥ ३५ ॥ (आविधः) व्यधेः, घञर्थे कविधानम् (वा० ३।३।४४) समन्तात्समः, समस्तुल्यारोहपरिणाहः । नियतं हन्यते निघः, निघो निमितम् (३।३।८७) इति साधुः । (उत्कारः) कॄ धान्ये (३।३।३०) इति घञ्, उन्योरित्यनुवृत्तेः, उन्न्योर्ग्रः । (३।३।२९) ऊर्ध्वं क्षेपो राशीकरणं वा ॥३६॥ (निगार इ०) निगरणमुद्गरणं च, उन्न्योर्ग्रः (३।३।२९) इति घञ् । विक्षा वः काशे [से], वौ क्षुश्रुवः (३।३।२५) इति घञ् । (उद्ग्राहः) उद्ग्रहणं, उदि ग्रहः (३।३।६५) इति

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

३८ निष्ठ्यूतिर् निष्ठेवन-निष्ठीवनमित्यभिन्नानि ।
2 Speed. 2 Conclusion. जवने जूतिः, सातिस् त्ववसाने स्यादथ ज्वरे जूर्तिः ॥
2 Fever.

1 Driving of cattle. 1 Curse. ३९ उदजस् तु पशु-प्रेरणमकरणिरित्याऽऽदयः शापे ।
1 Aggregate patronymic. गोत्राऽन्तेभ्यस् तस्य वृन्दमित्यौपगवकाऽऽदिकम् ॥

2 Multitude of loaves and pies. ४० आपूपिकं, शाष्कुलिकमेवमाद्यम-चेतसाम् ।
1 Multitude of boys. 1—of coadjutors. माणवानां तु माणव्यं, सहायानां सहायता ॥

1—of ploughs. 2—of priests. ४१ हल्या हलानां, ब्राह्मण्य-वाडव्ये तु द्विजन्मनाम् ।
1—of ribs and back-bones. द्वे पर्शुकानां पृष्ठानां पार्श्वं, पृष्ठ्यमनुक्रमात् ॥

2—of threshing floors. ४२ खलानां खलिनी खल्याऽप्यथ मानुष्यकं नृणाम् । 1—of men.
1—of villages, etc. ग्रामता, जनता, धूम्या, पाश्या, गल्या, पृथक्-पृथक् ॥
1—of people. 1 Accumulation of smoke. 1 Abundance of fetters.
1 Abundance of reeds, ropes and throats.

घञ् ॥ ३७ ॥ (उपरामः) निवृत्त्यर्थे, नोदात्तोपदेशस्य मान्तस्यानाचमेः (७।३।३४/२७६३) इति वृद्धिनिषेधो नास्ति–अनुदात्तोपदेशत्वात्, यम उपरमे इति निपातनात्तूपरमः । (निष्ठीवनं) ष्ठिवुसिव्योर्ल्युटि वा दीर्घः (स. कं. २।४।१६७) ॥ ३८ ॥ (जूतिः) ऊतियूतिजूतिसातिहेतीति (३।३।९७/३२७४) साधुः, जवनमित्येके । (सातिः) षोन्तकर्मणि । (जूर्तिः) ज्वरत्वरस्त्रिव्यतीति (६।४।२०/२६५४) ऊत्वम् । (उदजः) समुदोरजः पशुषु (३।३।६९/३२४६) इत्यप्, अघञपोः (२।४।३८/३२१६) इति वी नास्ति । न करणं (अकरणिः), यथा–अकरणिरिह भूयादप्रशस्तस्य धातुः (?) तस्याजननिरेवास्तु शिशु० (२-४५), आक्रोशे नञ्यनिः (३।३।११२/३३८९) । तथा–आक्रोशेऽवन्योर्ग्रहः (३।३।४५/३२२०), निग्राहस्ते वृषल भूयात्, (?) अवग्राहः ॥ ३९ ॥ औपगवानां समूहः (औपगवकम्) । आदिशब्दाद् गार्भकं, दाक्षकं, गोत्रोक्षोष्ट्रेति (४।२।३९/१२४६) वुञ् । तस्य वृन्दमित्येव–आ वर्गसमाप्तेः । अपूपानां समूह आपूपिकम्, अचित्तहस्तिधेनोष्ठक् (४।२।४७/१२५६) । आदिशब्दात्पपेटिकादिः [वण्डकादिः] ॥ ४० ॥ (माणव्यं) ब्राह्मणमाणववाडवाद्यत् (४।२।४२/१२५०) । (सहायता) ग्रामजनबन्धुसहायेभ्यस्तल् (४।२।४३/१२५१) । (हल्या) पाशादिभ्यो यः (४।२।४९/१२५८) ॥ ४१ ॥ पर्शूनां समूहः पार्श्वम्, पर्श्वा णस् वक्तव्यः (वा० २७२४/१२५१) । (पृष्ठ्यं) पृष्ठादुपसंख्यानात् (वा० २७२०/१२५०) यत्, यज्ञविषयेऽदः स्मरन्ति । (खलिनी, इ०) खलगोरथात् (४।२।५०/१२५९), इनित्रकट्यचश्च (४।२।५१/१२६०) इति–इनिर्यच्च । मनुष्याणां समूहः (मानुष्यकं), गोत्रोक्षोष्ट्रेति (४।२।३९/१२४६) वुञ्, प्रकृत्या अके राजन्यमनुष्य-

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

1--of thousands, etc.

४३ अपि साहस्र-कारीष-वार्मणाऽऽथर्वणाऽऽदिकम् ।

1 Abundance of dry cow dung. 1 Abundance of hides or shields. 1 Collection of prayers.

इति संकीर्ण-वर्गः २, अत्र मूलश्लोकाः ४२॥, क्षे० श्लो० ०.

अथ नानार्थ-वर्गः ३

१ नानाऽर्थाः के ऽपि कान्ताऽऽदि-वर्गेष्वेवाऽत्र कीर्तिताः ।
भूरि-प्रयोगा ये येषु पर्यायेष्वपि तेषु ते ॥

1 Sky. ether. 1 Heaven. 1 Verse. 1 Glory.

२ आकाशे त्रिदिवे नाको, लोकस् तु भुवने जने, ।
पद्ये यशसि च श्लोकः, शरे खड्गे च सायकः, ॥

1 World. 1 People. 1 Arrow. 1 Sword.

1 Shakal. 1 God of water.

३ जम्बुकौ क्रोष्टु-वरुणौ, पृथुकौ चिपिटाऽर्भकौ, ।

1 Fried rice flattened. 1 Infant.

1 Sight. look. 1 Light.

आलोकौ दर्शन-द्योतौ, भेरी-पटहमानकौ, ॥

1 A double drum. 1 A large drum.

युवानः (वा० $\frac{४२१४}{१२४७}$) इति यलोपाभावः ॥ ४२ ॥ ग्रामादिसमूह एते वर्तन्ते, ग्रामजनेति ($\frac{४।२।४३}{१२५१}$) तल्, पाशादिभ्यश्चेति ($\frac{४।२।४९}{१२५८}$) यः, भिक्षादिभ्योऽण् ($\frac{४।२।३८}{१२४४}$) । पृथक्पृथगिति परस्परं पर्यायत्वाभावः । वर्मिणां समूहो वार्मणम्। आदिशब्दाच्चार्मणाङ्गारादि । वाच्यं चात्र–परभागो गुणोत्कर्षः प्रतिपत्तिः प्रगल्भता। श्रन्थनं ग्रन्थनं गुम्फः संदर्भो रचना न ना ॥ प्रणिपातस्त्वनुनयः प्रणयः सान्त्वना न ना । दवथुः परितापः स्यादनुतापो विसूरितम् ॥ क्रीडा विनोदः खेदस्तु निर्वेदश्चावसन्नता । आप्लवः प्लवनं गर्धो धनायाकूतमाशयः ॥ अङ्कपाली परिष्वङ्ग आसारं त्वासरद्बलम् । विगानं वचनीयत्वमत्याधानमतिक्रमः ॥ हानं त्यागस्तुला कक्षा क्रिया चेष्टा विकल्पनम् । वितर्कस्तर्क आलस्यं कौसीद्यमजिगीषुता (?) ॥४३॥ इति संकीर्णवर्गः । २ ।

इह तावत्कान्तखान्तादिवर्गेष्वेव नानार्थाः कीर्तिताः । तन्मध्याच्च ये केऽपि येष्वर्थेषु भूरिप्रयोगाः प्रचुरव्यवहारास्ते तत्पर्यायेष्वपि कथिता इति पौनरुक्त्यादि-दोषो नोद्भावनीयः । कान्ता इतो वक्ष्यन्ते । एवं खान्तगान्तादौ द्रष्टव्यम् ॥ १ ॥ व्योम्नि स्वर्गे च नाको वर्तते, नास्त्यकमश्रेयोऽत्रेति। लोक्यते लोकः, यथा– ब्रह्मलोकः, गतानुगतिको लोकः (हितोप. १।१०)। पद्ये पदबद्धे वृत्ते, श्लोक्यते श्लोकः, श्लोकृ संघाते। स्यति– अन्तं करोति सायकः ॥ २ ॥ (जम्बुकः) जमु अदने। पर्यते वर्धते पृथुकः। चिपिट आर्द्रसस्याभ्योषः । (आलोकः) भावे करणे च घञ्, अवलोकनप्रकाशार्थौ ।

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh

1 Mark. 1 Flank. ४ उत्सङ्ग-चिह्नयोरङ्कः, कलङ्को ऽङ्काऽपवादयोः, ।
1 Spot. 1 Defamation.

1 The chief of snakes. तक्षको नाग-वर्द्धक्योरर्कः स्फटिक-सूर्ययोः, ॥
1 A carpenter. 1 Crystal. 1 The sun.

1 Wind. 1 *Brahma*. ५ मारुते वेधसि ब्रह्मे पुंसि कः, कं शिरोऽम्बुनोः, ।
1 Sun. 1 Soul. 1 Head. 1 Water.

1 Shrivelled grain. 1 Brevity. स्यात् पुलाकस् तुच्छ-धान्ये संक्षेपे भक्त-सिक्थके, ॥
1 Lump of boiled rice.

1 An owl. ६ उलूके करिणः पुच्छ-मूलोपान्ते च पेचकः, ।
1 Root of a tail of an elephant.

1 Water-pot. 1 A *Buddha* or saint. कमण्डलौ च करकः, सुगते च विनायकः, ॥

1 Cubit. 2 A span. 1 A Scorpion. ७ किष्कुर् हस्ते वितस्तौ च, शूक-कीटे च वृश्चिकः, ।

1 An integrant part. 2 Contrary. प्रतिकूले प्रतीकस् त्रिष्वेक-देशे तु पुंस्ययम्, ॥

1 Gentiana. 1 A fragrant grass. ८ स्याद् भूतिकं तु भूनिम्बे कत्तृणे भूस्तृणे ऽपि च, ।
1 Another sort. 1 Andropogon schoenanthus.

1 Moon light night. ज्योत्स्निकायां च घोषे च कोशातक्यथ कट्फले ॥
1 Sorts of Cucurbitaceous plants. 1 Kayaphal.

A white sort of Mimosa. 1 Incense. 1 Meal of seame. ९ सिते च खदिरे सोमवल्कः स्यादथ सिल्हके ।
तिल-कल्के च पिण्याको, वाह्लीकं रामठे ऽपि च, ॥ Asafœtida.

अन्तस्तन्त्रीका ढक्का भेरी । पटहो दुन्दुभिः, समन्तादणत्याणकः ॥ ३ ॥ अमन्त्यस्मिन्बालादय इत्यङ्कः, अङ्क्यतेऽनेन च, अकि, लक्षणे, यथा मृगाङ्कः । कल्यते क्षिप्यते कलङ्कः । अङ्कोऽत्र चिह्नम् । नागो नागविशेषः । वर्धकिस्तक्षा । अर्च्यतेऽर्कः वृक्षेऽपि ॥ ४ ॥ आत्मन्यपि कः ।° कं सुखेपि च, कायति काम्यते कचति (ते) वा । पुलं विस्तारम कति पुलाकः, यथा- पुलाका इव धान्येषु (मनु १०-१२५)। संक्षेपे क्षिप्रे, यथा- पुलाककारी विपुलाशयः स्यात् (?)। सिक्थे, यथा- स्थालीपुलाकन्यायेन (?) ॥ ५ ॥ (पेचकः) पिचि गतौ पचिर्वा । (करकः) चशब्दाद्घर्षोपले दाडिमे च, कृ विक्षेपे । (विनायकः) चशब्दाद् गणपतौ धर्मराजे च विनेतृत्वात् ॥ ६ ॥ कीयते ज्ञायतेऽनेन किष्कुः, चतुर्विंशत्यङ्गुलं द्वादशाङ्गुलं च मानम् । वृश्चतीति (वृश्चिकः) शूकवान्कीटः कण्टकी च कृमिः । चाद्राशौ मदन्तिकायां च (वृश्चिकः) । प्रतीपमेति प्रतीकः । एकदेशोऽशः, यथा सप्रतीकः श्लोकः । द्वीपेऽपि (प्रतीकः) ॥ ७ ॥ एते वनौषधिवर्गे व्याख्याताः । तथा भूनिम्बः किराततिक्तकः । कट्फलः श्रीपर्णी । भूस्तृणं छत्त्रा । यवान्यां च (भूतिकं) । ज्योत्स्निका पटोलिका । घोषोऽपामार्गः ॥ ८ ॥ पीड्यते पिण्याकः । वाह्लीकमित्येके ।

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh

1 INDRA.
1 Bdellium.
१० महेन्द्र-गुग्गुलूलूक-व्यालग्राहिषु कौशिकः, । 1 Owl. 1 Snake-catcher.

1 Disease. 1 Pain.
1 Fear. 1 Small.
रुक्-ताप-शङ्कास्वातङ्कः, स्वल्पे ऽपि क्षुल्लकस् त्रिषु, ॥

1 The moon.
1 Long lived.
११ जैवातृकः शशाङ्के ऽपि खुरे ऽप्यश्वस्य वर्तकः, । A horse's hoof. 1 A quail.

1 A leopard.
1 An aromatic seed.
व्याघ्रे ऽपि पुण्डरीको ना, यवान्यामपि दीपकः, ॥ 1 An elephant to uphold the world.

1 Ape. 1 Shakal.
1 Dog.
१२ शालावृकाः कपि-क्रोष्टु-श्वानः, स्वर्णे ऽपि गैरिकम्, । 1 Gold. 1 Red chalk.

1 Pain.
1 Falsehood.
पीडाऽर्थेऽपि व्यलीकं स्यादलीकं त्वप्रिये ऽनृते, ॥ 1 Any thing displeasing.

1 Disposition.
1 Race; family.
१३ शीलाऽन्वयावनूके द्वे, शल्के शकल-वल्कले, । 1 Part. 1 Scale of a fish. 1 Bark.

1 A weight.
1 Gold.
साऽष्टे शते सुवर्णानां हेम्न्युरो-भूषणे पले ॥ 1 Ornament on the breast.

1 Dirt 1 Sin.
1 Calamity.
१४ दीनारे ऽपि च निष्को ऽस्त्री, कल्को ऽस्त्री शमलैनसोः ।

1 Fraud.
दम्भे ऽप्यथ पिनाको ऽस्त्री शूल-शङ्करधन्वनोः, ॥ 1 Trident. 1 SIVA's bow.

अपिशब्दाद्वह्लीकदेशोत्पन्नेऽश्वादौ हिङ्गौकुङ्कुमे च ॥ ९ ॥ कुशिकस्यापत्यं, कोशो वप्रयोजनमस्य कौशिकः । (आतङ्कः) तकि कृछ्रजीवने । स्वल्पः खलः । अपिशब्दाद्दरिद्रे कनिष्ठेऽपि, क्षोदः क्षुत्– क्षुदं क्षुधं च लाति क्षुल्लकः ॥ १० ॥ जीवेरातृकन्वृद्धिश्च (उ० ७९) । अपिशब्दादायुष्मति (जैवातृकः) । अपिशब्दात्पक्षिविशेषे (वर्तकः (पुण्डरीकः) पुणेः पुण्डेश्च रूपम् । अपिशब्दाद्दिग्गजे, सिताम्बुजसितच्छत्त्रयोस्तु नपुंसकं (पुण्डरीकम्) । यवान्यजमोदा । अदिशब्दाद्दीपेऽलंकारे जीरकेऽपि (दीपकः) ॥ ११ ॥ स्यन्ति साला आवृण्वन्ति (सालावृकाः) । धातुविशेषेऽपिशब्दात् (गैरिकं), गिरौ भवं गैरिकं, गिरिणा विग्रहो गिरिकात्प्रत्ययोऽव्यविकन्यायेन । अपिशब्दादप्रिया कार्यविलक्षविपर्ययेषु (व्यलीकं) । कामजेऽपराधेऽपि, विशेषेणालीकं, व्यलीकमपि च व्यङ्गमिति च माला । अल्यते वार्यतेऽलीकं न लीयते वा, अलीकमहितं विदुरिति कात्यः । (अलीकं) ललाटेऽप्याहुः ॥ १२ ॥ अनूच्यति समवैत्यनूकं, उच समवाये, न्यङ्कादिः ($\frac{७।३।५३}{२८६४}$) । द्वे इत्येव, शलति पृथग्भवति शल्कं खण्डः । वल्कलं वार्क्षी त्वक् । सहाष्टाभिर्वर्तते साष्टं, बहुव्रीहौ संख्येये डजबहुगणात् ($\frac{५।४।७३}{८५१}$) । सुवर्णं षोडश माषकाः । पलं सुवर्णाश्चत्वारः । दीनैरर्यते दीनारं रूपकम् । निःशेषेण काम्यते निष्कः, आकर्षोऽपि ॥ १३ ॥ कल्यते कल्कं द्रवाधश्चूर्णं विनीयाख्यं, शमलं विष्टेत्येके । एनः पापं, यथा–तपो न कल्कोऽध्ययनं न कल्कः (?) । अपिनह्यते पिनाकं

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh

1 A female elephant.
1 A milch cow.
1 Agony.
1 Explanatory verse.

१५ धेनुका तु करेण्वां च, मेघ-जाले च कालिका ।
1 Cloudiness. 1 Multitude of clouds.
कारिका यातना-वृत्त्योः, कर्णिका कर्ण-भूषणे ॥ 1 An ear-ring.

१६ करि-हस्ते ऽङ्गुलौ पद्म-बीज-कोश्यां, त्रिषूत्तरे, ।
1 Tip of elephant's trunk. 1 The middle finger. 1 The Pericat of a lotus.

1 Handsome.
1 Chief; Principal.

वृन्दारकौ रूपि-मुख्यावेके मुख्याऽन्य-केवलाः, ॥
1 One. 1 Chief. 1 Other. 1 Alone.

1 Hypocritical.

१७ स्याद् दाम्भिकः कौक्कुटिको यश् चाऽदूरेरितेक्षणः, ।
1 Never looking before but stepping with caution.

1 Attentive.
2 Indolent.
1 Side of a hill.
1 Bracelet. 1 Circle.
1 A thorn. 1 Dip of a needle. 1 Paltry foe.

ललाटिकः प्रभोर् भाल-दर्शी कार्याऽक्षमश् च यः, ॥
'भूभृन्नितम्ब-वलय-चक्रेषु कटको ऽस्त्रियाम्, ॥ १ ॥
सूच्यग्रे क्षुद्र-शत्रौ च रोमहर्षे च कण्टकः, ॥ 1 Hair on end.
पाकौ पक्ति-शिशू, मध्य-रत्ने नेतरि नायकः, ॥ २ ॥
1 Act of cooking ; 1 A child ; 1 A Chief gem of a necklace. 1 Leader.

1 Waist band.
1 Tiger. 1 Hunter.
1 Multitude ;
1 Guru ; a guide.
1 A small village.
1 Plank.
1 Pollens.

पर्यङ्कः स्यात् परिकरे, स्याद् व्याघ्रे ऽपि च लुब्धकः, ।
पेटकस् त्रिषु वृन्दे ऽपि, गुरौ देश्ये च देशिकः, ॥३॥
खेटकौ ग्राम-फलकौ, धीवरे ऽपिच जालिकः, । A fisher man.
पुष्प-रेणौ च किञ्जल्कः, शुल्को ऽस्त्री स्त्री-धनेऽपि च॥४
1 Price. 1 A Dowery.

त्रिशूलं शांकरमेवात्र ॥ १४ ॥ चकारान्नवप्रसूतायां गवादौ (धेनुका), हस्तिन्यां तु नामैतत् । कृपाणीधेनुसमाभवानीषु च (धेनुका)। चात्सुवर्णादेर्दोषे सुरायां च, कालो वर्णः समयश्चास्त्यस्याः कालिका, कृष्णा वृद्धि[ष्टी]श्च । कृञ् हिंसायां, कारिका नारकी व्यथा । करणं कृतिश्च कारिका, पर्यायार्हणोत्पत्तिषु च (३।३।१११ / ३२८८) इति ण्वुच् । कारिका यातनावृत्त्योरित्येके, वृत्तिः श्लोकैर्विवरणं, कारिके वृत्तियातने इति दुर्गः । कर्णस्यालंकारः कर्णिका, कर्णललाटात्कनलंकारे (४।३।६५ / १४४४), द्वयोस्त्विववार्थे, इवेप्रतिकृतौ (५।३।९६ / २०५१); संज्ञायां च (५।३।९७ / २०५२) ॥१५॥ खान्तेभ्यः प्राग्वाच्यलिङ्गाः । वृन्दमस्त्यस्येति (वृन्दारकः), शृङ्गवृन्दाभ्यामारकन् (वा० ३।२।१४ / १९२८)। रूपमस्त्यस्य रूपी । देवोऽप्युपचारात् (वृन्दारकः) । संख्यायां च, यत्कात्स्न्यःप्रधानान्यासहायेषु संख्यायां चैक इष्यते ॥ १६ ॥ दम्भः प्रयोजनमस्त्यस्य दाम्भिकः । यतः कुक्कुटी माया कुक्कुटीपादपातश्च, तौ पश्यति कौक्कुटिकः, संज्ञायां ललाटकुक्कुट्यौ पश्यति (४।२।४६ / १५५६) इति ठक् । ललाटं कोपप्रसादचिह्नं पश्यति, ललाटमेव वा दूरात्कार्येष्वलिप्तः सन् पश्यति लालाटिकः। भालं ललाटं, भावदर्शीत्येके पेठुः ॥१७॥

CC-0. Agamnigam Foundation, Chandigarh

1 Wave.
2 Longing.

'स्यात् कल्लोले ऽप्युत्कलिका, वार्द्धकं भाव-वृन्दयोः, ।

1 Old age. 2 Group of old men.

1 Female elephant.
2 Harlot.

करिण्यां चापि गणिका, दारकौ बाल-भेदकौ, ॥५॥

1 Child. 2 Tearing.

1 Blind.
2 Wreked.

अन्धे ऽप्यनेडमूकः स्यात्, टङ्कौ दर्पाऽश्मदारणौ, ।

1 Pride. 2 Chisel.

1 An earthen pot.
1 She camel.

मृद्भाण्डेऽप्युष्ट्रिका, मन्थे खजको रसदर्वके' ॥ ६ ॥

1 A churning rod. 2 A spoon.

इति कान्ताः ।

1 Brightness.
2 Ray of light.
3 Flame.

१८ मयूखस् त्विट्-कर-ज्वालास्वलि-बाणौ शिलीमुखौ, ।

1 A bee. 2 An arrow.

1 An auriferous gem.

शङ्खो निधौ ललाटाऽस्थिन कम्बौ न स्त्री, ऽन्द्रियेऽपि खम्, ॥

2 The bone on the forehead. 3 A conch. Shell. 4 A number.
1 Organ of sense. 2 Vacuity. 3 Cypher. 4 Heaven. 5 Sky.

1 Ray of light.
2 Flame.
3 Crest of Peacock. 4 A Branch. 5 Chief.

१९ धृणि-ज्वाले अपि शिखे,

इति खान्ताः ।

1 A mountain.
2 A tree.

शैल-वृक्षौ नगावगौ ।

1 Wind.
2 An arrow.

आशुगौ वायु-विशिखौ, शराऽर्क-विहगाः खगाः, ॥

1 An arrow. 1 The sun. 1 A bird.

1 A bird. 2 The sun.
3 A moth. 4 Corn.

२० पतङ्गौ पक्षि-सूर्यौ च, पूगः क्रमुक-वृन्दयोः, ।

1 Areca. 2 Multitude.

1 Cattle. 2 Deer.
3 An asterism.
4 Search.

पशवो ऽपि मृगा, वेगः प्रवाह-जवयोरपि, ॥

1 Stream. 2 Speed 3 Rapid transition of mind.
4 Call of nature. 5 Force. 6 Amorous sport.

इतः खान्ताः । मिनोत्यन्धकारं मयूखः । त्विड् दीप्तिः । करो रश्मिः । शिली शल्यं मुखेऽस्य (शिलीमुखः) । शं खनति शाम्यति वा शंखः । शंखपद्मौ वैश्रवणनिधी । ललाटप्रांतास्थि शंखः, कम्बौ तु, अर्धर्चादिः ($\frac{२।४।३।१}{८१६}$) । खन्यते खम् । अपिशब्दात्स्वर्व्योम्नोः (खं), शून्ये तूपचारात् ॥ १८ ॥ अपिशब्दाच्चूडाशाखाग्र-मात्रे मयूरचूडा च, शिनोति शीयते वा शिखा । उपलेपेऽपि गोमुखम् । अथ गान्ताः । न गच्छति नगः, नागोऽप्राणिष्वन्यतरस्यां ($\frac{६।३।७७}{७६०}$) इति नञ् प्रकृत्या । (आशुगः) विशिखो बाणः । खे गच्छन्ति खगाः ॥ १९ ॥ पदद्गच्छति पतति वा पतंगः । च शब्दाच्छलभः (पतंगः), शालिविशेषश्च । पूयते पूगः । क्रमुकः पूगवृक्षः । अपिशब्दाद्धरिणो हस्तिविशेषो मृगशीर्षं मार्गणा च (मृगः) । वेति

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh

1 Pollen of flowers. 2 Dust.
२१ परागः कौसुमे रेणौ स्नानीयादौ रजस्यपि, ।
3 Fragrant powder. 4 Eclipse.

1 An elephant. 2 A Snake. 3 A chandala.
गजे ऽपि नाग-मातङ्गावपाङ्गसू तिलके ऽपि च, ॥
1 An outer corner of the eye. 2 A circlet on the forehead.

1 Nature. 2 Relinquishment. 3 Certainty. 4 Chapter. 5 Creation. 6 Persevence. 7 Worldy existance.
२२ सर्गः स्वभाव-निर्मोक्ष-निश्चयाऽध्याय-सृष्टिषु, ।

1 Armour. 2 Means.
योगः संनहनोपाय-ध्यान-संगति-युक्तिषु, ॥
3 Meditation. 4 Union. 5 Junction.

1 Enjoyment. 2 Hire.
२३ भोगः सुखे स्त्र्यादि-भृतावहेश् च फण-काययोः, ।
3 Hood of a serpent. 4 Body of a serpent.

1 Sort of bird. 2 A deer.
चातके हरिणे पुंसि, सारङ्गः शबले त्रिषु, ॥ 3 Antelope. 4 Variegated.

1 An ape. 2 A frog. 3 A bird.
२४ कपौ च प्लवगः, शापे त्वभिषङ्गः पराभवे, ।
1 Curse. 2 Defeat. 3 Oath.

1 A yoke. 2 A pair. 3 An age.
यानाऽऽद्यङ्गे युगः पुंसि, युगं युग्मे कृताऽऽदिषु, ॥
4 Measure of four cubits.

वेगः, विजतेऽनेन वा, घञ् । प्रवाहे यथा–नदी वेगेन शुध्यति (मनु ५–३०८) । जवे यथा–वायुवेगः । अपिशब्दान्मूत्रादिप्रवृत्तौ यथा–वेगान्न धा [वा] रयेद्वात-विण्मूत्रक्षवतृट्क्षुधाः (चरकसं १-७) मलोत्सर्गे प्रभावे शृङ्गारभावे च यथा–चण्डवेगो मन्दवेगः ॥ २० ॥ परागच्छति परागः । स्नात्यनेन स्नानीयं चूर्णम् । रजो धूलिः (परागः) । अपिशब्दात्काद्रवेये सीसे नागकेसरे नागदन्त्यां गजाह्वये जलदे रङ्गे च, न–अगो नागः । चण्डालेऽपि मातङ्गः । मा तङ्गति, मातङ्गापत्यं वा । अपगतोऽङ्-गादपाङ्गः, अपिशब्दान्नेत्रान्ते ॥ २१ ॥ स्वभावे यथा–निसर्गः । निर्मोक्षे त्यागे (यथा)-विसर्गः, मोक्षाभावे वा, सर्गः संसारः । निश्चये यथा–गृहाण शस्त्रं, यदि सर्ग एष ते (रघु० ३–५१) । अधीयतेऽध्यायोऽत्र महाकाव्यादौ विश्रांतिस्थानं, सर्गबन्धो महाकाव्यम् (काव्यादर्शः १–१३) । सृष्टौ यथा–सर्गश्च प्रतिसर्गश्चेति (विष्णुपु०) । उत्साहेऽपि सर्गः । (योगः) संनहनं कवचादि, उपायः सामादिः संनहनाङ्गं कवचादिरित्येके । ध्यानं चित्तवृत्तिनिरोधः, (योगः १–२) । संगतिः श्लेषः युक्तिर्योजनम् । अपूर्वार्थप्राप्तिर्भेषजं विश्रम्भघाती चरश्च योगः ॥ २२ ॥ भुजेरभ्यवहारार्थात्कौटिल्यार्थाच्च घञ् । पण्यस्त्रीणां भृतिर्भाटिः (भोगः) । आदिशब्दात् कर्मकृद्वेतनं, यच्छाश्वतः–(६९) पालनेऽभ्यवहारे च निवशे च पणे स्त्रियाः । भोगः सुखे भुजंगानां शरीरफणयोरपि ॥ चातकस्तोककाख्यः पक्षी, सरति सारं गच्छति सहारङ्गेण वा वर्तते सारङ्गः । गौडः स(श)बलः सारङ्ग इति व्याख्यत् ॥ २३ ॥ चशब्दाद्भेके पक्षिभेदे च (प्लवगः) । शापो मिथ्याभिशंसनम-

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh

1 Heaven. 2 An arrow. 3 A bull. 4 Speech. 5 Thunderbolt. 6 Quarter. 7 An eye. 8 Ray of light. 9 The earth. 10 Water. 11 The Sun.

२५ स्वर्गेषु-पशु-वाणू-वज्र-दिङ्-नेत्र-धृणि-भू-जले ।
लक्ष्य-दृष्टया स्त्रियां पुंसि गौर्, लिङ्गं चिह्न-शेफसोः, ॥

1 A mark. 2 Privy part.

1 Preferableness. 2 Summit. 3 Horn. 4 Drinking pot.

२६ शृङ्गं प्राधान्य-सान्वोश् च, वराङ्गं मूर्ध-गुह्ययोः, ।

1 The head. 2 Privy part.

1 Prosperity.

भगं श्री-काम-माहात्म्य-वीर्य-यत्नाऽर्क-कीर्तिषु, ॥

2 Love or beauty; desire. 3 Excellence. 4 Strength. 5 Care. 6 The sun. 7 The Moon. 8 Glory.

इति गान्ताः ।

1 Destruction. 2 An iron club. 3 A bolt.

२७ परिघः परिघाते ऽस्त्रे, ऽप्योघो वृन्दे ऽम्भसां रये, ।

1 Multitude. 2 A current of water.

1 Price. 2 Mode of adoration.

मूल्ये पूजा-विधावर्घो, ऽहो-दुःख-व्यसनेष्वघम्, ॥

1 Sin. 2 Pain. 3 Passion.

निष्टावधारणं च, आहुश्च–अभिषङ्गाख्याः शापाक्रोशपराभवाः (?) (अभिषङ्गः) कर्मणि भावे च घञ् । यानं रथशकटादि । आदिशब्दाद्धलम् । तत्राङ्गं दान्तादि-योजनकाष्ठं, पुंसि यथा–अनोयुगः शकटयुगः । आदिशब्दात्त्रेतादि । हस्तचतुष्कं च यथा–विचरेद्युगमात्रदृक् (?) ॥ २४ ॥ इषुर्बाणः । वागादौ स्त्रीलिङ्गो गौः स्वर्गादौ पुंलिङ्गः पशौ तूभयं, यथा–इयं गौर्धेनुः, अयं गौर्दान्तः । इत्थं जलाक्ष्णोः क्लीबे–इत्येके । लीनं गमयति लिङ्गति चिह्नीकरोति वा लिङ्गम् । चिह्नं धूमादिः शेफः साधनम् ॥ २५ ॥ शीर्यते शृणाति च शृङ्गम् । प्रधानमेव प्राधान्यं, यथा–शृङ्ग-ग्राहिकया । सानुःअत्र गिरिशिखरं, कात्यस्तु–शृङ्गं शिखरं सान्वपीत्याह । चशब्दाद्विषाणं क्रीडाम्बुपात्रं च (शृङ्गम्) । गुह्यं योनिः । भज्यते सेव्यते मर्च्य-[ह्य]ते च भगं, खलो भगःपदं चेति (वा० ?) वक्तव्याद् घः । कामोऽत्र योनिः । सूर्यविशेषो भगः पुंसि मित्रवत् । धर्मो मोक्षश्च भगः, यदाहुः–ऐश्वर्यस्य समग्रस्य धर्मस्य यशसः श्रियः । वैराग्यस्याथ मोक्षस्य षण्णां भग इति स्मृतः (?) ॥२६॥ अथ घान्ताः । परिहननं परिहन्यतेऽनेन वा परिघः, परौ घः ($\frac{३।३।८४}{३२६१}$) इत्यप्प्रत्यये हन्तेर्घत्वं, करणेऽयोविद्रुषु ($\frac{३।३।८२}{३२५९}$) इत्यतः करणानुवृत्त्या भावादौ नेच्छन्ति । अस्यतेऽस्त्रमायुधविशेषः । अपिशब्दादर्गलेऽपि (परिघः) । उह्यते वहति वा–ओघः, न्यंक्कादौ ($\frac{७।३।५३}{२८६४}$) साधुः मूल्यं पणः, यथा–अनर्घा गुणाः, अर्घिर्घात्वन्तरं,

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

1 Pleasing. २८ त्रिष्विष्टे ऽल्पे लघुः,
2 Small.
3 Quick. 4 Insignificant.

इति घान्ताः ।

1 Swing.
2 Glass. 3 Disease of the eye. काचाः शिक्य-मृद्भेद-दृग्रुजः, ।

1 Reverse Illusion. विपर्यासे विस्तरे च प्रपञ्चः, पावके शुचिः ॥ 1 Fire.
2 Copiousness.

1 A tried minister. २९ मास्यमात्ये चाप्युपधे पुंसि मेध्ये सिते त्रिषु, ।
2 A month Ashadha.
3 Sentiment of Love. 4 Pure. 5 White. 6 Hot season.

1 Passion. 2 Desire. अभिष्वङ्गे स्पृहायां च गभस्तौ च, रुचिः स्त्रियाम् ॥
3 Ray of light. 4 Lustre.

इति चान्ताः ।

1 A bear. 'प्रसन्ने भल्लुके ऽप्यच्छो, गुच्छः स्तबक-हारयोः, ।
2 Clear.
1 A cluster. 2 Sort of necklace.

1 Hem of a garment. परिधानाऽञ्चले कच्छो जल-प्रान्ते त्रि-लिङ्गकः ।' । ७ ।
2 Bank or shore.

इति क्षेपकच्छान्ताः

1 A peacock. ३० केकि-तार्क्ष्यावहिभुजौ, दन्त-विप्राऽण्डजा द्विजाः, ।
2 VISHNU's bird.
1 A tooth. 2 A regenerate man. 3 A bird.

1 VISHNU. अजा विष्णु-हर-च्छागा, गोष्ठाऽध्व-निवहा व्रजाः, ॥
2 SIVA. 3 A goat.
1 A cowpen. 2 A road. 3 A multitude.

पूजार्थे त्वर्हे न्यङ्कादित्वात् (७।३।५३ / २८६४) कुत्वम् ॥ २७ ॥ (लघुः) इष्टे यथा–दर्शनेन लघुना यथा तयोः प्रीतिमापुरुभयोस्तपस्विनः (रघु० ११–१२)। अपिशब्दात्क्षिप्रालपागुरुनिःसारेषु (लघुः) । निदाघस्त्वातपे स्वेदे ग्रीष्मे चैव (प्रकीर्तितः) । अथ चान्ताः । कमञ्चति कचति वा काचः । शिक्यं रज्जुयन्त्रम् । मृद्भेदो धातुविशेषः, यथा–काचः काचो मणिर्मणिः (हि. २–६८)। दृग्रोगः (दृश् + रोगः) काचाख्यः । विपर्यासो माया । विपर्यासे च विस्तारे–इति पाठो युक्तः, प्रथने वावशब्दे (३।३।३३ / ३२०४) इत्यपो निषेधात् । शुचिः शोधकोऽग्निविशेषः, यच्छुतिः–अग्नये शुचये च द्वितीयायाम् (?) ॥ २८ ॥ मासोऽत्रापाढः, यच्छुतिः–शुक्रश्च शुचिश्च ग्रैष्मिकावृतू (?)। उपधा धर्मार्थकामभयमुखेन सचिवपरीक्षा, तामतिक्रान्तोऽत्युपधः, यत्कौटिल्यः—उपधाभिः शौचाशौचपरिज्ञानममात्यानाम् (१-१०) । (रुचिः) अभिष्वङ्गो रागः, गभस्तिर्दीप्तिः ॥ २९ ॥ अथ जान्ताः । मयूरगरुडौ (अहिभुजौ) । विप्रः क्षत्रियवैश्योपलक्षणम्, यत्स्मृतिः–विप्रक्षत्रियविट्शूद्रा वर्णास्त्वाद्यास्त्रयो द्विजाः (?) । अण्डजाः पक्षिसर्पाद्याः । न जायते अजति वा–अजः । गावस्तिष्ठन्त्यस्मिन् गोष्ठम् । व्रजन्त्यस्मिन् व्रजोऽध्वा, गोचरसंचरेति (३।३।११९ / ३२९८)

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh

1 A deified saint.
2 YAMA.

३१ धर्मराजौ जिन-यमौ, कुञ्जो दन्तेऽपि न स्त्रियाम्, ।
1 An elephant's tooth. 2 An Arbour.

1 A field.
2 A city-gate.

वलजे क्षेत्र-पूर्द्वारे, वलजा वल्गुदर्शना, ॥ 3 Pretty woman.

1 Even ground.
2 War.
3 Critical moment.

३२ समे क्ष्मांऽशे रणे ऽप्याजिः, प्रजा स्यात् संततौ जने, ।
1 Progeny. 2 People.

1 A conch.
2 The moon.
3 Lotus.

अब्जौ शङ्ख-शशाङ्कौ च, स्वके नित्ये निजं त्रिषु ॥
1 Own. 2 Perpetual.

इति जान्ताः ।

1 Soul.
2 Skilful.

३३ पुंस्यात्मनि प्रवीणे च क्षेत्रज्ञो वाच्य-लिङ्गकः, ।

1 Thought.
2 Name. 3 Hint.

संज्ञा स्याच् चेतना नाम हस्ताऽऽद्यैश् चार्थ-सूचना ॥

1 A Physician.
2 A wise man.

'दोषज्ञौ वैद्यविद्वांसौ ज्ञो विद्वान् सोमजोऽपि च' ।८।
1 Wise man. 2 Budha.

इति ञान्ताः ।

1 A crow. 2 An elephant's cheek.

३४ काकेभगण्डौ करटौ, गजगण्ड-कटी कटौ, ।
An elephant's cheek. 2 The hip.

1 Bald. 2 Without prepuce or A Leper.

शिपिविष्टस् तु खलतौ दुश्चर्मणि महेश्वरे, ॥ 3 Śiva. 4 Vishnu.

1 Divine artist.
2 The sun.
3 Carpenter.

३५ देवशिल्पिन्यपि त्वष्टा, दिष्टं दैवे ऽपि न द्वयोः, ।
1 Destiny. 2 Time.

1 Pungency.
2 Improper act.

रसे कटुः, कट्वकार्ये त्रिषु मत्सर-तीक्ष्णयोः, ॥ 3 Envy. 4 Fierce.

साधुः । निवहः समूहः, यथा—द्विजव्रजः ॥ ३० ॥ (धर्मराजौ) समवर्तित्वात् । दन्ते हस्तिदन्ते, यथा—कुञ्जरः । अपिशब्दाल्लतादिपिहितोदरे (कुञ्जः) । वलन्तेऽनेन वले जायते वा वलजं क्षेत्रं पुरद्वारं च । वल्गुदर्शने भद्राकृतौ त्रिलिङ्गम् ॥ ३१ ॥ अनिम्नोन्नतो भूभागो रणश्चाजिः । अपिशब्दात्क्षणेऽपि, यद्दुर्गः—युद्धभाग-क्षणेष्याजिः । संततौ यथा—शोच्यं मिथुनमप्रजम् (चा. ५७) । जनो लोको यथा—प्रजापतिः । चकारात्पद्मम् (अब्जम्) । नियतं जायते निजम् । अग्रजौ विप्र-पूर्वजौ—इति दुर्गः ॥ ३२ ॥ अथ ञान्ताः । क्षेत्रं शरीरं पात्रं जानाति क्षेत्रज्ञः, आत्मा मुख्यश्च । संज्ञानं संज्ञा संज्ञायतेऽनया च । आद्यशब्दादक्षिनिकोचनाद्यैः, अर्थः प्रयोजनम् । ॥ ३३ ॥ इतष्टान्ताः । केति रटति करो(किर)ति मदं च करटः । कटति वर्षति मदं कटः । श्मशानं कलिङ्गोऽपि, कटत्यावृणोतीति यथा—वर्जयेत्कटघूमं तु (?) कटे—आस्ते । शिपिश्चर्म विष्टं दोषव्याप्तमस्येति, दुश्चर्मा पण्ढः, आहुश्च—शिपिविष्टः शिवः शौरिर्दुश्चर्मा खलतिस्तथा (?) ॥३४॥ देवशिल्पी विश्व-कर्मा । अपिशब्दात्सूर्ये तक्षिण च त्वष्टा, त्वक्षति त्वक्ष्यते वा । खमणेस्तेजःशातनात्त्वष्टा ।

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

1 Happiness. 2 Ill luck. 3 Destruction.
३६ रिष्टं क्षेमाऽशुभाऽभावेष्वरिष्टे तु शुभाऽशुभे, ।
1 Happiness. 2 Misery. 3 Butter milk. 4 Sign of Death. 5 Soapy fruit. 6 Liquor. 7 Crow. 8 Nimba tree.

1 Illusion. 2 Stationary. 3 Trap. 4 Fraud. 5 Lie. 6 Assemblage.
माया-निश्चल-यन्त्रेषु कैतवाऽनृत-राशिषु ॥

7 A hammer. 8 Summit.
३७ अयो-घने शैल-शृङ्गे सीराऽङ्गे कूटम-स्त्रियाम् , ।
9 Body of a plough. 10 Sky.

1 Small cardamum. 2 An instant. 3 Doubt.
सूक्ष्मैलायां त्रुटिः स्त्री स्यात् कालेऽल्पे, संशयेऽपि सा, ॥

1 End of a bow. 2 Eminence. 3 Edge of Weapon. 4 Angle. 5 Crore.
३८ अत्युत्कर्षाऽश्रयः कोट्यो, मूले लग्न-कचे जटा, ।
1 A root. 2 Clotted hair.

1 Consequence. 2 Opulence. 3 Praise.
व्युष्टिः फले समृद्धौ च, दृष्टिर् ज्ञाने ऽक्षिण दर्शने, ॥
1 Knowledge. 2 An eye. 3 Sight. 4 Memorable verse.

1 Sacrifice. 2 Desire.
३९ इष्टिर् यागेच्छयोः, सृष्टं निश्चिते बहुनि त्रिषु, ।
1 Certain. 2 Much. 3 Created. 4 Lost.

1 Painful. 2 Difficult. 3 Ficree.
कष्टे तु कृच्छ्र-गहने, दक्षाऽमन्दाऽगदेषु तु ।

दिशति शुभाशुभं फलं दिष्टं, दैवं पुराकृतं कर्म। अपिशब्दात्काले (दिष्टाः)। कटत्यावृणोति कटुः, दुर्गन्धे चाप्रिये चोपचारात् ॥३५॥ रिष हिंसायां,नास्ति रिष्टमशुभं क्षेमं वा–अरिष्टं, आहुश्च–तक्रे मरणचिह्ने चारिष्टं वृक्षे च फेनिले। सुरायां च शुभेऽपि स्यात्काके निम्बे च पुंस्ययम्। माया–इन्द्रजालं, निश्चले यथा–कूटस्थोऽक्षर उच्यते (भगवद्गीता १५-१६), निश्चलं व्योमेति गौडः। यन्त्रं मृगादिवधार्थं छलं यथा-छित्त्वा पाशमपास्य कूटरचनाम्। (पंचतं० २।८७)। कैतवं व्याजः (कूटं)। राशिर्धान्यादिपुञ्जः (कूटः) ॥ ३६ ॥ अयोमयो घनः, आघातार्थमयःसारं भाण्डं कूटं नाराचो वा, कूटशाल्मलिरित्येके। सीराङ्गं फालाधारः कूटाख्यः, यद्दुर्गः–कूटं घटहलाङ्गयोः (?)। त्रुटति त्रुटिः, कालेऽल्पे क्षणद्वयाख्ये। संशये यथा–त्रुटिं प्राप्तो रोगी (?) ॥ ३७ ॥ अर्त्तिश्चापकोटिरटनिर्यथा–धनुःकोट्या नुदति। उत्कर्षे यथा–परां कोटिमारूढः। अश्रिर्धारा कोणो वा यथा–शतकोटिर्वज्रः। संख्यापि कोटिः, यद् भागुरिः–अर्त्यर्बुदाश्रयः कोट्यः, स्त्रीत्वार्थं ङीप्। वृक्षादिमूलं जटा। लग्नाः श्लिष्टाश्च कचा जटाः, जट संघाते। व्युच्छनं व्युष्टिः, उच्छी विवासे, फलं प्रयोजनम्। चशब्दः स्तुतौ (व्युष्टिः)। (दृष्टिः) भावे करणे च क्तिन् ॥ ३८ ॥ यजेरिषेश्च क्तिन् (इष्टिः)। मुक्तानिर्मितयोश्च (सृष्टम्)। कषिष्यतीति कष्टं, यथा–कष्टं प्राप्तः क्लेशमित्यर्थः। कष्टानि सामानि गहनानीत्यर्थः, कृच्छ्रगहनयोःकषः (७।२।२२ / ३०६२) इत्यनिट्। (पटुः) दक्षोऽनलसः, अमन्दो धृष्टः, अगदो नीरुक्।

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh

1 Dilligent. 2 Skilful. 3 Hale. ४० पटुर्, द्वौ वाच्य-लिङ्गौ च, 4 Salt.
1 Masculine woman. 2 Large Alligator. 'पोटा दासी द्विलिंगा च घृष्टी घर्षणसूकरौ ॥ ८ ॥
1 Rubbing. 2 Hog.

1 Collection. 2 Troop of elephants. घटा गोष्ठ्यां हस्तिपङ्क्तौ कृपीटमुदरे जले'। ९ ।
1 Belly. 2 Water.

इति टान्ताः ।

1 Siva. 2 A Peacock. नीलकंण्ठः शिवे ऽपि च, ।

1 Stomach. 2 A granary. पुंसि कोष्ठो ऽन्तर्जठरं कुसूलो ऽन्तर्गृहं तथा,॥ 3 An Apartment.

1 Confirmation. 2 Destruction. ४१ निष्ठा निष्पत्ति-नाशाऽन्ताः, काष्ठोत्कर्षे स्थितौ दिशि, ।
3 Stop. 4 Steady Practice. 5 Asking. 6 End. 7 Moksha.
1 Excellence. 2 Limit. 3 Region. 4 Time. 5 Wood.

1 The Eldest. 2 Pre-eminent. 3 Old. त्रिषु ज्येष्ठोऽतिशस्ते ऽपि कनिष्ठो ऽति-युवाऽल्पयोः. ॥
1 Very young. 2 Small.

इति ठान्ताः ।

1 A staff. 2 Army. 3 Punishment. 4 Yama. 5 Churning rod. ४२ दण्डो ऽस्त्री लगुडे ऽपि स्याद्, गुडो गोलेक्षुपाकयोः, ।
1 A globe or ball. 2 Raw sugar. 3 Armour.

1 A serpent. 2 A carnivorous beast. 3 Wicked man. सर्प-मांसात्पशू व्याडौ, गो-भू-वाचस् त्विडा इलाः, ॥
1 A cow. 2 The earth. 3 Speech. 4 Wife of Budha.

चशब्दाल्लवणो रसः पटुः ॥ ३९ ॥ द्वौ कष्टपटू । इतष्टान्ताः । अपिशब्दान्मयूरः (नीलकण्ठः) । कुथ्यते कोष्ठो जठराभ्यन्तरं, यथा–मृदुकोष्ठः (?) । कुशूलो धान्याधारः (कोष्ठः) । कोष्ठागारं गृहस्याभ्यन्तरमपवरकाख्यम् ॥ ४० ॥ निर्व्यूढं निर्वृत्तं नियतं च स्थानं निष्ठा । क्लेशतपोयाच्ञानिर्बर्हं(वंह)णपरमगतयोऽपि (निष्ठाः) । काशनं काशते वा काष्ठा, स्थितिर्मर्यादा । कालविशेषेऽपि अष्टादश निमेषास्तु काष्ठेति (पृ. ३४) । काष्ठं दारु च । इष्टनि प्रशस्यस्य श्रः (५।३।६०/२०२२) ज्य च (५।३।६१/२०२२) । अपिशब्दादग्रजे वृद्धेऽपि (ज्येष्ठः) । युवाल्पयोःकन्नन्यतरस्याम् (५।३।६४/२०२२), अतियुवात्यल्पश्च ॥४१॥ अथ डान्ताः । दम्यतेऽनेन दण्डः, अपिशब्दाच्चतुरङ्गं बलं चतुर्थोपायो दमो मन्थश्च । गोलो वृत्तो मृदादिगुडकः, यथा–भक्षिता वाप्यहो गुडाः (चरक०) । लत्वेन गुलिका स्नुही गुलिका निशा । सन्नाहश्च गुडः । मांसमत्तीति मांसाद् सिंहादिः । व्यडति हन्तुं व्याडः, व्याड उद्यमे, विविधमाल(ड)मस्माद्वा व्याड इल क्षेपणे, बुधभार्या पि–इडा यस्या अपत्यमैडः पुरूरवाः ॥४२॥ क्वेवि

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh

1 A bambu rod. 2 A Venom. 3 War whoop. 4 A Roar.
४३ क्ष्वेडा वंश-शलाका ऽपि, नाडी नाले ऽपि षट्-क्षणे, ।
1 A stalk. 2 An Indian hour. 3 Pipe. 4 Vim, Artery. 5 Guts.

1 A stem. 2 An arrow. 3 A horse. 4 A multitude. 5 Opportunity. 6 Water. 7 Cluster. 8 Excellence.
काण्डो ऽस्त्री दण्ड-बाणाऽर्व-वर्गाऽवसर-वारिषु, ॥

1 Trappings of a horse.
४४ स्याद् भाण्डमश्वाऽऽभरणे ऽमत्रे मूल-वणिग्-धने. ।
2 A pot; 3 Stock or Capital; 4 Ornament.

इति डान्ताः ।

1 Much. 2 Promise
भृश-प्रतिज्ञयोर् बाढं, प्रगाढं भृश-कृच्छ्रयोः, ॥
1 Much. 2 Difficult. 3 Firm.

1 Multitude. 2 Ball of rice. 3 Body.
'संघातग्रासयोः पिण्डी द्वयोः पुंसि कलेवरे ॥ ९ ॥

1 Temple. 2 Boil.
गण्डौ कपोलविस्फोटौ मुण्डकस् त्रिषु मुण्डिते ।
1 Barber. 2 Shaved.

1 Section. 2 Variety of sugar-cane.
इक्षुभेदे ऽपि खण्डो ऽस्त्री, शिखण्डो बर्हचूडयोः' ।१०।
1 Peacock's tail. 2 Crest, Lock of hair.

1 Able. 2 Bulky. 3 Firmly.
४५ शक्त-स्थूलौ त्रिषु दृढौ, व्यूढौ विन्यस्त-संहतौ. ।
1 Arranged. 2 Compact.

इति ढान्ताः ।

1 Child. 2 Human fœtus.
भ्रूणो ऽर्भके स्त्रैण-गर्भे, बाणो बलि-सुते शरे, ॥
1 Son of Bali. 2 An arrow. 3 Maid servant. 4 Yellow Amarnath.

शब्दार्थं उन्नेयः, अपिशब्दात्सिंहनादो दन्तोष्ठवाद्यम्(क्ष्वेडा) । क्ष्वेडस्तु विषं ध्वनिश्च । षड्भिः क्षणैश्च षट्क्षण इति नाडीव नालिकात्र, अपिशब्दात्सुषिरं वृक्षादि धमनिश्च । नाडो नालश्च जलनिर्गमः । डलयोरैक्यात्प्रणालो नालः कण्ठः पद्मादिवृन्तं च । दण्डो नालं यथा उद्(त्का)ण्डे पुण्डरीकैः । अर्वा कुत्सितः, यथा–तवाहं काण्डपृष्ठः (महावीर० ३–१९. l. 2) । वर्गे यथा–बालकाण्डं (वा. रा. १), श्राद्धक[का]ण्डिका । काण्डस्यावसरस्याभावोऽकाण्डम् । लतावृक्षस्कन्धयोश्च (काण्डः) । प्रकाण्डं तु वृक्षादि, स्कन्धः प्रशंसार्थं च यथा–पुरुषप्रकाण्डम् ॥४३॥ अश्वस्याभरणमायानं पर्याणादि, यथा-भाण्डत्रासी हयः । अमत्रे यथा–प्रकीर्णभाण्डामनवेक्ष्यकारिणीम् (म. भा. अ. २-१२) । मूलं क्रय्यं वणिजो धनं वा, यथा–भाण्डपतिः । अथ ढान्ताः । बाहेः क्ते (बाढं), क्षुब्धस्वान्तध्वान्तेति (७।२।१८ / ३०५८) साधुः । (बाढं) प्रतिज्ञानेऽङ्गीकारेऽव्ययम् । (प्रगाढं) दृढेऽपि, यदाहुः–प्रगाढकृच्छ्रमिच्छन्ति प्रगाढं बलवद् दृढम् (?) ॥ ४४ ॥ दृहि वृद्धौ क्तं दृढः, दृढःस्थूलबलयोः (७।२।२० / ३०६०) इति साधुः । अत्यर्थे च यथा–दृढं शान्तोऽस्मि । त्रिष्वित्येव । विन्यस्तं रचितं यथा–व्यूढां द्रुपदपुत्रेण तव शिष्येण (भगवद्गीता १–३) । संहतो घनो यथा–व्यूढोरस्कः (रघु० १–१३)। अथ

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

1 A particle.
2 Eye of corn.

४६ कणो ऽति-सूक्ष्मे धान्यांऽशे, संघाते प्रमथे गणः, ।
1 Multitude. 2 Siva's attendants.

1 A stake at play.
2 Cock fight.

पणो द्यूताऽऽदिषूत्सृष्टे भृतौ मूल्ये धने ऽपि च, ॥
3 Wages. 4 Price. 5 Wealth. 6 Commodity. 7 Business 8 Weight of two tolas.

1 A bow string.
2 Quality.

४७ मौर्व्यां द्रव्याऽऽश्रिते सत्त्व-शौर्य-संध्याऽऽदिके गुणः, ।
3 Truth. 4 Valour. 5 Rope. 7 Cook. 8 Limb. 9 Enjoyment.

1 State of being unemployed.

निर्व्यापार-स्थितौ कालविशेषोत्सवयोः क्षणः, ॥
2 Moment. 3 festival. 4 Dance. 5 Wound.

1 Tribe.
2 Colour.

४८ वर्णो द्विजाऽऽदौ शुक्लाऽऽदौ स्तुतौ वर्णं तु वा ऽक्षरे, ।
3 Praise. 4 Alphabet. 5 Covering. 6 Musical sound. 7 Religious mendicant.

1 The sun.
2 Dark red.

अरुणो भास्करे ऽपि स्याद् वर्ण-भेदे ऽपि च त्रिषु, ॥
3 Charioteer of the sun.

1 Siva. 2 A Post.
2 Crow. A raven.

४९ स्थाणुः शर्वोऽप्यथ द्रोणः काके ऽप्याजौ रवे रणः, ।
1 A fight. 2 Sound.

1 A barber.
2 Excellent;

ग्रामणीर् नापिते पुंसि श्रेष्ठे ग्रामाऽधिपे त्रिषु, ॥ 3 A leader.

1 Wool, felt, &c.

५० ऊर्णा मेषाऽऽदि-लोम्नि स्यादावर्ते चान्तरा भ्रुवोः, ।
2 A circle of hair between the eyebrows.

1 A doe.
2 A golden image.

हरिणी स्यान् मृगी हेम-प्रतिमा हरिता च या, ॥
3 Green colour. 4 Metre. 5 Jasmine. 6 Yellow flower.

णान्ताः । भ्रियते भ्रूणः । बलिसुतो बाणासुरः। दासीकुरण्टकेऽपि बाणशब्दार्थः ॥४५॥ अतिसूक्ष्मे मुक्तादिगुलके (कणः) । धान्यस्यांशः कणिका यथा–कणादो मुनिः । गण्यते गणः, संख्यायां सैन्यांशेऽपि । नित्यं पणःपरिमाणे ($\frac{3|3|6\,6}{3\,2\,4\,3}$) इति साधुः । द्यूतादावुत्सृष्टं जय्यत्वे स्थापितं (पणः) । आदिशब्दात्समाह्वयपणादौ । भृतिर्वेतनम् । अपिशब्दात्क(त्का)र्षिकस्ताम्रिकः पणः यच्छाश्वतः (६८)–रूहे माने श्वेतकानां मूल्ये कार्षापणे धने । द्यूतादौ कल्पिते चैव बद्धमुष्टौ भृतौ पणः ॥ ४६ ॥ द्रव्याश्रिते पटादेऽ शुक्लादिर्गुणः, आत्मनो बुद्धिसुखादिः, रूपादिचतुर्विंशतेर्गुणत्वात् । सत्त्वे निविशतेऽ पैतीति च गुणः, (का० ६८) । सत्त्वादीनि सत्त्वरजस्तमांसि, शौर्यौदार्यादयो गुणाः । संधिविग्रहयानासनद्वैधीभावसंश्रयाः षड् गुणाः । तेजोबलवीर्यैश्वर्यवैराग्यशक्तयश्च षट् पराश्रितत्वात्, तेन गुणोऽपधानमित्यपि च वाच्यम् । शौर्यादयस्तत्कर्षाद् गुणाः । रज्वप्रधानसूदेन्द्रियभोगेष्वपि (गुणः) । निर्व्यापारासने यथा–क्षणो नास्ति रहो नास्ति (पंचतं० १।५४) । कालविशेषो नाडिकाषष्ठांशः (क्षणः) । उत्सवे यथा–क्षणे रक्ष्याः कुलस्त्रियः (?)। नृत्ते तूत्सवत्वाद्यथा–क्षणपरपुरजिद्दत्तशूलप्रहारान् (?), क्षणोति क्षणः ॥ ४७ ॥ वृणोति व्रियते वा, वर्ण्यते वर्णनं वा वर्णः । षड्जादिगतौ तालविशेषे गुणयशोविलेपनब्रह्मचर्येष्वपि (वर्णः) ॥ ४८ ॥ (ग्रामणीः) ग्रामः खेटको वृन्दं च ॥ ४९ ॥ उर्णोत्यूर्णा । आवर्तश्चक्रवर्तिचिह्नं यथा—ऊर्णेयमन्तर्भ्रुवोः (नागा-

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

1 Yellowish white. 2 A deer.
५१ त्रिषु पाण्डौ च हरिणः स्थूणा स्तम्भे ऽपि वेश्मनः, ।
1 A house post. 2 An iron image. 3 Disease.

1 Desire. 2 Thirst.
तृष्णे स्पृहा-पिपासे द्वे, जुगुप्सा-करुणे घृणे, ॥ 1 Blame. 2 Pity.

1 A market. 2 A Shop.
५२ वणिक्-पथे च विपणिः, सुरा प्रत्यक् च वारुणी, ।
1 Spirituous liquor. 2 The west.

1 A female elephant. 2 A male elephant.
करेणुरिभ्यां स्त्री नेभे, द्रविणं तु बलं धनम्, ॥ 1 Strength. 2 Wealth.

1 A house. 2 Preserver.
५३ शरणं गृह-रक्षित्रोः, श्रीपर्णं कमलेऽपि च, ।
1 A lotus. 2 Nelumbium speciosum.

1 Poison. 2 War. 3 Iron. Weapon.
विषाऽभिमर-लोहेषु तीक्ष्णं क्लीबे खरे त्रिषु, ॥ 4 Harsh, sharp.

1 Proof. 2 Limit. 3 Scripture ; 1 Instrument. 2 A Field. 3 A body. 4 Organ of sense. 5 Cause. 6 Tribe. 7 Action. 8 Dramatic performances.
५४ प्रमाणं हेतु-मर्यादा-शास्त्रेयत्ता-प्रमातृषु, । 4 Standard ; 5 Authority.
करणं साधकतमं क्षेत्र-गात्रेन्द्रियेष्वपि, ॥

नंदे–१७; ५–३२) अन्तरा भ्रुवाविति—अन्तराऽन्तरेण युक्ते ($\frac{२।३।४}{५।६।५}$) द्वितीया। हरति हरिणी मृगी हेम्नो वा प्रतिमा। हरिं पीतं वर्णं नयतीति, हरिता नीला, वर्णादनुदात्तात्तोपधात्तो नः ($\frac{४।२।३९}{४९६}$) इति वा ङीप्। यूथिका पाण्डुरा च (हरिणी) ॥ ५० ॥ चशब्दान्मृगे (हरिणः)। तिष्ठति स्थूणा। अपिशब्दाल्लोह-प्रतिमाव्याधिविशेषयोश्च (स्थूणा)। तर्षणं तृष्णा, स्पृहा निरूढलक्षणत्वात्। एवं तृट्तर्षावपि स्पृहापिपासार्थे। जिघर्ति क्षरति मनोऽनया घृणा, घृणु दीप्तौ वा ॥५१॥ वणिक्पथो हट्टः (विपणिः)। अपिशब्दात्पण्यवीथ्यां, विपण्यतेऽस्यां विपणिः। सुरा वरुणादब्धेर्जाता। प्रत्यक् प्रतीची दिक्, वरुणस्येयमिति। के मूर्ध्नि रेणुरस्य करेणुः। इभ्यां हस्तिन्यां स्त्री, इभे तु ना पुमान्। द्रवत्यनेन द्रवति वा द्रविणम्। ॥ ५२ ॥ शीर्यते शृणाति च परं शरणं, श्रयन्ति तदिति नैरुक्ताः। श्रीः पर्णेऽवस्य श्रियं पिपर्ति च श्रीपर्णम्। अपिशब्दादग्निमन्थे (श्रीपर्णम्)। अभिमरो मरकं युद्धं च (तीक्ष्णं), लोहं शस्त्रम्। ये द्रव्यहेतोर्व्याडं हस्तिनं वा योधयेयुस्ते तीक्ष्णा इति कौटिल्यः (१–१२)। तेज्यते तीक्ष्णं, अतिक्षणोतीति नैरुक्ताः ॥ ५३ ॥ यथायोगं करणादौ ल्युट्, हेतुर्ज्ञप्तिनिमित्तं यथाग्न्यादेर्धूमादि (प्रमाणं)। मर्यादावधिः। यथा—कौटिल्यः राजानं मां च प्रमाणं कृत्वा यद्यस्याः कुशलं पश्यतीति (?)। इयत्ता परिच्छेदः, यथा—कियत्प्रमाणमुदकम्। प्रमाता यथा—अत्रार्थे प्रभुः प्रमाणम्। करणं) गात्रे यथा—उपमानमभूद्विलासिनां करणं यत्तव कान्तिमत्तया (कु० सं० ४–५)। (करणं) अपिशब्दात्कारणिकानां कायस्थाध्यक्षादीनां समूहे कृतौ

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh

1 Birth. 2 Unresisted march of troops.
५५ प्राण्युत्पादे संसरणमसंबाध-चमू-गतौ ।
1 Highway.
घण्टापथे, ऽथ वान्ताऽन्ने समुद्गिरणमुन्नये, ॥
2 Food vomited. 3 Raising.

1 A horn. 2 Elephant's tooth.
५६ अतस् त्रिषु, विषाणं स्यात् पशुशृङ्गेभदन्तयोः, ।
1 Declivity. 2 Humble.
प्रवणे क्रम-निम्नोर्व्यां प्रह्वे ना तु चतुष्पथे, ॥
3 A place where four roads meet. 4 Generous. 5 Principal.

1 Miscellaneous. 2 Impure.
५७ संकीर्णौ निचिताऽशुद्धा, विरिणं शून्यमूषरम्, ।
1 Desert. 2 Salt and barren soil.

1 A bridge. 2 Rampart. 3 A falling star.
'सेतौ च वरणो, वेणी नदी-भेदे कचोच्चये.' ॥१०॥
1 A river. 2 A braid of hair.

इति णान्ताः ।

1 God. 2 The sun. 1 A river. 2 The sea.
देव-सूर्यौ विवस्वन्तौ, सरस्वन्तौ नदाऽर्णवौ, ॥

1 A bird. 2 VISHNU's bird.
५८ पक्षि-तार्क्ष्यौ गरुत्मन्तौ, शकुन्तौ भास-पक्षिणौ, ।
1 The Indian culture. 2 A bird. 3 An insect.

1 Fire. 2 A comet.
अग्न्युत्पातौ धूमकेतू, जीमूतौ मेघ-पर्वतौ, ॥
1 A cloud. 2 A mountain.

1 A hand. 2 The asterism. 3 Multitude.
५९ हस्तौ तु पाणि-नक्षत्रे, मरुतौ पवनाऽमरौ, ।
1 Wind. 2 A deity.

1 An elephant driver. 2 A charioteer.
यन्ता हस्तिपके सूते, भर्ता धातरि पोष्टरि, ॥
1 A holder. 2 A nourisher. 3 Husband.

क्रियाभेदे कामशास्त्रनाट्यशास्त्रोक्ते च ॥ ५४ ॥ प्राण्युत्पाद आजीवं जीविभावः संसाराख्यः । असंबाधेन [असंकटेन] सेनागमने (संसरणम्)। घण्टापथः पुरसमीपे विश्रामभूरुपनिष्करास्या (संसरणम्)। (समुद्गरणं) कर्मणि भावे च ल्युट्, उन्नय ऊर्ध्वनयनं कूपादिभ्यो जलादेः ॥ ५५ ॥ स्वतो न तु वाच्यलिङ्गतया । वेवेष्टि विषाणम् । प्रवणति प्रवणः [अनुकूले], वण शब्दार्थः । त्रिष्वित्येव संकीर्णं यावत् । क्रमेण निम्नायां भुवि यथा–श्राद्धे दक्षिणप्रवणा भूः । प्रह्वे यथा–भक्तिः प्रवणः । अनुकूले तूपचारात् । चतुष्पथे, प्रवन्तेऽनेन प्रवणः ॥ ५६ ॥ निचितं संकीर्णं व्याप्तम् । अशुद्धे संकीर्णं यतो मिश्रीभवतीति । ईरति–ईरणं, ईर गतौ । शून्यं निराश्रयो देशः; ऊषः क्षारमृत्तिकास्यास्ति–इत्यूषरः, ऊषसुषीति (५।२।१०७ / ६९६४) रः (ईरणम्) । अथ तान्ताः । विवस्ते छादयति विवस्तेजोऽस्यास्तीति विवस्वान् । सरस्वान्नाम नदः ॥ ५७ ॥ गरुतः पक्षाः सन्त्यस्य गरुत्मान् । भासः पक्षिविशेषः । कीटोऽपि, शक्नोति शकुन्तः । धूमः केतुर्लिङ्गमस्य धूमकेतुर्वह्निः । धूमप्रधानश्च केतुरुत्पातग्रहः । जीवनस्याम्भसो मूतः पुटबन्धः (जीमूतः) ॥ ५८ ॥ जहाति हस्तः पाणिः । हसति

CC-0. Agamnigam Foundation. Digitized by eGangotri, Chandigarh

1 A boat.
2 A young animal.

६० यान-पात्रे शिशौ पोतः, प्रेतः प्राण्यन्तरे मृते, ।
1 Hell. 2 A departed soul.

1 A moon's descending node.
2 A banner. 3 Ninth planet.

ग्रह-भेदे ध्वजे केतुः, पार्थिवे तनये सुतः, ॥
1 A king. 2 A son.

1 An architect.
2 Head carpenter.
3 Sacrificer 4 Chamberlain.

६१ स्थपतिः कारु-भेदे ऽपि, भूभृद् भूमिधरे नृपे, ।
1 A mountain. 2 A king.

1 A king.
2 A minister.
3 A Kshatriya. 4 Our born of a brahman jakshatriya woman. 5 Chief.

मूर्धाभिषिक्तो भूपे ऽपि, ऋतुः स्त्री-कुसुमेऽपि च, ॥
1 A woman's courses. 2 A season.

1 VISHNU. 2 SIVA.
3 Buddha.
4 Indistinct. 5 A fool. 6 Nature.

६२ विष्णावप्यजिताऽव्यक्तौ, सूतसू त्वष्टरि सारथौ, ।
1 A cartwright. 2 A charioteer.
3 Quick silver. 4 Born.

1 Wise; learned.
2 Clear.

व्यक्तः प्राज्ञे ऽपि, दृष्टान्ताबुभौ शास्त्र-निदर्शने, ।
1 A science. 2 An example.

1 Charioteer.
2 A porter.

६३ क्षत्ता स्यात् सारथौ द्वा:स्थे क्षत्रियायां च शूद्रजे, ।
3 One born of Kshatriya Woman and a Sudra.

1 Topic.
2 Mode.

वृत्तान्तः स्यात् प्रकरणे प्रकारे कार्त्स्न्य-वार्तयोः, ॥
3 Whole; 4 Right conclusion

व्योम्नि हस्तो नक्षत्रम्। प्रशंसार्थश्च (यथा)–केशहस्तः। म्रियतेऽनेन मरुत्। यमयतीत्यन्तर्भावितण्यर्थो यमिः, सूतः सारथिः। यज्ञस्य [वज्रस्य] भर्ता, स्त्रिया भर्ता ॥ ५९ ॥ पवते पुनाति च पोतः। प्रैति स्म प्रेतः, प्राण्यन्तरं नारकम्। ग्रहभेदो नवमः (केतुः) कित ज्ञाने। षु प्रसवैश्वर्ययोः (सुतः) ॥ ६० ॥ स्थापयति, स्थश्चासौ पतिश्च वा तिष्ठन्त्यस्मिन्नायत्ताः स्थः, घञर्थे कः (वा० $\frac{२२०४}{३२३४}$)। कारुविशेषो मुख्यतक्षा (स्थपतिः)। अपिशब्दात् स (यज्वा) गीष्पतिष्ठया स्थपतिः (पृ. १६४) कञ्चुकी च। (भूभृत्) धारणात्पोषणाच्च। (मूर्धाभिषिक्तः) अपिशब्दाद्विप्रात्-क्षत्रियायां जाते, मुख्येऽपि। ऋच्छत्यायाति ऋतुः स्त्रीणामार्तवं रजः। अपिशब्दाद्व-सन्तादौ (ऋतुः) ॥ ६१ ॥ अपिशब्दादजितोऽपरिभूतो बुद्धश्च। अव्यक्तोऽस्फुटः। मूर्खश्च (अव्यक्तः)। प्रकृतिस्त्वव्यक्तम्। षू प्रेरणे, त्वष्टा रथकारः, तथा ब्राह्मण्यां क्षत्रियात्सूतः। प्रजाते पारदे च (सूतः)। व्यनक्ति व्यज्यते च (व्यक्तः)। अपिशब्दात् पुरोबुद्ध्या[दि]निश्चितः, यथा–व्यक्तं मूर्खोऽयम्। दृष्टोऽन्तो निश्चयोऽस्य दृष्टान्तः, निदर्शनमुदाहरणं यथा–अग्निरत्र धूमान्महानसवत् (तर्क पृ.१०)॥६२॥ क्षदति क्षत्ता, द्वास्थः प्रतीहारः। क्षत्रियायां शूद्राज्जातः क्षत्ता, क्षत्रिया मागधं वैश्याच्छूद्रात्क्षत्तार-मेव च (पृ.२२५)। स्मृतौ क्षत्रशब्दोऽप्यस्ति। वृत्तोऽन्तोऽस्य वृत्तान्तः, वृत्तस्यान्तश्च।

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh

1 A war. 2 A stage. 3 A chief place. ६४ आनर्तः समरे नृत्यस्थान-नीवृद्विशेषयोः, । 4 Water.

1 Yama. 2 Proof; 3 Destiny, 4 Sin. कृतान्तो यम-सिद्धान्त-दैवाऽकुशलकर्मसु, ॥

1 Phelgm ; Wind ; Bile. ६५ श्लेष्माऽऽदि रस-रक्ताऽऽदि महा-भूतानि तद्-गुणाः ।
2 Blood, flesh, marrow. 3 The elements. 4 Their qualities. 5 The sense-organs. 6 Fosil. 7 Metal. 8 Root of words i.e. verbs.

9 Principle of the body. इन्द्रियाण्यश्म-विकृतिः शब्द-योनिश् च धातवः, ॥

1 The seraglio. 2 A harem. ६६ कक्षाऽन्तरे ऽपि शुद्धान्तो भूपस्याऽसर्व-गोचरे, ।

1 An iron spear. 2 Power. 3 Energy of a divinity. कासू-सामर्थ्ययोः शक्तिर् , मूर्तिः काठिन्य-काययोः, ॥
1 Idol. 2 Matter. 3 Body. 4 Swoon.

1 Expansion. 2 A creeping plant. ६७ विस्तार-वल्ल्योर् व्रततिर् , वसती रात्रि-वेश्मनोः, ।
1 Night. 2 A house.

1 Loss. 2 Worship. क्षयाऽर्चयोरपचितिः, सातिर् दानाऽवसानयोः, ॥
1 Gift. 2 Destruction.

1 Pain. 2 End of a bow. ६८ आर्तिः पीडा-धनुष्कोट्योर् , जातिः सामान्य-जन्मनोः, ।
1 Kind or sort. 2 Birth. 3 Sort of metre. 4 A Flower. 5 Family.

1 Usage. 2 Oozing. प्रचार-स्यन्दयो रीतिरीतिर् डिम्ब-प्रवासयोः, ॥
1 Calamity of season. 2 Journey.

तथा प्रकारो विशेषः । वार्ता जनश्रुतिराख्यायिका च ॥६३॥ आनृत्यन्त्यत्रानर्तः । नीवृद्विशेषो जनपदः,जलेऽपि (आनर्तम्)। कृतोऽन्तोऽनेन कृतान्तः, कृतः सिद्धोऽन्तो निष्ठा यस्य, कृतस्यान्तश्च । शास्त्रेऽप्युपचारात्कृतान्तः ॥६४॥ श्लेष्मा वातः पित्तं च, धारणात्तु धातवः । अस्थिरक्तादीनि, व(र)सासृङ्मांसमेदोऽस्थिमज्जाशुक्राणि धातवः (वाग्भट० १।८) । महाभूतानि पृथिव्यादीनि, तद्गुणाः शब्दादयः, अश्मविकृतिर्हरितालादिः, शब्दयोनिर्भ्वादिः (धातवः) । चशब्दाद् गैरिकं मनःशिलादिर्हेमादिश्च (धातुः) ॥ ६५ ॥ कक्षान्तरे राजधानीस्थानविशेषे वासगृहाख्ये (शुद्धान्तः) । अपिशब्दाद्राजदारेषु, अशौचप्रशमे च, शुद्धो रक्षितोऽन्तोऽस्य शुद्धान्तः । कासूर्नामायुधं सर्वलाख्यं, शक्यतेऽनया जेतुं शक्तिः । शकन उत्साहादौ च (शक्तिः)। मूर्च्छनं मूर्च्छति च मूर्तिः ॥ ६६ ॥ व्रजन्ती ततिरस्यां व्रततिः, व्रतव्रातव्रतत्यादिसिद्ध्यर्थं व्रतिर्धातुरुन्नेय इति श्रीभोजः । वसत्यस्यां वसतिः, स्थितौ च । चिञश्चायतेश्च, चायतेः क्तिनि नित्यं चिभावः (वा० $\frac{४४१८}{३२७२}$) अपचितश्च ($\frac{७।२।३०}{३०७१}$) इत्यत्र वक्तव्यात् । विकृतौ व्यत्यये च (निष्कृतौ व्यये च) (अपचितिः) । सनोतेः क्तिनि जनसनेति ($\frac{३।२।६७}{३४१३}$) आत्वम्, स्यतेः—ऊतियूतिजूतीति ($\frac{३।३।९७}{३२७४}$) साधुः ॥ ६७ ॥ अर्दनमर्त्तिः, अर्द्यतेऽनया च, अर्द गतौ याचने च । जायतेऽनया,

CC-0. Agamnigam Foundation. Digitized by eGangotri Preservation Foundation, Chandigarh

1 Gain 2 Obtaining.
६९ उदये ऽधिगमे प्राप्तिस्, त्रेता त्वग्नि-त्रये युगे, ।
1 Three sacrificial fires. 2 The Treta Yuga.

1 A harp. 2 A harp of Narada with 100 strings. 3 Greatness.
वीणा-भेदे ऽपि महती, भूतिर् भस्मनि संपदि, ॥
1 Ashes. 2 Success. 3 Birth. 4 A house.

1 River of snakes. 2 City of serpents.
७० नदी-नगर्योर् नागानां भोगवत्यथ संगरे । 1 Combat.
2 Company. 3 Assembly.
संगे सभायां समितिः, क्षय-वासावपि क्षिती, ॥
1 Wane, loss. 2 Abode. 3 The Earth.

1 Sun-beam, 2 Weapon.
७१ रवेरर्चिश् च शस्त्रं च वह्नि-ज्वाला च हेतयः, । 3 Flame.
1 The world. 2 Sort of metre.
जगती जगति छन्दो-विशेषो ऽपि क्षितावपि, ॥

3 A metre. 2 Ten. 3 Row, Line.
७२ पङ्क्तिश् छन्दोऽपि दशमं, स्यात् प्रभावेऽपि चाऽऽयतिः, ।
1 Majesty or dignity. 2 Breadth. 3 Future time. 4 Restraint.

1 Motion. 2 A foot soldier.
पत्तिर् गतौ च, मूले तु पक्षतिः पक्ष-भेदयोः, ॥
1 Root of a wing. 2 First lunar day.

1 Origin 2 Sex. 3 Natural disposition. 4 Minister. 5 Subjects.
७३ प्रकृतिर् योनि-लिङ्गे च, कैशिक्याऽऽद्याश् च वृत्तयः, ।
1 Style of composition. 2 Livelihood. 3 Behavious.

1 Sand. 2 Sugar. 3 Sandy place.
सिकताः स्युर् वालुका ऽपि, वेदे श्रवसि च श्रुतिः, ॥
1 Holy scripture. 2 An ear. 3 Hearing. 4 Rumour. 5 Musical note.

भिन्नेष्वभिन्नाभिधानप्रत्ययो जातिः, जननं च । छन्दोऽलंकारविशेषयोः (जातिः), मालतीगोत्रयोश्च । प्रचारः शैली (रीतिः), री गतौ रीङ् स्रवणे । आरकूटे मर्यादायां वैदर्भ्यादौ (रीतिः) । ईङ् गतौ, डिम्ब उपद्रवः, यदाहुः—अतिवृष्टिरनावृष्टिर्मूषिकाः शलभाः शुकाः । अत्यासन्नाश्च राजानः षडेता ईतयः स्मृताः (मा.भा.५-२०) ॥६८॥ उदयो लाभः, अधिगम आसादनं (प्राप्तिः) । त्रेता, पृषोदरादिः ($\frac{६।३।१०९}{१०३४}$)। शततन्त्री वीणा महती । अपिशब्दाद् बृहत्यां (महती) । भवति भूयतेऽनया च भूतिः, भवनं च ॥ ६९ ॥ भोग उपभोगः सर्पकायश्चास्त्यस्याः (भोगवती) । समयनं संयन्ति संगच्छन्त्यस्यां वा समितिः । वासो निवासः (क्षितिः) । अपिशब्दाद् भूः, क्षि क्षये, क्षि निवासगत्योः ॥ ७० ॥ शस्त्रमायुधं, हिनोति हेतिः, ऊतियूतीति ($\frac{३।३।९७}{३२७४}$) साधुः । गच्छति जगती, छन्दो द्वादशाक्षरपादम् ॥ ७१ ॥ उक्तात्युक्ता मध्या प्रतिष्ठा सुप्रतिष्ठा गायत्र्युष्णिगनुष्टुब्बृहती पङ्क्तिस्त्रिष्टुबिति दशमं दशाक्षरपादं वा (छं. मं. २६-२०)। अपिशब्दाच्छेणिर्दशसंख्या च (पङ्क्तिः), पञ्चतौ वर्गौ पङ्क्तिः, पङ्क्तिर्विंशतित्रिंशदिति ($\frac{५।३।५९}{१७२७}$) साधुः, पञ्चते च। अपिशब्दादागामिनि काले दैर्घ्ये च, आयतन्तेऽत्रायतिः, आयमनं च। पदनं पद्यते च(पत्तिः)। चशब्दात्सेनांशे पदातौ च (पत्तिः)। पक्षविशेषयोर्मूलं प्रतिपदादिः पक्षांशश्च पक्षतिः, पक्षात्तिः($\frac{५।२।२५}{१८२६}$)॥७२॥ योनिरुपादानकारणं यथा—मूलप्रकृतिरविकृति-

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

1 Beloved woman. 2 Begging. 1 A cavern. 2 A prison. 3 Protection.

७४ वनिता जनिताऽत्यर्थाऽनुरागायां च योषिति, ।
गुप्तिः क्षिति-व्युदासे ऽपि, धृतिर् धारण-धैर्ययोः ॥
1 Holding. 2 Steadiness. 3 Pleasure.

1 An egg-plant. 2 A metre. 1 A woman. 2 A female elephant. 3 Cry of birds.

७५ बृहती क्षुद्र-वार्ताकी छन्दो-भेदे महत्यपि, । 3 Greatness.
वासिता स्त्री-करिण्योश् च, वार्ता वृत्तौ जन-श्रुतौ, ॥
1 Livelihood. 2 Rumour. 3 Action.

1 Chaff. 2 Health. 3 Insignificant.

७६ वार्तं फल्गुन्यरोगे च त्रिष्वप्सु च घृताऽमृते, ।
1 Water. 2 Nectar. 3 Liquid butter.

1 Silver. 2 Gold.

कलधौतं रूप्य-हेम्नोर्, निमित्तं हेतु-लक्ष्मणोः, ॥
1 Cause. 2 Token.

1 Science. 2 Heard story. 3 Hearing.

७७ श्रुतं शास्त्राऽवधृतयोर्, युग-पर्यातयोः कृतम्, ।
1 The golden age. 2 Enough. 3 Action.

1 Great dread. 2 Valiant act.

अत्याहितं महा-भीतिः कर्म जीवाऽनपेक्षि च, ॥

(सांख्यकारिका ३) । लिङ्गं स्त्रीपुंनपुंसकं यथा–तृतीयाप्रकृतिः षण्ढः (पृ० १४२) । चशब्दात्स्वाम्यमात्यादिः (प्रकृतिः) प्रत्ययात्पूर्वः स्वभावश्च (प्रकृतिः) । कैशिकी-भारतीसात्वत्यारभट्यः (वृत्तयः) (सा. द. ६-१२२) । चशब्दाद् ग्राम्या परुषोपनागरिका (वृत्तिः), कृत्यादिजीविकावृत्तिश्च, वर्तनं वृत्तिः, वर्ततेऽनया च । सिच्यन्ते सिकताः, नित्यं बहुत्वेऽयम् । अपिशब्दात्सिकतिले देशे, देशे लुबिलचौ च (५।२।१०५/१९१२) इत्यणो लुप् । श्रवः श्रोत्रम् । चशब्दात्किंवदन्त्यां षड्जाद्यारम्भिकायामाकर्णने च, श्रूयते शृणोत्यनया श्रवणं श्रुतिः ॥ ७३ ॥ वनु याचने । चशब्दात्स्त्रीमात्रे (वनिता) । गोप्यते गोपनं गुप्तिः, क्षितिव्युदासो भूगर्तः । अपिशब्दात्कारायां रक्षायां च (गुप्तिः), यच्छाश्वतः–गुप्तिः कारा च रक्षा च जीर्णं च विवरं भुवः (५९४)। (धृतिः) भावे करणे च क्तिन्, सौख्येऽप्युपचारात् ॥ ७४ ॥ क्षुद्रवार्ताकी कण्टकारिका, छन्दोविशेषो नवाक्षरपादः (बृहती) । वाश्यते काम्यते वशे स्थाप्यते वाशते वा वाशिता । वासितेति गौडाः पेठुः, कृतवासेति च व्याख्यन् । वर्ततेऽनया वर्तते वा, वृत्तिर्जीविका वास्त्यस्या वार्त्ता । वृत्तिः कृषिपाशुपाल्यवणिज्याख्यात्राभेदोपचारात् । जनश्रुतिर्वृत्तान्तः (वार्ता) । वर्तनं [च] वार्ता ॥ ७५ ॥ फल्गु तुच्छं यथा–वार्त्तमेतत् । चशब्दात्सर्पिषि घृतं, पीयूषे हुतशेषेऽयाचिते भैक्ष्ये मोक्षे चामृतम् । कलः कालिका धौतास्येति निमेद्यति निमित्तं, हेतुः कारणं, लक्ष्म चक्षुःस्पन्दनादि ॥ ७६ ॥ श्रूयते श्रवणं श्रुतं, अवधृतमाकर्णितम् । युगं कालभेदः (कृतम्) । पर्याप्तं यथा–कृतमतिविस्तरेण! क्रियाशब्दस्तु कृतस्त्रिलिङ्गः । अतीवाहितमाहितं वात्याहितं, जीवानपेक्षि कर्म साह-

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh

1 Proper. 2 An element. 3 True.
७८ युक्ते क्ष्माऽऽदावृते, भूतं प्राण्यतीते समे त्रिषु, ।
1 Living being. 2 Past. 3 Like. 4 Ghost. 5 Birth.

1 Verse. 2 Conduct.
वृत्तं पद्ये चरित्रे त्रिष्वतीते दृढ-निस्तले, ॥
3 Past. 4 Firm. 5 Round.

1 Realm. 2 Great. 3 Known. 4 Intellect.
७९ महद् राज्यं चाऽवगीतं जन्ये स्याद् गर्हिते त्रिषु, ।
1 Calumny. 2 Rumour. 3 Censured. 4 Wicked.

1 Silver. 2 White.
श्वेतं रूप्येऽपि, रजतं हेम्नि रूप्ये सिते त्रिषु, ॥
1 Gold. 2 Silver. 3 White.

1 Movable. locomotive. 2 World.
८० त्रिष्वितो, जगदिङ्गेऽपि, रक्तं नील्याऽऽदि-रागि च, ।
1 Red. 2 Dyed, tinged. 3 Blood. 4 Pleasing.

1 White. 2 Yellow. 3 Clean.
अवदातः सिते पीते शुद्धे, बद्धाऽर्जुनौ सितौ, ॥ 1 Bound. 2 White.

1 Fit. 2 Excellent. 3 Patient.
८१ युक्तेऽति-संस्कृते मर्षिण्यभिनीतो, ऽथ संस्कृतम् ।
1 Wrought, finished. 2 Excellent.

3 Prepared. 4 Language grammatically correct.
कृत्रिमे लक्षणोपेते ऽप्यनन्तो ऽनवधावपि,
1 Infinite. 2 Śesha. 3 Vishnu. 4 Siva. 5 Sky. 6 The earth.

साख्यम् ॥ ७७ ॥ युक्ते यथा–यथाभूतवादी प्रामाणिकः स्यात् (?) । क्ष्मादौ यथा–महाभूतानि । ऋतं सत्यं यथा–भूतमप्यनुपन्यस्तं हीयते व्यवहारतः (याज्ञ. २-१९) । प्राणिनि यथा–भूतग्रामः । अतीते यथा–भूते लुङ् । समस्तुल्यो यथा–सुहृद्भूतोऽयम् । ग्रहेऽपि यथा–भूतमियं ब्राह्मणी । प्राप्ते यथा–इत्थंभूतं, भवति स्म भावयते स्मेति, भू प्राप्तौ । (वृत्तं) पद्यं पादबन्धः श्लोकादिः । चरित्रं शीलं (वृत्तम्) । अतीते यथावृत्तोत्सवं पुरम् (मुद्राराक्ष० ३-१७-११) । दृढे यथा–वृत्तदेहः स्नायुसारः (?) । निस्तलं वर्तुलं, अधीतेऽपि (वृत्तम्) ॥ ७८ ॥ महति मह्यते च महत् । चशब्दाद् बृहद् बुद्धितत्त्वं च (महत्) । विरुद्धं गीयतेऽवगीतम् । जननीयो जन्यः, जनस्य जल्पो वा, मतजनहलात्करणजल्पकर्षेषु (४।४।९७ / १६४९) इति यत् । मुहुर्दृष्टेऽपि (अवगीतम्) । श्वेतते श्वेतं, अपिशब्दाच्छुक्ले । रज्यते रजतम् । हेम्नि महारजताख्यम् ॥ ७९ ॥ इतस्तान्ता वाच्यलिङ्गाः । गच्छति जगत्, इङ्गे जङ्गमे । अपिशब्दाद् भुवने (जगत्) । रज्यते रक्तं, नील्यादिरागोऽस्त्यस्य । चशब्दादसृक् (रक्तम्), कुङ्कुमं ताम्रमनुरक्तं च । (अवदातः) दैप् शोधने । (सितः) अर्जुनः शुक्लः, षिञ् बन्धने ॥ ८० ॥ (अभिनीतः) मर्षिण्यक्रोधे । संस्कृतं (४।४।३ / १५५१) अनित्ये साधु, संलक्षणेन प्रकृत्यादिविभागेन सिद्धे शब्दे, संपर्युपेभ्यः (६।१।१३८, १३९ / २५५०, २५५२) इति सुट् । अपिशब्दात्सतो गुणाधाने पक्के च । अपिशब्दान्नागराजे (अनन्तः), विष्णौ व्योम्नि च । अनन्ता

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh

1 Famous. 2 Glad. 3 Known.
८२ ख्याते हृष्टे प्रतीतो, ऽभिजातस् तु कुलजे बुधे, ।
1 Noble. 2 Learned. 3 Bit.

1 Pure. 2 Desert.
विविक्तौ पूत-विजनौ, मूर्छितौ मूढ-सोच्छ्रयौ, ॥
1 Foolish. 2 High, tall. 3 Insensible. 4 Swoon.

1 Sour ; Vinegar. 2 Harsh. 1 True. 2 Right.
८३ द्वौ चाम्ल-परुषौ शुक्तौ, शितौ धवल-मेचकौ, । 1 White. 2 Black.
सत्ये साधौ विद्यमाने प्रशस्ते ऽभ्यर्हिते च सत्, ॥
3 Existing. 4 Excellent. 5 Venerable.

1 Revered. 2 Distressed by foes. 1 Secure. 2 Abode. 3 Calm. 4 Soft.
८४ पुरस्कृतः पूजिते ऽरात्याभियुक्ते ऽग्रतः कृते, । 3 Placed in front.
निवाताबाश्रयाऽवातौ शस्त्राऽभेद्यं च वर्म यत्, ॥
5 Armour.

1 Produced. 2 High.
८५ जातोन्नद्ध-प्रवृद्धाःस्युरुच्छ्रिता, उत्थितास् त्वमी ।
3 Increased. 4 Grown large.

1 Increased. 2 Endeavouring. 3 Produced.
वृद्धिमत्-प्रोद्यतोत्पन्ना, आदृतौ सादराऽर्चितौ. ॥
1 Respectful. 2 Respected.

1 Group. 2 Born.
' समूहोत्पन्नयोर् जातमहिजिच् छ्रीपतीन्द्रयोः ।
1 Snake charmer. 2 Krishna. 3 Indra.

1 Waterfall. 2 Noctral combat.
सौतिके ऽपि प्रपातो ऽथावपातावतटावटौ ॥११॥
1 Descent. 2 Precpice. 3 Pit.

1 Union. 2 Battle. 3 Holy sticks.
समित् सङ्गे रणे ऽपि स्त्री व्यवस्थायामपि स्थितिः' ।१२।
1 Stay. 2 Order. 3 precipice.

इति तान्ताः ।

च भूः ॥ ८१ ॥ प्रतीयते प्रत्येति वाः (प्रतीतः), ज्ञातेऽपि । सुकुमारे न्याय्ये चोपचारात् (अभिजातः) । विचिर्विरेचने, विजिर् पृथग्भावे, असंयुक्तो[पृक्तोऽ]पि (विविक्तः) । मूर्च्छा मोहसमुच्छ्राययोः ॥ ८२ ॥ अम्लं चुक्रं, यदाहुः–यन्मूलादि शुचौ भाण्डे सक्षौद्रगुडकाञ्जिकं । धान्यराशौ त्रिरात्रस्थं चुक्रं शुक्तं तदुच्यते (वैद्यकम्?)॥ परुषे शुक्त उपचारात्, यथा–शुक्तां वाचं (न) वदेत् । चशब्दात्पूतिगन्धे, ईशुचिर् पूतीभावे (शुक्तः) । शिज् निशाने, मेचकः कृष्णः (शितिः) । अस्तेः शतृप्रत्ययः, सत्त्वे च सत् ॥ ८३ ॥ (पुरस्कृतः) पुरोऽव्ययमिति ($\frac{२।४।६७}{७६८}$) गतित्वात्सत्वम् । अरातिनाभियुक्तोऽभिषेणितः, अभिषिक्तोऽपि (पुरस्कृतः) । निवायते गम्यते निवातः, निवृत्तो वातोऽत्र । शस्त्राभेद्यं च वर्म, यथा–निवातकवचाः ॥ ८४ ॥ ऊर्ध्वक उच्चकः (उच्छ्रितः) । प्रोद्यतः सोद्यमः (उत्थितः) । कर्तृकर्मणोः क्तः (आदृतः) ॥ दुर्गश्चाह–कर्मविपाकेऽपि गतिर्गर्मुद् हेम्न्युल्बणे तृणे । ऋतमुञ्छ-

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

1 Meaning. ८६ अर्थो ऽभिधेय-रै-वस्तु-प्रयोजन-निवृत्तिषु, ।
2 Wealth.
3 Thing. 4 Purpose. 5 Prohibition. 6 Object. 7 Cause. 8 Request.

1 Place of water. निपानाऽऽगमयोस् तीर्थमृषि-जुष्टे जले गुरौ, ॥
2 Sacred science.
3 Holy place. 4 water. 5 Holy instructor. 6 Sacrifice. 7 Saint.

1 Powerful. ८७ समर्थस् त्रिषु शक्ति-स्थे संबद्धाऽर्थे हिते ऽपि च, ।
2 Connected in sense. 3 Benevolent.

1 Impotent. दशमीस्थौ क्षीणराग-वृद्धौ, वीथी पदव्यपि, ॥
2 Very old.
1 A road. 2 A shop. 3 Terrace in front of a house. 4 Line.

1 Assembly. ८८ आस्थानी-यत्नयोरास्था, प्रस्थो ऽस्त्री सानु-मानयोः, ।
2 Care.
3 Consideration. 4 State. 1 Side of a hill. 2 A measure.

1 Science. 'शास्त्र-द्रविणयोर् ग्रन्थः, संस्था ऽऽधारे स्थितौ मृतौ' ॥ १२ ॥
2 Wealth.
1 Support. 2 Stability. 3 Death.

इति थान्ताः ।

1 Meaning; opinion. अभिप्राय-वशौ छन्दावब्दौ जीमूत-वत्सरौ, ॥ 1 A cloud.
2 Subjection. 2 A year.

शिले सत्ये शोभनेऽपि विवक्षितम् ॥ उदास्थितः प्रतीहारे चरभेदे समाहितः । ध्यानस्थे चाप्यनीकस्थो गजलक्षणवेदिनि ॥ श्रद्धारचनयोर्भक्तिर्गौण्यां वृत्तौ च सेवने । आप्तौ लब्धप्रत्ययितौ नप्ता पुत्रश्च पुत्रयोः ॥ भ्रातृपुत्रौ स्वसृदुहितृभ्यां ($\frac{१।२।६८}{९३४}$) इत्येकशेषोऽत्र । ॥ ८५ ॥ इतस्थान्ताः । अर्यतेऽर्थ्यते वार्थः । अभिधेयः शब्दार्थः । रा धनं (अर्थः) । वस्तुनि पदार्थे । निवृत्तौ यथा—मशकार्थोऽयं धूमः । इन्द्रियविषये कारणे च (अर्थः) । निपानं जलाशयः, आगमः शास्त्रं (तीर्थम्) । ऋषिजुष्टं प्रभासपुष्करादि, यदध्यासितमर्हद्भिस्तद्धि तीर्थमिति (कु. सं. ६–३८) । गुरौ यथा—तीर्था(दा)प्तविद्यः । जलावतरणमार्गे सत्त्रिण्यध्वरे पुण्यक्षेत्रे पात्रेऽपि यथा—तीर्थं तद्व्यकव्ययोः (मनु ३,१३०) तरत्यनेन तीर्थम् ॥ ८६ ॥ समर्थयते समर्थ्यते संगतोऽर्थोऽस्येति (वा) वा समर्थः दशम्या कामावस्थायां वयोऽवस्थायां च तिष्ठति दशमीस्थः, क्षीणो रागेण क्षीणरागः, मरणावस्थां प्राप्तो नष्टबीजो वा । वेतेर्विथेश्च वीथी, पदवी मार्गः । अपिशब्दाद् गृहप्रांतः पङ्क्तिश्च (वीथी) ॥ ८७ ॥ आतिष्ठन्त्यस्यामास्थानी । आलम्बनं चास्था । प्रतिष्ठन्तेऽस्मिन् प्रस्थो गिरेः समा भूः । मानमाढकचतुर्भागोऽत्र (प्रस्थः) । अथ दान्ताः । (अभिप्रायवशौ) यथा—छन्दानुवर्ती, स्वच्छन्दः, छदेः—रूपम् । अपो ददात्यब्दः. आप्नोति च ॥ ८८ ॥ आज्ञामपवादमाहुः । दायं रिक्थमादत्ते दायादः, बान्धवः सपिण्डः । (पादः) कर्तरि पदरुजेति ($\frac{३।३।१६}{३१८२}$) घञ्कर्मकरणादौ च । तुर्योऽशो रूपकादेश्चतु-

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh

1 Defamation.
2 Command.

८९ अपवादौ तु निन्दाऽऽज्ञे, दायादौ सुत-बान्धवौ, ।

1 Son. 2 Kinsman.

1 A ray of light.
2 A foot. 3 A fourth part. 4 A root. 5 A measure of a verse.

पादा रश्म्यङ्घ्रि-तुर्याशाश्, चन्द्राऽग्न्यर्कास् तमोनुदः, ॥

1 The moon. 2 Fire. 3 The Sun.

1 Ill report.
2 Disregard.
3 Controversy decided.

९० निर्वादो जनवादे ऽपि, शादो जम्बाल-शष्पयोः, ।

1 Mud. 2 Young grass.

1 Cry. 2 Weeping.

आरावे रुदिते त्रातर्याक्रन्दो दारुणे रणे, ॥

3 Protector. 4 Dreadful fight.

1 Favour.
2 Tranquility.
3 Clearness. 4 Brightness. 5 Pleasure.

९१ स्यात् प्रसादोऽनुरागेऽपि, सूदः स्याद् व्यञ्जनेऽपि च, ।

1 Sauce or condiment. 2 Cook.

1 A cowherd.
2 Krishna.

गोष्ठाऽध्यक्षेऽपि गोविन्दो, हर्षेऽप्यामोद-वन् मदः, ॥

1 Joy. 2 Fragrance. 3 Intoxication. 4 Pride. 5 Liquor. 6 Rut of elephants.

1 Chief.
2 Royal insignia.

९२ प्राधान्ये राज-लिङ्गे च वृषाऽङ्गे ककुदो ऽस्त्रियाम्, ।

3 Hump of a bull. 4 Summit of a hill.

1 Knowledge.
2 Conversation.
3 Agreement. 4 War. 5 Name. 6 Pleasing. 7 Conduct. 8 Promise.

स्त्री संविज्ज्ञान-संभाषा-क्रियाकाराऽऽजि-नामसु, ॥

भागः, कुलाद्रेः प्रत्यन्तपर्वतोऽपि पादः ॥ ८९ ॥ अपिशब्दादाभाषो निश्चितवादश्च (निर्वादः) । शीयन्तेऽवसीदन्त्यनेन शादः पङ्कः । शाद्य(त्य)ते छिद्यते शादस्तृणम् । आक्रन्दनमाक्रन्दयते—आक्रन्दन्त्यस्मिंश्चाक्रन्दः । त्राता पार्ष्णिग्राहाक्रान्तस्य विजिगीषो रक्षिता, आहुश्च—पार्ष्णिग्राहस्तथाक्रन्दः (मनुः ७-२०७) ॥९०॥ (अनुरोधे) यथा—प्रसादे वर्तस्व (शार्ङ्गधरप० ७—२०७) । अपिशब्दान्नैर्माल्ये प्रीतिदाने च (प्रसादः), काव्यगुणे तूपचारात् । सूद्यते पच्यते सूदयति च सूदः, व्यञ्जनं सूपोऽत्र । अपिशब्दात्सूपकारे (सूदः) । अपिशब्दाद्विष्णौ । गां विन्दति गोविन्दः, अनुपसर्गाल्लिम्पविन्देति (३।१।१३८) शः । अपिशब्दाद् गन्धेऽप्याम्मोदः । गर्वे क्षेव्ये गजदाने च मदः, मदोऽनुपसर्गे (३।३।६७) इत्यप् ॥९१॥ प्रधानमेव प्राधान्यं, राजलिङ्गं छत्रादि, कङ्कते कं कौति वा ककुदम् । शैलशृङ्गे ककुच्छब्दोऽप्यस्ति, यथा—ककुद्मान् । संवेदनं संवेद्यतेऽस्यां संविदन्ति(ते) अनया संविद् । ज्ञाने यथा—एकमेवेदं संविद्रूपम् (?) । संभाषा संकेतो यथा—प्रवृत्तौ च निवृत्तौ च संविदं स्थापयेद्रणे (?) । क्रियाकारो व्यवस्थापनं यथा—संविदं लङ्घयेच्च यः (याज्ञवल्क्य० २—१८७) । आजिर्युद्धं, नाम संज्ञा । तोषणाचारप्रतिज्ञास्वप्याहुः

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

1 Religious and moral merit. ९३ धर्मे रहस्युपनिषत्, स्यादृतौ वत्सरे शरत्, ।
2 Privacy. 3 Vedanta. 4 Principle. 1 The sultry season. 2 A year.

1 Industry. पदं व्यवसिति-त्राण-स्थान-लक्ष्माऽङ्घ्रि-वस्तुषु, ॥
2 Defence Resort.
3 Place. 4 Mark. 5 Foot. 6 Thing. 7 Footsteps. 8 Word. 9 Sound.

1 Spot frequented by kine. ९४ गोष्पदं सेविते माने, प्रतिष्ठा कृत्यमास्पदम्, ।
2 A measure. 1 Dignity. 2 Business. 3 Place.

1 Desired. त्रिष्विष्ट-मधुरौ स्वादू, मृदू चातीक्ष्ण-कोमलौ, ॥ 1 Blunt.
2 Sweet. 2 Soft.

1 Foolish, dull. ९५ मूढाऽल्पाऽपटु-निर्भाग्या मन्दाः स्युर्, द्वौ तु शारदौ ।
2 Little. 3 Slow sick. 4 Unluckly. 5 Gentle. 6 Deer. 7 Elephant. 8 Saturn.

1 New. 2 Diffident. प्रत्यग्राऽप्रतिभौ, विद्वत्-सुप्रगल्भौ विशारदौ. ॥
3 Produced in autumn. 4 Purity. 5 A year. 6 Durga. 1 Learned. 2 Confident.

इति दान्ताः ।

(संविद्) ॥९२॥ उपनिषीदन्त्यस्यामुपनिषद्, वेदान्तोऽपि रहस्यत्वात्। तत्त्वेऽपि यथा–धर्मस्योपनिषत्परा (?)। ऋतुरत्राश्वयुजकार्त्तिको (शरद्)। वत्सरं यथा–जीवेच्च शरदां शतम् (या० १२।३०८)। शीर्यन्तेस्यामोषधयः शरत्, स्त्री। (पदं) खलोभगःपदचेति-वक्तव्यात् (वा० ?) खः। त्राणं शरणं यथा–पदमापदि माधवः (?)। स्थानं यथा–सूर्यांशवः शशिनि लब्धपदा यथैव (?)। लक्ष्म यथा–नवनखपदलेखा-लाञ्छितं बाहुमूलम् (?)। अङ्घ्रिर्यथा–पादाग्रे प्रपदम् (पृ. १४९)। वस्तु यथा–पदार्थः। पादन्यासे पादमुद्रायां सुप्तिङन्ते च, यथा–कुरु घनोरु पदानि शनैः शनैः (वेणीसंहार० २–२१), पदं तुपारस्रुतिधौतरक्तम् (कु० सं० १–६), पदसमूहो वाक्यम् (न्यायभाष्य० पृ. ११७ पूना ओरिएंटल सीरीज्) ॥ ९३ ॥ गोभिः सेवितं गोष्पदं, गोष्पदं सेवितासेवितप्रमाणेषु इति साधुः। माने गोखुरश्वभ्रे, यथा–गोष्पदं प्रविष्टो देवः (?)। आस्पदं प्रतिष्ठायाम् ($\frac{६।१।१४६}{१०६१}$) साधुः, कृत्य उपचारात्। इष्टो मृष्टः, मधुरो रसः, यथा–रसाः स्वाद्वम्ललवणति-क्तोषणकषायकाः (सप्तप. २), स्वदते स्वादु। मृद्यते मृदुः, अतीक्ष्णोऽत्राहिंस्रः ॥ ९४ ॥ मूढो यथा–मन्दः कवियशःप्रार्थी (रघु० १–३)। अल्पे यथा–मन्दोदरी। अपटुः सरुक्, यथा–मन्दं विचिकित्सति भिषक्। निर्भाग्ये यथा–मन्दभाग्यः। स्वैरेऽप्यल्पत्वाद्यथा–[मन्द] मन्दपदगामी [चारी], भद्रो मन्दो मृगश्चेति (शि. २–२८ टीका)। हस्तिविशेषः सौरिश्च (मन्दः)। शरदि भवः शारदः, लक्षणयाभिनवः, अधृष्टोऽप्रतिभः। शुद्धौ वर्षे च (शारदः)।

CC-0. Agamnigam Foundation. Digitized by eGangotri

1 A fathom.
2 The Indian fig tree. 3 Measured by arms.

९६ व्यामो वटश् च न्यग्रोधावुत्सेधः काय उन्नतिः, ।
1 Body. 2 Height.

1 A yoke for burdens.
2 A highway. 3 Load. 4 Storing of Corn.

पर्याहारश् च मार्गश् च विवधौ वीवधौ च तौ; ॥

1 A branch of a tree at a sacrifice.
2 Halo round sun. 3 Navel of a wheel.

९७ परिधिर् यज्ञिय-तरोः शाखायामुपसूर्यके, ।

1 A pledge.
2 A calamity.
3 Mental agony. 4 Place.

बन्धकं व्यसनं चेतःपीडा ऽधिष्ठानमाधयः, ॥

1 A reconciling of differences.
2 Silence. 3 Promise. 4 Meditation. 5 Perseverance.

९८ स्युः समर्थन-नीवाक-नियमाश् च समाधयः, ।

1 Offence or guilt.
2 Indicatory letters unsounded. 3 Elements of language.

दोषोत्पादे ऽनुबन्धः स्यात् प्रकृतस्याऽदि-विनश्वरे ॥

3 A person following an example.

९९ मुख्याऽनुयायिनि शिशौ प्रकृत्याऽनुवर्तने, ।
4 Child. 5 Continuation.

1 VISHNU.
2 The moon.

विधुर् विष्णौ चन्द्रमसि, परिच्छेदे बिले ऽवधिः, ॥
1 Limit. 2 A hole. 3 Attention. 4 Period. 5 Place.

विगतो शारदोऽप्रतिभत्वदोषोऽस्य विशारदः ॥ ९५ ॥ अथ धान्ताः । व्यामस्तिर्यक्-कृतबाह्वन्तरम्, न्यग्रुणद्धि न्यग्रोधः न्यग्रोहति च, न्यङ्क्कादिः ($\frac{७।३।५३}{२८६४}$)। ऊर्ध्वं सिध्यत्यनेनोत्सेधः, ऊर्ध्वं सेच(ध)नं च । परित आहरणं व्रीहितृणादेः पर्याहारो भाराख्यः (विवधः)। विशिष्टो वधो गमनमत्रेति विवधः, बाहुलकाद्वा दीर्घः उपसर्गस्येति ($\frac{६।३।१२२}{१०४४}$) ॥९६॥ परितोऽग्नेश्चातुर्दिक्कं (चतुर्दिशं) धीयते बर्हिस्तरणवत् परिधिः, यदाहुः–बाहुप्रमाणं परिधिरच्छिन्नाग्रोऽतिपत्रलः (?)। उपसूर्यकं सूर्यमण्डलं प्रतिसूर्याख्यम् । चक्रप्रान्तेऽपि (परिधिः) । बन्धकं यदुत्तमर्णाय भूम्याद्याधीयते, यथा–आधिर्विनश्येद् द्विगुणे धने यदि न मोक्ष्यते (या. ३–५८) । व्यसनं यथा–आधिं प्राप्तो यो न मुह्येत्स धीरः (?) । आध्यानमाधिर्मानसी पीडा ।आधीयतेऽस्मिन्नाधिराधारः ॥ ९७ ॥ समर्थनं चोद्यपरिहारः, यथा–अत्रायं समाधिः । नीवाको वचनाभावः समाधिरिव । चशब्दाच्चित्तैकाग्र्यं समाधानं(च),समाधीयते मनोऽस्मिन्समाधिः। दोषोत्पादे यथा–अनुबन्धमवस्थां च ज्ञात्वा दण्डं निपातयेत् । (मनु ८-१२६) प्रकृतिप्रत्ययागमादेशानां यः कार्यार्थमासज्यते विनश्वर उच्चरितप्रध्वंसी सोऽनुबन्धः ॥ ९८ ॥ मुख्यानुयायी यथा–अनुबन्धी(न्धः) शिशुः स्नेहेनानुबध्नातीति । प्रकृतानुवर्तने यथा–वैरानुबन्धः । विधति विदधाति विधत्ते वा विधुः, विध विधाने, विधीयते सुरैः पीयते वा, धेट् पाने । पर्यन्तेऽवधीयतेऽवधिः । उपचारादवधाने कालेऽपि

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh

1 Rule, form. 2 Fate. 3 Time. 4 Brahma. 5 Ritual. 6 Kind. 7 Command.
१०० विधिर् विधाने दैवे ऽपि, प्रणिधिः प्रार्थने चरे, ।
1 Request. 2 A spy. 3 Place.

1 Learned. 2 Budha. 3 Defied saint. 4 Old. 5 Increased.
बुध-वृद्धौ पण्डिते ऽपि, स्कन्धः समुदये ऽपि च, ॥
1 Multitude. 2 A trunk of a tree. 3 A shoulder. 4 Part of the army. 5 King. 6 Chapter. 7 Five objects of sense.

1 Name of a country.
१०१ देशे नद-विशेषे ऽब्धौ सिन्धुर् ना सरिति स्त्रियाम्, ।
2—of a river. 3 A sea. 4 A river.

1 Form or rule. 2 Manner, sort. 3 Fodder. 4 Prosperity.
विधा विधौ प्रकारे च, साधू रम्ये ऽपि च त्रिषु, ॥
1 Handsome, pleasing. 2 A saint. 3 Right. 4 Good.

1 A wife. 2 Daughter-in-law. 3 A woman. 4 A bridge.
१०२ वधूर् जाया स्नुषा स्त्री च, सुधा लेपोऽमृतं स्नुही, ।
1 Plaister. 2 Nectar. 3 Euphorbia Ternealli. 4 Head.

1 Promise. 2 State, boundary. 3 Joint.
संधा प्रतिज्ञा मर्यादा, श्रद्धा संप्रत्ययः स्पृहा, ॥
1 Belief, confidence. 2 Fondness.

1 Ardent spirit. 2 Nectar of flowers. 3 Honey.
१०३ मधु मद्ये पुष्प-रसे क्षौद्रे ऽप्यन्धं तमस्यपि, ।
4 A demon. 5 Chaitra. 6 Bassia Latifolia. 7 Spring. 1 Darkness. 2 Blind. 3 Water.

1 Conceited of learning. 2 Proud. 3 Elevated.
अतस् त्रिषु, समुन्नद्धौ पण्डितंमन्य-गर्वितौ, ॥

(अवधिः) ॥ ९९ ॥ (विधिः) भावकरणादौ किः, उपसर्गे घोः किः ($\frac{३।३।९२}{३।२।७०}$)। अपिशब्दात्काले धातरि कल्पे प्रकारे विधायके च वाक्ये (विधिः)। (प्रणिधिः) भावे कर्मणि च किः। अवधानेऽपि (प्रणिधिः)। अपिशब्दाज्जिने स्थविरे च (बुधवृद्धौ)। स्कन्धतिस्कन्धः। समुदये यथा—सप्त वातस्कन्धाः (वायु. पु. ?)। अपिशब्दात्सैन्यभागे यथा—स्कन्धावारः। अंसे राज्ञि समूहे वृक्षजङ्घायां च (स्कन्धः)। बौद्धे च यथा—संज्ञारूपसंवेदनासंस्कारसमुदायाख्याः [विज्ञानलक्षणाः] पञ्चस्कन्धाः (शि. २-२८ टीकायां) ॥ १०० ॥ देशे यथा—सिन्धुर्देशः, स्यन्दते सिन्धुः, सरित्सामान्ये, विशेषे च यथा—सिन्धोः परमपूरुषम् (?)। विधौ विधाने (विधा)। प्रकारे यथा—द्विविधाः। चशब्दाद्धस्त्यश्वादिभोजने वेतने च (विधा)। साध्नोति साधुः। अपिशब्दात्सज्जने (साधुः)। युक्ते रम्यत्वात्, यथा—साधु दृष्टं यद् द्रष्टव्यम् (शा. २—७ 1. १४) ॥ १०१ ॥ उह्यते बध्नाति वा वधूः, स्त्रीति स्त्रीमात्रम्। सुष्ठु धीयते धयन्ति वैतां सुधा। लिप्यतेऽनेनेति लेपो मक्कोलादिः, स्नुही वज्रकन्दा यथा—सुधाक्षीरम्। मूर्धापि (सुधा)। (प्रतिज्ञा) यथा—सत्यसन्धः। संधारणं च (संधा)। संप्रत्ययो भक्त्यतिशयो यथा—श्रद्धया परयोपेताः (भगवद्गीता १२-२)। स्पृहा यथा—भोजने श्रद्धालुः ॥ १०२ ॥ माद्यन्त्यनेन मन्यते च मधु। क्षुद्राभिः कृतं क्षौद्रं, क्षुद्राभ्रमरवटरेति ($\frac{४।३।१०९}{१।४।९९}$) अञ्। अपिशब्दा-

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

1 A reproachful appellative.
2 Indefinite appelation.

१०४ ब्रह्मबन्धुरधिक्षेपे निर्देशे, ऽथाऽवलम्बितः ।
1 Relied on.

2 Near. 3 Wrapt up. 4 Bound.

अ-विदूरो ऽप्यवष्टब्धः, प्रसिद्धौ ख्यात-भूषितौ. ॥
1 Notorious. 2 Adorned.

1 Odour.
2 Sulphur.
3 Little. 4 Arrogance.

'लेशेऽपि गन्धः, संबाधो गुह्यसंकुलयोरपि ।
1 Female organ. 2 Throng. 3 Distress.

1 Prohibition.
2 Pain. 3 Injury.

बाधा निषेधे दुःखे च, ज्ञातृचान्द्रिसुरा बुधाः' ॥१३॥
1 A wise man. 2 Moon light. 3 Liquor.

इति धान्ताः ।

1 The Sun.
2 Fire.

१०५ सूर्य-वह्नी चित्रभानू, भानू रश्मि-दिवाकरौ, ।
1 Ray of light. 2 The Sun.

1 BRAHMA.
2 Body.

भूतात्मानौ धातृ-देहौ, मूर्ख-नीचौ पृथग्जनौ, ॥
1 An ignorant man. 2 One of a low tribe.

1 A mountain.
2 A rock or stone.

१०६ ग्रावाणौ शैल-पाषाणौ, पत्रिणौ शर-पक्षिणौ, ।
1 An arrow. 2 A bird. 3 A Falcon.

1 A tree.
2 A mountain.

तरु-शैलौ शिखरिणौ, शिखिनौ वह्नि-बर्हिणौ, ॥
1 Fire. 2 A peacock. 3 A tree. 4 Arrow. 5 Cock. 6 Gallineous fowl. 7 Crested.

1 Desire.
2 Making prisoner.

१०७ प्रतियत्नावुभौ लिप्सोपग्रहावथ सादिनौ । 3 Comprehension.

1 Charioteer.
2 Horseman.
3 Elephant-rider.

द्वौ सारथि-हयारोहौ, वाजिनो ऽश्वेषु-पक्षिणः, ॥.
1 A horse. 2 An arrow. 3 A bird.

द्वैये चैत्रे मधूके वसन्ते च पुंलिङ्गः (मधुः)। अपिशब्दादचक्षुषि जले च (अन्धम्)। इतो धान्ता वाच्यलिङ्गाः। उर्ध्वबद्धोऽपि (समुन्नद्धः) ॥ १०३ ॥ ब्रह्मणो ब्राह्मणस्य बन्धुः, परमनुष्ठानाभावाज्जातिब्राह्मणः। एवं क्षत्रबन्धुः। निर्देशे यथा–व्यवस्थिताख्याने ब्रह्मणो बन्धुर्ज्ञातिरिति। अवलम्बितो वस्त्रादौ रुद्धः (अवष्टब्धः)। अविदूरे यथा–अवष्टब्धे सेने, अवाचालम्बनाविदूर्ययोः ($\frac{८।३।६८}{२२७३}$) इति षत्वम्। अपिशब्दाद्बद्धोऽपि (अवष्टब्धः)। प्रसिध्यति प्रसाध्यते च प्रसिद्धः। ॥ १०४ ॥ अथ नान्ताः। चित्रा भानवो रश्मयोऽनयोः। भाति भानुः। भूतानामात्मा भूतान्येवात्मास्य वा भूतात्मा। भूपृथक्कार्यो जनः–असभ्यत्वात्पृथग्जनः ॥१०५॥ गिरति गृणाति वा ग्रावा। पत्राणि पक्षाः सन्त्यस्य पत्री। श्येनोऽपि (पत्री)। वृक्षकुक्कुटौ च (शिखिनौ), दुर्गश्च—शिख्याख्या वह्निबर्हिद्विजकुक्कुटशार्ङ्गकाः, शार्ङ्गको मन्दपालसुतः पक्षी च ॥ १०६ ॥ उपग्रहो बन्दिग्रहणादिः (प्रतियत्नः)। सतो गुणान्तराधानं संस्कारश्च (प्रतियत्नः)। सीदत्यवश्यं सादयति वा सादी। वाजाः

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh

1 Family. 2 Native spot. 3 Noble born.
१०८ कुले ऽप्यभिजनो जन्म-भूम्यामप्यथ हायनाः ।
1 A year. 2 Ray of light.
3 A kind of rice.
वर्षाऽर्चिर्-व्रीहिभेदाश्च, चन्द्राग्न्यर्का विरोचनाः, ॥
1 The moon. 2 Fire. 3 The Sun. 4 Name of a Person.

1 Hair. 2 Skin. 3 Sin.
१०९ केशे ऽपि वृजिनो, विश्वकर्मा ऽर्क-सुरशिल्पिनोः, ।
1 The Sun. 2 The artist of the gods.
1 Care. 2 Firmness. 3 Intellect. 4 Disposition. 5 Brahman. 6 Body. 7 Soul. 8 Mind.
आत्मा यत्नो धृतिर् बुद्धिः स्वभावो ब्रह्म वर्ष्म च, ॥

1 INDRA. 2 A vicious elephant. 3 Monsoon. 4 Mischievous. 5 Collision.
११० शक्रो घातुक-मत्तेभो वर्षुकाऽब्दो घनाघनः, ।
1 Pride of wealth, etc. 2 Knowledge. 3 Request 4 Killing.
अभिमानो ऽर्थाऽऽदि-दर्पे ज्ञाने प्रणय-हिंसयोः, ॥

1 A cloud. 2 Solidity. 3 Hard. 4 Thick. 5 Cyperus rotundus. 6 Iron club. 7 Assemblage. 8 Cymbal.
१११ घनो मेघे मूर्ति-गुणे त्रिषु मूर्ते निरन्तरे, ।
1 The Sun. 2 A master.
इनः सूर्ये प्रभौ, राजा मृगाङ्के क्षत्रिये नृपे, ॥
1 The moon. 2 A soldier by tribe. 3 A king.

पक्षाः सन्त्यस्य वाजी । अश्वाः पूर्वं सपक्षा अभवन्, इषुः शरः (वाजी) ॥ १०७ ॥ अभिजायतेऽस्मादभिजनः, जनिवध्योश्च (७।३।३५) इति ह्रस्वः । वर्षेऽर्चिषि च क्लीबे (हायनं) आहुः । व्रीहिविशेषः (हायनः) षष्टिकाख्यः । जहाति जलं हायनः, हश्च व्रीहिकालयोः (३।१।१४८) ण्युट् । विरोचते विरोचनः, अनुदात्तेतश्च (३।२।१४९) इति युच् ॥ १०८ ॥ अपिशब्दाच्चर्मपापयोः क्लीबे, वर्ज्यत इति वृजिनम् । विश्वस्य कर्मास्माद्विश्वं च कर्माऽस्य विश्वकर्मा । यत्ने यथा–महात्मा । स्वभावे यथा–दुष्टात्मा । ब्रह्मणि यथा–आत्मैवेदं सर्वमिदं (छां. ७।२५।२) नेह नानास्ति किंचन (कठोपनिष० २।४।११) । वर्ष्म शरीरं यथा–कृशात्मा । चशब्दात्क्षेत्रज्ञः (आत्मा) ॥ १०९ ॥ हन्ति तच्छीलो घातुकः, स चासौ मत्तेभश्च (घनाघनः) । वर्षति तच्छीलो वर्षुकोऽब्दो मेघः, हन्तीति घनाघनः, चरिचलिपतिवदीनां वा द्वित्वमच्याक् चाभ्यासस्य (वा० ३।४।३०), हन्तेर्घत्वं च (वा० ३।४।३१) इति सिद्धिः। प्रणयः प्रार्थना, मानेर्मन्यतेश्च भावे रूपम् । हिंसायां तु मीनातेर्ल्युट्याहुः, मीनातिमिनोतिदीङामिति (६।१।५७) आत्वम् ॥ ११० ॥ हन्यतेऽनेन हन्ति वा घनः, मूर्तौ घनः (३।३।७७) इति साधुः । मूर्तिगुणः काठिन्यं, असर्वगतद्रव्यपरिमाणं मूर्तिः सैव गुणो वा, दर्शनं च स्पर्शनं मूर्तिः । निरंतरं निबिडं (घनं) मुस्तो लोहमुद्गरं बाहुल्यं च (घनः) । घनं तु कांस्यवाद्यम् । एतीति–इनः, प्रभुः स्वामी । सोमो राजा द्विजातीनामिति

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

1 A dancing girl. 2 A female messenger. 3 A clever woman.
११२ वाणिन्यौ नर्तकी-दूत्यौ, स्रवन्त्यामपि वाहिनी, ।
1 A river. 2 An army. 3 Kind of Metre.

1 The thunderbolt. 2 Lightning.
ह्रादिन्यौ वज्र-तडितौ, वन्दायामपि कामिनी, ॥
1 A climbing plant. 2 A lady.

1 The skin. 2 Body. 3 Thin. 4 Small. 5 Separate.
११३ त्वग्-देहयोरपि तनुः, सूना ऽधो-जिह्विका ऽपि च, ।
1 The uvulva. 2 A murder place. 3 Place of Slaughter such as Kitchen etc. 4 Delivery. 5 Flower.

1 A sacrifice. 2 Expansion. 3 Mean.
क्रतु-विस्तारयोरस्त्री वितानं त्रिषु तुच्छके ॥

4 Slow. 5 Empty. 6 Canopy.
११४ मन्दे, ऽथ केतनं कृत्ये केतावुपनिमन्त्रणे, ।
1 Indispensable act. 2 A Banner. 3 Invitation.

1 Holy writ. 2 True knowledge. 3 A Penance.
वेदस् तत्त्वं तपो ब्रह्म, ब्रह्मा विप्रः प्रजापतिः, ॥
1 A priest by birth. 2 The creator.

1 Perseverance. 2 Destruction.
११५ उत्साहने च हिंसायां सूचने चाऽपि गन्धनम्, ।
3 Indication. 4 Manifestation.

1 Calcining. 2 Speed. 3 Satisfaction. 4 Calamity.
आतञ्चनं प्रतीवाप-जवनाऽऽप्ययनाऽर्थकम्, ॥

1 A mark or token. 2 A beard.
११६ व्यञ्जनं लाञ्छनं श्मश्रु-निष्ठानाऽवयवेष्वपि, ।
3 Condiment. 4 Private part of a male or female. 5 A consonant.

1 Detraction. 2 A combat of animals, birds and serpents. 3 Rumour.
स्यात् कौलीनं लोक-वादे युद्धे पश्वहि-पक्षिणाम्, ॥

श्रुतिः (कौ. ५।२०।५) ॥ १११ ॥ वनुते तच्छीला वाणिनी, वणेः शब्दार्थाद्वाणिनीति सभ्यः । विदग्धापि (वाणिनी) । स्रवन्त्यां नद्यां (वाहिनी)। अपिशब्दात्सेनायां, वहति वाहते वा तच्छीला वाहिनी, वाह प्रयत्ने। वन्दा वृक्षरुहा, अपिशब्दात्स्त्रीविशेषे (कामिनी) ॥ ११२ ॥ अपिशब्दात्कृशाल्पविरलेषु, तन्यते तनुः । (सूना) [षू प्रेरणे], अपिशब्दाद् भक्ष्यप्राणिवधस्थानम् । पञ्च सूना गृहस्थस्येति (मनु. ३-६९) तूपचारात् । पुष्पं तु सूनम् । वितन्यते वितानं, विगतं तननं वाऽत्र । शून्ये कदर्के [र्यं] के च (वितानम्) ॥ ११३ ॥ केत्यतेऽनेन केतनं, कित ज्ञाने । कृत्येऽवश्यंकार्ये यथा–कार्यकेतनम् । केतौ ध्वजे यथा–मीनकेतनः । उपनिमन्त्रणे यथा–ब्राह्मणो निकेतनं नातिक्रामेत् (?)। तत्त्वं ज्ञानं, ब्रह्म वेदा ब्रह्म तपो ब्रह्म ज्ञानं च शाश्वतम् (?)। बृह वृद्धौ, विप्रे यथा–ब्रह्महत्या। त्रिष्वर्थेषु क्लीबे द्वयोः पुंसि ॥ ११४ ॥ हिंसार्थे यत्सूचनं मतदर्शनं, यदाहुः–गन्धनं हिंसायामित्येके पेठुः । अपिशब्दात्प्रकाशने (गन्धनम्) । तञ्चु गतौ, प्रतीवापः स्वर्णादेर्द्रुतस्य द्रव्यान्तरेणावचूर्णनं विपरीतावपनम् (आतञ्चनम्) ॥ ११५ ॥ व्यज्यतेऽनेन व्यञ्जनं निष्ठानं भक्ताद्युपसेचनं दध्यादि, अवयवः स्त्र्यादिचिह्नम् ।

CC-0. Agamnigam Foundation Preservation Foundation, Chandigarh

1 Going forth, exit. ११७ स्यादुद्यानं निःसरणे वन-भेदे प्रयोजने, । 2 A garden. 3 Purpose.
1 Leisure. 2 Place. 3 Stay. अवकाशे स्थितौ स्थानं, क्रीडाऽऽदावपि देवनम्, ॥
1 Sport, play. 2 Grief. 3 Desire to surpass. 4 Lamentation. 5 Gambling.

1 Turning away. 2 Opposition. ११८ व्युत्थानं प्रतिरोधे च विरोधाऽऽचरणे ऽपि च, ।
3 Independence.
1 Manly exertion. 2 Domestic affairs. 3 Getting up. 4 Motion. उत्थानं पौरुषे तन्त्रे संनिविष्टोद्गमे ऽपि च, ॥

1 Killing. 2 Obsequies. 3 Motion. ११९ मारणे मृत-संस्कारे गतौ द्रव्ये ऽर्थ-दापने । 4 Substance. 5 Repayment.
6 Accomplishing. 7 Materials. निर्वर्तनोपकरणाऽनुव्रज्यासु च साधनम्, ॥
8 Accompanyment. 9 Means. 10 following. 11 Army. 12 Cause. 13 Sacrifice.
14 Solitary place of debt.

1 Revenge. 2 Gift. १२० निर्यातनं वैर-शुद्धौ दाने न्यासाऽर्पणे ऽपि च, ।
3 Delivery of a deposit. 4 Repayment.
1 Calamity. 2 Fall. व्यसनं विपदि भ्रंशे दोषे कामज-कोपजे, ॥
3 Fault arising from desire or anger. 4 Sin. 5 Ardent desire. 6 Vain effort.

1 Eyelash. 2 Filaments of a flower. १२१ पक्ष्माऽक्षि-लोम्नि किञ्जल्के तन्त्वाऽऽद्यंशेऽप्यणीयसि, ।
3 A short thread. 4 Very small. 5 Wing.
1 Certain days of the lunar month. तिथि-भेदे क्षणे पर्व, वर्त्म नेत्रच्छदे ऽध्वनि, ॥
2 Introduction. 3 A festival. 4 Knot. 5 Book. 1 Eyelid. 2 A road.

अपिशब्दात्ककारादि (व्यञ्जनम्) कुलीने भवं कौलीनं, कुलस्येदं वा। लोकवादोऽपवादः, यथा—मा कौलीनादसितनयने मय्यविश्वासिनी भूः (उ० मेघ० १०९) ॥ ११६ ॥ (उद्यानं) भावेऽधिकरणे च ल्युट्। वनभेद उपवनं (उद्यानं)। अधिकरणे भावे च ल्युट् (स्थानं)। आदिशब्दाद्विजिगीषादौ (देवनं)। अपिशब्दात्परिदेवने द्यूते च (देवनं) ॥ ११७ ॥ पौरुषमुद्योगः, तन्त्रं सैन्यं स्वमण्डलचिन्ता च (उत्थानम्)। सन्निविष्टोद्गम उपविष्टोऽस्योर्ध्वीभावः । अपिशब्दान्मलोत्सर्गे चैत्यगृहे वास्त्वन्तरे च (उत्थानं)। प्रतिरोधे, विगतमुत्थानमत्रेति। अपिशब्दात्समाधिनिवृत्तौ (व्युत्थानम्) ॥ ११८ ॥ यथाक्रमं भावादौ ल्युट् (साधनम्)। चशब्दाल्लिङ्गे कारके सैन्ये—उपह्वरणे—उपाये सिद्धौ मेधे च (साधनम्) ॥ ११९ ॥ न्यासार्पणं निक्षेपप्रतिदानं (निर्यातनम्), अपिशब्दाद्दणादिसंशुद्धौ। व्यस्यति श्रेयोमार्गाद् व्यसनं, व्यस्तिश्च। कामजो दोषो मृगयाक्षपानस्त्रियः, क्रोधजो वाक्पारुष्यदण्डपारुष्यार्थदूषणानि। अशुभे पापे दैवानिष्टफले, अशक्तौ चोपचारात् (व्यसनम्) ॥१२०॥ पक्षे परिग्रहे, तन्तुतूलादीनां भागेऽल्पतरे (पक्ष्म)। गरुति च (पक्ष्म) तिथिविशेषः षष्ठ्यष्टमी—अमावास्यादिः, यथा—

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

1 Wrong or unfit act. 2 Private part. १२२ अ-कार्य-गुह्ये कौपीनं, मैथुनं संगतौ रते, ।
4 Covering of the privy part. 1 Union. 2 Copulation. 3 A marriage.

1 The supreme soul. 2 Intellect. प्रधानं परमाऽऽत्मा धीः, प्रज्ञानं बुद्धि-चिह्नयोः, ॥
3 Nature. 4 Elephant Driver. 5 Chief. 1 Knowledge. 2 A mark, token.

1 A blossom. 2 A fruit. १२३ प्रसूनं पुष्प-फलयोर्, निधनं कुल-नाशयोः, ।
1 A family. 2 Disappearance. 3 Death.

1 Weeping. 2 Lamenting. क्रन्दने रोदनाऽऽह्वाने, वर्ष्म देह-प्रमाणयोः, ॥
1 Body. 2 Elevation, weight.

1 A house. 2 Body. 3 Light lustre. १२४ गृह-देह-त्विट्-प्रभावा धामान्यथ चतुष्पथे । 4 Dignity.

1 Meeting of four roads. संनिवेशे च संस्थानं, लक्ष्म चिह्न-प्रधानयोः, ॥
2 Construction. 3 Form. 4 Death. 1 A mark, token. 2 Chief. 3 A target.

1 Covering, 2 Clothing. १२५ आच्छादने संविधानमपवारणमित्युभे, । 3 Conceatment.

1 Accomplishment. 2 Attainment. आराधनं साधने स्यादवाप्तौ तोषणे ऽपि च, ॥ 3 Gratifying.

1 A wheel. 2 A town. १२६ अधिष्ठानं चक्र-पुर-प्रभावाऽध्यासनेष्वपि, ॥
3 Prowess. 4 Fixing. 5 Adjustment.

1 Excellent of its kind. 2 A jewel. रत्नं स्व-जाति-श्रेष्ठे ऽपि, वने सलिल-कानने, ॥
1 Water. 2 A forest.

पर्ववर्जं व्रजेच्चैनाम् (मनु ३-३४५)। प्रतिपत्पञ्चदश्योः संधिश्च (पर्व) । क्षणः प्रस्ताव उत्सवश्च (पर्व) । ग्रंथौ चरिते च (पर्व), यथा–आदिपर्व । वर्तते वर्त्म, वर्तन्ते यान्त्यनेन च । नेत्रच्छदोऽक्षिपुटः (वर्त्म) ॥ १२१ ॥ कूपं प्रवेष्टुमर्हति–इति कौपीनं, शालीनकौपीने अधृष्टाकार्ययोः (५।२।२० / १८२१) इति साधुः । लक्षणया लिङ्गं तदाच्छादनं च (कौपीनं)। मिथुनं युग्मं स्त्रीपुंसौ च तस्यदं मैथुनम्। प्रधीयतेऽस्मिन्प्रवर्तते च प्रधानम्, अजहल्लिङ्गम्। प्रकृतिर्महामात्रो मुख्यश्च (प्रधानं)। (प्रज्ञानं) भावे करणे च ल्युट ॥१२२॥ प्रसूयते प्रसूनम्। नियतं धनं यत्र, निवृत्तिश्च धनस्य निधनम्। अन्तेऽपि (निधनम्)। क्रन्दनं) भावे ल्युट्। वर्षति वृष्यते वर्ष्म। प्रमाणमत्रोन्नतिः, यथा–व्यासं व्योमनि वर्मण्णा (?) ॥ १२३ ॥ त्विट् तेजः, धीयतेऽत्र धत्ते च धाम, जन्माऽपि। संनिवेशो रचना (संस्थानं), आकृतौ मृत्यौ च। लक्ष्यतेऽनेन लक्ष्म, लक्ष्ये च। आच्छादने द्वे, संपिधानमिति सभ्यः पाठः। अपवारणं स्थगनं, वस्त्रं तूपचारात् (आच्छादनम्)। (आराधनं) करणे भावे च ल्युट् ॥ १२५ ॥ (अधिष्ठानं) अधिकरणे भावे च ल्युट्। चक्रं रथाङ्गं, अपिशब्दादारोपणे व्यवस्थापने च (अधिष्ठानं)। (रत्नं) यदाहुः–जातौ जातौ यदुत्कृष्टं तद्रत्नमभिधीयते (मल्लीनाथ० ?)। अपिशब्दान्मणौ, रमन्तेऽस्मिन् रत्नम्।

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh

1 Separate. 2 Small. 3 Inferior.
१२७ तलिनं विरले स्तोके वाच्य-लिङ्गं, तथोत्तरे, ।
1 Virtuous. 2 Similar. 3 Same.
समानाः सत्-समैके स्युः, पिशुनौ खल-सूचकौ, ॥
1 Wicked. 2 A whisper.

1 Deficient. 2 Blamable.
१२८ हीन-न्यूनावून-गर्ह्यौ, वेगि-शूरौ तरस्विनौ, ।
1 Swift. 2 Valiant.
1 Guilty. 2 Subdued. 3 Distressed.
अभिपन्नो ऽपराद्धो ऽभिग्रस्त-व्यापद्गतावपि. ॥

इति नान्ताः ।

1 An ornament. 2 A string of bells.
१२९ कलापो भूषणे बर्हे तूणीरे संहतावपि, ।
3 An eye on Peacock's tail. 4 A quiver. 5 Multitude.
1 Furniture, 2 Sowing around.
परिच्छदे परीवापः पर्युप्तौ सलिल-स्थितौ, ॥
3 Still water. 4 A tank.

1 A herdsman. 2 The head of a cowpen. 3 Superintendent of a village. 4 King.
१३० गोधुग्-गोष्ठपती गोपौ, हर-विष्णू वृषाकपी, ।
1 Siva. 2 Vishnu. 3 Fire.
1 Vapour. 2 A tear.
बाष्पमूष्माश्रु, कशिपु त्वन्नमाच्छादनं द्वयम्, ॥
1 Food. 2 Clothing.

1 A bed. 2 An upper story. 3 A wife.
१३१ तल्पं शय्याऽट्ट-दारेषु, स्तम्बे ऽपि विटपो ऽस्त्रियाम्, ।
1 A clump or cluster. 2 A branch of a tree. 3 Expansion.
1 Learned. 2 Pleasing.
प्राप्तरूप-स्वरूपाऽभिरूपा बुध-मनोज्ञयोः ॥

वनं द्वे, 'वनु याचने ॥ १२६ ॥ तलमस्यास्ति तलिनं, अधस्तनेऽपि । पान्तेभ्यः प्राक् त्रिलिङ्गाः । सह मानेन वर्तते समानं मानं चास्य समानः । अपिश्यति तक्ष्णोति पिशुनः, पिश अवयवे वा ॥ १२७ ॥ हीयते हीनः, ऊन परिहाणे । ऊनोऽल्पः, गर्ह्य-स्तूपचारात् । तरो जवो बलं वास्त्यस्य तरस्वी । अपराध्यत्यपराद्धः, अभिद्रुतोऽपि (अभिपन्नः) ॥ १२८ ॥ दुर्गश्चाह–लेख्यं भूम्यादिदानार्थं यातनाज्ञा च शासनम्। निदानमवसानेऽपि सार्थे वार्धुषिके धनी ॥ कक्षापटेऽपि कौपीनं न ना [ज्ञाने] खेदेऽपि बाधना [वेदना] । द्युम्नं बलेऽथ भार्याऽपि जनी दोषेऽपि लाञ्छनम् ॥ अथ पान्ताः । कला आप्नोति कल्पते च कलापः, भूषणे काञ्च्यादौ । संहते यथा–केशकलापः । तूणे [रूपे] पि (कलापः) । परिच्छदः परिवारः, पर्युप्तिः परितो बीजत्यागः (परीवापः), स्थितिरचलत्वं, सलिलस्थितिर्जलाधार इत्येके ॥१२९॥ गोष्ठपतिर्गोष्ठाध्यक्षः, देशकुल-स्वामी च, गाः पति गोपायति च गोपः । वृषेण दान्तेन धर्मेण वा कपति याति वृषा-कपिः अग्निश्च । वायति शोषयति स्रवति च बाष्पः । कशति क्लेशं कशिपु, द्वयं युग-पत्पृथङ् नैव । कशिपू इत्यपपाठः ॥१३०॥ तल प्रतिष्ठायां, अट्टो दुर्गप्राकारः, रणमण्डप इत्येके, यथा–विशीर्णतल्पाट्टशता पूः (रघु० १६-११) । शय्या यथा–तल्पं भूः स्तरणं

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

1 A female turtle. 2 A sort of lute. १३२ भेद्य-लिङ्गा अमी, कूर्मी वीणा-भेदश् च कच्छपी, ।

1 A blanket of hair. 2 Eight of a day. 'कुतपो मृग-रोमोत्थ-पटे चाह्नो ऽष्टमे ऽशके. ।

इति पान्ताः ।

1 Tuft of hair. 2 A river. 3 Water Lily. 4 A mother. 'शिफा शिखायां सरिति मांसिकायां च मातरि ॥१४॥

1 A root of a tree. 2 A hoof. शफं मूले तरूणां स्याद् गवादीनां खुरेऽपि च ।

1 A Garland. 2 An ornament. गुल्फः स्याद् गुम्फने बाहोरलंकारे च कीर्तितः ॥१५॥

1 The letter र्. 2 Bad. र-वर्णे पुंसि रेफः स्यात् कुत्सिते वाच्य-लिङ्गकः' ।१६।

इति फान्ताः ।

1 Spirit after death. 2 A horse. 3 A singer. 4 Celestial beings. 5 Sort of deer. अन्तरा-भव-सत्त्वे ऽश्वे गन्धर्वो दिव्य-गायने, ॥

1 A ring. 2 A conch or shell. १३३ कम्बुर् ना वलये शङ्खे, द्विजिह्वौ सर्प-सूचकौ, ।
1 A serpent. 2 A whisperer or informer.

1 Eastern. 2 Prior. 3 Forefathers. 4 First. पूर्वो ऽन्य-लिङ्गः प्रागाह पुम्-बहुत्वे ऽपि पूर्वजान्. ॥

1 Arrow. 2 A plant. 'चित्रपुङ्खेऽपि कादम्बो नितम्बोऽ द्रितटे कटौ' ॥१६॥
1 Slope of a hill. 2 A hip.

1 A ladle. 2 Serpent-hood. दर्वी फणाऽपि, बिम्बोऽस्त्री मण्डलेऽपि च" । १७ ।
1 Dise. 2 Circle.

इति बान्ताः ।

तृणानि (भर्तृहरि० ?)। दारा यथा–गुरुतल्पगः (महानाटकम् १५१)। स्तम्बो गुल्मः (विटपः)। अपिशब्दात्स्कन्धादूर्ध्वं तरोः शाखा विटपः (काश्यः)। कटप्रे विस्तारे तूपचारात्, विट आक्रोशे। बुधे लक्षणया (प्राप्तरूप इ०) ॥१३१॥ कूर्मी कमठी, वीणा-विशेषः सारस्वताख्यः, कच्छेन पिबति कच्छं पाति वा कच्छपी। इतः फान्ताः ॥ अथ बान्ताः [बान्ताश्च]। (गन्धर्वः) अन्तरा मरणजन्मनोर्मध्ये भवं सत्त्वं यातनाशरीरम्। यदाहुः–अन्तरा, भवदेहो हि नेष्यते विन्ध्यवासिना (कुमारिलभट्ट० ?), तन्न, लक्ष्य-विरोधात्। तस्मादन्तरिक्षवासिनो गन्धर्वाख्या भूताः, यद् व्यासः–अस्माभिर्यदनुष्ठेयं गन्धर्वैस्तदनुष्ठितम् (?)। गन्ध्यते गन्धर्वः, पशुभेदेऽपि ॥ १३२ ॥ काम्यते कम्बुः-शम्बूकेऽपि। (द्विजिह्वः) जिह्वात्र वचनमुपचारात्। पूर्वो वाच्यलिङ्गः। प्रागिति दिशं देशं कालं चाह, तत्स्थं च वस्तु (पूर्वम्)। पूर्वजा आदिपुरुषाः। आद्यर्थे तु क्लीबे यथा–

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh

1 A jar. 2 A temple. 3 The sign Aquarius. १३४ कुम्भौ घटेभमूर्धांशौ, डिम्भौ तु शिशु-बालिशौ, ।
1 A child. 2 An ignorant man.

1 Post or pillar. 2 Insensibility. स्तम्भौ स्थूणा-जडीभावौ, शम्भू ब्रह्म-त्रिलोचनौ, ॥
1 BRAHMA. 2 SIVA. 3 Superior deity of jainas.

1 The belly. 2 A fetus. 3 A child. 4 Interior. १३५ कुक्षि-भ्रूणाऽर्भका गर्भा, विस्रम्भः प्रणये ऽपि च, ।
1 Acquaintance. 2 Confidence. 3 Amorous solicitation.

1 A large drum. 2 A die. 3 A stake at play. स्याद् भेर्यां दुन्दुभिः पुंसि, स्यादक्षे दुन्दुभिः स्त्रियाम्, ॥

1 Safflower. 2 Gold. 3 Water-pot. १३६ स्यान् महा-रजने क्लीबं कुसुम्भं करके पुमान्, ।
1 A *Kshatriya*. 2 An emperor. 3 The nave of a wheel. क्षत्रिये ऽपि च नाभिर् ना, सुरभिर् गवि च स्त्रियाम्, ॥
1 A cow. 2 Musk. 3 Spring. 4 Fragrant. 5 Pleasing.

1 An assembly. 2 One of a company. १३७ सभा संसदि सभ्ये च, त्रिष्वध्यक्षे ऽपि वल्लभः. ।
3 Group. 4 House. 5 Gaming. 1 A superintendent. 2 The chief headman. 3 A lover.

इति भान्ताः ।

1 A ray of light. 2 A rein. किरण-प्रग्रहौ रश्मी, कपि-भेकौ प्लवङ्गमौ, ॥ 1 An ape. 2 A frog.

क्षरत्येनः कृतं पूर्वम् (?) ॥ १३३ ॥ अथ भान्ताः । इभस्य मूर्धांशः शिरोभागः (कुम्भः) । डयते डिभ्यते वा डिम्भः, बालिशो मूर्खः । ष्टभि प्रतिबन्धे, स्तम्भुः सौत्रो वा, स्तभ्नाति गृहं चेष्टितं च स्तम्भः । (शंभुः) अर्हन्नपि ॥ १३४ ॥ भ्रूण उदरस्थो जन्तुः (गर्भः) । कुक्षौ यथा—गर्भस्थेन समस्तदा(?)। अन्तर्भवे तूपाचारात्, यथा—रम्भागर्भमृदुः(?)। भ्रूणे यथा—भर्तृगर्भहद्रुं चैव(?)। अर्भके यथा—गर्भरूपः, गीर्यते गृणाति च गर्भः । प्रणयः शृङ्गारप्रार्थना (विश्रम्भः) । अपिशब्दाद्विसंवादे विश्वासे च (विश्रम्भः) । दुन्दु भाषते दुन्दुभिः, दुनोति भीरूनिति नैरुक्ताः । भेर्यां यथा—दुन्दुभिस्ताडितोऽयम् (वेणीसंहार० १—२२) । अक्षोऽत्र पाशकः, यथा—दुन्दुभ्या किल तत्कृतं पतितया यद् द्रौपदी हारिता (?) ॥ १३५ ॥ महारजनं पद्मकम् । करकः कमण्डलुः, कुस्यति कुसुम्भति मृद्नाति कुसुम्भं, सुम्भ (शुम्भ) भासने हिंसायां च । अपिशब्दाद्विजिगीषौ राज्ञि, (नाभिः); ना पुमान् चक्रमध्ये तुन्दौ च स्त्री, नभते नभ्यते वा नाभिः । सुष्ठु रभते सुरभिः, चशब्दाद्वसन्ते पुमान्, सुगन्धौ च त्रिषु । मनोज्ञे तूपचारात् (सुरभिः) ॥ १३६ ॥ सह भान्त्यस्यां सभा, सभ्यास्तु तात्स्थ्यात् । समूहे शालायां द्यूते च (सभा) । अध्यक्षोऽत्र गो[त्रा]ध्यक्षः (वल्लभः) । अपिशब्दात् प्रिये (वल्लभः) । करभो करपार्श्वोष्ट्रौ । इतो मान्ताः । (रश्मिः) प्रग्रहो वल्गादिः, रशिः सौत्रः । प्लवेन

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh

1 Desire.
2 Love, Cupid.
4 Desirable. 5 Good.

१३८ इच्छा-मनोभवौ कामौ, शक्त्युद्योगौ पराक्रमौ, ।

1 Power. 2 Exertion. 3 Valour.

1 Moral and religious merit.
2 Yama. 3 Fitness. 4 Nature. 5 Usage. 6 Drinker of Soma.
7 Father of Yudhishtira. 8 Religion. 9 Vedas. 10 A sacrifice.

धर्माः पुण्य-यम-न्याय-स्वभावाऽऽचार-सोमपाः, ।

1 Deliberate undertaking.
2 A stratagem. 3 Valour.

१३९ उपाय-पूर्व आरम्भ उपधा चाप्युपक्रमः, ।

1 A market. 2 A town.
3 Holy writ, the Vedas.
4 Trade.

वणिक्-पथः पुरं वेदो निगमा, नागरो वणिक् ॥

1 A citizen, a townsman.

1 A trader.
2 The Vedas.

१४० नैगमौ द्वौ, बले रामो नील-चारु-सिते त्रिषु, ।

1 BALARAMA. 2 Parshuram. 3 Rama. 4 Black. 5 Pleasing. 6 White.

1 In comp. A multitude.
2 A Village. 3 Octave in music.

शब्दाऽऽदि-पूर्वो वृन्दे ऽपि ग्रामः, क्रान्तौ च विक्रमः,॥

1 Walking. 2 Power. 3 Valour.

1 Praise.
2 A sacrifice.
3 Multitude.

१४१ स्तोमः स्तोत्रे ऽध्वरे वृन्दे, जिह्मस् तु कुटिले ऽलसे, ।

1 Crooked. 2 Idle.

1 Heat. 2 Sweat.

उष्णे ऽपि घर्मश्, चेष्टाऽलङ्कारे भ्रान्तौ च विभ्रमः, ॥

1 Illusion. 2 Confussion. 3 Eye gestures.

गच्छतीति, गमश्च (३।२।४७ / २९६४) इति खच् ॥ १३७ ॥ काम्येऽपि (कामः)। कामं तु बाढार्थे। शक्तिरत्र प्रभुमन्त्रोत्साहलक्षणा, उद्योगोऽरीन् प्रति बलोत्साहः (पराक्रमः)। धरते धर्मः, पुण्यं यागादि–अहिंसा च। यमो धर्मराजः, धर्मस्तु भीमवत्। न्याये यथा– धर्माधिकरणम्। स्वभावे यथा–क्रूरधर्मा। आचारे यथा–धर्मशास्त्रम्। सोमपे यथा–एष धर्मः सनातनः (उत्तरराम ५)। युधिष्ठिरपिता च (धर्मः)। वेदे च धर्मः धर्मसाधने यागादौ क्लीबे, यच्छतिः–तानि धर्माणि प्रथमान्यासन् (ऋ. वे. १० ९०-१६) ॥ १३८ ॥ उपधामात्यपरीक्षा (उपक्रमः)। अपिशब्दात्तदाद्याचिख्यासा यथा–नन्दोपक्रमं मानानि (?)। (उपक्रमः) चिकित्सा–उपायपूर्वारम्भत्वात्। निगम्यते निगमः, गोचरसंचरेति (३।३।११९ / २९८८) साधुः। निगमे भवो नैगमः, द्वाविति ब्राह्मणस्य नैगमत्वे निषेधः ॥ १३९॥ बले हलधरे, रमते रामः, णः। भार्गवे काकुत्स्थे च (रामः)। वृन्दे यथा–शब्दग्रामः, गुणग्रामः (बा. रा. १।११)। अपिशब्दाद्विषयैकदेशे षड्जग्रामादौ च, यदाहुः–सप्त स्वरास्त्रयो ग्रामा मूर्च्छनास्त्वेकविंशतिः (पं. ५५४)। गिरन्ति गृणन्ति च यं स ग्रामः। क्रान्तौ पादादिभिराक्रमण (विक्रमः), चशब्दाच्छौर्ये क्वचित् ॥ १४० ॥ ष्टुञ् स्तुतौ, अर्तितुसु (उ० १३७) इति मन्। जहाति सतां वृत्तिं जिह्मः। घर्मः,

CC-0. Agamnigam Foundation. Digitized by eGangotri

1 A disease of the spleen. 2 Clump of grass. 3 Army. 4 Fort. 5 Platoons. 6 Groop of Branches.
१४२ गुल्मा रुक्-स्तम्ब-सेनाश् च, जामिः स्वसृ-कुलस्त्रियोः ।
1 A sister. 2 A chaste woman.

1 The earth. 2 Patience. 3 Proper. 4 Able. 5 Benevolent. 6 Forgiveness.
क्षिति-क्षान्त्योः क्ष्मा, युक्ते क्षमं शक्ते हिते त्रिषु, ॥

1 Green. 2 Black. 3 A potherb. 4 Fragrant plant 5 Night. 6 A young woman.
१४३ त्रिषु श्यामौ हरित्-कृष्णौ, श्यामा स्याच्छारिवा निशा,।

1 A tail. 2 A mark on the forehead. 3 A horse. 4 Ornament. 5 Chief. 6 A flag, symbol. 7 Prowess. 8 Horn.
ललामं पुच्छ-पुण्ड्राऽश्व-भूषा-प्राधान्य-केतुषु, ॥

1 The supreme soul. 2 An Atom. 3 Little.
१४४ सूक्ष्ममध्यात्ममप्याद्ये प्रधाने प्रथमस् त्रिषु । 1 First. 2 Chief.

1 Pleasing. 2 Reverse, contrary. 3 Left. 4 Udder. 5 Cupid. 6 Siva. 7 Wealthy. 8 Woman. 9 A mare.
वामौ वल्गु-प्रतीपौ द्वावधमौ न्यून-कुत्सितौ,॥ 1 Low. 2 Vile.

1 Old. 2 Used.
१४५ जीर्णं च परिभुक्तं च यातयाममिदं द्वयम् ।

इति मान्ताः ।

1 A horse. 2 VISHNU's bird.
तुरङ्ग-गरुडौ तार्क्ष्यौ, निलयाऽपचयौ क्षयौ, ॥
1 A house. 2 Loss. 3 Destruction. 4 Consumption. 5 King's disease.

घृणु दीप्तौ ॥ १४१ ॥ गुड रक्षणे, गुड्यतेऽनेन गुल्मः, रुक्—उदर्यो व्याधिः । स्तम्बोऽत्र लताप्रतानतृणादिसमूहः, सेनाक्षौहिण्यङ्गं (गुल्मः) । चशब्दाद् दुर्गादौ रक्षास्थानं (गुल्मः), बलानां सज्जनं विटपसंघातोऽपि । जमति विरुद्धं जामिः, यथा—जामयो यानि गेहानि शपन्त्यप्रतिपूजिताः (मनु. ३-५८) । क्षमते क्षमणं क्षम्यते च (क्षमा, क्षमं) ॥ १४२ ॥ (श्यामः) श्यैङ् गतौ, हरिन्नीलो वर्णः । शारिवा नामौषधिः (श्यामा), गन्धप्रियङ्गुश्च । ललति लालयति लल्यते च ललामं, पुण्ड्रोऽश्वमुखेऽल्पवर्णं चिह्नम् । अश्वभूषा ललामाख्या । प्रधानेऽपि प्राधान्यान्वयात्, यथा—नृपललामः । केतौ यथा—कपिललामोऽर्जुनः । प्रभावे शृङ्गे च (ललामम्) । नान्तोऽप्यस्ति यथा—कन्याललाम कमनीयमजस्य लिप्सोः (रघु० ५—६४) ॥ १४३ ॥ सुष्ठु—उक्ष्यते सूक्ष्मं, आत्मनि—अधि—अध्यात्मम् । अपिशब्दादल्पेऽपि त्रिषु (सूक्ष्मम्) । प्रथतेऽस्मात्प्रथते च प्रथमः । वमेर्वातेर्वा रूपं, (वामो वल्गुः) यथा—वामलोचना । (वामः प्रतीपः) यथा—विधौ वामारम्भे (मालतीमा० ?) । चशब्दाद्वामं दक्षिणेतरत् । वामा स्त्री, अश्वा तु वामी । अधोभवोऽधमः, अवेर्धश्चवा (रा.कं.२।२।१४) इति मः सलोपश्च । तुच्छेऽपि (अधमः) ॥१४४॥ जीर्णं यथा—यातयामं गतरसं पूति पर्युषितं च यत् (भगवद्गीता १७-१०)। परिभुक्तं यथा—दर्भाः कृष्णाजिनं मन्त्रा ब्राह्मणा हविरग्नयः । अयातयामान्येतानि

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh

1 Husband's brother. १४६ श्वशुर्यौ देवर-श्यालौ, भ्रातृव्यौ भ्रातृज-द्विषौ, ।
2 Wife's brother. 1 A brother's son 2 An enemy.

1 A thundercloud. पर्जन्यौ रसदब्देन्द्रौ, स्यादर्यः स्वामि-वैश्ययोः, ॥
2 INDRA. 1 A master. 2 A man of the 3rd tribe.
3 Rain. 4 Cloud. 3 Excellent.

1 The 8th asterism. १४७ तिष्यः पुष्ये कलियुगे, पर्यायो ऽवसरे क्रमे, ।
2 The 4th age. 1 Opportunity. 2 Succession.

1 Subjected. प्रत्ययो ऽधीन-शपथ-ज्ञान-विश्वास-हेतुषु ॥
2 Oath, ordeal. 3 Knowledge. 4 Trust. 5 Cause.

6 A hole. १४८ रन्ध्रे शब्दे, ऽथाऽनुशयो दीर्घद्वेषाऽनुतापयोः, ।
7 An Affix. 1 An old enmity. 2 Repentance.
8 Celebrity. 9 Usage.

1 Incompleteness. स्थूलोच्चयस् त्व-साकल्ये नागानां मध्यमे गते, ॥
1 An elephant's Path. 2 A Tableland.

1 An oath. १४९ समयाः शपथाऽऽचार-काल-सिद्धान्त-संविदः, ।
2 Usage. 3 Time.
4 Demonstrated conclusion. 5 Bargain. 6 Hint.

1 Vice. 2 Ill fortune. 3 Calamity. व्यसनान्यशुभं दैवं विपदित्यनयास् त्रयः, ॥

नियोज्यानि पुनः पुनः (?)॥ याता यामाः क्षपांशा अस्येति । दुर्गश्चाह—भ्रमो मूर्च्छा तक्षभाण्डमजिराम्बुविनिर्गमः । ध्यामौ धूम्रास्फुटौ भीमा रुद्रभीषणपाण्डवाः ॥ इतो यान्ताः । तृक्षस्यापत्यं तार्क्ष्यः । क्षि निवासे, क्षिञ् हिंसायाम्, यक्ष्मा कल्पान्तश्च (क्षयः) ॥ १४५ ॥ श्वशुरस्यापत्यं श्वशुर्यः, क्रमाद्भ्रपत्योः । भ्रातुरपत्यं भ्रातृव्यः, भ्रातुर्व्यच्च ($\frac{४।१।१४४}{११६७}$) व्यन्सपत्ने ($\frac{४।१।१४५}{११६८}$), योगविभागाद् भ्रातृजे । पिपर्ति जनं पर्जन्यः, परोऽम्भःपूरो जन्यतेऽनेन वा । रसशब्दो गर्जन्मेघः, अगर्जत्यपि योग्यत्वात् (पर्जन्यः) । अरणीयोऽर्यः ॥ १४६ ॥ त्वेषति तिष्यः, त्विष दीप्तौ, अध्न्यादिः (उ० ५५१) । (पर्यायः) परावनुपात्यय इणः ($\frac{३।३।३८}{३२१०}$) इति घञ् । (प्रत्ययः) यथायथं कर्तृभावकरणेष्वच् । अधीन आयत्तः, यथा—राजप्रत्ययाः प्रजाः (?)। विश्वासे यथा—न शत्रोः प्रत्ययं गच्छेत्(?)। हेतौ यथा—स्त्रीप्रत्ययः कलहः । रन्ध्रे यथा—रिपोः प्रत्ययमासाद्य प्रहरेत् (?)। शब्दोऽत्र कृत्तद्धितादिः प्रथितत्वे च (प्रत्ययः) ॥ १४७ ॥ देशविशेषेऽपि (अनुशयः) । स्थूलस्य मुख्यस्योच्चयनमन्यस्यासंग्रहात्, स्थूलावलोकनेनेत्यर्थः । हस्तिनां मध्यमगतां यत्पालकाप्यः—नीचैर्गतं स्थूलवच्चयो वीचिमार्ग इति तिस्रो गतयः ॥१४८॥ शपथे यथा—कृतसमयः । आचारे यथा—समयाञ्श्रावयेच्छिष्यम्(?)। काले यथा—संध्यासमयः। सिद्धान्ते यथा—बौद्धसमयः । संविदि यथा—अन्योन्यसमयः । संकेतोऽवसरो नियमश्चोपचारात्, यथा—न समयपरिक्षणं क्षमं ते (किरातार्जु० १—४५) । विरुद्धो नयो व्यसनं (अनयः),

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh

1 Transgression. 2 Distress. 3 Fault. 4 Punishment. १५० अत्ययो ऽतिक्रमे कृच्छ्रे दोषे दण्डे ऽप्यथाऽऽपदि ।
1 Calamity.

2 War., 3 Futurity. युद्धाऽऽयत्योः संपरायः, पूज्यस् तु श्वशुरेऽपि च, ॥
1 A father-in-law. 2 A teacher. 3 Respected.

1 Rear guard. 2 Multitude. १५१ पश्चादवस्थायि बलं समवायश् च सन्नयौ, ।
1 Assemblage. 2 Vicinity. 3 A house. संघाते सांनिवेशे च संस्त्यायः, प्रणयास् त्वमी ॥
1 Acquaintance.

2 Solicitation. 3 Love. १५२ विस्रम्भ-याच्ञा-प्रेमाणो, विरोधे ऽपि समुच्छ्रयः, ।
1 Enmity. 2 Elevation.

1 Frequented and known region. 2 Object of Sense. 3 Country. विषयो यस्य यो ज्ञातस् तत्र शब्दाऽऽदिकेष्वपि, ॥

1 Infusion, extract. 2 Exudation of a tree. 3 Astringent. 4 Perfume rubbed on body. १५३ निर्यासे ऽपि कषायो ऽस्त्री, सभायां च प्रतिश्रयः, ।
1 Assembly. 2 Refuge. 3 House.

1 Abundance, frequency. 2 Starving to death. 3 Similarity. प्रायो भूम्न्यन्त-गमने, मन्युर् दैन्ये क्रतौ क्रुधि, ॥
1 Distress. 2 A sacrifice. 3 Anger.

षाड्गुण्यस्यायथावत्प्रयोगात् । न श्रेयः (अयः) अनुकूलं दैवमनयः । विरुद्धं नयनं विपद् (अनयः) ॥ १४९ ॥ अतिक्रम उल्लङ्घनं यथा—धर्मस्यात्ययः । कृच्छ्रे यथा—प्राणात्ययः । दोषे यथा—गुणिनां नात्ययं कुर्यात् (?) । दण्डे यथा—वाक्पारुष्येऽत्ययः शतम् । सम्यक्परागमनं यत्रेति (संपरायः), यथा—सांपरायिकं दुर्गं कुर्यात् (?) । श्वशुरः पूज्यः इति स्मृतेः, सर्वस्यैव हि दानस्य ग्रहीता गुरुरुच्यते । कन्यायाश्चैव विद्यायाः प्रदाता पूज्यते गुरुः (?) ॥ अपिशब्दान्मान्यः (पूज्यः) ॥१५०॥ पश्चादवस्थायि बलमनुबलाख्यं, समवायो मेलः, संनयति संनयनं च संनयः । स्त्यै संघाते, चशब्दाद् गृहे, यथा—विश्रम्य लौकिकान् संस्त्यायान् प्रविशेयुः (?) । परिचयोऽपि (प्रणयः) ॥ १५१ ॥ विरोधो वैरं, अपिशब्दादुन्नतौ (समुच्छ्रयः), समुल्लङ्घ्य श्रयणं—ऊर्ध्वश्रयणं च, उदिश्रयतीति ($\frac{३।३।४९}{३२२४}$) घञ् बाहुलकादत्र नास्ति । विषिणोति बध्नाति विषयः, यस्य मत्स्यादेर्यो जलादिज्ञातः प्रसिद्धस्तत्र वर्तते । शब्दस्पर्शरूपरसगन्धाश्चेति विषयाः (तर्क. ?) । अपिशब्दाद् ग्रामसमूहे गोचरे देशे च (विषयः) ॥ १५२ ॥ निर्यासः क्वाथरसः, यथा—त्रिफलाकषायः । अपिशब्दात्कषायस्तुवराख्यो रसः । रागविशेषेऽपि, यथा—परिपक्वकषायो मुनिः । रक्तपीतवर्णयोगेऽपि, यथा—कषायवस्त्रः । आस्पदे च (प्रतिश्रयः) । भूम्नि बाहुल्ये यथा—प्रायेणाकृतकृत्यत्वान्मृत्योरुद्विजते जनः (?) । अन्तगमनेऽनशने यथा—प्रायोपवेशन-

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

1 A secret.
2 Privy part.
१५४ रहस्योपस्थयोर् गुह्यं, सत्यं शपथ-तथ्ययोः, ।
1 An oath. 2 Truth. 3 The krita age. 4 True.

1 Animal strength.
2 Dignity.
3 Valour. 4 Semen Virites. 5 Splendour.
वीर्यं बले प्रभावे च, द्रव्यं भव्ये गुणाऽऽश्रये, ॥
1 Right, fit. 2 Substance. 3 Wealth. 4 Drug. 5 Brass.

1 A place.
2 A house.
3 An Asterism. 4 Strength. 5 Fire.
१५५ धिष्ण्यं स्थाने गृहे भे ऽग्नौ, भाग्यं कर्म शुभाऽशुभम्, ।
1 Destiny. 2 Goodluck. 3 Ill fate.

1 A pignut.
2 Gold. 3 Bhisma.
कशेरु-हेम्नोर् गाङ्गेयं, विशल्या दन्तिका ऽपि च, ॥
1 A plant. 2 Menisper glabrum.

1 The goddess Lakshmi. 2 Gauri.
3 Swaha. 4 Indrani.
१५६ वृषाकपायी श्री-गौर्योरभिख्या नाम-शोभयोः, ।
1 A name. 2 Beauty. 3 Glory.

1 Beginning, undertaking.
2 Atonement. 3 Study. 4 Worship. 5 Disquisition.
आरम्भो निष्कृतिः शिक्षा पूजनं संप्रधारणम् ॥

6 Means. 7 Act.
8 Bodily action.
9 Remedy. 10 Root. 11 Case relation. 12 Religions ceremony. 13 Obsequies.
१५७ उपायः कर्म चेष्टा च चिकित्सा च नव क्रियाः, ।

1 Wife of the sun.
2 Beauty.
छाया सूर्य-प्रिया कान्तिः प्रतिबिम्बमनातपः, ॥
3 A reflected image. 4 A shade.

मतिर्नृपतिर्बभूव (रघु० ८।९४)। तुल्ये च यथा–मूर्खप्रायः, अत्रापि वा मूर्खः प्रायेणेति व्युत्पत्तिः। मन्यते मन्युः, क्रतौ यथा–शतमन्युरिन्द्रः ॥ १५३ ॥ रहस्यं गोप्यं, उपस्थो योन्यादिः, गूहनीयं गुह्यं, शंसिदुहिगुहिभ्यो वा क्यप्–वक्तव्यः (वा० $\frac{१८३५}{३८५८}$)। सति साधु सत्यं, शपथे यथा–सत्येन शापयेद्विप्रम् (मनुः ?)। तथ्ये यथा–सत्यवादी। बलं प्राणसामर्थ्यं यथा–सत्त्ववान् वीर्यसंपन्नः। प्रभावो द्रव्यशक्तिर्यथा–रसवीर्यविपाकाः (पृ० ?)। चशब्दद्रेतो वीरकर्म च (वीर्यम्)। भव्ये योग्ये, द्रव्यं च भव्ये ($\frac{५।३।१०४}{३०५९}$) साधुः, यथा–क्रिया हि द्रव्यं विनयति नाद्रव्यम् (कौटिल्यः १–५)। गुणाश्रये यथा–क्रियावद्गुणवत्समवायिकारणं द्रव्यं पृथिव्यादि (वैशेषिकसू० ?)। धनमौषधं च द्रव्यम् ॥ १५४ ॥ धिष शब्दे, भं नक्षत्रं (धिष्ण्यं)। अग्निविशेषे पुमान् (धिष्ण्यः)। भागाद्यत् ($\frac{५।१।४९}{१७१५}$) शुभमशुभं शुभाशुभं पुरा कृतं कर्म (भाग्यम्)। राजकसेरुर्जलजः कन्दोऽत्र न पार्श्वास्थि (गाङ्गेयम्)। दन्तिका नामौषधी, अपिशब्दाल्लाङ्गली विगतशल्या च (विशल्या) ॥ १५५ ॥ वृषाकपेः स्त्री वृषाकपायी, वृषाकप्यग्नीति ($\frac{४।१।३७}{४९४}$) ङीप् ऐत्वम्। स्वाहा च, शचीमप्याहुः, यथा–वृषाकपायीमभ्येति सत्रपः किं न गोत्रभिद् (?)। अभिख्यायतेऽनयाभिख्या संज्ञा, यथा–चैत्राभिख्या। शोभायां यथा–काप्यभिख्या तयोरासीत्। (रघु० १-४६)। कीर्तौ च (अभिख्या) ॥ १५६ ॥ भावादौ कृञः श च ($\frac{३।३।१००}{३२७७}$) आरम्भे; यथा–सर्वाः क्रिया

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh

1 Enclosure of an edifice. १५८ कक्ष्या प्रकोष्ठे हर्म्याऽऽदेः काञ्च्यां मध्येभ-बन्धने, ।
2 A string of bells. 3 A rope round an elephant's body. 4 Effort. 5 Armpit.

1 An act. 2 A fierce deity. 3 Pestilence. कृत्या क्रिया-देवतयोस् त्रिषु भेद्ये धनाऽऽदिभिः, ॥
4 Peace. 5 Bribery. 6 Anything to be done.

1 A rumour. १५९ जन्यः स्याज् जनवादेऽपि, जघन्योऽन्त्येऽधमेऽपि च, ।
2 Thing to be done.
3 fight. 4 Maid servant. 5 Parents.
1 Last, ultimate.
2 Low, vile. 3 Born of low origin.

1 Reprehensible. गर्ह्याऽधीनौ च वक्तव्यौ, कल्यौ सज्ज-निरामयौ, ॥
2 Subject, dependent.
3 Fit to be said. 1 Ready, prepared. 2 Healthy. 3 Skilful. 4 Morning.
5 Auspicious speech. 6 Clouds. 7 Yesterday. 8 Tomorrow.

मन्त्रमूला नृपाणाम् (चा. सू. ५२)। निष्कृतिर्यथा–महापातकिनां पुंसां भवेत्प्राणान्तिका क्रिया। (?) शिक्षा यथा–क्रिया हि द्रव्यं विनयति नाद्रव्यम् (कौटिल्यः ?)। पूजनं यथा–गुरुदेवक्रियारतः। संप्रधारणं विचारः, यथा–क्रियां विना को हि जानाति कृत्यम् (?)। उपायो यथा–सामादिकाः क्रियाः। कर्म यथा–पाकक्रिया। चेष्टा यथा–स्तम्भे स्यान्निष्क्रियो जन्तुः प्रलये गतचेतनः (चरक. ?)। चिकित्सा यथा–पुनर्ज्वरं समुत्पन्ने क्रिया पूर्वज्वरानुगा (चरकसं० ?)। धात्वर्थेऽपि, यथा–क्रियाभावो धातुः। आख्यातं तूपचारात्, यथा–क्रिया वा कारकान्विता (पृ०)। गर्भाधानादिसंस्कारोऽपि यथा–स गुरुर्यः क्रियां कृत्वा वेदमस्मै प्रयच्छति (?)। और्ध्वदैहिकं यथा–अतो न रोदितव्यं हि क्रियाः कार्याः प्रयत्नतः (?)। छ्यति संतापं छाया, छो छेदने। छायाख्याऽर्कभार्या। कान्तौ यथा–विच्छायः पुरुषो भवेत् (?)। प्रतिबिम्बे यथा–संक्रान्तच्छाय आदर्शः (?)। आतपाभावे यथा–नष्टच्छायो मध्याह्नः (?) ॥१५७॥ राजगृहादेः प्रारम्भकोष्ठके यथा–सप्त कक्ष्या अतिक्रम्य (?)। काञ्चीबन्धनदाम यथा–परिधानाद्बहिः कक्ष्या निबद्धा ह्यासुरी भवेत्। मध्ये–इभस्य बन्धने यथा–हेमकक्ष्या गजाः। उद्योगे लक्षणया यथा–'परार्थं बद्धकक्ष्याणां त्वादृशामुद्भवः कुतः'। (नागानन्द IV. 16) क्रियायां करणे कृत्या यथा–कां कृत्यामकार्षीः, (?) प्रश्नाख्यानयोरिञ्च (स. कं. ३–१–२४७) इति क्यप्–वा। देवता मारी नाम, यथा–तानि कृत्याहतानीव (मनु ३–५८)। धनादिना यः शत्रोर्भेद्यते स कृत्यः, यत्कौटिल्यः–क्रुद्धलुब्धभीतावमानिताः परेषां कृत्याः (१–१३)। कार्यं च कृत्यम् ॥ १५८ ॥ जनस्य जल्पो जन्यः, मतजनहलात्करणजल्पकर्षेषु (४।४।९७ / १६४९)। अपिशब्दादुत्पातः संग्रामोऽपि (जन्यः)। जननीयः पितरौ च, तथा संज्ञायां जन्याः (४।४।८२ / १६३४) जनीं वहन्तीति। अपिशब्दाज्जघनभवे, शरीरावयवाद्यत् (५।१।६ / १६६६)। चशब्दाद्वाच्यः, वाच्यशब्दोऽपि गर्ह्यार्थवाची। कलासु साधुः कल्यः, सज्जोऽनुगुणः। दक्षोऽपि (कल्यः)। कल्यं ह्यस्तनं श्वस्तनं वाऽहः, प्रभातं

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh

1 Intelligent.
2 Wealthy.
१६० आत्मवाननपेतो ऽर्थादर्थ्यौ, पुण्यं तु चार्वपि, ।
1 Pleasing. 2 Merits. 3 Good act.

1 Beautiful.
2 Silver.
3 Wrought silver and gold.
रूप्यं प्रशस्त-रूपे ऽपि, वदान्यो वल्गु-वागपि, ॥
1 Eloquent. 2 Generous.

1 Just, reasonable.
2 Middle. 3 Low.
१६१ न्याय्ये ऽपि मध्यं, सौम्यं तु सुन्दरे सोम-दैवते. ।
1 Handsome, 2 Sacred to the moon. 3 Mild. 4 Mercury.

इति यान्ताः !

1 Multitude.
2 Occasion.
3 Service. 4 A day.
निवहाऽवसरौ वारौ, संस्तरौ प्रस्तराऽध्वरौ, ॥
1 A bed of grass or bark. 2 A sacrifice.

1 BRIHASPATI.
2 A parent.
3 A Venerable person. 4 Instructor. 5 Heavy. 6 Great.
१६२ गुरू गीष्पति-पित्राद्यौ, द्वापरौ युग-संशयौ, ।
1 The 3rd age. 2 Doubt.

1 difference.
2 Similitude.
प्रकारौ भेद-सादृश्ये, आकाराविङ्गिताऽऽकृती, ॥
1 Hint. 2 Form.

च । कल्या कादम्बिनी ॥ १५९ ॥ आत्मवानर्थनीयोऽर्थे साधुर्वा, अन्नवानिति पाठे धार्मिकोऽर्थ्यः । (अर्थ्यः) धर्मपथ्यर्थेति (४।४।९२ / १६४४) यत् । पुणति पुण्यं, अघ्न्यादिः (उ० ५५१) । अपिशब्दात्सुकृतं धर्मश्च (पुण्यम्) । अपिशब्दादाहते हेमरूप्ये, रूपादाहतप्रशंसयोः (५।२।१२० / १९२७) इति यप् । वदति वदान्यः, वदेरान्यः (उ० ३७६) । अपिशब्दाद्दाता, वदन्यश्च–एकदेशविकृतेः ॥ १६० ॥ (न्याय्ये) यथा–मध्यस्थः । अपिशब्दादन्तरे युक्ते प्रमाणेऽवलग्ने च, मन्यते मध्यः । सोमो देवतास्येति सौम्यं, सोमाट्ट्यण् (४।२।३० / १२३२) सुन्दरे तूपचारात् । चन्द्रजे च (सौम्यः) । दुर्गस्तु–सर्वज्ञभिषजौ वैद्यावात्मा कामश्च हृच्छयौ । फलकल्याणयोर्भव्यं योग्यं सांप्रतिके त्रिषु ॥ क्रियाचारातिक्रमेऽपि जलाधारेऽपि चाशयः । दैत्याचार्योऽपि धिष्ण्यो ना काषायः सुरभावपि ॥ चन्द्रोदयो वितानेऽपि स्यादाम्नायोऽन्वये श्रुतौ । शीताशिते शिते शैत्यं जात्यं कुलजकान्तयोः ॥ व्यवायो व्यवधौ च स्यात् कुलवधूः सरित् ॥ अथ रान्ताः । निवहो यथा–ग्रामवारः । अवसरो यथा–वारंवार-मुदारसंगरमुखे (?) । सेवाक्रमोऽपि यथा–वारस्त्री । वारः सूर्यादिदिवसः । संस्तीर्यते संस्तरः शय्या । संस्तीर्यन्ते दर्भा अत्र संस्तरो यज्ञः ॥ १६१ ॥ गृणाति गुरुः । गीष्पतिर्जीवः (गुरुः) । आद्यशब्दात्स गुरुर्यः क्रियां कृत्वा वेदमस्मै प्रयच्छति । तथा गुरु दुर्वहं, अलघु च । द्वाभ्यां कृतत्रेताभ्यां परं द्वापरं युगम् । संशये द्वौ परौ मुख्यावत्रेत्युभयकोटिस्पृक्त्वात्, पृषोदरादित्वात् (६।३।१०९ / १०३४) आत्वम् । भेदो विशेषः, यथा–पलाण्डुप्रकारा गृञ्जनादयः (या. १–१७६) । सादृश्ये यथा–विषप्रकारः पिशुनः । इङ्गितं भावसूचकं चेष्टितम्, आकृतिर्वैवर्ण्यादिः सांनवेशश्च

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh

1 Beard of corn. 2 An arrow.
१६३ किंशारू धान्यशूकेषू, मरू धन्व-धराधरौ, ।
1 A country void of water. 2 A mountain.

1 A tree. 2 A mountain. 3 The Sun.
अद्रयो द्रुम-शैलाऽर्काः, स्त्रीस्तनाऽब्दौ पयोधरौ, ॥
1 Woman's breasts. 2 A cloud.

1 A Darkness. 2 A foe. 3 A demon. 4 Vritra.
१६४ ध्वान्ताऽरि-दानवा वृत्रा, बलि-हस्तांऽशवः कराः, ।
1 Tax. 2 Hand. 3 Ray of light. 4 Hailstones. 5 Elephant trunk. 6 Hair.

1 Splitting fracture. 2 A feminine disease. 3 An arrow.
प्रदरा भङ्ग-नारीरुक्-बाणा, अस्राः कचा अपि, ॥
1 Hair. 2 A corner. 3 A tear. 4 Blood.

1 A hornless bull. 2 A beardless man.
१६५ अ-जात-शृङ्गो गौः काले ऽप्य-श्मश्रुर् ना च तूबरौ, ।
1 Gold. 2 Wealth. 3 A cloud.
स्वर्णे ऽपि राः, परिकरः पर्यङ्क-परिवारयोः, ॥
1 A bed. 2 A dependent. 3 Commencement. 4 Group. 5 Girding as for battle.

1 Elegance of a pearl. 2 The pupil of the eye. 3 A high note in music. 4 A loud noise. 5 Silver. 6 A star.
१६६ मुक्ता-शुद्धौ च तारः स्याच्छारो वायौ स तु त्रिषु ।
1 Air. 2 Variegated. 3 A die table.

1 Promise. 2 War. 3 Bargain. 4 Calamity. 5 Praise. 6 Charm. 7 Sami fruit.
कर्बुरे, ऽथ प्रतिज्ञाऽऽजि-संविदापत्सु संगरः, ॥

(आकारः) ॥ १६२ ॥ किंचित्कुसितं वा शृणाति किंशारुः, इषुः शरः । म्रियन्तेऽस्मिन्दुर्गमत्वान्मरुः, धन्वा निर्जलो देशः । अद्यतेऽत्ति वाऽद्रिः । अब्दो मेघः (पयोधरः) ॥ १६३ ॥ वृणोति वृत्रः । कीर्यते करोति वा करः, बलिः—राजग्राह्यम् । मेघोपलस्तु करकः । हस्तिशुण्डाऽपि करः, उपचारात् । प्रदीर्यतेऽनेनेति प्रदरः, नारीरुगतिरजःस्रावः । अस्यन्ते—अस्राः । अपिशब्दाद्वाष्पोऽसृक् चास्रम् ॥ १६४ ॥ कालेऽपीति गवि नरि च काकाक्षिवद्योज्यम् । तनोति तूः—लक्षणं, भ्रमेश्चडूः (उ० २१५) बाहुलकात्, तूं वृणोति छादयति तूवरः । रातेर्डैः (उ० २१३), अपिशब्दाद्वित्ते मेघे च । परिक्रियते परिकीर्यते च परिकरः । समूहारम्भयोः प्रगाढगात्रिकाबन्धे च (परिकरः) ॥ १६५ ॥ मुक्तानां शुद्धिस्तारो नाम गुणः, लक्षणया शुद्धमौक्तिके । चशब्दात्कनीनिकातारकयोश्च तारावत् । अत्युच्चस्वरे रूप्ये च (तारः) । शृवायुवर्णनिवृत्तेषु (वा० $\frac{२१२५}{३१७.१}$) इति कर्तरि घञ् । कर्बुरो नानावर्णः (शारः) । प्रतिज्ञायां यथा—सत्यसंगरः । आजौ यथा—संगरो विक्रियाकरः (?) । संविदि यथा—अन्योन्यं वृत्तसंगरौ । आपदि यथा—संगरे शरणं सुहृत् (?), संगरणं संगिरन्तेऽत्र च संगरः ।

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

1 The prayers of the *Vedas*. १६७ वेद-भेदे गुप्त-वादे **मन्त्रो**, मित्रो रवावपि, ।
2 Consultation. 3 Incantation. 1 The sun. 2 A friend.

1 A sacrifice. 2 An arrow. 3 Shaving of sacrificial post. 4 Thunderbolt. मखेषु-यूपखण्डेऽपि **स्वरुर्**, गुह्ये ऽप्यवस्करः, ॥
1 Part to be concealed. 2 Excrement. 3 Sweeping.

1 Charge sounded by trumpets. १६८ आडम्बरम् तूर्य-रवे गजेन्द्राणां च गर्जिते, ।
2 Roaring of elephants. 3 Beginning. 4 Making show.

1 A brisk assault. 2 Robbery. 3 Arming. अभिहारो ऽभियोगे च चौर्ये संनहने ऽपि च, ॥

1 An attendant. 2 A scabbard. 3 Insignia of dignity. १६९ स्याज् जङ्गमे **परीवारः** खड्ग-कोशे परिच्छदे, ।

1 A tree. 2 A handful of sacred grass. 3 Stool or cusion. **विष्टरो** विटपी दर्भ-मुष्टिः पीठाऽऽद्यमासनम्, ॥

1 A door. 2 A porter. १७० द्वारि द्वाःस्थे **प्रतीहारः** प्रतीहार्यप्यनन्तरे, ।
1 A female porter.

1 A large ichneumon. 2 VISHNU. 3 Siva. 4 Fire. 5 A sage. 6 Tawny. 7 Large. विपुले नकुले विष्णौ **बभ्रुर्** ना पिङ्गले त्रिषु, ॥

1 Strength. 2 Essence. 3 Just. 4 Prosperity. 5 Water. 6 Wealth. १७१ **सारो** बले स्थिरांऽशे च न्याय्ये क्लीबं वरे त्रिषु, ।

1 A gamester. 2 A stake. **दुरोदरो** द्यूतकारे पणे, द्यूते **दुरोदरम्** ॥ 3 Gambling.

शमीफले तु संगरम् ॥ १६६ ॥ मन्त्रब्राह्मणात्मको हि वेदः । गुप्तवादो रहसि कर्तव्यावधारणं (मन्त्रः), मायाबीजादिश्च । मेद्यति स्निह्यति मित्रः । अपिशब्दान्मित्रं सुहृत् । मखादिषु चतुर्ष्वर्थेषु (स्वरुः) । अपिशब्दाद्वज्रे, स्वरति स्वरुः । अन्ये तु सान्तमाहुः, शोभनान्यरूंषि यस्येति, खण्डस्थाने खड्गं पेठुः । अपिशब्दाद्वर्चस्के, अवकीर्यत इति, वर्चस्केऽवस्कर इति ($\frac{६।१।१४८}{२०६३}$) साधुः ॥ १६७ ॥ आदम्य-[डम्ब्य]न्ते भीरवोऽनेनेत्याडम्बरः । संरम्भेऽपि, यथा—आडम्बराणि पूज्यन्ते स्त्रीषु राजकुलेषु च ॥ १६८ ॥ परिवार्यतेऽनेनेति, परिवारोऽपि । परिच्छदः परिजनादिः (परीवारः) । विस्तीर्यते विष्टरः, वृषासनयोर्विष्टरः ($\frac{६।१।२०३}{३६९१}$) साधुः । दर्भमुष्टिरुपयामः[परिमाणं] तस्य विष्टरत्वं श्राद्धादौ ब्राह्मणासनत्वेनाम्नानात् । पीठाद्यमासनविशेषणम् ॥ १६९ ॥ प्रतिह्रियते निवार्यते प्रवेशोऽनेनात्र च प्रतीहारः । अनन्तरे द्वाःस्थे स्त्रियां प्रतीहारी, अपिशब्दो द्वाःस्थापेक्षः । बिभर्ति बभ्रुः ॥ १७० ॥ सृस्थिरेति ($\frac{३।३।१७}{३९८३}$) कर्तरि घञ् (सारः) । बले यथा—सुसारः, घृतान्मांसं तु सारकृत् । स्थिरांशे यथा—चन्दनसारः, मज्जासारः । न्याये यथा—नैतत्सारम् । वरे

CC-0. Agamnigam Foundation. Digitized by eGangotri Research Foundation, Chandigarh

1 A forest.
2 A difficult road.
3 A sort of sugar cane.

१७२ महाऽरण्ये दुर्ग-पथे कान्तारं पुन्-नपुंसकम् , ।

1 Envy. 2 Envious.
3 Niggardly. 4 Gnat.

मत्सरो ऽन्य-शुभ-द्वेषे तद्वत्-कृपणयोस् त्रिषु, ॥

1 A boon.
2 Excellent.
3 Indeed. 4 A little approved. 5 A husband.

१७३ देवाद् वृते वरः श्रेष्ठे त्रिषु क्लीबं मनाक्-प्रिये, ।

1 Shoot of a bambu.
2 A kind of tree. 3 A jar. 4 A sort of a plant.

वंशाऽङ्कुरे करीरो ऽस्त्री तरु-भेदे घटे च ना, ॥

1 Rearguard.
2 A string worn on the wrist at nuptials. 3 Counsel. 4 A servant. 5 Sacrifice.

१७४ ना चमू-जघने हस्त-सूत्रे प्रतिसरो ऽस्त्रियाम् , ।

1 Yama.
2 Wind. 3 Indra.
4 The moon. 5 The sun. 6 Vishnu. 7 A lion. 8 A ray of light. 9 A horse.

यमाऽनिलेन्द्र-चन्द्राऽर्क-विष्णु-सिंहांऽशु-वाजिषु ॥

10 A parrot.
11 A serpent.
12 An Ape. 13 A frog. 14 Tawny. 15 Green. 16 Yellow.

१७५ शुकाऽहि-कपि-भेकेषु हरिर् ना कपिले त्रिषु, ।

1 A potsherd.
2 A stony nodule.
3 A country abounding in Stones. 4 A disease. 5 Clayed sugar.

शर्करा कर्परांऽशे ऽपि, यात्रा स्याद् यापने गतौ, ॥

1 Passing away time. 2 Livelihood. 3 Travelling. 4 Festival.

1 The earth.
2 Speech.
3 Ardent spirit. 4 Water.

१७६ इरा भू-वाक्-सुराऽप्सु स्यात् , तन्द्री निद्रा-प्रमीलयोः, ।

1 Drowsiness. 2 Lassitude.

1 A nurse.
2 The earth.
3 A Mother. 4 A myrobalan.

धात्री स्यादुपमाता ऽपि क्षितिरप्यामलक्यपि, ॥

यथा–जये धरित्र्याः पुरमेव सारम् (बृ.सं.७४–१) । दुष्टमासमन्तादुदरमस्य दुरोदरम् ॥१७१॥ कस्याम्भसोऽन्तं नाशमृच्छति कान्तारः, कान्ता आरा धारा अत्र(स्य) वा । माद्यति परकृच्छ्रे मदात्सरति वा मत्सरः, तद्वान् मत्सरवान् ॥ १७२ ॥ देवादिभ्यो वृते याचिते, रूपात्पुंसि, यदाहुः–तपोभिरिष्यते यस्तु देवेभ्यः स वरो मतः (कात्यः) । श्रेष्ठे यथा-वररुचिः । ईषत्प्रिये यथा–वरं कूपशताद्वापी (?) अव्ययमित्येके । विवाह्योऽपि वरः। करोति करिणमीरयति क्रिय[कीर्य]ते च करीरः। चशब्दाद्वंशविशेषेऽपि ॥ १७३ ॥ चमूजघनं सेनापश्चाद्भागः, हस्तसूत्रं विवाहादौ कौतुकं मङ्गलार्थमूर्णामयं मणिबन्धसूत्रं (प्रतिसरः), यागादौ तूपचारात् । नियोज्येऽपि (प्रतिसरः) ॥ १७४ ॥ कपिले पीतवर्णे पुमान्, तद्वति त्रिषु, हरति हरिः । शीर्यते शर्करा, कर्परांशो मृत्कपालखंडः । अपिशब्दादिक्षुविकारे शर्करिलदेशे च (शर्करा) । याप्यतेऽनया[यात्रा], यापनं भोजनादिवर्तनं यथा–प्राणयात्रा । गतिर्यानं यथा–विजययात्रा । देवोत्सवेऽपि, यान्त्यत्रेति(यात्रा) ॥१७५॥ इण इरतेश्च रूपं,इरान्नमलमन्नरसश्च,दुर्गश्च-इरा भूवाक्सुरान्नापः । तनन्द्रात्यस्यां तन्द्री, तन्द्रापि । प्रमीला–इन्द्रियग्लानता ।

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

1 Wanting a limb. 2 A dancing girl. 3 A courtesan. 4 A bee. 5 An egg plant. १७७ क्षुद्रा व्यङ्गा नटी वेश्या सरघा कण्टकारिका, ।

6 Cruel. 7 Low. 8 Small. 9 Miserly. 10 Poor. त्रिषु क्रूरे ऽधमे ऽल्पे ऽपि क्षुद्रं, मात्रा परिच्छदे ॥

1 Requisites, materials. 2 A little.

3 Quantity. 4 Measure. 5 The whole. 6 Only. 7 An earring. 8 An instant. 9 Half a short syllable. 10 Wealth १७८ अल्पे च परिमाणे सा, मात्रं कार्त्स्न्ये ऽवधारणे, ।

1 Painting, delineation. 2 Wonder. 3 Variegated. 4 A circle. 5 Wonderful. 6 A star. 7 Subhadra. आलेख्याऽऽश्चर्ययोश् चित्रं, कलत्रं श्रोणि-भार्ययोः, ॥

1 The hip and loins. 2 A wife. 3 A strong hold.

1 Fit. capable. 2 A vessel. 3 King's minister. १७९ योग्य-भाजनयोः पात्रं पत्रं, वाहन-पक्षयोः, ।

4 A river bed. 5 A vessel in sacrifice. 6 An Actor. 1 A vehicle. 2 A wing. 3 A leaf. 4 Arrow feather.

1 Command. 2 Institutes of science. निदेश-ग्रन्थयोः शास्त्रं, शस्त्रमायुध-लोहयोः, ॥

1 A weapon. 2 Iron. 3 A knife.

1 Root of a tree. 2 Wove silk bleached. १८० स्याज् जटांऽशुकयोर् नेत्रं, क्षेत्रं पत्नी-शरीरयोः, ।

3 An eye. 4 The rope of a churn. 5 A car. 6 A guide. 1 A wife. 2 Body. 3 A field. 4 A holy spot. 5 A Geometrical figure.

1 Snout of a hog. 2 Forepart of a plough. 3 Sort of cloth. मुखाग्रे क्रोड-हलयोः पोत्रं, गोत्रं तु नाम्नि च, ॥

1 Name. 2 A family. 3 Wealth. 4 A mountain. 5 The earth. 6 A herd of kine.

धयन्त्येनां धत्ते च धात्री, उपमाता क्षीरदात्री ॥ १७६ ॥ क्षुणत्ति क्षुद्यते च क्षुद्रम् । व्यङ्गा हीनाङ्गी, वेश्या, शीलहीनोऽपलक्षणं, सरघा मधुमक्षिका (क्षुद्रा) । अधनो निःस्वः (क्षुद्रः) । अपिशब्दात्कृपणः (क्षुद्रः) परिच्छदे यथा–महामात्रः ॥ १७७ ॥ अल्पे यथा–मात्रया विलेपनं ताम्बूलं चोपयुज्य (?) । परिमाणे यथा–मात्राशी सर्वकालं स्यात् (?) । धने कर्णभूषणेऽक्षिनिमेषकाले तालाङ्गे च (मात्रा) । कार्त्स्न्ये यथा–हस्तमात्रमग्निकुण्डम् । अवधारणे यथा–न स्नानमात्रगमनोत्सव-भूषणानाम् (?) । स्वार्थेऽपि यथा–तावन्मात्रम् । चीयते चित्र्यते वा चित्रम् । नानावर्णे च (चित्रम्) । चित्रकं तु तिलकम् । चित्रा सुभद्रानक्षत्रयोः । कलं दुर्बलं त्रायते कलत्रं कलयति वा ॥ १७८ ॥ पाति पीयतेऽनेन च पात्रम् नदीकूलान्तरे यज्ञभाण्डे नाट्यानुकर्तरि (पात्रम्) । पतन्ति यान्त्यनेन पत्त्रम्, पर्णेऽपि । निदेश आज्ञा, शासनं शास्यतेऽनेन शास्त्रम् । शस्यतेऽनेन शस्त्रम् ॥१७९॥ जटा वृक्षमूलं, अंशुकं पटोऽत्र, नयति नीयतेऽनेन नेत्रम् । मन्थानरज्जौ बस्तिनाड्या-मक्षि च (नेत्रम्) । क्षिणोति क्षीयते वा क्षेत्रम् । केदारे सिद्धस्थाने गणित-

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

1 Vesture. 2 A sacrifice. १८१ सत्रमाच्छादने यज्ञे सदा-दाने वने ऽपि च, ।
3 Constant alms. 4 A forest. 5 Fraud. 6 Means.

1 Object of perception. 2 A body. अजिरं विषये काये ऽप्यम्बरं व्योम्नि वाससि, ॥
3 A courtyard. 4 Wind. 1 Ether ; the sky. 2 Apparel. 3 Ambergris.

1 A realm. 2 A wheel. १८२ चक्रं राष्ट्रे ऽप्यक्षरं तु मोक्षे ऽपि, क्षीरमप्सु च, ।
3 A sharp discus. 4 An army. 5 Multitude. 6 A mill. 7 A potter's wheel.
8 A whirlpool. 9 Ruddy goose. 1 Exemption from transmigration.
2 A letter. 3 Brahman. 4 Siva. 5 Unalterable. 1 Water. 2 Milk.

1 Gold. 2 Frequent numerous. स्वर्णे ऽपि भूरि-चन्द्रौ द्वौ, द्वार-मात्रे ऽपि गोपुरम् ,॥
3 Brahma. 4 Vishnu. 5 Siva. 6 Moon. 7 Camphor. 8 water.
1 A door. 2 A town gate. 3 Sort of grass.

1 A cavern. 2 Pride. १८३ गुहा-दम्भौ गह्वरे द्वे, रहो ऽन्तिकमुपह्वरे, ।
3 A forest. 4 An Arbour. 1 Near. 2 Solitude.

1 Front, fore-part. 2 More. पुरो ऽधिकमुपर्यग्राण्यगारे नगरे पुरम् ॥
3 Top, summit. 4 Point. 5 Assemblage. 6 Four mouthfuls. 7 Chief.
1 A house. 2 A town. 3 A body. 4 City of Patna.

1 A house. 2 A town. १८४ मन्दिरं चाथ राष्ट्रो ऽस्त्री विषये स्यादुपद्रवे, ।
3 The sea. 1 A country, or realm. 2 Calamity.

1 Fear, dread. 2 A hole in the ground. 3 Little. 4 A cavern. दरो ऽस्त्रियां भये श्वभ्रे, वज्रो ऽस्त्री हीरके पवौ, ॥
1 A diamond. 2 The thunderbolt.

व्यवहारे च (क्षेत्रम्) । क्रोडः सूकरः, तस्य मुखाग्रं घोणा, पुनन्त्यनेन पोत्रं, हलसूकरयोःपुवः ($\frac{३।२।१८३}{३१६४}$) ष्ट्रन् । गूयते शब्दयतेऽनेन गां त्रायते च गोत्रं, चशब्दाल्कुले शैले च । गोत्रा तु भूः, गोसमूहश्च ॥ १८० ॥ सीदन्त्यत्र सत्त्रं, दम्भे साधने चशब्दात् । अजन्त्यत्राजिरं, विषये रूपादौ । अपिशब्दात्प्राङ्गणे (अजिरम्) । अम्बतेम्ब्यते वाम्बरम् । सुगन्धद्रव्यभेदेऽपि (अम्बरम्) ॥ १८१ ॥ करोतेश्चकतेश्च रूपं (चक्रम्) । अपिशब्दादायुधे रथाङ्गे सैन्ये राष्ट्रे तैलिककुलालाद्युपकरणे च (चक्रम्) । चक्रस्तु चक्रवाके । दुरुद्योगघुणावर्तयोश्चक्रिका । न क्षरत्यक्षरम् । अपिशब्दाद् ब्रह्मपरब्रह्मणोः (अक्षरं) । घस्यते क्षीरम्, चशब्दाद् दुग्धे । अपिशब्दाद्यभूतेन्द्वोः (भूरिचन्द्रौ), भवति भूरि । अपिशब्दात्पुरद्वारे, गोप्यते गोपुरम् ॥१८२॥ गुह्यते गुहा, भिदादिः पिद्भिदादीति, ($\frac{३।३।१०४}{३२८१}$) । गाहनं गाह्यते वा गह्वरं, निकुञ्जेऽपि । रहो निर्जनं, उपह्वरन्तेऽत्रोपह्वरम् । पुरो यथा–अग्रेसरः । अधिकं यथा–साग्रं शतम् । उपरि यथा–वृक्षाग्रम्, अगस्त्यग्रम् । भिक्षाभेदेऽपि (अग्रं), यत्स्मृतिः–ग्रासप्रमाणं भिक्षा स्यादग्रं ग्रासचतुष्टयम् । अग्रं चतुर्गुणं प्राहुर्हन्तकारं द्विजोत्तमाः (?)॥ मुख्ये तूपचारात् , यथा–अग्रहारः । चशब्दः पुरापेक्षः, सर्वतोभद्रादियागे देहेऽपि पुरम्, पिपर्ति पूर्यते च, ॥ १८३ ॥ मन्दतेऽत्र मन्दिरम् राजते राष्ट्रं, विषयो जनपदः ।

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

1 Chief.
2 Right conclusion. १८५ तन्त्रं प्रधाने सिद्धान्ते सूत्रवाये परिच्छदे, ।
3 A weaver's batten. 4 Raiment. 5 Responsibility of a Realm.
6 Dependance. 7 A sacred book. 8 An excellent medicament.

1 Handle of a fan of cow's hair. औशीरश् चामरे दण्डे ऽप्यौशीरं शयनाऽऽसने, ॥
2 A bed. 3 Chair or stool. 4 Fragrant root.

1 Tip of an elephant's trunk. १८६ पुष्करं करि-हस्ताऽग्रे वाद्य-भाण्ड-मुखे जले ।
2 Head of drum. 3 Water.
4 Sky. 5 Edge of a scimitar. व्योम्नि खड्ग-फले पद्मे तीर्थौषधि-विशेषयोः ॥
6 Lotus. 7 Holy place. 8 A Drug.

1 Interval. १८७ अन्तरमवकाशाऽवधि-परिधानान्तर्धि-भेद-तादर्थ्ये ।
2 Period.
3 Clothing. 4 Covering. 5 Difference. 6 Same. 7 A weak point.
8 A hole. 9 Own. छिद्राऽऽत्मीय-विना-बहिरवसर-मध्ये ऽन्तरात्मनि च, ॥
10 Without. 11 Outside.
12 Opportunity. 13 Midst. 14 Supreme being. 15 Similar. 16 Other.

उपद्रवे यथा–परराष्ट्रभयम्। द भये, द विदारणे, श्वभ्रे दर्यपि। दरेति–ईषदर्थेऽव्ययं देश्यं पदं वा, यथा–दरदलितहरिद्रापिञ्जराण्यङ्गकानि (राजशेखरः ?)। वजत्येव न प्रतिहन्यते वज्रं, हीरको मणिव्यधकं रत्नम्। वज्रोऽशनिश्च ॥ १८४ ॥ तन्यते तन्त्र्यते वा तन्त्रम्। प्रधाने यथा–द्वित्वमन्त्रम्। सिद्धान्ते यथा–चतुःपीठमिदं तन्त्रम्। सूत्रवाये यथा–तन्त्रवायः। परिच्छदे यथा–तन्त्रपतिः। अत एव स्वमण्डलचिन्ता तन्त्रम्। आयत्तेऽपि यथा–स्वतन्त्रः। शास्त्रप्रक्रियाशब्दव्युत्पत्ति-रौषधादि च, यथा–साधारणं भवेत्तन्त्रं यथा श्वेतो धावति (भाष्य० ?)। उश्यते काम्यत इत्यवगमात्, दण्डो यष्टिः। शयनासनयोः समुदितयोः संज्ञेयम् (औशीरं)। अपिशब्दादुशीरस्येदं (औशीरम्) ॥ १८५ ॥ वाद्यभाण्डे मुरजस्य मुखे, तीर्थ-विशेषे यथा–पुष्करं दुष्करं गन्तुम्। औषधविशेषे यथा–पुष्करमूलानि ॥ १८६ ॥ अन्तं रात्यन्तरम्। अवकाशे यथा–अन्तरं देहि (बा० रा० ?)। अवधौ यथा–मासान्तरे देयम्। परिधाने यथा–अन्तरे शाटका अन्तःपरिधानीया इत्यर्थः (काशिका० पृ. ११)। अन्तर्धौ यथा–पर्वतान्तरिताः स्त्रियः (?)। भेदो विशेषः, यथा–अन्तरज्ञो भव सदा धनस्य च जनस्य च (?)। तादर्थ्ये यथा–ओदनान्तरस्तण्डुलः। छिद्रे यथा–अन्तरं लब्ध्वारेः प्रहरेत् (?)। आत्मीये यथा–अयमभ्य[त्य]न्तरो मम (?)। विनार्थे यथा–अन्तरेण पुरुषकारं न किञ्चित्सि-ध्यति (?)। बहिरर्थे यथा–अन्तरे चाण्डालगृहा बाह्या इत्यर्थः। अवसरे यथा–अन्तरज्ञः सेवकः। मध्ये यथा–आवयोरन्तरे जाताः पर्वताः सरितो द्रुमाः (महानाट० ५–२५)। अन्तरात्मनि यथा–अन्तरात्मा, तथा च, दृष्ट्वान्तरं ज्योतिरुपाररास (कु. ?)। चशब्दादन्यार्थे यथा–वस्त्वन्तरम् ॥ १८७ ॥

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh

1 Fragrant root of grass. 2 Cyprus rohmdas. 3 A boiler.
१८८ मुस्ते ऽपि पिठरं, राज-कशेरुण्यपि नागरम्, ।
1 Cyprus pertenuis. 2 Ginger. 3 Belonging to a city.

1 Very dark. 2 Mischievous, destructive. 3 Vicious elephant.
शार्वरं त्वन्धतमसे धातुके भेद्य-लिङ्गकम्, ॥

1 Pale red. 2 White. 3 Yellow. 4 Clean. 5 White mustard.
१८९ गौरो ऽरुणे सिते पीते, व्रणकार्यप्यरुष्करः, ।
1 Sharp, corrosive. 2 Semecarpus macardium.

1 Hard. 2 Old. 3 The belly.
जठरः कठिने ऽपि स्यादधस्तादपि चाऽधरः ॥
1 Inferior, low. 2 The lip. 3 Less. 4 Difficult.

1 Unperplexed. 2 Attentive.
१९० अनाकुले ऽपि चैकाग्रो, व्यग्रो व्यासक्त आकुले, ।
1 Distracted. 2 Perplexed. 3 Frightened.

1 Superior, high. 2 Northern. 3 Excellent. 4 Answer. 5 Son of Virata.
उपर्युदीच्य-श्रेष्ठेष्वप्युत्तरःस्यादनुत्तरः ॥
1 Inferior. 2 Southern. 3 Worse. 4 Excellent. 5 Silent.

1 Distant, remote. 2 Other. 3 Preeminent. 4 Subsequent. 5 An enemy.
१९१ एषां विपर्यये श्रेष्ठे, दूराऽनात्मोत्तमाः पराः, ।

1 Sweet. 2 Pleasing. 3 Poison.
स्वादु-प्रियौ च मधुरौ, क्रूरौ कठिन-निर्दयौ, ॥
1 Hard. 2 Pitiless; cruel. 3 Destructive. 4 Terrible.

अपिशब्दात्स्थाल्यां (पिठरं), पिठ अवयवे । राजकशेरुर्जलजकन्दविशेषः (नागरम्) ।अपिशब्दाच्छुण्ठी, नगरभवं च (नागरम्) । शर्वर्यां भव शृणाति वा शार्वरं, धातुकश्चासाविभो हस्ती च ॥ १८८ ॥ गोर एव गौरः । अपिशब्दाद् भल्लातकः (अरुष्करः) । जठति (जायते) जठरं अपिशब्दात्कुक्षौ । अपिशब्दादोष्ठे हीने दुर्धरे च (अधरः) ॥ १८९ ॥ अपिशब्दादवहिते, एकमग्रं चिन्तनीयमस्यैकाग्रः । विविधमग्रमस्य व्यग्रः, विशेषेणागति वा । उपरि यथा–इत उत्तरम् । उदीच्ये यथा–उत्तरे कुरवः । श्रेष्ठे यथा-लोकोत्तरम् । अपिशब्दाद्वाक्ये यथा–निरुत्तरीकृतः । प्रतिवाक्ये यथा–प्रश्नश्चोद्यधिया पृच्छा तस्य भञ्जनमुत्तरम् (?) । अतिशयेनोद्गतमुत्तरम् । नास्त्युत्तरमत्रानुत्तरम् ॥ १९० ॥ एषामुपर्यादीनां विपर्यये बुद्धे दक्षिणेऽधमे वचनाभावे च (अनुत्तरः) । अनात्मात्मनोऽन्यः (परः)। उत्तमोऽत्रोत्तरतः पूर्वादन्यः शत्रुश्च (परः), पिपर्तीति परः । मधु माधुर्यमस्यास्ति मधुरः, ऊषसुषीतिरः, (१९१४) कृणाति कृन्तति वा क्रूरः ॥

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

1 Generous. 2 Great. 3 Gentle. 4 Unperplexed. १९२ उदारौ दातृ-महतोरितरस् त्वन्य-नीचयोः, ।
1 Other. 2 Low, vile.

1 Indolent. 2 Independent, uncontrolled. मन्द-स्वच्छन्दयोः स्वैरः, शुभ्रमुद्दीप्त-शुक्लयोः, ॥
1 Splendid. 2 White. 3 Tale

1 A Great shower. 'आसारो वेगवद्वर्षं सैन्यप्रसरणं तथा ॥ १७ ॥

2 Incursion of an army. 3 Hail stones. 4 Excellence. धाराम्बुपाते चोत्कर्षे ऽस्त्रौ कटाहे तु कर्परः ।
1 A fine pot. 2 Skull. 3 A pot sherd.

1 Beautiful. 2 Humble. बन्धुरं सुन्दरे नम्रे गिरिर् गेन्दुकशैलयोः ॥ १८ ॥
1 Yellow substance. 2 Mountain.

1 A pot. 2 An oblation. चरुः स्थाल्यां हविःपक्ता ऽवधीरः कातरे चले' ॥१९॥
1 A fool. 2 Movable.

इति रान्ताः ।

1 Lock on the crown of the head. 2 A diadem. 3 Hair tied on the head. 4 Head. १९३ चूडा किरीटं केशाश् च संयता मौलयस् त्रयः, ।

1 The tree *Pilu*. 2 An elephant. 3 An arrow. 4 A Flower. 5 An Atom. द्रुमप्रभेद-मातङ्ग-काण्ड-पुष्पाणि पीलवः, ॥

1 YAMA. 2 Measured time. 3 Death. 4 Infinite time. 5 Black. १९४ कृतान्ताऽनेहसोः कालश्, चतुर्थे ऽपि युगे कलिः, ।
1 The fourth age. 2 A quarrel. 3 War, battle. 4 Unblown flower.

1 A deer. 2 A lotus. 3 Water. 4 Laxmi. 5 An excellent woman. स्यात् कुरङ्गे ऽपि कमलः, प्रावारे ऽपि च कम्बलः, ॥
1 A blanket. 2 A dewlop. 3 Chief of serpents. 4 Water.

1 Tax, revenue. 2 An oblation. 3 Wrinkle. 4 Bali. १९५ करोपहारयोः पुंसि बलिः प्राण्यङ्गजे स्त्रियाम्, ।

1 Bulkiness. 2 Strength. 3 Army, forces. 4 A crow. 5 Balarama. स्थौल्य-सामर्थ्य-सैन्येषु बलं ना काक-सीरिणोः, ॥

॥ १९१ ॥ उच्चैरारात्युदारः, अनाकुलेऽपि । इतं राति–एति वा–इतरः । स्वेनेर्ते स्वस्य–ईरो वा स्वैरः, स्यादीरेरिणोः (वा० $\frac{३६०६}{७३}$) इति वृध्येकादेशौ । शोभते शुभ्रम् ॥ १९२ ॥ अथ लान्ताः । संयता बद्धाः केशा मौलिः, मूल प्रतिष्ठायां, मूङ् बन्धने वा । द्रुमविशेषः पीलुः । मातङ्गोऽत्र हस्ती, पील गतौ ॥१९३॥ अनेहा कालः क्षणत्रुट्यादिः, कलयति भूतानि कलयत्यायुर्वा कालः। महाकाले मृत्यौ कृष्ण-वर्णे च (कालः) । अपिशब्दात्कलहे, निरर्थके रणे तूपचारात् (कलिः), कल क्षेपे । अपिशब्दात्पद्माम्भसोः कमलम् । कमला तु श्रीः । कमलते कुत्सितमलति च (कमलम्) । अपिशब्दात्सास्नायां नागविशेषे च, काम्यते कुत्सितं लति वच कम्बलः ॥ १९४ ॥ करो राजग्राह्यः, पूजोपकरणमुपहारः, प्राण्यंगजस्त्वक्सकोचः

CC-0. Agamnigam Foundation, Chandigarh

1 A whirlwind. 2 Rheumatic. १९६ वातूलः पुंसि वात्यायामपि वाताऽसहे त्रिषु,। 3 Insane.

1 Wicked. 2 A tiger. 3 A serpent. 4 Vicious elephant. भेद्य-लिङ्गः शठे व्यालः पुंसि श्वापद-सर्पयोः, ॥

1 Sin. 2 Filth. 3 Excretion. 4 Dregs. 5 Rust. १९७ मलो ऽस्त्री पाप-विट्-किट्टान्यस्त्री शूलं रुगायुधम्, । 1 Colic. 2 A weapon.

1 A lance. 2 A gnomon. 3 A stake. 4 A post. 5 Flame. 6 A blow on the breast. शङ्कावपि द्वयोः कीलः, पालिः स्त्र्यश्र्यङ्क-पङ्क्तिषु, ॥ 1 A corner. 2 The hollow above the hip. 3 Sharp edge. 4 Mark. 5 Arrow. 6 End. 7 Handful.

1 A mechanical art. 2 A measure of time. 3 A part. १९८ कला शिल्पे काल-भेदे चाऽऽली सख्यावली अपि, । 1 A companion. 2 A row. 3 Calamity. 4 Digit of the moon. 5 Long note.

1 Tide. 2 Time. 3 Limit. 4 Sea shore. अब्ध्यम्बु-विकृतौ वेला काल-मर्यादयोरपि, ॥

(बलिः) । आद्य ओष्ठ्यादिरन्त्यो दन्त्योष्ठ्यादिरिति विशेषो न गणितः । बल प्राणने, वल संवरणे, दैत्येऽपि बलिः । स्थौल्यादौ रूपात्क्लीबे (बलं), काकहलधरयोस्तु ना पुंलिङ्गः (बलः) ॥१९५॥ वातात्समूहे च (वा. $\frac{३२२०}{२९२८}$), तं न सहत इति–ऊलः । उन्मत्तेऽप्याहुः, वातुलवातलौ च दृश्येते । विविधमालमनर्थोऽस्माद्व्यालः । अड उद्यमे, व्याडोऽपि । स्त्रियां तु व्याली ॥ १९६ ॥ मलयति मलते वा देहं च मलः, विड् गूथं, किट्टं कलङ्कः । स्मृतौ तु–वसा शुक्रमसृङ् मज्जा मूत्रं विट् कर्णविण्नखाः । श्लेष्माश्रु दूषिका स्वेदो द्वादशैते मला नृणाम् (मनु. ५–१३५) ॥ शूल रुजायां, रुग्वातदोषः, यदाहुः–शूलं वर्ततेऽनिलात् (?) । शङ्कौ कीलके (कीलः), अपिशब्दाज्ज्वालायां, कील बन्धे । क्षतौ प्रहरणविशेषे कीला, यद्वात्स्यायनः–कीला उरसि कर्तरी शिरसि विद्धा कपोलयोः । पाल्यतेऽनया पालिः स्त्रीलिङ्गा अश्रिर्धारा । अङ्के यथा–कपोलपाली, कपोलोत्सङ्ग इत्यर्थः । अङ्कपालीत्यत्राङ्को वक्षः, यच्छाश्वतः–मुखाङ्कनाभिमेढ्रक्ष्मातालमानेति (?) । पङ्क्तौ यथा–पालीयं चम्पकानाम् । (रत्ना. ३–८) प्रान्ते यथा–कर्णपाली, तथा सितपटच्छन्नपालीं कपालीम् (?) । लोकाः कल्पितभोजनेऽप्याहुः ॥ १९७ ॥ शिल्पे गीतादौ, कालविशेषे, यदवोचत्–अष्टादश निमेषास्तु काष्ठा त्रिंशत्तु ताः कला (पृ० ३४)। चशब्दादंशे यथा–चंद्रकला, निष्कलः। निवृत्या [त्या]द्याश्चाष्टत्रिंशत्कलाः । तालेषु गुरुः कला । आ–अलति भूषयत्याली, आलाति च । अपिशब्दादालिरनर्थः । जलधिजलविकारे वेला, तटेऽप्युपचारात्, वेल

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

1 The Pleiades. १९९ बहुलाः कृत्तिका गावो, बहुलो ऽग्नौ शितौ त्रिषु, ।
2 A cow.
3 Many. 4 Fire. 5 Black. 6 Cardamum. 7 The dark half of a mouth.

1 Sport. लीला विलास-क्रिययोरुपला शर्करा ऽपि च, ॥
2 Gesture.
1 A stony nodule. 2 Manufactured sugar. 3 Stone. 4 A gem. 5 Sugarcane.

1 Blood. 2 Water. २०० शोणिते ऽम्भसि कीलालं, मूलमाद्ये शिफा-भयोः, ।
1 Origin. 2 Root. 3 An Asterism. 4 Wealth. 5 Water. 6 Corn.

1 A multitude. जालं समूह आनाय-गवाक्ष-क्षारकेष्वपि, ॥
2 A net.
3 A window. 4 An unblown flower. 5 Pride. 6 Magic.

1 Disposition. २०१ शीलं स्वभावे सद्-वृत्ते, सस्ये हेतु-कृते फलम्, ।
2 Good conduct.
1 Fruit. 2 Result. 3 Edge of a weapon. 4 Profit. 5 Nutmeg. 6 Pearl. 7 Shield.

1 A roof. 2 A film over the eye. छदिर्-नेत्ररुजोः क्लीबं समूहे पटलं न ना, ॥
3 Multitude. 4 Retinue.

चलने । कालोऽवसरः, मर्यादायां यथा–उद्वेलः ॥ १९८ ॥ बहुलाः कृत्तिका नाम नक्षत्रं, बहुत्वं तारकाणां बहुत्वात्, शितौ कृष्णवर्णे, वहन्ति बहुलाः, बहु लाति च । वहति हव्यं बहुलाख्योऽग्निः । बहुलं प्रभूतं प्रायिकं च । बहलशब्दो प्यस्ति घनतार्थो बहुत्वार्थश्च । लीङ् श्लेषणे, विलासश्चेष्टालंकारोपलक्षणम्, इष्टजनस्यानुकृति-र्लीलेति भरतोक्तो भेदो नात्र विवक्षितः । क्रिया कायिकः परिस्पन्दः (लीला)। उपलाति–उप्यते वा–उपला शर्करा–अश्मरूपा मृत्, अश्मखण्डिका वा । अपि शब्दादिक्षुविकारः, यथा–सितोपला । उपलस्त्वश्मा ॥ १९९ ॥ कील्यते बध्यते-कीलालम् । मूल प्रतिष्ठायां, मूङ् बन्धने, आद्ये यथा–मूलप्रकृतिरविकृतिः (सांख्य-कारिका ३), मूलं धनम् । शिफा वृक्षजटा, भं नक्षत्रविशेषः (मूलम्) । अन्ति-केऽपि यथा–वृक्षमूलम् । जल धान्ये । आनायो रज्जुवितानः (जालम्) । गवाक्षे यथा–जालान्तरगते भानौ (मनुः ?) । क्षारको मुकुलवृन्दम् अपिशब्दाद् दम्भे, इन्द्रजाले च (जालम्) ॥ २०० ॥ शील समाधौ, स्वभावे यथा–हरणशीलः । शोभने वृत्ते (यथा)–शीलधनः साधुः । सस्ये (फलं) यथा–ओषध्यः फलपा-कान्ताः (मनुः ३–४६) । हेतुना कृते यथा–अधिश्रयणादेः पाकः फलम् । आयुधाग्रे लाभे फलके, आम्रादौ धान्यादिकणे च (फलम्) मुक्तादौ तूपचारात् । छदिर्गृहाच्छादनं, नेत्ररुजि यथा–तिमिरं काचतां याति पटलं तदुपेक्षया (चरक० ?) । समूहे यथा–पयोदपटली, पटं विस्तारं लाति पटलम् ॥ २०१ ॥

CC-0. Agamnigam Foundation Research Institute, Chandigarh

1 Bottom. 2 Essential character. 3 Surface. 4 Palm with expended finger. 5 Span. 6 A guard for an archer's arm. 1 Flesh. 2 A measure of four Karshas.

२०२ अधः-स्वरूपयोरस्त्री तलं, स्याच् चामिषे पलम्, ।

1 Submarine fire. 2 The infernal regions. 3 Hole. 1 Clothes, vesture. 2 Low, inferior.

और्वाऽनले ऽपि पातालं, चैलं वस्त्रे ऽधमे त्रिषु, ॥

1 A hole filled with stakes. 2 Conflagration of chaff.

२०३ कुकूलं शङ्कुभिः कीर्णे श्वभ्रे ना तु तुषाऽनले, ।

1 Absolute, certain. 2 Alone, sole. 3 Entire.

निर्णीते केवलमिति त्रि-लिङ्गं त्वेक-कृत्स्नयोः, ॥

1 Adequacy. 2 Safety. 3 Virtue. 4 Expert.

२०४ पर्याप्ति-क्षेम-पुण्येषु कुशलं शिक्षिते त्रिषु, ।

1 A shoot or sprout. 2 Coral. 3 The neck of a lute. 1 Stupid. 2 Bulky.

प्रवालमङ्कुरे ऽप्यस्त्री, त्रिषु स्थूलं जडे ऽपि च, ॥

1 Having projecting teeth. 2 High. 3 Terrible. 4 Soft. 1 Beautiful. 2 Expert. 3 Soft.

२०५ करालो दन्तुरे तुङ्गे, चारौ दक्षे च पेशलः, ।

1 Ignorant. 2 Young, a child. 3 Hair. 4 Tail of a horse. 5 Perfume. 1 Tremulous. 2 Thirsty.

मूर्खेऽर्भकेऽपि बालः स्याल्, लोलश् चल-सतृष्णयोः ॥

1 A house. 2 Family. 3 High personage. 4 Kubera. 5 Group.

'कुलं गृहे ऽपि तालाङ्के कुबेरे चैककुण्डलः' । १९ ।

अधो यथा–पादतलम् । स्वरूपे यथा–तनुतलोदरी । पृष्ठेऽपि यथा–भूतलम् । चपेटेऽपि यथा–तलप्रहारः । वितस्तौ तलः, यथा–षड्युग्मकस्तलस्तालो वितस्तिः शङ्कुराननम् । तलं च प्रकोष्ठे ज्याघातरक्षार्थं चर्म । चशब्दात्कर्षचतुष्टयेः (पलं), आमिषे मांसे, पल रक्षणे । अपिशब्दाद्रसातले (पातालं), पतति[पिबति]पातमालाति च । चिल वसने, अधमे चेलट् पचादि चेलखेटकटुकेति ($\frac{६।२।१२६}{३८६०}$), यथा–ब्राह्मणिचेली ॥ २०२ ॥ कोः कूलं कुत्सितं वा कूलं कुकूलम् । इतिशब्देन मान्तमव्ययमिति ध्वनितं, यथा–साधुश्चैत्रः केवलं मूर्खः, केवृ सेचने । एकोऽत्रासहायः (केवलः) । कृत्स्ने यथा–न केवलं भुवो भर्ता (?) ॥२०३॥ पर्याप्तिः सामर्थ्यं यथा–कुशलं कटकरणे । क्षेमे यथा–कुशलं ते भूयात् (?) । पुण्ये यथा–कुशलकृद्याजकः, कुशान्–लातीति । (कुशलः) शिक्षितत्वेन नैपुण्यं लक्ष्यते । प्रवते प्रवालं, वातेर्वलतेर्वा रूपम् । अङ्कुरोऽत्र किसलयः (प्रवालम्)। अपिशब्दाद् विद्रुमे वीणादण्डे च (प्रवालः) । स्थूल परिबृंहणे जडः स्थूलोऽतीक्ष्णप्रज्ञत्वात् । अपिशब्दात्पीवरे (स्थूलः) ॥ २०४ ॥ करोति कृष्णोति च करालः । चशब्दान्मृदौ (पेशलः), पीङ् पाने पिश अवयवे वा । अपिशब्दात्केशे हीवेरे बालधौ च (बालः), बाडृ अप्लावे बल संवरणे च । लुड विलोडने, सतृष्णो लौल्यात् ॥२०५॥

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

1 Woman-hood.
2 Disrespect.
स्त्रीभावावज्ञयोर् हेला, हेलिः सूर्ये, रणे हिलिः ॥१९॥
1 The sun. 1 A battle.

1 Plough. 2 King.
3 Wine.
हालः स्यान् नृपतौ मद्ये, शकलच्छदयोर् दलम् ।
1 A piece. 2 Cover. 3 Leaf.

1 Brush.
2 Cotton bed.
तूलिश् चित्रोपकरणशलाका-तूलशय्ययोः ॥ २० ॥

1 Fierce. 2 Battle.
तुमुलं व्याकुले शब्दे शष्कुली कर्णपाल्यपि' । २१ ।
1 Ear of corn. 2 An ear disease.

इति लान्ताः ।

1 A forest.
2 Fire in a forest.
२०६ दव-दावौ वनाऽरण्यवह्नी, जन्म-हरौ भवौ, ।
1 Birth. 2 SIVA. 3 Acquision. 4 World. 5 Existence. 6 Safety.

1 A counsellor.
2 A companion.
मन्त्री सहायः सचिवौ, पति-शाखि-नरा धवाः, ॥
1 A husband. 2 Lythrum fruticosum. 3 A man.

1 A mountain. 2 A sheep. 3 The sun.
२०७ अवयः शैल-मेषाऽर्का, आज्ञाऽऽह्वानाध्वरा हवाः, ।
1 Command. 2 Call. 3 Sacrifice.

1 A living being.
2 Existence.
3 Nature. 4 Intension. 5 Substance. 6 Gesture. 7 Soul. 8 Birth.
9 Thing. 10 Pleasure. 11 Venerable. 12 Learned.
भावः सत्ता-स्वभावाऽभिप्राय-चेष्टाऽऽत्म-जन्मसु, ॥

अथ वान्ताः । दूयन्तेऽनेनेति, दुञो विभाषा (?) इति घञ् , यत्कात्यः–दवो वनगतो वह्निर्दावश्च वनमुच्यते । हरो रुद्रः (भवः), भावेऽपादाने च–अप् । प्राप्तिसंसारसत्ताकल्याणेष्वपि (भवः) । मन्त्री बुद्धिसचिवः, सह–अयते सहायः कर्मसचिवः, सचति समवैति सचिवः । पतिर्भर्ता, शाखी वृक्षविशेषः, धवति धूयते वा धवः ॥ २०६ ॥ अवत्यविः । ह्वयनं हवः, भावेऽनुपसर्गस्येति (३।३।७५ / ३।३।९२) ह्वः संप्रसारणं, अप् च । हूयतेऽस्मिन्हवोऽध्वरः । षट्सु (अर्थेषु) कर्तरि भावे चार्थानुगुण्यात् (घञ्) । सत्तायां यथा–कालभावयोः सप्तमी–गोषु दुह्यमानासु गतः । स्वभावे यथा–भावानुरक्तवनितासुरतैः शपेयम् (घटखर्परः २२) । अभिप्राये यथा–भावानुवर्ती भृत्यः । तात्पर्येऽत एव (यथा)–अयमत्र भावार्थः । चेष्टा क्रिया यथा–धात्वर्थः केवलः शुद्धो भाव इत्यभिधीयते (ह. का.) । लीलापि चेष्टैव (यथा) भावालसा विलासिन्यः (?) । आत्मनि यथा–स्वं भावं भावयेद्योगी (?) । जन्मनि यथा–नासतो विद्यते भावः (भगवद्गीता २-१६) । वस्तुनि च यथा–भावाश्चित्तजया भवन्ति भवता भाव्यन्त एते यथा (?) । रतिवेगे च यथा–प्रमाणकालभावेभ्यो रतावस्थापनम् (?) । प्रवृत्तिनिमित्ते च, भवतोऽस्मादभिधानप्रत्ययाविति भावः । विभूतियोनित्वप्रसिद्धे स्थाय्यादौ च, यदाहुः–विभावः स्थायिसंज्ञश्च सानुभावोऽथ सात्त्विकः । व्यभिचारी च पञ्चैते भावभेदाः ॥ पूज्ये च यथा–मान्यो भावेति

CC-0. Agamnigam Foundation Chandigarh

1 Production. २०८ स्यादुत्पादे फले पुष्पे **प्रसवो** गर्भ-मोचने, ।
2 Fruit. 3 Blossom.
4 Bringing forth. 5 Offspring.

1 Distrust. अ-विश्वासे ऽपह्नवे ऽपि निकृतावपि **निह्नवः**,।। 3 Concealment.
2 Denial.

1 Elevation. २०९ उत्सेकाऽमर्षयोरिच्छा-प्रसरे मह **उत्सवः**, ।
2 Impatience.
3 Formation of wish. 4 Festival.

1 Dignity, authority. **अनुभावः** प्रभावे च सतां च मति-निश्चये, ।।
2 Firm opinion. 3 Certainty. 4 Hint.

1 Generative Cause. 2 Origin. २१० स्याज् जन्म-हेतुः **प्रभवः** स्थानं चाऽऽद्योपलब्धये, ।
3 Source. 4 Strength.

1 Son of a *Brahmana* by a *Sudra* woman. शूद्रायां विप्र-तनये शस्त्रे **पारशवो** मतः, ।।
2 Battle axe. 3 A son born in adultary.

1 The polar star. २११ **ध्रुवो** भ-भेदे क्लीबे तु निश्चिते शाश्वते त्रिषु, ।
2 Certain.
3 Perpetual. 4 A stake. 5 Motionless. 6 Siva. 7 Burden of song.

1 A kinsman. **स्वो** ज्ञातावात्मनि, **स्वं** त्रिष्वात्मीये, **स्वो** ऽस्त्रियां धने,।।
2 The soul.
3 One's own. 4 Wealth.

वक्तव्यः किञ्चिदूनस्तु मारिषः (भरतः १७, ७४) ॥ २०७ ॥ प्रसवनं प्रसूयते च प्रसवः । अपत्ये च (प्रसवः) ॥ २०८ ॥ उत्सेक उद्रेकः, इच्छायाः प्रसव उत्पत्तिः (उत्सवः) । मह इति सप्तमी, षु प्रसवैश्वर्ययोः षू प्रेरणे च । प्रभावे यथा–महानुभावः । चशब्दाद् भावसूचके, यदाहुः–अनुभावस्त्वभिनयः पश्चादर्थप्रकाशनात् (?) ॥ २०९ ॥ जन्महेतुः पित्रादिः, प्रभवत्यस्मात्प्रभवः । प्रथममुपलब्ध्यर्थो देशश्च प्रभवः, यथा–हिमवान् गङ्गायाः ॥ २१० ॥ भविशेषे यथा–औत्तानपादिः (ध्रुवः) । निश्चिते क्लीबं (यथा)–ध्रुवं मूर्खोऽयम् । शाश्वते यथा–जातस्य च ध्रुवो मृत्युर्ध्रुवं जन्म मृतस्य च (भगवद्गीता २-२०) । कीले निश्चले च (ध्रुवः) । क्वचित्तु ध्रुवा गाने च, यदाह–ध्रुवा हि नाट्यस्य प्रथमे प्राणाः (बा. रा. १।१९) । आत्मात्मीयज्ञातिधनवचनो हि स्वशब्दः, स्यति सीयते वा स्वः । ज्ञातौ यथा–उल्मुकानीव भान्ति स्वाः (?) । आत्मनि यथा–हृदि स्वमवलोकयन् (?) । आत्मीये यथा–स्वदारनिरतः । धने यथा–प्रभूताः स्वा न दीयन्ते (?) ॥२११॥ स्त्रियाः कटीवस्त्रस्य बन्धनं, यत्कात्यः–नीविराग्रन्थनं नार्या जघनस्थस्य वाससः । परिपणो राजपुत्रादिबन्धकः (नीविः) । अपिशब्दादायव्ययविशुद्धं धनं कारा च (नीविः) । शिनोति शिवा, फेरवा शृगाली । हरीतकी, आमलकी च (शिवा) । शिवस्तु रुद्रः, शिवं भद्रम् । द्वौ द्वौ द्वन्द्वं, द्वन्द्वं रहस्यमर्यादावचनव्युत्क्रमणयज्ञपात्रप्रयोगाभिव्यक्तिषु (८।१।१५ / २५००) इति

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

1 Knot round a woman's waist. २१२ स्त्री-कटी-वस्त्र-बन्धे ऽपि **नीवी** परिपणे ऽपि च, ।
2 Mercantile stock. 3 A stake at play. 4 Prison.

1 GAURI.
2 A female jackal. **शिवा** गौरी-फेरवयोर्, द्वन्द्वं कलह-युग्मयोः, ॥
3 The yellow merobalan. 4 Green herb. 5 Siva (m). 6 Welfare (n).
1 Dispute, quarrel. 2 A pair.

1 Substance.
2 Breath. २१३ द्रव्याऽसु-व्यवसायेऽपि **सत्त्वम**-स्त्री तु जन्तुषु, ।
3 A function. 4 Vigour. 5 An animal. 6 Life. 7 Quality. 8 Strength.
9 Nature. 10 Demon. 11 Benefit. 12 Existence. 13 Essence.

1 Neuter gender.
2 An eunuch. **क्लीवं** नपुंसकं षण्ढे वाच्य-लिङ्गम-विक्रमे ॥
3 Weak. 4 Idle. 5 Important.

इति वान्ताः ।

1 Man of the commercial tribe. २१४ द्वौ **विशौ** वैश्य-मनुजौ, द्वौ चराऽभिमरौ **स्पशौ**, ।
2 A man in general. 1 Spy. 2 War. 3 Conflict with a fierce animal. 4 A string.

1 A heap. 2 A sign of the zodiac. द्वौ **राशी** पुञ्जमेषाऽऽद्यौ, द्वौ **वंशौ** कुल-मस्करौ, ॥
1 Family, race. 2 A bambu 3 Multitude.

1 Solitude.
2 Display. २१५ रहः-प्रकाशौ **वीकाशौ**, **निर्वेशौ** भृति-भोगयोः, ।
1 Wages, hire. 2 Enjoyment.

1 YAMA.
2 Small. कृतान्ते पुंसि **कीनाशः** क्षुद्र-कर्षकयोस् त्रिषु, ॥
3 A cultivator. 4 A slayer of cattle. 5 An ape.

साधुः । मिथुने च (द्वन्द्वम्) ॥ २१२ ॥ द्रव्यं पारिभाषिकं विशेष्याख्यं, यदाहुः–वस्तूपलक्षणं यत्र सर्वनाम प्रयुज्यते । द्रव्यमित्युच्यते सोऽर्थो भेद्यत्वेन व्यवस्थितः (?) ॥ यथा–सत्त्वे निविशतेऽपति (का० ?) । असुषु यथा–उत्क्रान्तसत्त्वो मृगः (?) । व्यवसायोऽतिशयवद्वीर्य यथा–सत्त्ववाञ्छीलसंपन्नः । जन्तौ यथा–सत्त्वहितः । अपिशब्दाद् गुणे बले स्वभावे पिशाचे, आत्मलाभे सत्तायां सारे च (सत्त्वम्) यत्कौटिल्यः–सत्त्ववन्तो मृद्भागाः । क्लीबे अधार्ष्ट्ये, षण्ढे उभयव्यञ्जने नपुंसकलिङ्गम् ॥ २१३ ॥ क्वापि च–अत्यध्वगातिप्रणतौ प्राध्वौ प्राध्वं च बन्धने ($\frac{१।४।७८}{७७९}$) । अथ शान्ताः । (वैश्ये) यथा–विप्रक्षत्रियविट्शूद्राः (पृ० १६२) । मनुजे यथा–विशां पतिर्विष्टरभाजमारात् (रघु० ५-३) । विड् गूथे, पान्त इत्येके । अभिम्रियतेऽभिमरः प्राणनिरपेक्षस्तीक्ष्णाख्यः, यो द्रव्यहेतोर्व्यांडं हस्तिनं वा योधयति । रणेऽभिमर इत्येके, स्पश बाधनस्पर्शनयोः । बन्धे तु घञ् यथा–सेयमुभयतःस्पाशा रज्जुः । राति राशयति वा राशिः । पुञ्जे यथा– धान्यराशिः । मेषवृषाद्या द्वादश राशयः । वनुते वंशः, मस्करो वेणुः । (वंशः) समूहस्तूपचारात् ॥ २१४ ॥ विकाशनं वीकाशः, उपसर्गस्य घञीति ($\frac{६।३।१२२}{१०४४}$) दीर्घः, विर्विगताथ विशेषार्थे च ।

CC-0. Agamnigam Foundation. Digitized by eGangotri Education Chandigarh

1 A place or spot. 2 A butt. 3 A cause. 4 Fame.
२१६ पदे लक्ष्ये निमित्ते ऽपदेशः स्यात्, कुशमप्सु च, ।
1 Water. 2 Darbha grass. 3 Son of Rama. 4 Holy place. 5 Yoke. 6 Share of a plough.

1 Age, as youth, etc. 2 Wick of a lamp. 3 Border of a cloth.
दशा ऽवस्था ऽनेकविधा ऽप्याशा तृष्णा ऽपि चाऽयता,॥
1 Hope, desire. 2 Breath. 3 Region, quarter.

1 A woman. 2 A female elephant. 3 A barren cow. 4 A daughter. 5 Subjection. 6 Wish. 7 Restraint. 8 Power. 9 Subject.
२१७ वशा स्त्री करिणी च स्यात्, दृग् ज्ञाने ज्ञातरि त्रिषु, ।
1 Knowledge. 2 Learned man. 3 Sight. 4 An eye.

1 Violent, 2 Hard. 3 Intangible. 4 Cruel. 5 Miserly.
स्यात् कर्कशः साहसिकः कठोराऽमसृणावपि, ॥

1 Notorious. 2 Light. 3 Display. 4 Clear.
२१८ प्रकाशो ऽति-प्रसिद्धे ऽपि, शिशावज्ञे च बालिशः, ।
1 Young. 2 Ignorant.

1 Destruction. 2 Disappearance.
'नाशः क्षये तिरोधाने, जीवितेशः प्रिये यमे ॥ २१ ॥
1 Lover. 2 Yama.

1 Wicked. 2 Sword.
नृशंसखड्गौ निस्त्रिंशावंशुः सूर्येऽशवः कराः ।
1 The sun. 2 The rays of the sun.

1 Fast. 2 Rice.
आश्वाख्या शालिशीघ्रार्थे पाशो बन्धनशस्त्रयोः' ॥२२॥
1 Net. 2 Fetters. 3 Weapon.

इति शान्ताः ।

1 A god. 2 A fish.
सुर-मत्स्यावनिमिषौ, पुरुषावात्म-मानवौ, ॥
1 The soul. 2 A man.

निर्विश्यते भुज्यते निर्वेशः । भृतौ यथा–प्रतिग्रहजप[य]विक्रय[म]निर्वेशाधिगतैरर्थैः (?) । भोगे यथा–स्व्यन्नपानं निर्वेशः (?) । कुत्सितं नाशयतीति कीनाशः । कीशकीकटकीचकाद्यर्थः की निपात इति श्रीभोजः । मर्कटेऽपि (कीनाशः) ॥२१५॥ अपदिश्यतेऽपदेशः, पदं स्थानं यथा–त्यक्तापदेशो यतिः (?) । लक्ष्ये यथा–सापदेशः । निमित्ते यथा–केनाप्यपदेशेनागतः (?) । प्रसिद्धौ च यथा–लब्धव्यपदेशः । कौ शेते कुश्यति च कुशम् । चशब्दाद्दर्भे (कुशः)। फाले तु कुशी, जानपदकुण्डेति (४।१।४२/६००) अयोविकारे ङीप् । दशति दश्यते च दशा । अपिशब्दाद्वर्ति; पटान्ते तु दशाः पुंबहुत्वे । आशासनमाशा महान्गर्धः । अपिशब्दाद्दिक् (आशा) ॥ २१६ ॥ चशब्दाद्वन्ध्यगवी सुता वश्या च (वशाः) । वशः स्वायत्तः, इच्छा यन्त्रणा प्रभुत्वं च । भावे कर्तरि करणे च क्विप् (दृश्), दर्शनेऽक्षि च । कृणोति कर्कशः, अमसृणः परुषः ॥ २१७ ॥ प्रकाशते प्रकाशनं च प्रकाशः । अपिशब्दात्प्रकटे– उद्द्योते च (प्रकाशः) । वालते वालिशः, वाडृ आप्लावे । लक्ष्यं च– अग्रतो बाहुपाशेन

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

1 A crow. 2 Any bird which preys on fish. 3 A beggar. २१९ काक-मत्स्यात्-खगौ ध्वाङ्क्षौ, कक्षौ च तृण-वीरुधौ, ।
1 Grass. 2 A climbing plant. 3 A side. 4 Wall. 5 Sin. 6 Objection in Argument.

1 A halter or rein. 2 A ray of light. अभीषुः प्रग्रहे रश्मौ, प्रैषः प्रेषण-मर्दने, ॥
1 Despatch, sending. 2 Paining.

1 Partisan. 2 Side. 3 A braid of hair. २२० पक्षः सहाये ऽप्युष्णीषः शिरोवेष्ट-किरीटयोः, ।
4 Fortnight. 5 Argument. 6 Army. 7 Wing. 8 Thesis. 9 Inference. 10 Option.
1 A turban. 2 A diadem.

1 Lustful. 2 A rat. शुक्रले मूषिके श्रेष्ठे सुकृते वृषभे वृषः, ॥
3 Preeminent. 4 Virtue. 5 A bull. 6 Sign of zodiac. 7 Karṇa. 8 Shower.

1 A bud. 2 A sheath. २२१ कोषो ऽस्त्री कुड्मले खड्ग-पिधाने ऽर्थौघ-दिव्ययोः ।
3 Treasure. 4 Oath. 5 A sacrificial pot. 6 Eye ball. 7 Testicle. 8 Dictionary.

1 Gaming with dice. 2 A die. 3 A board for playing. 4 Attraction. 5 Drawing of a bow. द्यूते ऽक्षे शारि-फलके ऽप्याकर्षो, ऽथाऽक्षमिन्द्रिये ॥
1 Organ of sense. 2 A die.

3 A measure of 16 karshas. 4 Wheel. २२२ ना द्यूताऽङ्गे कर्ष-चक्रे व्यवहारे कलि-द्रुमे, ।
5 Law suit. 6 The bellerick myrobalan. 7 The base of the Ear.

1 Agriculture. 2 Fire with cowdung. कर्षूर् वार्त्ता करीषाऽग्निः, कर्षूः कुल्याऽभिधायिनी, ॥
3 A channel.

केशपाशेन पृष्ठतः । पार्श्वयोः कर्णपाशेन सवतो बन्धनं प्रिया [ये] (?) ॥ अथ पान्ताः । न निमिषत्यनिमिशः । पुरि पुरि शयनात्पूरणात्पालनाच्च पुरुषः ॥ २१८ ॥ मत्स्यानत्ति मत्स्याद् बकः, ध्वाक्षि काङ्क्षायाम् । कपति कक्षः; वीरुत् लता । चशब्दात्पापे पार्श्वे भित्तौ च (कक्षः) पापे यथा–कक्षाय क्रमते कक्षायते, सत्रकक्षकष्टकृच्छ्रगहनेभ्यः(कण्वचिकीर्षायामिति) (वा० $\frac{१७७१}{२६७०}$), पापे क्रमणे क्यङ् । पार्श्वेऽङ्गविशेषे यथा–त्व[म]दन्ताङ्कितपालिकक्षरुधिरक्लिन्नाग्रपुङ्खं शरम् (?) । भित्तौ यथा–सप्तकक्षान्तरा राजधानी (?) । ईष उन्छे, प्रग्रहो वल्गादिः, रश्मिर्मरीचिः । (प्रैषः) प्रादूहोढोढ्येषैष्येष्विति (वा० $\frac{३६०५}{७३}$) वृद्धिः ॥ २१९ ॥ पक्ष परिग्रहे । अपिशब्दात्–केशे पक्षः समूहार्थः, पक्षः साध्यविरोधयोः । बले काले पतत्रे च रुचौ पार्श्वे विकल्पिते ॥ उष्यते उष्णीषः । शुक्रले यथा–वृष्याः प्रयोगाः (?) । मूषिके यथा–वृषदंशः । श्रेष्ठे यथा–पुरुषवृषः । सुकृते यथा–वृषो हि भगवान्धर्मः (नारदः ?), वर्षति वर्षयते च वृषः ॥ २२० ॥ कुष्यति कुष्णाति च कोषः, कुड्मले कलिकामध्ये, अर्थौघो भाण्डागारं, दिव्यं शपथः । योन्यां पात्रविशेषेऽपि यथा–मूत्रकोषः, नेत्रकोषः। लोके ताल्व्यः शान्तोऽयम् । अपिशब्दादाकर्षणे, आकर्षणमाकृष्यते–आकर्षत्यस्मिन्वाकर्षः । अक्ष्णोत्यक्षं चक्षुरादि ॥ २२१ ॥ द्यूताङ्गे यथा–स्त्रियोऽक्षा मृगया पानम् (?)। कर्षे यथा–अक्षः षोडश माषकाः (?)।

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh

1 Virility. 2 Manly act. 3 Semen.
२२३ पुम्-भावे तत्-क्रियायां च पौरुषं, विषमप्सु च, ।
1 Water. 2 Poison.

1 A bribe. 2 Flesh. 3 Food.
उपादाने ऽप्यामिषं स्यादपराधे ऽपि किल्बिषम्, ॥
1 An offence. 2 Sin.

1 Rain. 2 A country. 3 A year. 4 Shower. 5 Eunuch.
२२४ स्याद् वृष्टौ लोक-धात्वंशे वत्सरे वर्षमस्त्रियाम्, ।

1 Dancing. 2 View. 3 Intellect.
प्रेक्षा नृत्तेक्षणं प्रज्ञा, भिक्षा सेवा ऽर्थना भृतिः, ॥
1 Service. 2 Begging. 3 Hire, wages. 4 Alms.

1 Splendour. 2 Ray of light.
२२५ त्विट् शोभा ऽपि, त्रिषु परे, न्यक्षं कार्त्स्न्य-निकृष्टयोः,॥
1 Entire. 2 Inferior.

1 Perceptible. 2 Superintendent.
प्रत्यक्षे ऽधिकृते ऽध्यक्षो, रूक्षस् त्वप्रेम्ण्यचिक्कणे. ॥
1 Unfriendly. 2 Rough.

1 A lac. 3 Target;
'व्याजसंख्याशरव्येषु लक्षं, घोघौ रवव्रजौ ।
1 A sound. 2 A multitude.

1 An ape. 2 Head. 3 Wall. 4 Horn.
कपिशीर्षे भित्तिशृङ्गे ऽनुतर्षश् चषकः सुरा ॥ २३ ॥
1 Vessel. 2 Wine.

1 Disease. 2 Fault; 3 Night.
दोषो वातादिके, दोषा रात्रौ, दक्षो ऽपि कुक्कुटे ।
1 Prudent. 2 A Cock.

1 Tip of a trunk. 2 Sipping.
शुण्डाग्रभागे गण्डूषो द्वयोश् च मुखपूरणे ' ॥ २४ ॥

इति षान्ताः ।

चक्रं रथकाष्ठोपलक्षणम् (अक्षः)। व्यवहार आयव्ययादिन्यायः, यथा—अक्षपटलम्। कलिद्रुमो बिभीतकः (अक्षः)। श्रोतोमूलेऽपि (अक्षः)। कर्षणं कर्षति कृष्यते वा कर्षूः, वार्त्ता कृषिः, करीषं शुष्कगोमयम्। कुल्या यथा—चतस्रः कर्षूः पितृभ्यः कुर्यात् (?) ॥ २२२ ॥ पुरुषस्य भावः कर्म चेति, भावे, प्राणभृज्जातिवयोवचनेति (५।१।१२९ / १७९४) अञ्। विष्लृ व्याप्तौ। चशब्दाद्गरले (विषम्)। उपादानमुत्कोचः (आमिषम्)। अपिशब्दान्मांसादौ, आमिष्यत आमिषम्। अपिशब्दात्पापे किल्बिषं, किल क्षेपे ॥ २२३ ॥ लोकं धत्ते लोकधातुर्जम्बुद्वीपस्तस्यांशो भूखण्डो नवधैलावृत्तादिः (?), वर्षणं वर्षं, अज्विधौ भयादीनामुपसंख्यानम् (वा० २।१।९७ / ३।२।६१)। अन्यत्र वर्षयत्याप्याययतीति वर्षः, दुर्गस्तु—वर्षाख्या लोकधातुश्च षण्ढवत्सरवृष्टयः। षण्ढो वर्षवरः। नृत्तादिप्रेक्षणकं, प्रेक्ष्यत इति प्रेक्षा। प्रेक्ष्यतेऽनयेति प्रेक्षा धीः, प्रेक्षणे च। अतो नृत्तेक्षणप्रज्ञाश्चेति युक्तः पाठः ॥ २२४ ॥ अधिगतोऽक्षैरध्यक्षो घटादिः। अक्षेष्वायस्थानेष्वधिकृतोध्यक्षः, अधिकान्यक्षीण्यस्य, अध्यक्ष्णोति वाध्यक्षो नियुक्तः।

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

1 The sun. 2 A goose. २२६ रवि-श्वेतच्छदौ हंसौ सूर्य-वह्नी विभावसू, । 1 The sun. 2 Fire.
3 Vishnu. 4 Supreme being. 5 Soul. 6 Life. 7 Wind. 8 A sage.

1 A calf. 2 A year. 3 Breast. वत्सौ तर्णक-वर्षौ द्वौ सारङ्गाश् च दिवौकसः, ॥
1 A bird ; Cuculus. 2 God. 3 Antilope. 4 Flamingo. 5 Elephant. 6 A bee.

1 Taste or sentiment in dramas. २२७ शृङ्गाराऽऽदौ विषे वीर्ये गुणे रागे द्रवे रसः, ।
2 Poison. 3 Semen virile. 4 Quality. 5 Love. 6 Water.
7 Quick silver. 8 The earth. 9 Tongue.

1 An ear-ring. 2 A crest. पुंस्युत्तंसावतंसौ द्वौ कर्णपूरे ऽपि शेखरे, ॥

1 A class of deities. 2 Fire. २२८ देव-भेदे ऽनले रश्मौ वसू, रत्ने धने वसु, ।
3 Lustre. 4 Gem. 5 Wealth.

1 VISHNU. 2 Brahma. 3 A wise man. 4 Killing, murder. विष्णौ च वेधाः, स्त्री त्वाशीर् हिताऽऽशंसाऽहि-दंष्ट्रयोः, ॥
1 Benediction. 2 Fang of a serpent. 3 Killing.

1 Request. 2 Thirst. २२९ लालसे प्रार्थनौत्सुक्ये, हिंसा चौर्याऽऽदि-कर्म च, ।
1 Slaughter. 2 Injury, mischief, as robbery, etc.

1 A mare. 2 Mother. प्रसूरश्वा ऽपि, भू-द्यावौ रोदस्यौ रोदसी च ते; ॥
2 Earth and sky.

रूक्ष पारुष्ये, अचिक्कणे निःस्नेहे ॥ २२५ ॥ इतः सान्ताः । हन्ति गच्छतीति हंसः, हसतीति वा, आद्यदेहहानादुत्तरदेहसंपरिग्रहाच्च हंस आत्मा प्राणो यतिविशेषश्च । विभा त्विड् वसु यस्य विभावसुः । वसति वसन्त्यस्मिन्वत्सः । वत्सं तु वक्षः । सरन्ति सारङ्गाः, सहारङ्गेण गत्या वर्णेन च वर्तन्ते वा । चशब्दान्मृगा श्वातका [हस्तिनो] भ्रमराश्च ॥ २२६ ॥ आदिशब्दात्करुणादौ (रसः)। विषे यथा–तीक्ष्ण-रसान् भिक्षुकांश्च रिपौ युञ्जीत (?) । वीर्ये यथा–रसस्यातिरसः सर्पिः (?) । गुणे यथा–रसाः स्वाद्वम्ललवणतिक्तोपणकषायकाः (?)। रागे यथा–रसिकः पुरुषादिः । द्रवे यथा–हरीतकीरसः । आद्यदेहधातौ च यथा–रसासृङ्मांसमेदोऽस्थिमज्जाशुक्राणि धातवः (?) । पारदे च यथा–रसवादी । रसा तु भूः । तंसिः सौत्रो भूषणार्थः, वतंसोऽपि ॥ २२७ ॥ देवभेदे यथा–अष्टौ वसवः । अनलोऽग्निः, रश्मिस्तेजः, वसति सर्वत्रोच्यते वा । तेजश्च वसु, आहुश्च–वसु रत्नं वसु धनं वसु तेजो निगद्यते । चशब्दाद्विद्वद्धात्रोः, विधति विधत्ते वा वेधाः । वेधश्च हिंसामाहुः । आशासनमाशीः, आशं (श) सति हिनस्ति च, यदाहुः–आशीस्तालुगता दंष्ट्रा तया विद्धो न जीवति (?) । आशीविषः, पृषोदरादित्वात् ($\frac{६।३।१०९}{१०३४}$) सलोपः ॥ २२८ ॥ लल ईप्सायामित्यस्माल्लसेर्यङन्ताद्वा लालसा । चशब्दाद्वधः (हिंसा)। वडवाख्या प्रसूः । अपिशब्दान्माता (प्रसूः) । गोतोणिदित्यत्रौतोणिदिति पाठाद् द्योशब्दस्य

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh

1 Flame. 2 Light.

२३० ज्वाला-भासौ न पुंस्यर्चिर्, ज्योतिर् भ-द्योत-दृष्टिषु, ।

1 A star. 2 Light. 3 Pupil of the eye. 4 The sun. 5 Fire.

1 Sin. 2 An offence.

पापाऽपराधयोरागः, खग-बाल्याऽऽदिनोर् वयः, ॥

1 A bird. 2 Age.

1 Splendour. 2 Ordure.

२३१ तेजः-पुरीषयोर् वर्चो, महश् चोत्सव-तेजसोः, ।

1 A festival. 2 Light.

1 Quality of passion. 2 Woman's menses. 3 Dust. 4 Pollen.

रजो गुणे च स्त्री-पुष्पे, राहौ ध्वान्ते गुणे तमः, ॥

1 Moon's ascending node. 2 Darkness. 3 Third quality. 4 Grief.

1 Poetical metre. 2 Desire. 3 Vedas.

२३२ छन्दः पद्ये ऽभिलाषे च, तपः कृच्छ्राऽऽदि-कर्म च, ।

1 Austerity, penance. 2 Vow. 3 Month of Magha.

1 Strength. 2 Month of *Agraháyana*.

सहो बलं, सहा मार्गो, नभः खं, श्रावणो नभाः, ॥

1 The sky. 2 The month of Śravana.

1 A house. 2 Shelter.

२३३ ओकःसद्माऽऽश्रयश् चौकाः, पयः क्षीरं पयोऽम्बु च, ।

1 Milk. 2 Water.

1 Splendour. 2 Strength.

ओजो दीप्तौ बले, स्रोत इन्द्रिये निम्नगा-रये, ॥

1 Organ of sense. 2 Stream of a river.

सर्वनामस्थाने वृद्धिः । आद्य ईदन्तो भुवि दिवि च वर्तते, अन्योऽसन्तः क्लीबे द्वयमाह, यथा–रोदोरन्ध्रमजिहदत् [न] (?)। रुणद्धि सर्वं रोदः । रोदसीत्यव्ययमप्यस्ति, यथा–द्यावापृथिव्यौ रोदस्यौ रोदसी रोदसीति च ॥ २२९ ॥ इदमियं वा, अर्च्यतेऽर्चिः । ज्योतते ज्योतिः, भं तारका, द्योतः प्रकाशः, दृष्टिः कनीनिकामध्यम्, यन्मनुः–तारा नेत्रत्रि [वि] भागः स्याज्ज्योतिस्तत्प्रमांशकम् (?) । आगच्छत्यागः । वयते याति [वाति वा] वयः, असुन्, नुमा क्लीबे ॥ २३० ॥ रूपेऽपि (वर्चः)। उत्सवे (महः), अकारान्तोऽपि, मह पूजायाम् । गुणे सत्त्वात्परे यथा–उपष्टम्भकं चलं च रजः (सां. का. १३)। चशब्दाद्धूलौ (रजः) । स्त्रीपुष्पे यथा–रजस्वला । गुणे यथा–गुरुवरणकमेव तमः, ताम्यन्त्यनेन तमः ॥ २३१ ॥ छन्दति छन्दः, पद्ये गायत्र्यादौ । अभिलाषे–अकारान्तोऽपि यथा–छन्दानुवर्ती । चकाराद्वेदे यथा–युक्तश्छान्दांस्यधीयीत (?) । आदिशब्दाच्चान्द्रायणादि (तपः) । चशब्दात्तपा माघः, अदन्तोऽपि ग्रीष्मार्थः, यथा–तपेन वर्षा शरदा हिमागमः (शिशु० १-६६)। सहते सहः । मार्गो मार्गशीर्षः, द्विः पाठो लिङ्गभेदार्थः । एवं नभसोः–ओकसोः, पयसोस्त्वेकं लिङ्गं क्षीराम्भसोः क्लीबत्वात् । न बभस्ति नभाः, एकं शून्यत्वादन्यो मेघच्छन्नत्वात्, नभ हिंसायां वा ॥ २३२ ॥ उच समवाये, ओक उचः के (७।३।६४ / २८८०) इति–अदन्तोऽपि । पीङ्

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

1 Dignity. 2 Splendour. 3 Strength. २३४ तेजः प्रभावे दीप्तौ च बले शुक्रे ऽप्यतस् त्रिषु, ।
4 Semen virile.

1 Intelligent.
2 Learned.
3 Having a true knowledge of the Soul. विद्वान् विदंश्च, बीभत्सो हिंस्रो ऽप्यतिशये त्वमी, ॥
1 Mischievous, cruel. 2 Envious. 3 Arjuna.

1 Very old.
2 Very excellent. २३५ वृद्ध-प्रशस्ययोर् ज्यायान्, कनीयांस्तु युवाऽल्पयोः, ।
1 Very young. 2 Very small.

1 Very great.
2 Very excellent. वरीयांस्तूरु-वरयोः, साधीयान् साधु-बाढयोः ॥
1 Very right. 2 Very firm.

इति सान्ताः ।

1 A leaf.
2 Retinue.
3 A peacock's tail. २३६ दले ऽपि बर्हं, निर्बन्धोपरागाऽर्काऽऽदयो ग्रहाः, ।
1 Seizure. 2 An eclipse. 3 A planet.

1 A door.
2 A chaplet.
3 Wood jutting out of a wall. द्वार्यापीडे क्वाथ-रसे निर्यूहो नाग-दन्तके, ॥
3 A wooden peg.

पाने, पय गतौ च (पयः)। उब्जेरसुनि साध्यं (ओजः)। विषम-संख्यावाची त्वोजोऽदन्तः, ओजेनौजः समः पादो युग्युजाव [र्ध] समस्य तु (भरत०)। स्रवति स्रोतः, इन्द्रियमिन्द्रियद्वारम्। रयः प्रवाहो लक्षणया (स्रोतः) ॥ २३३ ॥ तिज निशाने (तेजः)। अपिशब्दादसहनत्वे यद्भरतः–अधिक्षेपाव-मानादेः प्रयुक्तस्य परेण यत्। प्राणात्ययेऽप्यसहनं तत्तेजः समुदाहृतम् (?) ॥ सान्ता यावद्वाच्यलिङ्गाः । विदेःशतुर्वसुः ($\frac{७।१।३६}{३१०५}$)। चशब्दात्पण्डितात्मज्ञौ (विद्वान्)। मान्बंधेति ($\frac{३।१।६}{२३९४}$) सन्नभ्यासदीर्घश्च, ततो अ प्रत्ययात् ($\frac{३।३।१०२}{३२७९}$), बीभत्साऽस्यास्तीति बीभत्सः। चशब्दाज्जुगुप्सितोऽर्जुनश्च। वक्ष्यमाणाश्चत्वार ईय-सुन्नन्ताः ॥ २३४ ॥ प्रशस्यस्य श्रः ($\frac{५।३।६०}{२००९}$), वृद्धस्य च ($\frac{५।३।६२}{२०१३}$), ज्यश्च ($\frac{६।१।४२}{३३४०}$) इति ज्यादेशः। युवाल्पयोः कन्नन्यतरस्याम् ($\frac{५।३।६४}{२०१९}$)। अतिशये-नोरुर्वरश्च वरीयान्, प्रियस्थिरस्फिरोर्विति ($\frac{६।४।१९७}{२०१६}$) उरोर्वरादेशः। अतिशयेन साधु बाढं च साधीयः, अन्तिकबाढयोर्नेदसाधौ ($\frac{५।३।६३}{२०१४}$) ॥ २३५ ॥ इतो हान्ताः। दलं पर्णं, परिवारश्च (बर्हम्)। अपिशब्दान्मयूरपिच्छे (बर्हं), बृह वृद्धौ, वर्ह प्राधान्ये च। उपरागो राहुग्रहणं, भावे ग्रहवृदृनिश्चिगमश्चेति ($\frac{३।३।५८}{३२३४}$) अप्, कर्तरि विभाषा ग्रहः ($\frac{३।१।१४३}{२९०५}$) इत्यच्। भूतोऽपि (ग्रहः)। आपीडो बहि-र्निःसृतं दारु, निर्यान्त्यनेन निर्यौति निर्याति च निर्यूहः, यूहिर्लौकिको धातुर्वा।

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh

1 The string suspending a balance. 2 A rein. 3 A prisoner. 4 Restraint. 5 An arm.

२३७ तुला-सूत्रे ऽश्वाऽऽदि-रश्मौ प्रग्राहः प्रग्रहो ऽपि च, ।

1 A wife. 2 Family; dependent. 3 Acceptance. 4 Origin, root. 5 Oath. 6 Quarrel.

पत्नी-परिजनाऽऽदान-मूल-शापाः परिग्रहाः, ॥

1 A wife. 2 A house.

२३८ दारेषु च गृहाः, श्रोण्यामप्यारोहो वर-स्त्रियाः ।

1 A woman's waist. 2 Ascents of a climbing plant or a hill. 3 A rider. 4 Length. 5 Height.

1 A multitude. 2 An array of troops. 3 Fabrication. 4 Reasoning.

व्यूहो वृन्देऽप्यहिर् वृत्रे ऽप्यग्नीन्द्वर्कास् तमोपहाः, ॥

1 The demon *Vritra*. 2 Serpent. 3 A rampart. 1 Fire. 2 The moon. 3 The sun.

1 Retinue. 2 Insignia of Royalty. 3 A thing. 4 Wealth.

२३९ परिच्छदे नृपार्हेऽर्थे परिबर्हो,

इति हान्ताः ।

ऽव्ययाः-परे ।

Indeclinables.

1 A little. 2 Until. 3 Boundary. 4 As a preposition.

आङीषदर्थे ऽभिव्याप्तौ सीमाऽर्थे धातु-योग-जे, ॥

नागदन्तको भित्तिस्थः कीलकः (निर्यूहः) ॥ २३६ ॥ प्रगृह्यतेऽनेन, प्रे वणिजाम् (३।३।५२/३२२७), रश्मौ च (३।३।५३/३२२८) इति वा घञ्। परिगृह्यते परिग्रहणं च परिग्रहः, ग्रहवृदृनिश्चिगमश्च (३।३।५८/३२३४) इत्यप्, परिगृह्णातीति-अच् । शापः शपथः (परिग्रहः) ॥ २३७ ॥ दारेषु तात्स्थ्यात् । चशब्दाद्वेश्मनि, गृह्णन्ति गृहाः, नित्यं बहुत्वे, गेहे कः (३।१।१४४/२९०६) । श्रोण्यां यथा-वरारोहा । अपिशब्दाच्छैलाद्यारोहणेऽश्ववारे च (आरोहः), अधिकरणे भावे च घञ्, कर्तर्यच् । व्यूह्यते रच्यते व्यूहः, अपिशब्दात्सैन्यविन्यासे, यथा-चक्रव्यूहः । अंहत्यहिः, अपिशब्दात्सर्पे वप्रे च । अपहन्तेर्डः अपे क्लेशतमसोः (३।२।५०/२९६७) ॥ २३८ ॥ नृपार्हे छत्रचामरादौ, अर्थे वस्तुनि धने वा (परिबर्हः) । इति नानार्थवर्गः । अत ऊर्ध्वमव्ययवर्गो वक्ष्यते, ततः प्रस्तावान्नानार्थाव्ययवर्गस्तावत् । ईषत्पिङ्गलः आपिङ्गलः । अभिव्याप्तिरभिविधिः-आकुमारं यशः पाणिनेः (?) । सीमार्थो मर्यादा, यथा-आ-उदकान्ताप्रियं प्रोषितमनुव्रजेत् (शा. १-१४-१) । धातुयोगजे धात्वर्थेन क्रियया योगजे संबन्धोत्थे द्योतकत्वे, यथा-आरोहति । उपसर्गोऽपि खुरनखन्यायेनात्रोक्तः ॥२३९॥

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

5 Oh (remembering). 6 As a supplement. २४० आ प्रगृह्यःस्मृतौ वाक्येऽप्यास् तु स्यात् कोप-पीडयोः, ।
1 Ah! (angrily). 2 Alas (sorrow fully). 3 As a collection.

1 Sinful. 2 Bad. 3 A little. पाप-कुत्सेषदर्थे कु, धिङ् निर्भर्त्सन-निन्दयोः ॥
1 Fy ? (menacingly). 2 Fy! (reproachfully).

1 Moreover. 2 And. 3 Mutually. 4 Also. २४१ चाऽन्वाचय-समाहारेतरेतर-समुच्चये, ।
5 Conversely. 6 Exclusively. 7 Forthwith. 8 Expletive.

1 Well (a benediction.) 2 Safe. स्वस्त्याशीः क्षेम-पुण्याऽऽदौ, प्रकर्षे लङ्घने ऽप्यति, ॥
1 Very. 2 Surpassing.

1 What ? (interrogatively). 2 (Doubtingly). २४२ स्वित् प्रश्ने च वितर्के च, तु स्याद् भेदेऽवधारणे, ।
1 But (indicating difference). 2 Indeed. 3 And. 4 Again. 5 Expletive.

1 Together. 2 Once. 3 Always. सकृत् सहैकवारे चाप्याराद् दूर-समीपयोः, ॥ 1 Far. 2 Near.

स्मृतिः सूचनं, यथा–आ एवं किलतत् (सि. कौ. १०३)। वाक्यपूरणे पूर्वोक्तस्यान्यथात्वे द्योत्ये, यथा–आ एवं नु मन्यसे, (सि. कौ. १०३) पूर्वं नैवममंस्थाः–अद्य तु मन्यस इत्यर्थः। निपात एकाजनाङ् (१।१।१४) इति प्रगृह्यत्वात्, प्लुतप्रगृह्या अचीति (६।१।१२५) प्रकृतिभावः यदाहुः–ईषदर्थे क्रियायोगे मर्यादाभिविधौ च यः। एवमातं ङितं विद्याद्वाक्यस्मरणयोरङित् (सि. कौ. १०३)। समुच्चयेऽपिशब्दात्–देवेभ्यश्च पितृभ्य आ (ऋ. वे. १०-१६-११)। कोपे–आः रक्षस्तिष्ठति। पीडायां–विद्यामातरमाः प्रदर्श्य नृपशून् भिक्षामहे निस्त्रपाः (उद्भट० ?)। पापे यथा–पापो ब्रह्मा कुब्रह्मः। कुत्सायां–कुपुरुषः। ईषन्मधुरं कामधुरम्। निर्भर्त्सने–धिक् तार्किकान्। निन्दायां–धिक् कृतोऽयम् ॥ २४० ॥ अन्वाचयो मुख्यसिद्धावप्रधाननिष्पत्तिः, यथा–भिक्षामट गां चानय (सि० कौ० ९०९)। समाहारे संहतिप्राधान्ये, यथा–पाणी च पादौ च पाणिपादम् (सि० कौ० ९०६)। इतरेतरयोगे संहन्यमानप्राधान्ये, यथा–[प्लक्षश्च न्यग्रोधश्च] प्लक्षन्यग्रोधौ (सि. कौ. ९१६)। समुच्चय एकत्रानेकप्रचयः, यथा–गार्ग्यो वात्स्यश्चागतौ, पचति च पठति च चैत्रः। विनियोगतुल्ययोगिताहेतुषु च। विनियोगे–अहं च त्वं च वृत्रहन् संयुज्याव सनिभ्य आ (ऋ. वे. ८-६२-११)। तुल्ययोगितायां–ध्यातश्चोपस्थितश्च। हेतौ–ग्रामश्च गन्तव्यः शीतं च, शीतात्कथं गम्यत इत्यर्थः। स्वस्तीत्यविनाशनाम[य]–स्वस्ति तेऽस्तु लतया सह वृक्ष (काव्यालं० ४-१-१४)। क्षेमे–स्वस्ति प्रजाभ्यः (सि. कौ. ५८३)। पुण्ये–काममिदं ते स्वस्ति। आदिशब्दान्मङ्गलादौ–स्वस्ति श्रीकुसुमपुरात् (मुद्राराक्षस० ५-१)। प्रकर्षे–अतिवृद्धः। लङ्घनमतिक्रमणं यथा–सर्वान् गुणानेष गुणोऽतिभाति (?), अतिक्रम्य भातीत्यर्थः ॥ २४१ ॥ प्रश्ने–कः स्विदेकाकी चरति (स. कं. पृ. ३५)। वितर्को नानापक्षावमर्शः–अधः स्विदासीदुपरि स्विदासीत् (वाजसनेयीसंहिता

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

1 Westward.
2 Behind.

२४३ प्रतीच्यां चरमे पश्चादुताऽप्यर्थ-विकल्पयोः, ।

1 Also. 2 What ? 3 Either or. 4 Doubt. 5 Expletive.

1 Again, often.
2 Always.
3 Together. 4 Perpetually.

पुनः-सहाऽर्थयोः शश्वत्, साक्षात् प्रत्यक्ष-तुल्ययोः, ॥

1 In presence, before. 2 As, like.

1 Also ! (Sorrow)
2 (Compassion).
3 Joy. 4 Surprise. 5 Vocative.

२४४ खेदाऽनुकम्पा-संतोष-विस्मयाऽऽमन्त्रणे बत, ।

1 Oh (joy).
2 (Pity).
3 (Inceptive). 4 Alas ! 5 Gift. 6 Certainly.

हन्त हर्षेऽऽनुकम्पायां वाक्याऽऽरम्भ-विषादयोः, ॥

1 Instead. 2 Each, respectively.
3 Towards. 4 For. 5 Portion. 6 Exchange.

२४५ प्रति प्रतिनिधौ वीप्सा-लक्षणाऽऽदौ प्रयोगतः, ।

1 Therefore.
2 Thus.
3 So, well known. 4 Election. 5 Even so. 6 Opinion. 7 Option. 8 So, of this form of finis. 10 Presence. 11 Existence. 12 Determination.

इति हेतु-प्रकरण-प्रकर्षाऽऽदि-समाप्तिषु, ॥

३३-७४) । भेदो विशेषः, यथा-क्षीरान्मांसं तु पुष्टिकृत् (?) । अवधारणे-भीमस्तु पाण्डवानां रौद्रः (?) । हेतुव्यावृत्ती त्वनयोर्भेदौ-गृह्णीयां चे[वे]दं दुर्जन त्वं तु किं करिष्यसि (?) । सहार्थे-सकृद्यान्ति । एकवारे-सकृदंशो निपतति (मनुः ९-४७) । अपिशब्दात्सदार्थे-सकृद्युवानो गीर्वाणाः (?) । दूरे-आराच्छत्रोः सदा वसेत् (?) । समीपे-संप्रीतान् स्थापयेदारात् (?) ॥ २४२ ॥ प्रतीच्यां-पश्चादस्ताद्रिः (?) । चरमे-पश्चाद्याति । अप्यर्थः समुच्चयप्रश्नौ । समुच्चये-उत भीम उतार्जुनः (ग. म.) । प्रश्ने-उत दण्डः पतिष्यति (स. कं. पृ. ३५) । विकल्पे-उत पर्वतं भिन्द्या-उत त्रुट्येद्वज्रः (स. कं. पृ. ३५) । वितर्कऽपि-स्थाणुरुत पुरुषः (स. कं. पृ. ३५) । पुनरर्थे पौनःपुन्ये-शश्वद्याति । सहार्थे-शश्वद् भुञ्जते । नित्येऽपि-शाश्वतं वैरम् । प्रत्यक्षे-साक्षाद् द्रष्टा साक्षी (स. कं. पृ. ६०) । तुल्ये-इयं साक्षाल्लक्ष्मीः (उ. रा. १-३८) ॥ २४३ ॥ खेदे-अहो बत महत्कष्टम् (स. कं. पृ. ३५) । अनुकम्पायां-बत निःस्वोऽसि (स. कं. पृ. ३५) । संतोषे-बत प्राप्ता सीता (स. कं. पृ. ३५) । विस्मये-अहो बतासि स्पृहणीयवीर्यः (कु० सं० ३-२०) । आमन्त्रणे-बत वितरत तोयं तोयवाहा हिमान्तं नितान्तं (ग. र. महो.) । हर्षे-हन्त जीविताः स्मः (स. कं. पृ. ३२) । अनुकम्पायां-पुत्रक हन्त मे बालकाः [ते धानाकाः] (?) । वाक्यारम्भे-हन्त ते कथयिष्यामि (भगवद्गीता १०-१९) । विषादे-हन्त हताः पथिकगेहिन्यः (स. कं. पृ. ३२) । दाने निश्चये च-हन्तकारः (बा० रा० ?), हन्त गच्छामः ॥ २४४ ॥ प्रतिनिधौ-अभिमन्युरर्जुनतः[नं] प्रति । वीप्सायां-वृक्षं वृक्षं प्रति सिञ्चति (स. कं. पृ. ५६) । लक्षणे-वृक्षं प्रति विद्योतते विद्युत् (स. कं. पृ. ५६) । आदिशब्दादित्थंभूताख्यानादौ-साधुश्चैत्रो मातरं प्रति (स. कं. पृ. ५६) ।

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

1 Eastward.
2 Prior, first.

२४६ प्राच्यां पुरस्तात् प्रथमे पुराऽर्थेऽग्रत इत्यपि, ।
3 Formely. 4 In front.

1 As much as (the whole). 2 Until.
3 Number. 4 As much as there are.

यावत् तावच् च साकल्ये ऽवधौ मानेऽवधारणे, ॥

1 Auspicious particle. 2 After.
3 Beginning. 4 Question. 5 In detail. 6 Premissing. 7 Order.

२४७ मङ्गलाऽनन्तरारम्भ-प्रश्न-कार्त्स्न्येष्वथो अथ, ।
8 And. 9 Either or.

1 In vain.
2 Wrong.

वृथा निरर्थकाऽविध्योर्, नानाऽनेकोभयाऽर्थयोः, ॥
1 Many. 2 Both. 3 Without.

1 What ? (interrogative). 2 Or.
3 Doubt.

२४८ नु पृच्छायां विकल्पे च, पश्चात्-सादृश्ययोरनु, ।
1 After. 2 Like. 3 Each. 4 Along. 5 Under.

1 Interrogative particle.
2 Certainly. 3 Assent. 4 Kind expression. 5 Vocative particle.

प्रश्ना ऽवधारणा ऽनुज्ञा ऽनुनया ऽऽमन्त्रणे ननु, ॥
6 Reproach. 7 Response.

भागे–यदत्र मां प्रति स्यात्सोंऽशो दीयताम् (स. कं. पृ. ५५) । प्रतिदाने–माषानस्मै तिलेभ्यः प्रति प्रयच्छति (सि. कौ. ६००) । हेतौ–हन्तीति पलायते (स. कं. पृ. ३७) । प्रकरणं प्रकारः–गौरश्वो हस्तीति जातिः (भाष्य० १) । प्रकर्षे–इति पाणिनिः, पाणिनिशब्दः प्रकर्षात्प्रसिद्ध इत्यर्थः । अत एव प्रकारा(शा)दीति पेठुः । आदिशब्दादेवमर्थे–क्रमादमुं नारद इत्यबोधि सः (शिशु० १–३) । मते–इत्यापिशलिः (पा. ?) । विवक्षानियमे–तदस्यास्त्यस्मिन्निति मतुप् ($\frac{५।२।९४}{१८९४}$) । स्वरूपे–वृद्धिरित्येव या वृद्धिः (?) । समाप्तौ यथा–अ अ इति ($\frac{८।४।६८}{१२}$) । प्रत्यक्षे संनिधाववधारणे च ॥ २४५ ॥ प्राच्यां–पुरस्तात्सूर्यं उदेति । प्रथमे–पुरस्ताद् भुङ्क्ते । पुरार्थेऽतीते–पुरस्तात्कृतम् । साकल्ये यथा–यावत्कार्यं तावत्कुरु, सकलं कुर्वित्यर्थः । अवधौ–यावद् गन्ता तावत्तिष्ठ । माने–यावद्दत्तं तावद् भुक्तम् (स. कं. पृ. ३७) । अवधारणे–यावदमत्रं ब्राह्मणानामन्त्रयस्व (स. कं. पृ. ३७) ॥ २४६ ॥ मङ्गले–अथ परस्मैपदानि (सि. कौ. पृ. २८१) । अनन्तरे–स्नातोऽथ भुङ्क्ते । आरम्भे–अथ शब्दानुशासनम् (म. भा. १) । प्रश्ने–अथ शक्तोऽसि भोक्तुम् । कार्त्स्न्ये–अथ क्रतून् ब्रूमः । अधिकारेऽपि–अथ स्नानविधिः (ब्र. क. २) । प्रतिज्ञायां–गौडो भवानथेति ब्रूमः (?) । अन्वादेशेऽपि–अथो इमं वेदमध्यापय, अथो एनं छन्दोऽपि (स. कं. पृ. ३७) । समुच्चये द्वौ–अथो खल्वाहुः (स. कं. पृ. ३६), भीमोऽथार्जुनः । निरर्थके–वृथा दुग्धोऽनड्वान् (?) । अविधौ–प्रतिभाव्यं वृथा दानमाक्षिकं सौरिकं च यत् (मनुः ?) । अनेकार्थे–नानाविधा जनाः (?) । उभयार्थे–नानापक्षावमर्शः संशयः (?) । विनार्थेऽपि–नाना नारीर्निष्फला लोकयात्रा (बोपदेवः ?) ॥ २४७ ॥ प्रश्ने–को नु धावति (स. कं. पृ. ३५) । विकल्पेऽपि–भीमो नु फाल्गुनो नु योद्धा (?) । वितर्के–अहिर्नु रज्जुर्नु (स. कं. पृ. ३५) ।

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

1 Reprehensive particle. २४९ गर्हा-समुच्चय-प्रश्न-शङ्का-संभावनास्वपि, ।
2 Even. 3 Interrogation. 4 Earnest desire. 5 Doubt. 6 Possibility. 7 Seeking. 8 Corroboration. 9 Even. 10 Little.

1 As like, 2 Or, either. 3 Only. उपमायां विकल्पे वा, सामि त्वर्धे जुगुप्सिते, ॥
1 Half. 2 Blameably.

1 With together. 2 Near. २५० अमा सह समीपे च, कं वारिणि च मूर्धनि; ।
1 Water. 2 Head. 3 Ill. 4 Ease.

1 Like, as. 2 Thus. 3 Instruction. 4 Command. 5 Certainty. 6 Consent. इवेत्थमर्थयोरेवं, नूनं तर्केऽर्थ-निश्चये, ॥ 1 Perhaps. 2 Certainly 3 Recollection.

1 Silently. 2 At ease. २५१ तूष्णीमर्थे सुखे जोषं, किं पृच्छायां जुगुप्सने, ।
1 What? (interrogative). 2 Bad; ill.

1 Evidently. 2 Possibly. नाम प्राकाश्य-संभाव्य-क्रोधोपगम-कुत्सने, ॥
3 Recollection. 4 Wrath. 5 Indignancy. 6 Reproach. 7 Pretence. 8 Surprise.

पश्चादर्थे-तमनु धावति (उ. रा. १-१०)। सादृश्ये अनुकारः। लक्षणादौ च-वृक्षमनु द्योतते (स. कं. पृ. ५५)। तत्त्वाख्याने-साधुश्चैत्रो मातरमनु (स. कं. पृ. ५५)। भागे-यदत्र मामनु स्यात्तद् दीयताम् (स. कं. पृ. ५५)। वीप्सायां-वृक्षं वृक्षमनु सिञ्चति (स. कं. पृ. ५५)। दैर्घ्ये-अनुगङ्गं वाराणसी। प्रश्ने-नन्वध्येष्यसे। अवधारणे-नन्वद्य गच्छामः। अनुज्ञायां-नन्वादिश। अनुनयामन्त्रणे-ननु चण्डि प्रसीद मे (?)। वाक्यारम्भादौ च-नन्वपोहः प्रस्तूयते (?)। आक्षेपे-ननु किमर्थमागतोऽसि (?)। प्रत्युक्तौ-अकार्षीः कटं चैत्र, ननु करोमि भोः (स. कं. पृ. ३५) ॥ २४८ ॥ गर्हायां-अपि सिञ्चेत्पलाण्डुम्। समुच्चये-भीमोऽर्जुनोऽपि। प्रश्ने-अपि यासि। इष्टप्रश्नेऽपि-अपि क्रियार्थं सुलभं समित्कुशम् (कु. सं. ५-३३)। शङ्कायां-अपि प्रसीदेत्। संभावनायां-पर्वतमपि शिरसा भिन्द्यात् (?)। अपेक्षादौ च-अपि गृह्णीयां चे[वे]दम् (?)। पदार्थे-सर्पिषोऽपि स्यात्, मात्रा स्तोकं वा (?)। उपमायां-आशीविषो वा संक्रुद्धः सूर्यो वाभ्रविनिर्गतः। भीमोऽन्तको वा समरे गदापाणिरदृश्यत (?)॥ विकल्पे-यवैर्व्रीहिभिर्वा यजेत् (?)। द्वे द्वे समुच्चयेऽत एव-सा वा शम्भोस्तदीया वा मूर्तिर्जलमयी मम (कु. सं. २. ६०), न तृतीयेत्यर्थः, वायुर्वाद्य मेरुर्वाद्य दहनो वा (?)। अर्धे-सामि संमीलिताक्षी (?)। जुगुप्सिते-सामि कृतमकृतं स्यात् (?) ॥ २४९ ॥ सहार्थे-पुत्रेण अमा भुङ्क्ते (स. कं. पृ. ३७)। समीपे-अमा भवोऽमात्यः। जले-कंजं पद्मम्। मूर्ध्नि-कंजाः केशाः। निन्दासुखयोश्च-कंदर्पः, कंयुः। इवार्थे-अग्निरेवं विप्रः। इत्थमर्थ-एवंवादिनि देवर्षौ (कु०सं० ६-८४)। उपदेशादौ च-एवं पठ। निर्देशे-एवं तावत्। निश्चये-एवमेतत्। अङ्गीकारे-एवं कुर्मः। तर्के-नूनं शरत्फुल्ला हि काशाः (?)। अर्थनिश्चये-नूनं हन्तास्मि रावणम् (?) ॥ २५० ॥ तूष्णीमर्थे-जोषमास्स्व।

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

1 Ornament.
2 Enough. 3 Able. २५२ अलं भूषण-पर्याप्ति-शक्ति-वारण-वाचकम्, ।
4 Prohibition. 5 Uselessness.

1 Indicative of doubt and reflection.
2 Interrogation. 3 Yes. 4 Fear. 5 Reproach. 6 Dislike.
हुं वितर्के परिप्रश्ने, समया ऽन्तिक-मध्ययोः, ॥
1 Near. 2 Within, midst.

1 Again. 2 But, on the contrary.
२५३ पुनर-प्रथमे भेदे, निर् निश्चय-निषेधयोः, ।
1 Certainly. 2 Negation.

1 Ancient story.
2 Old. 3 Past.
4 Near. 5 Future. 6 Proximity.
स्यात् प्रबन्धे चिराऽतीते निकटाऽऽगामिके पुरा, ॥

1 Expansion.
2 Assent.
२५४ ऊर्र्यूरी चोररी च विस्तारेऽङ्गीकृतौ त्रयम्, ।

1 Heaven.
2 The next world.
3 Sky.
स्वर्गे परे च लोके स्वर्, वार्ता-संभाव्ययोः किल, ॥
1 News : so reported. 2 Probably.
3 Inquiry. 4 Falsehood. 5 Displeasure.

सुखे–जोपमास्ते जितेन्द्रियः (स. कं. पृ. ५९)। प्रश्ने–किं गतोऽसि। जुगुप्सने–किंराजा यो न रक्षति (?), किमः क्षेपे ($\frac{५।४।७०}{९५५}$) इति समासान्ताभावः। प्राकाश्ये–हिमालयो नाम नगाधिराजः (कु० सं० १–१)। संभाव्ये–कथं नाम समेष्यति। स्मृतिः संभावनैव–स नामायं बंधुः (?)। क्रोधे–ममापि नाम दशानस्य परैः परिभवः (?)। उपगमः सासूयोऽङ्गीकारः–एवमस्तु नाम। कुत्सने–को नामायं सवितुरुदयः (स. कं. पृ. ३७)। अलीकविस्मयोश्च–दष्टेऽधरे रोदिति नाम तन्वी (?), अन्धो नाम पर्वतमारोहति (?) ॥ २५१ ॥ भूषणे–अलंकारः। पर्याप्तौ–अलमस्त्यस्य धनं बह्वित्यर्थः। शक्तौ–अलं मल्लो मल्लाय (स. कं. पृ. ३७)। वारणे–अलमतिप्रसङ्गेन (?) । अलं खल्वोः प्रतिषेधयोः ($\frac{३।४।१८}{३३१६}$) इति निषेधेऽपि–आलप्यालमिदं बभ्रोर्यत्स दारानपाहरत् (शिशु० ?), न वक्तव्यमेतदित्यर्थः। वितर्के–चैत्रो हुं मैत्रो हुं (स. कं. पृ. ३५)। परिप्रश्ने–हुं स त्वं सुहृत् (स. कं. पृ. ३५)। भयादौ च–हुं राक्षसोऽयम् (स. कं. पृ. ३५)। भर्त्सने–हुं निर्लज्जः। अनिच्छायां—हुं हुं मुञ्च। त्वां समयास्ते, त्वत्समीप इत्यर्थः। ग्रामं समयास्ते, ग्राममध्य इत्यथः ॥ २५२ ॥ अप्रथमे–पुनरुक्तम्। (भेदे) विशेषे–किं पुनर्ब्राह्मणाः पुण्या भक्ता राजर्षयस्तथा (भगवद्गीता ९–३३)। निश्चये–निष्पन्नः। निषेधे–निर्मर्यादः। प्रबन्धे–उपाध्यायेन स्म पुराधीयते, अविरतमपाठीत्यथः। चिरातीते–पुरापि नवं पुराणम् (नि. ३-४-१९)। निकटागामिके भविष्यदासन्ने–गच्छ पुरा देवो वर्षति (स. कं. पृ. ३७), यावत्पुरानिपातयोर्लट् ($\frac{३।३।४}{३७८३}$), समनन्तरं वर्षिष्यतीत्यर्थः ॥ २५३ ॥ उररीकृत्य पटं, विस्तीर्येत्यर्थः। आज्ञामुररीकृत्य याति, अङ्गीकृत्येत्यथः। स्वर्गे–एहि जाये स्वरारोहाव

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh

1 Prohibition.
2 Expletive.
3 Inquiry. Conciliation.
1 Near. 2 Both.
3 Quickly.

२५५ निषेध-वाक्याऽलङ्कार-जिज्ञासाऽनुनये खलु, ।
समीपोभयतः-शीघ्र-साकल्याऽभिमुखे ऽभितः, ॥
4 Entirely. 5 In front.

1 Name.
2 Appearance.

२५६ नाम-प्राकाश्ययोः प्रादुर्, मिथोऽन्योन्यं रहस्यपि, ।
1 Mutually. 2 In private.

1 Concealment.
2 Awry.
3 Contempt.

तिरोऽन्तर्धौ तिर्यगर्थे, हा विषाद-शुगर्तिषु, ॥
1 Alas ! (sorrow). 2 Grief. 3 (Regret).

1 Indication of wonder.
2 Of pain or fatigue. 3 Length.

२५७ अहहेत्यद्भुते खेदे, हि हेतावबधारणे. ।
1 Because, for. 2 Indeed.

इति नानाऽर्थ-वर्गः ३, अत्र मूलश्लोकाः २५६॥, क्षे० श्लो० २४ ॥

(वाजसनेयी संहिता ?)। परलोके-स्वर्गतस्य ह्यपुत्रस्य (?)। वार्तायां-जघान कंसं किल वासुदेवः (स. कं. पृ. ३५)। संभाव्ये-अर्जुनः किल विजेष्यते कुरून् (ग. म.)। हेत्वादौ च-स किल कविरेवमुक्तवान् (बा. रा. ?)। अलीके-गोत्रस्त्वलितं किलाश्रुतं कृत्वा। अरुचौ-त्वं किल योत्स्यसे (स. कं. पृ. ३५) ॥ २५४ ॥ निषेधे-खलु कृत्वा, निषिद्धं करणमित्यर्थः। वाक्यालंकारे-अथो खल्वाहुः (स. कं. पृ. ३५)। जिज्ञासायां-स खल्वधीते वेदम्। अनुनये-न खलु न खलु मुग्धे साहसं कार्यमेतत् (नागानन्द० २-११)। अभितो ग्रामं वसति, समीप उभयत्र वेत्यर्थः। शीघ्रे-गच्छाभितः। साकल्ये-व्याप्नोत्यभितो रजः समन्तादित्यर्थः। आभिमुख्ये-आपतन्तमभितोऽरिमपश्यत् ॥ २५५ ॥ नाम्नि-विष्णोर्दश प्रादुर्भावाः, मत्स्यकूर्मादीनि दश नामानीत्यर्थः। प्राकाश्ये-प्रादुरासीत्। अन्योन्यार्थे-मिथः प्रहरतः। रहसि-मिथो मन्त्रयते। अन्तर्धौ-तिरोहितः। परिभूतेऽन्तर्ध्युपचारात्-तिरस्कृतोऽरिः। तिर्यगर्थे-तिरः काष्ठं कुरु (स. कं. पृ. ३५)। विषादे-हा रमणीनां[यो] गतः कालः (?)। शोके-हा प्रिये जनकराजपुत्री (उ० रा० ३-९)। अर्त्तौ-हा हतोऽस्मि (म. ना. १-५)। निन्दायां च-हा श्रोत्रियान् ॥ २५६ ॥ अद्भुते-अहह प्रज्ञाप्रकर्षो राज्ञः (?)। खेदे-अहह हता विरहिणी बाला (?)। दीर्घान्तोऽपि-भिक्षित्वाऽपि बुभुक्षिता यदहहा (?)। हेतौ-अग्निरत्र धूमो हि दृश्यते (स. कं. पृ. ३३)। अवधारणे-को हि हस्तगतं पादगतं कुर्यात् (?) ॥ २५७ ॥ इत्यव्ययेष्वनेकार्थवर्गः। इति नानार्थवर्गः ॥ ३ ॥

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh

अथाऽव्यय-वर्गः । ४

3 Long time.
5 Again and again; frequently.

१ चिराय चिररात्राय चिरस्याऽऽद्याश् चिराऽर्थकाः
मुहुः पुनःपुनः शश्वदभीक्ष्णमसकृत् समाः ॥

7 Soon; instantly.
6 Much; very.

२ स्राग् झटित्यञ्जसा ऽह्नाय द्राङ् मङ्क्षु सपदि द्रुते ।
बलवत् सुष्ठु किमुत स्वत्यतीव च निर्भरे ॥

6 Without; except.
4 Because; therefore. 2 Some.

३ पृथग् विना ऽन्तरेणर्ते हिरुङ् नाना च वर्जने ।
यत् तद् यतस् ततो हेताव-साकल्ये तु चिच् चन ॥

चिराय निर्धनो भूत्वा भवत्यह्ना (द्वा) महाधनः (स. कं. पृ. ३८)। चिररात्राय जायते [यजते]। चिरस्य भूतले धावति। आद्यशब्दाच्चिरेण चिराच्चिरमपि–चिरंजीवी, चिरंतनः। कान्तं [न्तां] मुहुर्ध्यायति (?)। पुनः पुनर्वारि पिबेदभूरि (वाग्भट I.)। शश्वद्वक्ति कुशिक्षितः (?)। अभीक्ष्णमास्फालयतीभकुम्भम् (?)। असकृद्वक्ति ॥ १ ॥ स्राक्सरत्यभिसारिका (?)। 'झगिति कुचतटादोंनमो मन्मथाय' (विद्धशाल० १-१७)। यज्वाऽञ्जसा जयति ब्रह्मलोकम् (?)। अह्नाय सा नियमजं क्रममुत्ससर्ज (कु. सं. ५–८६)। सपदि प्रदहत्युपेक्षितोऽग्निः (?)। द्राग्विद्रुतं कातरैः (रत्ना. ?)। मङ्क्षूदपाति परितः पटलैरलीनम् (शिशु० ५–३७)। झटित्याशु तरसादि च–झटिति घटयति विधिरभिमतमभिमुखीभूतः (रत्नावली १–५), 'आश्वपेहि मम सीधुभाजनात्' (काव्यालं० सू० वृ. ३-२-८), तरसोदिता सह जलेषु। तूर्णं द्रुतं क्षिप्रं शीघ्रं लघ्विति क्रियाविशेषणम्। बलवत्पिपासितोऽस्मि (?)। सुष्ठु खल्विदमुच्यते (?)। किमुत ब्रह्मविन्निभिः (?)। सुसिक्त आम्रःफलति, अतिसिक्तश्च। अतीव क्षुत्पिपासि(सार्दि)तः ॥ २ ॥ पृथग्देवदत्तादयं [त्वत्तः पृथङ् नास्ति बन्धुः ?]। विना ग्रामं वृष्टो देवः [विना वातं विना वर्षम् ?]। अन्तरेण पुरुषकारं न किंचित्सिध्यति (?)। ऋते कृशानोर्न हि मन्त्रपूतम् (कु० सं० १–५१)। हिरुक् कर्मणां[णो]मोक्षः (?), कर्मक्षये [यो] मोक्ष इत्यर्थः। नाना नारीर्निष्फला लोकयात्रा (बोपदेवः)। अन्तरान्यत्रापि–त्वामन्तरा तामरसायताक्षि (?), अ (आ)–रोगिभावादन्यत्र। यत्सभासु प्रगल्भसे तत्पूज्योऽसि (?)। यतो विद्वांस्ततो मान्यः (?)। येन तेनादि च–वितर गिरमुदारां येन मूकाः पिकाः स्युः (?), नदीं तेन गतः, गमने नदी हेतुः। द्वितयो लक्ष्यते–येन दाता [वोढा] तेन श्लाघ्यः (?)। (ऊने) किंचिद् ब्रूते। पद्भ्यां याति कुतश्चन (?)। प्रायः किंवृत्तात्परौ, क्वचित्–कुत्र-

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

2 Sometimes.
5 Together with.
1 Conformity.
2 In vain.

४ कदाचिज् जातु, सार्धं तु साकं सत्रा समं सह ।
आनुकूल्याऽर्थकं प्राध्वं, व्यर्थके तु वृथा मुधा ॥

6 Either, or (indicating deliberation).
6 Expletives.

५ आहो उताहो किमुत विकल्पे किं किमूत च ।
तु हि च स्म ह वै पाद-पूरणे, पूजने स्वति ॥

2 Particles of praise and reverence.

2 By day.
2 By night.
2 Crooked, bent; awry.

६ दिवा ऽह्नीत्यथ दोषा च नक्तं च रजनाविति ।
तिर्यगर्थे साचि तिरोऽप्यथ संबोधनाऽर्थकाः ॥

6 Vocative particles.
1 Near. 2 Midst.
1 Inconsiderately, suddenly.

७ स्युः प्याट् पाडङ्ग हे है भोः, समया निकषा हिरुक् ।
अ-तर्किते तु सहसा, स्यात् पुरः पुरतो ऽग्रतः ॥

3 Before, in front.

चित्-कथंचित् ॥ ३ ॥ अन्योन्यपर्यायावेतौ-कदाचिच्छूरतां याति मरणे कृतनिश्चयः (?), न जातु कामः कामानामुपभोगेन शाम्यति (मनुः २-९४) ॥ सार्धं धनैर्महान् । पुत्रेण साकं याति । सत्रा कलत्रैर्गार्हस्थ्यम् (?) । भ्रात्रा समं युध्यते । पुत्रैः सहास्ते । सङ्गो द्विजिह्वैः सजूरिति (स. कं. पृ. ३७) सजूर्गतिप्रतिरूपको निपातः । प्राध्वं कुरुध्वं बुधाः (स. कं. पृ. ५४), प्राध्वं बन्धने (१।४।७८) इति गतिसंज्ञा-प्राध्वंकृत्य (स. कं. पृ. ५४) । वृथा दुग्धोऽनड्वान् । मुग्धे, मुधा ताम्यसि (मु. रा. ३-१) ॥ ४ ॥ विकल्पः पक्षान्तरं—स्थाणुराहो पुरुषः (स. कं. पृ. ३५), उताहोस्विद् भवेद्राजा नलः परपुरंजयः, (म. भा. नलो. ?) । किमुत रज्जुः किमुत सर्पः [किं रज्जुः किं सर्पः], किमु खेदयेत्किमु मानयेत्, एकमेव वरं पुंसामुत राज्यमुताश्रमः (?) । आख्यामि तु तत्त्वं ते (?) । न हि न हि महिमानं प्राप्य तुष्यन्ति भूपाः (?) । भीमः पार्थस्तथैव च । इति ह स्माहुराचार्याः (स. कं. पृ. ३७) । यो वै युवाप्यधीयानः (मनु. २-१५६) । खल्वादयोऽपि-अहो न (नु) खलु भोः (स. कं. पृ. ३३) । पूजने-सुस्तुतं, अतिस्तुतम् ॥ ५ ॥ दिवातनं, इति शब्देन सप्तम्यन्ते दिनार्थेऽयमिति द्योत्यते । अग्रेऽप्येवम् । दोषामन्यमहः । नक्तंचरः । तथा-उषापि-उषातनो वायुः ॥ ६ ॥ साचि लोचनयुगं नमयन्ती (कि. ९-४४) । तिरः काष्ठं कुरु (स. कं. पृ. ५९) । प्याट् पाठकाः । पाट् पान्थाः । अङ्गानङ्ग, इष्टाह्वाने चैतत् । हे चैत्र । है वातूल । भो भार्गव । हंहो, अरेरे, अयि-हंहो काम, रे चोर, अरे चेट, अयि प्रिये । एते समीपार्थेऽन्योन्यं पर्यायाः-समया ग्रामं, लङ्कां निकषा हनिष्यति (शिशु० १-६८) सभ्यान् हिरुक्

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh

4 Oblations to the gods.
८ स्वाहा देव-हविर्-दाने श्रौषट् वौषट् वषट्, स्वधा ।
1 —to manes.

3 A little.
2 In the next life.
किञ्चिदीषन् मनागल्पे, प्रेत्याऽमुत्र भवाऽन्तरे ॥

6 As, like. 2 Ah! (indicating surprise).
९ व वा यथा तथैवैवं साम्ये, ऽहो हीति विस्मये ।
2 Silently.
2 Instantly.
मौने तु तूष्णीं तूष्णीकां, सद्यः सपदि तत्-क्षणे ॥

2 Indication of joy.
3 Between ; amidst.
1 Forcibly, violently.
१० दिष्ट्या समुपजोषं चेत्यानन्दे, ऽथा ऽन्तरे ऽन्तरा ।
अन्तरेण च मध्ये स्युः, प्रसह्य तु हठाऽर्थकम् ॥

2 Properly.
११ युक्ते द्वे सांप्रतं स्थाने, ऽभीक्ष्णं शश्वदनारते ।
2 Continually, perpetually.

4 No, not.
अ-भावे नह्य नो नाऽपि, मा स्म मा ऽलं च वारणे ॥
3 Negative and prohibitive.

2 If.
2 Truly.
2 Apparent.
3 Yes.
१२ पक्षाऽन्तरे चेद् यदि च, तत्त्वे त्वद्धा-ऽञ्जसा द्वयम् ।
प्राकाश्ये प्रादुराविः स्यादोमेवं परमं मते ॥

(स. क. पृ. ३७) ॥ ७ ॥ सहसा विदधीत न क्रियाम् (किरातार्जु० २–३०) । अग्रार्था एते–पुरःसरः । नासीरधूलिधवलाः पुरतः प्रयान्ति (?) । अग्रतो धावति श्रीः (?) ॥ ८ ॥ सोमाय स्वाहा । अस्तु श्रौषट् । व्रीही वौषट् । वषडिन्द्राय । पितृभ्यः स्वधा (वाज. सं. २-७) । किंचित्कुञ्चितमूर्धजाः । ईषत्स्मेरः । ब्रूते मनाक्समार्दवम् । अन्यो धनं प्रेत्य गतस्य भुङ्क्ते (?) । अमुत्र भविता यत्ते तच्चिन्तय शुभाशुभम् (?) ॥ ९ ॥ पचतीति [स्रवन्ती] वत् । पद्मिनीं [नी] वान्यरूपां[पा] (मेघ० २–८०) । यथा चैत्रस्तथा मैत्रः । शारदाभ्रमिव पेलवमायुः (?) । यथार्क एवं कर्णः । अहो आश्चर्यम् । हतविधिलिलि(सि)तानां ही विचित्रो विपाकः (शिशु० ११–६४) । मुनिस्तूष्णीमास्ते । अकचूप्रकरणे तूष्णीमः काम्वक्तव्यः (वा० ?) इत्यज्ञाताद्यर्थे विशिष्टे मौने तूष्णीकां, मौनमात्रे तूष्णीम् । सद्यः पतति मांसेन (?) । सपदि प्रदहत्युपेक्षितोऽग्निः (?) ॥ १० ॥ दिष्ट्या पुत्रो जातः । समुपजोषं वर्तते । आवयोरन्तरे जाताः पर्वताः सरितो द्रुमाः (महानाट० ५. २५.) । अन्तरा त्वां च मां च कमण्डलुः (स. कं. पृ. ५८) । यतो भवन्तमन्तरेणान्यथा भूपतिर्ग्राहितः (?), भवन्मध्येनेत्यर्थः । प्रसह्य वित्तानि हरन्ति चौराः (नी. श. २-५४) ॥ ११ ॥ न सांप्रतं यतः स्त्री नेत्री । हन्त स्थाने प्रश्नः । अभीक्ष्णं वक्ति । शश्वद्याति, अविरतमित्यर्थः । न हि प्रेम प्रयोजनापेक्षम् (?) । अविप्र इव भाषसे, विप्रवन्न ब्रूषे इत्यर्थः । नो जानीमः । नैकः सुप्तेषु जागृयात्

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh

4 Every way; all around.
1 Willingly.
1 Be it so. 2 Indeed.

१३ समन्ततस् तु परितः सर्वतो विष्वगित्यपि ।
अ-कामाऽनुमतौ काममसूयोपगमेस् तु च ॥

1 Indicating contradiction.

१४ ननु च स्याद् विरोधोक्तौ, कच्चित् काम-प्रवेदने ।
1 Introductory of a kind question.

2 Improperly; unseasonably.

निष्षमं दुष्षमं गर्ह्ये, यथास्वं तु यथायथम् ॥
2 As thereto appertaining.

2 Falsely.
5 Properly, suitably.

१५ मृषा मिथ्या च वितथे, यथार्थं तु यथातथम् ।
स्युरेवं तु पुनर् वै वेत्यवधारण-वाचकाः ॥ 2 Indeed.

1 Before; anterior.
1 A year.
2 Former, prior.

१६ प्रागतीता ऽर्थके, नूनमवश्यं निश्चये द्वयम् । 2 Certainly; necessarily.
संवद् वर्षे, ऽवरे त्वर्वागामेवं, स्वयमात्मना ॥
1 Assent, consent, promise. 1 Self; or himself.

1 Little; low.
1 Great; high, load.

१७ अल्पे नीचैर्, महत्युच्चैः, प्रायो भूम्न्य-द्रुते शनैः ।
1 Frequently; generally. 1 Slowly.

1 Perpetually, ever.
1 External; out.

सना नित्ये, बहिर् बाह्ये, स्मा ऽतीते, ऽस्तम-दर्शने ॥
1 Formerly. 1 Disappearance.

(?) । मास्म करोः । मा कार्षीः । अलं बाले रोदनेन ॥ १२ ॥ सन्तश्चेदमृतेन किम् (राजशे. वा. रा. २) । यदि खलास्तत्कालकूटं मृषा (रा. शे. बा. रा. २) । अरे अद्धा पुरुषः । अञ्जसा वक्ति साधुः (स. कं. ५२) । प्रादुरासीत् । आविर्भूतः । मतमभ्युपगमः-ओं कुरु, एवं कुरु, परमं तत्रावसम् । एवं बाढमित्यादि च ॥ १३ ॥ एते सर्वतोदिक्कार्थे-समन्ततो धावति, परितः प्रपतन्ति दुष्कृतां (तो) विपदः, सर्वतः संपदः सताम्, विष्वगञ्चति विष्वग्रङ् । इतिशब्दात्समन्तादित्यादि-समन्ताद्भवः सामन्तः । आदावनिच्छायां पश्चादङ्गीकारे-कामं करोमि । अस्तुशब्दोऽसूयापूर्वेऽङ्गीकारे-अस्तुकारः, एवमस्तु को दोषः । चशब्दाद्भवतु नाम ॥ १४ ॥ ननु च कः शब्दः । कामप्रवेदनमिष्टपरिप्रश्नः-कच्चिज्जीवति मे माता (स. कं. ५२) । निष्क्रान्ताः समा दुष्टाः समा वत्सरा अत्रेति, तिष्ठद्गुप्रभृतीनि च ($\frac{२।१।१७}{६७२}$) इत्यव्ययीभावादव्ययत्वम्, गर्ह्यमात्रे तूपचारात्, समेन समासो वा-निःषमं वक्ति मूर्खः (?), कालानुचितमित्यर्थः । एवं दुःषमं वर्तते (?) । सर्वेषां तु यथायथम्, यथास्वी [त्मी]यमित्यर्थः, यथास्वे यथायथमिति ($\frac{८।३।१४}{२६४९}$) साधुः ॥ १५ ॥ मृषोद्यम् (उ० रा० ४, ८) । मिथ्यावादी । तथेति सत्यमनतिक्रम्य-यथातथं वक्ति सभासु विद्वान् (?) । एवमेतत् । आत्मा सर्वं तु पश्यति (?) । विप्रः पुनः पूज्यः । गुरुर्वा वक्ति भीष्मो वा । त्वमेव देव सर्वं जानासि (?) ॥१६॥ प्राक् कृतम् । नूनं हन्तास्मि रावणम् (?) । अवश्यं यातारश्चिरतरमुषित्वाऽपि विषयाः (भर्तृहरि० ?) । संवत्सरः,

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh

1 Present; now, being. 1 Interjection, expressive of wrath. 1 Interrogative particle. 1 Encouraging vocative.
1 Particle indicating reflection.

१८ अस्ति सत्त्वे, रुषोक्तावु, ऊं प्रश्ने, ऽनुनये त्वयि ।
हुं तर्के स्यादुषा रात्रेरवसाने, नमो नतौ ॥

1 Close of the night; morn, break of day. 1 Hail! salutation; bow.

1 Again. 1 Ill.
1 Well.
1 Evening, close of the day.

१९ पुनरर्थे ऽङ्ग, निन्दायां दुष्टु, सुष्टु प्रशंसने ।
सायं साये, प्रगे प्रातः प्रभाते, निकषा ऽन्तिके ॥

2 Morning. 1 Near.

1 Favourably.
1 Well (showing remembrance).

अमाऽनुगुण्ये, स्मरणे हुं, फड् विघ्ननिराकृतौ ।

Oh (to remove spells etc.)

1 Acceplingly.
2 Callingly.

अङ्गीकृतौ स्यादर्थे हूं हीनसंबोधते त्वरे ॥१॥ 3 Hastily.

1 Last year; penult, and present years.
1 To-day.

२० परुत् परार्थैषमो ऽब्दे पूर्वे, पूर्वतरे, यति ।
अद्याऽत्राऽहन्यथ पूर्वे ऽह्नीत्यादौ पूर्वोत्तराऽपरात् ॥

2 A former day, etc.

1 Yesterday.
1 Both days.
1 Next day.

२१ तथा ऽधराऽन्याऽन्यतरेतरात् पूर्वेद्युराऽऽदयः ।
उभयद्युश् चोभयेद्युः, परे त्वह्नि परेद्यवि ॥

संवत्तृतीये । अवरः पारादन्यः–वर्षात्षोसशादर्वाक्, अर्वाक्कालीनः । अङ्गीकारार्थे–आं कुर्मः, एवं कुर्मः । स्वयंभूः, आत्मनेति तृतीयान्तार्थे ॥१७॥ नीचैर्मरुद्वाति (?) । उच्चैरुच्चरितुं चिरम् (?)। सन्तः प्रायो विवेक्तारः (?), भूम्नि बाहुल्यार्थे । अशीघ्रार्थे–शनैर्याति पिपीलिका (सु० भा० २५४) । क्रमेऽपि (शनैः) अद्रुतार्थान्वयात्–शनैः शनैर्व्युपरमेत् (भ. गी. ६-२५) । सनातनः । सनत्सनाच्च–सनत्कुमारः, सनात्कुमारश्च । बहिर्भूतः । वक्ति स्म व्यासः (?), अवोचदित्यर्थः । अस्तं गतः ॥ १८ ॥ अस्तिक्षीरा स्त्री, अस्ति परलोके मतिरस्यास्तिकः । कोपनोक्तौ–उं सैवास्मि तव प्रिया (?) । रुषेत्येव–ऊं न जानासि स्वार्थम् । अप्ययि साहसकारिणि (?) । स्याद्वादिनो जैनाः उपातनो वायुः । नमो देवेभ्यः ॥ १९ ॥ मूर्खोऽपि नावमन्तव्यः किमङ्ग विद्वान् (स. कं. पृ. ३५) । दुष्टुवादी खलः । सुष्टूक्तम् । सीयते क्षीयते सायो निशामुखं, घञ्–सायंतनो वायुः, सायमासीनः संध्यां वन्देत (?) । प्रगेतनो वायुः । प्रातः संध्यामुपासीत् (?) । मित्रं निकषारते ॥ २० ॥ पूर्वे वर्षे परुत् । पूर्वतरे वर्षे परारि । यति गच्छति वर्तमाने वर्षे–ऐषमः, सद्यःपरुत्परार्थैषम इति ($\frac{५।३।२२}{१९७०}$) साधवः । एवमग्रिमाः । अस्मिन्नहन्यद्य, वर्तमानतामात्रेप्याहुः–नरो लोकेऽद्य दुर्लभः (बलः) (?), तदद्यत्वेन तथा । पूर्वेऽह्नि पूर्वेद्युः । आदिशब्दादुत्तरेद्युः, अधरेद्युः, अपरेद्युः, अन्येद्युः, अन्यतरेद्युः, इतरेद्युः । द्युर्दिनमिति श्रीभोजः,

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

1 Yesterday.
1 Tomorrow.

२२ ह्यो गते, ऽनागते ऽह्नि श्वः, परश्वस् तु परे ऽहनि ।

1 The day after to-morrow.

2 Then, at that time.

तदा तदानीं, युगपदेकदा, सर्वदा सदा ॥

2 At once ; at the same time. 2 Always ; at all times.

5 Now ; at this time.

२३ एतर्हि संप्रतीऽदानीमधुना सांप्रतं तथा ।

1 East, North, West, etc.

दिग्-देश-काले पूर्वाऽऽदौ प्रागुदक्--प्रत्यगाऽऽदयः ॥

इत्यव्यय-वर्गः ४, अत्र मूलश्लोकाः २३, क्षे० श्लो० १.

अथ लिङ्गाऽऽदि-संग्रह-वर्गः ५

१ स-लिङ्ग-शास्त्रैः सन्नाऽऽदि-कृत्-तद्धित-समास-जैः ।

अनुक्तैः संग्रहे लिङ्गं संकीर्ण-वदिहोन्नयेत् ॥

यथा–द्युश्चन्द्रो द्योतते कथम् (?) ॥२१॥ उभयोरह्नोः–उभयेद्युः, उभयद्युः, द्युश्चोभयद्वक्तव्यः (वा० $\frac{३२५१}{१९७०}$)। स्मार्ते–पक्षिणीयं रात्रिरुदिता। तं हन्तास्मि परेद्यवि (?) ॥ २२ ॥ अतीतेऽह्नि ह्यः–ह्योऽकरोत्। आनागतोऽह्नि श्वः–श्वो गन्ता। श्वोदिनात्परमहः परःश्वः, पारस्करादित्वात् ($\frac{५।३।१९}{१९६८}$) परःसहस्रादिवत्सुट्। तस्मिन्काले तदा, तदो दा चेति ($\frac{३।१।१५७}{१०७१}$) तदा, तदानीं च। एतौ तुल्यकालार्थौ। युगपत्प्राप्ताः। एकस्मिन्काले–एकदा मिलन्ति। एकपदे च–अयमेकपदे तया वियोगः (विक्रमोर्वशी० ४-३)। सर्वस्मिन्कालेऽर्थे, सर्वैकान्यकिंयत्तदःकाले दा ($\frac{५।३।१५}{१९६४}$), सर्वस्य सोऽन्यतरस्यां दि ($\frac{५।३।६}{१९५२}$) ॥ २३ ॥ अस्मिन्कालेऽर्थे, इदमो र्हिल् ($\frac{५।३।१६}{१९६५}$), एतेतौ रथोः ($\frac{५।३।१४}{१९५०}$) इत्येतादेशः, (एतर्हि)–भवन्तमेतर्हि मनस्विगर्हिते विवर्तमानं नरदेव वर्त्मनि (कि. १-३२), अधुना, इदानीं च। संप्रत्येव सांप्रतं, स्वार्थेऽण्। प्राच्यां दिशि प्राचि देशे काले वा–प्राग्वसति। प्राच्या दिशः प्राचो देशात्कालाद्वा–प्रागागतः। प्राची दिक् प्राङ् देशः कालो वा–प्राग्रम्यम्। दिक्शब्देभ्यः सप्तमीपञ्चमीप्रथमाभ्यो दिग्देशकालेष्वस्तातिः ($\frac{५।३।२७}{१९७४}$), अञ्चेर्लुक् ($\frac{५।३।३०}{१९८०}$)। आदिशब्दादुदगवागादि। एवं पूर्वादिभ्यः पुरस्तादधस्तादादि ॥ २४ ॥ इत्यव्ययवर्गः ॥ ४ ॥

इह लिङ्गसंग्रहवर्गे वक्ष्यमाणलिङ्गानुशासनसहितैः सुब्धातुवृत्त्यादिजातै (शब्दैः) प्रागनुक्तैर्लिङ्गमुन्नयेदूहेत। लक्षणेन तत्त्वतो ज्ञानार्थं सन्नाद्युपादानम्। लिङ्गशास्त्रेण यथा–स्त्रियामीदूद्विरामैकाच्। सुब्धातुवृत्तिजैर्यथा–अ प्रत्ययात्

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

The following are feminine, viz.

(*a*) Monosyllables in ई or ऊ.

२ लिङ्ग-शेष-विधिर् व्यापी विशेषैर् यद्य-बाधितः, ।
स्त्रियामीदूद्-विरामैकाऽच्, स-योनि-प्राणि-नाम च, ॥

(2) Names of female beings.

(*b*) Terms signifying lightning, night, creeper, Lute, Quarter, earth, river, modesty.

३ नाम विद्युन्-निशा-वल्ली-वीणा-दिग्-भू-नदी-ह्रियाम्, ।

(*c*) A compound in अ with a numeral.

अदन्तैर् द्विगुरेकाऽर्थो, न स पात्र-युगाऽऽदिभिः, ॥

(2) Except those ending in पात्र of युग.

(३।३।१०२/३२७९), ण्यासश्रन्थो युच् (३।३।१०७/३२८४)। कृद्वृत्तिजैर्यथा–स्त्रियां क्तिन् (३।३।९४/३२७२), पुंसि संज्ञायां घः प्रायेण (३।३।११८/३२९६), नपुंसके भावे क्तः (३।३।११४/३०९०)। गोबलीवर्दन्यायेनात्र सुब्धातुवृत्तिवर्जं कृद्वृत्तिरुदाहार्या । तद्धितवृत्तिजैर्यथा–तत्क्रीडायां प्रहरणं चेन्मौष्टादि। समासवृत्तिजैर्यथा–अदन्तैर्द्विगुरेकार्थ इत्यादि। कथमुन्नयेदित्याह–प्रागुक्तसंकीर्णवर्गवत्, वचनमात्रेणेत्यर्थः। उक्तं च प्राक्–प्रकृतिप्रत्ययार्थाद्यैः संकीर्णे लिङ्गमुन्नयेत् (पृ. २६०)। प्रकृत्या यथा–अर्धर्चाःपुंसि च (२।४।३१/८१६)। प्रत्ययेन यथा–स्त्रियां क्तिन् (३।३।९४/३२७२)। अर्थद्वारेण च यथा–मातृस्वस्रादीनाम्। आद्यशब्दात्क्रियाविशेषणानां कर्मत्वं नपुंसकलिङ्गता च वक्तव्येति। तथा–अर्थस्य नित्यसमासवचनं सर्वलिङ्गता चेत्यादि ॥ १ ॥ अयं लिङ्गानां प्रागुक्तानां शेषविधिसंज्ञो वर्ग उत्सर्गत्वाद् व्यापको भवत्यपवादैर्यद्यबाधितः स्यात्। यथा–असन्नन्ता अबाधिताः पुंसि, तथा त्रान्तं सलोपधं शिष्टमिति, यथा–चन्द्रमाः, पुरूरवाः, सविमा प्रसवः, भरिमा कल्पः। अत्रापवादः–द्व्यच्कमसिसुसन्नतं तृतीये–इदं यशः, तेजः, नाम, धाम। ईदन्तमूदन्तं चैकस्वरं स्त्रीलिङ्गं भवति–इयं स्त्री, श्रीः, धीः, ह्रीः; भ्रूः, भूः, स्रूः, द्रूः, जूः। पुंलिङ्गात्प्राक् स्त्रियामित्यधिकारोऽयम्। स्त्रीध्वजयुक्तानां प्राणिनां संज्ञा च स्त्रियाम्, यथा–इयं माता, स्वसा, प्रसूः, योषित्, इयं गौः सुरभिः, इयं कपिर्वानरी, इयमहिर्भुजंगी, इयं करेणुर्हस्तिनी। दारादौ तु स्त्रीत्वं पुंभूम्नि दाराः (पृ. १३४) इत्याद्यपवादाद्बाध्यते। एवं सर्वत्रोन्नेयम् ॥२॥ एषां नामपर्यायाः स्त्रियाम्–इयं विद्युत्तडिदशनिः, इयं निशा रात्रिः, इयं वल्ली वीरुत्, इयं वीणा परिवादिनी, इयं दिक् ककुप्, इयं भूः कुः, इयं नदी सरित्, इयं ह्रीर्लज्जा। अकारान्तैः शब्दैः सहैकार्थः समाहारो यो द्विगुः स स्त्रियां, यदिष्टिः–अकारान्तोत्तरपदो द्विगुः स्त्रियां भाष्यते, (यथा) त्रयाणां लोकानां समाहारस्त्रिलोकी, पञ्चमूलीशृतं

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh

(*d*) A noun ending in the affixes तल् Showing Multitude ; in य, इति, कत्यत्, त्र; वुन् (Expressing group). ४ तल्-वृन्दे येनि-कत्य-त्रा, वैर-मैथुनिकाऽऽदि-वुन्, ।

(*e*) Or in अनि, स्त्री-भावाऽऽदावनि-क्तिण्-ण्वुल्-णच्-ण्वुच्-क्यब् युजिञङ्-नि-शाः, ॥
(imprecation). 2 क्तिन् (abstract idea). 3 ण्वुल् (disease).
4 णच् (reciprocity). 5 वुच् (state).
6 क्यप् (या)–abstract sense. 7 युज् (अना)–abstract sense. 8 इञ् (इ)–question and reply. 9 अङ् (अ-आ)–abstract sense. 10 नि–abstract import. 11 शा (आ)–abstract sense.

पयः। स द्विगुः पात्राद्युत्तरपदैरदन्तैर्न स्त्रियां, पात्रादिभ्यः प्रतिषेध इति (पात्राद्यन्तस्य न), अतः स नपुंसकमिति क्लीबे–पञ्चपात्रं, चतुर्युगं, त्रिभुवनं, त्रिपुरं, भाष्ये तु त्रिपुरी ॥ ३ ॥ तत्प्रत्ययान्ताः स्त्रियां, तस्य भावस्त्वतलौ (५।१।११९ / १७८१)–गोर्भावो गोता, अश्वता। ग्रामजनबन्धुसहायेभ्यस्तल् (४।२।४३ / १२५१)–ग्रामाणां समूहो ग्रामता, जनता। देवात्तल् (५।४।२७ / २०९५)–देव एव देवता। समूहे यादिप्रत्ययान्ताः स्त्रियां पाशादेर्यत् (यः) पाशादिभ्यो यः (४।२।४९ / १२५८)–पाशानां समूहः पाश्या। खलगोरथात् (४।२।५० / १२५९) यत् (यः), इनित्रकट्यचश्च (४।२।५१ / १२६०) चकाराद्यत् (यः)–खलिनी, गोत्रा, रथकट्या। वैराद्यर्थे वुन्नन्तः स्त्रियां द्वन्द्वाद्वुन्वैरमैथुनिकयोः (४।३।१२५ / १५०५)–अश्वमहिषयोर्वैरमश्वमहिषिका, काकोलूकिका। अत्रिभरद्वाजयोर्मैथुनप्रयोजने विवाहे वैरमत्रिभरद्वाजिका, वशिष्ठकुशिका। आदिशब्दात् पादशतस्य संख्यादेर्वीप्सायां वुन् लोपश्च (५।४।१ / २०७३), दण्डव्यवसर्गयोश्च (५।४।२ / २०७४)–द्वौ द्वौ पादौ द्विपदिकां ददाति, द्वे द्वे शते दण्डितो द्विशतिकां ददाति। उपलक्षणत्वाद् वुञन्तोऽपि, द्वन्द्वमनोज्ञादिभ्यश्च (५।१।१३३ / १७९८) इति वुञ्–शैष्योपाध्यायिका। गोत्रचरणाच्छ्लाघादौ वुञ् (५।१।१३४ / १७९९)–गार्ग्यस्य भावः कर्म चेति गार्गिकया श्लाघते, काठिकया श्लाघते। स्त्रियामित्यधिकृत्य भावे वा कर्तरि च कारके–अन्यादिप्रत्ययान्ताः स्त्रियाम्, आक्रोशे नञ्यनिः (३।३।११२ / ३३८९)–अजननिस्ते वृषल भूयात् (?) अकरणिः। स्त्रियां क्तिन् (३।३।९४ / ३२७२)–कृतिः, भक्तिः। रोगाख्यायां ण्वुल्बहुलम् (३।१।१३३ / ३२८५)–प्रवाहिका, विपादिका। धात्वर्थनिर्देशे ण्वुल् वक्तव्यः (वा० २२२५ / ३२८५)–कारिका, जीविका। कर्मव्यतिहारे णच् स्त्रियाम् (३।३।४३ / ३२१५)–अन्योन्यं व्यावक्रोशनं व्यावक्रोशी वर्तते, व्यावभाषी [हासी], णचःस्त्रियामञ् (५।४।१४ / ३२१६) स्वार्थे। पर्यायार्हणोत्पत्तिषु ण्वुच् (३।३।१११ / ३२८८)–भवतः शायिका, इक्षुभक्षिकोत्पन्ना। व्रजयजोर्भावे क्यप् (३।३।९८ / ३२७५)–व्रज्या, इज्या। संज्ञायां समजेति (३।३।९९ / ३२७६)–क्यप्–समज्या, निपद्या। हनस्त च (३।३।१०८ / २८५६)–इति क्यप्–ब्रह्महत्या। प्यासश्रन्थो युच् (३।३।१०७ / ३२८४)–मण्डना, आसना। प्रश्नाख्यानयोरिश्च (स. कं. ३-१-२४७)–कां कारिमकार्षीः, इमां कारिमकार्षम्। षिद्भिदादिभ्योऽङ् (३।३।१०४ / ३२८१)–

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh

(*f*) Or in certain *unádi* affixes. (1) नि, ऊ, ई.

५ उणाऽऽदिषु निरूरीश् च, ङ्याषूङन्तं चलं स्थिरम्, ।

(*g*) Or in a feminine termination.

(*h*) Or in ण etc. indicating a weapon at play.

तत् क्रीडायां प्रहरणं चेन्, मौष्टा पाल्लवा ण-दिक्, ॥

1 Boxing. 2 Playing at fisty cuff.

(*i*) Or in अ following घञ्. implying place, time, circumstance.

६ घञो ञः सा क्रिया ऽस्यां चेद्, दाण्डपाता हि फाल्गुनी,।

Stick-flowing festival.

1 Flying along like an eagle.

श्यैनम्पाता च मृगया, तैलम्पाता स्वधेति दिक्, ॥

(1) Oil throwing.

(*j*) Diminutives. Formed by giving the feminine termination to a masculine noun.

७ स्त्री स्यात् काचिन् मृणाल्याऽऽदिर् विवक्षाऽपचये यदि,।

(1) Fibre of water lily.

(*k*) And the particular nouns here enumerated.

लङ्का शेफालिका टीका धातकी पञ्जिका ऽऽढकी ॥

1 City. 2 Nyctanthes arbortristis. 3 Commentary, annotations; a journal 4 Grislea tomentosa. 5 A calender. 6 Cytisus cajan.

7 Plant. 8 A bird. 9 Hiccough. 10 A gadfly. 11 Firebrand. 12 An Ant.

८ सिध्रका सारिका हिक्का प्राचिकोल्का पिपीलिका ।

13 Diospyros melanoxylon.

तिन्दुकी कणिका भङ्गिः सुरङ्गा-सूचि-माढयः ॥

14 Atom spark. 15 Fracture Decaption; Wave; Irony. 16 Mine opening. 17 Needle. 18 Young leaves.

घटा, सृजा, भिदा। अ प्रत्ययात् ($\frac{३।३।१०३}{३२७९}$)–चिकीर्षा, पुत्रीया। कृञः श च ($\frac{३।३।१००}{३२७७}$)–क्रिया, इच्छा ॥ ४ ॥ उणादौ न्यन्त ऊदन्त ईदन्तश्च स्त्रियां–अरणिः, धमनिः, हानिः, ज्यानिः, ग्लानिः, अलाबूः, जम्बूः, लक्ष्मीः, तन्त्रीः। ङ्यन्तमाबन्त-मूङन्तं चाभिधेयलिङ्गं रूढिलिङ्गं च स्त्रियां–पुंस इयं पौंस्नी बुद्धिः, हिमानी, अजा, बलाका, श्वश्रूः, ब्रह्मबन्धूः। मुष्टिः प्रहरणं यस्यां क्रीडायां मौष्टा, पल्लवाः प्रहरण-मस्यां पाल्लवा, तदस्यां प्रहरणमिति क्रीडायां णः ($\frac{४।२।५७}{२२६६}$), ण दिक्–णप्रत्ययोदाह-रणमित्यर्थः ॥ ५ ॥ दण्डपातोऽस्यां फाल्गुन्यां वर्तते, श्येनपातोऽस्यां मृगयायां वर्तते, तिलपातोऽस्यां स्वधायां वर्तते, घञः सास्यां क्रियेति ञः, ($\frac{४।२।५८}{२२६७}$) श्येनतिलयोः पाते ञे ($\frac{६।३।७१}{२२६९}$) इति मुक्, स्वधास्यस्यां स्वधा श्राद्धम् ॥ ६ ॥ अपचयेऽल्पत्वे यदि वक्तुमिच्छा तदा मृणाल्यादयः स्त्रीलिङ्गाः स्युः। अपचयेऽपचयस्थानलक्षणानि हि स्त्रीपुंनपुंसकानि। आदिशब्दाद्मृणाली, तटी, मठी, छत्त्रिका, गृह्यकाण्डी। काचि-दिति यत्र लोके पुंनपुंसकयोः स्त्रीत्वं दृश्यते, न सुखादौ। लङ्का राक्षसपुरी। शेफालिका पुष्पविशेषः। टीका वृत्तिः। धातकी नामौषधिः। पञ्जिका न्यासः। आढकी व्रीहिभेदः, स्वल्पाढकं च ॥ ७ ॥ सिध्रकाशारिके वृक्षभेदौ। हिक्का–ऊर्ध्वं वातप्रवृत्तौ शब्दः। प्राचिका पक्षिविशेषः। उल्का ज्वाला। पिपीलिका वल्मीककृमिः। योत्राप्रसिद्धः

CC-0. Agamnigam Digital Preservation Foundation Chandigarh

19 Scum. Gum. 20 Criticising. ९ पिच्छा-वितण्डा-काकिण्यश् चूर्णिः शाणी द्रुणी दरत् ।
21 Measure. 22 Selected argument. 23 Grindstone a curtain.
24 Centipede. 25 Barbarian.

26 Extreme pain. Destruction. सातिः कन्था तथा ऽऽसन्दी नाभी राजसभा ऽपि च॥
27 A rug. 28 Bed. 29 Navel. 30 The royal court.

31 Cymbals. 32 Rejoicing. १० झल्लरी चर्चरी पारी होरा लटवा च सिध्मला ।
33 Cup. 34 Rising of Zodiacal sign Astrology. 35 plant. 36 Leprosy.

37 Lac. 38 Nit. 39 Mouthful water. लाक्षा लिक्षा च गण्डूषा गृध्रसी चमसी मसी. ॥
40 Gout 41 Spoon. 42 Ink.

इति स्त्री-लिङ्ग-संग्रहः ।

The following are masculine viz. ११ पुंस्त्वे स-भेदाऽनुचराः स-पर्यायाः सुराऽसुराः ।
(*a*) Nouns signifying gods, Demons.

Heaven, sacrifice, mountain, cloud, Sea, tree, time, school, arrow, enemy. स्वर्ग-यागाऽद्रि-मेघाऽब्धि-द्रु-कालाऽसि-शराऽरयः ॥

प्रागनुक्तो वा स प्रातिपद्येनोच्यते, अतः शनैर्याति पिपीलिक (सु. र. पृ. ४६१) इति पुंस्त्वमनिषिद्धम्। एवं सर्वत्र। तिन्दुकी नाम वृक्षः फलं च। कणिका–अल्पकणः–गोधूम-पिष्टं च। भङ्गिर्विच्छित्तिः। सुरङ्गा तिर्यग्भूखातः। सूचिः सीवनी। माढिर्नाम देशः कवचं च ॥ ८ ॥ पिच्छा–आचामः। वितण्डा स्वपक्षस्थापना (नो) हीनो जल्पः (न्या. सू. १-२-३ पू. ओ.)। काकिणी नाम माषकचतुर्थभागः, पणचतुर्थभाग इत्येके। काकि-नीति सभ्याः। चूर्णिर्भाष्यम्। शाणी निकषः, शाण इत्येके, काणीपाठे संकोचोऽर्थः। द्रुणी कर्णजलौका। दरद् म्लेच्छजातिः। सातिः प्रावारविशेषः। कन्था खण्डैः स्यूतं वासः। आसन्दी पीठिका। नाभी तुन्दिः। राज्ञः सभा राजसभा, सभा राजामनुष्य-पूर्वेति ($\frac{२।४।२३}{८२६}$) राजनिषेधात्स्त्रीत्वम् ॥ ९ ॥ झल्लरी वाद्यविशेषः। चर्चरी हर्षक्रीडा। पारी पानभाण्डम्। होरा लग्नं जातकं च। लट्वा–अलका भ्रमरकाश्च। सिध्मला पामा णलः श्वित्रं च। लाक्षा जतुः। लिक्षा यूकागर्भः। गण्डूषा–आस्यचुलुकं, गण्डूषोऽपि। गृध्रसी–ऊरुसंधौ वातरुक्। चमसी मसूरादिपिष्टं स्वल्पचमसश्च। मसी रञ्जनी। इति स्त्रीलिङ्गशेषः ॥ १० ॥ सुरा असुरास्ताद्विशेषास्तदनुचराश्च पर्यायैः सह पुंसि। सुरा दिवौकसः, सुरविशेषाः–इन्द्रो विडौजाः शक्रः, आदित्यः सूर्यो रविः, ब्रह्मा स्वयंभूः, विष्णुः शौरिः, रुद्रः शंभुः। विष्णोरनुचराः–चण्डः प्रचण्डः, जयो विजयः, विष्वक्सेनः। रुद्रानुचराः–नन्दी महाकालो भृङ्गी, गणाः प्रमथाः। एवं सर्वत्र। असुराः पूर्वदेवा दैत्या दानवाः, तद्विशेषाः–विरोचनो बलिर्नमुचिः प्रह्लादः। प्राङ् नपुंसकाधिकारात्पुंलिङ्गाधिकारः। एते सभेदाः सपर्यायाः पुंसि। स्वर्गो नाकस्त्रिदिवः। यागः क्रतुः सप्ततन्तुः, तद्विशेषाः–अग्निष्टोम उक्थोऽतिरात्रः–

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

Ray of Light, hand, check, lip, arm, tooth, Throat, hair, nail, A pap.
१२ कर-गण्डोष्ठ-दोर्-दन्त-कण्ठ-केश-नख-स्तनाः, ।

(*b*) Terms ending in अह्न or अह.
अह्नाऽहाऽन्ताः, क्ष्वेड-भेदा, रात्राऽन्ताः प्रागसंख्यकाः, ।।

(*c*) Names of poisons. (*d*) Compound terms in रात्र.

(*e*) Resins and gums other exculations of trees.
१३ श्रीवेष्टाऽऽद्याश् च निर्यासा, असन्नन्ता अ-बाधिताः, ।

(*f*) Nouns in अस् or अन्.

(*g*) Nouns in तु or रु.
कशेरु-जतु-वस्तूनि हित्वा तु-रुविरामकाः, ।।

1 Root of scirpus maximus. 2 Lac. 3 A thing.

(*h*) In अ with a penult क, etc.
१४ क-प-ण-भ-म-रोपान्ता यद्यदन्ता अमी, अथ ।

(*i*) Or with a penult प्, etc.
प-थ-न-य-स-टोपान्ता, गोत्राऽऽख्याश्, चरणाऽऽह्वयाः,।।

(*j*) Names of families. (*k*) Names of portions of the *Veda*.

अप्सोर्यामः । अद्रिः पर्वतः शैलः, तद्विशेषाः–मेरुर्हेमसानुर्हिमवाम् सह्यो विन्ध्यः पारियात्रः । मेघस्तडित्वान् घनः, तद्विशेषः पुष्करावर्तकः । अब्धिः समुद्र उदन्वान्, तद्विशेषः क्षीरोदः । द्रुस्तरुः पादपः, तद्विशेषाः–आम्रस्तालश्चम्पकः । कालः समयः, तद्विशेषाः–क्षणो लवः, मुहूर्तः, मासश्चैत्रः, संवत्सरः । असिः करवालः, तद्विशेषाः–नन्दकश्चन्द्रहासः । शरः सायकः पृषत्कः क्षुरप्रः । अरिर्द्विडमित्रः ॥ ११ ॥ करः पाणिर्हस्तः । गण्डः कपोलः । ओष्ठो दन्तच्छदोऽधरः । दोर्बाहुः । दन्तो रदनः । कण्ठो गलः । केशो बालश्चिकुरः । नखः कररुहः । स्तनः पयोधरः । कृतसमासान्ताहःशब्दोत्तरपदाः पुंसि, रात्राह्नाहाःपुंसि ($\frac{१।४।३०}{८१४}$) इति–पूर्वाह्णः, मध्याह्नः, सायाह्नः । द्व्यहः, त्र्यहः, उत्तमाहः, परमाहः, राजाहःसखिभ्यष्टच् ($\frac{५।४।९१}{७८८}$), अह्नो ह्न एतेभ्यः ($\frac{५।४।८८}{७९०}$) इत्यह्नादेशः । विषविशेषाः पुंसि–क्ष्वेडो गरलः कालकूटो हलाहलः । पुंसि क्लीबे च प्रागुक्तत्वात्पुंसि प्रचुरप्रयोगार्थं विधिः । एवं सर्वत्र । विषं तु क्लीबे । असंख्यापूर्वाः कृतसमासान्ता रात्रान्ताः पुंसि–अहोरात्रः, दीर्घरात्रः, वर्षारात्रः, अहःसर्वैकदेशसंख्यातपुण्याच्च रात्रेः ($\frac{५।४।८७}{७८७}$) इत्यच्, नेह–त्रिरात्रं, षड्रात्रम् ॥ १२ ॥ श्रीवेष्टः सर्जरसः कर्चूरः । निर्यासो वृक्षद्रवः । असन्ता अन्नन्ताश्चाबाधिता अनपोदि[हि]ताः पुंसि–पुरोधाः, उशना, मज्जा, प्लीहा । अबाधिता इति किं–इदं यादो जलचरः, इदं लोम, इदं साम । ब्यच्कमसिसुसन्नन्तमित्यपवादो वक्ष्यते । कशोर्वादीनि वर्जयित्वा त्वन्ता रुशब्दान्ताश्च पुंसि–अयं वास्तुर्गृहाधारः, मस्तुः, सक्तुः, धातुः, किंशारुधान्यशूकः, त्सरुः, खड्गादिमुष्टिः, मरुर्धन्वा, ऊरुः सक्थि । नेह–इदं कशेरु जलजः कन्दः, जतु लाक्षा, वस्तु पदार्थः ॥ १३ ॥ ककरादिद्वादशाक्षरोपधा अकारान्ताः पुंसि । क–शल्कः, वृक्कः, श्वेतकः, वराटकः । प– वृक्षः, कक्षः, निकषः । ण– गणः, बाणः, कणः ।

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

(*l*) Names in घञ्, etc.
(*m*) In ल्यु, etc.
(*n*) In इमनिच्;

१५ नाम्न्यकर्तरि भावे च घञ-जब्-नङ्-ण-घाऽथुचः, ।
ल्युः कर्तरीमनिच् भावे को, घोःकिः प्राऽऽदितोऽन्यतः,॥

(*o*) In क, क्ष. (*p*) ending in कि.

(*q*) The compound term अश्ववडव.
(*r*) कान्त in composition prefixed or suffixed.

१६ द्वन्द्वेऽश्व-वडवावश्व-वडवा, न समाहृते, ।
कान्तः सूर्येन्दु-पर्याय-पूर्वो ऽयः-पूर्वको ऽपि च, ॥

भ– कुम्भः, शलभः । म– आचामः, धूमः, ग्रामः । र–अङ्कुरः, करः, दरः, समीरः । प– सर्पः, सूपः, कलापः, बाष्पः । थ-सार्थः, शपथः, नाथः । न–फेनः, हायनः, स्तनः, जनः । य–तनयः, व्ययः, तन्तुवायः । स– रसः, दासः, कुत्सः, वत्सः । ठ– सरटः, पटः, कटः । अपत्यप्रत्ययान्ताः शाखाध्यायिनश्च पुंसि–गार्ग्यः, वासिष्ठः, दाक्षिः, कठः, बह्वृचः, छन्दोगः ॥ १४ ॥ अकर्तरि च कारके संज्ञायां भावे चार्थे घञन्तादयः पुंसि । घञ्– प्र(प्रा)सीदन्त्यस्मिन्नयनमनांसीति प्र(प्रा), सादः, प्रक्रियते प्रकारः, पाकः, त्यागः, अकर्तरि च–कारके संज्ञायां (३।३।१९) घञ्। अच्– पचः चयः, नयः, पचाद्यच् नन्दिग्रहीति (३।१।१३४), एरच् (३।३।५६) । अप्– करः, भरः, स्तवः, लवः, प्लवः, ऋदोरप् (३।३।५७) । नङ्– यज्ञः, यत्नः-प्रश्नः, यजयाचयतविच्छेति (३।३।९०) नङ् । उपलक्षणत्वात्–स्वपो नन्(३।३।९१)॥ णः–न्यदनं न्यादः, नौ ण च (३।३।६०) इति णः । घः–प्रहरः, निगमः, गोचरः, पुंसि संज्ञायां घः प्रायेण (३।३।११८) । अथुच्–आनन्दथुः, श्वयथुः, वेपथुः, ष्ठितोऽथुच् (३।३।८९) । कर्तरि ल्युः पुंसि– नन्दयति नन्दनः, रमयति रमणः, नन्दिग्रहिपचेति (३।१।१३४) ल्युः । इमनिजन्ताः पुंसि– पृथोर्भावः प्रथिमा, लघिमा, पृथ्वादिभ्य इमनिज् वा (५।१।१२२) । भाव इति किं–तरिमा पृथ्वी, च[व]रिमा तपस्वी, औणादिक इमनिच् । भावे कप्रत्ययान्तः पुंसि– आखूनामुत्थानमाखूत्थो वर्तते, सुपि स्थः (३।२।४) इति योगविभागात्कः । घञर्थे कविधानं (वा० ३।३।२०४)– प्रस्थः, प्रस्नः । प्रादित उपसर्गादन्यतः सुबन्ताच्च पराद् घुसंज्ञकात्परो यः किप्रत्ययस्तदन्तः पुंसि– निधिः, प्रधिः, आधिः, आदिः, उपसर्गे घोःकिः (३।३।९२), अब्धिः, इषुधिः, कर्मण्यधिकरणे च (३।३।९३) इति किः ॥ १५ ॥ समाहारादन्यत्र द्वन्द्वेऽश्ववडवौ–अश्ववडवाः पुंसि, द्वित्वबहुत्वयोरुदाहृतम् । नेह–अश्ववडवं, विभाषा वृक्षमृगेति (२।४।१२) समाहारविकल्पः । सूर्यादिपूर्वः कान्तशब्दः पुंसि– सूर्यकान्तः, भास्वत्कान्तः, इन्दुकान्तः, चन्द्रकान्तः,

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh

(s) The nouns here enumerated.

१७ वटकश् चा ऽनुवाकश् च रल्लकश् च कुडङ्गकः ।
1 Pulse. 2 Hymn of Vedas. 3 Deer ; eyelid. 4 Tree ; Root ; House ; Arrowhead.

पुङ्खो न्यूङ्खः समुद्गश् च विट-पट्ट-धटाः खटाः ॥
5 Feather. 6 Sam veda. 7 Box. 8 Sodo-aite. 9 Cloth. 10 A balance. 12 Grass.

१८ कोट्टार-घट्ट-हट्टाश् च पिण्ड-गोण्ड-पिचण्ड-वत् ।
13 Townwell. 14 A wharf. 15 A market. 16 Bump of food. 17 Mountaineers. 18 Abdomen.

गडुः करण्डो लगुडो वरण्डश् च किणो घुणः ॥
19 Goitre. 20 A box. 21 A staff. 22 Multitude. 23 Scar. 24 Insect.

१९ दृति-सीमन्त-हरितो रोमन्थोद्गीथ-बुद्बुदाः ।
25 Bellows. 26 Dressing of hair. 27 Green colour. 28 Chewing the cud. 29 Samveda. 30 Bubble of water.

कासमर्दो ऽर्बुदः कुन्दः फेन-स्तूपौ स-यूपकौ ॥
31 The plant. 32 Hundred million. 33 Lathe 34 Form. 35 Mound of Earth. 36 A post.

२० आतपः क्षत्रिये नाभिः कुणप-क्षुर-केदराः ।
37 Sun shine. 38 A soldier. 39 A spear. 40 A razor. 41 Plant.

पूर-क्षुर-प्रचुक्राश् च गोल-हिङ्गुलु-पुद्गलाः ॥
42 A wave. 43 Arrow. 44 Sorrel. 45 Globe. 46 Vermilion. 47 Soul. Body.

अयस्कान्तः ॥ १६ ॥ वटको भक्ष्मविशेषः । अनुवाक् ऋग्यजुःसमूहः । रल्लकः पक्ष्मकम्बलः । कुडङ्गको वृक्षलतागहनम् । पुङ्खः काण्डमूलम् । न्युङ्ख ओंकाराः षोडश । समुद्गः करण्डकः । विटः कामुकानुचरः । पट्ट उष्णीषादिः । धटो दारुतुला । खटस्तृणम् ॥ १७ ॥ कोट्टो दुर्गः । अरघट्टो महाकूपः । हट्ट आपणः । पिण्डो ग्रासः । गौडो गुडको देशविशेषो वा । पिचण्ड उदरम् । गडुर्गण्डः (कपोलः)। करण्डः समुद्गः । लगुडो यष्टिः । वरण्डः समूहः । किणो मांसग्रन्थिः । घुणो दारुकृमिः ॥ १८ ॥ दृतिर्भस्त्रा । सीमन्तः केशसीम्नोऽन्तः, शकन्ध्वादित्वात्पररूपम् ($\frac{३६३२}{७९}$)। हरिन्नीलो वर्णः, दिक्पर्यायस्तु स्त्रीलिङ्गः प्राग्वचनात् । रोमन्थस्तिरश्चां चर्वितचर्वणम् । उद्गीथ ओंकारः । बुदबुदोऽम्बुस्फोटः । कासमर्दो वेसवारभेदः । अर्बुदोऽद्रिर्व्याधिः संख्याभेदश्च । कुन्दा माध्यं पुष्पम् । फेनो डिण्डीरः । स्तूपो मृदादिकूटः । यूपो यज्ञे पशुबन्धनकाष्ठम् ॥१९॥ आतपोऽर्कोद्द्योतः। क्षत्रियपर्याया नाभिः, नेह–इयं नाभिस्तुन्दिः । कणपः प्रासविशेषः । क्षुरो नापितभाण्डम् । केदरो रूपकम् । पूरस्तोयोल्लासः । क्षुरप्रः काण्डभेदः । चुक्रोऽम्ललव्यजनम् । गोलो वर्तुलः पिण्डः, यथा भूगोलः । हिङ्गुलुः–रागद्रव्यम्, अकारान्तोऽयत्मियेके ।

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh

48 Ghost.
49 Javelin.
50 Wrestler. 51 Oblation. 52 Battle axe.
53 A Dish of half boiled rice.
54 Joy. 55 Shallow boiler. 56 A spitting pot.

२१ वेताल-भल्ल-मल्लाश् च पुरोडाशो ऽपि पट्टिशः ।
कुल्माषो रभसश् चैव स-कटाहः पतद्ग्रहः ॥

इति पुंल्लिङ्ग-शेष-संग्रहः ।

(A) The following are neuter : viz.
(a) Nouns signifying sky, forest, leaf, hole, frost, water, cold, heat, flesh, blood, mouth, eye, wealth, army,

२२ द्वि-हीने ऽन्यच् च खाऽरण्य-पर्ण-श्वभ्र-हिमोदकम् ।
शीतोष्ण-मांस-रुधिर-मुखाऽक्षि-द्रविणं बलम् ॥

fruit, gold, copper, iron, pleasure, pain, good luck, ill luck.
Water, flower, salts, same, perfumes.

२३ फल-हेम-शुल्ब-लोह-सुख-दुःख-शुभाऽशुभम् ।
जल-पुष्पाणि लवणं व्यञ्जनान्यनुलेपनम् ॥

(B) Numerals above 100.
(b) Dissyllables in अस् इस् उस् or अन्.

२४ कोट्याः शताऽऽदि-संख्याऽन्या, वा लक्षा, नियुतं च तत् ,।
द्व्यच्कमसिसुसन्नन्तं, यदनाऽन्तम-कर्तरि, ॥ (c) Nouns in अन्.

पुद्गलो जीवः ॥ २० ॥ वेतालो भूताविष्टः शवः । भल्लः काण्डभेदः । पुरोडाशो यज्ञे पिष्टपूपः । पट्टिशो नामायुधम् । कुल्माषोऽर्धस्विन्नो माषादिः । रभसः पौर्वापर्याविचारः । कटाहो द्रव्यपचनभाण्डम् । पतद्ग्रहः–अवेलकाधारः ॥ २१ ॥ इति पुंलिङ्गशेषः । द्विहीने तृतीये नपुंसके, उक्तादन्यः शेषो वक्ष्यतेः इत्यर्थः । खादि सपर्यायविशेषं तृतीये । खमिन्द्रियमाकाशं चोच्यत–खमिन्द्रियं हृषीकं करणं, खं गगनमन्तरिक्षम् । अरण्यं विपिनं कान्तारम् । पर्णं पलाशं दलम् । श्वभ्रं विवरं सुषिरम् । हिमं प्रालेयं तुहिनम् । उदकं पानीयं तोयम् । शीतं शिशिरम् । उष्णं घर्मम् मांसं तरसं पलम् । रुधिरं रक्तमसृक् । मुखं तुण्डमास्यम् । आक्षि नयनं लोचनम् । द्रविणं धनं स्वापतेयम् । बलं सैन्यमनीकम् ॥ २२ ॥ फलविशेषः–आम्रं पनसं कपित्थम् । हेम सुवर्णं कार्तस्वरम् । शुल्बं ताम्रमौदुम्बरम् । लोहमश्मसारम् । सुखमुपजोषं शान्तम् । दुःखमाभीलं कृच्छ्रम् । शुभं पुण्यं सुकृतम् । अशुभं पापं दुष्कृतम् । जलपुष्पभेदाः–अम्बुजं कुमुदमिन्दीवरं कह्लारम् । लवणभेदाः–सैन्धवमौद्भिदं बिडं रुचकम् । व्यञ्जनभेदाः–व्यञ्जनमुपसेचनं दधि दुग्धमुदश्विन्मस्तु । अनुलेपनभेदाः–[अनुलिप्यते] अनुलेपनं कुङ्कुममग्निशिखं काश्मीरं चन्दनं श्रीखण्डम् ॥ २३ ॥ भयानृ[मृ]तशकृद्वक्त्रा (स्तु)चापाभरणलाङ्गलम् । दावौषधमृधापत्यहृदयोदरकाकुदम् ॥ पत्तनाजिरशृङ्गान्नद्वारबर्होडुमानसम् । ध्वान्तं चाव्यक्तलिङ्गं च भणितौ यत्प्रयुज्यते ॥ कोटेरन्या शतादिका संख्या तृतीये–शतं सहस्रमयुतं, नेह–इयं कोटिर्लक्षशतम् । शतादिरिति किं–इयं त्रिंशत् , इयं नवतिः ।

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh

(*d*) In त्र, स and ल. २५ त्राऽन्तं, स-लोपधं, शिष्टं, रात्रं प्राक्-संख्यया ऽन्वितम्, ।
(*e*) With स् and ल् as penult. (6) In रात्र with a numeral.
(*f*) Compounds in पात्र. पात्राऽऽद्यदन्तैरेकाऽर्थो द्विगुर् लक्ष्याऽनुसार-तः, ॥

(*g*) Nouns compounded copulatively or adverbially. २६ द्वन्द्वैकत्वाऽऽव्ययीभावौ, पथः संख्याऽव्ययात् परः, ।
(*h*) पथिन्, with a numeral or particle.
(*i*) छाया, with a word in the 6th case. षष्ठ्याश् छाया बहूनां चेद् विच्छायं, संहतौ सभा ॥
shadow of a flock of birds.
(*j*) सभा in composition with the 6th case.

लक्षशब्दस्तृतीये वा, पक्षे स्त्रिया निर्देशात्, यथा–कियती पञ्चसहस्री कियती लक्षाथ कोटिरपि कियती। औदार्योन्नतमनसां रत्नवती वसुमती कियती॥ इदं लक्षं तदेव प्रयुताख्यमित्यभिधानशेषोऽपि। असन्तमिसन्तमुसन्तमन्नन्तं च यद् द्विस्वरं तत्तृतीये–इदं यशस्तेजः पयः सर्पिर्वर्हिर्यजुर्धनुः, इदं नाम रोम नर्म पर्व। अकर्तरि यदनप्रत्ययान्तं तत्तृतीये–साध्यतेऽनेनेति साधनं, अधिक्रियतेऽस्मिन्नधिकरणं, पाकः पचनम्। कर्तरि तु मधुसूदनः, रमणः, मदनः। कथमास्थानमास्थानी, करणं करणी, प्रमाणं प्रमाणी, अधिकरणमधिकरणी, राजधानं राजधानी ल्युटष्टित्वात्, किं च, कृत्यल्युटो बहुलम् ($\frac{३।३।११३}{२८४१}$) इत्यनान्तानां त्रिलिङ्गत्वं स्म[स्व]रन्ति–राजभोजनी क्षैरेयी, राजभोजनः शालिः, राजभोजनं भक्तम्, इध्मव्रश्चनी शस्त्री, इध्मव्रश्चनः परशुः, इध्मव्रश्चनं शस्त्रम्, पलाशशातनी, पलाशशातनः, पलाशशातनम्, पूरणी, पूरणः, पूरणम्, गोदोहनी घटी, गोदोहनो घटः, गोदोहनं माण्डम्॥ २४॥ केवलं त्रान्तं, सकारनकारोपधं त्रशब्दान्तं च, शिष्टं प्रागुक्तादन्यच्छब्दरूपं तृतीये–पात्रं, अमत्रं, दात्रं, कलत्रं, शस्त्रं, वस्त्रं, शास्त्रं, अन्त्रं, तन्त्रं, यन्त्रम्। शिष्टमिति किं–पुत्रः, औपवस्त्रः, मन्त्रः। संख्यापूर्वं रात्रान्तं तृतीये, रात्रा ह्नाहाः पुंसीति ($\frac{३।४।२०}{८९४}$) पुंस्त्वं प्राप्तम्–तिसृणां रात्रीणां समाहारस्त्रिरात्रम्, एवं पञ्चरात्रं, षड्रात्रम्। संख्ययेति किं–वर्षारात्रः। पात्रादिभिरकारन्तैरुत्तरपदैः समाहारे लक्ष्यानुसारेण यो द्विगुः स तृतीये–पञ्चपात्रं, त्रिभुवनं, त्रिपुरदाहमुमापतिसेविनः (किरातार्जु० ५-१४), चतुर्युगम्। पात्रादीति किं–त्रिलोकी, त्रिवेदी। एकार्थ इति किं–पञ्चकपालः पुरोडाशः। लक्ष्यानुसारत इति किं–त्रिपुरी, पञ्चमूलीश्रृतं पयः॥ २५॥ द्वन्द्वस्य यदेकत्वं समाहारोऽव्ययीभावश्च समासस्तृतीये–इदं पाणिपादं, मार्दङ्गिकपाणविकं, स्त्रीषु कथा वर्तत इदमधिस्त्रि, इदं तिष्ठद्गु कालः, इदमुन्मत्तगङ्गं देशः। संख्याव्ययाभ्यां परः कृतसमासान्तः पथिशब्दस्तृतीये–त्रयाणां पथां समाहारस्त्रिपथं, विरुद्धः पन्था विपथं, कुत्सितः पन्थाः कापथम्। संख्याव्ययादिति किं–धर्मपथः। षष्ठ्यन्तात्परा

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

(C) Words showing multitude.
1 Multitude of female slaves; 1 King's palace; a meeting of Kings. 1 Multitude of demons.

२७ शालाऽर्था ऽपि परा राजाऽमनुष्याऽर्थादराजकात्, ।
दासीसभं नृपसभं रक्षःसभमिमा दिशः, ॥

(*k*) So in उपज्ञा, and उपक्रम.
The creation by Brahma.

२८ उपज्ञोपक्रमाऽन्तश् च तदाऽऽदित्व-प्रकाशने, ।
कोपज्ञ-कोपक्रमाऽऽदि, कन्थोशीनर-नामसु, ॥

(*j*) Also कन्था etc.

(*k*) Nouns in affixes having an abstract sense.
(*l*) In अह, with certain terms.

२९ भावे न-ण-क-चिद्-भ्यो ऽन्ये समूहे भाव-कर्मणोः ।
अदन्त-प्रत्ययाः; पुण्य-सुदिनाभ्यां त्वहः परः, ॥

(*m*) With terminations in अ.

कृतसमासान्ता छाया तृतीये बहूनां चेत्–गृध्राणां छाया गृध्रच्छायं, वीनां छाया विच्छायं, शलभच्छायं, छायाबाहुल्ये ($\frac{२।२।२२}{८२५}$) इति नपुंसकम्। बहूनामिति किं–वृक्षस्य च्छाया वृक्षच्छाया। षष्ठ्याः परा समासे समूहार्था सभा तृतीये–दासीनां सभा दासीसभं दासीसमूह इत्यर्थः, ब्राह्मणसभं, अशाला च ($\frac{२।४।२४}{८२७}$) इति नपुंसकम्। संहताविति किं–दास्याः सभागृहं दासीसभा ॥ २६ ॥ राजार्थेभ्योऽमनुष्यार्थेभ्यश्च षष्ठ्यन्तेभ्यः परा समूहार्था शालार्थापि सभा तृतीये, राजशब्दपरा चेन्न स्यात्–नृपस्य सभागृहं नृपाणां समूहो वा नृपसभं, ईश्वरसभं, रक्षःसभं, पिशाचसभम्। अराजकादिति किं–राजसभा, सभाराजामनुष्यपूर्वा ($\frac{२।४।२३}{८२६}$) इति नपुंसकम्। इमा दिश इमान्युदाहरणानीत्यर्थः ॥ २७ ॥ उपज्ञायत इत्युपज्ञा, उपक्रम्यत इत्युपक्रमः, तदन्तः शब्दः षष्ठीसमासे तदादिकथने द्योत्ये तृतीये–यथा कास्योपज्ञा कोपज्ञं सर्गः, चन्द्रोपज्ञमसंज्ञकं व्याकरणं, पाणिन्युपज्ञमकालं(लकं) व्याकरणं, कस्योपक्रमः कोपक्रमं सृष्टिः, नन्दोपक्रमाणि मानानि। तदादित्व इति किं–डित्थोपज्ञो रथः, चैत्रोपक्रमो घटः, उपज्ञोपक्रमं तदाद्याचिख्यासायाम् ($\frac{२।४।२८}{८२४}$) इति नपुंसकम्। उशीनरदेशे या कन्था षष्ठ्याः परा सा संज्ञाया गम्यमानायां तृतीये–सौशमीनां कन्था सौशमिकन्थम्। उशीनरेति किं–दाक्षिकन्था। नामस्विति किं–चैत्रकन्था, संज्ञायां कन्थोशीनरेषु ($\frac{२।४।२०}{८२३}$) इति नपुंसकम् ॥ २८ ॥ नणकेभ्यश्चकारानुबन्धेभ्यश्च येऽन्ये भावेऽर्थे कृतस्तथा समूहेऽर्थे भावकर्मणोश्च ये तद्धितास्ते ते प्रत्यया येषां ते शब्दास्तृतीये–समन्ताद्भावः सांराविणं वर्तते, सांकूटिनं वर्तते, अभिविधौ भाव इनुण् ($\frac{३।३।४४}{३२१८}$), अणिनुणः ($\frac{५।४।१५}{३२१९}$) इति स्वार्थेऽण्। ब्रह्मणो भवनं ब्रह्मभूयं गतः, भुवो भावे ($\frac{३।१।१०७}{२८५५}$) इति क्यप्। नणकचिद्भ्योऽन्य इति किं–(न)–प्रश्नः, यत्नः, (ण)–न्यदनं न्यादः, नौ ण चेति ($\frac{३।३।६०}{३२३७}$), (क)–आखूनामुत्थानमाखूत्थः, सुपि स्थः ($\frac{३।२।४}{२९१६}$) इति योग-

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh

(n) Adverbs and epithets of indeclinables. ३० क्रियाऽव्ययानां भेदकान्येकत्वे ऽप्युक्थ-तोटके ।

(o) The nouns here specified. चोचं पिच्छं गृहस्थूणं तिरीटं मर्म योजनम् ॥

1 Half eaten food. A palm fruit; A cocoanut. 2 Peacock's tail.
3 House-pillar. 4 Turban. A diadem. 5 A joint. 6 Long measure.

7 Grand sacrifice. 8 Sacrifice. 9 Prose a woman. 10 Verse; sugar. ३१ राजसूयं वाजपेयं गद्य-पद्ये कृतौ कवेः ।

11 Gem. 12 Commentary. माणिक्य-भाष्य-सिन्दूर-चीर-चीवर-पिञ्जरम् ॥

13 Minium. 14 Bark. Rag. 15 Dress of a mendieant. 16 A cage.

17 Atheistical philosophy. 18 Yellow orpiment. 19 Basket. 20 Caldron. 21 Country. ३२ लोकायतं हरितालं विदल-स्थाल-बाह्लिकम् ।

इति नपुंसक-शेष-संग्रहः ।

(a) The nouns here specified are masculine and neuter. पुन्-नपुंसकयोः शेषोऽर्धर्च-पिण्याक-कण्टकाः ॥

1 Half a verse of Vedas. 2 Oil cake.
3 Thorn, A fault; Horripilation.

